# Shri Tamraparni Mahatmyam

# શ્રીતામ્રપર્ણીમાહાત્મ્યમ્

## Document Information

Text title : tAmraparNImAhAtmyam

File name : tAmraparNImAhAtmyam.itx

Category : devii, devI, nadI, mAhAtmya

Location : doc_devii

Acknowledge-Permission: Sri K.A.L.V.I. trust, Sringeri Jagadguru Maha Samsthanam, K.Bhoothanathan and family

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2023

*sanskritdocuments.org*

# શ્રીતામ્રપર્ણીમાહાત્મ્યમ્

Contents  વિષયસૂચિકા

1. Foreword
2. Introduction
3. TOC of 64 Chapters  ૬૪ અધ્યાયાનાં વિષયક્રમાણિ
4. tAmraparNImAhAtmyam in detail તામ્રપર્ણીમાહાત્મ્યમ્ અધ્યાય ૧-૬૪
5. Appendix
6. Conclusion

## 1. Foreword

shrI tAmraparNImAhAtmyam has been written in manuscript by vidyAratnam N.Ramasubrahmanya Sastrigal, residing at Suttamalli, a village near Tirunelveli, Tamil Nadu, with the help of palm leaf manuscript obtained from Andi Vadyar, Tirunelveli. That manuscript written by vidyaratnam, has got the blessings of Sringeri Mutt and Kanchi Kamakoti Mutt. vidyAratnam has composed shrI tAmraparNIsahasranAmAvali : with a copyright publication which is available with vidyAratnam .

## 2. Introduction

shrI tAmraparNImAhAtmyam is a portion of shaivapurANam. It consists of 6400 verses divided into 64 chapters. vidyAratmnam shrI rAmasubrahmaNya shAstrI obtained this work in palm leaf manuscript from Aandi vadyar of Tirunelveli. Mr.Sastri made a

rough copy in paper manuscript. His desciple Mr.K.Bhoothanathan made two paper manuscripts one in Tamil and the other in Devanagari script and handed over Devanagari manuscript to his Guru and the Tamil manuscript is kept with K.Bhoothanathan. The following is the transliteration done from Tamil to Devanagari script by K.Bhoothanathan with the help of his family members which consists of his wife B.Visalakshi alias Vasanti, son Mr B.K.S.Gokul, daughter-in-law Usha Meenakshi, grand daughter Visalakshi Aashrita and grand son G.B.Aaditya Sairaj.

# શ્રીતામ્રપર્ણીમાહાત્મ્યમ્

## 3. TOC of 64 Chapters ૬૪ અધ્યાયાનાં વિષયક્રમાણિ

અધ્યાયમ્ વિષયાણિ

૧. શૈલેન્દ્રકન્યાયાઃ ઉત્પત્તિઃ - વિવાહપ્રસ્તાવઃ
૨. દક્ષિણદિશિ તામ્રપર્ણ્યા સહ અગસ્ત્યસ્ય આગમનમ્
૩. મલયાચલેન અગસ્ત્યાનીતાયાઃ તામ્રપર્ણ્યાઃ પુત્રીત્વેન સ્વીકરણમ્
૪. અગસ્ત્યેન વૈષ્ણવમતનિરાકરણપૂર્વકં શૈવમતસ્થાપનમ્
૫. ત્રિકૂટાચલમાહાત્મ્યમ્
૬. ચિત્રાનદ્યાઃ રોદિનીનદ્યાશ્ચ ઉદ્ભવઃ
૭. વજ્રાઙ્ગદશાપનિવૃત્તિઃ શિવશૈલે ઘટનોત્પત્તિનિરૂપણમ્
૮. હયગ્રીવાશ્રમં પ્રતિ અગસ્ત્ય આગામનમ્
૯. વીરસેન-શઙ્ખયોર્સંવાદઃ
૧૦. તામ્રપર્ણી-સમુદ્રયોર્વિવાહઃ - શ્રીપુરમ્
૧૧. બાણતીર્થમાહાત્મ્યમ્
૧૨. વૃષાઙ્કનગરે કાદમ્બરીવને તામ્રાયાઃ સાગરે પ્રવેશપ્રસ્તાવઃ (આત્તૂર્)
૧૩. કાદમ્બરીવનમાહાત્મ્યવર્ણને બ્રહ્મતપસ્થાન વર્ણનમ્
૧૪. બ્રહ્મકૃતો વિષ્ણુસ્તવઃ
૧૫. તામસીશાપવિમોચનમ્
૧૬. વેણુવનમાહાત્મ્યમ્ - તિરુનેલ્વેલિ
૧૭. ગૌતમાશ્રમે અગસ્ત્ય આગમનેન રાક્ષસીપૈશાચયોઃ મોચનં
સુરેન્દ્રમોક્ષાદિકથનં અગસ્ત્યકૃતા પુટાર્જુનેશ્વરસ્તુતિઃ
૧૮. અગસ્ત્યકૃતા ગોષ્ઠીશ્વરલિઙ્ગપ્રતિષ્ઠાપનપૂર્વિકા
ગોષ્ઠીશ્વરસ્તુતિઃ (ઊર્ક્કાડુ -ઉહિર્ક્કાડુ - નખારણ્યમ્)
૧૯. ઇન્દ્રકીલાદિક્ષેત્રાગમનપૂર્વકં સ્વાશ્રમં પ્રતિ અગસ્ત્યસ્ય આગમનમ્
૨૦. તામ્રપર્ણ્યાઃ મુખે એનોપજનસમ્બન્ધકૃતનીલિમા અપનોદનાય
ઇન્દ્રકીલક્ષેત્રે શામ્ભવવ્રતાનુષ્ઠાનાય અગસ્ત્યેન
તામ્રપર્ણી પ્રતિ ઉપદેશઃ ।

તામ્રપર્ણ્યા ઇન્દ્રકીલનામ પ્રતિ કૃતપ્રશ્નોત્તરસમયેન્દ્રેણ
વૃત્રવધાય દધીચીમહર્ષેઃ અસ્થિયાચનં તદ્દાનાય તેન દેહત્યાગઃ
૨૧. વિશ્વકર્મનિર્મિતવજ્રાયુધેન વૃત્રહનનમ્ ।
તામ્રપર્ણ્યાઃ શામ્ભવવ્રત અનુષ્ઠાનેન પાપવિમોચનમ્ ।
સ્વસ્થાનગમનમ્ ।
૨૨. તામ્રપર્ણ્યાઃ ઉત્પત્તિમારભ્ય સઙ્ગમપર્યન્તં
વિદ્યમાનાનાં તીર્થાનાં નામધેયાનિ
૨૩. ૨૪. શ્યેનોપાખ્યાનમ્ - કાળહસ્તીશ્વરઃ - ચાટ્ટુપ્પત્તુ
૨૫. યમગીતા
૨૬. શ્યેનપારાવતાનાં પુણ્યલોકગમનમ્, દ્વિજસુતસ્ય ચ તામ્રપર્ણી
પ્રસાદાત્ બ્રહ્મપદપ્રાપ્તિઃ - શાલાતીર્થમ્ - કિડારઙ્ગુળમ્
૨૭. વસુમના ઇતિ નામ્ના રાજ્ઞા અગસ્ત્યવચનેન તામ્રપર્ણ્યાં -
સ્નાનપૂર્વકં કાશ્યપતીર્થે યાગઃ કૃતઃ - વિક્રમસિંહપુરમ્
૨૮. દેવાનાં રક્ષણાય તપઃકુર્વતોઃ અદિતિકાશ્યપયોઃ તામ્રપર્ણ્યા વરપ્રદાનમ્ ।
કાશ્યપેન લિઙ્ગપ્રતિષ્ઠા - અમ્બાસમુદ્રમ્
૨૯. કાશ્યપેન ઈશ્વરસ્તુતિઃ ।
શિવશર્માખ્યસ્ય બ્રાહ્મણસ્ય કાશ્યપ- તીર્થાદિસ્નાનપૂર્વકં
કાશ્યપં પ્રતિ પ્રશ્નઃ ।
૩૦. દીપિકેશ્વરોદ્ભવઃ
૩૧. કાશ્યપસ્ય નારદેન સહ બ્રહ્મલોકગમનમ્ ।
ગજેન્દ્રમોક્ષણકથા- પ્રશ્નઃ ।
૩૨. ગજેન્દ્રમોક્ષણકથાવર્ણનમ્ - વીર, કરુણા, ભક્તિ
૩૩. દુર્ગાતીર્થવૈભવવર્ણનમ્ - શ‍ૃઙ્ગાર, શોક - અરિયનાયકીપુરમ્
૩૪. દુર્ગયા રાજ્ઞો વરપ્રદાનમ્ ।
મણિગ્રીવપુરકથાપ્રશ્નઃ ।
૩૫. મણિગ્રીવકથા - મણિગ્રીવશાપવિમોચનમ્
૩૬. સોમતીર્થમાહાત્મ્યમ્ - શેર્માદેવી
૩૭. નાદામ્બુજક્ષેત્રમાહાત્મ્યમ્ - શેર્માદેવી
૩૮. નાદામ્બુજક્ષેત્રે વ્યાસસ્ય ગમનમ્
૩૯. ૪૦. રોમશતીર્થપ્રસ્તાવઃ(શાર્ઙ્ગઃ) - કોડકનલ્લૂર્
૪૧. રોમશતીર્થવૈભવવર્ણનમ્
૪૨. દૌર્વાસતીર્થમાહાત્મ્યમ્ - કરિશૂળન્દમઙ્ગલમ્

૪૩. છાયાતીર્થમાહાત્મ્યમ્
૪૪. જ્યોતિર્વનમાહાત્મ્યમ્
૪૫. જ્યોતિર્વનમાગત્ય સ્નાત્વા શિવારાધનં
   કૃત્વા ભગસ્ય નષ્ટ- નયનયુગલપ્રાપ્તિઃ
૪૬. જ્યોતિર્વને કુમ્ભાટકનામ્નઃ કસ્યચિત્ રાજ્ઞઃ માતૃહત્યા- મોચનમ્
૪૭. જ્યોતિર્વને કચાવત્યાઃ તામ્રાસ્નાનમહિમ્ના ભર્તૃત્વપ્રાપ્તિઃ
૪૮. કુમ્ભાટકસ્ય, હારીતસ્ય, કચાલિકાયાશ્ચ તપઃકરણમ્- (ષડ્જપાલઃ)
૪૯. ગન્ધર્વતીર્થમહિમવર્ણનમ્ - શુદ્ધમલ્લી
૫૦. ગન્ધર્વરાજસિદ્ધિઃ
૫૧. શ્યામનદીસઙ્ગમે જ્યોતિર્વને શ્રીવલધિ નામ્ના
   રાજ્ઞા લિઙ્ગત્રય- પ્રતિષ્ઠા
૫૨. મન્ત્રતીર્થમાહાત્મ્યમ્ - ઓમનલ્લૂર્
૫૩. વહ્નિ(અગ્નિ)તીર્થપ્રસ્તાવઃ - તરુવૈ
૫૪. વહ્નિતીર્થમાહાત્મ્યમ્
૫૫. રામતીર્થ, જટાયુતીર્થમાહાત્મ્યમ્ - અરવઙ્ગુળમ્
૫૬. ચિત્રાનદીસઙ્ગમે વનમહિમવર્ણનમ્ - શ્રીવિલિપ્પેરિ
૫૭. વિષ્ણુવને દોષનિલયપ્રસ્તાવઃ
૫૮. વિષ્ણુવને વિષ્ણુપ્રસાદાત્ વિશ્વેષાં દેવાનાં પિતૃશાપવિમોચનમ્
૫૯. વિષ્ણુવને ચક્રરાજસ્ય વિમોચનમ્,
   જન્મનિવૃત્તિઃ ચક્રરાજકૃત - વિષ્ણુસ્તુતિઃ
૬૦. વિશેષતો વિષ્ણુવનમહિમાનુવર્ણનમ્
૬૧. શ્રીવૈકુણ્ઠાદિ શ્રીપુરાદિ ક્ષેત્રમાહાત્મ્યમ્ - નવતિરુપ્પતિ
૬૨. શ્રીપુરમ્ - ચિઞ્ચાતરુમૂલમ્ - ક્ષેત્રતીર્થયોઃ તત્તરોશ્ચ માહાત્મ્યમ્
૬૩. સોમારણ્યમહિમાનુવર્ણનમ્ - માનસાઙ્ગઃ
૬૪. તામ્રાસાગરસઙ્ગમમહિમાનુવર્ણનમ્ ।
   જયન્તીપુરે ગુહસ્ય પ્રાદુર્ભાવઃ ।
   તામ્રાયાઃ સ્તુતિઃ । ફલશ્રુતિશ્ચ નિરૂપિતા ।

શ્રી ગુરુભ્યો નમઃ હરિઃ ૐ

# શ્રીતામ્રપર્ણીમાહાત્મ્યમ્

## અથ શ્રી તામ્રપર્ણીમાહાત્મ્યમ્ ।

### પ્રથમઃ અધ્યાયઃ

શૈલેન્દ્રકન્યાયાઃ ઉત્પત્તિઃ । વિવાહપ્રસ્તાવઃ ।

૧. શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

૨. અખણ્ડપરમાનન્દપરિપૂર્ણાત્મમૂર્તયે ।
નિર્ગુણાયગુણાવિષ્ટકર્મણે બ્રહ્મણે નમઃ ।

૩. યદ્વશઃકણિકાવેદાઃ યલ્લોકઃ કણિકા જગત્ ।
યદ્પ્રભારિન્દુરિન્દ્રાદ્યાઃ નમસ્તસ્મૈ પરાત્મને ॥

૪. પુરા વિધાત્રા બ્રહ્માણ્ડખરગ્રહમેધિના ।
લીલયા કલિતા કાપિ તપસ્સીમા તપસ્વિનામ્ ॥

૫. ભૂરેષા ભૂતિજનની પુરાતનકૃતાશ્રયા ।
જાયતે નૈમિશાભિખ્યાવિખ્યાતા જગતીતલે ॥

૬. પાપાનામૂષરક્ષેત્રં પુણ્યાનામુદયસ્થલમ્ ।
આનન્દાનામિવાવાસમાશ્ચર્યાણામિવાકરમ્ ॥

૭. નૈમિશં મુનિશાર્દૂલૈઃ સમન્તાદુપસેવિતમ્ ।
તત્ર સર્વે મુનિગણાઃ મિલિતાઃ ધર્મચારિણઃ ॥

૮. કાઙ્ક્ષન્તઃ પરમાં સિદ્ધિં સત્રં દ્વાદશવાર્ષિકમ્ ।
યજ્વાનં શૌનકં કૃત્વા ચક્રુરક્રોધમધ્વરમ્ ॥

૯. તાવત્ અભ્યાયૌ શ્રીમાન્ સૂતઃ પૌરાણિકોત્તમઃ ।
દદર્શ મહતીં શાલાં તપસા નિર્મિતામિવ ॥

૧૦. હૂયમાનૈઃ હવ્યવાહૈઃ પ્રફુલ્લાશોકમલ્લિકામ્ ।
આસ્તીર્ણકુશસઙ્ઘાતૈઃ કૌશેયામ્બરધારિણીમ્ ॥

૧૧. શ્રીમદ્યુત્તરવેદ્યાં તુ યૂપસીમન્ત પદ્ધતિઃ ।
શામિત્રાધ્વર્યુણા બાહુયુગલિં કલશસ્તનીમ્ ॥

૧૨. વેદિમધ્યાં ધૂમકેશાં સમ્ભારભરણોજ્જ્વલામ્ ।
એવં ભૂતાં ચિરરૂપાં ક્રતુલક્ષ્મીં ઇવ સ્થિતામ્ ॥

૧૩. શાલામાલોકયન્ અગ્રે મધ્યે મુકુલિતાઃ શિલાઃ ।
વિનયાત્ ઉપસૃત્યૈતાન્ ક્રમાદેવાભ્યવાદયત્ ॥

૧૪. તં દૃષ્ટ્વા મુનયઃ પ્રીતાઃ શૌનકાદ્યાઃ સમાહિતાઃ ।
આસનાદ્યુપચારૈઃ તૈઃ સ્વાગતૈર્વચનૈરપિ ॥

૧૫. અભિનન્દ્ય મહાત્માનમાસીનં વિષ્ટરે શુભે ।
વિશ્રાતં સ્વસ્તમનસં પપ્રચ્છુઃ પ્રીતિપૂર્વકમ્ ॥

૧૬. ઋષયઃ –
સ્વાગતં તે મહાભાગ દૃષ્ટોઽસિ ચિરકાલતઃ ।
કાઃ ચ વૈ સરિતાઃ પુણ્યાઃ દૃષ્ટ્વાત્ર નિષ્કૃતાઃ ॥

૧૭. કાનિ પુણ્યાનિ તીર્થાનિ સ્નાતાનિ નિયતાત્મના ।
કુતઃ સમાગતોઽસિ ત્વં કિં વા દૃષ્ટૈવાદ્ભુતમ્ ॥

૧૮. દૃષ્ટ્વા ચિત્રૈવાભાસિ સુપ્રસન્નતયા મુખે ।
અન્તઃકરણજં ભાવં સર્વેષામપિ દેહિનામ્ ॥

૧૯. પ્રકાશ્યતે મુખેનૈવ સ્વચ્છસ્વચ્છાતવત્ સ્તિથમ્ ।
ઇતિ તેષાં વચઃ શ્રુત્વા સૂતસ્તુ વિનયોજ્જ્વલઃ ॥

૨૦. પ્રત્યભાષત સાનન્દમભિષ્ટૂય ચ તાન્ મુનીન્ ।
શ્રી સૂતઃ –
નમો વો બ્રહ્મવાદિભ્યો મહદ્ભ્યઃ સતતં નમઃ ॥

૨૧. વિનિષ્ક્રમ્ય મહાક્ષેત્રાત્ નરનારાયાણલયાત્ ।
અર્થદર્શનકામેન મયા સઞ્ચારિતા મહી ॥

૨૨. દૃષ્ટ્વા તીર્થાનિ પુણ્યાનિ ક્ષેત્રાણિ વિવિધાનિ ચ ।
ગચ્છતા દૂરમધ્વાનં મયા વિશ્રાન્તિમેયુષા ॥

૨૩. અક્ષિપ્રાગુણિકી જાતા પાણ્ડ્યગુપ્તા મહામહી ।
તત્ર શ્રીસુન્દરેશઃ ચ દૃષ્ટો વેગવતી તટે ॥

૨૪. તતો દક્ષિણતો દૂરાત્ દૃષ્ટો મે મલયાચલઃ ।
મહામઙ્ગલદા યત્ર વર્તતે પરદેવતા ॥

૨૫. યત્ર સાક્ષાત્ ભગવતી પરાશક્તિરુપસ્થિતા ।
તામ્રપર્ણીતિ વિખ્યાતા પ્રયાતિ વરુણાલયમ્ ॥

૨૬. સ્મરણાત્ દર્શનાત્ ધ્યાનાત્ સ્નાનાત્ પાનાદપિ ધ્રુવમ્ ।
કર્મવિચ્છેદિની સર્વજન્તૂનાં મોક્ષદાયિની ॥

૨૭. અન્યચ્ચ શ્રૂયતાં વિપ્રાઃ મયા દૃષ્ટં તદદ્ભુતમ્ ।
બ્રહ્મારુદ્રાભિર્દેવૈઃ પ્રાણિનાં હિતકામ્યયા ॥

૨૮. નિર્મિતં શ્રીપુરં નામ પરમાયતનં શ્રિયઃ ।
તત્ સમીપે મહાતેજાઃ વર્તતે કુમ્ભસમ્ભવઃ ॥

૨૯. તત્ પ્રસાદાત્ મયા લબ્ધં ઐહિકામુષ્મિકં ફલમ્ ।
જીવિતં સફલં જાતં સફલો મે પરિશ્રમઃ ॥

૩૦. મહાક્રતું પારયતઃ શ્રુત્વા યુષ્માન્ મહાત્મનઃ ।
શ્રેષ્ઠં કથયિતું પુણ્યં તામ્રાયાઃ ચરિતં મહત્ ॥

૩૧. આગતોઽસ્મીહ ભદ્રં વઃ મુનયઃ તુ તપોધનાઃ ।
ઇતઃ પરં મયા કાર્યં યુષ્માકં પ્રીતિવર્ધનમ્ ॥

૩૨. તદત્ર પરમાયત્તાઃ સાધુ શાસિતુમર્હત ।
ઇતિ તસ્ય વચઃ શ્રુત્વા મુનયો દીર્ઘદર્શિનઃ ॥

૩૩. પ્રશસ્ય બહુધા પ્રોચુઃ વ્યાસશિષ્યમકલ્મષમ્ ।
ઋષયઃ –
આશ્ચર્યં ભવતા દૃષ્ટમાશ્ચર્યમનુભાવિતુમ્ ॥

૩૪. અહો વિચિત્રજનની તામ્રા પરમપાવની ।
આદૌ કદા સમુદ્ભૂતા કુતો વા કેન હેતુના ॥

૩૫. કથં વા મલયં પ્રાપ્તા શ્રીપુરં ચ કથં પુનઃ ।
કથં પ્રવૃત્તા મલયાત્ અપામ્ભસાં નિધિમ્ ॥

૩૬. એતાનિ વદ વિસ્તીર્ય વ્યાસશિષ્ય મહામતે ।

ઇતિ શ્રુત્વા વચઃ તેષાં ઋષીણાં સૂતનન્દનઃ ॥

૩૭. સ્મૃત્વા સ્મૃત્વા મહાભાગાં તામ્રપર્ણીં સરિદ્વરામ્ ।
અઞ્જલિં શિરસા ધૃત્વા વ્યાસં નત્વા નિજં ગુરુમ્ ॥

૩૮. કૌતુહલસમાવિષ્ટો રોમાઞ્ચિતકલેવરઃ ।
આનન્દબાષ્પપૂરાભ્યાં લોચનાભ્યાં વિલોકયન્ ॥

૩૯. શ્રી સૂતઃ –
શ્રુણ્વન્તુ મુનયસ્સર્વે પ્રભાવં કુમ્ભજન્મનઃ ।
મહાદેવ્યાસ્તુ ચરિતં તામ્રાયાઃ પરમાદ્ભુતમ્ ॥

૪૦. યઃ શ્રુણોતિ સકૃદ્વાપિ સર્વપાપૈઃ પ્રમુચ્યતે ।
પુરા દક્ષસુતા ગૌરી રુદ્રપત્ની ક્રુધાન્વિતા ॥

૪૧. નિજામગ્નૌ તનું હુત્વા કુત્સયન્તી તનૂદ્ભવામ્ ।
પ્રાદુરાસીત્ પુનઃ શૈલરાજરાજસ્ય કન્યકા ॥

૪૨. તત્પત્ન્યાં મેનકાખ્યાં પ્રાચ્યામિવ રવિપ્રભામ્ ।
પ્રાદુર્ભૂતાં માહાદેવીં તરુણાદિત્યપાટલામ્ ॥

૪૩. કુસુમ્ભચારુવદનાં નાનામણિવિભૂષિતામ્ ।
કનકાઙ્ગદકેયૂરકમનીયભુજાન્વિતામ્ ॥

૪૪. મણિકોટીરઘટિતનિશાકરકલાન્વિતામ્ ।
અષ્ટાદશભોદઞ્ચત્ અભિખ્યાયુતોજ્જ્વલામ્ ॥

૪૫. સ્તૂયમાનાં મુનિગણૈઃ વાક્યૈઃ ઉપનિષદ્ગણૈઃ ।
નિજારુણપ્રભાપૂરમજ્જત્ભુવનમણ્ડલામ્ ॥

૪૬. સૌન્દર્યસિન્ધુસમ્ભૂતચન્દ્રરેખામિવસ્થિતામ્ ।
ઉપસૃત્ય મહાદેવીં ભીતભીત ઇવાદ્રિરાટ્ ॥

૪૭. પ્રણમ્ય શિરસા ભૂમૌ ભૂયો ભૂયઃ પ્રસાદયન્ ।
તુષ્ટાવાશેષજનનીં વિશેષવિદુષીમિમામ્ ॥

૪૮. અમ્બ વિશ્વમ્ભરે માતઃ પ્રસીદ પરમેશ્વરિ ।
પ્રસીદ કરુણાપાઙ્ગસંરક્ષિતચરાચરે ॥

૪૯. બ્રહ્મોપેન્દ્રરુદ્રાદ્યૈઃ સ્તૂયમાનમહોદયે ।
સમસ્તભુવનાપાયવ્યપોહનકૃતોદ્યમે ॥

૫૦. નમસ્તુભ્યં મહાદેવિ માયામોહિતદાનવે ।
પાપભઞ્જનપાણ્ડિત્યપાદામ્બુજરજઃકણે ॥

૫૧. સર્ગાદૌ જગતાં સાક્ષાત્ કથ્યતે પ્રકૃતિઃ પરા ।
વૈખરીતિ તતો ભાસિ વાચિ વાચસ્પતેરપિ ॥

૫૨. વૈખારિકાર્ણીન્દ્રાય ત્વયા દૃષ્ટાનિ ચાત્મનઃ ।
ત્વયાદૌ વિહિતો બ્રહ્મા રજસા સર્ગસિદ્ધયે ॥

૫૩. ત્વાં વદન્તિ પુનર્વેદાઃ સ્થિત્યૈ નારાયણાત્મિકામ્ ।
વિશ્વવિધ્વંસનવિધૌ મહારુદ્રકલાત્મિકામ્ ॥

૫૪. કલાકાષ્ઠમુહૂર્તાશ્ચ રાશિનક્ષત્રપઙ્ક્તયઃ ।
ત્વદંશવિહિતાઃ વેદાઃ તત્ત્વવાક્યપ્રમાણતઃ ॥

૫૫. ભોગીનાં ભોગજનની મુમૂક્ષાણાં ચ મોક્ષદા ।
કર્મકાલગુણા મર્યાદાવુયક્તરૂપિણી ॥

૫૬. ત્વયિ સર્વમિદં વિશ્વં ત્વદાજ્ઞાગૌરવાશ્રયમ્ ।
યજન્તિ ત્વાં સુરાસ્સર્વે ધ્યાયન્તિ હૃદિ યોગિનઃ ॥

૫૭. આરાધયન્તિ કર્મિષ્ઠાઃ દ્રવ્યૈઃ તત્ત્વસમુદ્ભવૈઃ ।
અન્વિષ્યમાણા નિગમૈઃ આગમૈઃમન્ત્રગર્ભિતૈઃ ॥

૫૮. લબ્ધ્વૈવ ભાસિ દુર્લભ્યા લભ્યા પરમેશિતુઃ ।
એવં ત્વમધુના માદૃશાં દૃષ્ટિગોચરા ॥

૫૯. આશ્ચર્યમિવ પશ્યામિ હ્યન્ધલબ્ધોમણિર્યથા ।
અમ્બ ભીતોઽસ્મિ નિતરાં ત્વદ્રૂપાલાકનાદહમ્ ॥

૬૦. ત્વામહં દારિકાં લબ્ધ્વા વાઞ્છામિ સુખમાસિતુમ્ ।
તથા પ્રસીદ માતસ્ત્વં એષ એવ વરો મમ ॥

૬૧. ઇત્થં સ્તુતા મહાદેવી પ્રાર્થિતા સા પુનઃપુનઃ ।
સુધાસામગ્રયા વાચા વ્યાજહારાચલેશ્વરમ્ ॥

૬૨. મહારાજ નૃપશ્રેષ્ઠ ભવતા સહ ભાર્યયા ।
અર્ચિતાહં પુરા ભક્ત્યા વર્ષાણામયુતાયુતમ્ ॥

૬૩. તપસા દુશ્ચરેણાપિ સ્તોત્રૈઃ શ્રુત્યન્તગર્ભિતૈઃ ।

ઉપહારૈશ્ચ વિવિધૈઃ તોષિતોઽહં નિરન્તરમ્ ॥

૬૪. તત્તપસ્સદૃશં ભાગ્યમદૃષ્ટ્વા ભુવનત્રયે ।
જાતાહમધુના રાજન્ યુવયોઃ ભાગ્યદિત્સયા ॥

૬૫. આકલ્પં ભોગિનૌ ભૂત્વા મત્તઃ પ્રાપ્તમનોરથૌ ।
સ્નિહ્યન્તૌ પુત્રિકાબુદ્ધ્યા ધ્યાયન્તૌ તત્ત્વચિન્તયા ॥

૬૬. અન્તે સુદુર્લભાં સિદ્ધિં મત્તો વિન્દત કેવલમ્ ।
ઇત્યુક્ત્વા સહસા દેવી દારિકા પ્રાકૃતાહ્યભૂત્ ॥

૬૭. તતઃ પરમસંહૃષ્ટૌ દમ્પતી દેવસત્તમૌ ।
આદાય દારિકાં દિવ્યાં લાલયામાસતુર્મુદા ॥

૬૮. અવર્ધત મહાદેવી પર્વતેન્દ્રસ્યવેશ્મનિ ।
કાલેનાલ્પીયસા જાતા રૂપયૌવનશાલિની ॥

૬૯. સખીભિર્યુક્તા ક્રીડન્તી રત્નસાનુષુ ।
પિત્રોઃ પ્રીતિં વિવૃણ્વાના ચન્દ્રિકેવ મહોદધેઃ ॥

૭૦. એતમિન્નન્તરે દેવાઃ સેનાપતિમભીપ્સવઃ ।
રુદ્રાય ગિરિજાં દાતું યત્નં ચક્રુસ્સમાહિતાઃ ॥

૭૧. રુદ્રેણ પ્રેષિતાસ્સપ્તર્ષયોઽદ્રિમુપેત્ય તે ।
તમૈ કથયામાસુઃ યદુક્તં શમ્ભુના સ્વયમ્ ॥

૭૨. તત્ શ્રુત્વા હર્ષપૂર્ણાઙ્ગઃ સભાર્યઃ સપરિચ્છદઃ ।
અસ્તુ મઙ્ગલમિત્યુક્ત્વા ઋષીન્ સમ્પૂજ્ય સાદરમ્ ॥

૭૩. પુનઃ તાન્ પ્રેષયામાસ કૈલાસં શઙ્કરાલયમ્ ।
સામન્તૈઃ મન્ત્રિવૃદ્ધૈશ્ચ બન્ધુભિઃ ચ અચલેશ્વરઃ ॥

૭૪. કલ્યાણાય પુરં સર્વમલઙ્કર્તું અગાત્ પ્રભુઃ ।
હિમાદ્રીનગરી પુણ્યા શતયોજનમાયતા ॥

૭૫. મણિપ્રાકારપર્યન્તા મહામરકતસ્થલી ।
પ્રાસાદશતસમ્પૂર્ણા પતાકાધ્વજમાલિની ॥

૭૬. મહારાજગૃહોપેતા મહાવીથીપરિષ્કૃતા ।
હૃષ્ટપુષ્ટજનાકીર્ણા નટનર્તકસઙ્કુલા ॥

૭૭. શઙ્ખભેરીમૃદઙ્ગાદ્યૈઃ વાદ્યૈસ્સન્નાહનાદિની ।
અલઙ્કૃતા બભૌ તાવત્ ગીર્વાણનગરી યથા ॥

૭૮. તતઃ કૌતુક સંયુક્તા ગૌરી કલ્યાણરૂપિણી ।
અમ્બામારાધયામાસ દેવીં શ્રીપુરદેવતામ્ ॥

૭૯. નાનોપાહારબલિભિઃ દીપનીરાઞ્જનાદિભિઃ ।
સ્તૂયમાના ગિરિજયા દેવી પ્રાદુરભૂત્ પુરઃ ॥

૮૦. સંપુલ્લપદ્મનયના સાન્દ્રસિન્દૂરપાટલા ।
સૌન્દર્યસમ્પદુદ્દામસૌભાગ્યપરમોર્મિકા ॥

૮૧. અનેકયોગિનીવૃન્દવન્દ્યમાનપદામ્બુજા ।
મન્દસ્મિતપ્રભાજાતદુગ્ધધારાભિવર્ષિણી ॥

૮૨. મન્દં મધુરયા વાચા ગૌરીં પ્રાહ મહેશ્વરીમ્ ।
શ્રીદેવી –
ત્વયિ પ્રસન્નાસ્મિ ત્વયિ ભાગાઃ સનાતનાઃ ॥

૮૩. ત્વય્યેવ સકલા લોકાઃ ત્વદધીનં ઇદં જગત્ ।
સહધર્મચરી શમ્ભોઃ પાહિ વિશ્વં ઇદં ભયાત્ ॥

૮૪. ઇત્યુક્ત્વા સહસા કણ્ઠમાલામાદાય પાણિના ।
કણ્ઠે વિસર્જયામાસ તસ્યાં ફુલ્લસરોરુહામ્ ॥

૮૫. મૂર્ધ્નુમયા પાણિપદ્મં નિધાય પરમાદ્ભુતમ્ ।
પુનઃ પ્રોવાચ તાં ગૌરીં દયયા પરદેવતા ॥

૮૬. શૈલેન્દ્રપુત્રીં મત્ દત્તાં તુભ્યમભ્યર્ચિતાં સુરૈઃ ।
અવેહિ પરમાં માલાં મામકીં હૃદયઙ્ગમામ્ ॥

૮૭. અનયા માલયા લોકાઃ ભવન્તુ સુખિનસ્સદા ।
જગતામુપકારાય ભવેત્ એષા ન સંશયઃ ॥

૮૮. ઇત્યુક્ત્વાન્તર્દધે દેવી લોકાનાં પશ્યતામપિ ।
તાં લબ્ધ્વા પરમાં માલાં ગૌરી પરમમઙ્ગલા ॥

૮૯. સ્વપિત્રોઃ પરમાં પ્રીતિં કુર્વાણા સ્વગૃહં યયૌ ।

૯૦. અથ જગદુદયાય નીલકણ્ઠો મુદિતમનાઃ કૃતકૌતુકો મુનીન્દ્રૈઃ ।
ત્રિભુવનપરિવર્તિતતજનૌઘં નિજકુતુકાય નિમન્ત્રયામ્બભૂવ ॥

ઇતિ શ્રીમત્ શૈવપુરાણે ઉપરિભાગે તીર્થક્ષેત્રવૈભવખણ્ડે
તામ્રપર્ણીમાહાત્મ્યે પ્રથમઃ અધ્યાયઃ ॥ Pro.Total = 90.

## દ્વિતીયઃ અધ્યાયઃ

દક્ષિણદિશિ તામ્રપર્ણ્યા સહ અગસ્ત્યસ્ય આગમન મ્ ।

૧. તતઃ ચરાચરં સર્વં ત્રિલોકપરિવર્તિતમ્ ।
આવિર્બભૂવ સહસા કૈલાસનગરાન્તિકે ॥

૨. સુનન્દનન્દપ્રમુખૈઃ અસઙ્ખ્યાતૈઃ સપાર્ષદૈ ।
હરિરાવિરભૂત્ લક્ષ્મ્યા વૈનતેયો મહારથઃ ॥

૩. સનકાદ્યૈઃ મહાસિદ્ધૈઃ હંસારૂઢઃ ચતુર્મુખઃ ।
ભારત્યા સહિતઃ શ્રીમાન્ શિવાલયમુપેયિવાન્ ॥

૪. મહેન્દ્રો ધનદઃ પાશી પ્રેતરાજો હુતાશનઃ ।
રક્ષોઽધિપો ગન્ધવહો વસવોઽષ્ટૌ તથાશ્વિનૌ ॥

૫. સિદ્ધાઃ ચ દ્વાદશાદિત્યાઃ રુદ્રા એકાદશા પરે ।
ભૂરાદિસપ્તલોકસ્તાઃ નાગાઃ પાતાલવાસિનઃ ॥

૬. સર્વે સમાગતાઃ તત્ર દેવદેવસ્યપત્તને ।
દેવર્ષયો નારદાદ્યાઃ વસિષ્ઠાદ્યાઃ મુનીશ્વરાઃ ॥

૭. એતાનભ્યાગતાન્ સર્વાન્ બ્રહ્મનારાયણાદિકાન્ ।
અનુગૃહ્ય કૃપાદૃષ્ટ્યા પ્રયાણાય મનો દધે ॥

૮. અલઙ્કૃત્વા વૃષાધીશં મણિકાઞ્ચનભૂષણૈઃ ।
અલઙ્કૃતો મહાદેવઃ કલ્યાણોચિતવેષધૃત્ ॥

૯. તં તુષ્ટુવુઃ નારદાદ્યાઃ સિદ્ધાશ્ચ પરમર્ષયઃ ।
છત્રચામરસમાયુક્તો લોકપાલ ઇવાપરઃ ॥

૧૦. અન્યતઃ પટહધ્વાનૈઃ કૃતોનિસ્સ્વાન્નિસ્વનૈઃ ।
શઙ્ખનાદવિમિશ્રૈઃ ચ પટહાડમ્બરૈઃ અપિ ॥

૧૧. રથનેમિસ્વનૈર્ઘોષૈઃ હયહ્રેષિતમિશ્રિતૈઃ ।
વીણાવેણુમૃદઙ્ગૈઃ ચ સિંહનાદૈઃ ચ ગર્જિતમ્ ॥

૧૨. પરિપૂર્ણમિવાભાતિ સમન્તાત્ ભુવનત્રયમ્ ।
એવં પ્રયાતા પરિષત્ દેવદેવસ્ય શૂલિનઃ ॥

૧૩. એવં તુમુલસન્નાદૈઃ સઙ્ઘુષ્ટો જગદીશ્વરઃ ।
આસસાદ તુષારાદ્રિં યત્ર દેવી વ્યવસ્થિતા ॥

૧૪. પ્રત્યુદ્યયૌ મહાદેવં ભક્ત્યા પરમયાદ્રિરાટ્ ।
આનીય સ્વગૃહે દેવં મધુપર્કાર્હણાદિભિઃ ॥

૧૫. પૂજયામાસ વિધિવત્ પુરોહિતસમન્વિતઃ ।
ઉદ્વાહમણ્ડપં પ્રાપ્ય બ્રહ્મવિષ્ણુમુખૈસ્સુરૈઃ ॥

૧૬. અગ્નિમાધાય વિધિવત્ હુત્વાગ્નિં મન્ત્રસંહિતૈઃ ।
તોષયામાસ દેવાંશ્ચ હવિર્ભિઃ ત્રિપુરાન્તકઃ ॥

૧૭. તાવત્ સુતામદાત્ તસ્મૈ ધારાપૂર્વં ધરાધરઃ ।
તાં માલાં અમલાં દેવી ભર્તુઃ કણ્ઠે વ્યસર્જયત્ ॥

૧૮. તાવદાવિરભૂત્ વ્યોમ્નિ પુષ્પવૃષ્ટિસ્સમન્તતઃ ।
દેવદુન્દભયો નેદુઃ ભેરીતૂર્યાણ્યનેકશઃ ॥

૧૯. સુમઙ્ગલાઃ તથા વાચઃ પ્રાણિનઃ પ્રીણયન્તિ ચ ।
એતસ્મિન્નન્તરે વ્યોમ્નિ વાગભૂત્ અશરીરિણી ॥

૨૦. ચરાચરેષુ સર્વેષુ સમવાયેષુ ચૈકતઃ ।
દક્ષિણા ભારતી ભૂમિઃ લઘુત્વાત્ ઊર્ધ્વં ઉત્થિતા ॥

૨૧. અસમીકરણાત્ અલ્પકાલતો નાશમેષ્યતિ ।
ઇતિ શ્રુત્વા મહાદેવઃ ધ્યાનારૂઢઃ ક્ષણાન્તરમ્ ॥

૨૨. સમાહૂય મુનિં પ્રાહ સ્વભક્તં કલશોદ્ભવમ્ ।
એહિ સાધય ધર્મજ્ઞ કુમ્ભયોને મહામતે ॥

૨૩. ત્વયા મયા વા કર્તવ્યં કાર્યમસ્તિ મહત્તરમ્ ।
ભૂરેષા દક્ષિણા મુક્તચરરાચરમહાપરા ॥

૨૪. ભઙ્ગુરા વર્તતે તસ્માત્ ભયાત્ ત્રાહિ ભવાનિતિ ।
અનયા સહિતઃ પત્ન્યા દક્ષિણાં યાહિ મા ચિરમ્ ॥

૨૫. તત્ર તે દર્શયિષ્યામિ વેષં કલ્યાણસમ્ભૃતમ્ ।
રુદ્રાણ્યા સહ સર્વેષાં ભક્તાનાં હિતકામ્યયા ॥

૨૬. એષા તે સ્નાનપાનાદિ કર્મોપકરણા ભવેત્ ।
ભવિષ્યત્યનયા સાક્ષાત્ પરાશક્ત્યા પવિત્રયા ॥

૨૭. નૂનં શ્રેયાંસિ ભૂયાંસિ સ્રજા તીર્થસ્વરૂપયા ।
ઇતિ ગૌરીકરાત્ લબ્ધાં માલાં દત્વા મહાત્મને ॥

૨૮. પ્રેષયામાસ સર્વેષાં દેવાનાં પશ્યતાં પ્રભુઃ ।
સ મુનિઃ કિઞ્ચિત્ ઉદ્વિગ્નહૃદયો દયિતાન્વિતઃ ॥

૨૯. ઉભાભ્યામેવ પાણિભ્યાં જગ્રાહોત્ફુલ્લપઙ્કજામ્ ।
તાવત્ પુષ્પમયીવૃષ્ટિઃ અમ્બરાત્ અભ્યવર્તત ॥

૩૦. મુનયો મુદિતા દેવાઃ સિદ્ધાશ્ચ પરમર્ષયઃ ।
સાધુ સાધુ ઇત્યભિષ્ટૂય સંહૃષ્ટા વાચમૂચિરે ॥

૩૧. સા માલા પશ્યતાં તેષાં કન્યાભૂત્ કમલેક્ષણા ।
તપ્તચામીકરાકારા કનકામ્બરધારિણી ॥

૩૨. મહામણિગણાકીર્ણાં મકુટાઙ્ગદધારિણીમ્ ।
કિઞ્ચિત્ ઉજ્જૃમ્ભણાભ્યાં (ચ) કુચાભ્યામુપલક્ષિતામ્ ॥

૩૩. મહદાશ્ચર્યનિલયાં મહાસૌન્દર્યમુદ્રિકામ્ ।
દૃષ્ટ્વા તાં કન્યકાં સર્વે વિસ્મયં યયુઃ ॥

૩૪. લોપામુદ્રા રાજપુત્રી તામાલક્ષ્ય મનોહરામ્ ।
આનન્દનિર્ભરા સાસીત્ નિધિં લબ્ધ્વૈવ નિર્ધનઃ ॥

૩૫. મહાદેવી સ્વપાણિભ્યાં તસ્યૈ માલામદાત્ શુભામ્ ।
તપ્તચામીકરાકરાં સ્વયાનં મધુસૂદનઃ ॥

૩૬. પ્રાદાત્ વિરિઞ્ચો ભગવાન્ અમ્લાનં કાઞ્ચનામ્બુજમ્ ।
શઙ્ખરત્નં પ્રદાયાસ્યૈ વરુણો યાદસાં પતિઃ ॥

૩૭. કોટીનાં ત્રિતયં પ્રાદાત્ તીર્થાનાં પરમાદ્ભુતમ્ ।
વીણાં મણિમયીં પ્રાદાત્ દેવી કમલસમ્ભવા ॥

૩૮. ભારતી શારિકારત્નં સર્વશાસ્ત્રમયં દદૌ ।
મુક્તાહારમદાત્ ગઙ્ગા યમુનોત્પલમાલિકામ્ ॥

૩૯. સીમન્તરેખાલઙ્કારં સિન્દૂરં તુ શરાવતી ।

કાવેરી કુઙ્કુમં પ્રાદાત્ તુઙ્ગભદ્રાઞ્જનં દદૌ ॥

૪૦. મહામૃગમદં પ્રાદાત્ પુણ્યા ગોદાવરી નદી ।
મુક્તાવતી મણિવતી પૂર્ણા ઘોરા કુમુદ્વતી ॥

૪૧. શ્યામાવતી ચન્દ્રસેના ઘટના કપિલારુણા ।
એતાઃ દશાઃ સુતાઃ મેરોઃ સખ્યઃ સમભવન્ તદા ॥

૪૨. સર્વદેવશરીરેભ્યઃ તેજો રાશિઃ સમુત્થિતઃ ।
ઇમાં સમાવિશન્ તત્ર તદદ્ભુતમિવાભવત્ ॥

૪૩. ઇમામાહુઃ સુરગણાઃ તેજસારુણવિગ્રહામ્ ।
તામ્રપર્ણીતિ જગુઃ કેચિત્ તામ્રાં ચ પ્રશંસિરે ॥

૪૪. મણિગર્ભામિતિ પરે પરાં અન્યે પ્રશંસિરે ।
ઇત્થં દેવૈઃ સ્તૂયમાના તામ્રપર્ણી સરિદ્વરા ॥

૪૫. લોપામુદ્રાન્વિતઃ શ્રીમાન્ અગસ્ત્યોઽપિ મહાતપાઃ ।
પ્રણમ્ય સામ્બમીશાનં મનસ્યાધાય શઙ્કરમ્ ॥

તામ્રપર્ણ્યા સહ તદા પ્રસ્થાનં અકરોત્ મુદા ॥

૪૬. ઇત્થં સુરૈઃ મુનિગણૈઃ અભ્રન્ધ્યમાનાં મન્દાકિનીવ જગતીં ભગીરથાર્થે ।
પ્રાયાત્ પ્રસન્નવદના ભુવનૈકધાત્રી કાર્તાન્તિકાં દિશમનેન મુનીશ્વરેણ ॥

૪૭. ભૂયો ભૂયો સ્વાન્તમન્તર્મહેશં ધ્યાયન્ વાચા કલ્પવલ્લીં ભવાનીમ્ ।
શ્રીગન્ધાદ્રાવાશ્રમં ભાવયાનો મન્દં મન્દં ભારતીમાપ ॥

ઇતિ દ્વિતીયઃ અધ્યાયઃ ॥ Pro.Total = 90 + 47 =137.

## તૃતીયઃ અધ્યાયઃ

મલયાચલેન અગસ્ત્યાનીતાયાઃ તામ્રપર્ણ્યાઃ પુત્રીત્વેન સ્વીકરણમ્ ।

૧. ઇત્થં નિગદિતાં પુણ્યાં પાપપ્રણાશિનીમ્ ।
શ્રુત્વા તુ મુનયઃ સર્વે સૂતં બભાષિરે ॥

૨. ઋષયઃ –
આશ્ચર્યમિદમાખ્યાનમધુના સંપ્રકીર્તિતમ્ ।
આનન્દયતિ નઃ ચિત્તં રોમાઞ્ચયતિ વિગ્રહમ્ ॥

૩. ન સાધનમિવાભાતિ નિત્યં નૂતનતાં ગતમ્ ।
તામ્રપર્ણ્યાઃ મહાનદ્યાઃ માહાત્મ્યં ભૂરિ પુણ્યતઃ ॥

૪. ન તૃપ્તિમધિગચ્છામઃ પિબન્તઃ તત્ કથામૃતમ્ ।
વિસ્તરાત્ બ્રૂહિ ધર્મજ્ઞ બ્રૂયઃ તાં સૂતનન્દન ॥

૫. કથં વા પ્રસ્થિતઃ શ્રીમાન્ કથં વા વસતિં વ્યધાત્ ।
શ્રીપુરં ચ કથં દૃષ્ટં કથં વા નિસ્સૃતા સરિત્ ॥

૬. આસાગરમિયં સૂત તામ્રપર્ણી વ્યવસ્થિતા ।
સરિત્ કથં પ્રવહિતા ઇયં પૌરાણિકોત્તમ ॥

૭. ઇતિ પૃષ્ટો મુનિશ્રેષ્ઠૈઃ સૂતો વક્તું પ્રચક્રમે ।
શ્રુણ્વન્તુ મુનયસ્સર્વે પુરા વ્યાસેન કીર્તિતમ્ ॥

૮. શુકાય કથિતં પુણ્યમિતિહાસં પુરાતનમ્ ।
શ્રુણ્વતામશ્વમેધસ્ય ફલમાહુર્મનીષિણઃ ॥

૯. અનુજ્ઞાપ્ય મહાદેવં દેવાન્ આમન્ત્ર્ય કુમ્ભભૂઃ ।
સહિતઃસરિતા તસ્માત્ અચલાત્ સન્ચવર્તત ॥

૧૦. શરાવતીમતિક્રમ્ય દૃષ્ટ્વા નારાયણાલયમ્ ।
નમસ્કૃત્ય ચ કેદારં સોમેશં સંપ્રણમ્ય ચ ।
૧૧. હરિદ્વારં પ્રણમ્યાગ્રે બ્રહ્માવર્તં ચ શાશ્વતમ્ ।
અવલોક્ય કુરુક્ષેત્રં અયોધ્યાં સરયૂમપિ ॥

૧૨. મહાકાલં ચ ગોકર્ણં શ્રીશૈલં પુરુષોત્તમમ્ ।
કૃષ્ણાં ગોદાવરીં સ્નાત્વા તુઙ્ગભદ્રાં કલમ્બિનીમ્ ॥

૧૩. કુમારકાનનં દૃષ્ટ્વા મહાલક્ષ્મીં પ્રણમ્ય ચ ।
શેષાદ્રૌ હરિમભ્યર્ચ્ય કાઞ્ચીં કમલપીઠિકામ્ ॥

૧૪. યત્રાસ્તે શામ્ભવી શક્તિઃ લોકાનાં હિતકામ્યયા ।
પ્રણમ્ય તાં પુનર્દેવં એકાંરનિલયં શિવમ્ ॥

૧૫. વેષં વરદરાજાખ્યં હરિં કમ્પાં મહાનદીમ્ ।
શોણાં શુદ્ધાં તુઙ્ગભદ્રાં કાવેરીં સહ્યસમ્ભવામ્ ॥

૧૬. યત્ર શેતે હરિસ્સાક્ષાત્ મહાપ્રણવમન્દિરે ।
યસ્ય માલાયતે નિત્યં કાવેરી ચ મહાનદી ॥

૧૭. શ્રીશમ્ભુનૃત્તસદનં આર્જુનં કમલાલયમ્ ।
કાદમ્બકાનનં પ્રાપ્ય દેવીં દેવં પ્રણમ્ય ચ ॥

૧૮. અતીત્ય મહદધ્વાનં લોપામુદ્રાસમન્વિતઃ ।
દદર્શ ગગનાકારં મલયં ચન્દનાલયમ્ ॥

૧૯. મહામૃગમદામોદમન્દમારુતમેદુરમ્ ।
ચમ્પકાશોકપુન્નાગવકુલાર્જુનભૂર્જકૈઃ ॥

૨૦. કરીરકન્દવાનીરનીવારાશ્વત્થકેતકૈઃ ।
તમાલતાલહિન્તાલપલાસપનસદ્રકૈઃ ॥

૨૧. અઙ્કોલનવકઙ્કેલિપૂગદ્રુમકલિદ્રુમૈઃ ।
એવમન્યૈઃ મહાવૃક્ષૈઃ નીલામ્બુદનિભપ્રભૈઃ ॥

૨૨. સઞ્છન્નસાનુપર્યન્તનાનાધાતુપરિષ્કૃતમ્ ।
મુક્તાહારસમાકારૈઃ ધાતુભિઃ સમલઙ્કૃતમ્ ॥

૨૩. મહામરકતાકારૈઃ પર્યન્તૈઃ પર્વતૈઃ વૃતમ્ ।
હરિકૂટત્રિકૂટાલિગુપ્તિપર્વતકુન્તલૈઃ ॥

૨૪. મણિકાઞ્ચનભૂયિષ્ઠૈઃ શ ૃઙ્ગૈઃ પઞ્ચભિરાવૃતમ્ ।
યસ્ય ષષ્ઠં પ્રશંસન્તિ માહેન્દ્રં ભાર્ગવાલયમ્ ॥

૨૫. દક્ષિણોત્તરતો દૈર્ઘ્યાત્ આહુરદ્વાદદશયોજનમ્ ।
શિખરાક્રાન્તગગનં આશાન્તપરિવર્તિતમ્ ॥

૨૬. મહામણિગ્રહાકારં દીપ્તૌષધપરિષ્કૃતમ્ ।
નિત્યં વસન્તનિલયં સન્તતો વૃદ્ધિમત્ગુણમ્ ॥

૨૭. કૃતસાન્નિધ્યહેમન્તં અનન્તધનસઞ્ચયમ્ ।
સદા ફલૈઃ કુસુમિતૈઃ ઉદ્યાનૈઃઉપશોભિતમ્ ॥

૨૮. મત્તભ્રમરસન્નાદં કૂજત્કોકિલસારસમ્ ।
સિદ્ધગન્ધર્વનિલયં મુનિવૃન્દનિષેવિતમ્ ॥

૨૯. દેવદાનવયક્ષૈશ્ચ રમમાણૈઃ અલઙ્કૃતમ્ ।
એવમાશ્ચર્યનિલયં મુ ઇવૃન્દનિષેવિતમ્ ॥

૩૦. દૃષ્ટ્વા પરમસંહૃષ્ટઃ પત્યા સહ સમન્વિતઃ ।
સંપ્રાપ સરિતા શૈલં તામ્રપર્ણ્યા શનૈઃશનૈઃ ॥

૩૧. ભાવં ધરાધરેન્દ્રસ્તુ વિજ્ઞાય મુનિમાગતમ્ ।
વલ્લભાભિઃ અનેકાભિઃ પરિવારૈશ્ચ સેવિતઃ ॥

૩૨. વપુષા દિવ્યરૂપેણ મુદા પ્રત્યુજ્જગામ હ ।
બ્રહ્મન્ સ્વાગતમિત્યુચ્ચૈઃ બ્રુવાણો વિનયાન્વિતઃ ॥

૩૩. મૂર્ધ્ના વવન્દે ચરણૌ કુમ્ભયોનેઃ કુતૂહલાત્ ।
પાદ્યં અર્ઘ્યં યથાન્યાયં મધુપર્કમકલ્પયત્ ॥

૩૪. બદ્ધાઞ્જલિપુટો ભૂત્વા સમ્ભ્રાન્તમિદમબ્રવીત્ ।
મલયઃ –
સ્વાગતં તે મહાભાગ પ્રસીદ તપસાં નિધે ॥

૩૫. કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ પ્રીતોઽસ્મિ તવ દર્શનાત્ ।
ઇદમાગમનં મન્યે મદીયં તપસઃ ફલમ્ ॥

૩૬. ભવાદૃશાં પ્રવસનં શ્રેયસે જગતાં ધ્રુવમ્ ।
જ્ઞાતુમિચ્છામિ ભગવન્ ત્વદાગમનકારણમ્ ॥

૩૭. પૂર્ણકામસ્ય તે બ્રહ્મન્ કિં કરિષ્યામ્યહં પ્રિયમ્ ।
ઇતિ પૃષ્ટોઽદ્રિવર્યેણ મૈત્રાવરુણિરાત્મવિત્ ॥

૩૮. આચચક્ષે સ્વવૃત્તાન્તમશેષં પૃચ્છતો મુનિઃ ।
એતસ્મિન્નન્તરે સિદ્ધૌ મુની તુમ્બુરુપર્વતૌ ॥

૩૯. અભિષ્ટૂય મુનિશ્રેષ્ઠં રાજાનં ચ મહીભૃતામ્ ।
ઊચતુઃ પરમપ્રીતૌ વચનં શમ્ભુશાસનમ્ ॥

૪૦. મહારાજ કુલશ્રેષ્ઠ કૃતકૃત્યોઽસ્મિ કેવલમ્ ।
ત્વયા પુરા મહાદેવઃ તોષિતઃ તપસા ભૃશમ્ ॥

૪૧. તત્ફલં ભવતા લબ્ધં ભાગ્યમન્યત્ર દુર્લભમ્ ।
એષા પરમકલ્યાણી તામ્રપર્ણી સરિદ્વરા ॥

૪૨. અનેન મુનિનાનીતા પ્રસાદાત્ શૂલપાણિનઃ ।
એષા તવ સુતા ભૂયાત્ અનયા તીર્થરૂપયા ॥

૪૩. તવ શ્રેયાંસિ ભૂયાંસિ ભવિષ્યન્તિ ન સંશયઃ ।
ઇત્થં તયોઃ વચઃ શ્રુત્વા મુનિઃ પરમહર્ષિતઃ ॥

૪૪. તસ્મૈ સુતાં અદાત્ તામ્રાં સોऽપિ જગ્રાહ શૈલરાટ્ ।
તાવદમ્બરસમ્ભૂતા પુષ્પવૃષ્ટિઃ સુગન્ધિની ॥

૪૫. દેવદુન્દુભયો નેદુઃ તુષ્ટુવુઃ ચ સુરાસુરાઃ ।
તદન્તરામૃતમયં શામ્ભવં લિઙ્ગં અદ્ભુતમ્ ॥

૪૬. પ્રત્યદૃશ્યત લોકાનાં ત્રયાણાં શ્રેયસે મહત્ ।
તસ્મિન્નારાધયામાસ દેવદેવં મુનીશ્વરઃ ॥

૪૭. સોऽપિ ચક્રે મહાપૂજામદ્રિરાટ્ અદ્ભુતાર્પિતામ્ ।
તસ્મિન્ આવિરભૂત્ શમ્ભુઃ પ્રસન્નો ગિરિજાન્વિતઃ ॥

૪૮. ઇદમાહ વચઃ પ્રીત્યા તં મુનિં કલશોદ્ભવમ્ ।
પ્રીતોऽસ્મિ તવ કૃત્યેન સમીભૂતા ચ ભૂરિયમ્ ॥

૪૯. તોષિતા ભવતા લોકાઃ જનાઃ સ્થાવરજઙ્ગમઃ ।
ઇતઃ પરં તે વક્ષ્યામિ જગતામુપકારકમ્ ॥

૫૦. ઇતોऽવિદૂરે મત્સ્થાનં યત્ર મે ચિત્રિકા સભા ।
તત્ર ગન્તાસિ સહિતો ગિરિણાનેન ભૂષ્ણુના ॥

૫૧. તત્ર માં અર્ચયિત્વૈવ દેવીમારાધ્ય શામ્ભવીમ્ ।
કૃત્વા કર્માણ્યદ્ભુતાનિ ગિરિણાનેન સંયુતઃ ॥

૫૨. તામ્રયા તીર્થરૂપિણ્યા ગચ્છ શીઘ્રમિતઃ પરમ્ ।
યત્ર મે પરમં સ્થાનં શિખરે મલયસ્ય તુ ॥

૫૩. શ્રુતયઃ પર્વતાકારાઃ ચતુર્દિક્ષુ વ્યવસ્થિતાઃ ।
ગુપ્તિશ‍ૃઙ્ગં ઇતિ ખ્યાતં તન્મધ્યે પરમાદ્ભુતમ્ ॥

૫૪. તમવેહિ મુનિશ્રેષ્ઠ મામકં પ્રણવાલયમ્ ।
અભ્યાશે તસ્ય કર્તવ્યા ભવતા વસતિઃ સ્થિરા ॥

૫૫. અનેન રાજ્ઞા નિદિષ્ટસ્થાને વસતુ માલિકા ।
તત્ર શ્રેયાંસિ પશ્ય ત્વં દુર્લભં જગતીતલે ॥

૫૬. મહારાજ ત્વયા લબ્ધા તામ્રપર્ણી કુમારિકા ।
વિધસ્યતિ પરમાં પ્રીતિં ગચ્છ સ્વભવનં મુદા ॥

૫૭. ભવતાં શ્રેયસે નૂનં પ્રાપ્તોऽસ્મિ શુભદર્શન ।
દેવદત્તં ઇદં સ્થાનં ખ્યાતં લોકે ભવિષ્યતિ ॥

૫૮. યે માં અત્ર અર્ચયિષ્યન્તિ તેષાં કામાન્ દદામ્યહમ્ ।
ઇત્થં મુનિં ચ રાજાનં તામ્રાં ચ અનુશાસ્ય ચ ॥

૫૯. તસ્મિન્ મહતિ વૈ લિઙ્ગે સ્વમન્તરધાત્ શિવઃ ।
તતો મલયરાજસ્તુ પુત્રીં સ્વીકૃત્ય શાસ્ત્રતઃ ॥

૬૦. અઙ્કમારોપ્ય ચાઘ્રાય મૂર્ધ્ના નન્દમુપાગમત્ ।
તદ્ભાર્યા ગન્ધવત્યાખ્યા તામ્રાં લબ્ધ્વાત્મસમ્ભવામ્ ॥

૬૧. પ્રહર્ષમતુલં લેભે મેને ગઙ્ગામિવોત્તમામ્ ।
તતસ્તે મિલિતાસ્સર્વે મુનિના કુમ્ભજન્મના ।
સંપ્રાપ મલયં શૈલં મહોદયમિવોત્થિતમ્ ॥

૬૨. ઇત્થં શિવેન ભણિતામભિનન્દ્ય વાણીં
વેણીવરાં મલયજામનુનીય પશ્ચાત્ ।
નામ્ના ત્રિકૂટ ઇતિ શસ્તમભૂત જગત્યાં
તત્સ્થાનમાપમણિચિત્રસમાભિરામામ્ ॥

ઇતિ તૃતીય અધ્યાયઃ ॥ Pro.Total = 137 + 62 =199.

## ચતુર્થઃ અધ્યાયઃ

અગસ્ત્યેન વૈષ્ણવમતનિરાકરણપૂર્વકં શૈવમતસ્થાપન મ્ ।

શ્રી સૂતઃ –

૧. ઇત્થં સ્મગ્રમધુરાં કથાં કર્ણ મનોમનોહરામ્ ।
મુખેન્દુમણ્ડલોત્તીર્ણાં સરસાં બાદરાયણેઃ ॥

૨. આકર્ણ્ય પરિપૂર્ણાર્થઃ શુકો બ્રહ્મવિદાં વરઃ ।
અભિનન્દ્ય પુનઃ તાતમ્મભ્યભાષત સારવિત્ ॥

૩. અહો સારવતી પુણ્યા કથેયમમલાશયા ।
ઇમાં ભૂયોઽપિ વિસ્તૃત્ય તાત્ વક્તુમિહાર્હસિ ॥

૪. સ મુનિઃ તામ્રયા સાર્ધં પ્રાપ્ય ચિત્રસભાં શુભામ્ ।
લોપામુદ્રા મહાદેવી ભર્તારમનુવર્તિની ॥

શ્રીવેદવ્યાસઃ –

૫. શ્રુણુ પુત્ર પ્રવક્ષ્યામિ પુણ્યમાખ્યાનમુત્તમમ્ ।
પઠનાત્ અસ્ય જાયન્તે નિર્મલજ્ઞાનભાગિનઃ ॥

૬. તસ્માદપિ વિનિર્ગત્ય દેવદ્ત્તાં મુનીશ્વરઃ ।
ત્રિકૂટાખ્યમહાક્ષેત્રં સંપ્રાપ્ય મુનિપુઙ્ગવમ્ ॥

૭. સમન્તાત્ દેજસાકારં પ્રાપ્ય હર્ષસમન્વિતઃ ।
નૃત્યન્તં પરમેશાનં તત્ર ચિત્રસભાન્તરે ॥

૮. દદર્શ દહનાકારં દીપ્યમાનં સ્વતેજસા ।
આરાધયામાસ મુદા મન્ત્રૈઃ પઞ્ચાક્ષરાત્મકૈઃ ॥

૯. શતરુદ્રીયમન્ત્રેણ તુષ્ટાવ પરમેશ્વરમ્ ।
તત્પ્રસાદાત્ અનુપ્રાપ્ય મુનિઃ કલશસમ્ભવઃ ॥

૧૦. તસ્માત્ દક્ષિણતઃ કિઞ્ચિત્ વિષ્ણુમૂર્તિં શિવાત્મકમ્ ।
શિવલિઙ્ગં પુનઃ ચક્રે ત્રિકૂટતરુમૂલતઃ ॥

૧૧. આરાધ્ય ધરણીપીઠં બિલદ્વારસ્ય પૂર્વતઃ ।
વેદશાખિનમારાધ્ય દેવં ત્રિપુરભૈરવમ્ ॥

૧૨. તતઃ સંપ્રાપ શિખરં ગુપ્તિસ્થાનાભિધં મહત્ ।
ઇત્યુક્તવતિ વૈ વ્યાસે શુકોઽભ્યભાષત ॥

૧૩. તત કિં ધરણીપીઠં ગુહા કા વા સમીરિતા ।
શ્રુતિવૃક્ષ ઇતિ ખ્યાતઃ સ વૃક્ષઃ કેન હેતુના ॥

૧૪. કા વાત્ર ચમ્પકારણ્યે દેવી દૃષ્ટેતિ કીર્તિતા ।
એતત્ સર્વમશેષેણ વિસ્તરાત્ વક્તુમર્હસિ ॥

૧૫. વ્યાસઃ –
શ્રુણુ વક્ષ્યામ્યહં તાત સ્થલસ્યસ્યાસ્યૈવ વૈભવમ્ ।
પુરા પૃથુર્મહાતેજાઃ ચક્રવર્તી મહાબલઃ ॥

૧૬. સમીકૃત્ય મહીં સર્વાં ધનુષા શત્રુભઞ્જનઃ ।
દુદોહ સમ્પદા ભૂરિ વસુધાં સાગરામ્બરામ્ ॥

૧૭. મર્યાદાં સ્થાપયામાસ તપસા સચરાચરે ।
વર્ણાશ્રમાન્ ધર્માન્ તથા ષટ્સમયાન્ વિભુઃ ॥

૧૮. તત્રાલિઙ્ગિતમર્યાદાઃ લોકાસ્સર્વે વ્યવસ્થિતાઃ ।

એતસ્મિન્ અન્તરે લોકે સુરુચિર્નામ વૈ દ્વિજઃ ॥

૧૯. બાર્હસ્પત્યાન્વયો ભૂત્વા ભ્રાત્રા રોચિષ્મતા સહ ।
અતીત્ય વેદાન્ સકલાન્ ષડઙ્ગાન્ પદક્રમાન્ ॥

૨૦. ચતુષ્ષષ્ટિકલાભેદમાવગાહ્ય સમન્તતઃ ।
સમયાચારશાસ્ત્રાણિ ભક્તિમાપ જનાર્દને ॥

૨૧. અહઙ્કારાત્ અહં ચક્રે શાસ્ત્રં સમયસમ્ભૃતમ્ ।
તેનૈવ ખણ્ડાન્ સર્વાન્ અન્યાત્મબુધ્યા મદાન્વિતઃ ॥

૨૨. સ્વમતં સ્થાપયામાસ વિજયી સર્વતઃ ભુવમ્ ।
વૈદિકાઃ બ્રાહ્મણાઃ સર્વે ક્ષત્રિયાઃ ચ પરે જનાઃ ॥

૨૩. સ્વમાચારં પરિત્યજ્ય તસ્યૈવ વશગા અભવન્ ।
એવં તુ ભારતં વર્ષં ક્લિશ્યમાનં અનેન તુ ॥

૨૪. દૃષ્ટ્વાપ્યસહ્યમાનસ્સન્ રાજા પરમદુઃખિતઃ ।
કૈલાસકટકં પ્રાપ્ય સમાધિમુપસ્થિતઃ ॥

૨૫. આરાધયામાસ શિવં સ્તોત્રૈઃ મન્ત્રૈઃ સમર્હણૈઃ ।
તત્રાધિગતસાન્નિધ્યં દેવદેવેન શૂલિનઃ ॥

૨૬. હૃષ્ટોઽસ્મિ તવ રાજેન્દ્ર સ્તોત્રૈરપિ નમસ્યયા ।
વૃણુ ભૂપ યથાકામં પૂરયિષ્યે મનોરથાન્ ॥

૨૭. ઇતિ દેવસ્ય સદયાં વાણીમાકર્ણ્ય શૂલિનઃ ।
વિનયાવનતો ભૂત્વા વાચમેવમવોચત ॥

૨૮. પૃથુઃ –
ભગવન્ યદિ મે દાતું વરં વાઞ્છસિ શઙ્કરઃ ।
વૈદિકધ્વંસિનઃ શૈવસમયાન્ દૂષિતસ્ય ચ ॥

૨૯. શમ્ભોઃ કદાપિ દેવેશ ન સિધ્યન્તુ મનોરથાઃ ।
ઇતિ બ્રુવાણં રાજાનં પ્રત્યુવાચ મહેશ્વરઃ ॥

૩૦. શિવઃ –
મા ચિન્તાં કુરુ રાજેન્દ્ર તવાસ્ત્વભિમતો વરઃ ।
યે દૂષયન્તિ પાપિષ્ઠાઃ શૈવીં સમયદીપિકામ્ ॥

૩૧. શ્રુતિમાર્ગરતાન્ સર્વાન્ વૈદિકાન્ બ્રાહ્મણોત્તમાન્ ।

તેષાં કદાપિ જાયન્તે નૈવ ચિત્તમનોરથાઃ ॥

૩૨. કસ્યચિત્ દેવકાર્યસ્ય હેતુના કુમ્ભસમ્ભવઃ ।
પ્રયાસ્યતિ દક્ષિણાશાં તદાશા તે ભવિષ્યતિ ॥

૩૩. ઇત્યુક્ત્વાન્તર્દધે દેવો રાજાપિ સ્વપુરં યયૌ ।
સ મુનિર્દેવદેવસ્ય વિજ્ઞાયૈવ તુ શાસનમ્ ॥

૩૪. પ્રાપ્ય સ્થાનં ત્રિકૂટાખ્યં દૃષ્ટ્વા લાસ્યં ચ શામ્ભવમ્ ।
સહ પત્ન્યા સમાગત્ય દેવદ્વારમુપાગમત્ ॥

૩૫. તત્રત્યાઃ પુરુષાસ્સર્વે તુલસીદામભૂષણાઃ ।
ઊર્ધ્વપુણ્ડ્રધરાઃ વિષ્ણુનામોચ્ચારણચુઞ્ચવઃ ॥

૩૬. ઉદ્વહન્તઃ તથા મુદ્રે વૈદિકાધ્વવિદૂષકાઃ ।
વિદૂષયન્તઃ પદવીં શૈવીમુપનિષદ્ગતામ્ ॥

૩૭. તે દૃષ્ટ્વા તં મુનિં શ્રેષ્ઠં દ્વિતીયમિવ શઙ્કરમ્ ।
રુન્ધાનાઃ પદવીં તસ્ય વાચં પ્રોચુઃ ક્રુધાન્વિતાઃ ॥

૩૮. ભવાદૃશાઃ ન ગન્તવ્યં સમયેતરગામિના ।
ઇત્યુક્ત્વેષુ નિર્ગત્ય તાદૃશં રૂપમાસ્થિતઃ
૩૯. ભૂયઃ પ્રવિશ્ય સહસા દૃષ્ટ્વા ચ હરિવિગ્રહમ્ ।
તસ્મિન્નારાધયામાસ દેવદેવં સદાશિવમ્ ॥

૪૦. સમ્પૂજ્ય વિધિના શમ્ભું સ્વપાણિભ્યાં પરામૃશન્ ।
એવં સમ્ભાવિતઃ તેન ભગવાન્ હરિરીશ્વરઃ ॥

૪૧. સ્વમૂર્તિં સઙ્કુચન્નગ્રે સંપ્રાપ શિવલિઙ્ગતામ્ ।
તદાવારણદેવાઃ ચ શિવાવરણમૂર્તયઃ ॥

૪૨. પ્રત્યદૃશ્યન્ત સર્વેષાં જનાનાં પશ્યતાં તદા ।
એતસ્મિન્નન્તરે ક્રુદ્ધાઃ સુરુચેઃ પરિચારકાઃ ॥

૪૩. શિષ્યાઃ પ્રશિષ્યામાત્યાઃ ચ ચક્રિરે કલહં મુનૌ ।
અરૂપા તાવદાકાશાત્ વાગભૂત્ અદ્ભુતાવહા ॥

૪૪. ઉભયોઃ ક્રિયતાં વાદં યત્ર વ વિજયો ભવેત્ ।
સાક્ષિણં પુરતઃ કૃત્વા યં કઞ્ચિત્ ન્યાયવાદિનમ્ ॥

૪૫. ઇતિ તેષુ બ્રુવાણેષુ શિવસ્યોત્તરપાર્શ્વતઃ ।

પીઠાદાવિરભૂત્ દેવી કાચિત્ કાઞ્ચનપાટલા ॥

૪૬. તામાસાદ્ય મહાદેવીં વવ્રિરે વાદસાક્ષિણીમ્ ।
કુમ્ભયોનેઃ તદા તેષાં મહાન્ વાદઃ પ્રાવર્તત ॥

૪૭. દાસ્યં પરાજિતસ્યેતિ વિધાય સમયં મુદા ।
પઞ્ચમેઽહનિ તે સર્વે નિર્જિતાઃ કુમ્ભજન્મના ॥

૪૮. તમેવ ગુરુમાસાદ્ય શિવદીક્ષામુપાવિશન્ ।
તદાદિ પરમં ક્ષેત્રં શિવક્ષેત્રમભૂત્ તથા ॥

૪૯. તેનૈવ સ્કલાઃ લોકાઃ બ્રાહ્મણાશ્ચ વિશેષતઃ ।
સ્વસ્વધર્મમનુપ્રાપ્ય સુખિનઃ ચિરજીવિનઃ ॥

૫૦. શૈવં ચ વૈદિકં ધર્મં પ્રતિષ્ઠાપ્ય મહીતલે ।
વિગાહ્ય ચિત્રાતીર્થં ચ દેવં આરાધ્ય પીઠિકામ્ ॥

૫૧. ભૈરવં માધવં ચૈવ વેદશાખિનમીશ્વરમ્ ।
પ્રણમ્ય વિધિવત્ દૃષ્ટ્વા પરમાનન્દતાણ્ડવમ્ ॥

લોપામુદ્રાપતિઃ શ્રીમાન્ તામ્રપર્ણ્યાં મુદં યયૌ ।

ઇતિ ચતુર્થઃ અધ્યાયઃ ॥ Pro.Total = 199 + 51 =250.

## પઞ્ચમઃ અધ્યાયઃ

ત્રિકૂટાચલમાહાત્મ્ય મ્ ।

૧. શ્રી શુકઃ –
ભગવન્ સર્વધર્મજ્ઞ કથિતા ભબવદાધુના ।
મહિમામોદભરિતા કથેયં કુમ્ભજન્મનઃ ॥

૨. શ્રુતાપિ શ્રવણાનન્દપીયૂષપુષિતાધુની ।
નૈવ તૃપ્તિકરી નૂનં ઘૃતધારેવ પાવકે ॥

૩. તત્ર તસ્માત્ મહાપીઠાત્ આવિર્ભૂતામ્બુજારુણા ।
કા વા કિમર્થમુદ્ભૂતા કેન વા પ્રાર્થિતા પુનઃ ॥

૪. અસ્યાઃ પ્રભાવમસ્માકં શ્રોતું કૌતૂહલં કિલ ।
ઇત્યુક્તવતિ વૈ તસ્મિન્ વ્યાસઃ સત્યવતીસુતઃ ॥

૫. વ્યાજહાર કથામેનાં શુકાય બ્રહ્મવાદિને ।
વ્યાસઃ –
પુરા પ્રલયસંલીને બ્રહ્માણ્ડે સચરાચરે ॥

૬. તમસા વ્યાવૃતે તસ્મિન્ વૈખારિકવિવર્જિતે ।
નાધ્યોદન્ત કર્માણિ વિષયાઃ ચ ગુણોત્તરાઃ ॥

૭. આકસ્મિકમભૂત્ શબ્દં યત્ બ્રહ્મ પરિપઠ્યતે ।
તત્ર કાચિદભૂત્ દેવી ત્રિવર્ણા વર્ણરૂપિણી ॥

૮. કૃષ્ણલોહિતશુક્લાભા સ્વરૂપા સૂક્ષ્મદર્શિની ।
અજા જનિત્રી જગતામદ્ભુતાકાર દર્શના ॥

૯. હિતાયૈવ હિ લોકાનામાલલમ્બે પરાં તનુમ્ ।
લોકમાયાનુભાવેન સાસૂત મિથુન ત્રયમ્ ॥

૧૦. વિધિં સર્ગાય સન્દિશ્ય હરિં પાલનકર્મણિ ।
અભ્યયાયાદિશત્ રુદ્રં તે ચ ચક્રુર્યથાપુનઃ ॥

૧૧. અતઃ ત્રિકૂટમિત્યુક્તં ત્રયાણાં મેલનસ્થલમ્ ।
તેષામનુગ્રહાર્થાય સન્દૃષ્ટં જગદમ્બયા ॥

૧૨. ત્રયી તરુસ્વરૂપેણ સાન્નિધ્ય કુરુતે યતઃ ।
તેનાપિ હેતુના ક્ષેત્રં ત્રિકૂટમિતિ કથ્યતે ।
૧૩. યુગે યુગે ચ મર્યાદાં ઉપાધાય શિવઃ સ્વયમ્ ।
એકસ્મિન્ એવ બિમ્બે તુ મૂર્તીનાં ત્રિતયં યતઃ ।
૧૪. દર્શયિષ્યતિ તત્ તસ્માત્ સ્થલસ્યાસ્ય ત્રિકૂટતા ।
અત્રેતિહાસં ભૂયોઽપિ શ્રુણુ પુત્ર મહામતે ॥

૧૫. યસ્યાઃશ્રવણમાત્રેણ નરઃ પાપૈઃ પ્રમુચ્યતે ।
પુરા દનુસુતઃ કશ્ચિત્ નિશુમ્ભસ્ય હિ માતુલઃ ॥

૧૬. ઉદુમ્બરન્નામ મહાન્ નાસર્વા અસુર શિલ્પિનઃ ।
યયાચે સ રહઃસ્થાનં સ્વવાસાય મહત્તરમ્ ॥

૧૭. તતઃ સ વાર્ધકિર્ધીમાન્ માયામસ્થાય તુ દુઃસહામ્ ।
પાર્શ્વે મલયશૈલસ્ય ગુહાયાં નગરં વ્યધાત્ ॥

૧૮. તદાદિ નિર્ભયો ભૂત્વા તસ્મિન્ એવાવસત્ સુખમ્ ।

મયસ્ય માયાવર્યેણ દુર્જયે નગરે વરે ॥

૧૯. નિવસન્ પુત્રપૌત્રાદ્યૈઃ બલૈશ્ચ બલવત્તરઃ ।
બબાધે પ્રત્યહં રાત્રૌ ગૂઢાત્મા સકલાઃ પ્રજાઃ ॥

૨૦. અલ્પેનૈવ તુ કાલેન નષ્ટાભૂત્ દક્ષિણા મહી ।
શરણં પ્રાપ નિકરં મુનીનાં બ્રહ્મવાદિનામ્ ॥

૨૧. પદે પદે દુઃખહન્ત્રીં દુરિતાં દુરિતભઞ્જનીમ્ ।
મલયચમ્પકવને મૂર્તિં સ્થાપ્ય તન્મયીમ્ ॥

૨૨. આરાધ્ય મુનયો ભક્ત્યા દેવીં દુઃખાર્તિભઞ્જનીમ્ ।
પૂજાન્તે ભવભૂતેશીં તુષ્ટુવુઃ સ્તુતિભિશ્ચ તામ્ ॥

૨૩. ઋષયઃ –
જય દેવિ મહાદેવિ મહામઙ્ગલદાયિનિ ।
પ્રસીદત સીદતાં નઃ ત્વં પરિત્રાણાય પાર્વતિ ॥

૨૪. શૂલખડ્ગાઙ્ગમુસલવિનિષ્પિષ્ટારિસનિકે ।
પ્રસીદ સીદતાં નઃ ત્વં પરિત્રાણાય પાર્વતિ ॥

૨૫. ત્વયામ્બ સકલા દૈત્યાઃ ભક્ષિતા રણસઙ્કટે ।
પ્રસીદત સીદતાં નઃ ત્વં પરિત્રાણાય પાર્વતિ ॥

૨૬. ત્વત્કરાગ્રલસત્ શૂલદલિતાઃ દાનવાઃ પુરા ।
રક્ષણાયૈવ લોકાનં સા કૃપા ક્વ ગતામ્બિકે ॥

૨૭. સિંહનાદવિનાદેન મોહિતા દૈત્યદાનવાઃ ।
રક્ષણાયૈવ લોકાનાં સા કૃપા ક્વ ગતામ્બિકે ॥

૨૮. દંષ્ટ્રાકરાલવદનં દૃષ્ટ્વા તે મૂર્ચ્છિતાઃ પરે ।
રક્ષણાયૈવ લોકાનાં સા કૃપા ક્વ ગતામ્બિકે ॥

૨૯. અસ્માન્ પાહિ ભયાત્ ભીતાન્ અનાથાન્ ભક્તવત્સલે ।
અવિલમ્બં દયાપાત્રં વિધેહિ ભુવનત્રયમ્ ॥

૩૦. લીલયૈવ વિહન્ત્રી ત્વં દૈત્યાનાં કીર્તિભઞ્જની ।
અવિલમ્બં દયાપાત્રં વિધેહિ ભુવનત્રયમ્ ॥

૩૧. ત્વદસ્ત્રવિત્રસ્તબલં દૈત્યાનાં ક્ષણભઙ્ગુરમ્ ।
તાન્ ઉદસ્યાસિ દુર્ગે ત્વં ભક્તાનાં હિતકામ્યયા ॥

૩૨. ત્વયા જગદિદં વિશ્વં સમયે પાલ્યતે ભયાત્ ।
તયા નઃ પાહિ કલ્યાણિ પ્રસૂઃ પુત્રાનિવ સ્વયમ્ ॥

૩૩. તુભ્યં નમઃ સર્વજગત્સવિત્રી વિત્રાસ્ય પાપાન્ અમરારિવર્ગાન્ ।
આસ્મં જનં પાહિ ભવાનિ ભદ્રે રુદ્રાણિ ભદ્રે કરુણે પુરાણિ ॥

૩૪. વ્યાસઃ –
ઇત્થં તૈર્મુનિશાર્દૂલૈઃ સ્તૂયમાના મહેશ્વરી ।
પ્રસન્નાવિરભૂત્તસ્માત્ બિમ્બાત્ અમ્ભોરુહાસના ॥

૩૫. સૌન્દર્યસિન્ધુકલ્લોલકટાક્ષાક્ષેપસુન્દરી ।
મનોજ્ઞમન્દસ્મેરાંશુકલિકાકલ્પવલ્લરી ॥

૩૬. કાઞ્જનાઙ્ગદકેયૂરકટકાઙ્ગુલિભૂષિતા ।
અભ્યર્ચ્યમાના ગીર્વણૈઃ કુસુમૈઃ કલ્પકોદ્ભવૈઃ ॥

૩૭. વાચા મોચાફલામોદગન્ધિના વ્યાજહાર સા ।
શ્રી દેવી –
મા વિષાદં મુનિશ્રેષ્ઠાઃ કિં કૃત્વા ભવતાં હિતા ॥

૩૮. સાધયિષ્યામ્યહં નૂનં માયૂયં ભવદાલસાઃ ।
એવં બ્રુવત્યાં દુર્ગાયાં ભક્તિપ્રવાહાત્મમૂર્તયઃ ॥

૩૯. ઋષયઃ –
ઊચુર્જયજયેત્યુક્ત્વા બદ્ધાઞ્જલિપુટોજ્જ્વલાઃ ।
અમ્બાકર્ણય વૃત્તાન્તં અસ્માકં વિપ્લવં મહત્ ॥

૪૦. ગૂઢાત્મા હિ રહઃકશ્ચિત્ દૈત્યોદુમ્બરસંજ્ઞકઃ ।
નિર્માનુષમિમાં કૃત્વા મહીં મુનિજનોષિતામ્ ॥

૪૧. અસ્માકમગ્નિહોત્રાણિ બલવાન્ બાધતે બહુ ।
તં હત્વા દુસ્સહં દૈત્યં અસ્માકં સૌખ્યદા ભવ ॥

૪૨. ઇત્થં સંપ્રાર્થિતા દેવી ઋષિભિઃ ભાવિતાત્મભિઃ ।
તથેત્યભયમાભાષ્ય નિર્જગામામ્બરાધ્વના ॥

૪૩. હિત્વા માયામયસ્યાપિ વિધાર્ય ચ મહીતલમ્ ।
પ્રવિવેશ ગુહાં રમ્યાં સમન્તાત્ દાનવાવૃતમ્ ॥

૪૪. સિંહનાદનિનાદેન સઙ્ઘુષ્ય ભુવનત્રયમ્ ।
પાર્ષ્ણિઘાતં પુરદ્વારિ ચકારાશનિ સન્નિભમ્ ॥

૪૫. તે કિમેતત્ ઇતિ ભ્રાન્તાઃ દૈત્યાઃ ચ પરિતો ગુહામ્ ।
આવવ્રુઃ પરમાં દેવીં શસ્ત્રાસ્ત્રશતવર્ષિણઃ ॥

૪૬. એવમાપતતો દૈત્યાન્ નાનાબલસમન્વિતાન્ ।
પાણિભ્યાં ગૃહ્ણતી વેગાત્ ચિક્ષેપ ચ નિજાનને ॥

૪૭. શતં સહસ્રયુતં રથાનીકં અનેકશઃ ।
રથાનામપિ સાહસ્રં તુરગાણાં પરશ્શતમ્ ॥

૪૮. ચર્ષયન્તી મહાભીમં કાલાનલસમપ્રભમ્ ।
એવં મુહૂર્તમાત્રેણ શૂન્યમાસીત્ ગુહોદરમ્ ॥

૪૯. કેચિન્નષ્ટાઃ ભક્ષિતાશ્ચ ત્યક્ત્વા દૈત્યવપુઃ પુનઃ ।
સંપ્રાપ પરમં સ્થાનં સ્વર્ગમન્યૈસ્સુદુર્લભમ્ ॥

૫૦. હતાનાં તત્ર દૈત્યાનાં પઞ્ચ પઞ્ચ શતાનિ ચ ।
મહાભૂતાભવન્ તત્ર માતૃભક્તાશ્ચ દુર્દમાઃ ॥

૫૧. દુર્ગાદિવ્યા સમાદિષ્ટાઃ ક્ષેત્રપાલાઃ અભવન્ તથા ।
સા ગુહા નગરી ચાસીત્ સિદ્ધાનાં વસતિઃ પુરા ॥

૫૨. એવં નિહત્ય તાન્ દૈત્યાન્ સર્વાન્ નિર્ગત્ય ચ બિલોદરાત્ ।
સ્તૂયમાનાના મુનિગણૈઃ વ્યાજહાર મહેશ્વરી ॥

૫૩. શ્રીદેવી –
સન્તુ ભદ્રાણિ યુષ્માકં મા વિચારો મુનીશ્વરાઃ ।
નિત્યમત્ર વસિષ્યામિ ભવતાં હિતકામ્યયા ॥

૫૪. યથા યથા હિ ધર્મસ્ય ગ્લાનિર્ભવતિ ભૂતલે ।
તથા તથાનુસૂપેણ નાશયિષ્યામિ વિપ્લવમ્ ॥

૫૫. અર્ચિતા પ્રણતા ધ્યાતા સંસ્તુતા ચ પુનઃ પુનઃ ।
કાઙ્ક્ષિતાનિ પ્રદાસ્યામિ સર્વેષામેવ દેહિનામ્ ॥

૫૬. માહાત્મ્યં મમ લીલાયાઃ યે શ ૃણ્વન્તિ પઠન્ત્યપિ ।
તેષામપિ વિશેષેણ નિત્યં કામદુહાસ્મ્યહમ્ ॥

૫૭. ઇતિ બ્રુવાણા સા દેવી તત્રૈવાન્તરધીયત ।

સંહૃષ્ટાઃ સકલાઃ લોકાઃ ઋષયશ્ચ તપોધનાઃ ॥

૫૮. અદ્યાપિ સંસ્થિતા દેવી ક્ષેત્રે પરમપાવને ।
તપશ્ચરન્તઃ સંહૃષ્ટાઃ સ્તુવન્તઃ પરમેશ્વરીમ્ ॥

૫૯. તદારભ્ય તથા તત્ર સુરાજ્ઞા દાનવાઃ હતાઃ ।
ગણભૂતાઃ પાલયન્તઃ સ્થલં મહત્ ॥

૬૦. તદાદિ સિદ્ધનગરં સિદ્ધૈઃ પૂર્ણં ગુહાતલમ્ ।
ચમ્પકાવિપિનં તત્ર ખ્યાતમાસીત્ નિરન્તરમ્ ॥

૬૧. તદાદિ ચમ્પકારણ્યં દેવી સા ચમ્પકાભિધા ।
પુરા બ્રહ્માદિભિર્દેવૈઃ કેનચિત્ કારણાન્તરે ॥

૬૨. અત્રાકારિ મહાપીઠં તત્પ્રસાદોપલબ્ધયે ।
એવં ક્ષેત્રસ્ય માહાત્મ્યમહો વાચામગોચરમ્ ॥

૬૩. સ્મરણાત્ એવ જન્તૂનાં ભોગમોક્ષૈકસાધનમ્ ।
ઇતઃ પરં પ્રવક્ષ્યામિ કુમ્ભયોનેઃ મહાત્મનઃ ॥

૬૪. ચરિતં તામ્રપર્ણ્યાસ્તુ મલયસ્ય મહાગિરેઃ ।
યથાવૃત્તં પ્રવક્ષ્યામિ શ્રુણુ પુત્ર મહામતે ॥

૬૫. એવમભ્યુદયં રૂપં હરેર્નારાયણસ્ય તુ ।
વિધાય શામ્ભવં લિઙ્ગં પૂજયામાસ ભક્તિતઃ ॥

૫૬. પ્રાવેશયત્ તુ તત્રત્યાન્ મહાપાશુપતવ્રતમ્ ।
લોપામુદ્રાન્વિતઃ શ્રીમાન્ સપર્યાં વિદધે પરામ્ ॥

૬૭. ઉપહારૈઃ મહાદેવ્યાઃ નિર્દિષ્ટેનૈવ કર્મણા ।
તત્પ્રસાદમનુપ્રાપ્ય સુખં તત્રાવસત્ ચિરમ્ ॥

ઇતિ પઞ્ચમઃ અધ્યાયઃ ।  Pro.Total = 250 + 67 =317.

## ષષ્ઠઃ અધ્યાયઃ

ચિત્રાનદ્યાઃ રોદિનીનદ્યાઃ ચ ઉદ્ભવઃ ।

૧. પ્રભાતાયાં તુ શર્વર્યાં નિયમસ્નાનતત્પરઃ ।
તામ્રામુત્થાપયામાસ સ્તોત્રૈઃ શ્રુતિમનોહરૈઃ ॥

૨. અગસ્ત્ય ઉવાચ –
અમ્બ તામ્રે મહાદેવિ લોકાનુગ્રહકારિણિ ।
સુપ્રભાતા નિશા કૃત્સ્ના પ્રબુદ્ધા ભવ શોભને ॥

૩. અનાદિશામ્ભવીકણ્ઠકનકામ્બુજમાલિકે ।
મહામણિપ્રસૂર્માતઃ પ્રબુદ્ધા ભવ શોભને ॥

૪. સઙ્કુચત્કૈરવં ભૃઙ્ગાઃ વિહાય કૃપણં યથા ।
ઉત્ફુલ્લાં નલિનીં યાન્તિ પ્રબુદ્ધા ભવ શોભને ॥

૫. ગૌરીકુચાચલોદગ્ચન્નિર્ઝરશ્રી વિડમ્બિની ।
તીર્થાનાં તીર્થદા રૂપે પ્રબુદ્ધા ભવ શોભને ॥

૬. શ્રુતયઃ સકલાઃ લોકહિતાય શિવકલ્પિતાઃ ।
તસ્માત્ વેદદ્રવા પ્રોક્તા મહાપાતકનાશિની ॥

૭. શિવભક્તિમાયે પુણ્યે વિષ્ણુભક્તિપ્રવાહિની ।
બ્રહ્મશક્તિરસાસિ ત્વમુત્તિષ્ઠામૃતવાહિની ॥

૮. અન્નદા વસુદા ભૂરિ પુણ્યદા મજ્જતાં નૃણામ્ ।
ત્વમેવ પરમા શક્તિઃ પ્રસીદ મલયાત્મજે ॥

૯. ઇતિ સ્તુતા મુનીન્દ્રેણ તામ્રપર્ણી સરિદ્વરા ।
સમુત્તસ્થૌ શનૈર્દેવી નિદ્રકલુષિતેક્ષણા ॥

૧૦. સખીભિસ્સહ સંયુક્તા મન્દં મન્દં સમાયયૌ ।
તત્પાદકમલાસઙ્ગાત્ તપ્તહાટકનૂપુરાત્ ॥

૧૧. વિશીર્ણમણયો ભૂમૌ વૈશ્વાનરસમપ્રભાઃ ।
તેષુ સ્વચ્છતયા દૃષ્ટાઃ તામ્રાયાઃ મૂર્તયઃ શુભાઃ ॥

૧૨. તત્રૈકાં મણિબિમ્બસ્થાં છાયામૂર્તિં નિજાં શુભામ્ ।
આહૂય વ્યાજહારામ્બા સ્મયમાના મહાનદી ॥

૧૩. તામ્રપર્ણી –
એહ્યેહિ વત્સે કલ્યાણિ મચ્છક્તિપરિભાવિતે ।
મદાજ્ઞયા મુનેરસ્ય સ્નાનપાનાય સત્વરમ્ ॥

૧૪. પ્રવાહરૂપા શુદ્ધોદા આવિર્ભવિતુમર્હસિ ।
ઇમે ભવેતાં સરિતે વયસ્યે તીર્થવિગ્રહે ॥

૧૫. ઇત્થં આજ્ઞાપિતા સા તુ મણિચ્છાયા મનોહરા ।
સખીભ્યાં સહ સમ્ભૂય નાનાવર્ણા મણિત્વિષા ॥

૧૬. ઇમાં પ્રદક્ષિણીકૃત્ય સર્વેષાં પશ્યતાં મુદા ।
ઓમિત્યામન્ત્ર્ય શિખરાત્ મલયસ્ય મહાગિરેઃ ॥

૧૭. પ્રવાહરૂપિણી પૂર્ણા નિસ્સસાર ઝષાકુલા ।
મત્સ્યકચ્છપસમ્પાતા શઙ્ખશુક્તિનિષેવિતા ॥

૧૮. તરઙ્ગિણી શૈવલિની મહાવર્તશતાન્વિતા ।
શુદ્ધોદકા સ્વાદુમતી વિચિત્રા પાપહારિણી ॥

૧૯. મધ્યે ત્રિકૂટક્ષેત્રસ્ય નિસ્સસાર શનૈઃશનૈઃ ।
ક્ષાલયન્તી પદામ્ભોજયુગલં કુમ્ભજન્મનઃ ॥

૨૦. લોપામુદ્રાઙ્ઘ્રિસંસક્તયાવકાદ્રવપાટલામ્ ।
નદીમખણ્ડસમ્ભૂતાં ગઙ્ગામિવ શુભોદકામ્ ॥

૨૧. દૃષ્ટ્વા મુનિગણાસ્સર્વે હૃષ્ટાશ્ચ પરમર્ષયઃ ।
સિદ્ધગન્ધર્વયક્ષાશ્ચ પતગોરગકિન્નરાઃ ॥

૨૨. ઇન્દ્રાદ્યાઃ સકલાઃ દેવાઃ સ્તુવન્તઃ કુમ્ભસમ્ભવમ્ ।
પુષ્પવૃષ્ટિમુચો વ્યોમ્નિ ત્રિકૂટક્ષેત્રમાયયુઃ ॥

૨૩. નાનાવર્ણતયા ચિત્રાં ઇમાં નામ્ના પ્રચક્રિરે ।
ચૈત્રમાસિ સિતે પક્ષે ચિત્રાયુજિ નિશાકરે ॥

૨૪. જાતા મહાનદી હ્યેષા તસ્માત્ ચિત્રેતિ કીર્તિતા ।
બાલા નદીતિ વિખ્યાતા બાલારૂપતયા ધ્રુવમ્ ॥

૨૫. તતખીં ઊચિરે શુક્લામપરામપિ મણ્ડિનીમ્ ।
તીર્થપ્રવાહરૂપાયાં મહાનદ્યાં મહર્ષયઃ ॥

૨૬. સસ્નુઃ પવિત્રમિત્યુક્ત્વા દેવાશ્ચ પિતૃગુહ્યકાઃ ।
તેષામનુગ્રહાર્થાય ત્રિકૂટેશો મહેશ્વરઃ ॥

૨૭. આવિર્ભૂતો મહાલિઙ્ગાત્ દદૌ તીર્થં મહેશ્વરઃ ।
સહ પત્ન્યા મુનિઃ શ્રીમાન્ સ્નાત્વાસ્યાં શમ્ભુસન્નિધૌ ॥

૨૮. તર્પયિત્વા ઋષીન્ દેવાન્ પિતૄન્ ચ વિધિપૂર્વકમ્ ।
દેવં ત્રિકૂટમીશાનં સમ્પૂજ્ય કુસુમાદિભિઃ ॥

૨૯. પૂજ્યમાનસ્સિદ્ધગણૈઃ તામ્રપર્ણ્યાસમઞ્ચિતઃ ।
સમાપ્ય કાલ્યં નિયમં બ્રાહ્મણાંશ્ચ યથાવિધિ ॥

૩૦. સન્તર્પ્ય ભક્ષ્યભોજ્યાદ્યૈઃ દક્ષિણાભિર્યથોચિતૈઃ ।
પર્વતેન મુનીન્દ્રેણ તથા તુમ્બુરુણાન્વિતઃ ॥

૩૧. બુભુજે સ બુધશ્રેષ્ઠઃ દેવી તામ્રા સખીવતામ્ ।
લોપમુદ્રા રાજપુત્રી ભર્તુઃશેષં પ્રગૃહ્ય સા ॥

૩૨. ઉવાસ સહધર્મજ્ઞા શુશ્રુષણપરાયણા ।
એવં નિવસતાં તેષાં મુનીનાં કુમ્ભસમ્ભવઃ ॥

૩૩. અસ્તાદ્રિમગમત્ શ્રીમાન્ અંશુમાલી શનૈઃશનૈઃ ।
ઉપાસ્ય પશ્ચિમાં સન્ધ્યાં હુતાગ્નિઃ સહ ભાર્યયા ॥

૩૪. કથાભિરભિરામાભિઃ રઞ્જયાનો જનં મહત્ ।
નિનાય રજનીં તત્ર નિમિષાર્ધમિવ ક્ષણાત્ ॥

૩૫. એવં વ્યુધાસ્ય રજનીમુદિતે સવિતર્યથ ।
ભગવન્તમુપસ્થાય ભાસ્કરં ભુવનેશ્વરમ્ ॥

૩૬. પ્રતસ્થે દક્ષિણામાશામાદાય મલયાત્મજામ્ ।
સહ તુમ્બુરુણા ચૈવ પર્વતેન મહાત્મના ॥

૩૭. ચિત્રા નદીં સમુત્તીર્ય લઙ્ઘયિત્વા વનાન્યપિ ।
અશ્રુણોત્ રોદનં ઘોરં કરુણં કણપીડનમ્ ॥

૩૮. પુનઃ ક્ષણાન્તરેણૈવ વને તસ્મિન્ ભયાનકે ।
કાપ્યદૃશ્યન્ત તન્વઙ્ગી સર્વાયવસુન્દરી ॥

૩૯. પ્રણાલીવ પ્રમુઞ્ચન્તી નેત્રાભ્યામશ્રુનિર્ભરમ્ ।
તામાસાદ્ય દયાવિષ્ટા તામ્રપર્ણી શુચિસ્મિતા ॥

૪૦. પ્રપચ્છ વાચા પીયૂષપરિણામાક્ષરાઙ્કયા ।
દેવી –
કા ત્વમર્થં વિપિને પરં રોદિષિ ભીષણમ્ ॥

૪૧. શ્રોતુમિચ્છામિ તે દુઃખં શ્રોતવ્યં યદિ મે પુનઃ ।
વક્તુમર્હસ્યશેષેણ મૈવં શોચિતુમર્હસિ ॥

૪૨. ઇતિ પૃષ્ટા સા તયૈવમવોચત્ દુઃખકારણમ્ ।
તામ્રે કલ્યાણિ વક્ષ્યામિ મમ શોકસ્ય કારણમ્ ॥

૪૩. કાશ્યપસ્ય સુતા નામ્ના કુન્તલાસ્મિ શુચિસ્મિતે ।
સુમેધસ્ય પ્રિયા ભૂત્વા ઋષેઃ તસ્ય તપસ્વિનઃ ॥

૪૪. ચિરં ભુક્તાનિ ભોગાનિ વિવિધાન્યપિ ।
અત્ર કશ્ચિત્ મહદ્રક્ષઃ સમાગત્ય વિધેર્બલાત્ ॥

૪૫. જઘાન મમ ભર્તારં માં હન્તું પુનરાગતઃ ।
કેશે જગ્રાહ પાણિભ્યાં સોઽપિ ભસ્મીકૃતોઽભવત્ ॥

૪૬. તતઃ ચિતામારોપ્ય વહ્નિં પ્રક્ષિપ્ય સર્વતઃ ।
પ્રવિષ્ટાયાં મયિ પુનઃ સોઽગ્નિરન્તર્દધે મહાન્ ॥

૪૭. સ્વસ્ત્યસ્તુ નૂનમિત્યાસીત્ તાવત્ વાગશરીરિણી ।
તસ્માન્નિવૃત્તા મરણાત્ કાઙ્ક્ષન્તી શ્રેય ઉત્તમમ્ ॥

૪૮. કિં મરોમિ ક્વ ગચ્છામિ હા કષ્ટં સમુપસ્થિતમ્ ।
પ્લાવમાના મહાસિન્ધાવઘાતે દુઃખસાગરે ॥

૪૯. દૃષ્ટા મે દેવિ કલ્યાણિ ભાગ્યશેષાત્ મમાગ્રતઃ ।
ત્વં માતા ત્વં સખી સાક્ષાત્ ત્વામહં શર્ણં ગતઃ ॥

૫૦. ઇત્થં વિલપમાનાં તાં સીદન્તીં ચ પુનઃપુનઃ ।
આલિલિઙ્ગે જગન્માતા કૃપયા મલયાત્મજા ॥

૫૧. તવન્મુનિઃ સમુત્તસ્થૌ તૌ સુધાસંસર્ગતો યથા ।
પપાત ભૂરિ પુષ્પાણિ દેવમુક્તાનિ ભૂતલે ॥

૫૨. તત્દૃષ્ટ્વા મહદાશ્ચર્યં કુમ્ભભૂઃ અતિવિસ્મિતઃ ।
બહુમેને મલયજાં લોપામુદ્રા ચ હર્ષિતા ॥

૫૩. સુમતિઃ સહસોત્થાય કુમ્ભયોનિસમન્વિતઃ ।
તામ્રામારાધયામાસ દેવીં ત્રૈલોક્યપાવનીમ્ ॥

૫૪. તસ્યાઃ પ્રસાદાત્ સંપ્રાપ્ય વરાન્ શ્રેયાંશ્ચ ભૂરિશઃ ।
તદશ્રુવારિધારાભિઃ પૂરિતા કાપ્યભૂન્નદી ॥

૫૫. અનુગ્રહાત્ તામ્રપર્ણ્યાઃ સંસર્ગાત્ કુમ્ભજન્મનઃ ।
અદ્યાપિ પુણ્યતીર્થા સા દૃશ્યતે દક્ષિણાપથે ॥

૫૬. તૌ દમ્પતી પ્રતિષ્ઠાપ્ય સ્વાશ્રમે કુમ્ભસમ્ભવઃ ।
 પુનસ્સ તામ્રયા સાર્ધં પ્રયાતો દક્ષિણાં દિશમ્ ॥

૫૭. આસસાદ શિલાવર્તં યત્રાસ્તે વરુણાત્મજઃ ।
 વજઙ્ગદ ઇતિ ખ્યાતો બ્રહ્મશાપેન કર્શિતઃ ॥

૫૮. પિત્રાદિષ્ટાં ગુહામેત્ય નિર્મિતાં વિશ્વકર્મણા ।
 ચકાર વસતિં તત્ર મલયસ્ય તુ પાર્શ્વતઃ ॥

૫૯. વીક્ષ્યમાણસ્તુ શાપાન્તં નિનાય શરદાં શતમ્ ।
 સ દૃષ્ટ્વા કલશીસૂનું પૂજયિત્વા મહાનદીમ્ ॥

૬૦. અનુગ્રહાત્ તામ્રપર્ણ્યાઃ પુનર્દેવત્વમાપ્તવાન્ ।
 વજાઙ્ગદગુહાસ્થાનં તોરણાચલસંજ્ઞિતામ્ ॥

૬૧. તસ્માત્ દક્ષિણતઃ કિઞ્ચિત્ ક્રોશમાત્રમતીત્ય સઃ ।
 અત્રેરાશ્રમમાશ્ચર્યમવાપ મુનિપુઙ્ગવઃ ॥

ઇતિ ષષ્ઠઃ અધ્યાયઃ । Pro.Total = 317 + 61 = 378.

## સપ્તમઃ અધ્યાયઃ

વજાઙ્ગદશાપનિવૃત્તિઃ શિવશૈલે ઘટનોત્પત્તિનિરુપણ મ્ ।

૧. ઇત્થં નિગદિતાં વાણીં પિત્રા વ્યાસેન ધીમતા ।
 હર્ષમાણઃ પુનર્વાક્યમાબભાષે શુકો મુનિઃ ॥

૨. શ્રી શુકઃ –
 કિમાઘઃ કૃતવાન્ તાત વારુણિઃ કેન હેતુના ।
 વેધાઃ તમશપત્ કેન તન્ મે કથય વિસ્તરાત્ ॥

૩. વેદવ્યાસઃ –
 અહો તે કથયિષ્યામિ કથાં કલુષનાષિનીમ્ ।
 પુરા સારઙ્ગકેતસ્ય કન્યા ગન્ધર્વભૂપતેઃ ॥

૪. માલતીં નામ સુભગાં ઉપયેમે જલાધિપઃ ।
 રેમે ચિરં તયા રાજા વરુણો હરિદીશ્વરઃ ॥

૫. સુષેવે સા વરારોહા પુત્રાન્ ભર્તૃસમાન્ શુભાન્ ।

વજ્રાઙ્ગદઃ પૂર્તિદક્ષો પ્રભાનુર્મણિવાન્ પ્રસૂઃ ॥

૬. પઞ્ચૈતે ભ્રાતરઃ શૂરાઃ ધર્મજ્ઞાઃ લોકસમ્મતાઃ ।
બ્રહ્મણા શઙ્કરેણાપિ હરિણા વજ્રપાણિના ॥

૭. સમ્માનિતાઃ વિશેષેણ પિત્રોઃ પ્રીતિકરાઃ અભવન્ ।
તેષુ જ્યેષ્ઠો મહતેજાઃ ધીરો વજ્રાઙ્ગદો બલી ॥

૮. કદાચિત્ વારુણીલોકાત્ વિનિષ્ક્રમ્ય વિમાનવાન્ ।
વીણામાદાય વિમલામુદ્ગતઃ બ્રહ્મણઃ સભામ્ ॥

૯. ઉત્પપાતાતિવેગેન વ્યોમ્ના વિસ્તારશાલિના ।
આદિત્યપદમુલ્લઙ્ઘ્ય ગ્રહનક્ષત્રમણ્ડિતમ્ ॥

૧૦. શિંશુમારમહાચક્રં તથા સપ્તર્ષિમણ્ડલમ્ ।
ધ્રુવં પ્રદક્ષિણીકૃત્ય ગચ્છન્ ગગનવર્ત્મના ॥

૧૧. દદર્શ સ વિમાનસ્થં પ્રયાન્તં બ્રહ્મણસ્સભામ્ ।
મણિકાન્તમિતિખ્યાતં ગુહ્યકાનાં ગણેશ્વરમ્ ॥

૧૨. તસ્યોત્સઙ્ગે વર્તમાનાં દદર્શ સ્તબકાવતીમ્ ।
અસમ્ભ્રાન્ત ઇવાસાદ્ય નિરુધ્યાધ્વાનમોજસા ॥

૧૩. બભાષે વચનં ધીમાન્ વારુણિઃ ગુહ્યકેશ્વરમ્ ।
વજ્રાઙ્ગદઃ –
સાધુ ગુહ્યક રાજન્ ત્વં કુલિનોઽસિ વિશેષતઃ ॥

૧૪. અઞ્જનાખ્યસ્ય યક્ષસ્ય સુતેયં મત્પરિગ્રહા ।
સ્તબકાખ્યા વધૂરેષા કુત્ર વા નીયતે ત્વયા ॥

૧૫. મુઞ્ચ મુઞ્ચ વધૂમેનામકાર્યં મા કરિષ્યથાઃ ।
ઇત્યુક્તવતિ વૈ તસ્મિન્ પુનઃ પ્રાહ સ ગુહ્યકઃ ॥

૧૬. મા કુરુ ત્વમહઙ્કારં ધર્મપત્ની ન તે ખલુ ।
બહવોઽસ્યાઃ પતિર્ભૂત્વા ત્વાદૃશા માદૃશા જનાઃ ॥

૧૭. યમેષા વૃણુતે કાન્તં સોઽસ્યાઃ પતિરસંશયઃ ।
સાધારણસ્ત્રી સર્વેષાં સુરાણાં દેવકલ્પિતમ્ ॥

૧૮. એવમન્યોન્યવાદેન કલહસ્સુમહાન્ અભૂત્ ।
ગુહ્યકં તં પરાજિત્ય તામાદાય વરાઙ્ગનામ્ ॥

૧૯. ગતો વજ્રાઙ્ગદો લોકં સોઽપ્યગાત્ બ્રહ્મણસ્સભામ્ ।
તં દૃષ્ટ્વા દીનમનસં ક્લાન્તં તં ગુહ્યાધિપમ્ ॥

૨૦. કિમેતત્ ઇતિ પપ્રચ્છ દયાલુસ્સ પિતામહઃ ।
બ્રહ્મા –
કિં તે સ્ન્તાપસમ્ભ્રાન્તસ્વાન્તઃક્લાન્તં વપુઃ પરમ્ ॥

૨૧. દારાનુસક્તમનસાં કુતઃ સૌખ્યં ભવિષ્યતિ ।
ધર્મતઃ તસ્ય સા નૂનં ભાર્યા ભવિતુમર્હતિ ॥

૨૨. તથાપ્યકૃત્યં તસ્યૈવ ધ્રુવચક્રાદિતઃ પરમ્ ।
રાગવન્તો ભવિષ્યન્તિ તે ત્યાજ્યા મત્સમીપતઃ ॥

૨૩. એતત્ આરભ્ય તસ્યૈવ માસ્તુ દેવગતિર્ધ્રુવમ્ ।
ઇત્યુક્ત્વા ભગવાન્ બ્રહ્મા સાન્ત્વયામાસ ગુહ્યકમ્ ॥

૨૪. સોઽપિ વજ્રાઙ્ગદઃ શાપાત્ નષ્ટગતિર્ધ્રુવમ્ ।
પિતરં શરણં પ્રાપ વરુણં યાદસાં પતિમ્ ॥

૨૫. સ તુ પુત્રં સમાશ્વસ્ય પ્રાપ્ય બ્રહ્માણમીશ્વરમ્ ।
પ્રાર્થયામાસ શાપાન્તં સોઽપિ તં પુનરબ્રવીત્ ॥

૨૬. યદા મલયશૈલસ્ય પ્રાન્તશ્રુઙ્ગે મહોદયે ।
દૃશ્યસે તૈજસં ચિત્રં તોરણં મણિભાસ્વરમ્ ॥

૨૭. તદા તામ્રાસમાયુક્તો મૈત્રાવરુણિરાત્મવાન્ ।
આગમિષ્યતિ લોકાનાં હિતાય મુનિપુઙ્ગવઃ ॥

૨૮. તદનુગ્રહમાસાદ્ય તામ્રપર્ણ્યાં વિગાહ્ય ચ ।
પુનર્દેવગતિં યાતુ સભાર્યો નાત્ર સંશયઃ ॥

૨૯. ઇત્થં લબ્ધ્વા તુ શાપાન્તં વારુણિઃ સહ ભાર્યયા ।
વરુણસ્યાજ્ઞયા વિશ્વકર્મણા નિર્મિતાં ગુહામ્ ॥

૩૦. આસાદ્ય વસતિં ચક્રે વીક્ષમાણો મહામુનેઃ ।
સમાગમં તામ્રપર્ણ્યા યાતો હય ઇવાધ્વનિ ॥

૩૧. ગતે વર્ષશતે પૂર્ણે ગુહાદ્વારિ વિજૃમ્ભિતે ।
તોરણં તરુણાદિત્યપાટલં ચારુચિત્રકમ્ ॥

૩૨. આલોક્ય સ ગુહાદ્વારિ ધીરો વજ્રાઙ્ગદો મુદા ।
નિર્ગત્ય ગર્તાત્ વિસ્તીર્ણે દદર્શ મહતીં મહીમ્ ॥

૩૩. ઉત્ફુલ્લચન્દવનામુદાગરુવાટિકામ્ ।
ઉત્ફુલ્લકદલીફલાં ઉચ્ચાવચવિહઙ્ગમામ્ ॥

૩૪. વસન્તમદનોલ્લાસકૂજત્કોકિલસારસામ્ ।
આશ્ચર્યતોરણચ્છાયાં ચમત્કૃતમણિસ્થલીમ્ ॥

૩૫. ઇત્થં વ્યાપારયન્ દૃષ્ટિં સમન્તાત્ વરુણાત્મજઃ ।
દિશમાવૃત્ય કૌબેરીં પ્રભાં જ્યોત્સ્નામિવ સ્થિતામ્ ॥

૩૬. દૃષ્ટ્વા સ વિસ્મયાવિષ્ટો દદર્શ મુનિમગ્રતઃ ।
અક્ષિસાફલ્યકરણં તપઃફલમિવ સ્થિતમ્ ॥

૩૭. અક્ષિલક્ષ્યં મુનિં કૃત્વા પરમાનન્દનિર્ભરઃ ।
પપાત પાદયોસ્તસ્ય પાહિ માં પાહિ મામિતિ ॥

૩૮. અભિવાદ્ય મુનિશ્રેષ્ઠં લોપામુદ્રં ચ તત્પ્રિયામ્ ।
તાભ્યાં પ્રદર્શિતાં દેવીં નદીં મુક્તમણિપ્રસૂમ્ ॥

૩૯. તસ્યાઃ દર્શનમાત્રેણ દેવભાવન્મવાપ્તવાન્ ।
તાવત્ વિમાનમારૂઢા સંહૃષ્ટા સ્તબકાવતી ॥

૪૦. આયયૌ વરુણઃ ચાપિ ભ્રાતરોઽસ્ય સમન્તતઃ ।
સહ દેવાસ્સમાગત્ય સધુ સાધ્વિત્યઘોષયન્ ॥

૪૧. મુનીં પ્રદક્ષિણીકૃત્ય તામ્રપર્ણીં પ્રણમ્ય ચ ।
શુદ્ધાત્મા શાપનિર્મુક્તઃ પૂજિતસ્સકલૈસ્સુરૈઃ ॥

૪૨. વજ્રાઙ્ગદો મહાબાહુઃ પુનર્દેવગતિં ગતઃ ।
અભ્યર્ચ્ય બરુણો રાજા લોપામુદ્રાપતિં મુનિમ્ ॥

૪૩. અભિષ્ટૂય મુનિં તદ્વત્ ચન્દનાચલકન્યકામ્ ।
બ્રહ્મણાનુમતઃ તસ્યાઃ શુશ્રૂષાર્થં જલાધિપઃ ॥

૪૪. તીર્થાનાં દિવ્યરૂપાણાં સાગરં કોટિત્રયં દદૌ ।
સા તાભિઃ તીર્થકન્યાભિઃ સંવૃતા લોકપાવની ॥

૪૫. તપ્તહાટકસંસ્થેવ બભૌ મણિમતલ્લિકા ।
તાં દૃષ્ટ્વા મુનયઃ સિદ્ધાઃ દેવાશ્ચ સહ દાનવૈઃ ॥

૪૬. તુષ્ટુવુઃ પરમપ્રીતાઃ પુષ્પવૃષ્ટિમુચો દિવિ ।
સમાજઃ સર્વસિધ્દ્ધાનાં તીર્થાનાં ત્રિદિવૌકસામ્ ॥

૪૭. જ્યોતિષામિવ સઙ્ઘાતો વિરરાજ મહીતલે ।
સ તૈઃ પરિવૃતઃ શ્રીમાન્ તામ્રયા મણિગર્ભયા ॥

૪૮. કુમ્ભયોનિઃ સંપ્રતસ્થે સંહૃષ્ટો દક્ષિણાં દિશમ્ ।
શંસન્તઃ તસ્ય કર્માણિ કુમ્ભયોનેઃ મહાત્મનઃ ॥

૪૯. મહાનુભાવાઃ તામ્રાયઃ કથયન્તઃ પરસ્પરમ્ ।
અપનિન્યુઃ તદધ્વાનપરિશ્રમં અમી જનાઃ ॥

૫૦. શિવસૈલમુપાજગ્મુઃ યત્રાસ્તે શઙ્કરસ્સ્વયમ્ ।
તપસ્યતઃ ચન્દનાદ્રેઃ સપત્નીકસ્ય વૈ ચિરમ્ ॥

૫૧. પ્રસાદમકરોત્ યત્ર શિવઃ સર્વશિવઙ્કરઃ ।
તદાદિ શિવસંપ્રાપ્ય શિવશૈલ ઇતીરિતઃ ॥

૫૨. તાવદત્રિર્મહાતેજાઃ મુનિસ્સાક્ષાત્ હરિસ્સ્વયમ્ ।
અગ્રે પ્રાદુરભૂત્તસ્ય મુનેઃ કલશજન્મનઃ ॥

૫૩. આદાય પાદ્યમર્ઘ્યં ચ મધુપર્કં ચ મન્ત્રવિત્ ।
સપર્યામકરોત્તસ્મૈ પ્રહૃષ્ટેનાન્તરાત્મના ॥

૫૪. અહો સમાગમં શ્રેષ્ઠં તવાત્ર કલશીસુત ।
મન્યે લોકહિતાર્થાય મહાદેવેન કલ્પિતમ્ ॥

૫૫. ભગીરથસ્ય રાજર્ષેઃ ગઙ્ગામાનયતઃ પુરા ।
તપસા પાલિતં વિશ્વં પાપેભ્યઃ સચરાચરમ્ ॥

૫૬. ઇદાનીં ભવતા શ્રીમાન્ તામ્રામાનયાં નદીમ્ ।
પાપાત્ ભયાન્ મહાવ્યાધેઃ દારિદ્ર્યાત્ પાલિતં જગત્ ॥

૫૭. એનાં મહાનદીં પુણ્યાં દર્શનાત્ પાપનાશિનીમ્ ।
યે ભજન્તિ નરાઃ ભક્ત્યા તેષાં નાસ્તિ દરિદ્રતા ॥

૫૮. યદમ્બુપાનતો મર્ત્યાઃ ચિરં જીવન્ત્યરોગિણઃ ।
યત્તીર્થાપ્લુતદેહસ્ય મોક્ષલક્ષ્મી કરસ્થિતા ॥

૫૯. એનામાનયતા બ્રહ્મન્ ભવતા કરુણાત્મના ।

સનાથા વિહિતા નૂનં દક્ષિણાશા સુદક્ષિણા ॥

૬૦. ઇતિ વાચા કુમ્ભયોનિં બહુમાન્ય પુનઃપુનઃ ।
નત્વૈવાઞ્જલિના દેવીં તુષ્ટાવ મલયાત્મજામ્ ॥

૬૧. નમસ્તુભ્યમાબ્રહ્મકીટં વિશ્વં પાપાત્ પાલયન્તી પયોભિઃ ।
તીર્થાકારા ત્વં દૃશ્યસે ત્વં પ્રકૃત્યા
સૂક્ષ્માકારા દૃશ્યસે વેદવાગ્ભિઃ ॥

૬૨. ત્રેધા ભઙ્ક્ત્વા સ્વાં તનું દ્યોતયન્તીં
ગઙ્ગા કૃષ્ણા ભારતીતિ પ્રશસ્તિમ્ ।
ભકાનસ્માન્ પાપતઃ પાહિ માતઃ તામ્રે સમ્પત્સાધને સમર્થા ॥

૬૩. આશૈલાબ્ધિં સ્રોતસાઞ્ચોદધારા પીયૂષેણ પ્રાજ્યકૂલદ્વ્યે તે ।
સ્તન્યક્ષીરેણૈવ લોકં પુનાના માતસ્તામ્રે દેવિ નિત્યા ભવ ત્વમ્ ॥

૬૪. ઇત્યભિષ્ટૂય તામ્રાં દેવીં અત્રિઃ પરમધર્મવિત્ ।
અનસૂયાસમાયુક્તો ધ્યાનારૂઢોઽભવત્ પુનઃ ॥

૬૫. તવત્ શૈલેન્દ્રકટકાત્ અત્રેઃ સન્તોષકામ્યયા ।
નિષ્ક્રાન્તન્ તત્ મહાતીર્થં નિસ્સસાર મહોર્મિવત્ ॥

૬૬. સૈષા સખી તામ્રપર્ણ્યા ઘટનેતિ પ્રકીર્તિતા ।
સ્નાનાત્ પાનાત્ પાપહન્ત્રી પુણ્યા મન્દાકિની યથા ।
૬૭. તસ્યાં સ્નાત્વા સપત્નીકઃ સોઽત્રિસ્સાર્ધં સુરોત્તમૈઃ ।
અગસ્ત્યેન  મુનીન્દ્રેણ તર્પયિત્વા પિતૄન્ સુરાન્ ॥

૬૮. શિવશૈલેશ્વરં નત્વા સંપ્રાપ્ય ચ મનોરથાન્ ।
ઘતયત્યખિલાન્ કામાન્ મજ્જતાં પિબતાં નૃણામ્ ॥

૬૯. ઘટનેયં નદી ભવિષ્યતિ ન સંશયઃ ।
અન્વર્થં નિર્ગતા યસ્માત્ આત્રીતિ પ્રશસ્યતે ॥

૭૦. શિવશૈલાત્ વિનિષ્ક્રાન્તા શિવશૈલવતી તતઃ ।
તામ્રાનુજેતિ કેચિત્ તાં અન્યે શૈલોદકામિતિ ॥

૭૧. એવં પ્રશસ્ય બહુધા સ્તુભિઃ ઘટનાં નદીમ્ ।
સહા(મલય)દ્રિણા મુનિગણૈઃ અમરિરભિસંવૃત ॥

૭૨. પ્રતસ્થે કલશીસૂનુઃ તામ્રયા પરયા પરમ્ ।

વ્યોમયાનૈઃ સિદ્ધગણૈઃ ગન્ધર્વોરગકિન્નરૈઃ ॥

૭૩. સમન્તાત્ વસુધાકીર્ણા નક્ષત્રૈઃ દ્યૌરિવાબભૌ ।
મધ્યે મુનિવરઃ શ્રીમાન્ માલેય્યા સહિતઃ તથા ।
જ્યોત્સ્નયા સહિતઃ વ્યોમ્નિ શશીવ રુરુચે પરમ્ ॥

૭૪. એવં સમાજો મહતાં ઋષીણાં વ્યાઘુષ્ય નાનાનિગમપ્રબન્ધૈઃ ।
અપાસ્તશોકં નિહતા શુભૌઘં સમાસત્ ચન્દનશૈલરાજમ્ ॥

ઇતિ સપ્તમઃ અધ્યાયઃ । Pro.Total = 378 + 74 = 452

## અષ્ટમઃ અધ્યાયઃ

હયગ્રીવાશ્રમં પ્રતિ અગસ્ત્યાગમન મ્ ।

૧. ભગવન્ સર્વધર્મજ્ઞ લોકાનુગ્રહકર્મકૃત્ ।
શ્રુત્વાપિ ત્વન્મુખામ્ભોજકથાપીયૂષસન્તતિઃ ॥

૨. નહિ મે તૃપ્તિજનની કામિનઃ કામિની યથા ।
આહ્લાદયતિ ગાત્રાણિ ચિત્તમાનન્દયત્યપિ ॥

૩. અન્તઃકરણસન્તાપં વ્યપોહતિ દુધેવ નઃ ।
પારાવારમિવાપારં અનન્તં શ્રુતિવત્ પુનઃ ॥

૪. અપરા સ્વાદુ પીયૂષાધારાપૂરમિવાદ્ભુતમ્ ।
ભૂયોઽપિ શ્રોતુમિચ્છામિ તામ્રપર્ણ્યાસ્તુ વૈભવમ્ ॥

૫. કથં પ્રાપ નદી પુણ્યા તામ્રા ગુપ્તાદ્રિમસ્તકે ।
કથં પ્રવાહપુષિતા સમેતા સાગરેણ સા ॥

૬. ઇતિ પૃષ્ટો મહાતેજાઃ સ્વપુત્રેણ મહામુનિઃ ।
કથાં વિસ્તાર્ય મહતીં પ્રવક્તુમુપચક્રમે ॥

૭. વ્યાસઃ –
વત્સ તે કથયિષ્યામિ શ્રોતવ્યં સાવધાનતઃ ।
અત્રિતુમ્બુરુમુખ્યૈઃ ચ વસુગૌતમનારદૈઃ ॥

૮. કપિલાઙ્ગીરસોચત્યકણ્વકાણાદરૈવતૈઃ ।
વરુણેનારુણેનાપિ સપુત્રબલશાલિના ॥

૯. અન્યૈઃ ચ સિદ્ધૈરમરૈઃ સમન્તાત્ અભિસંવૃતૈઃ ।
મુનિઃ કલશભૂર્ભૂમાં પુણ્યામાદાય તાં નદીમ્ ॥

૧૦. અત્રાશ્રમાત્ વિનિર્ગત્ય કિઞ્ચિત્ ગત્વા  ક્ષણાદિવ ।
ઉપત્યકાયાં શૈલસ્ય વિસ્તૃતાયાં મહામુનિઃ ॥

૧૧. આસસાદ સરોરમ્યં વ્યોમાખ્યં માનસં યથા ।
અગાધમમૃતં સ્વાદુ સલિલં સાન્દ્રશીતલમ્ ॥

૧૨. તદ્રક્ષણાર્થં ભગવાન્ પુરા નારાયણઃ પ્રભુઃ ।
આસ્તે પર્વતરૂપેણ જ્યોતિર્મણિકૃતાભિધઃ ॥

૧૩. તસ્ય પ્રણવરૂપસ્ય મધ્યે શ્રુઙ્ગસ્ય સંસ્થિતઃ ।
સરોવરં સમાસાદ્ય નિવાસમકરોત્ મુનિઃ ॥

૧૪. સર્વૈનિવિવિશુર્હૃષ્ટાઃ દેવાશ્ચ પરમર્ષયઃ ।
તત્ર પઞ્ચસહસ્રાણિ વર્ષાણિ નિયતેન્દ્રિયઃ ॥

૧૫. તપશ્ચાચાર ભગવાન્ ઉમાલાભાય શઙ્કરઃ ।
યસ્યાં પુષ્કરવાપ્યાં તુ નિક્ષિપ્યાત્મધનુઃશરાન્ ॥

૧૬. એકાકી તપ આતિષ્ઠત્ લોકાનાં હિતકામ્યયા ।
તદાદિનામ્ના પૈનાકસરો લોકેષુ ગીયતે ॥

૧૭. હરિઃ પર્વતરૂપેણ તદ્રક્ષામકરોત્ યતઃ ।
તદારભ્ય સરો નામ્ના વિષ્ણુગર્ભમિતીરિતમ્ ॥

૧૮. તત્રત્યાઃ ચ એવ તે સર્વે તમેત્ય કલશોદ્ભવમ્ ।
સપત્નીકં સમભ્યર્ચ્ય સમ્પૂજ્ય મલયાત્મજામ્ ॥

૧૯. આતિથ્યં વિદદુઃ તસ્મૈ સર્વેષાં ચ યતોચિતમ્ ।
સ્નાત્વા પુષ્કરિણીતીર્થે તર્પયિત્વા પિતૄન્ સુરાન્ ॥

૨૦. તત્રૈવ વિહિતાતિથ્યાઃ પુરસ્કૃત્ય મહાનદીમ્ ।
દેવગન્ધર્વમુખ્યૈઃ ચ વરુણેનાત્રિણા સહ ॥

૨૧. ઊષુઃ પઞ્ચદિનાન્યત્ર તીર્થમાહાત્મ્યનિર્વૃતાઃ ।
અથોષસ્યુપવૃત્તાયામગસ્ત્યો મુનિભિસ્સહ ॥

૨૨. કાલ્યં નિવૃત્ય નિયમં કૃતકૃત્યોઽત્રિણા સમમ્ ।
તીર્થં પ્રદક્ષિણીકૃત્ય તામ્રામાદાય પાવનીમ્ ।

૨૩. જ્યોતિર્મણિં લઙ્ઘયિત્વા પ્રણમ્ય વનદેવતામ્ ।
દેવદુન્દુભિનાદેષુ જૃમ્ભમાણેષુ સર્વતઃ ॥

૨૪. કિઞ્ચિત્ દક્ષિણતઃ તસ્માત્ દદર્શ મહદાશ્રમમ્ ।
યત્રાસ્તે ભગવાન્ વિષ્ણુઃ હયગ્રીવસ્વરૂપધૃત્ ॥

૨૫. તં સેવન્તે સિદ્ધગણાઃ દેવાશ્ચ પરમર્ષયઃ ।
ઋતવો યુગપત્ સર્વે ન મુઞ્ચન્તિ હિ તદ્વનમ્ ॥

૨૬. અપાસ્તવૈરં વર્તન્તે સત્વાનિ વિવિધાન્યપિ ।
તત્ર પુષ્કરિણી કાચિત્ અગાધા નિર્મલોદકા ॥

૨૭. પિશઙ્ગિલા નામ યસ્યાં ગણાઃ પૈશઙ્ગિલાઃ સ્થિતાઃ ।
કપિલા ઇતિ વિખ્યાતા સમાદિષ્ટાઃ સ્વયમ્ભુવા ॥

૨૮. તદ્રક્ષણાર્થમદ્યાપિ બહવો નિવસન્તિ હિ ।
નિશાસુ ઘોષા શ્રૂયન્તે મેઘાનામિવ ગર્જતામ્ ॥

૨૯. કૃતાઞ્જલિઃ કુમ્ભયોનિઃ પ્રવિવેશ તદાશ્રમમ્ ।
અવરુહ્ય તુ યાનેભ્યઃ દેવાઃ ચાશ્રમમાયયુઃ ॥

૩૦. તામ્રપર્ણ્યા સમાયુક્તમાગતં કલશીસુતમ્ ।
વિજ્ઞાય ભગવાન્ શ્રીમાન્ હયગ્રીવો મહામુનિઃ ॥

૩૧. અત્રિઃ મુનિઃ અગસ્ત્યશ્ચ વરુણો યાદસાં પતિઃ ।
એતાન્ અન્યાન્ ચ વિધિવત્ તથા તુમ્બુરુપર્વતૌ ॥

૩૨. પૂજયિત્વા મહદેવીં તામ્રપર્ણીં સરિદ્વરામ્ ।
અભિનન્દ્ય પ્રણમ્યાગ્રે સન્તિ તે શાસનં ક્રમાત્ ॥

૩૩. ઉપવિષ્ટેષુ સર્વેષુ પૂજિતેષુ યથોચિતમ્ ।
બહુમાન્ય હયગ્રીવઃ કુમ્ભયોનિમભાષત ॥

૩૪. શ્રી ભગવાનુવાચ –
શ્રાન્તોઽસિ મૈત્રાવરુણે ત્વયૈતત્ સાધ્વનુષ્ઠિતમ્ ।
સમ્યક્ આનયતા દેવીં તામ્રપર્ણીં સરિદ્વરામ્ ॥

૩૫. કૃતેયં ભારતી ભૂમિઃ સ્વર્ગાદપિ ગરીયસી ।
અહો કૃતમિદં કાર્યં સર્વપ્રાણિહિતોદયમ્ ॥

૩૬. ભવાદૃશાં પરિશ્રાન્તિઃ અશ્રાન્તિકરિણીભુવઃ ।

યત્કૃતા ભવતા બ્રહ્મન્ શિવાજ્ઞાદેશકારિણા ॥

૩૭. તદશેષં મયા જ્ઞાતં સમાધિમુપગચ્છતા ।
સન્તુષ્ટોઽસ્મિ મહાભાગ કર્મણા ભૂરિધર્મણા ॥

૩૮. શ્રેયઃ પ્રાપ્સ્યસિ ભદ્રં તે દુર્લભં જગતીતલે ।
તવ સન્દર્શનાત્ અદ્ય કૃતકૃત્યોઽસ્મિ કેવલમ્ ॥

૩૯. એષા પરમકલ્યાણી શામ્ભવી શક્તિરૂપિણી ।
ભુક્તિદા મુક્તિદા નૃણાં મહાપાતકનાશિની ।
૪૦. સાક્ષાત્ પ્રકૃતિરવ્યક્તા નિર્ગુણા ગુણરૂપિણી ।
બ્રહ્મવિષ્ણુમુખૈર્દેવૈઃ મુહુરારાધ્યતે કિલ ॥

૪૧. અસ્યાઃ પ્રતિષ્ઠિતો મૂર્ષ્ણિ શઙ્કરો લોકશઙ્કરઃ ।
હૃદયે વર્તતે બ્રહ્મા લલાટે ગરુડધ્વજઃ ॥

૪૨. ગઙ્ગા સરસ્વતી ચૈવ યમુના ચ શરાવતી ।
ઇમાસ્તે પુણ્ય સરિતઃ અસ્યાઃ બાહુષુ સંસ્થિતાઃ ॥

૪૩. ઊરૂ મન્થરકૈલાસૌ ચક્ષુષી શશિભાસ્કરૌ ।
નાસિકાયાં ઉમાદેવી કર્ણયોરશ્વિનાવુભૌ ॥

૪૪. ગોદાવરી ચ કાવેરી કપોલતલસંસ્થિતે ।
નાભૌ ચ સંસ્થિતો દેવો વાયુઃ ઘ્રાણે ચ સંસ્થિતઃ ॥

૪૫. જિહ્વાયાં ભારતી દેવી લક્ષ્મી વક્ષસિ સંસ્થિતા ।
જઙ્ઘયોઃ સંસ્થિતા નાગાઃ ગાવોઽસ્યાઃ ચરણામ્બુજે ॥

૪૬. મુનયો વસવઃ સાધ્યાઃ રોમકૂપેષુ સંસ્થિતાઃ ।
એનામાશ્રિત્ય તીર્થાનિ લભન્તે તીર્થતાં પુનઃ ॥

૪૭. સર્વે દેવાશ્ચ મન્ત્રાશ્ચ ગાયત્ર્યા સાકમત્ર હિ ।
અનયા ધાર્યતે લોકં પાલ્યતે પાપગહ્વરાત્ ॥

૪૮. તસ્માત્ ઇમાં યે સેવન્તે તેષાં ન હિ પરાભવઃ ।
ઇતઃ પરં તે ગન્તવ્યં ન પશ્યે સુકૃતં મહત્ ॥

૪૯. કાશ્મીરાદપિ કેદારાત્ હરિગર્તાત્ ચ નૈમિશાત્ ।
શ્રૈષ્ઠ્યભૂતા ત્વયા બ્રહ્મન્ વિહિતા દક્ષિણા મહી ॥

૫૦. કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ ભવતાં દર્શનાત્ અહમ્ ।

ઇયન્તં કાલમત્રૈવ ભવદાગમનાશયા ॥

૫૧. વસતો મે ચિરાત્ પ્રાપ્તં કલ્યાણં મહદૂર્જિતમ્ ।
એભિઃ સહ મુનિશ્રેષ્ઠૈઃ દેવૈશ્ચ વરુણાત્મભિઃ ॥

૫૨. વાસ્તવ્યં ભવતા બ્રહ્મન્ ઇહૈવ ચ મયાન્તિકે ।
પૂજનીયા મહાદેવી તામ્રપર્ણી મહેશ્વરી ॥

૫૩. ઇતિ શ્રુત્વા વચસ્તસ્ય સ મુનિઃ કુમ્ભસમ્ભવઃ ।
ૐ ઇત્યઞ્જલિના ભાષ્ય સહાત્રિપ્રવરૈર્દ્વિજૈઃ ॥

૫૪. તસ્મિન્ મલયજાતેજઃકરમ્બિત મહોદકે ।
પિશઙ્ગિલાખ્યે સરસિ સસ્નૌ બ્રહ્માનુભાવયન્ ॥

૫૫. અનસૂયા સમાસક્તા લોપામુદ્રોપલાલિતા ।
પૂજ્યમાના તામ્રપર્ણી સ્તૂયમાના મુનીશ્વરૈઃ ॥

૫૬. સ્નાતા દિવ્યામ્બરધરા દિવ્યાલઙ્કારભૂષિતા ।
અનુજગ્રાહ વિહિતં આતિથ્યં હરિણામુના ॥

૫૭. મૈત્રાવરુણિના સાર્ધં અત્રિમુખ્યાઃ મુનીશ્વરાઃ ।
કૃત્વા કર્માણ્યશેષાણિ પઞ્ચયજ્ઞાદિકાન્યપિ ॥

૫૮. સહામ્બુપતિના સાર્ધં હયગ્રીવેણ કલ્પિતમ્ ।
અઙ્ગીકૃત્ય યથાન્યાયં તેન સાર્ધં મહાત્મના ॥

૫૯. સંહર્ષમાણાઃ સર્વે તે સુખમૂષુઃ તથાશ્રમે ।
ક્ષણપ્રાયમિવાભૂવન્ અહાનિ ત્રીણિ પઞ્ચ ચ ॥

૬૦. તદાશ્રમપદં સર્વં સમન્તાત્ યોજનાવૃતમ્ ।
વિમાનશતસઙ્કીર્ણં નાનામુનિગણાવૃતમ્ ।
ગન્ધર્વૈઃ સ્તૂયમામાનૈશ્ચ મહોત્સવમિવાભવત્ ॥

ઇતિ અષ્ટમોઽધ્યાયઃ ।        Pro.Total = 452 + 60 = 512.

## નવમોઽધ્યાયઃ

વીરસેનશઙ્ખયોઃ સંવાદઃ ।

૧. અથાપરેદ્યુર્ભગવત્યુદિતે કર્મસાક્ષિણિ ।

અવતીર્ય મહાતેજાઃ વિશ્વકર્મા વિયત્તલાત્ ।
૨. આસસાદ મુનિશ્રેષ્ઠં તમગસ્ત્યં કૃતાઞ્જલિઃ ।
અભિવાદ્ય હયગ્રીવં વરુણં સંપ્રણમ્ય ચ ॥

૩. અત્રિમારાધયન્ મૂર્ધ્ના વ્યાજહાર સ વર્ધકિઃ ।
વિશ્વકર્મા–
નમો મહદ્ભ્યઃસર્વેભ્યો મુનિભ્યોઽયં ઇહાઞ્જલિઃ ॥

૪. વિજ્ઞાપ્યં શ્રૂયતામત્ર મહાદેવાનુશાસિતમ્ ।
વક્ષ્યમાણં મયા બ્રહ્મન્ યથાવત્ અવધાર્યતામ્ ॥

૫. સન્તુષ્ટોઽસ્મિ મુનિશ્રેષ્ઠાઃ કર્મણાનેન કેવલમ્ ।
વૈશાખપૌર્ણિમાયાં તુ મુહૂર્તે મૈત્રસંજ્ઞિતે ॥

૬. મચ્છક્તિરેષા કલ્યાણી તામ્રા મલયનન્દિની ।
પ્રવાહરૂપા નિર્ગત્ય મલયાત્ યાતુ સાગરમ્ ॥

૭. અહમપ્યાગમિષ્યામિ ભવતાં હિતકામ્યયા ।
ઇત્થમુક્ત્વા મહાદેવઃ પ્રેષયામાસ મામિહ ॥

૮. અનુજ્ઞાતઃ ત્વયા બ્રહ્મન્ આશ્રમં કરવાણ્યહમ્ ।
ઇતિ બ્રુવાણં તં દૃષ્ટ્વા વિશ્વકર્માણમાગતઃ ॥

૯. બહુમેને મુનિર્વાચા કુમ્ભયોનિર્મુદાન્વિતઃ ।
સર્વે ચ મુનયો દેવાઃ સાધુ સાધ્વિત્યપૂજયન્ ॥

૧૦. હયગ્રીવેણાનુશિષ્ટઃ વિશ્વકર્મા મહામતિઃ ।
તીરાગ્રેઽગસ્તિશૃઙ્ગસ્ય મધ્યે વિસ્તૃતશાલિની ॥

૧૧. નિર્મમે ભવનં ચિત્રમદ્ભુતં પ્રિયદર્શનમ્ ।
પઞ્ચનલ્વપ્રમાણેન વિસ્તારાયામસંયુતમ્ ॥

૧૨. વિષ્ણુસ્થાનં શિવસ્થાનં બ્રહ્મણઃ સદનં તથા ।
ભવનં ભાસ્કરાવાસં દુર્ગાસ્થાનં ગણેશિતુઃ ॥

૧૩. નિર્મિતા મુનિશાર્દૂલ તથૈવાસ્થાનમણ્ડપઃ ।
મહાનસં ભુક્તિશાલા જપધ્યાનાલયં તથા ॥

૧૪. એવં વિધાય ભવનં કુમ્ભયોનેર્મહાત્મનઃ ।
કદલીપૂગપુન્નાગરસાલપનસાદિભિઃ ॥

૧૫. નારઙ્ગલિકુચારમ્ભાકેરક્તમુખપાટલૈઃ ।
    ઉદ્યાનૈરપિ ભૂયિષ્ઠં ફલપુષ્પમધૂર્જિતૈઃ ॥

૧૬. વાપીકૂપસમાયુક્તં કૂજત્કોકિલસારસમ્ ।
    વિધાય વિવિધાકારં તસ્યાપ્યુત્તરતઃ સ્થલે ॥

૧૭. વૃષાઙ્કું નામ નગરં મણિપ્રાકારતોરણમ્ ।
    મહાભવનસંયુક્તં રત્નપ્રાસાદભાસ્વરમ્ ॥

૧૮. સ્થાનં મલયનન્દિન્યાઃ વિદધે શિલ્પિનાં વરઃ ।
    તત્રત્યં શ્રીકરં નામ ગન્ધર્વાનાં ગણં મહત્ ॥

૧૯. ન્યયુઙ્ક્ત સ્થલરક્ષાર્થં માયાવૃતમકલ્મષમ્ ।
    પુનર્મુનિમુપાગમ્ય સકલં સ વ્યજિજ્ઞપત્ ॥

૨૦. તમભ્યર્ચ્ય ગિરા હર્ષાત્ સ મુનિર્દેવશિલ્પિનમ્ ।
    સંપ્રતસ્થે મહાતેજાઃ તામ્રામાદાય પાવનીમ્ ॥

૨૧. હયગ્રીવમુખૈસ્સિદ્ધૈઃ દેવૈશ્ચ વરુણાદિભિઃ ।
    શઙ્ખદુન્દુભિનાદૈશ્ચ ભેરીતૂર્યરવૈરપિ ॥

૨૨. વ્યાઘુષ્ય કકુભાસ્સર્વાઃ સમીયાયાશ્રમં નિજમ્ ।
    ઉત્સવઃ સુમહાન્ આસીત્ પ્રવિશત્ આશ્રમં મુનૌ ॥

૨૩. અમ્બરાત્ અભ્યવર્તન્ત સમન્તાત્ પુષ્પવૃષ્ટયઃ ।
    મકરન્દસુધાવૃન્દતુન્દિલઃ ચન્દનદ્રુમાન્ ॥

૨૪. નર્તયન્ ઇવ સાનન્દં મન્દં મન્દં મરુત્ વવૌ ।
    શકુનાઃ કર્ણપીયૂષૈઃ પોષયન્તી કલસ્વરૈઃ ॥

૨૫. અન્યાન્યપિ સહસ્રાણિ શુભાન્યાસન્ સમન્તતઃ ।
    હર્ષસમ્ભ્રમસઙ્ઘુષ્ટજનરોમાઞ્ચકઞ્ચુકમ્ ॥

૨૬. ચકાશે કન્દલાક્રાન્તં પ્રાવૃષીવ મહીતલમ્ ।
    ઇત્થં પ્રવિશ્ય મુનિભિઃ દેવૈશ્ચ સહ કુમ્ભજઃ ॥

૨૭. આશ્રમં પરમં હૃષ્ટો બભૂવ સસુહૃદ્વૃતઃ ।
    લોપામુદ્રાપતિઃ શ્રીમાન્ પ્રવેશ્ય નિજમાશ્રમમ્ ॥

૨૮. તામ્રપર્ણીં મહાદેવીં ભક્તિમાન્ અભ્યપૂજયત્ ।
    સર્વે ચ માનિતાઃ તેન દેવાઃ ચ ઋષયઃ તથા ॥

૨૯. ઊષુઃ પરમસંહૃષ્ટાઃ તસ્મિન્ એવાશ્રમે સુખે ।
ઉદ્યાનાનિ વિચિત્રાણિ વાપ્યઃ ચ વિમલોદકાઃ ॥

૩૦. પુષ્પિતાઃ તરવઃ ભૂરિ ફલવન્તો મધુસ્રવાઃ ।
દૃષ્ટ્વા તે વિવિધાકારમાશ્રમં વિસ્મિતાઃ યયુઃ ॥

૩૧. વિલોક્ય વિશ્વકર્માણં પ્રશશંસુઃ ઇતસ્તતઃ ।
પ્રવિશ્યાશ્રમમાશ્ચર્યં સર્વાન્ સમ્ભાવયન્ ક્રમાત્ ॥

૩૨. તત્રૈકાદશરાત્રન્તુ સમુશિત્વા મહામુનિઃ ।
નારદાદ્યૈઃ તુ સંયુક્તઃ તામ્રામાદાય પાવનીમ્ ॥

૩૩. અસાદ્ય શ્રીગુહાસ્થાનમભ્યર્ચ્ય પરદેવતામ્ ।
તત્ પ્રસાદમનુપ્રાપ્ય દેવૈશ્ચ સમભિષ્ટુતઃ ॥

૩૪. સાગરેણ મહાપૂરાં મુનિઃ તામ્રામયોજયત્ ।
સમાજઃ સર્વભૂતાનાં તત્રાદ્ભુતમિવાભવત્ ॥

૩૫. શ્રી શુકઃ –
તત કીદૃક્ સ્થલં દેવ્યાઃ ગુહા વા કીદૃશી પુનઃ ।
કેન રૂપેણ સા દેવી સંસ્થિતા પરમેશ્વરી ॥

૩૬. એતત્ સર્વમશેષેણ વિસ્તરાત્ વક્તુમર્હસિ ।
શ્રી વેદવ્યાસઃ –
શૃણુ પુત્ર પ્રવક્ષ્યામિ કથાં કથયતો મમ ॥

૩૭. વીરસેનસ્ય શઙ્ખસ્ય સંવાદં પરમાદ્ભુતમ્ ।
અસ્તિ માનવતી નામ નગરી કાઞ્ચનારુણા ॥

૩૮. ઉત્તરે હિમશૈલસ્ય પુષ્પવત્યાશ્ચ દક્ષિણે ।
તસ્યામસ્તિ નરઃ કશ્ચિત્ વીરસેનઃ ઇતિ શ્રુતઃ ॥

૩૯. તપસા શમ્ભુમારાધ્ય લેભે ત્રૈલોક્યપૂજિતમ્ ।
દેવદત્તં સમારુહ્ય વિમાનં સૂર્યસન્નિભમ્ ॥

૪૦. વાહ્યમાનં મહાવીરૈઃ તુરઙ્ગૈઃ કુઙ્કુમારુણૈઃ ।
દેશાન્ સઞ્ચરતા તેન પ્રાપ પુષ્પવતીતટમ્ ॥

૪૧. પયસ્તસ્યા ક્ષોભયન્તં હંસં તં યાદસાં ગણમ્ ।

વજ્રદન્તં જઘાનાશુ ગદયા ભીમવેગયા ॥

૪૨. તદુપદ્રવતો મુક્તા સા નદી તુષ્ટમાનસા ।
પ્રાદાત્ તસ્મૈ નરેન્દ્રાય નાદેયીં નામ કન્યકામ્ ॥

૪૩. તામુદ્વાહ્ય વરારોહાં રમમાણો મહીપતિઃ ।
તાજ્યં પુત્ર સમાધાય પ્રિયાયાઃ પ્રિયકામ્યયા ॥

૪૪. વિમાનવરમારુહ્ય ચચાર પૃથિવીમિમામ્ ।
મેરું પ્રદક્ષિણીકૃત્ય રમમાણઃ તતસ્તતઃ ।

૪૫. પરીત્ય દ્વીપં વર્ષાણિ લઙ્ઘયિત્વા હિમાચલમ્ ।
બહ્વમન્યત ભૂયિષ્ઠાં સ દૃષ્ટ્વા ભારતીં મહીમ્ ॥

૪૬. નગરાણિ વિચિત્રાણિ વનાનિ વિવિધાન્યપિ ।
વ્યોમયાનાત્ સમુલ્લઙ્ઘ્ય ત્વર્માણઃ પુનર્યયૌ ॥

૪૭. વિમાનં કામગં તસ્ય સ્તબ્ધમાસીત્ વિયત્તલે ।
કિમેતત્ ઇતિ સમ્ભ્રાન્તઃ ચિન્તયામાસ બુદ્ધિમાન્ ॥

૪૮. તવત્ અમ્બર્તઃ ચિત્રા વાગભૂત્ અશરીરિણી ।
અલઙ્ઘ્યમમરૈરન્યૈઃ બ્રહ્મવિષ્ણુમુખૈરપિ ॥

૪૯. પરાનન્દૈકનિલયં શ◌ૃઙ્ગં મલયભૂભૃત ।
ઇતિ શ્રુત્વા વચો રાજા વિસ્મયાવિષ્ટમાનસઃ ॥

૫૦. સન્નિવૃત્ય વિમાનં તં મહીમવતતાર હ ।
દૃષ્ટ્વા તીરે મહાનદ્યાઃ મુનેઃ શઙ્ખસ્ય આશ્રમમ્ ॥

૫૧. વિમાનાત્ અવરુહ્યાસૌ સભાર્યઃ પ્રવિવેશ હ ।
તં દૃષ્ટ્વા મુનિશાર્દૂલં વિનયાત્ અભ્યવાદયત્ ॥

૫૨. સ્વાગતેનાસનેનાપિ સમ્ભાષ્ય ચ મહીપતિમ્ ।
અભ્યભાષત સંહૃષ્ટો વચા મધુરયા મુનિઃ ॥

૫૩. શ્રી શઙ્ખઃ –
સ્વાગતં તે મહાભાગ ચિરાત્ દૃષ્ટોઽસિ મે ખલુ ।
કચ્ચિત્ તે કુશલં રાજ્યે કચ્ચિત્ અન્તઃપુરે પરે ॥

૫૪. ત્વયાનુષ્ઠીયતે કિન્તુ રાજધર્મઃ સનાતનઃ ।
કચ્ચિત્ તે મન્ત્રિણઃ સ્નિગ્ધાઃ પુત્રાઃ કિં વિનયોજ્જ્વલાઃ ॥

૫૫. છાયાનુરૂપાઃ વર્તન્તે દારાઃ કિં નુ મહીપતે ।
 કિં તે પ્રવસનં રાજ્યાત્ આનીતેયં કુતો વધૂઃ ॥

૫૬. આશ્ચર્યાવિષ્ટચિત્તસ્ત્વં દ્યોતસે મુખલક્ષણૈઃ ।
 મયિ પ્રવક્તું શક્યં ચેત્ કથયસ્વ મહીપતે ॥

૫૭. ઇતિ તસ્ય વચઃ શ્રુત્વા વીરસેનો ભુવઃ પતિઃ ।
 શ્લાઘમાનો મુનેર્વાક્યં પ્રણતો વાક્યમબ્રવીત્ ॥

૫૮. રાજોવાચ –
 તવ પ્રસાદાત્ કુશલં અસ્માકં સર્વતઃ કિલ ।
 તવાનુરાગપાત્રસ્ય કુતો મે વિપરીતતા ॥

૫૯. પ્રસાદાત્ દેવદેવસ્ય મહાદેવસ્ય શૂલિનઃ ।
 વિમાનં કામગં દિવ્યં અકુણ્ઠિતગતાગતમ્ ॥

૬૦. અત્ર સ્તબ્ધમભૂત્ બ્રહ્મન્ જ્ઞાયતે કારણં ન મે ।
 એષા નામ્ના તુ નાદેયી પુષ્પત્યાત્મજા સતી ॥

૬૧. મમ પ્રિયા વરારોહા મામયાચત કિઞ્ચન ।
 એતત્ ભૂમણ્ડલં સર્વં નાનાદ્વીપાબ્ધિસઙ્કુલમ્ ॥

૬૨. જ્ઞાતું દ્રષ્ટું ચ તત્ત્વેન કાઙ્ક્ષન્તી કૌતુકાકુલા ।
 આલોકાલોકમહતા મયેયં દિગુપાશ્રિતા ॥

૬૩. જ્ઞાતુમિચ્છામિ તત્ત્વેન સ્તમ્ભિતં કેન હેતુના ।
 ઇતિ પૃષ્ટવતઃ તસ્ય વીરસેનસ્ય ભૂપતેઃ ।
૬૪. શ્લાઘયિત્વા વચો ભૂયઃ વ્યાજહાર મુનીશ્વરઃ ।
 શ્રુણુ રાજન્ પ્રવક્ષ્યામિ યેન સ્તબ્ધગતિર્ભવેત્ ॥

૬૫. યતઃ પ્રવૃત્તિર્જગતાં યત્સાક્ષિત્વે વિવર્તતે ।
 યેન વિશ્વમિદં વ્યાપ્તં યત્ પ્રાપ્ય નિવર્તતે ॥

૬૬. મનો વચઃ તથા બુદ્ધિઃ વિષયા ન સ્પૃશન્તિ યત્ ।
 તત્ બ્રહ્મ પરમં તેજઃ પરમાનન્દનિર્ભરમ્ ॥

૬૭. હિતાય જગતાં એકં દ્વૈધીભાવમભૂત્ પુનઃ ।
 તદત્ર મિથુનીભૂય રમતે હિ પરસ્પરમ્ ॥

૬૮. શ્રીમત્પરશિવાઙ્કસ્થતરુણીરૂપલક્ષણમ્ ।

મહઃકાઞ્ચનકલ્યાણસૌન્દર્યામૃતનિર્ભરમ્ ॥

૬૯. તત્ર ચન્દનશૈલેન્દ્રે જ્યોતિગૃહમહાન્તરે ।
વિમલે ચક્રપર્યઙ્કે રમતે પરમાત્મના ॥

૭૦. સૈષા પરમકલ્યાણી સેવ્યમાના સુરાસુરૈઃ ।
આસ્તે વિસ્તાર્ય જગતીં વાગુરામિવ સર્વશઃ ।
૭૧. પઞ્ચકૃત્યપરાન્ દેવાન્ વસમાનીય સર્વશઃ ।
અત્રાસ્તે વિશ્વજનની વિશ્વરક્ષાવિનોદિની ॥

૭૨. અત્ર તીર્થમયી તામ્રા સર્વપાતકનાશિની ।
અત્રૈવ મૈત્રાવરુણિર્લોપામુદ્રાસખો મુનિઃ ॥

૭૩. તામ્રામાદાય મહતીં નદીમીશ્વરસાસનાત્ ।
આસાગરં નિયમિતા સ્રોતોરૂપા પ્રતિષ્ઠિતા ॥

૭૪. અત્ર દેવાશ્ચ વિપ્રાશ્ચ મન્ત્રાશ્ચ ક્રતવઃ પરે ।
ઉપાસ્યતે બ્રહ્મણૈષા રુદ્રેણ હરિણા તથા ॥

૭૫. નિત્યમત્ર મહાદેવઃ પુરા પર્યઙ્કુતાં ગતઃ ।
સ્વશક્ત્યા ક્રીડતે સાક્ષાત્ પરાનન્દસ્વરૂપયા ॥

૭૬. તલ્લઙ્ઘનબલાભાવાત્ વિમાનં સ્તમ્ભિતં તવ ।
તસ્માત્ ત્વં તીર્થવર્યાયાં તામ્રાયાં કૃતમજ્જનઃ ॥

૭૭. અભિવાદ્ય મુનિશ્રેષ્ઠં લોપામુદ્રાં ચ તત્પ્રિયામ્ ।
તદનુગ્રહમાસાદ્ય તમમ્બાં દ્રષ્ટુમર્હસિ ॥

૭૮. તતો વાચમિમાં શ્રુત્વા મુનેઃ શઙ્ખસ્ય ધીમતઃ ।
પ્રત્યભાષત તં રાજા વિસ્મયાવિષ્ટમાનસઃ ॥

૭૯. રાજા –
કથેયં કથિતા બ્રહ્મન્ ત્વયા મય્યનુકમ્પયા ।
મહાનદીવ પાપઘ્ની શ્રીશિવાનન્દદાયિની ॥

૮૦. મધુધારેવ કર્ણસ્ય કૌમુદી શારદા યથા ।
નૈવ લબ્ધ્વા સુધાપાનં વિના તૃપ્તિકરી કિલ ॥

૮૧. સમ્માનિતા મુનીન્દ્રેણ તામ્રા કલશજન્મના ।
કથં દૃષ્ટ્વા મહાદેવી પૂજિતા ચ વિશેષતઃ ॥

૮૨. તદાશ્રમપદં અત્રૈવ વર્તતે પરમાદ્ભુતમ્ ।
એતત્ સર્વમશેષેણ વિસ્તરાત્ બ્રૂહિ મે પ્રભો ॥

૮૩. શઙ્ખઃ ઉવાચ –
એતત્વિચિત્રં કલિકલ્મષઘ્નમાખ્યાનમૂર્જસ્વલમાદિમાતુઃ ।
શ્રુણુષ્વ રાજન્ વિનયેન સમ્યક્ મયાધુના સંપ્રતિ વક્ષ્યમાણમ્ ॥

ઇતિ નવમોऽધ્યાયઃ । Pro.Total = 512 + 83 = 595

## દશમોऽધ્યાયઃ

તામ્રપર્ણીસમુદ્રયોર્વિવાહઃ ।

૧. શ્રી શઙ્ખઃ –
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ કથાં કર્ણસુખાવહમ્ ।
યસ્યાસ્સ્મરણમાત્રેણ પુરુષઃ પુરુષાર્થભાક્ ॥

૨. સમીકર્તુમિમાં ભૂમિમગસ્ત્યઃ શમ્ભુશાસનાત્ ।
તામ્રાં મહાનદીં લબ્ધ્વા પ્રતસ્થે દક્ષિણાં દિશમ્ ॥

૩. ત્રિકૂટે શમ્ભુમભ્યર્ચ્ય ચિત્રં પ્રાવર્તયન્નદીમ્ ।
અત્રાશ્રમે તુ ઘટનાં શિવશૈલાત્ ઉદઞ્ચયન્ ॥

૪. જ્યોતિર્મણૌ મહાકૂટે વ્યોમપુષ્કરિણીતટે ।
પ્રાપ્ય સ્નાત્વા તર્પયિત્વા પિતૄન્ દેવીન્ ઋષીન્ તથા ॥

૫. તતો હયગ્રીવમુનેર્વિશ્રાન્તઃ ચાશ્રમે સુખમ્ ।
સ્નાત્વા પિશઙ્ગિલાતીર્થે સહ દેવૈઃ સહર્ષિભિઃ ॥

૬. ન્યવસત્ સ્વાશ્રમે પુણ્યે વિહિતે વિશ્વકર્મણા ।
તત્રૈકાદશરાત્રં તુ સમુષિત્વા યથાસુખમ્ ॥

૭. સર્વૈઃ ચ મુનિશાર્દૂલૈરમરૈરભિસંવૃતઃ ।
તામ્રપર્ણીં પુરસ્કૃત્ય પ્રસ્થાનમકરોત્ પુનઃ ॥

૮. નિમિત્તાન્યભવન્ તત્ર શુભશંસીનિ સર્વશઃ ।
તતોऽવતીર્ય ગગનાત્ નારદઃ કપિલો મુનિઃ ॥

૯. અભ્યયાતાં મહાત્માનૌ સમ્ભાવ્ય કલશીસુતમ્ ।
તાવભ્યર્ચ્ય યથાન્યાયમન્યોન્યમભિનન્દિતાઃ ॥

૧૦. શ્રીમત્ ચક્રગુહાં સર્વે મુદિતાઃ સંપ્રતસ્થિરે ।
તત્રેષાખ્યં ચ મહાતીર્થં ઊર્જાખ્યં ચ મહત્સરઃ ॥

૧૧. ઉભયોરપિ સંસ્નાત્વા ચન્દ્રાદિત્યૌ પ્રણમ્ય ચ ।
પ્રાસાદ્ય કિઙ્કરાન્ સર્વાન્ અગસ્ત્યઃ તામ્રયા સહ ॥

૧૨. પ્રવિવેશ ગુહાં રમ્યાં સર્વતો યોજનાવૃતામ્ ।
કદમ્બવિપિનોદારાં કલ્પકોદ્યાનશોભિનીમ્ ॥

૧૩. કર્પૂરવાલુકાજુષ્ટાં જામ્બૂનદમયસ્થલીમ્ ।
ઉત્ફુલ્લકેતકીષણ્ડામુદઞ્ચત્કદલીકુલામ્ ॥

૧૪. કૂજત્કોકિલસન્નાદાં મત્તભ્રમરસમ્ભ્રમામ્ ।
સપ્તકોટિમહામન્ત્રૈઃ મક્ષિકાપક્ષિરૂપૈઃ ॥

૧૫. કોલાહલિતદિક્ચક્રાં બાલાતપપિશઙ્ગિલામ્ ।
વસન્તકામરાજાભ્યાં પાલ્યમાનાં સમન્તતઃ ॥

૧૬. ચિત્રકેતુમુખૈશ્શૂરૈઃ સદારૈઃ પ્રમથેશ્વરૈઃ ।
અપ્રમાદમસમ્પાતં રક્ષ્યમાણં મહીપતે ॥

૧૭. કાઞ્ચનૈઃ કદલીષણ્ડૈઃ મહમરકતચ્છદૈઃ ।
સુધાસદૃશપક્વાઢ્યૈઃ પ્રફુલ્લતટશાલિનીમ્ ॥

૧૮. પ્રફુલ્લકમલોદારાં દદર્શાગ્રે તુ દીર્ઘિકામ્ ।
નવમણિક્યસોપાનાં નાનાચદોગણાવૃતામ્ ॥

૧૯. સુવિસ્તારામઘૌઘઘ્નીં સુધાસમરસોદકામ્ ।
ઉપસ્પૃશ્ય મહાતેજાઃ મુનિરામ્નાયસંશ્રિતામ્ ॥

૨૦. તતો દક્ષિણતો ગત્વા વાપીમન્યાં દદર્સ સઃ ।
મનિપ્રવરસોપાનાં કાઞ્ચનેષુ વનાવૃતામ્ ॥

૨૧. સમુપસ્પૃશ્ય મેધાવી પુણામામ્નાયવાપિકામ્ ।
તપ્તહાટકસઙ્કાશૈઃ સંવૃતાં ચમ્પકાદ્રુમૈઃ ॥

૨૨. કાપિ વાપ્યક્ષિપદવીમાસસાદ મુનેઃ પુરઃ ।
પશ્ચિમામ્નાયસલિલં તત્રોપસ્પૃશ્ય કુમ્ભભૂઃ ॥

૨૩. પ્રણતઃ ચોત્તરે ભાગે દદર્શ અન્યત્ મહત્સરઃ ।

શાતકુમ્ભમયૈર્દિવ્યૈઃ હરિચન્દનપાદપૈઃ ॥

૨૪. સઞ્છન્નતટસૌરભ્યં હંસસારસસેવિતમ્ ।
તત્ તીર્થં શિરસા બિભ્રન્ સંપ્રાપ શ્રીપુરં મહત્ ॥

૨૫. મહાપીયૂષપરિઘાં મણિપ્રાકારગોપુરામ્ ।
મહાભૈરવસમ્પાતાં માતૃકાશતસઙ્કુલામ્ ॥

૨૬. કૃતાઞ્જલિઃ પ્રહ્વતનુઃ પ્રવિશ્ય શ્રીપુરં મહત્ ।
દદર્શ પરમાનન્દાં શિવપર્યઙ્કવર્તિનીમ્ ॥

૨૭. ચતુર્ભિઃ પઞ્ચમૈઃ સૂક્ષ્મૈઃ મેલનં યત્ર દૃશ્યતે ।
પઞ્ચકૃત્યપરા યત્ર પઞ્ચતામુપપેદિરે ॥

૨૮. યત્ર શિવકામેશ્વરાઙ્કસ્થા જયતે શામ્ભવી કલા ।
તાં દૃષ્ટ્વા પરમાનન્દસન્દોહામૃતરૂપિણીમ્ ॥

૨૯. લોપામુદ્રાન્વિતો ધીમાન્ સમારાધ્ય મહેશ્વરીમ્ ।
તામ્રપર્ણ્યા સમાયુક્તઃ તુષ્ટાવ પરમેશ્વરીમ્ ॥

૩૦. અગસ્ત્યઃ –
અમ્બ જૃમ્ભત્કૃપાપૂરે દૂરીકૃતપરાભવે ।
ભવભઞ્જનિ રુદ્રાણિ પ્રસીસ મમ શામ્ભવિ ॥

૩૧. દુરિતાર્ણવસન્તારસ્ત્રિસ્ત્વમસિ દેહિનામ્ ।
માયાન્ધકારવિધ્વંસવિનોદમણિદીપિકે ॥

૩૨. યાન્ત્વામાહુઃ સદા માતઃ ચિરન્તનગિરાં તતિઃ ।
અક્ષરામક્ષરાકારાં આદ્યામીડે પુરાતનીમ્ ॥

૩૩. પ્રસન્નજનસૌભાગ્યસુધાસમુદયાર્ણવે ।
પ્રસીદ માતઃ પ્રત્યક્ષમોક્ષમાર્ગૈકદીપિકે ॥

૩૪. મહામાતરસમ્ભાવ્યકર્મકાલવિકલ્પને ।
કલાકલિતમર્યાદે તુભ્યં દેવ્યૈ નમો નમઃ ॥

૩૫. એકામનેકામેકસ્થાં શોકાપાયાં નિરામયીમ્ ।
ત્વામાહુઃ શ્રુતયો વાચાં તાન્ત્વાં અન્તરુપાસ્મહે ॥

૩૬. માયાં અન્યે પરાં અન્યે પરે શંસન્તિ શામ્ભવીમ્ ।
સન્તઃ સ્વચછન્દચારિત્રાં તમહન્તાન્નમઃ પરામ્ ॥

૩૭. સ્તુત્યં સત્યં પરં પ્રાપ્ય ધ્યેયમર્ચ્યમહર્નિશમ્ ।
યન્મહસ્તરુણીરૂપં સ્રોતામારાધયે પુરઃ ॥

૩૮. મય્યનન્યગતે માતઃ પ્રસીદ વરદેવતે ।
પ્રસીદ વિશ્વજનનિ પ્રસીદ પ્રણવાત્મિકે ॥

૩૯. વિભક્તનનાવિધચક્રકોણે પાણિસ્થલાલઙ્કૃતપઞ્ચબાણે ।
પ્રપન્નસન્તાનલતે પ્રસીદ પ્રકૃષ્ટપાશાઙ્કુશપદ્મહસ્તે ॥

૪૦. માતઃપ્રસીદ મલયાચલપદ્મપીઠે માયાવિશેષકલયા રચિતપ્રપઞ્ચે ।
પઞ્ચપ્રપઞ્ચેશ્વરમઞ્ચસંસ્થે મહ્યં મહઃકલ્પય માતરાશુ ॥

૪૨. શ્રી દેવી –
અભિનન્દ્ય મુનિશ્રેષ્ઠમપિ તદ્ધર્મચારિણીમ્ ।
ત્વદાગમનતોઽપ્યેષા સ્તુતિર્મે હષદાયિની ॥

૪૩. આહ્લાદયતિ મે ચિત્તં ચકોરમિવ ચન્દ્રિકા ।
ત્વયાનીતા તામ્રપર્ણી ત્વત્કૃતેયં સ્તુતિસ્તથા ॥

૪૪. આહ્લાદયેતાં ભુવનં સમન્તાત્ મદનુગ્રહાત્ ।
એષા નદી તામ્રપર્ણી જલશક્તિર્મદાત્મિકા ॥

૪૫. મમ તુષ્ટિકરી ચૈષા વાઙ્મયી તીર્થદેવતા ।
ઉભયત્ર કૃતસ્નાતાઃ પૂતાત્માનો ભવન્તિ હિ ॥

૪૬. વસ્તવ્યા ભવતા ચૈવ પત્ન્યા સહ મહામુને ।
ત્વયેદં સકલં સૌખ્યમુપયાતુ જગત્ત્રયમ્ ॥

૪૭. ત્વયિ સ્થિતે તામ્રપણ્યાં સરિતા મુનિપુઙ્ગવ ।
સિદ્ધક્ષેત્રં ભવેત્ સ્થાનં સમન્તાત્ દશયોજનમ્ ॥

૪૮. અસ્મિન્ દેશે મત્પ્રસાદાત્ વિપ્લવો ન ભવેત્ નૃણામ્ ।
દુર્ભિક્ષભયસન્તાપાઃ તથારિષ્ટાદયઃ પરે ॥

૪૯. કદાચિદપિ મા સન્તુ માસ્તુ લોકે પરાભવઃ ।
સર્વે ચ સુખિનઃ સન્તુ સર્વે સન્તુ નિરામયાઃ ॥

૫૦. મા વિશન્તુ જનં પાપાઃ પરાભવઃ ભવાદયઃ ।
સ્વસ્ત્યસ્તુ સર્વજગતાં ચિરં જીવન્તુ જન્તવઃ ॥

૫૧. ભવન્તુ તવ ભદ્રાણિ મત્પ્રસાદાત્ મહમુને ।
અદ્ય પુણ્યતમે લગ્ને મુહૂર્તે વિજયાભિતે ॥

૫૨. એષા મહાનદી પુણ્યા પ્રયાતુ વરુણાલયમ્ ।
અસ્યાઃ તીરદ્વયે દેવી શ્રીર્નિત્યાત્વનપાયિની ॥

૫૩. ફલન્તુ સર્વસસ્યાનિ ફલાનિ વિવિધાન્યપિ ।
સમન્તતો મહાનદ્યાઃ પુષ્ણન્ત્યૌષધયઃ પરે ॥

૫૪. ઇતિ સન્તુષ્ટહૃદયા દેવી દેવવરાર્ચિતા ।
સમાશ્લિષ્યોરસા તામ્રાં મૃણાલમૃદુલૈર્ભુજૈઃ ॥

૫૫. તતો વૃષાઙ્કનગરે ભવને મણિકુન્તલે ।
મુક્તામણિમયે પીઠે નિધાય મલયાત્મજામ્ ॥

૫૬. અભ્યષિઞ્જત્ સુધાસારૈઃ સલિલૈઃ કુમ્ભસમ્ભૃતૈઃ ।
ચતુસ્સહસ્રતોયૈશ્ચ હેમકુમ્ભસમાભૃતૈઃ ॥

૫૭. અભ્યષિઞ્જન્ મુનિગણાઃ સિદ્ધાશ્ચ સનકાદયઃ ।
અભિષિક્તા તથા તામ્રા હરિબ્રહ્મપુરન્દરૈઃ ॥

૫૮. બભૌ પરમકલ્યાણી સાક્ષાદિવ મહેશ્વરી ।
શુકવીણધરા શઙ્ખસરસિરુહધારિણી ॥

૫૯. સર્વાભરણસંયુક્તા તરુણી કાઞ્ચનારુણા ।
સેવ્યમાના મુનિગણૈઃ સ્તૂયમાના સુરાસુરૈઃ ॥

૬૦. શ્વેતચ્છત્રસમાયુક્તા ચામરદ્વયવીજિતા ।
સખીજનસમાયુક્તા લોકલક્ષ્મીરિવાબભૌ ॥

૬૧. તાવદભ્યાયૌ શ્રીમાન્ દેવો નદનદીપતિઃ ।
સેવિતો નાગરાજૈઃ ચ દૈત્યદાનવપુઙ્ગવૈઃ ॥

૬૨. યાદોગણૈઃ સ્તૂયમાનઃ પૂજ્યમાનઃ સુરાદિભિઃ ।
તમાગતં મલયરાટ્ અભ્યર્ચ્ય વિધિપૂર્વકમ્ ॥

૬૩. ઉપલભ્ય શિવાનુજ્ઞાં મુનિનાપ્યનુમોદિતઃ ।
સમુદ્રાય સુતાં પ્રાદાત્ ધારાપૂર્વં ધરાધરઃ ॥

૬૪. સૈષા ભર્તારમાસાદ્ય નદી રત્નાકરં વિભુમ્ ।
વિશેષાત્ શુશુભે તામ્રા ગૌરીવ પરમેશ્વરમ્ ॥

૬૫. સર્વે મુમુદિરે લોકાઃ પ્રસન્નાઃ ચ દિશો દશ ।
દેવદુન્દુભયો નેદુઃ ગુહ્યકાશ્ચ કલં જગુ ; ॥

૬૬. કલં જગુશ્ચ ગન્ધર્વાઃ નનૃતુશ્ચાપ્સરોગણાઃ ।
તામ્રામુદ્વાહ્ય ભગવાન્ તુતોષ સરિતાં પતિઃ ॥

૬૭. તવદાદિ મહલક્ષ્મીઃ પ્રીયમાણા પુનઃપુનઃ ।
આદિદેશ કૃપાદૃષ્ટ્યા પ્રવાહયિતુમુદ્યતા ॥

૬૮. તાવન્મુનિગણાઃ સિદ્ધાઃ દેવાશ્ચ સહગુહ્યકાઃ ।
સાધુ સાધ્વિતિ સંહૃષ્ટાઃ પ્રોચુઃ પ્રાપ્તમનોરથાઃ ॥

૬૯. વિમાનૈર્નિબિડં વ્યોમ નાનાવર્ણૈરદૃશ્યત ।
બ્રહ્મરુદ્રહૃષીકેશપુરન્દરસમાસ્થિતૈઃ ॥

૭૦. વીણાં વાદયતામુચ્ચૈઃ ગાયતાં કલનિસ્વનમ્ ।
કથાઃ કથયતાં પુણ્યાઃ ગર્જતાં હર્ષહર્ષગદ્ગદમ્ ॥

૭૧. સઙ્ઘર્ષનાદો વવૃધે પર્વણીવ મહાર્ણવાત્ ।
ઇત્થં સઙ્ઘર્ષમાણેષુ જનેષુ જગદમ્બિકા ॥

૭૨. વ્યાદિદેશ મહાદેવી પ્રવહેતિ મહાનદીમ્ ।
ઇત્થં બ્રુવત્યામમ્બાયાં પ્રશાન્તે જનનિસ્વને ॥

૭૩. પઠ્યમાણેષુ સૂક્તેષુ પશ્યત્સુ સકલેષ્વપિ ।
મહાનાદસમુદ્ભૂતો જલૌઘઃ સંપ્રદૃશ્યતે ॥

૭૪. તદમ્બુપૂરાતભિજાતરૂપાન્નાનામણિદ્યોદિતતોરણાગ્ર્યઃ ।
નિષ્ટપ્તચામીકરચારુવર્ણં વિમાનમર્કોપમમાવિરાસીત્ ॥

૭૫. ઉચ્ચાવાચધ્વજદુકૂલમુદસ્તશ ઼ૃઙ્ગમુદ્દામકૂબરમુદઞ્ચિતકિઙ્ગિણીકમ્ ।
અદ્યુક્તધૌતતુરગોજ્જ્વલમાપ્તસૂતમગ્રે વિમાનમચલોપમમાવિરાસીત્ ॥

૭૬. વાચા હરેર્વિશ્વધરસ્ય વિષ્ણોઃ વાતાપિવૈરીનિજધર્મપત્નીમ્ ।
દેવીં નમસ્કૃત્ય કૃતાભ્યનુજ્ઞઃ સાર્ધં હયગ્રીવમુખૈર્મુનીન્દ્રૈઃ ॥

૭૭. પ્રદક્ષિણીકૃત્ય વિમાનમગ્ર્યં સમારુરોહાભ્યુદયપ્રસાદઃ ।
મન્દં યયૌ સ્યન્દનમસ્ય ચૈન્દ્રીમતિપ્રસન્નાં હરિતં જનૌઘૈઃ ॥

૭૮. તત્પૃષ્ઠતઃ સાન્દ્રજલપ્રવાહા પ્રાયાત્ નદી ચન્દલશૈલકન્યા ।

વૃષાદ્રુતો દક્ષિણતઃ સમીપે વાપીમિષામૂર્જામપિ પ્રભિદ્ય ॥

૭૯. તસ્યાશ્રમાત્ ઉત્તરતઃ પ્રવાહા તત્સ્યન્દનમનુપ્રયાતા ।
મધ્યે ઘનારણ્યમતીત્ય ઘોરં દિશં પિતૃણામુપગમ્ય કિઞ્ચિત્ ॥

૮૦. ચક્રોપલાં પ્લાવયતી નદીયં સમૃદ્ધપૂરોત્તરવાહનીકા ।
એષા ચતુષ્ષષ્ટિતનુઃપ્રમાણવિસ્તારયુક્તા વિમલામ્બુપૂરા ॥

૮૧. ઊર્ધ્વં તથા પઞ્ચતનુઃપ્રમાણામાવૃત્ય નાનાજલજન્તુયુક્તા ।
એવં પ્રવૃત્તા મહતી નદીયમનુપ્રયાતા વિવિધૈર્જનૌઘૈઃ ॥

૮૨. પ્રસન્નતોયા પ્રવિવેશ વેગાત્ કલમ્બગર્તં કમપિ પ્રશસ્તમ્ ।
તત્પૂરયિત્વા પ્રહરૈકમાત્રા પ્રાપ્તપ્રણાદા મલયસ્ય પુત્રી ॥

૮૩. નારાચમૂર્તેર્નલિનાયતાક્ષાત્ પ્રશાન્તસન્તાપવતઃ પ્રસન્ના ।
આકીર્ણપુષ્પપ્રકરામરૌઘૈઃ પ્રાયાત્ પુનઃ સ્યન્દનચક્રમાર્ગમ્ ॥

૮૪. સમન્તતઃ શાન્તસમન્તતાપં સમૃદ્ધહર્ષાવિનવપ્રણાદમ્ ।
મુનીશ્વરસ્યન્દનમાર્ગયાના મહાર્ણવં તૂર્ણમગાત્ નદીયમ્ ॥

ઇતિ દશમોઽધ્યાયઃ ॥ Pro.Total = 595 + 84 = 679

## એકાદશઃ અધ્યાયઃ

બાણતીર્થમાહાત્મ્ય મ્ ।

૧. રાજા –
બ્રહ્મન્ પ્રશસ્તમિત્યુક્તં ભવતા ગર્તમદ્ભુતમ્ ।
કેન વા નિર્મિતં પૂર્વં તત્ર ચિત્રં કિમદ્ભુતમ્ ॥

૨. મહતાપિ પ્રવાહેન પૂર્વણ્ યામદ્વયાત્ ગતમ્ ।
હરિઃ પ્રસાદમકરોત્ તામ્રપર્ણી કથં મુને ॥

૩. એતત્ સર્વમશેષેણ વદ વિસ્તાર્ય મે ગુરો ।
ન તૃપ્તિમુપગચ્છામિ જુષન્નપિ કથાસુધામ્ ॥

૪. ઋષિઃ –
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ કથામેનાં વિનોદિનીમ્ ।
પુરા કૃતયુગે લોકે પીડ્યમાને ચ ચરાચરે ॥

૫. દેવાઃ પરમસન્ત્રસ્તાઃ શઙ્કરં શરણં યયુઃ ।
દત્વાભયં તતસ્તેષાં વીરરુદ્રઃ પ્રતાપવાન્ ॥

૬. રસારથો બ્રહ્મસૂતો રત્નસાનુશરાસનઃ ।
અચ્યુતં બાણમાદાય દદાહ ચ પુરત્રયમ્ ॥

૭. પુરાન્તક ઇતિ ખ્યાતિં લોકે ત્રૈલોક્યદુર્લભામ્ ।
અશાન્તકોપજ્વલનં બાણં દૃષ્ટ્વા પુરાન્તકઃ ॥

૮. કુત્રચિત્ કુહરે ઘોરે નિદધે મલયાચલે ।
તત્ર વર્ષાયુતજ્વાલામાલાતાપિતપર્વતઃ ॥

૯. તપસા તત્ર ભગવાન્ બાણરૂપી જનાર્દનઃ ।
તાવત્ પ્રવાહ બહુલા તામ્રા મલયનન્દિની ॥

૧૦. વિષ્ણોરારાધનાર્થં તત્ ગર્તં સમુપાવિશત્ ।
તસ્યાં મહત્પ્રવાહાયાં પ્રવિષ્ટાયાં બિલોદરે ॥

૧૧. ઉદભૂત્ અદ્ભુતાકારઝઙ્કારોદારનિસ્વનઃ ।
ફૂત્કારિવ ભૂતોઽપિ ભુજઙ્ગેન્દ્રસ્ય તત્ બિલમ્ ॥

૧૨. બાષ્પધૂમચયૈર્વ્યોમ સંવૃતં જલદૈરિવ ।
ક્વથિતાનીવ વારીણિ વ્યદૃશ્યન્તોરુબુદ્બુદૈઃ ॥

૧૩. ઉત્પતન્તિ ચ યાદાંસિ સન્તપ્તાનિ સમન્તતઃ ।
ઘર્મવેગપરિક્ષિપ્તં વ્યોમ્નિ સ્યન્દનમણ્ડલમ્ ॥

૧૪. દેવદાનવસિધ્ધાનાં યક્ષગન્ધર્વપક્ષિણામ્ ।
સમ્ભ્રમાવિષ્ટચિત્તાનાં ધાવતાં ચ તતસ્તતઃ ॥

૧૫. મહાનાદઃ સમભવત્ મેઘાનામિવ ગર્જતામ્ ।
દૃષ્ટ્વૈતત્ અદ્ભુતં સર્વે ચિન્તાક્રાન્તા બભૂવિરે ॥

૧૬. પરિવૃત્ય વિમાનં તત્ અગસ્ત્યો મુનિસત્તમઃ ।
કૃતાઞ્જલિરુવાચેદં હયગ્રીવં મહાપ્રભુમ્ ॥

૧૭. આકસ્મિકમિદં ચિત્રં ભગવન્ કેન હેતુના ।
ઉત્પાતમિવ પશ્યામિ કથ્યતાં મે કુતૂહલાત્ ॥

૧૮. શ્રુણુ બ્રહ્મન્ પ્રવક્ષ્યામિ વિચિત્રસ્યાદ્ભુતસ્ય ચ ।
પુરા પુરહરેણૈવ નિર્દગ્ધે ચ પુરત્રયે ॥

૧૯. અશાન્તકોપદહનં બાણં નારાયણાત્મકમ્ ।
મલયેઽસ્મિન્ મહાગર્તે શાન્ત્યૈ સંક્ષિપ્તવાન્ શિવઃ ॥

૨૦. તત્તાપશાન્તિકરણી તામ્રપર્ણી સુધાત્મિકા ।
શિવપ્રિયકરી હ્યેષા મહાપાપવિનાશિની ॥

૨૧. બાણરૂપી હરિર્વિષ્ણુઃ ભગવાન્ લોકપાવનઃ ।
આરાધ્યતે તામ્રપર્ણ્યા નમસ્કુરુ મહામતે ॥

૨૨. વિશેષાદસ્ય દેવસ્ય પ્રભાવાત્ વનમાલિનઃ ।
મહાતીર્થમિતિ જ્ઞેયં દર્શનાત્ દુરિતાપહમ્ ॥

૨૩. યસ્માત્ અત્રોષિતં બાણરૂપિણા હરિણા સ્વયમ્ ।
બાણતીર્થમિતિ ખ્યાતં ભૂયાત્ ભુવનમણ્ડલે ॥

૨૪. અત્ર સ્નાતાઃ નરાસ્સર્વે હરેસ્સારૂપ્યભાગિનઃ ।
પ્રયાગપ્રમુખાન્યત્ર તીર્થાનિ વિવિધાન્યપિ ॥

૨૫. પ્રતિમાસં સમાજગ્મુઃ તીર્થે દર્શનાય વૈ ।
તત્ર જપ્તં હુતં દત્તં તદનન્તફલં ભવેત્ ॥

૨૬. ઇત્થં સમ્ભાષમાણેઽસ્મિન્ હયગ્રીવમહાત્મનિ ।
તત્ ગર્તાત્ અર્કસઙ્કાશો બાણો નિર્ગત્ય ગહ્વરાત્ ॥

૨૭. વ્યોમયાનં સંપ્રતસ્થે ભાસ્યન્ ભુવનત્રયમ્ ।
સર્વે દેવાઃ સર્ષિસઙ્ઘાઃ પ્રણેમુઃ તુષ્ટુવુઃ તથા ॥

૨૮. તત્ર તીર્થમુપસ્પૃશ્ય દધુર્મૂર્ધ્નાત્મલબ્ધયે ।
પ્રશશંસુઃ સુરાઃ સર્વેકિરન્તઃ કુસુમોચ્ચયમ્ ॥

૨૯. કલમ્બતીર્થં પ્રજગુઃ બાણતીર્થથં ચ કેચન ।
મહાક્વાથમિતિ પ્રોચુઃ અપરે વિસ્મયાકુલાઃ ॥

૩૦. શીતોદકં પઠન્ત્યેકે પરમાનન્દનિર્ભરાઃ ।
અગસ્ત્યપ્રમુખાસ્સર્વે હયગ્રીવેણ સંયુતાઃ ॥

૩૧. બિભ્રાણા શિરસા તીર્થં પુનઃ સ્યન્દનમારુહન્ ।
ભૂયો દુન્દુભયો નેદુઃ તૂર્યારાવેણ ભૂયસા ॥

૩૨. સૂતં સઞ્ચોદયામાસ સોઽપિ ચાશ્વાન્ અચોદયત્ ।

કમ્પમાનૈઃ ધ્વજપટૈઃ વિલિખન્તમિવામ્બરમ્ ॥

૩૩. કિઙ્ગિણીશતસન્નાદં ચન્દ્રભાસ્કરસન્નિભમ્ ।
પ્રચચાલ મહાચક્રં સ્યન્દનં કુમ્ભજન્મનઃ ॥

૩૪. તતઃ પ્રાક્ ઉત્તરાં ગત્વા ચલમાને મહારથે ।
દિવિ ભૂમૌ જનૌઘં તુ પ્રસર્પન્તં મહાસ્વનમ્ ॥

૩૫. સૈષા સમસ્તપાપઘ્ની ચન્દનાચલકન્યકા ।
તત્સ્યન્દનપથા પ્રાયાત્ પૂર્યમાણા પ્રવાહિની ।

૩૬. ક્વચિત્ ઉચ્ચૈઃ શિલારૂઢા ક્વચિત્ પતતિ નિમ્નગા ।
ક્વચિત્ પૂરૈઃ પ્લાવયન્તી તરઙ્ગૈઃ સ્વકરૈરિવ ॥

૩૭. હસન્તીવ સ્વફેનૌઘૈઃ નૃત્યન્તીવ સ્વવીચીભિઃ ।
જલ્પન્તીવ સ્વનૈરઘોરૈઃ નિસ્સસાર સરિદ્વરા ॥

૩૮. અમ્ભોજવદના મીનલોચના ભુજવીચિકા ।
આવર્તનાભિગર્તાઢ્યા ફેનકુઞ્જનવામ્બરા ॥

૩૯. ચક્રવાકસ્તનવતી શૈવાલનવકુન્તલા ।
પ્રમદેવ ક્વચિત્ યાતિ મન્દં મન્દં મદાકુલા ॥

૪૦. તરઙ્ગશુણ્ડાદણ્ડેન ફેનદન્તોજ્જ્વલેન ચ ।
ક્વચિત્ કરીન્દ્રવત્ યાતિ જલૌઘઃ પુષ્કરોજ્જ્વલઃ ॥

૪૧. ફેનકઞ્ચુકસઞ્છન્નં આવર્તશ્રવણાન્વિતમ્ ।
તરઙ્ગભોગરુચિરં ભોગરાજમિવ સ્થિતમ્ ॥

૪૨. મણિવિદ્યુત્વૃતા ભૂરિ તરઙ્ગસ્તનિતેન ચ ।
મહાગ્રાહાશનિવતા પૂરણેયં પ્રકાશતે ॥

૪૩. આવર્તચક્રનિકરં આલોલધ્વજફેનિલમ્ ।
યાતોગણમહાવંશં ભાસમાનં વિમાનવત્ ॥

૪૪. મીનનક્ષત્રનિકરં ફેનજાલઘનાવિલમ્ ।
મણિજ્યોત્સ્નાલિવિસ્તારં પૂરં ગગનવત્ બભૌ ॥

૪૫. ગગને વર્તમાનાનાં વિમાનાનાં દિવૌકસઃ ।
છાયામમ્ભસિ શઙ્કન્તે કૌશિકિમપરાં ક્રિયામ્ ॥

૪૬. આશ્ચર્યજનની ચેયમપૂર્વાણામિવ પ્રસૂઃ ।

ઉત્સવનામિવ નિધિઃ મહતી મલયાત્મજા ॥

૪૭. સંસ્તુતા પૂજિતા દેવૈઃ પ્રાર્થિતા સા નમસ્કૃતા ।
ક્વચિત્ કૂલં ધ્વંસયન્તી બાધયન્તી ક્વચિત્ સ્થલમ્ ॥

૪૮. ક્વચિત્ વૃક્ષાન્ ઉદ્ગિરન્તી તરુજાલાનિ કૃત્સ્નશઃ ।
સુધાપ્રવાહબહુલા નિસ્સસાર તરઙ્ગિણી ॥

૪૯. કૌતૂહલસમાવિષ્ટાઃ દેવદાનવમાનવાઃ ।
સહ સર્વૈઃમુનિગણૈઃ મમજ્જુઃ તીર્થમુત્તમમ્ ॥

૫૦. કુતૂહલસમાવિષ્ટાઃ સાદરં સર્વતો જનાઃ ।
મજ્જન્તશ્ચ પિબન્તશ્ચ વિહરન્તો મહામ્ભસિ ॥

૫૧. હસન્તો હાસયન્તશ્ચ સ્તુવન્તશ્ચ મહાનદીમ્ ।
વિસ્મયં પરમં જગ્મુઃ પ્રણેમુઃ ભક્તિભાવિતાઃ ॥

૫૨. વિમાનમનુગચ્છન્તી કુમ્ભયોનેઃ મણિપ્રસૂઃ ।
કર્ષન્તી તરુજાલાનિ ગુલ્માનિ વિવિધાન્યપિ ॥

૫૩. ક્વચિત્ આશીવિષકુલં ક્વચિન્માતઙ્ગયૂથિકામ્ ।
ક્વચિત્ દ્રુતતરં યાતિ મન્દં યાતિ ક્વચિત્ ક્વચિત્ ॥

૫૪. મત્સ્યકચ્છપસઙ્ઘાતા મહાગ્રહસમાકુલા ।
મહાપ્રવાહસમ્પન્ના માલા મલયનન્દિની ॥

૫૫. સ્તૂયમાના મુનિગણૈઃ પ્લાવયન્તી બહુસ્થલીમ્ ।
પૂરયિત્વ કલમ્બાખ્યં ગર્તં પરમપાવનમ્ ॥

૫૬. પુનઃ પ્રાક્ ઉત્તરાં ગત્વા પ્રયાન્તી સાનુકાનને ।
હયગ્રીવાશ્રમે કિઞ્ચિત્ પશ્ચિમેઽપિ પિશઙ્ગિલામ્ ॥

૫૭. વિગાહ્ય મહતીં વાપીં પૂરયિત્વા મહાજલૈઃ ।
જલોન્મિલિતશૈવાલાઃ સ્ખલન્તી ચ શિલાતલે ॥

૫૮. રુદ્રાટવી બ્રહ્મશય્યા રમાકીડમૃગાનનમ્ ।
એતાનિ પુણ્યક્ષેત્રાણિપ્રયાન્તી ચ અન્તરાન્તરે ॥

૫૯. ગુહોપાન્તે કુમારસ્ય પશ્ચિમેનોત્તરામુખી ।
મુક્તાપ્રસ્તારમાસાદ્ય ભિત્વા જોતિર્મનિં ગિરિમ્ ॥

૬૦. પૈનાકે શિરસિ શ્રેષ્ઠે પપાત ઘનનિર્ઝરા ।
ઉત્પેતુઃ તોયકણિકાઃ શતશોઽથ સહસ્રશઃ ॥

૬૧. નિપેતુર્નિર્ઝરાઃ ઘોરાઃ શઙ્ખચન્દ્રસમપ્રભાઃ ।
ભૂર્યભિદ્યત તત્તીર્થં પતતા નિર્ઝરેણ હિ ॥

૬૨. જલધૂમસમાક્રાન્તરોદસ્યોરન્તરં મહત્ ।
મહતા નિર્ઝરસમ્ભૂતૈઃ સુવ્યક્તૈરમ્ભસાં કણૈઃ ॥

૬૩. ધારાક્રાન્તમિવાકાશં દિવાપિ પરિદૃશ્યતે ।
સ્ફુરમાણૈરમ્બુકણૈઃબાલાતપકરમ્બિકૈઃ ॥

૬૪. પદ્મરાગૈરિવાભાતિ સમન્તાત્ ભુવનત્રયમ્ ।
મહાવનસ્પતિચ્છાયાસંસક્તાનિ પૃષન્તિ ચ ॥

૬૫ અનુકુર્વન્તિ ગગને મહતા મરકતશ્રિયમ્ ।
ક્વચિત્ પલ્લવશોભેન ક્વચિત્ કુસુમશોભયા ॥

૬૬. સઙ્ક્રાન્તાબિન્દુનિકરૈઃ નાનારત્નૈરિવામ્બરમ્ ।
યુગપત્ પતતામાસીત્ નિર્ઝરાણાં મહાગિરેઃ ॥

૬૭. મહાનાદ ; સમભવત્ મેઘાનામિવ ગર્જતામ્ ।
મહાવેગસમાકૃષ્ટે પ્રવાહે વિસ્તૃતે નૃપ ॥

૬૮. આવર્તપદ્ધતિર્ભાતિ વર્ણપઙ્ક્તિરિવાદ્ભુતા ।
વૃતા તરઙ્ગૌઘૈઃ યાદોભિઃ બલસંવૃતા ॥

૬૯. ફેનૈઃ કુસુમિતા ચેયં કલ્પવલ્લી ન સંશયઃ ।
સ્નાતુમાગમનાયૈવ રસાત્લનિવાસિનામ્ ॥

૭૦. દિશન્તીવ મહાદ્વારાણ્યાવર્તૈરિવ સન્તતમ્ ।
આભોગપુલિના ભૂરિ ફેનચારુદુકૂલિની ॥

૭૧. આવર્તનાભિવિવરા નવશૈવાલવેણિકા ।
ચક્રવાકસ્તનવતી વિકચત્કમલાનના ॥

૭૨. હંસયાનાવિભાત્યેષા વિસ્ફુરન્મીનલોચના ।
આલાપિની પક્ષિરુતૈઃ યાદોભિઃ મણિભૂષણા ॥

૭૩. મકરન્દૈઃ મૃગમદા સાલઙ્કારા વધૂરિવ ।
એવમભ્યુદયાકારા દેવી મલયનન્દિની ॥

૭૪. હેમપુષ્કરિણીં રમ્યાં વાપીં ગગનસંજ્ઞિતામ્ ।
પૂરયિત્વા મહાતોયૈઃ મહાપાતકનાશિની ॥

૭૫. તતોઽપ્યુદીચીમાવૃત્ય પાર્શ્વતઃ ચન્દનાટવીમ્ ।
દિશમૈન્દ્રીં પુનઃ પ્રાયાત્ ઉત્તરેણ ઉડુપર્વતમ્ ॥

૭૬. એવં મલયશૈલસ્ય વ્યતિક્રમ્ય તટાટવીમ્ ।
તપઃફલસમાકારા પાણ્ડ્યાનામુત્તમા નદી ।
વિમાનમનુયાન્તી સા સમિયાય મહાર્ણવમ્ ॥

ઇતિ એકદશોઽધ્યાયઃ ।     Pro.Total = 679  + 76 =775

## દ્વાદશોઽધ્યાયઃ

વૃષાદ્ગુનગરે કાદમ્બરીવને તામ્રાયાઃ સાગરે પ્રવેશપ્રસ્તાવઃ ।

૧. મહારાજ કથાં પુણ્યામિમાં પાપપ્રણશિનીમ્ ।
ભૂયોઽહં સંપ્રવક્ષ્યામિ શ્રુણુ નાન્યેન ચેતસા ॥

૨. ક્ષેત્રમાઙ્ગિરસં ગત્વા મહ્યેનામલકાટવીમ્ ।
પુનઃ કિઞ્ચિત્ પરિક્રમ્ય દિશં યક્ષેશપાલિતામ્ ॥

૩. કલ્યાણવનમાસાદ્ય ગૌતમાશ્રમમણ્ડિતમ્ ।
પ્રાચ્યામાપ દિશં તામ્રા મહાપૂરપ્રવાહિની ॥

૪. જ્યોતિર્વનં ચન્દ્રશાલામુત્તરેણ પ્રવર્તિતા ।
બ્રહ્મારણ્યમનુપ્રાપ્ય ગર્ગરાખ્યશિલોચ્ચયમ્ ॥

૫. ઉત્તરાભિમુખી ભૂયો બ્રહ્મવૃદ્ધપુરાત્ પુરઃ ।
લાલઙ્ગાશમ્બરક્ષેત્રમેત્યેષા પૂર્વવાહિની ॥

૬. દિશં કિઞ્ચિત્ ઉપાવૃત્ય શરાટવ્યાસ્તુ પશ્ચિમે ।
આગ્નેયીમથ સંપ્રાપ્ય પુનાઃ પૂર્વમુખા નદી ॥

૭. વૈકુણ્ઠાત્ પશ્ચિમે ભાગે શ્રીનગર્યાઃ તથોત્તરે ।
મધ્યે વૃષાટવીં પુણ્યાં મહાનન્દસ્ય દક્ષિણે ॥

૮. જયન્તાત્ ઉત્તરે ભાગે પ્રાપ્ય કાદમ્બરીવનમ્ ।
પ્રવિવેશ મહામ્ભોધિં પ્રસન્નસલિલાશયા ॥

૯. એવં મલયજા પુણ્યા તામ્રપર્ણી સરિદ્વરા ।
ભર્તાસમેતા સા સર્વ સિન્ધુલોકૈકબન્ધુના ॥

૧૦. વૃષાઙ્કે નગરે નિત્યં સાન્નિધ્યાપ્યાત્મવિદ્યયા ।
રૂપેણાન્યેન ભર્તારં રમયન્તી સ્થિતાઽભવત્ ॥

૧૧. તીર્થરૂપેણ લોકાન્ ત્રીન્ પુનાતિ મલયાત્મજા ।
રાજા –
કથં વૃષાઙ્કનગરે સિન્ધુરાજગૃહે કથમ્ ॥

૧૨. તીર્થરૂપા કથમભૂત્ કિં વા કાદમ્બરીવનમ્ ।
એતાનિ વદ વિસ્તીર્ય શ્રોતું કૌતૂહલં હિ મે ॥

૧૩. બ્રહ્મન્ પ્રસીદ ધર્મજ્ઞ કથયાપ્યાયસ્વ મામ્ ।
ઋષિઃ –
સાધુ પૃષ્ટં મહારાજ ભવતા ધર્મચેતસા ॥

૧૪. સાધૂનાં સમચિત્તાનાં સદાશિવકૃતાત્મનામ્ ।
ધર્માન્ન ચ્યવતે બુદ્ધિઃ લોભતા વિષયૈરપિ ॥

૧૫. પિચુમન્દવને વાપિ રસાલોદરકાનને ।
પઞ્ચમં નૈવ મુઞ્ચન્તિ પિકાઃ વાસન્તમોહિનઃ ॥

૧૬. તસ્માદ્રાજન્ પ્રવક્ષ્યામિ યથાવત્ અનુપૂર્વશઃ ।
એકાગ્રબુદ્ધ્યા તત્સર્વં શ્રોતુમર્હસિ સામ્પ્રતમ્ ॥

૧૭. વૃષાઙ્કનગરે તસ્ય મહામાણિક્યભાસ્વરે ।
ભવને કાઞ્ચનમયે મહાસિંહાસને શુભે ॥

૧૮. અસીના નવકૌસુમ્ભવસના ચારુહાસિની ।
મહાસૌન્દર્યસમ્પૂર્ણમહાસામ્રાજ્યદેવતા ॥

૧૯. મણિકમ્બુધરા ચારુ કનકામ્બુજધારિણી ।
વીણામન્યે ધારયન્તી શારિકામપરે કરે ॥

૨૦. શરચ્ચન્દ્રવદના ચઞ્ચન્મણિકાઞ્ચનકુણ્ડલા ।
મહામતલ્લિકા રત્નમકુટોજ્જ્વલચન્દ્રિકા ॥

૨૧. મણિકેયૂરવલ્લયમહાકઙ્કણભૂષિતા ।

મુક્તાલતાપરિભ્રાજદુરોજકલશોજ્જ્વલા ॥

૨૨. કૂજન્નૂપુરમઞ્જીરકાઞ્ચીદામપરિષ્કૃતા ।
કેશશૈવાલકલિકા મણિબુદ્બુદસજ્જયા ॥

૨૩. લોચનદ્વયપાટીના મુક્તામાલાતરઙ્ગિણી ।
વિસ્તારફેનતરણિઃ સ્તનચક્રસમુજ્જ્વલા ॥

૨૪. કરપાદાનનામ્ભોજા સૌન્દર્યામૃતવાહિની ।
એવમાશ્ચર્યવેષાઙ્ગી સાક્ષાત્ પરશિવાત્મિકા ॥

૨૫. સેવન્તે વિવિધાકારાઃ શક્તયઃ પરમાદ્ભુતાઃ ।
મુક્તાવતી મણિવતી સેવેતે પાર્શ્વયોર્દ્વયોઃ ॥

૨૬. મણિકાઞ્ચનદણ્ડાભ્યાં ચામરાભ્યામનારતમ્ ।
પૂર્ણા પૂર્ણેન્દુસઙ્કાશં વહન્ત્યાતપવારણમ્ ॥

૨૭. ઘોરાકુમુદ્વતીભ્યાં ચ વ્યજનાભ્યાં ચ સેવિતા ।
શ્યામાવતીકરોદઞ્ચત્વીટિકાદાનતત્પરા ॥

૨૮. વહન્તી ચન્દ્રસેનાપિ પાણૌ કલાચિતામ્ ।
અમુક્તવામભાગસ્થાં તામ્રામેનામુપાસતે ॥

૩૦. અરુણા વાદ્યમાદાય વીણાયાઃક્વણિતધ્વનિમ્ ।
શ્લાઘયન્તી મુહુઃ ચઞ્ચત્વદનામ્ભોજમણ્ડલા ॥

૩૧. સેવ્યમાના મુનિગણૈઃ દેવૈઃ સિદ્ધૈશ્ચ દાનવૈઃ ।
આસ્તે પરમહૃષ્ટા સા લોકસંરક્ષણોત્સુકા ॥

૩૨. એવં વિજ્ઞાય તાં દેવીં યે સેવન્તે સમાહિતાઃ ।
તેષાં પાપાનિ નશ્યન્તે વર્ધન્તે સમ્પદઃ તથા ॥

૩૩. અન્તે મુક્તિશ્ચ નિયતા નાત્ર કાર્યા વિચારણા ।
સર્વતીર્થમયી સર્વમન્ત્રતન્ત્રપ્રવર્તિનિ ॥

૩૪. એનામાહુર્મુનિગણાઃ શ્રુતયશ્ચ પુરાતનાઃ ।
ગઙ્ગાદિસર્વતીર્થનાં પરમાયતનં મહત્ ॥

૩૫. ઉપાસ્યા સર્વજન્તૂનાં પુરુષાર્થં ચ કાઙ્ક્ષતામ્ ।
એવં વૃષાઙ્કનગરે નિત્યં સાન્નિધ્યકારિણી ॥

૩૬. જયતે તીર્થરૂપેણ લોકાનાં હિતકામ્યયા ।
સૈષા સ્વાંશેન ભૂયોઽપિ તીર્થરૂપા પ્રવર્તતે ॥

૩૭. બ્રહ્મતોયાં વિષ્ણુરસાં રુદ્રતેજોપબૃંહિતામ્ ।
ઉમાવેગસમાયુક્તાં સારસ્વતતરઙ્ગિણીમ્ ।
૩૮. રમાવર્તાં સોમશૈત્યાં સૂર્યોદારપ્રભાવતીમ્ ।
સેવન્તે સકલાઃ દેવાઃ મુનયશ્ચ તપોધનાઃ ॥

૩૯. સન્દર્શિતમહાપૂરાપ્યાવારિધિશિલોચ્ચયા ।
અનેકનગરોદ્યાનગ્રામારામશતાવૃતા ॥

૪૦. મુનીનામાશ્રમૈઃ પુણ્યૈઃ પરિષ્કૃતતટદ્વયા ।
પદે પદે તીર્થમયી દેવાયતનમાલિની ॥

૪૧. રસાલપનસારામકદલીકાનનાવૃતા ।
કેરપૂગામ્રનારઙ્ગમલ્લીકુરવકોજ્જ્વલા ॥

૪૨. પ્રિયાલવઞ્જુલવતી બકુલાર્જુનનિર્ભરા ।
બ્રહ્મકોટિસમુદ્ઘુષ્ટહોમધૂમસમાવૃતા ॥

૪૩. ઉત્ફુલ્લપઙ્કજવતી સન્તોત્પલસૌરભા ।
ચામ્પેયકુસુમામોદી મરુતા મન્દગામિની ॥

૪૪. પરિશ્રમાપહરિણી તર્પયન્ત્યમ્ભસા જગત્ ।
આમોદયન્તી ચ કુસુમૈઃ નાદયન્તી દ્વિજારવૈઃ ॥

૪૫. મરન્દધારાનિકરૈઃ વર્ધિતેવ તર્ઙ્ગિણી ।
હંસસારસસઙ્કીર્ણા કૂજત્કોકિલભાષિણી ॥

૪૬. ઇત્થં મહોદયાકારા પોષઅ્તી જગત્ત્રયમ્ ।
પ્રવિશન્તી સિન્ધુરાજં પ્રસન્નસલિલાશયા ॥

૪૭. સ્વાંશેન તરુણીભૂત્વા નદીનદગણેશિતુઃ ।
વામાઙ્કપીઠનિલયા મનોજ્ઞમણિભૂષણા ॥

૪૮. અનેકતીર્થનિકરૈસ્સેવ્યમાના સુમધ્યમા ।
સૌન્દર્યસાગરોદઞ્ચત્સુસુતેવ વધૂમયી ॥

૪૯. રમયામાસ ભર્તારં રમા નારાયણં યથા ।
યસ્યાઃ સ્મેરાંશુસન્દોહૈઃ મૌક્તિકામણયોઽભવન્ ॥

૫૦. યદ્દન્તપતસમ્ભૂતબાલાતપગુલુચ્છકૈઃ ।
જાયન્તે વિદ્રુમલતાઃ સાગરે મકરાલયે ॥

૫૧. કૂલે કૂલે ચ જાયન્તે યલ્લોચનમરીચિભિઃ ।
ઉદ્ધુષ્ટજીવકરણૈઃ ઇન્દ્રનીલમતલ્લિકૈઃ ॥

૫૨. યદઙ્ગુકરણાસઙ્ગાત્ વૈદૂર્યમણયોઽભવન્ ।
યદઙ્ઘ્રિલાક્ષાસમ્પર્કાત્ મહામાણિક્યસમ્ભવઃ ॥

૫૩. અસ્યાઃ પ્રભાવતો રાજન્ રત્નાનામુદયં સ્મૃતમ્ ।
અસ્યાઃ પ્રસાદલેશેન પુષ્ણન્ત્યોષધયસ્સમાઃ ॥

૫૪. અસ્યાઃ ચૈવ તરઙ્ગિણ્યાઃ શતશોઽથ સહસ્રશઃ ।
તામ્રપર્ણ્યાઃ મહાનદ્યાઃ કલાં નાર્હન્તિ ષોડશીમ્ ॥

૫૫. યઃ કશ્ચન નદીમન્યામનયા તુલયિષ્યતિ ।
સ યાતિ રૌરવં ઘોરં યાવદાભૂતસમ્પ્લવમ્ ॥

૫૬. બ્રહ્માણ્ડોદરસંસ્થાનિ તીર્થાનિ વિવિધાન્યપિ ।
તામ્રાતીર્થત્રયૈકસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥

૫૭. તીર્થાન્યન્યાનિ જાયન્તે શુદ્ધાન્તઃકરણાત્મનામ્ ।
મુક્ત્યાદિધ્યાનયોગેન અન્તર્બહિરકલ્મષાઃ ॥

૫૮. ધર્મદ્રવા ભગવતી તામ્રા મલયનન્દિની ।
પરાપરામૃતસ્યન્દા તેજિષ્ઠા કર્મનાશિની ॥

૫૯. મુક્તિમુદ્રા રુદ્રકલા કલિકલ્મષનાશિની ।
નારાયણી બ્રહ્મનાદા માલેયી મઙ્ગલાલયા ॥

૬૦. મરુત્વદ્યમ્બરવતી મણિમાતા મહોદયા ।
તાપઘ્ની નિષ્કલાનન્દા ત્રયી ત્રિપથગાત્મિકા ॥

૬૧. ચતુર્વિંશતિ નામાનિ પુણ્યાન્યેતાનિ ભૂપતે ।
યે પઠન્તિ જનાઃ ભક્ત્યા તેષાં મુક્તિઃ કરે સ્થિતા ॥

૬૨. વાપિકૂપતટાકેષુ તીર્થેષ્વન્યેષુ વા પુનઃ ।
જપન્ નામાનિ ચૈતાનિ મજ્જન્તો ગોષ્પદેઽપિ વા ॥

૬૩. પ્રયાન્તિ પરમાં મુક્તિં નિર્ધૂતાખિલકલ્મષાઃ ।
ઇત્થં જ્ઞાત્વા મહારાજ તર્તુકામો ભવાર્ણવમ્ ॥

૬૪. જન્મમધ્યે સકૃત્ વાપિ તામ્રાયાં સ્નાનમાચરેત્ ।
અપિ વા કણિકામાત્રં પિબેત્ અસ્યાઃ પયઃશુભમ્ ॥

૬૫. તસ્ય નાહં પશ્યામિ ભૂયો ગર્ભે નિપાતનમ્ ।
અપારકરુણા ચેયમિતિ નિશ્ચિત્ય વૈ સુરાઃ ॥

૬૬. ચક્રુઃ સન્તતસાન્નિધ્યં તીરે તીરે નિરન્તરમ્ ।
પદે પદે શિવક્ષેત્રં ઉમાક્ષેત્રાણ્યનેકશઃ ॥

૬૭. વિષ્ણુક્ષેત્રાણિ તીર્થાનિ શક્તિક્ષેત્રાણ્યનેકશઃ ।
હેરમ્બભવનાન્યત્ર કૌમારાણિ પરાણ્યપિ ॥

૬૮. પુણ્યાશ્રમમુખ્યાનિ મુનીનાં ભાવિતાત્મનામ્ ।
એષાં દર્શનમાત્રેણ નરઃ પાપૈઃ વિમુચ્યતે ॥

૬૯. આરભ્ય મલયં શૈલં આસાગરમિમં સરિત્ ।
પ્રવાહબહુલા દેવી મુનિના સંપ્રવર્ધિતા ।
કાદમ્બરીવને પુણ્યા તામ્રા સાગરમભ્યગાત્ ॥

૭૦. શુદ્ધોદપૂરા દુરિતાપહન્ત્રી મુનીશ્વરસ્યન્દનમાર્ગયાના ।
પ્રહર્ષયન્તી કિલ પાણ્ડ્યભૂપમમ્ભોધિમેષા પ્રવિવેશ વેગાત્ ॥

ઇતિ દ્વાદશોઽધ્યાયઃ । Pro.Total = 775 + 70 = 845.

## ત્રયોદશોઽધ્યાયઃ

કાદમ્બરીવનમાહાત્મ્યવર્ણને બ્રહ્મપદસ્થાનવર્ણન્ મ્ ।

૧. શ્રી સૂતઃ –
ઇત્થમાગમનં દેવ્યાઃ તામ્રાયાઃ પરમાદ્ભુતમ્ ।
આકર્ણ્ય પરમાનન્દનિમગ્નહૃદયો નૃપઃ ॥

૨. અભિષ્ટૂયાપગારત્નં મુનિં શઙ્ખં પ્રણમ્ય ચ ।
વીરસેનો મહાતેજાઃ ભૂયો વચનમબ્રવીત્ ॥

૩. બ્રહ્મન્ અભ્યુદયાકારા કથેયં કલ્મષાપહા ।
શ્રુતાપિ ભૂયઃ તૃષ્ણાં તુ જનયત્યેવ મે તરામ્ ॥

૪. ઇયમમ્ભોનિધિં પ્રાપ્ય વને કાદમ્બરાહ્વયે ।

કાદમ્બરીવનમિતિ ખ્યાતં યેન જગત્ત્રયે ॥

૫. કારણં શ્રોતુમિચ્છામિ વિસ્તરાત્  શ્રુણુ સાદરમ્ ।
શઙ્ખઃ તત્ર તે રાજન્ પ્રવક્ષ્યામિ કારણં શ્રુણુ સાદરમ્ ॥

૬. પુરા હ્યાદિયુગે ધાતા સૃષ્ટ્વા લોકાન્ ચતુર્દશ ।
મદન્યૈર્દુષ્કરમિતિ ચાત્માનં બહ્વમન્યત્ ॥

૭. સાવલેપાન્ મદાવિષ્ટાત્ વેદાન્ આદાય દાનવઃ ।
પાતાલં પ્રયયૌ વેગાત્ સોઽપિ નષ્ટશ્રુતિર્વિધિઃ ॥

૮. સૃષ્ટિસામર્થ્યરહિતો બભ્રામ શરદાં શતમ્ ।
ચિન્તયામાસ ભગવાન્ધાતા કારણપૂરુષમ્ ॥

૯. અવિવેકધિયાં ક્વાપિ ન લભ્યં હિ મનઃ સુખમ્ ।
નિહતાહઙ્ક્રિયા યત્ર યત્રાન્ત્યમપિ ચેતસિ ॥

૧૦. તત્ર શ્રેયો ન પશ્યામિ ધાન્યમૂષરતો યથા ।
સાધૂનાં સમચિત્તાનાં અહઙ્કારાસ્થચેતસામ્ ॥

૧૧. અનપાયા ભવિષ્યન્તિ સિદ્ધયોઽષ્ટૌ ન સંશયઃ ।
આત્મા મલીમસયુતઃ સોઽપિ બ્રહ્મરતાં વ્રજેત્ ॥

૧૨. યાવન્નોદેતિ સવિતા તાવત્ રાત્રિર્ન સંશયઃ ।
યાવત્ ન ભવેત્ જ્ઞાનં પામરતાં વ્રજેત્ ॥

૧૩. ઉપાધિરહિતં યત્ર બ્રહ્મજ્ઞાનં પ્રકાશતે ।
જ્ઞાતવ્યસ્સ પુમાન્ લોકે સાક્ષાત્ પરશિવઃ ખલુ ॥

૧૪. નિર્યન્તર્યપિ જન્તૂનાં બ્રહ્માદીનાં અભઙ્ગુરે ।
વર્તમાને ગુરૌ નિત્યે અહન્તા મે વિનિષ્ફલા ॥

૧૫. ઇતઃ પરં મે કિં કાર્યં મૂઢસ્યાકાર્યવેદિનઃ ।
હરિરારાધનીયો હિ સદ્ભિરાપદિ શાન્તયે ॥

૧૬. જનિતઃ પોષિતઃ ચાહં બોધિત ચાનુપાલિતઃ ।
કથં સન્તાપશાન્ત્યર્થં મયા નારાધ્યતે હરિઃ ॥

૧૭. તમેવ શરણં યામિ નાત્ર કાર્યા વિચારણા ।
ઇતિ નિશ્ચિત્ય ચિત્તેઽસ્મિન્ વિનીતે ચતુરાનને ॥

૧૮. તદાનનાત્ આવિરભૂત્ નારી કાચન સમ્ભ્રમાત્ ।
નાનાવક્રાઙ્ગલતિકા કૃષ્ણવર્ણા કુરૂપિણી ॥

૧૯. મદનાવિષ્ટહૃદયા ધૂયમાનેવ સાબ્રવીત્ ।
કથં મનોરથં લપ્સ્યે ભગવન્ કથ્યતામિતિ ॥

૨૦. ઇત્યુક્તવત્યાં તસ્યાન્તુ તામાહ વનિતાં વિધિઃ ।
અયિ તે કાઙ્ક્ષિતસ્યાસ્યૈ તપસ્તપ્તું ત્વમર્હસિ ॥

૨૧. મદ્દણ્ડેન ધૃતા માલા નામ્ના કાદમ્બરી કિલ ।
યત્રૈષા વિશતે માલા તત્રૈવાસ્ત્વાશ્રમસ્તવ ॥

૨૨. ઇતિ વ્યાહૃત્ય તાં વેધાઃ સ્વદણ્ડાગ્રાત્ સ્રજં શુભામ્ ।
વિમુચ્ય પ્રેષયામાસ સા જગામ મહીતલમ્ ॥

૨૩. માલામન્વગમત્ સાપિ વનિતા બ્રહ્મચોદિતા ।
પરિભ્રામ્ય મહીં કૃત્સ્નાં સ્રગિયં યત્ર સંસ્થિતા ॥

૨૪. તત્રે કૂલે સમુદ્રસ્ય તામસી વાસમાતનોત્ ।
કૃત્વાશ્રમપદં રમ્યં નિયમૈઃ દુષ્કરૈઃ પરૈઃ ॥

૨૫. નિગૃહીતેન્દ્રિયગ્રામા તતાપ પરમં તપઃ ।
ધ્યાયન્તી હૃદિ ગૌરીશં વરદં ભક્તવત્સલમ્ ॥

૨૬. એવમસ્યાઃ તપસ્યન્ત્યાઃ સમગ્રં શરદાં શતમ્ ।
પુરઃ પ્રાદુરભૂત્ શમ્ભુઃ પ્રસન્નો વરદિત્સયા ॥

૨૭. શ્રી પરમેશ્વરઃ –
પ્રીતોઽસ્મિ તપસા ભદ્રે દુષ્કરૈઃ નિયમૈરપિ ।
વરં વરય ભદ્રં તે કિં તે મનસિ કાઙ્ક્ષિતમ્ ॥

૨૮. ઇતિ વાચં નિશમ્યૈષા મહાદેવસ્ય શૂલિનઃ ।
બદ્ધાઞ્જલિપુટા નારી વરમેનમયાચત ॥

૨૯. ભગવન્ યદિ તુષ્ટોઽસિ તપસા મે મહેશ્વર ।
ત્રિલોકવર્તિનાં પુંસાં સ્પૃહણીયા ભવામ્યહમ્ ॥

૩૦. યં યં વાઞ્છામિ પુરુષં સ ભૂયાત્ મદ્વશઃ પુમાન્ ।
યાનિ યોગ્યાનિ વાઞ્છામિ તાન્યગ્રે સન્તુ મે પ્રભો ॥

૩૧. નિત્યયૌવન સંયુક્તા વિહરિષ્યે સ્વરૂપિણી ।

એવં તયાર્થિતો દેવઃ તથાસ્ત્વિત્યભિધાય ચ ॥

૩૨. રૂપમપ્રતિમં કૃત્વા ભૂયઃ સ્વપદં યયૌ ।
નામ્ન્યૈષા તામસી નારી વરં લબ્ધ્વા સદાશિવાત્ ॥

૩૩. વિદ્યાયૌવનસૌન્દર્યસમ્પન્ના કામુકી સતી ।
આગતાન્ પુરુષાન્રૂપસમ્પન્નાન્ વ્યોમચચારિણી ॥

૩૪. રમયામાસ સંહૃષ્ટા યથેષ્ટં સ્વૈરચારિણી ।
એતસ્મિન્ અન્તરે વિધિર્વ્યાકુલિતેન્દ્રિયઃ ॥

૩૫. સ્વપાશ્વસ્થં ઉવાચેદં દણ્ડં દમયતાં વરઃ ।
બ્રહ્મોવાચ–
વત્સ ગત્વા મહીં કૃત્સ્નાં વિચાર્ય ચ સમન્તતઃ ॥

૩૬. તપઃસ્થાનં સમાચક્ષ્વાપ્યસંસૃષ્ટચિતાનલમ્ ।
ઇત્યુક્તસ્તેન વિધિના સ દણ્ડો ધર્મધારકઃ ॥

૩૭. બ્રહ્મચારી પુમાન્ ભૂત્વા યુવા કામ ઇવાપરઃ ।
અવતીર્ય બ્રહ્મલોકાત્ આસસાદ મહીતલમ્ ॥

૩૮. ઇતસ્તતસ્સઞ્ચરતા મહતા બ્રહ્મચારિણા ।
દૃષ્ટાભૂત્ તામસી નારી સાક્ષાત્ રતિરિવાપરા ॥

૩૯. વરદાનબલાદસ્યા મોહિતો ધર્મધારકઃ ।
કિઞ્ચિત્ ઉદ્વિગ્નહૃદયઃ તામિદં વાક્યમબ્રવીત્ ॥

૪૦. આગતોऽસિ કુતો ભદ્રે ચિકીર્ષન્તી ચ કિં પુનઃ ।
કસ્ય વા દુહિતાસિ ત્વં કસ્ય વાસિ પરિગ્રહા ॥

૪૧. વિકાસયતિ મે ચિત્તં ચકોરમિવ ચન્દ્રિકા ।
સર્વં કથય મે સાધુ યાથાતથ્યેન શોભને ॥

૪૨. ઇતિ પૃષ્ટા તામસીયં તેનેદં પુનરબ્રવીત્ ।
સાધુ સુન્દર વક્ષ્યામિ શ્રુણુષ્વ વચનં મમ ॥

૪૩. વસામ્યસ્મિન્ વને શુદ્ધે રમણીતિ પ્રથાં ગતા ।
ત્વાદૃશાનાં ભાગ્યમિદં શરીરં વિદ્ધિ મામકમ્ ॥

૪૪. અનેન ત્વાં પ્રીણયિષ્યે ભોગૈશ્ચ વિવિધૈરપિ ।
એહિ સાધય મત્સ્નેહાત્ મહાભાગ્યસમન્વિતમ્ ॥

૪૫. ઇત્યુક્ત્વા પાણિના પાણિં ગૃહીત્વા બ્રહ્મચારિણમ્ ।
નીત્વ સ્વભવનં રેમે કામેનેવ રતિઃ પુરા ॥

૪૬. વસનાશનતામ્બૂલમજ્જનલેપનાદિભિઃ ।
બહુમાનૈઃ પ્રીણયન્તી તેન સાર્ધં મુદં યયૌ ॥

૪૭. તતઃ ચિરાયમાણેન તુ સ દણ્ડે ચતુરાનનઃ ।
સમાધિના વિનિશ્ચિત્ય વિષયાસક્તમાનસમ્ ॥

૪૮. શશાપ કુપિતો બ્રહ્મા દન્તાન્ સઙ્ઘર્ષયન્ મુહુઃ ।
વિસ્મૃત્ય સ્વામિકાર્યાણિ સ્વમતં યઃ પ્રસેવતે ॥

૪૯. સ પાપી યાતિ નરકં કુમ્ભીપાકં ન સંશયઃ ।
તસ્માત્ સ્વચ્છન્દવૃત્તસ્ય સ્વામિકાર્યવિરોધિનઃ ॥

૫૦. ન ભવેત્ મર્ત્યલોકસ્ય સંપ્રાપ્તિસ્તસ્ય દુર્મતેઃ ।
મહાવ્યાઘ્રી ચ સા ભૂયાત્ અકામિજનદૂષણી ॥

૫૧. તસ્મિન્ વને મહાઘોરે ક્ષુત્પિપાસાતુરા ચિરમ્ ।
યદા લોકહિતાર્થાય શામ્ભવી શક્તિરેકિકા ।

૫૨. ભૂત્વા મલયજાભ્યેતિ તામ્રપર્ણી સરિદ્વરા ।
તદા તત્તોયસંસ્પર્શાત્ પ્રકૃતિં યાતુ સા પુનઃ ॥

૫૩. સોઽપિ દણ્ડધરઃ શમ્ભુમભ્યર્ચ્ય નિયતેન્દ્રિયઃ ।
તામ્રાતીર્થે કૃતસ્નાનઃ પુનરેતુ મદન્તિકમ્ ॥

૫૪. એવં સાનુગ્રહં શપ્ત્વા તાવુભૌ ચતુરાનનઃ ।
ભૂયઃ સ્વકલશીં પ્રાહ તપઃસ્થલદિદૃક્ષયા ॥

૫૫. અયિ વત્સે ભુવં ગત્વા તેજિષ્ઠં ચિતિવર્જિતમ્ ।
સ્થલં નિશ્ચિત્ય વક્તવ્યં મા કુરુષ્વ વિલમ્બનમ્ ॥

૫૬. ઇત્થં નિયુક્તા તેનૈવ કલશી બ્રહ્મણોઽન્તિકાત્ ।
સમન્તાત્ ભુવમાલોક્ય દદર્શ ક્ષેત્રમુત્તમમ્ ॥

૫૭. અપાપમમલાકારમસ્પૃષ્ટપિતૃકાનનમ્ ।
તેજિષ્ઠં સમનુપ્રાપ્ય તત્ ક્ષેત્રં રક્ષયત્યગાત્ ॥

૫૮. તત્રૈવ વાસમકરોત્ દ્વાદશાબ્દં નિરન્તરમ્ ।

અથ વિજ્ઞાય ભગવાન્ બ્રહ્મા બ્રહ્મવિદાં વરઃ ॥

૫૯. સ્વયમભ્યાયૌ તત્ર હંસારૂઢો જ્વલન્ રુચા ।
કલશીં બહુમાન્યાગ્રે તત્ર ચક્રે તપો મહત્ ॥

૬૦. તેજોમયં હરિં સ્થાપ્ય મહામરકતપ્રભમ્ ।
શ્રીવત્સાઙ્કસમાયુક્તં કૌસ્તુભોત્ભાસિકન્ધરમ્ ॥

૬૧. પ્રસન્નવદનં શાન્તં કૌશેયામ્બરધારિણમ્ ।
એવં મૂર્તિં હરેઃ સ્થાપ્ય પૂજયામાસ ભક્તિતઃ ॥

૬૨. આત્મન્યારાધ્ય દેવેશં પુનર્બિમ્બે સમર્ચયત્ ।
યોગસિદ્ધૈઃ ચ સમ્ભારૈઃ મન્ત્રૈઃ વેદાન્તગર્ભિતૈઃ ॥

૬૩. સ્નાત્વા ત્રિષવણં વેધાઃ કલશીતીર્થવારિણિ ।
ત્રિવારં પૂજયાઞ્ચક્રે સમાધિસ્થો જિતેન્દ્રિયઃ ॥

૬૪. પૂજાન્તે પરમં સ્તોત્રં ચકારાનન્દનિર્ભરઃ ।
યસ્યૈકવારપઠનાત્ મુચ્યન્તે જન્તવો ભયાત્ ॥

૬૫. તમિદાનીં પ્રવક્ષ્યામિ સ્તુતિં સર્વાર્થસિદ્ધિદામ્ ।
શ્રુણુષ્વાત્ર મહારાજ સાવધાનેન ચેતસા ॥

ઇતિ ત્રયોદશોઽધ્યાયઃ । Pro.Total = 845 + 65 = 910.

## ચતુર્દશોઽધ્યાયઃ

બ્રહ્મકૃતઃ વિષ્ણુસ્તવઃ બ્રહ્મદત્ત–
દણ્ડધરસ્ય શાપમોચનપ્રકારઃ ચ ।

૧. બ્રહ્મા –
નમસ્તુભ્યં ભૂયસે ભૂરિધામ્ને ભૂયિષ્ઠાયાપારકરુણાય સીમ્ને ।
વ્યક્તાવ્યક્તં વિશ્વમેદં ત્વદીયં રૂપં પ્રાહુઃ પ્રાક્તનં દેવવાચઃ ॥

૨. યત્પાદાબ્જં સ્વાન્તમન્તઃપ્રકામં નિત્યાયન્તો નિર્વિશન્તઃ સમર્થાઃ ।
પારં પ્રાપુઃ નિર્વિઘાતં ભવાબ્ધેઃ તન્મે ભૂયાત્ ધામ શાન્ત્યૈ નિતાન્તમ્ ॥

૩. યેનાશેષં વ્યક્તિભેદેનવિશ્વં વારં વારં પૂર્યતે ભૂરિ ધામ્ના ।
સોઽયં મહ્યં સ્વસ્તયે સ્યાદવિઘ્નમ્ભગ્નાપાયો ભાગધેયઃ સતાં હિ ॥

૪. અઙ્ઘ્રિદ્વન્દ્વામ્ભોરુહાસન્નવાસં સૌખ્યં પ્રાહુર્મોક્ષલાભાત્ અમુષ્ય ।
તં વૈકુણ્ઠં દેવમેકં પ્રપદ્યે વિદ્યાવાપ્ત્યૈ વીતભીરાભિમુખ્યમ્ ॥

૫. વ્યાજાદસ્યાશેષબન્ધોરભિખ્યામાખ્યામુચ્ચૈરપ્યસન્ વા સ્મરન્ વા ।
તીર્ણાપાયામ્ભોનિધિર્જન્તુરાસ્તેસોઽયં દેવઃસ્વસ્તિદો મે હરિઃ સ્યાત્ ॥

૬. ઊર્ધ્વં ચાધસ્તિર્યગન્તર્બહિર્વા વ્યાપ્તં યસ્યૈકાંશતોભાતિ વિશ્વમ્ ।
પારે દુઃખં ભાવુકં મદ્વિધાનામઙ્ઘ્રિદ્વન્દ્વં ચિન્તયામ્યન્તરઙ્ગે ॥

૭. પ્રાપ્તાઃ પારં પ્રાક્તનાલાભસિન્ધોઃ કૂર્માટવ્યાંસઞ્ચરન્તશ્ચ કેચિત્ ।
નૈનં પશ્યન્ત્યાત્મસંસ્થં પુમાંસં તત્ ત્વામીડે નાથ નાલીકનેત્ર ॥

૮. પ્રાણાયામાત્ બ્રહ્મનાદાન્તવાદાત્ પ્રાયશ્ચિત્તાત્ અધ્વરાત્ આત્મબોધાત્ ।
યન્નામૈકં મોક્ષમૂલં પઠન્તિ તસ્મૈ કુર્મઃ સ્નતતં ચિત્તરત્નમ્ ॥

૯. વિહાય તારાણ્યપિ ધીરધીરાઃ સર્વાન્ ઇવાત્માકરસૌરભાણિ ।
પર્ણાશના કાનનમાશ્રયન્તે યલ્લાભહેતોઃ તમહં નતોઽસ્મિ ॥

૧૦. નતોઽસ્મિ મૂર્ધ્ના નલિનાક્ષ તે પદં વદામિ નામાન્યપિ વાગ્ભિરુચ્ચૈઃ ।
સ્મરામ્યહન્તાકલુષાસ્પૃશાહૃદા  શરણ્યમેનં શરણં વ્રજામ્યહમ્ ॥

૧૧. નિરસ્તબાહ્યેન્દ્રિયવૃત્તિનિર્મલે ન મય્યનુસ્યૂતમપાસ્તકલ્મષે ।
વિલોકયિષ્યામિ વિચિષ્ટભાવનાબલેન નાથં પ્રણવાર્થસૂચકમ્ ॥

૧૨. નમો નમઃ શાન્તગુણાય વિશેષવિજ્ઞાન ગુણપ્રકાશિને ।
નમોઽસ્તુ તુભ્યં પુરુષાય વૈ પુનઃ પરાય પારાયણધર્મશાલિનામ્ ॥

૧૩. શ્રી શઙ્ખઃ –
ઇત્થં સ્તુત્વા પુરસ્તસ્ય હરેર્નિયમમાસ્થિતઃ ।
સમાધિના વિશ્વમિદં તન્મયઃ સ વ્યલોકયત્ ॥

૧૪. એવમર્ચયતઃ તસ્ય શરદામત્યગુઃ શતમ્ ।
પૂર્ણે વર્ષશતે રાજન્ ભગવાન્ ગરુડધ્વજઃ ॥

૧૫. પ્રાદુર્ભૂતઃ તમાહૂય બ્રહ્માણં વાક્યમબ્રવીત્ ।
શ્રી ભગવાન્ –
પ્રીતોઽસ્મિ તપસા બ્રહ્મન્ દુષ્કરેણ તવાધુના ॥

૧૬. સ્તુત્યાનયા વિશેષેણ  પ્રીતોઽસ્મિ નિતરામહમ્ ।
વૈકુણ્ઠાદપિ દુગ્ધાબ્ધેઃ ત્વત્ ક્ષેત્રમિદમુત્તમમ્ ॥

૧૭. રમણીયં ભવેત્ બ્રહ્મન્ અસ્માકં નાત્ર સંશયઃ ।
કલશી વાપિકા હ્યેષા સર્વતીર્થનિષેવિતા ॥

૧૮. પાપઘ્ની ભાગ્યદા ભૂયાત્ નૃણાં યાવત્ વસુન્ધરા ।
એષા કુમ્ભાટવી નામ્ના સ્થલી વિખ્યાતિમૃચ્છતુ ॥

૧૯. અત્રત્યાનાંહિ જન્તૂનાં મુક્તિદાનાય કેવલમ્ ।
વસામિ સતતં પ્રીત્યૈ વૈકુણ્ઠભવને યથા ॥

૨૦. ઇતઃ પ્રવિશ્ય પાતાલં આનયિષ્યે ત્રયીં તવ ।
ઇત્થમાશ્વાસ્ય ભગવાન્ હરિઃ કમલસમ્ભવમ્ ॥

૨૧. પાતાલાત્ દાનવાન્ હત્વા વેદાન્ આદાય વેધસે ।
પ્રદાયાન્તરધાત્ તસ્મિન્ વને પરમપાવને ॥

૨૨. પ્રાપ્તશ્રુતિકુલસ્રષ્ટા પરમાનન્દનિર્ભરઃ ।
પુનરપ્યર્ચયામાસ ભગવન્તમધોક્ષજમ્ ॥

૨૩. તાવદભ્યાગમત્ બ્રહ્મચારી ધર્મધરો વિભુઃ ।
પ્રણિપત્યાબ્રવીત્ વાચં ચિન્તાસન્તાપગદ્ગદમ્ ॥

૨૪. દણ્ડબ્રહ્મચારી –
મય્યાનગસિ દેવેશ શાપઃ કિમનુપાતિતઃ ।
કથમ્મુક્તિર્વદાસ્માકમનન્તાત્ દુઃખસાગરાત્ ॥

૨૫. બ્રહ્મા ઉવાચ –
વત્સ મત્પાણિમિત્ર ત્વં ભૃત્યો ભક્તશ્ચ મે સુહૃત્ ।
ભવિતવ્યે કર્મફલે મૈવં શોચિતુમર્હસિ ॥

૨૬. સતામશુભસંસર્ગાત્ અશુભઃ સંપ્રભાવ્યતે ।
તત્ર ધીરા ન શોચન્તિ જડાઃ શોચન્ત્યપણ્ડિતાઃ ॥

૨૭. શીતોષ્ણસુખદુઃખાદીન્ યે સહન્તે વિપશ્ચિતઃ ।
તે યાન્તિ પરમં સૌખ્યમિતિ વેદાન્તચોદિતાઃ ॥

૨૮. ઇતઃ પરં તે વક્ષ્યામિ ક્રિયાં ચ શ્રેયસ્કરીં શુભામ્ ।
કાલેનાલ્પીયસા સાક્ષાત્ આદિશક્તિરકલ્મષા ॥

૨૯. સદાશિવસમાદિષ્ટા નદી મલયનન્દિની ।
આગમિષ્યતિ લોકાન્ ત્રીન્ પુનાના પુણ્યવાહિની ॥

૩૦. તસ્યાં સ્નાત્વા મહાનદ્યાં મામુપૈષ્યસિકેવલમ્ ।
ઇતો યોજનમાત્રેણ ક્ષેત્રમસ્તિ મહત્તરમ્ ॥

૩૧. શૌણ્ડીકરં નામ દિવ્યં યત્રાસ્તે શઙ્કરો વિભુઃ ।
તત્રાશ્રમપદં પુણ્યં ગૌતમસ્ય મહાત્મનઃ ॥

૩૨. તત્ક્ષેત્રં દૂષયન્ત્યુગ્રા સમન્તાત્ યોજનાયતમ્ ।
એકદસ્ય સુતા કાચિત્ નામ્ના કુમ્ભીનસી સ્મૃતા ॥

૩૩. શાપાત્ નિશાચરી શમ્ભોઃ ચક્રે નિર્માનુષં વનમ્ ।
વિમ્મોચયિત્વા તાં શાપાત્ તત્રારાધય શઙ્કરમ્ ॥

૩૪. યાવત્ તામ્રાભિગમનં તાવત્ તત્ર ભવિષ્યસિ ।
તદાનીમાવયોઃ સઙ્ગો ભવેત્ નાત્ર વિચારણા ॥

૩૫. એષાપિ તામસી ઘોરા વ્યાઘ્રિભૂત્વાબ્ધિરોદસિ ।
અભિભૂય ચિરં કાલં તામ્રાયાઃ સ્પર્શવૈભવાત્ ॥

૩૬. નિર્મુક્તપાપકલુષા સખી તસ્યા ભવેત્ ઇયમ્ ।
કાદમ્બરીવનમિતિ પ્રથિતાં તામુપૈષ્યતુ ॥

૩૭. વ્યાઘ્રાટવીમિતિ પુનઃ કથયન્તુ સમન્તતઃ ।
ઇત્યેવં અનુશાસ્યાર્થં બ્રહ્મા બ્રહ્મવિદાં વરઃ ।
લબ્ધવેદનિધિઃ પ્રીત્યા પ્રાયાત્ સ્વભવનં પ્રતિ ॥

ઇતિ ચતુર્દશોઽધ્યાયઃ ।    Pro.Total = 910 + 37 = 947.

## પઞ્ચદશોઽધ્યાયઃ

તામસીશાપવિમોચન મ્ ।

૧. ઋષિઃ–
એતત્ તે કથિતં રાજન્ યન્માં ત્વમિહ પૃચ્છસિ ।
કાદમ્બરીવનસ્યાસ્ય તામસ્યાશ્ચરિતં મહત્ ॥

૨. દણ્ડરાજસ્ય ચરિતમાનુપૂર્વ્યેણ ભાષિતમ્ ।
બ્રહ્માશ્રમસ્ય મહિમા કીર્તિતઃ કલુષાપહમ્ ॥

૩. શ્રુણુ ભૂયઃ કુમ્ભયોનેઃ કથં પાપનોદિનીમ્ ।
સાગરેણ સમાયોજ્ય તામ્રાં મલયસમ્ભવામ્ ॥

૪. હયગ્રીવાદ્રિમાણ્ડવ્યગૌતમાઙ્ગિરસાદિભિઃ ।
વસિષ્ઠરોમશમુખૈઃ દુર્વાસકપિલાદિભિઃ ॥

૫. અન્યૈશ્ચ મુનિશાર્દૂલૈઃ લોપામુદ્રાપતિર્મુનિઃ ।
ત્રિષુ સ્થાનેષુ તામ્રાયાઃ મુખેષ્વમ્ભોધિસઙ્ગમે ॥

૬. સ્નાત્વા દત્વા યથાન્યાયં તર્પયિત્વા પિતૄન્ સુરાન્ ।
તીર્થશ્રાદ્ધં ક્ષેત્રપિણ્ડં કૃત્વા વિધિવિદાં વરઃ ॥

૭. હરિદ્રાપિષ્ટેન તામ્રાયાઃ કૃત્વા તુ પ્રતિમાં શુભામ્ ।
ગન્ધપુષ્પાક્ષતૈર્લાજૈઃ ધૂપનીરાજનાદિભિઃ ॥

૮. પૂજયિત્વા યથાન્યાયં નૈવેદ્યૈર્વિવિધૈરપિ ।
નમસ્તે દેવિ કલ્યાણિ મહાપાતકનાશિનિ ॥

૯. તામ્રપર્ણિ ત્વયિ સ્નાસ્યે ત્રાહિ માં ભવસાગરાત્ ।
ઇતિ મન્ત્રં સમુચ્ચાર્ય પ્રાર્થયિત્વા પ્રણમ્ય ચ ॥

૧૦. પ્રતિમાં અપ્સુ નિક્ષિપ્ય પુનઃ સ્નાત્વા મુનીશ્વરઃ ।
સહ સર્વૈઃ મુનિગણૈરત્ર વાસમકલ્પયત્ ॥

૧૧. એતસ્મિન્નન્તરે ઘોરઃ સઞ્જજ્ઞે સુમહાન્ ધ્વનિઃ ।
ભિદ્યમાનસ્ય શૈલસ્ય વજ્રેણૈવ મહાત્મનઃ ॥

૧૨. મહાવાતઃ ચ સઞ્જજ્ઞે કમ્પમાનતરદ્રુમઃ ।
ચચાલ વસુધા તત્ર સશૈલવનકાનના ॥

૧૩. કિમિતિ ભ્રાન્તહૃદયા જના દુદ્રુવિરે ભયાત્ ।
ભજ્યમનતર્ઙ્ગાડબ્ધિઃ સઙ્કુચન્ ઇવ ચક્રમે ॥

૧૪. આસીત્ કલાકાલ્લાવૈઃ પૂર્ણમાસીત્ જગત્ત્રયમ્ ।
ક્રોશન્તઃ શકુના વ્યોમ્નિ મણ્ડલાનિ વિતેનિરે ॥

૧૫. વ્યોમ્નિ વૈમાનિકા સિદ્ધાઃ ન્શ્ચિતું નાપ્યશક્નુવન્ ।
તત્રાદૃશ્યત શૈલાભા વ્યાઘ્રી કનકપાટલા ॥

૧૬. સ્ફોટયન્તી મુહુઃ પુચ્છં ક્રન્દન્તી ભીષણારવમ્ ।
દારયન્તીવ વસુધાં લિહન્તીવ નભઃસ્થલમ્ ॥

૧૭. વ્યત્યાસયન્તી કકુભં સન્ધાય પુરતો મુનેઃ ।

તાં દૃષ્ટ્વા વિસ્મયાવિષ્ટઃ કુમ્ભયોનિર્મહામતિઃ ॥

૧૮. હુઙ્કારમકરોત્ ક્રોધાત્ સા ક્ષિપ્તા તેન દૂરતઃ ।
નિપપાત પયઃપૂરે વ્યાકુલા તૂલરાશિવત્ ॥

૧૯. સૈષ  તામ્રાપ્રવાહે તુ પતિતા ગિરિકૂટવત્ ।
ઉત્પપાત તથા વ્યોમ્નિ જલૌઘો મેઘવૃન્દવત્ ॥

૨૦. વિકીર્યમાણો વાનેન સમન્તાત્ વિયદન્તરે ।
અચિરાભા રવિકરૈઃ જલધૂમૈર્ઘનાકુલા ॥

૨૧. પતમાનૈર્જલકણૈઃ પ્રાવૃટ્ આવિર્ભૂત ઇવ ।
સમસર્પત્ જલૌઘઃ તુ વિન્ધ્યકૂટસમપ્રભમ્ ॥

૨૨. મુઞ્ચન્તી ઘર્ઘરારાવં ઘોરમેઘારવોપમમ્ ।
ઇતસ્તતઃ સંલુઠન્તી જહૌ વ્યાઘ્રી કલેવરમ્ ॥

૨૩. સાપ્યદૃશ્યત નાલીકનવકિઞ્જલ્કપાટલા ।
તરુણી તરુણાદિત્યકિરણાકારપિઙ્ગલા ॥

૨૪. ઉત્ફુલ્લકમલોદારા વહન્તી વરુણસ્રજમ્ ।
દિવ્યામ્બરધરા દિવ્યમણિકાઞ્ચનભૂષણા ॥

૨૫. મદમત્તારુણાપાઙ્ગા મન્દસ્મિતમુખામ્બુજા ।
અન્વેષયન્તી ભર્તારમાસસાદ ઘટોદ્ભવમ્ ॥

૨૬. બ્રહ્મન્ પ્રસીદ કારુણ્યાત્ અનાથાયાં મયિ પ્રભો ।
દુસ્સહોઽયં અનઙ્ગેષુ વિષજ્વાલાસમાગમઃ ॥

૨૭. મહાતીર્થપ્લવેનાપિ શાન્તિર્નોપૈતિ કેવલમ્ ।
યાવત્ વિપત્તિમભ્યેતિ શરીરં વિરહાગ્નિના ॥

૨૮. તાવદનુરૂપં મે કાન્તં દેહિ દયાનિધે ।
વિલપન્તીમિમામેવં દૃષ્ટ્વા નારીમતલ્લિકામ્ ॥

૨૯. સાન્ત્વપૂર્વમિદં વાક્યં વ્યાજહાર ઘટોદ્ભવઃ ।
અયિ સુશ્રોણિ ભદ્રં તે મૈવં શોચિતુમર્હસિ ॥

૩૦. તવાનુરૂપઃ તરુણઃ કામરાહસમદ્યુતિઃ ।
સમુદ્રરાજતનયઃ વીચીમાલાત્મસમ્ભવઃ ॥

૩૧. શઙ્ખરાજ ઇતિ ખ્યાતઃ ભવિતા તવ વલ્લભઃ ।
ઇત્યુક્તવતિ વૈ તસ્મિન્ મુનૌ વાતાપિવૈરિણિ ॥

૩૨. પુરાત્ અમ્બુનિધેઃ તુઙ્ગાત્ તરઙ્ગાન્ ખણ્ડયન્ ઇવ ।
ઉત્પપાત તથા શ્રીમાન્ મહામેઘાત્ ઇવાંશુમાન્ ॥

૩૩. સ્વકિઙ્કરૈઃ નાગવરૈઃ દત્યૈરપિ નિષેવિતઃ ।
મહારાજશ્રિયોપેતઃ સમાગત્ય મુનીશ્વરમ્ ॥

૩૪. અભિવાદ્ય વિનીતાત્મા પ્રીતો વચનમબ્રવીત્ ।
શઙ્ખરાજઃ –
ભગવન્ કિમિહાદૃત્ય સમાહૂતોઽસ્મિ સત્વરમ્ ॥

૩૫. શાધિ માં પ્રિયકૃત્યેષુ કર્તાહં નાત્ર સંશયઃ ।
ઇતિ વાદિનમેવૈનં કુમ્ભભૂરભ્યભાષત ॥

૩૬. અગસ્ત્યઃ-આયુષ્મન્ શઙ્ખરાજેન્દ્ર પ્રીતોઽસ્મિ તવ દર્શનાત્ ।
એષા તપસ્વિની બાલા કુલીના ચારુરૂપિણી ॥

૩૭. તવ પ્રિયા ભવેત્ ધન્યા ત્વમસ્યાઃ સદૃશઃ પતિઃ ।
શ્રેય ; તે ભવિતાનેન નાત્ર કાર્યા વિચારણા ॥

૩૮. એતસ્મિન્નન્તરે વ્યોમ્નિ વાગભૂત્ અશરીરિણી ।
એવમેવેહ કર્તવ્યં એતયોરસ્તુ મઙ્ગલમ્ ॥

૩૯. ઇતિ શ્રુત્વા વચસ્તાવત્ સર્વે તે દેવદાનવાઃ ।
સાધુ સાધ્વિતિ સંહૃષ્ટા સુવ્યક્તાં વાચમૂચિરે ॥

૪૦. પશ્યત્સુ સર્વભૂતેષુ મિલિતેષુ મહાત્મસુ ।
સા તામસી સમભ્યેત્ય શઙ્ખરાજસ્ય કન્ધરે ॥

૪૧. માલામયીં અર્પયામાસ નામ્ના મધુકરીમિમામ્ ।
તાવત્ દુન્દુભયો નેદુઃ પુષ્પવૃષ્ટિઃ પપાત ચ ॥

૪૨. તામુદ્વાહ્ય વરારોહાં શઙ્ખરાજોઽબ્ધિસમ્ભવઃ ।
શુશુભે નિતરાં રાજન્ વિદ્યામિવ નયઃ કૃતી ॥

૪૩. તાવુભૌ અનવદ્યાઙ્ગૌ રતિકામાવિવાપરૌ ।
પ્રશશંસુઃ જનાઃ સર્વે મુમુદે વિન્ધ્યમર્દનઃ ॥

૪૪. એતસ્મિન્ એવ સમયે સમાજે બ્રહ્મવાદિનામ્ ।

સા માલા શઙ્ખરાજસ્ય કન્ધરાત્ વ્યોમ્નિ જૃમ્ભતે ॥

૪૫. કિઞ્ચિત્ ઉચ્ચલિતાયાં તુ માલાયાં વ્યોમ્નિ મણ્ડલે ।
તતસ્તતઃ તુ સઞ્જાતા શતશોઽથ સહસ્રશઃ ॥

૪૬. એવમાકાશપદવી માલાશતસમાકુલા ।
પ્રબભૌ ભોગિસઙ્કીર્ણા નાગરાજપુરી યથા ॥

૪૭. તત્રૈકા શઙ્ખરાજસ્ય તામસ્યાઃ કન્ધરે તથા ।
પેતતુઃ ચ સ્રજામન્યા માલા સૂર્યસ્યવર્ત્મના ॥

૪૮. ગત્વા ધર્મધરસ્યૈવ મૂર્ધ્નિ સર્વા નિપેતતુઃ ।
દૃષ્ટ્વા તુ વિસ્મયાવિષ્ટે સસ્ત્રીકે સગરાત્મજે ॥

૪૯. નારદોભ્યેત્ય તત્ સર્વં માલોપાખ્યાનમબ્રવીત્ ।
એષા ગન્ધર્વસ્ય પત્ની તામસી નામ નામતઃ ॥

૫૦. પુરા બ્રહ્મમુખાત્ જાતા તત્દત્તાં માલિકામિમામ્ ।
લબ્ધ્વા તપશ્ચિરં તપ્ત્વા સન્તુષ્ટા પ્રાપ્ય શઙ્કરાત્ ॥

૫૧. વરાન્ પ્રાપ્ય સુભુઞ્જાના ભોગાન્ વિવિધાનપિ ।
અનુભૂય પુનઃ શાપાત્ નિર્મુક્તા તીર્થમજ્જનાત્ ॥

૫૨. સુકૃતૈઃ ત્વામનુપ્રાપ્તા ત્વઞ્ચેમાં વનિતાશ્રયામ્ ।
ઘટયિત્વા યુવામેષા ભૂયોઽગાત્ બ્રહ્મણઃ પદમ્ ॥

૫૩. ત્વયા તીરે તામ્રપર્ણ્યાઃ કૃત્વાવાસં યથોચિતમ્ ।
પૂજનીયા તામ્રપર્ણી સભાર્યેણ વિશેષતઃ ॥

૫૪. એવં પૂજયિતો નિત્યં યુવયોર્મલયાત્મજા ।
મહાભોગાનસઙ્ખ્યાતાન્ પ્રદાસ્યતિ મહેશ્વરી ॥

૫૫. એવં દેવર્ષિમુખ્યસ્ય નારદસ્યાનુશાસનમ્ ।
વહમાનઃ કિરીટેન માલામિવ સમુદ્રજઃ ॥

૫૬. તં મુનિં પ્રણિપત્યાગ્રે કૂમ્ભયોનિમુખાન્યપિ ।
સહ પત્ન્યા નમસ્કૃત્ય તીર્થદ્રીં મણિપ્રસૂમ્ ॥

૫૭. રથોત્તમં સમારુહ્ય વિમાનં કાઞ્ચનારુણમ્ ।
દાસીભિઃ નિષ્કણ્ઠીભિઃ ભૃત્યૈઃ બહુભિરન્વિતઃ ॥

૫૮. સ્તૂયમાના પથાનેન પ્રાયાત્ ઇન્દુવનં પ્રતિ ।
અર્ધયોજનમાત્રેણ મહામ્ભોધેશ્તુ પશ્ચિમે ॥

૫૯. તામ્રાયા દક્ષિણે ભાગે ચન્દ્રાટવ્યાં મહામતિ ।
નદીપુરમિતિ ખ્યાતં નિર્માય નગરં મહત્ ॥

૬૦. નિત્યમભ્યર્ચયન્ તામ્રાં શિવપૂજાપરાયણઃ ।
મુનિનાદિષ્ટમાર્ગેણ વર્તયન્ સકલાઃ ક્રિયાઃ ॥

૬૧. ચિરકાલં તયા સાર્ધં બુભુજે વિષયાન્ બહૂન્ ।
તતો વર્ષસહસ્રાન્તે તામ્રપર્ણી પ્રસાદતઃ ॥

૬૨. ભાર્યયા સહિતો યોગી બ્રહ્મલોકમવાપ્તવાન્ ।
પુનઃ શ્રુત્વા કથાં પુણ્યાં વિન્ધ્યાહઙ્કારમર્દનઃ ॥

૬૩. સમાયોજ્ય નદીમબ્ધૌ તમામન્ત્ર્ય નદીપતિમ્ ।
નિષેવ્ય સર્વતીર્થાનિ દેવાન્ ચાભ્યર્ચ્ય સર્વશઃ ॥

૬૪. હયગ્રીવમુખૈઃ સિદ્ધૈઃ અભ્યેત્ય મલયાચલમ્ ।
પ્રતિષ્ઠાપ્ય ચ ગોષ્ઠીશં તત્પ્રસાદમવાપ્ય ચ ॥

૬૫. બ્રહ્મવૃદ્ધપુરે દૃષ્ટ્વા દેવં કલ્યાણસમ્ભૃતમ્ ।
તદનુગ્રહમાસાદ્ય ભૂયો મલયમાપ સઃ ॥

૬૬. એતત્ તુ પરમં ગૃહ્યમિતિહાસં પુરાતનમ્ ।
શ્રુણુયાત્ વા પઠન્ વાપિ સર્વપાપૈઃ પ્રમુચ્યતે ॥

૬૭. એતત્ આયુષ્કરં શ્રાવ્યમાખ્યાનમઘનાશનમ્ ।
શ્રુણોતિ યઃ પઠેત્ વાપિ સર્વપાપૈઃ પ્રમુચ્યતે ॥

૬૮. એતત્ તે કથિતં રાજન્ તામ્રાયાશ્ચરિતં મહત્ ।
અલઙ્ઘનીયા હેતુઃ મલયસ્યાપિ વર્ણિતઃ ॥

૬૯. ધર્મિષ્ઠસ્ય વદાન્યસ્ય તવ સઙ્ગં મહીપતેઃ ।
મમ જાતમિદં પુણ્યં ધર્મસ્યૈવ પ્રશંસનમ્ ॥

મહારાજવિશેષેણ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥

ઇતિ પઞ્ચદશોઽધ્યાયઃ ।   Pro.Total = 947 + 69 = 1016.

## ષોડશોઽધ્યાયઃ

વેણુવનમાહાત્મ્ય મ્ ।

૧. ભગવન્ ભવતઃ સઙ્ગાત્ પાવિતોઽહં ન સંશયઃ ।
ગઙ્ગં પ્રવિશ્ય રથ્યામ્બુ ત્રીન્ લોકાન્ ન પુનાતિ કિમ્ ॥

૨. કકોઽપિ મેરુસંયોગાત્ નકિં કાઞ્ચનતાં વ્રજેત્ ।
કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ કૃતકૃત્યોઽસ્મિ કેવલમ્ ॥

૩. યથા પ્રસન્નં ત્વત્પાદપઙ્કજં દૈવયોગાતઃ ।
અપિ વાવસરં પ્રાપ્ય સૃષ્ટોઽસ્મિ ત્વદનુગ્રહાત્ ॥

૪. કિમેતિ પઞ્ચતામગ્નૌ પીયૂષાદી નરઃ ક્વચિત્ ।
વિધૂતબન્ધુવર્ગસ્ય મમાટવ્યામપિ પ્રભો ॥

૫. નિધિવત્ લબ્ધમધુના તવ પાદામ્બુજદ્વયમ્ ।
કાઙ્ક્ષિતાન્યપિ ભાગ્યાનિ ભૂયઃ પ્રાપ્સ્યે ભવન્મુખાત્ ॥

૬. એષા મલયજા પુણ્યા કલ્પવલ્લી ન સંશયઃ ।
સ્નાનાત્ સઙ્કીર્તનાત્ પાનાત્ મનનાત્ અનુવર્તનાત્ ॥

૭. પાપઘ્ની ભવપઙ્કઘ્ની ભોગદા પુણ્યદા નૃણામ્ ।
અસ્યાઃ પ્રભાવં ભૂયોઽપિ શ્રોતુમિચ્છામિ સત્ગુરો ॥

૮. વાતાપિવૈરી ભગવાન્ મુનિઃ પરમધર્મવિત્ ।
કાદમ્બરીવનાત્ અસ્માત્ નિવર્ત્ય મુનિભિસ્સહ ॥

૯. કિઞ્ચકાર મહાયોગી તીરે કુત્ર મણિપ્રસોઃ ।
કોષ્ઠીશ્વરે મહાલિઙ્ગં સ્થાપ્ય પૂજામકલ્પયત્ ॥

૧૦. કથં દૃષ્ટવાન્ શમ્ભું દેવં કલ્યાણરૂપિણમ્ ।
કાનિ તીર્થાનિ પુણ્યાનિ ક્ષેત્રાણ્યપિ તટદ્વયે ॥

૧૧. ધર્માધારઃ કથં શાપાત્ કુતો મુક્તિમવાપ સઃ ।
એતત્ સર્વમશેષેણ વદ વિસ્તાર્ય મે ગુરો ॥

૧૨. એવં શઙ્ખો મહાતેજાઃ સ કૃષ્ટઃ તેન ભૂભુજા ।
સમ્ભાવ્ય વાચા રાજાનં ભૂયો વચનમબ્રવીત્ ॥

૧૩. મહારાજ કુલશ્રેષ્ઠ ધર્મે તે મતિરીદૃશી ।

વિચિત્રં નૈવ પશ્યામિ કોકિલસ્યેવ પઞ્ચમમ્ ॥

૧૪. કુલીનં શ્રૂયતે નીતિઃ અમ્ભો નિમ્નમયત્નતઃ ।
તન્વી ચ યૂનં શ્રૂયતે પણ્ડિતં ધર્મચિન્તના ॥

૧૫. સર્વજ્ઞોઽસિ કુલીનોઽસિ ધર્મિષ્ઠોઽસિ વિશેષતઃ ।
તસ્માત્ મનીષાતે રાજન્ ધત્માત્ અન્યત્ર કિં વ્રજેત્ ॥

૧૬. પ્રશ્નેનાનેન તુષ્ટોઽસ્મિ વક્ષ્યે શ્રુણુ કથામિમામ્ ।
અબ્ધિપઃ સ મુનિશ્રેષ્ઠો હયગ્રીવાદિસંયુતઃ ॥

૧૭. તામ્રામમ્ભોધિના યોજ્ય તત્પ્રસાદમવાપ્ય ચ ।
ચન્દ્રાટવ્યાં શઙ્ખરાજં પ્રતિષ્ઠાપ્ય નદીપુરે ॥

૧૮. આવિર્ભૂતં તત્ર શમ્ભું હરિં ચારાધ્ય ભક્તિતઃ ।
તામ્રાયા ઉત્તરે તીરે માયાલાસ્યં ચ માધવમ્ ॥

૧૯. દક્ષિણે બહુલાખ્યાં શ્રીપુરે પુરુષોત્તમમ્ ।
કુમ્ભારણ્યે હરિં પૂજ્ય સૂર્યં કાશવને તથા ॥

૨૦. લાલઙ્કે શમ્બરક્ષેત્રે કાલીમભ્યર્ચ્ય સાદરમ્ ।
એકરાત્રમુષિત્વાત્ર તત્પરેઽહનિ કુમ્ભભૂઃ ॥

૨૧. કાલ્યં કર્મ સમાપ્યૈવં બ્રહ્મવૃદ્ધપુરં યયૌ ।
યત્ર શમ્ભુર્મહેશાન્યા નિત્યં સન્નિહિતો વિભુઃ ॥

૨૨. તામ્રાયાઃ પશ્ચિમે તીરે પુણ્યે વેણુવનાન્તરે ।
બ્રહ્મવૃદ્ધપુરી નામ પુરી ભુવનભૂષણા ।
૨૩. અર્ધયોજનવિસ્તારાત્ સર્વતોભદ્રસંજ્ઞિતા ।
પરાઞ્ચૈવ વિભૂતિશ્ચ દક્ષિણોત્તરતઃ તટે ॥

૨૪. સૂક્ષ્માકારે પુણ્યનદ્યૌ તયોર્મધ્યે મહાવનમ્ ।
વેણુવંશં કરીરાદ્યૈઃ સમાક્રાન્તં વનદ્રુમૈઃ ॥

૨૫. યોજનાયામવિસ્તારં કાન્તારં પરમાદ્ભુતમ્ ।
તન્મધ્યે નગરી પુણ્યા બ્રહ્મવૃદ્ધપુરાભિતા ॥

૨૬. દક્ષિણે ચોત્તરે યસ્યાઃ પ્રવર્તતે સરિદ્વરા ।
પરા શૈવાનુભૂતિશ્ચ સૂક્ષ્માકારે મહત્તરે ॥

૨૭. પરાનુભૂતિં શંસન્તિ નામતો નગરીં સુરાઃ ।

સપ્તતન્તુ સુધાયાઃ તુ રુદ્રપત્ન્યાઃ કૃતે યુગે ॥

૨૮ તપસારાધિતા દેવી સન્તુષ્ટા જગદમ્બિકા ।
અત્રૈવ દર્શયામાસ કાઞ્ચીં કમ્પાપરિષ્કૃતામ્ ॥

૨૯. અત એવ પુરીમેનાં કાઞ્ચીમાહુર્હિ દક્ષિણામ્ ।
સ્વયમત્ર મહાદેવઃ પાણ્ડ્યો ભૂત્વા નરાધિપઃ ॥

૩૦. ચકાર સન્તતં દાનં કુર્વન્ વિપ્રાન્ મહાધનાન્ ।
યત્રાસ્તે પરમા શક્તિઃ દ્વાત્રિંશદ્ધર્મવર્ધિની ॥

૩૧. સ્વયમાવિરભૂત્ યત્ર ભક્તાનન્દાય શઙ્કરઃ ।
યત્ર શેતે મહાવિષ્ણુઃ શિવમારાધયન્ વ્રતી ॥

૩૨. મહાવૃષ્ટિભયાત્ યત્ર તારકઃ શાલિશઙ્કરઃ ।
સ્વયમેવ વૃતિર્ભૂત્વા પાલયામાસ લીલયા ॥

૩૩. શાલિવાટીપુરી ચૈષા વિખ્યાતા ભુવનત્રયે ।
યત્ર દુર્ગા ભગવતી દેવમારાધ્ય વર્તતે ॥

૩૪. યત્ર ભિક્ષામટત્યદ્ધા વીથ્યાં વીથ્યાં ઉમાપતિઃ ।
મહાકઙ્કાલરૂપેણ ભક્તાનાં હિતકામ્યયા ॥

૩૫. શાર્દૂલભક્ષિતાં યત્ર તરુણીં વનગહ્વરે ।
પુનઃ પ્રાદાત્ શિવઃ પ્રીત્યા બ્રાહ્મણાય મહાત્મને ॥

૩૬. તત્ એતત્ અદ્ભુતં ક્ષેત્રં બ્રહ્મવૃદ્ધપુરં મહત્ ।
સંપ્રાપ્ય વિન્ધ્યમથનઃ મુનિભિઃ બ્રહ્મવાદિભિઃ ॥

૩૭. સ્નાત્વૈવોત્તરવાહિન્યામગસ્ત્યો નિયમાન્વિતઃ ।
તર્પયિત્વા પિતૄન્ દેવાન્ ઋષીન્ ચૈવ યથાવિધિ ॥

૩૮. નમસ્કૃત્વા તામ્રપર્ણીં યથાર્હં તીર્થદેવતામ્ ।
મહાવિષ્ણુવનેશાનં દેવીં કાન્તિમતીમપિ ॥

૩૯. પૂજયિત્વોપકરણૈઃ ગન્ધપુષ્પાક્ષતાદિભિઃ ।
શયાનં શેષપર્યઙ્કે ભગવન્તં પ્રણમ્ય ચ ॥

૪૦. દુર્ગાં વિનાયકં ચૈવ કઙ્કાલં ષણ્મુખં તથા ।
સમભ્યર્ચ્ય યથાન્યાયં કન્યાં/કમ્પાં કલ્યાણપીઠિકામ્ ॥

૪૧. માધ્યાહ્નિકસ્નાનવિધિં મહાપુષ્કરિનીજલે ।
કૃત્વાગસ્ત્યો મહાતેજાઃ લોપામુદ્રાસમન્વિતઃ ॥

૪૨. હયગ્રીવમુખૈઃ સાર્ધં ચક્રે ક્ષેત્રોપવાસકમ્ ।
સ્વર્ણપુષ્કરિણીતીરે કાન્તિમત્યાશ્ચ સન્નિધૌ ॥

૪૩. નિનાય રજનીમેકાં વિચિત્રૈશ્ચ કથારસૈઃ ।
તથોષસ્યુપવૃત્તાયામુદિતેસવિતર્યથ ॥

૪૪. કૃતપૂર્વાહ્નિકવિધિઃ તસ્મિન્ તીર્થે મહામતિઃ ।
અભ્યાયયૌ ઋષિગણૈઃ દેવદેવસ્યસન્નિધૌ ॥

૪૫. વરુણઃ તનયૈઃ સાર્ધં તત્ર તુમ્બુરુણા સહ ।
આજગામ મહાતેજાઃ સિદ્ધૈર્બહુભિરાવૃતઃ ॥

૪૬. એતસ્મિન્ અન્તરે રાજન્ દિશ્યુદીચ્યાં મહાસ્વનઃ ।
ઉદભૂત્ ઉત્પટારાવૈઃ ભેરીપટહનિસ્સ્વનૈઃ ॥

૪૭. તવદાવિરભૂત્ શમ્ભુઃ ગગને ભાનુમાન્ ઇવ ।
કૈલાસશ‍ૃઙ્ગસઙ્કાશં વૃષમારુહ્ય ભાસ્વરમ્ ॥

૪૮. અઙ્કેનાદાય ગિરિજાં તરુણીં લોકમાતરમ્ ।
ગઙ્ગાધરઃ શશિધરઃ શઙ્ખમૌક્તિકપાણ્ડુરઃ ॥

૪૯. કોટિકન્દર્પલાવણ્યકલ્લોલિતકલેવરઃ ।
મહામાણિક્યખચિતતપ્તહાટકભૂષણૈઃ ॥

૫૦. કિરીટકટકાદ્યૈઃ ચ વલયાઙ્ગદભૂષણૈઃ ।
કસ્તૂરીચર્ચિત ઇવ શિતિમ્ના કણ્ઠરોચિષા ॥

૫૧. શુભ્રવર્ણતયા કિઞ્ચિત્ ઘનસારાનુલેપનમ્ ।
ચૂડામણિશશાઙ્કાર્ધપીયૂષૈઃ ચન્દનૈરિવ ॥

૫૨. ભૂષામણિમયૂખૈઃ ચ કુઙ્કુમૈરિવ સન્તતૈઃ ।
પરસ્પરાનુરૂપાભ્યાં રૂપાભ્યાં યૌવનશ્રિયમ્ ॥

૫૩. પુષ્ણન્તૌ લોકમુભયમનાદિ મિથુનાવુભૌ ।
આવિરાસ્તાં વૃષારૂઢૌ તસ્મિન્ વેણુવનાન્તરે ॥

૫૪. સમન્તતઃ સંપ્રહૃષ્ટૈઃ ભૂતપ્રમથગુહ્યકૈઃ ।
નન્દિભૃઙ્ગિમુખૈરન્યૈઃ ગણેશસ્કન્દચણ્ડકૈઃ ॥

૫૫. બ્રહ્મવિષ્ણુમુખૈઃ શૈવસિદ્ધૈશ્ચ પરમર્ષિભિઃ ।
સેવ્યમાનં મહાદેવં દદર્શ પરિતો મુનિઃ ॥

૫૬. વૈમાનિકૈઃ સિદ્ધગણૈઃ દેવૈઃ ઇન્દ્રપુરોગમૈઃ ।
સઙ્ઘષમભવત્ વ્યોમ મહદેવગણૈરપિ ॥

૫૭. દેવદુન્દુભિનિર્ઘોષૈઃ નાનાવાદિત્રનિસ્સ્વનૈઃ ।
સિદ્ધાનાં સ્તુતિનાદૈશ્ચ તુમુલઃ સમપદ્યત ॥

૫૮. ગઙ્ગાદ્યાઃ સરિતઃ તત્ર તીર્થાનિ ચ મહાન્ત્યપિ ।
સરિતઃ સાગરાસ્સર્વે સમાજગ્મુરિતસ્તત ॥

૫૯. વિન્ધ્યમન્થરમેર્વાદ્યૈઃ પર્વતાશ્ચ સમુત્સુકાઃ ।
આજગ્મુરખિલાસ્તત્ર બિભ્રાણા માનુષીં તનુમ્ ॥

૬૦. એવમભ્યાગતેષ્વેષુ દેવેન સહ શૂલિના ।
મમજ્જુઃ કુસુમાન્યત્રવિકિરન્તઃ સુરાસુરાઃ ॥

૬૧. અસ્યામુત્તરવાહિન્યાં તામ્રાયાં શિવસન્નિધૌ ।
ગઙ્ગાદ્યાઃ સરિતઃ તત્ર કિરન્તઃ કુસુમોચ્ચયમ્ ॥

૬૨. ભાવયન્તઃ તથાત્માનં મમજ્જુઃ તીર્થવારિણિ ।
ઇતસ્તતઃ ક્ષિપ્યમાણૈઃ અમરૈઃ કુસુમોત્કરૈઃ ॥

૬૩. સઞ્છન્નમભવત્ ક્ષેત્રં સર્વતો યોજનાવૃતમ્ ।
પારિજાતસમુદ્ભૂતૈઃ સુગન્ધૈઃ પુષ્પસઞ્ચયૈઃ ॥

૬૪. સઞ્છન્નપૂરા રુરુચે ચિત્રામ્બરધરા યથા ।
મકરન્દૈઃ પરાગૈશ્ચ હરિચન્દનરઞ્જિતા ॥

૬૫. એવમાશ્ચર્યજનનીં મહાપાતકનાશિનીમ્ ।
અભિષ્ટૂય નદીમેનાં અભિસસ્નુઃ સુરાસુરાઃ ॥

૬૬. મુકુન્દેન્દ્રબ્રહ્મમુખૈઃ પૂજ્યમાનઃ સદાશિવઃ ।
ઉપસ્પૃશ્ય નદીતોયં ઉપગૂહ્ય સ્વવલ્લભમ્ ॥

૬૭. કૈલાસશિખરાકારં વિવેશ ભવનં સુખમ્ ।
તતો હર્ષસમાયુક્તઃ સ મુનિઃ કુમ્ભસમ્ભવઃ ॥

૬૮. દેવં પ્રદક્ષિણીકૃત્ય નમસ્કૃત્ય મુહુર્મુહુઃ ।

આનન્દબાષ્પપૂરાભ્યાં નેત્રાભ્યામવલોકયન્ ॥

૬૯. કિઞ્ચિત્ પ્રહ્વતનુઃ તિષ્ઠન્ મૂર્છામુકુલિતાઞ્જલિઃ ।
ઉન્નિદ્રરોમનિકરૈઃ વ્યક્તીકૃતમનોરથઃ ॥

૭૦. હર્ષગદ્ગદયા વાચા સ્તોતુમુપચક્રમે ।
અગસ્ત્યઃ –
નમઃ કલ્યાણવેષાય કલિકલ્મષનાશિને ॥

૭૧. નમો વિહારિણે વિશ્વવિબુધાનાં હૃદયઙ્ગણે ।
નમઃ સ્વાન્તનિવાસાય શાન્તાનાં સમચેતસામ્ ॥

૭૨. અસાધારણકૃત્યાય નમસ્તે કૃત્તિવાસસે ।
નીલગ્રીવાય નિત્યાય નિસ્સમાસ્યુદયાત્મને ॥

૭૩. પરવામામાર્ધવપુષે નમઃ ક્ષેમઙ્કરાય તે ।
અર્ધં મરકતાકારમર્ધંસ્ફટિકસન્નિભમ્ ॥

૭૪. અદ્વૈતમપિ યત્તેજો દ્વૈતીભૂતં નમો નમઃ ।
કાન્તં કલ્યાણનિલયં કલિતાશેષકૌતુકમ્ ॥

૭૫. કન્દર્પકોટિલાવણ્યં યુવાનં સામ્બમીશ્વરમ્ ।
મઙ્ગલાય મહસ્તોમપ્રસ્તુતાશ્ચર્યરૂપિણે ॥

૭૬. ગૌરીનાથાય નાથાય નમસ્સોમાર્ધધારિણે ।
શિવાય પરિપૂર્ણાય પૂર્ણાનન્દાય વેધસે ॥

૭૭. મહાવૃષભવાહાય મહાદેવાય તે નમઃ ।
શૂલિને નીલકણ્ઠાય ભાલચન્દ્રાવતંસિને ॥

૭૮. ભવાય ભવનાશાય પશૂનાં પતયે નમઃ ।
જય નાથ કૃપાદૃષ્ટ્યા વત્સં સેચય માં પ્રભો ॥

૭૯. મા મુઞ્ચ પાદયુગલાત્ અનાથં ત્વત્પરિગ્રહમ્ ।
એકસ્માત્ આગસો દ્વાભ્યાં ત્રિભ્યો વા રક્ષ માં મુહુઃ ॥

૮૦. બહુભ્યો હિ મહાદેવ માં પાહિ કરુણાનિધે ।
ત્વત્સન્નિધિવિધાનેન હૃષ્ટોઽસ્મિ નિતરાં વિભો ॥

૮૧. આહ્લાદય કૃપાદૃષ્ટ્યા વૃષ્ટ્યા ભુવમિવામ્બુદઃ ।
ઘર્મતપ્તોઽધ્વગોધ્વાનમતીત્ય બહુયોજનમ્ ॥

૮૨. અઙ્ઘ્રિપઙ્કેરુહચ્છાયમાપ્તં પાહિ જગદ્ગુરો ।
નવેમિ ત્વત્પદામ્ભોજાત્ અપરં દૈવતં પરમ્ ॥

૮૩. અત એવ મહાદેવ ત્વામસ્મિ શરણં ગતઃ ।
પ્રસીદ ગૌરીનાથ ત્વં પ્રસીદ ગિરિજાપતે ॥

૮૪. પ્રસીદ સતતં મહ્યં નાથ કાન્તિમતીપતે ।
નમો વેણુવનેશાય મહાકલ્યાણરૂપિણે ॥

૭૫. હાટકામ્ભોજિનીતીરવાસિને શૂલિને નમઃ ।
તામ્રાતરઙ્ગસઙ્ક્લિન્નપાદામ્ભોજાય તે નમઃ ॥

૮૬. બ્રહ્મવૃદ્ધપુરીશાય પૂર્વપૂર્વાય તે નમઃ ।
ઇત્થં સ્તુત્વા મહાદેવં કુમ્ભયોનિઃ સ્વભાર્યયા ॥

૮૭. આનન્દમન્થરો બાષ્પલોલવ્યાકુલલોચનઃ ।
પપાત પાદયોર્ભક્ત્યા પશ્યતાં ત્રિદિવૌકસામ્ ॥

૮૮. કરુણાસાગરો દેવઃ તમુત્થાપ્ય મહામુનિમ્ ।
પરિમૃજ્ય સ્વપાણિભ્યાં પ્રેમ્ણા ચાભાષ્ય શઙ્કરઃ ॥

૮૯. મેઘગમ્ભીરયા વાચા વ્યાજહાર મહેશ્વરઃ ।
શ્રી સદાશિવઃ –
સન્તુ ભદ્રાણિ વિપ્રેન્દ્ર શાશ્વતાનિ તવાધુના ॥

૯૦. પ્રીતોઽસ્મિ તવ કૃત્યેન સ્તોત્રેણાનેન ભૂયસા ।
તવ પ્રિયાર્થં દાતું મે નાલં લોકાઃ ચતુર્દશ ॥

૯૧. ત્વમેવાસ્મ્યહમવ્યાજ ત્વં ચાપ્યહમસિ ધ્રુવમ્ ।
આવયોર્નૈવ ભેદોસ્તિ યથા પુષ્પસુગન્ધયોઃ ॥

૯૨. ઇતઃ પરં કુમ્ભયોને કર્તવ્યં શ્રુણુ મત્પ્રિયમ્ ।
ઇતઃ પશ્ચિમભાગે તુ ગત્વા યોજનમાત્રકમ્ ॥

૯૩. ગૌતમસ્યાશ્રમં પુણ્યં ક્ષેત્રે શૌણ્ડીરકાહ્વયે ।
તત્રાસ્તિ મામકં લિઙ્ગં તત્રાભ્યર્ચ્ય યથાવિધિ ॥

૯૪. ધર્માધારાય દણ્ડાય સ્થાનં કૃત્વા મદાજ્ઞયા ।
તસ્માત્ પશ્ચિમભાગે તુ ક્રોશમાત્રે મહામતે ॥

૯૫. મહદામલાખ્યં ક્ષેત્રં ગૌતમસ્ય મહામુનેઃ ।
તત્ર કાચિત્ કુણ્ડનામ્ની રાક્ષસી ઘોરરૂપિણી ॥

૯૬. કોલાકારાવનં સર્વં નિર્માનુષમકારયત્ ।
તાં નિગૃહ્ય દુરાધર્ષાં રાક્ષસીં કામચારિણીમ્ ॥

૯૭. તત્ર લિઙ્ગં પ્રતિષ્ઠાપ્ય લોકાનાં હિતકામ્યયા ।
પૂજાં કૃત્વા યથાશાસ્ત્રં પ્રાપ્ય સર્વં મનોગતમ્ ॥

૯૮. તતો ગુપ્તગિરિં ગત્વા સ્વાશ્રમે સ્વર્ગસન્નિભે ।
માં ઉમાં ચ યથાભક્ત્યાભ્યર્ચયાનો નિરન્તરમ્ ॥

૯૯. તામ્રપર્ણ્યા ચ સહિતઃ ત્રીન્ લોકાન્ પાતુમર્હસિ ।
અયિ વત્સે રાજપુત્રિ ભર્તારમનુવર્તિની ॥

૧૦૦. શ્રેયાંસિ લપ્સ્યસે નૂનં દુર્લભાનિ પદે પદે ।
ઇત્યાશ્વસ્ય મુનિં દેવો લોપામુદ્રાં ચ તત્પ્રિયામ્ ।
ભૂયો મુનિવરં પ્રીત્યા પ્રવક્તુમુપચક્રમે ॥

ઇતિ ષોડશોઽધ્યાયઃ । Pro.Total = 1016 + 100 =1116.

## સપ્તદશોઽધ્યાયઃ

ગૌતમાશ્રમે અગસ્ત્યાગમને રાક્ષસીપૈશાચયોઃ મોચનં સુરેન્દ્રમોક્ષાદિ
તીર્થવૈભવકથનપૂર્વકં અગસ્ત્યકૃતપુટાર્જુનેશ્વરસ્તુતિઃ ।

૧. શ્રી સદાશિવઃ –
શ્રુણુ બ્રહ્મન્ પ્રવક્ષ્યામિ શ્રેયસે જગતાં પુનઃ ।
એતત્ હિ પરમં ક્ષેત્રં મામકં બ્રહ્મસંજ્ઞકમ્ ॥

૨. દર્શનાત્ એવ જન્તૂનાં ભોગમોક્ષૈકસાધનમ્ ।
અસ્યામુત્તરવાહિન્યાન્તામ્રાયાં ચ વિશેષતઃ ॥

૩. ક્ષિપ્તપુષ્પકલં નામ તીર્થં પરમપાવનમ્ ।
યે મજ્જન્તિ પિબન્ત્યમ્ભઃ તેષાં મોક્ષો ન સંશયઃ ॥

૪. તત્તીર્થકણિકા યેન પીતા મૂર્ધ્નિ ધૃતાપિ વા ।
સ મે પ્રિયતમો જ્ઞેયો મત્સાયુજ્યૈકભાજનમ્ ॥

૫. ક્ષિપ્તપુષ્પવતીતીર્થે સ્નાત્વા માં વરદં વિભુમ્ ।

પશ્યન્તિ તેષાં મર્ત્યાનાં ન માતુર્ગર્ભસંશ્રયઃ ॥

૬. ક્ષિપ્તપુષ્પવતીતીર્થે સ્વર્ણપુષ્કરિણીપયઃ ।
જ્યોતિર્લિઙ્ગાર્ચનં ચૈવ મત્ રૂપસ્ય ચ દર્શનમ્ ॥

૭. કાન્તિમત્યાઃ પદદ્વન્દ્વે નમસ્યા પુરુષોત્તમે ।
એતાનિ મુક્તિલોકસ્ય સાક્ષાત્ સોપાન પદ્ધતિઃ ॥

૮. પશ્યન્તિ મામકં ક્ષેત્રં મન્સા ચક્ષુષાપિ વા ।
તેષાં નિયન્તા નૈવ સ્યાત્ મુને વૈવસ્વતો યમઃ ॥

૯. અત્ર જપ્તં હુતં દત્તં તદનન્તફલં સ્મૃતમ્ ।
પરાયાશ્ચ વિભૂતેઃ ચ તામ્રાયાઃ ચોલપસ્ય ચ ॥

૧૦. અન્તરાલં જગત્ બ્રહ્મક્ષેત્રં જ્યોતિર્મયં ધ્રુવમ્ ।
મ્રિયન્તે જન્તવઃ તે તુ દેવિ મુક્તા ન સંશયઃ ॥

૧૧. વિનશ્યન્તિ હિ પાપાનિ મહાભૈરવશાસનાત્ ।
તસ્માત્ નૈવ ત્યજેત્ ક્ષેત્રં મુક્તિકામઃ પ્રયત્નતઃ ॥

૧૨. કુમ્ભયોને ત્વમનયાધર્મપત્ન્યા સમન્વિતઃ ।
પ્રતિવર્ષં સમાગત્ય ચૈત્રે માસિ વિશેષતઃ ॥

૧૩. સઙ્ક્રમે પૂર્ણિમાસ્યાં તુ મામર્ચયિતુમર્હસિ ।
એવં તમનુશાસ્યાત્ર કુમ્ભયોનિં સદાશિવઃ ॥

૧૪. માલાં મણિમયીં અસ્મૈ દત્વા ચૂડામણિં તથા ।
સમાલિઙ્ગ્ય ભુજાભ્યાં તુ પ્રેષયામાસ શઙ્કરઃ ॥

૧૫. મહારત્નાનિ સંપ્રાપ્ય કાન્તિમત્યા પ્રસાદતઃ ।
લોપામુદ્રા ધર્મપત્ની સંપ્રાપ પરમાં શ્રિયમ્ ॥

૧૬. વરાન્ સંપ્રાપ્ય બહુલાન્ સંપ્રહૃષ્ટઃ સ્વભાર્યયા ।
શિવં પ્રદક્ષિણીકૃત્ય દેવીં ચ જગદમ્બિકામ્ ॥

૧૭. હયગ્રીવમુખૈર્વિપ્રૈઃ આરુરોહ રથં પુનઃ ।
આમન્ત્ર્ય દેવાન્ સિદ્ધાન્ ચ નન્દિભૃઙ્ગિમુખાન્યપિ ॥

૧૮. હરિં પ્રનમ્ય પ્રયયૌ સરથઃ પશ્ચિમાં દિશમ્ ।
દેવાન્ પ્રસ્થાપ્ય દેવોઽપિ તત્રૈવ શિવયા સહ ॥

૧૯. અદ્યાપિ વસતે નિત્યં વરદઃ સર્વદેહિનામ્ ।
એવં વેણુવનાત્ તસ્માત્ નિર્ગત્ય કલશોદ્ભવઃ ॥

૨૦. દેવદેવં મહત્ રૂપં ક્ષેત્રં ચ પરમાદ્ભુતમ્ ।
સ્મૃત્વા સ્મૃત્વા સ્વાન્તરઙ્ગે દેવં કલ્યાણસમ્ભૃતમ્ ॥

૨૧. જગામ પરમામાશાં વારુણીં વરુણોપમઃ ।
સિદ્ધૈઃ ગીતાનિ પુણ્યાનિ તામ્રાયાઃ ચરિતાનિ વૈ ॥

૨૨. સ્વાનિ પુણ્યાપદાનાનિ મુનિઃ શ‍ૃણ્વન્ મહાન્ત્યપિ ।
બદ્ધાઞ્જલિપુટં લોકમનુગૃહ્યાક્ષિકોણતઃ ॥

૨૩. ગૌતમશ્રમં પુણ્યં પ્રવિવેશ મહામુનિઃ ।
આશ્રમાત્ પૂર્વભાગે તુ પતિતં પર્વતોપમમ્ ॥

૨૪. કલેવરં સમાલોક્ય લોપામુદ્રાતિવિસ્મિતા ।
પ્રાઞ્જલિર્મુનિશાર્દૂલં ભર્તારમિદમબ્રવીત્ ॥

૨૫. લોપામુદ્રા –
બ્રહ્મન્ કિમેતદાશ્ચર્યં પર્વતાકારદર્સનમ્ ।
કલેવરમિવાભાતિ કસ્યેદમિ કથ્યતામ્ ॥

૨૬. અગસ્ત્યઃ –
શ્રુણુ પૂર્વતનં ભદ્રે વૃત્તાન્તં રોમહર્ષણમ્ ।
એકતસ્ય મુનેરાસીત્ સત્યાયાઃ કાપિ કન્યકા ॥

૨૭. નામ્ના કુમ્ભીનસી ખ્યાતા રૂપેણાપ્રતિમા ભુવિ ।
સર્વજ્ઞા ધર્મશીલા ચ પિતૄન્ શુશ્રૂષણે રતા ॥

૨૮. ક્રીડન્તી વિપિને બાલા મેઘે વિદુલ્લતા યથા ।
ચચાર પુષ્પોચ્ચયં કુર્વાણા સા તતસ્તતઃ ॥

૨૯. દદર્શ ગૌતમસુતં બાલકં બ્રહ્મચારિણમ્ ।
તાવુભૌ સ્નેહસમ્પન્નૌ સમાભાષ્ય પરસ્પરમ્ ॥

૩૦. ચેરતુઃ વિપિનોદ્દેશે ક્રીડાવૈશિષ્યવેદિનૌ ।
ક્વચિત્ પુષ્પૈઃ ક્વચિત્ પત્રૈઃ ક્વચિત્ પુત્તલિકાપરૈઃ ॥

૩૧. ગૃહારામાદિકં ગત્વા સૈકતેષુ સમુત્સુકૌ ।
શતાનન્દં સમાહૂય કન્યા વચનમબ્રવીત્ ॥

૩૨. ત્વમત્ર ચ ગૃહી ભૂયાઃ ગૃહિણ્યસ્મિ મહામતે ।
ત્વમગ્નૌ જુહુતીશાનમભ્યર્ચ્ય વિધાનતઃ ॥

૩૩. પચામ્યન્નમહં સમ્યક્ નાનાવ્યઞ્જનસંયુતમ્ ।
ઇત્યેકાગ્રધિયા સર્વં ચક્રતુઃ પ્રીતિપૂર્વકમ્ ॥

૩૪. ઔપાસનં વૈશ્વદેવં પઞ્ચયજ્ઞક્રિયામપિ ।
દેવપૂજાં તથા કૃત્વા તથાપ્યતિથિસત્ક્રિયામ્ ॥

૩૫. શયનં ભોજનં ચૈવ યોગ્યં ચૈવ મૃષાક્રિયૌ ।
સમુત્સુકૌ પ્રીતિયુતૌ વિધાય સહ કૌતુકાત્ ॥

૩૬. વને વિક્રીડતોરેવં મહાન્ કાલોઽપ્યવર્તત ।
તાવન્મહામુનિશ્શ્રીમાન્ ગૌતમઃ તપસાં નિધિઃ ॥

૩૭. વૈશ્વદેવાદિકં કૃત્વા ભોજનાય નિજાત્મજમ્ ।
આજુહાવાશ્રમદ્વારિ સોઽપ્યગાત્ ભયવિહ્વલઃ ॥

૩૮. તં દૃષ્ટ્વા વ્રતવિભ્રષ્ટં નિસ્તેજસમમું મુનિઃ ।
જ્ઞાત્વા સર્વં જ્ઞાનદૃષ્ટ્યા કોપાત્ તમભાષત ॥

૩૯. ગૌતમઃ –
દુર્બુદ્ધે કુત્સિતં કર્મ કૃતવાનસિ બાલિશ ।
તસ્માત્ પિશાચભૂતસ્ત્વં વને વસ્તુમિહાર્હસિ ॥

૪૦. યથા તામ્રાનદીતોયબિન્દુભિર્યુજ્યસે ભવાન્ ।
તાવત્ વિમુક્તશાપસ્તુ મામ્ભ્યેતું ત્વમર્હસિ ॥

૪૧. યા સા કુમ્ભીનસી પાપમેવં કૃતવતી કિલ ।
તસ્માત્ અસ્મિન્ વને ઘોરા રાક્ષસી વિચરિષ્યતુ ॥

૪૨. યથા ધર્મધરો દણ્ડઃ પતત્યસ્મિન્ વને શુભે ।
તસ્ય સ્પર્શનમાત્રેણ શરીરં શૈલસન્નિભમ્ ॥

૪૩. પતિષ્યતે નિશાચર્યાઃ તત્ ભૂયઃ તીર્થસઙ્ગમાત્ ।
સ્વરૂપં યાતુ કલ્યાણં તત્ર શ્રેયો ભવિષ્યતિ ॥

૪૪. ઇત્યુક્ત્વા તાવુભૌ ક્રોધાત્ ગૌતમો મુનિસત્તમઃ ।
સભાર્યઃ સાગ્નિહોત્રઃ ચ હિમાદ્રૌ વસતિં વ્યધાત્ ॥

૪૫. ઇત્થં પ્રવર્તમાનાયાં ગતાયાં તત્ર કાનને ।

આજગામ મહાવેગાત્ બાલઃ પૈશાચતાં ગતઃ ॥

૪૬. કલશેન સમાનીય તામ્રાયાઃ તીર્થમુત્તમમ્ ।
પ્રોક્ષયામાસ ભગવાન્ કુમ્ભયોનિર્મુદાન્વિતઃ ॥

૪૭. યદમ્ભઃકણસંયોગાત્ બ્રહ્મચારી મુનેસ્સુતઃ ।
નિર્મુક્તશાપસ્સહસા પ્રકૃતિં પ્રત્યપદ્યત ॥

૪૮. બ્રહ્મદણ્ડાહતે દેહે સઙ્ક્લિન્ને તીર્થવારિણા ।
વિમુક્તશાપા સા બાલાભુદતિષ્ઠન્મનોરમા ॥

૪૯. બ્રહ્મદણ્ડોઽપિ તાં હત્વા રાક્ષસીં ઘોરદર્શનામ્ ।
સ્નાત્વા મલયજાતીર્થે શાપમુક્તોઽભવત્ તથા ॥

૫૦. એકતઃગૌતમશ્ચાપિ સાગ્નિહોત્રપુરસ્કૃતઃ ।
અભ્યાયાતાં મહાત્માનૌ યત્રાસ્તે કુમ્ભસમ્ભવઃ ॥

૫૧. તથાન્યોન્યમભિષ્ટૂય બભૂવુઃ પ્રીતમાનસાઃ ।
ગૌતમઃ –
કુમ્ભયોને મહાભાગ ત્વમેવ જગતાં ગુરુઃ ॥

૫૨. એનામાનયતા તામ્રાં ભવતા ભવહારિણીમ્ ।
મહીયં મહતી જાતા સ્વર્ગાત્ અપિ ગરીયસી ॥

૫૩. ત્વયા વિશ્વમિદં પાપાત્ પરિત્રાતં ન સંશયઃ ।
દેવાશ્ચ ઋષયસ્સર્વે ત્વયિ તુષ્ટાઃ સનાતનાઃ ॥

૫૪. શિવક્ષેત્રમિદં પુણ્યમાશ્રમં મામકં પુરમ્ ।
એભિઃ આગત્ય મુનિભિઃ ત્વયા નિષ્કણ્ટકિકૃતમ્ ॥

૫૫. એષ માણવકો વત્સઃ શાપાત્ મુક્તઃ ત્વયા મુને ।
મત્પુત્રઃ પાલનીયસ્તે પુત્રવત્ બાલ્ય એવ સઃ ॥

૫૬. એષાપિ તનયા બાલા હ્યેકતસ્ય મહામુનેઃ ।
તારિતા શાપનિર્બન્ધાત્ ત્વયા સર્વહિતાત્મના ॥

૫૭. અયં ધર્મધરો નામ દણ્ડો પૈતામહો મહાન્ ।
અસ્ય ક્ષેત્રસ્ય રક્ષાર્થમાગતો દેવચોદિતઃ ॥

૫૮. એભિસ્સર્વમુનિશ્રેષ્ઠૈઃ વસ્તવ્યં ભવતા મુને ।
ઇત્થમુક્ત્વાભિવન્દ્યૈતાન્ મુનીન્પીતિપૂર્વકમ્ ॥

૫૯. સ્વપુત્રં ચ પરિષ્વજ્ય મૂર્ધ્ન્યુપાઘ્રાય હૃષ્ટધીઃ ।
સન્તોષં પરમં પ્રાપ શશાઙ્કમિવ વારિધિઃ ॥

૬૦. એકતોઽપિ સ્વતનયાં સમાશ્વાસ્ય તયા યયૌ ।
એકતો ગૌતમઃ ચૈવ બ્રહ્મદણ્ડશ્ચ ધર્મધૃત્ ॥

૬૧. કુમ્ભસમ્ભવસંયુક્તૌ જગ્મતુઃ નિજમાશ્રમમ્ ।
એવં તુ મુનિશાર્દૂલૈઃ અન્વિતઃ કુમ્ભસમ્ભવઃ ॥

૬૨. પ્રવિવેશ મુદાયુક્તઃ ક્ષેત્રં શૌણ્ડીરકાહ્વયમ્ ।
ઇન્દ્રપાદપગર્ભસ્થં શામ્ભવં લિઙ્ગમદ્ભુતમ્ ॥

૬૩. દદર્શ પર્માનન્દં કન્દર્પાકારવિગ્રહમ્ ।
તપઃફલમિવાશેષસારભૂતમિવાઙ્કુરમ્ ॥

૬૪. દીપ્યમાનમિવાદિત્યં કૌસ્તુભાત્ ઇવ કૌસ્તુભમ્ ।
દુગ્ધાબ્ધિમથનોદ્ભૂતસુધાપિણ્ડમિવોત્થિતમ્ ॥

૬૫. અશેષોપનિષદ્ગર્ભગૃહદીપાઙ્કુરં પરમ્ ।
મહેન્દ્રતરુગર્ભસ્થં લિઙ્ગમાલોક્ય વિસ્મિતઃ ॥

૬૬. તસ્ય પશ્ચિમભાગે તુ ગજેન્દ્રં નામ મોક્ષદમ્ ।
તત્ દૃષ્ટ્વા તીર્થરાજં ચ કૃતકૃત્યોઽભવન્મુનિઃ ॥

૬૭. તસ્ય દક્ષિણભાગે તુ તીર્થં ગૌતમસંજ્ઞિતમ્ ।
યત્રેશ્વરાજ્ઞયા પ્રાપુઃ તીર્થાનાં મણ્ડલં રવેઃ ॥

૬૮. તત્ર સ્નાત્વા મુનિવરૈઃ અભિતઃ કુમ્ભસમ્ભવઃ ।
તર્પયિત્વા પિતૄન્ દેવાન્ ઋષીન્ ચ સહ ભાર્યયા ॥

૬૯. તસ્માત્ દક્ષિણતઃ કિઞ્ચિત્ તીર્થં પૈશાચમોચનમ્ ।
યત્ર સ્નાતા નરાસ્સર્વે ન પશ્યન્તિ યમાલયમ્ ॥

૭૦. તસ્ય દક્ષિણભાગે તુ તીર્થં તેજઃકરમ્બિતમ્ ।
શ્રીદણ્ડપાવનં નામ મહાપાતકનાશનમ્ ॥ અ
૭૧. યેઽત્ર મજ્જન્તિ નિયતા જન્તવો મોક્ષભાગિનઃ ।
સર્વાન્ કામાનવાપ્યેહ મુક્તિમન્તે વ્રજન્તિ હિ ॥

૭૨. તસ્ય દક્ષિણભાગે તુ તામ્રપર્ણ્યા મહાનદ્ ।

ઘટના સઙ્ગતા યત્ર તત્ર સ્નાનાત્ મહત્ ફલમ્ ॥

૭૩. ઘટનાયમુનાતામ્રાગઙ્ગાપ્યન્તઃસરસ્વતી ।
અતઃ ત્રિવેણી સઙ્ગે તુ સ્નાનં યઃ કુરુતે નરઃ ॥

૭૪. સર્વાન્ કામાનવાપ્યૈવ શિવસાયુજ્યમાપ્નુયાત્ ।
તસ્ય દક્ષિણભાગે તુ માણ્ડવ્યં તીર્થમુત્તમમ્ ॥

૭૫. યત્ર સ્નાતા નરા યાન્તિ બ્રહ્મલોકં તુ પાવનમ્ ।
ગજેન્દ્રમોક્ષસ્યોત્તરતઃ તીર્થં વૈનાયકં મહત્ ॥

૭૬. યઃ કરોતિ સકૃત્ સ્નાનં સ દીર્ઘાયુઃ સુખી ભવેત્ ।
તસ્યાપ્યુત્તરપાર્શ્વે તુ કર્મતીર્થં શુભાવહમ્ ॥

૭૭. તદમ્ભઃ સ્પર્શનાત્ નૃણાં કર્મપાશવિમોચનઃ ।
તસ્યાપ્યુત્તરતઃ કિઞ્ચિત્ રાક્ષસીમોચનં પરમ્ ॥

૭૮. તસ્ય દર્શનમાત્રેણ નરઃ પાપાત્ પ્રમુચ્યતે ।
યેષુ તીર્થપ્રધાનેષુ સ્નાત્વા દત્વા યથાવિધિ ॥

૭૯. દેવં પ્રદક્ષિણીકૃત્ય પુટાર્જુનપુરેશ્વરમ્ ।
ગોમતીં ચ નમસ્કૃત્ય સર્વલોકૈકમાતરમ્ ॥

૮૦. શિવમારાધયામાસ વિધિના મન્ત્રતન્ત્રવિત્ ।
દીપૈઃ ધૂપૈઃ ચ નૈવેદ્યૈઃ ગન્ધપુષ્પાક્ષતાતિભિઃ ॥

૮૧. પૂજ્યાન્તે પરયા ભક્ત્યા તુષ્ટાવ પરમેશ્વરમ્ ।
અગસ્ત્યઃ –
ૐ નમસ્સર્વભૂતાનાં સૃષ્ટિસ્થિત્યન્તકારિણે ॥

૮૨. સર્વકારણરૂપાય તરુકોટરવાસિને ।
હરિનેત્રાર્પિતં દેવં હાલાહલવિષાદકમ્ ॥

૮૩. આશ્રિતાભ્યુદયં નિત્યં પુટાર્જુનમુપાસ્મહે ।
સુગન્ધં સુન્દરં શુભ્રં સોમાકલિતમૌલિકમ્ ॥

૮૪. પરાનન્દરસાભિખ્યં પુટાર્જુનમુપાસ્મહે ।
ગઙ્ગાધરં શશિધરં ગૌર્યા વામાર્ધવિગ્રહમ્ ॥

૮૫. વાસુદેવપ્રિયં શાન્તં પુટાર્જુનમુપાસ્મહે ।
કાલકાલં (શૂલ)કલાધરં ભવં ભક્તભયાપહમ્ ॥

૮૬. પાર્વતીસહિતં ભવ્યં પુટાર્જુનમુપાસ્મહે ।
મોક્ષસ્થાનં મુમુક્ષૂણાં ભોગસ્થાનં તુ ભોગિનમ્ ॥

૮૭. ઉમાદેહાર્ધશમ્ભું તં પુટાર્જુનમુપાસ્મહે ।
રવીન્દુવહ્નિનયનં રામારમણવન્દિતમ્ ॥

૮૮. કર્પૂરગૌરં પુરુષં પુતાર્જુનમુપાસ્મહે ।
પ્રમાણં પ્રણવાર્થાનાં કાન્તં કાન્તાર્ધવિગ્રહમ્ ॥

૮૯. રવિકોટીપ્રતીકાશં પુટાર્જુનમુપાસ્મહે ।
શઙ્ખકુન્દેન્દુસઙ્કાશં કર્પૂરોદારવિગ્રહમ્ ॥

૯૦. કન્દલત્કરુણામૂર્તં પુટાર્જુનમુપાસ્મહે ।
નમશ્શિવાયામલવિગ્રહાય નતાભિલાષૈકસુરદ્રુમાય ॥

૯૧. નવેન્દ્રવૃષોદરવાહનાય નમો નમશ્ચન્દ્રવિભૂષણાય ।
ઇતિ સ્તુત્વા મહાદેવં ભક્તિપ્રણતયા ગિરા ॥

૯૨. પપાત પાદયોઃ શમ્ભોઃ દણ્ડવત્ કુમ્ભસમ્ભવઃ ।
તાવલ્લિઙ્ગાત્ સમુત્તસ્થૌ અર્ધનારીશ્વરશ્શિવઃ ॥

૯૩. તં ભુજાભ્યાં સમુત્થાપ્ય બહુમાન્ય સદાશિવઃ ।
સ્મિતપૂર્વમ્મુવાચેદં લોપામુદ્રાપતિં મુનિમ્ ॥

૯૪. ગૌતમં પ્રીણયિત્વૈવ સાન્ત્વયિત્વૈકત્મેવ ચ ।
તતો ગન્તાસિ મલયં વિધાયાભિહિતં મયા ॥

૯૫. ઇત્યુક્ત્વા શઙ્કરો ભૂયઃ લિઙ્ગે ચાન્તરધીયત ।
અન્તર્હિતે ભગવતિ કુમ્ભભૂરતિવિસ્મિતઃ ॥

૯૬. હયગ્રીવમુખૈસ્સાર્ધં પરમાનન્દમવાપ્તવાન્ ।
એકતસ્ય સુતાં બાલાં નામ્ના કુમ્ભીનસીં મુનિઃ ॥

૯૭. શતાનન્દાય બાલાય ધારાપૂર્વં દદૌ તદા ।
તદાદિ પરમં ક્ષેત્રં કલ્યાણં નગરં વિદુઃ ॥

૯૮. વિમુક્તો બ્રહ્મહત્યાયાઃ શચ્યાત્રહિ શતક્રતુઃ ।
સુરેન્દ્રમોક્ષમિત્યાહુઃ એતત્ ક્ષેત્રમતસ્સુરાઃ ॥

૯૯. અર્જુનદ્રુમગર્ભસ્થો યત્ર શમ્ભુઃ પ્રદૃશ્યતે ।

પુટાર્જુનપુરં નામ્ના પ્રશસ્તં ભુવનત્રયે ॥

૧૦૦. દણ્ડાટવીમિતિ પ્રોચુઃ બ્રહ્મદણ્ડનિવાસતઃ ।
ઇત્થમાશ્ચર્યમાલોક્ય શિવક્ષેત્રં ઘટોદ્ભવઃ ॥

૧૦૧. શિવં પ્રદક્ષિણીકૃત્ય તાવામન્ત્ર્ય મુનીશ્વરૌ ।
નારદપ્રમુખૈસ્સિદ્ધૈઃ હયગ્રીવમુખૈર્દ્વિજૈઃ ॥

૧૦૨. સમારુહ્ય વિમાનં તં લોપામુદ્રાસમન્વિતઃ ।
સંપ્રતસ્થે મહાતેજાઃ સ્તૂયમાનઃ સુરાસુરૈઃ ॥

ઇતિ સપ્તદશોઽધ્યાયઃ ।          Pro.Total =1116 + 102 =1218.

## અષ્ટાદશોઽધ્યાયઃ

ગોષ્ઠીશ્વરલિઙ્ગપ્રતિષ્ઠાપનપૂર્વકં અગસ્ત્યકર્તૃકા ગોષ્ઠીશ્વરસ્તુતિઃ ।

૧. શ્રુણુ રાજન્ પ્રવક્ષ્યામિ ચરિતં કુમ્ભજન્મનઃ ।
યસ્યાઃ શ્રવણમાત્રેણ નરઃ પાપૈઃ પ્રમુચ્યતે ॥

૨. અત્રિઃ કપિઞ્જલો વ્યાસઃ સુમન્થુઃ નારદસ્તથા ।
તુમ્બુરુઃ પર્વતશ્ચૈવ ધર્માત્મા વરુણાત્મજઃ ॥

૩. અગસ્ત્યં પ્રમુખીકૃત્ય ઘટનાતામ્રાસઙ્ગમે ।
સ્નાત્વા યથાન્યાયં કાલ્યં કર્મ સમાપ્ય ચ ॥

૪. પ્રયયૌ રથમાસ્થાય ધાત્રીવનમુપાગમત્ ।
તન્મેરુશિખરાકારં વિમાનં કુમ્ભજન્મનઃ ॥

૫. નાનામણિગણાકીર્ણમુલ્લિખન્તમિવામ્બરમ્ ।
કિઙ્કિણીજાલસન્નાદં પતાકાધ્વજમણ્ડિતમ્ ॥

૬. સૂર્યવૈશ્વાનરપ્રખ્યં નેમિનાદસમન્વિતમ્ ।
પ્રચચાલ મહાનાદં મુનિવૃન્દનિષેવિતમ્ ॥

૭. પ્રવિવેશ વનં ઘોરં નાનાદ્રુમલતાયુતમ્ ।
ઝિલ્લિકાઘણસન્નાદં નાનાપક્ષિસમાકુલમ્ ॥

૮. આવાસમિવદૈત્યાનામાલયં રક્ષસામિવ ।
આતઙ્કાનામિવ કુલમામયાનામિવાસ્પદમ્ ॥

૯. એવમેતત્ વનં ઘોરં પ્રવિશન્ એવ કુમ્ભભૂઃ ।
    દદર્શ ભીષણાકારાં રાક્ષસીં સૂકરાનનામ્ ॥

૧૦. ઉત્ક્ષિપન્તી ચ પાષાણાન્ કોણાગ્રેણ તતસ્તતઃ ।
    દારયન્તી નખૈસ્તીક્ષ્ણૈઃ ભારયન્તી મહીતલમ્ ॥

૧૧. ચક્ષૂંષિ પાંસુવર્ણેન મુષ્ણન્તી પશ્યતાં મુહુઃ ।
    ક્ષોભયન્તી જગચ્ચક્રં મહાનાદેન રાક્ષસી ॥

૧૨. દ્રવયન્તીવ ભૂતાનિ મહાવારીવ સંક્ષયે ।
    દ્રવતામેવ સર્વેષાં સાધ્વાવિષ્ટચેતસામ્ ॥

૧૩. મહાનાદઃ સમભવત્ ત્રાહિ ત્રાહીતિ ભૂપતે ।
    વિત્રસ્તાન્ ધાવમાનાન્ ચ પુરસ્તાત્ શરણાગતાન્ ॥

૧૪. દૃષ્ટ્વા કોપસમાવિષ્ટઃ હુઙ્કારમકરોન્મુનિઃ ।
    તદાનીમભવત્ તસ્માત્ હુઙ્કારાદગ્નિસન્નિભઃ ॥

૧૫. દંષ્ટ્રાકરાલવદનઃ મહોલ્કાકારલોચનઃ ।
    શીઘ્રં ગત્વા સ પુરુષઃ તાં જઘાન નિશાચરીમ્ ॥

૧૬. તાવત્ તદ્ગદયા ભગ્નમસ્તિષ્કા રાક્ષસી તથા ।
    નિપપાત વને ઘોરે વજ્રભિન્નાદ્રિસન્નિભા ॥

૧૭. તદ્વિગ્રહં સમારુહ્ય પુરુષઃ પર્વતોપમમ્ ।
    પુનઃ સન્તાપયામાસ સર્વતઃ તત્ વપુર્મુહુઃ ॥

૧૮. તદ્ગદાભિન્નમસ્તિષ્કા નિપપાત મમાર ચ ।
    તસ્યાં હતાયાં રાક્ષસ્યાં સર્વે મુમુદિરે જનાઃ ॥

૧૯. અગસ્ત્યોઽપિ મહાતેજાઃ સન્તુષ્ટઃ તેન કર્મણા ।
    તં પ્રીણયિત્વા પુરુષં વચનં ચેદમબ્રવીત્ ॥

૨૦. ત્વયા કૃતમિદં કાર્યં સર્વલોકહિતેપ્સુના ।
    ત્રીન્ લોકાન્ પ્રીણયત્યેવ મમ પ્રીતિં વિતન્વતા ॥

૨૧. નિરામયમિદં ક્ષેત્રં નિષ્કણ્ટકમિદં કૃતમ્ ।
    રક્ષઃકલેવરં ભીમમદ્રિકૂટસમપ્રભમ્ ॥

૨૨. ત્વદ્વીર્યદર્શનાયૈવ શિલારૂપં ભવિષ્યતુ ।
    ગજારૂઢ ઇવાત્રૈવ સ્થાતુમર્હસિ સન્તતમ્ ॥

૨૩. અનેકપરિવારેણ સંયુક્તો બલશાલિના ।
પાલયન્ ત્વમિદં ક્ષેત્રં યાવદાભૂમિસમ્પ્લવમ્ ॥

૨૪. સ્નાત્વા ત્વામર્ચયિષ્યન્તિ સૌન્દર્યારોગ્યકાઙ્ક્ષિણઃ ।
તમિત્થમનુશાસ્યાત્ર સર્વૈઃ સમ્ભાવિતો મુનિઃ ॥

૨૫. વિકીર્યમાણઃ કુસુમૈઃ દેવૈશ્ચ સહ કિન્નરૈઃ ।
અત્ર નારદમુખ્યૈઃ ચ હયગ્રીવેણ સંયુતઃ ॥

૨૬. શુચૌ દેશે મહાતેજાઃ લિઙ્ગં સંસ્થાપયન્ મુનિઃ ।
સુલગ્ને સુદિને સુધ્દે શુભગ્રહનિરીક્ષિતે ॥

૨૭. મુહૂર્તે ગુરુહોરાયાં લોપામુદ્રાસમન્વિતઃ ।
લિઙ્ગં સંસ્થાપયામાસ સૈકતં શામ્ભવં શુભમ્ ॥

૨૮. ક્રિયમાણે તથા લિઙ્ગે શૈથિલ્યમુપજગ્મુષુ ।
પુનઃપુનઃ પરિશ્રાન્તઃ પુનઃ શૈથિલ્યમેયુષિ ॥

૨૯. કિમિયં ભવતા શમ્ભો ગોષ્ઠીમયી વિભાવ્યતે ।
ઇતિ જલ્પન્ સમુદ્વિગ્નહૃદયઃ કલશીસુતઃ ॥

૩૦. ઉભાભ્યામેવ પાણિભ્યામુરસા શ્રધ્દયા સહ ।
આલિલિઙ્ગે મહાદેવં દ્રઢીકુર્વન્ ઇવ સ્વયમ્ ॥

૩૧. એવમુક્તે પરિશ્રાન્તે મુનૌ તસ્મિન્ સદાશિવઃ ।
સિકતત્ત્વેઽપિ ભગવાન્ સ્થિરલિઙ્ગોઽભવત્ ક્રમાત્ ॥

૩૨. એવં લિઙ્ગં પ્રતિષ્ઠાપ્ય પૂજયામાસ ભક્તિતઃ ।
પૂજાન્તે સ મુનિઃ પત્ન્યા નમસ્કૃત્ય પ્રસાદ્ય ચ ॥

૩૩. સઙ્કુચત્કમલાકારં મૌલાવઞ્જલિમુદ્વહન્ ।
નતાઙ્ગયષ્ટિઃ પુરતઃ તિષ્ઠન્ તુષ્ટાવ શઙ્કરમ્ ॥

૩૪. અગસ્ત્યઃ –
દેવદેવ મહાદેવ ભક્તાનામાર્તિભઞ્જન ।
પુરાણદેવ દેવેશ ગોષ્ઠીશ્વર નમોઽસ્તુ તે ॥

૩૫. ધર્માર્થકામમોક્ષાણાં સંપ્રદાનાય શઙ્કર ।
સાન્નિધ્યં કુરુ ચૈવાત્ર ગોષ્ઠીશ્વર નમોઽસ્તુ તે ॥

૩૬. તામ્રપર્ણીનદીમધ્યે સન્નિધીભવ સન્તતમ્ ।
તીર્થરૂપી ભવાનીશ ગોષ્ઠીશ્વર નમોઽસ્તુ તે ॥

૩૭. નમસ્ત્રૈલોક્યનાથાય ત્રયીનાથાય શમ્ભવે ।
ત્રિપુરાન્તકરૂપાય ગોષ્ઠીશ્વરનમોઽસ્તુ તે ॥

૩૮. બ્રહ્મોપેન્દ્યોગીન્દ્રપૂજિતાઙ્ઘ્રિસરોરુહે ।
કામારે પાર્વતીકાન્ત ગોષ્ઠીશ્વર નમોઽસ્તુ તે ॥

૩૯. વિશ્વાત્મન્ સર્વવિશ્વેશ વિશ્વસંરક્ષણક્ષમ ।
વિશ્વમૂર્તે વિરૂપાક્ષ ગોષ્ઠીશ્વર નમોઽસ્તુ તે ॥

૪૦. બ્રહ્માદિપઞ્ચરૂપેણ પઞ્ચકૃત્યવિધાયિને ।
પઞ્ચબ્રહ્મસ્વરૂપાય ગોષ્ઠીશ્વર નમોઽસ્તુ તે ॥

૪૧. પઞ્ચપાતકનાશાય પાર્વતીસહિતાય ચ ।
સગણાય સપુત્રાય ગોષ્ઠીશ્વર નમોઽસ્તુતે ॥

૪૨. તામ્રાનદીતીરસુભૂષણાય સમાશ્રિતાનાં ચ સુખપ્રદાય ।
નિત્યાય શુદ્ધાય નિરૂપમાય શ્રીગોષ્ઠિનાથાય નમઃશિવાય ॥

૪૩. ભસ્માઙ્ગરાગાય કરીન્દ્રચર્મકૃતોત્તરીયાય નમઃશિવાય ।
વૃષેન્દ્રવાહાય વૃષધ્વજાય શ્રીગોષ્ઠિનાથાય નમઃશિવાય ॥

૪૪. નમઃશિવાયામલચિત્તવાસપ્રિયાય નાગેન્દ્રસુભૂષણાય ।
વામાર્ધગૌરીપરિરમ્ભણાય શ્રી ગોષ્ઠિનાથાય નમઃશિવાય ॥

૪૫. અદ્ય મે સફલં જન્મ અદ્ય મે સફલં તપઃ ।
અદ્ય મે સફલં જ્ઞાનં શમ્ભો ત્વત્પાદસેવનાત્ ॥

૪૬. કૃતાર્થોઽહં કૃતાર્થોઽહં કૃતાર્થોઽહં મહેશ્વર ।
અદ્ય તે પાદપદ્મસ્ય દર્શનાત્ ભક્તવત્સલ ॥

૪૭. વયં ધન્યા વયં ધન્યા વયં ધન્યા જગત્ત્રયે ।
આદિદેવો મહાદેવઃ યદસ્મત્ કુલદૈવતમ્ ॥

૪૮. શિવશ્શમ્ભુશ્શિવશમ્ભુઃ શિવશ્શમ્ભુશ્શિવશ્શિવઃ ।
ઇતિ વ્યાહરતો નિત્યં દિનાન્યાયાન્તુ યાન્તુ મે ॥

૪૯. શિવે ભક્તિઃ શિવે ભક્તિઃ શિવે શિવે ।
સદા ભૂયાત્ સદા ભૂયાત્ સદા ભૂયાત્ સદા મમ ॥

૫૦. ઇતિ સ્તુત્વા મહાદેવં સ્તોત્રૈઃ દિવ્યૈઃ સ્વસૂક્તિભિઃ ।
આનન્દમગ્નહૃદયઃ તૂષ્ણી ક્ષણમતિષ્ઠત ॥

૫૧. તવદાવિરભૂત્તસ્માત્ મહાલિઙ્ગાત્ સદાશિવઃ ।
અર્ધં મરકતશ્યામર્ધં ચન્દ્રપાણ્ડુરમ્ ॥

૫૨. નરનારીમયં બિભ્રત્ વપુઃ સૌન્દર્યસદ્ભૃતમ્ ।
ઉદ્યદ્દીપ્તોત્તરાકારં દીપ્તાનલસમપ્રભમ્ ॥

૫૩. કરુણામૃતકલ્લોલવેલ્લિતાપાઙ્ગભાસ્વરમ્ ।
વામાઙ્ગસ્તનસમ્સક્તહારેણૈકવિરાજિતમ્ ॥

૫૪. ગઙ્ગાધરં શશિધરં શૂલટઙ્કમૃગં ધરમ્ ।
એવં પ્રકાશમનેન વપુષા રાજસાત્મના ॥

૫૫. આવિર્ભૂતો મુનિશ્રેષ્ઠં બભાષે વચનં તદા ।
શ્રી ભગવાન્ –
મહામુને પ્રસન્નોઽસ્મિ સ્તોત્રણાનેન ભૂયસા ॥

૫૬. અસ્ય સ્તોત્રસ્ય પઠનં મહાલિઙ્ગસ્ય દર્શનમ્ ।
મજ્જનં ચૈવ તામ્રાયાં ત્રયં મત્પ્રીતિકારણમ્ ॥

૫૭. એભિઃ મુનિવરૈસ્સાર્ધમત્ર સ્નાનમકલ્મષૈઃ ।
ત્વયા તસ્માત્ મહાતીર્થે મુનિતીર્થં ભવિષ્યતિ ॥

૫૮. મલ્લિઙ્ગાત્ દક્ષિણે ભાગે તામ્રાયામુત્તરે તટે ।
મુનિતીર્થે ચ યઃ સ્નાત્વા મલ્લિઙ્ગં પ્રણમેત્ મુને ॥

૫૯. તસ્ય દાસ્યામ્યહં નિત્યં ઐહિકામુષ્મિકં સુખમ્ ।
યત્રોદીચીમુખા તામ્રા વર્તતે ચાતિપાવની ॥

૬૦. આવર્તપઙ્ક્તયઃ તત્ર પ્રવર્તન્તે મદગ્રતઃ ।
તત્ર સ્નાત્વા તુ યો મર્ત્યઃ મામર્ચયતિ સાદરમ્ ॥

૬૧. સ ભુક્ત્વેવ મહાભોગાન્ અન્તે મામુપગચ્છતિ ।
અત્રૈવ ન્યવસત્ લિઙ્ગે ત્વયા સંસ્થાપિતે શુભે ॥

૬૨. પાર્વત્યા સહ ભક્તાનાં પ્રીતિં દાસ્યે પરાં સદા ।
અસ્તુ સા દક્ષિણાવર્તે તીર્થં મચ્ચિત્તમર્હણે ॥

૬૩. સ્નાત્વા ભૈવમારાધ્ય કોલારિમપિ પૂજ્ય ચ ।
મલ્લિઙ્ગં મધુનાસિચ્ય નભૂયઃ તનુમાન્ ભવેત્ ॥

૬૪. ત્વત્પાણિમુદ્રાં બિભ્રાણો દર્શયન્ ભક્તવશ્યતામ્ ।
વહામિ નિયતં પ્રીત્યા યાવદાચન્દ્રતારકમ્ ॥

૬૫. નિત્યં શશાઙ્કાત્ બિન્દૂનિ પીયૂષસ્ય પુનઃપુનઃ ।
સમ્પતન્તીહ મલ્લિઙ્ગે બિન્દુસ્થાનમિદં ભવેત્ ॥

૬૬. રાક્ષસ્યા કર્શિતં ક્ષેત્રં નખરૈઃ વિશિખૈરિવ ।
તસ્માત્ સર્વે પ્રશંસન્તુનખારણ્યમિદં મુને ॥

૬૭. પ્રતિવર્ષમિહાગત્ય ભવતા મુનિપુઙ્ગવ ।
અર્ચનીયો મહાલિઙ્ગો મન્ત્રૈઃ પ્રીતિવૃદ્ધયે ॥

૬૮. ગચ્છ સાધય શૈલેન્દ્રં ધર્મપત્ન્યા સમન્વિતઃ ।
શ્રેયાંસિ તવ ભૂયાંસ્સિ બવન્તુ મદનુગ્રહાત્ ॥

૬૯. ઇત્થમુક્ત્વા મહારાજ કુમ્ભયોનિમુમાપતિઃ ।
અનુશાસ્ય પુનસ્તસ્મિન્લિઙ્ગે દેવઃ તિરોદધે ॥

૭૦. તસ્મિન્ અન્તર્હિતે દેવે કુમ્ભયોનિર્મહામનાઃ ।
વરાન્ લબ્ધ્વા મહાદેવાત્ પુનઃ સમ્પૂજ્ય શઙ્કરમ્ ॥

૭૧. ક્ષેત્રં પ્રદક્ષિણીકૃત્ય સર્વા આમન્ત્ર્ય દેવતાઃ ।
પુનઃપુનઃ નમ્સ્કૃત્ય પ્રીત્યા પ્રમાયાન્વિતઃ ॥

૭૨. સમીયાય મહાશૈલં દેવૈશ્ચ મુનિભિસ્સહ ।
ગોષ્ઠીશસ્ય પ્રસાદેન ક્ષેત્રં કાશિસમં વિદુઃ ॥

૭૩. અદ્યાપિ દૃશ્યતે શમ્ભોઃ તત્ ક્ષેત્રે ભક્તવશ્યતા ।
પાણિમુદ્રા કુમ્ભયોનેઃ માલામિવ સમુદ્વહન્ ॥

૭૪. અદ્યાપિ ભગવાન્ આસ્તે યથા કૈલાસપર્વતે ।
તત્રાર્ચનીયો ગૌરીશો જન્તુભિઃ મોક્ષકાઙ્ક્ષિભિઃ ॥

૭૫. પઞ્ચાસ્યં વપુષિ પદૌ મહતામગસ્ત્યઃ
સાકં સુરૈઃ મુનિગણૈઃ અપિ સિદ્ધમુખ્યૈઃ ।
પ્રીત્યા ત્રિવારમિહ શમ્ભુમનન્યચેતાઃ
પ્રાપ્યાર્ચયત્યપિમતાભ્યુપાસ્ય સિદ્ધ્યૈઃ ॥

૭૬. ગોષ્ઠીશમત્રવિધિના મુનિરર્ચયિત્વા
સ્નાત્વા જપન્સ સલિલે મલયાત્મજાયાઃ ।
પ્રત્યબ્દમાપ્તસકલાભિહિતો મહાત્મા
ભૂયઃ સ્વમાશ્રમમુપાવિશતે સ્વપત્ન્યા ॥

૭૭. તસ્માત્ અવશ્યમભિલાષિભિરાત્મસિદ્ધ્યૈ
તત્રૈકવારમમલામ્ભસિ તામ્રપર્ણ્યાઃ ।
સ્નાતવ્યમેવ ભગવાન્ અપિ પૂજનીયઃ
ગોષ્ઠીશ્વરઃ ખલુ કુતૂહલતોઽપિ મર્ત્યૈઃ ॥

૭૮. એવં વિચિત્રમહિમાસ્પદમેષ પુણ્યં
ક્ષેત્રં વિભાવ્ય મનસા મહનીયકીર્તિઃ ।
કુમ્ભાત્મજઃ સહ તુરઙ્ગમુખાદિમુખ્યૈઃ
પ્રાયાત્ રથેન મલયાદિમસૌ જવેન ॥

ઇતિ અષ્ટાદશોઽધ્યાયઃ । Pro.Total = 1218 + 78 =1296

## એકોનવિંશોઽધ્યાયઃ

ગજેન્દ્રકીલાદિક્ષેત્રાગમનપૂર્વકં સ્વાશ્રમં પ્રતિ અગસ્ત્યાગમન મ્ ।

૧. શઙ્ખઃ –
અથાતઃ કથયિષ્યામિ પ્રભાવં કુમ્ભજન્મન ; ।
યસ્મિન્ શ્રવણસંસ્પૃષ્ટે પ્રાણાયામાદિકં ફલમ્ ॥

૨. શ્રૂણુ રાજન્ યથાવૃત્તં મુનિનાચરિતં પુરા ।
ભૃઙ્ગાશ્રમે મહાદેવં સ્થાપ્ય વિન્ધ્યાદ્રિમર્દનઃ ॥

૩. પૂજ્ય લબ્ધ્વા વરાન્ સર્વાન્ હયગ્રીવમુખૈસ્સમમ્ ।
પુનઃ શતાઙ્ગમારુહ્ય કમ્પમાનમાહાધ્વજમ્ ॥

૪. સંવૃતઃ સિદ્ધનિકરૈઃ અમરૈઃ વરુણાદિભિઃ ।
આસસાદ મહાશૈલં મલયં સિદ્ધસેવિતમ્ ॥

૫. યત્ર પૂર્ણાકુમુદ્વત્યૌ તામ્રાયાઃ સઙ્ગમે શુભે ।
તત્ર તીર્થં મહાપુણ્યં મહાપાતકનાશનમ્ ॥

૬. તત્રાવતીર્ય ભગવાન્ મુનિર્વાતાપિનાશનઃ ।

સ્નાત્વા માધ્યાહ્નિકં કર્મ ચકાર વિધિપૂર્વકમ્ ॥

૭. તાવત્ ઐરાવતારૂઢો સહસ્રાક્ષઃ શચીપતિઃ ।
આસસાદાબ્ધિપો પ્રીત્યા સર્વૈ સ્સહ મરુત્ગણૈઃ ॥

૮. તમાગતમભિષ્ટૂય પૂજયામાસ વજ્રિણમ્ ।
સમાસીનેષુ સર્વેષુ મિલિતેષુ કુતૂહલાત્ ॥

૯. આદત્તે વચનં પ્રીત્યા બિડૌજા કલશીસુતમ્ ।
અહો મહોદયમિદં જગતાં ભવતા કૃતમ્ ॥

૧૦. ઇયં મહી મહાભાગા સ્વર્ગાત્ અપિ ગરીયસી ।
યત્ર સત્યં તપઃ શૌચમાર્જવં પ્રિયકર્તૃતા ॥

૧૧. સમતા સૌમનસ્યં ચ વર્તતે નિયતં સદા ।
તત્ર દેવાઃ ચ મન્ત્રાશ્ચ તીર્થાનિ સકલાન્યપિ ॥

૧૨. તસ્માત્ ત્વત્તો ન પશ્યામિ પરમાધારમૂર્જિતમ્ ।
ત્વયા મહીયં કલ્યાણી વિહિતા સાધુ ભારતી ॥

૧૩. ત્વયિ શમ્ભુર્હરિર્બ્રહ્મા ત્વયિ ગૌરી પ્રતિષ્ઠિતા ।
ત્વય્યેવ કમલા વાણી ત્વયિ સર્વે ચ સંસ્થિતા ॥

૧૪. ત્વદ્દર્શનૈવ પૂજા ચ ત્વદ્ધ્યાનં બ્રહ્મભાવના ।
ત્વદ્દર્શનમહં મન્યે બ્રહ્માનન્દૈકદર્શનમ્ ॥

૧૫. ત્વં ગુરુર્જગતાં બ્રહ્મન્ ત્વમેકઃ પાલકઃ પ્રભુઃ ।
તસ્માત્ અહં મહાભાગ ત્વાં સેવિતુમિહાગતઃ ॥

૧૬. લોપામુદ્રા ધર્મપત્ની તવ પાપવિનાશિની ।
સાક્ષાત્ દેવી લોકમાતા પાવની નાત્ર સંશયઃ ॥

૧૭. યુવયોર્દર્શનાત્ અદ્ય કૃતાર્થોઽસ્મિ મહામુને ।
એનામાનયતા બ્રહ્મન્ ત્વયા મલયનન્દિનીમ્ ॥

૧૮. મોક્ષભૂમિરિયં જાતા દક્ષિણા દક્ષિણા મહી ।
યસ્માત્ વાઞ્છન્ત્યમર્ત્યત્વમત્ર બ્રહ્મમુખા અપિ ॥

૧૯. ત્વયા લોકહિતાયૈવ પુરા ચુલુકિતોઽર્ણવઃ ।
વિન્ધ્યો નિયમિતઃ કોપાત્ વાતાપિઃ કબલીકૃતઃ ॥

૨૦. દુષ્કરાણિ ત્વદન્યૈસ્તુ જનૈઃ બ્રહ્માણ્ડગહ્વરે ।
એતાનિ તે ચરિત્રાણિ ત્રીન્ લોકાન્ ન પુનાતિ કિમ્ ॥

૨૧. કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ ચ દર્શનાત્ ।
અત્ર વર્ષન્તુ મેઘાઃ કાલે કાલે યથોચિતમ્ ॥

૨૨. ન ભવન્તુ જનાઃ પાપાઃ ન ભવન્તુ ક્ષયાદયઃ ।
શરીરમાનસાઃ તાપાઃ માર્યરિષ્ટાદયઃ તથા ॥

૨૩. પુષ્ણન્તુ સર્વસસ્યાનિ તીરયોરુભયોરપિ ।
દેવાઃ પ્રસાદં કુર્વન્તુ વર્ધન્તાં ચ તપાંસિ વઃ ॥

૨૪. ચાપમેયુષિ વૈ ભાનૌ પઞ્ચદશ્યાં મહામુને ।
માં ભજન્તુ જનાસ્સર્વે માઘે વા પુષ્પસઙ્ગમે ॥

૨૫. અત્રૈવ હરિકીલાખ્યે ક્ષેત્રેઽસ્મિન્ પાવને શુભે ।
પ્રત્યબ્દમાગમિષ્યામિ ભવતાં દર્શનાય વૈ ॥

૨૬. અનયા ધર્મપત્ન્યા ત્વં પ્રાપ્ય નિજમાશ્રમમ્ ।
પિતેવ પાલયન્ લોકાન્ ભદ્રં પ્રાપ્નુહ્યવિશ્રમમ્ ॥

૨૭. ઇત્થમિન્દ્રઃ સમાભાષ્ય મુનિના કુમ્ભજન્મના ।
આમન્ત્ર્ય સર્વાન્ બ્રહ્મર્ષીન્ પ્રસ્થાતુમુપચક્રમે ॥

૨૮. પ્રદક્ષિણીકૃત્ય મુનિમૈરાવતમુપસ્થિતમ્ ।
સહ દેવો મહારાજ જગામ ત્રિદિવં પુનઃ ॥

૨૯. પુનઃ પ્રતસ્થેઽગસ્ત્યોઽપિ સ્વાશ્રમાય મહામુનિઃ ।
તતઃ પ્રચેતાઃ પ્રત્યેત્ય મુનિના ચાનુમોદિતઃ ॥

૩૦. તત્તીર્થે સ્થાપયામાસ સ્વનામ્ના લિઙ્ગમુત્તમમ્ ।
ત્રિણદીસઙ્ગમાત્ કિઞ્ચિત્ આગ્નેય્યાં પૂર્વરોદસિ ॥

૩૧. ધારાદ્રેઃ પશ્ચિમે ભાગે વરુણેશ્વરદર્સનાત્ ।
સર્વાન્ કામાનવાપ્નોતિ નરઃ પાપૈઃ વિમુચ્યતે ॥

૩૨. તસ્માત્ દક્ષિણતઃ કિઞ્ચિત્ ક્રમેણ વરુણાત્મજૈઃ ।
સ્થાપિતાનિ હિ લિઙ્ગાનિ સદ્યોમુક્તિપ્રદાનિ હિ ॥

૩૩. વ્યોમપુષ્કરિણીતીરે કિઞ્ચિત્ ઈશાનભાગતઃ ।
સંસ્થાપિતં નારદેન શામ્ભવં લિઙ્ગમુત્તમમ્ ॥

૩૪. તદ્દર્શનં મહાપુણ્યં તત્તીર્થં પાપનાશનમ્ ।
તામ્રાયાઃ પશ્ચિમે તીરે પૈનાકાત્ ઉત્તરે તથા ॥

૩૫. સ્થાપિતં કપિલેનૈવ દર્શનાત્ કામદં નૃણામ્ ।
ઉત્તરેણ તતઃ કિઞ્ચિત્ કૂર્માદ્રિરપિ પૂર્વતઃ ॥

૩૬. કૂલે નદ્યાઃ પશ્ચિમે તુ લિઙ્ગં તુમ્બુરુપુજિતમ્ ।
તત્ સમીપે મણિમયં દર્શનાત્ મુક્તિદં નૃણામ્ ॥

૩૭. પર્વતેન મુનીન્દ્રેણ યથાવત્ સંપ્રતિષ્ઠિતમ્ ।
તયોર્દર્શનમાત્રેણ સિધ્યન્તિ ઘુટિકાદયઃ ॥

૩૮. તસ્માત્ ઉત્તર્તો ભાગે શ્યામકૂટમહામુને ।
ત્રિણદી સઙ્ગમે તીરે દક્ષિણે કુણ્ઠકૂટતઃ ॥

૩૯. ઇન્દ્રકીલમિતિખ્યાતં ક્ષેત્રમિન્દ્રેણ કીલિતમ્ ।
તત્ર જ્યોતિર્મયે પુણ્યે સન્નિદધત્તે સદાશિવઃ ॥

૪૦. તત્ર પ્રસાદમકરોત્ તામ્રાયાઃ શઙ્કરઃ સ્વયમ્ ।
તત્ર કુમ્ભભવઃ શ્રીમાન્ ઇન્દ્રમારાધ્ય સાદરમ્ ॥

૪૧. સ્નાત્વા હુત્વા યથાન્યાયં તર્પયિત્વા પિતૃન્ વિધિ ।
પુનર્વિમાનમારુહ્ય હયગ્રીવમુખૈરપિ ॥

૪૨. રમાક્રીડે સમભ્યર્ચ્ય યથાવત્ કપિલેશ્વરમ્ ।
પ્રાયાત્ પ્રસન્નસત્વાઢ્યં હયગ્રીવસ્યાશ્રમમ્ ॥

૪૩. તત્ર સ્થિત્વા ત્રિરાત્રં તુ ગુરુણા તેન સત્કૃતઃ ।
સંપ્રાપ્ય ભૂયઃ સૌભાગ્યનિલયં સ્વાશ્રમં મુનિઃ ॥

૪૪. પ્રાપ્તઃ સ્વાશ્રમમાસાદ્ય સભાર્યં કુમ્ભસમ્ભવમ્ ।
આપૃચ્છ્ય વરુણો રાજા સપુત્રઃ સહ બન્ધુભિઃ ॥

૪૫. સ્વં લોકં સમ્ભ્રમાવિષ્ટૈઃ સમિયાયાનુયાયિભિઃ ।
તતઃ કુમ્ભભુવા રાજા યક્ષાણામનુપૂજિતઃ ॥

૪૬. પુષ્પકેણ વિમાનેન પ્રયયાવલકાપુરીમ્ ।
વાયુઃ સંયમિની ચ તથૈશાનમુખાઃ સુરાઃ ॥

૪૭. બહુમાન્ય મુનિં સર્વે સ્વાનિ સ્વાનિ પદાન્યગુઃ ।

અનસૂયાન્વિતોઽદ્રિઃ ચ કપિલઃ ચ મહાયશાઃ ॥

૪૮. તુમ્બુરુઃ પર્વતશ્ચૈવ નારદશ્ચ મહામુનિઃ ।
એતે ચાન્યે ચ બહવઃ સમ્ભાવ્ય કલશીસુતમ્ ॥

૪૯. પૂજિતાશ્ચ યથાન્યાયં પ્રયયુશ્ચ યથાગતમ્ ।
એવમેતેષુ યાતેષુ દેવેષુ મુનિભિસ્સહ ॥

૫૦. પ્રવિવેશાશ્રમં પુણ્યં સર્વતઃ શુભદર્સનમ્ ।
કાદમ્બરીવને પુણ્યે ત્રિરાત્રમુષિતો મુનિઃ ॥

૫૧. સોમારણ્યે ત્રિરાત્રં તુ દિનમેકં રમાપુરે ।
વૈકુણ્ઠે દિનમેકં તુ શરાટવ્યાં દિનદ્વયમ્ ॥

૫૨. લાલઙ્કે શમ્બરક્ષેત્રે દિનમેકં નિનાય સઃ ।
પઞ્ચરાત્રં વેણુવને દિનં વ્યાસાશ્રમે તથા ॥

૫૩. ઇન્દ્રપાદપગર્ભે તુ સ્થિત્વા ચૈવ દિનત્રયમ્ ।
નખારણ્યે ત્રિરાત્રં તુ હરિકીલે દિનત્રયમ્ ॥

૫૪. ઉવાસ મૈત્રાવરુણિઃ ત્રિરાત્રં ગુરુસન્નિધૌ ।
જ્યેષ્ઠે માસિ સિતે પક્ષે દ્વાદશ્યામર્કવાસરે ॥

૫૫. વિશાખયુક્તે ચન્દ્રે ચ લગ્ને શુભનિરીક્ષિતે ।
શુભ યુક્તે મુહૂર્તે તુ ભગવાન્ કુમ્ભસમ્ભવઃ ॥

૫૬. તેનૈવ ગુરુણા સાર્ધં પ્રવિવેશ નિજાશ્રમમ્ ।
ઇત્થં મુનૌ વિશતિ કુમ્ભભવે તદાનીં સકલં ગણૈઃ
સકલસિદ્ધમુનીશ્વરાદ્યૈઃ ॥

૫૭. અભ્રાન્તરાત્ અજનિ કલ્પકપુષ્પવૃષ્ટિઃ
આશ્ચર્યદુન્દુભિઘનધ્વનિકૌતુકેન ।
ઉચ્ચૈર્જગુઃ જય જયેતિ કલં ચ સિદ્ધાઃ
બદ્ધાઞ્જલિપ્રસવમાલિભિરાત્તહર્ષમ્ ॥

૫૮. ગન્ધર્વયક્ષકિન્નરગુહ્યકાદ્યૈઃ
વ્યાપ્તં વિયદવિરચિતસ્તુતિપદ્યબન્ધૈઃ ।
મન્દં વવૌ મલયગન્ધવહઃ સમન્તાત્
ઉદ્ધૂયમાનતડિનીજલપૂરતામ્રઃ ॥

૫૯. આરામચન્દનમરક્તવહો નિતાન્ત-
મશ્વશ્રમપ્રશમનૈકવિપશ્ચિત્ અગ્રે ।
સમ્પ્રાપ્તસન્તતમનોરથસમ્ભ્રમેણ
રોમાઞ્ચિતેન વપુષા પુષિતેન ભૂયઃ ।
ચઞ્ચત્ધ્વજપ્રવર્ચામરતો વિમાનાત્
કુમ્ભાત્મજોऽવતરત્ આપ્તજનૈર્મુનીન્દ્રૈઃ ॥

૬૦. ઉચ્ચૈર્દ્રૂષિતસૈન્દવધ્વજપટવ્યાભુષ્ટમેઘચ્છટા
ચઞ્ચત્ ચામરચારુનાદિતમણિસ્તોમં વિમાનં મુનેઃ ।
આપ્લુત્યામ્બરવર્ત્મના મુનિમનુજ્ઞાપ્યપ્રભાતઃક્ષણાત્
ભૂયસ્તત્ સલિલે વિવેશ નૃપતે પશ્યત્સુ સર્વેષ્વપિ ॥

૬૧. તિરોહિતેऽસ્મિન્ અથ તત્ર વારુણિઃ
પ્રતપ્તજામ્બૂનદચક્રકૂબરે ।
રથૈઃ પુનઃ સ્વાશ્રમમેત્ય બન્ધુભિઃ
તુતોષસૃષ્ટ્વૈવ વિધિઃ જગત્ત્રયમ્ ॥

ઇતિ એકોનવિંશોऽધ્યાયઃ ।             Pro.Total = 1296 + 61 =1357.

## વિંશોऽધ્યાયઃ

અગસ્ત્યેન તામ્રપર્ણ્યા મુખોપજનસમ્બન્ધકૃતનીલિમાપનોદનાય ઇન્દ્રકીલક્ષેત્રે શામ્ભવવ્રત અનુષ્ઠાન કથનવેલાયાં તામ્રપર્ણ્યા કથં ઇન્દ્રકીલમિતિ પ્રશ્ને કૃતે ઇન્દ્રેણ વૃત્રવધાય દધીચીમહર્ષેઃ અસ્થ્યાચનમ્ । તત્ દાનાય ચ તેન મહર્ષિણા દેહત્યાગઃ । શબરાક્ષ્યૈ નમઃ ।

૧. રાજા વીરસેનઃ –
કથેયં કથિતા બ્રહ્મન્ ભવતા પાપહારિણી ।
નિર્મલા તામ્રપર્ણીવ સ્વયં ચિત્રમણિપ્રસૂઃ ॥

૨. વિન્ધ્યાદ્રિમાનમથનો મુનિઃ કલશસમ્ભવઃ ।
ત્રયીમિવ વિધિર્લોકે પ્રવાહયતિ ચાપગામ્ ॥

૩. સર્વેષામેવ જન્તૂનાં માતા હિતકરી યથા ।
જગત્ પુનાતિ વિસ્તાર્ય વિષ્ણુર્વિષ્ણુપદીમિવ ॥

૪. મુને નદ્યાશ્ચ ચરિતં પીયૂષમિવ શ્રુણ્વતામ્ ।
ઉપયુક્તમપિ શ્રોતું નૈવ તૃપ્તિં પ્રદાસ્યતિ ॥

૫. દયાનિધે મહાભાગ ભૂયઃ તાં વક્તુમર્હસિ ।
નૈવ યાતિ નરઃ સૌખ્યં ક્વાપિ સ્ત્રીવશવર્તિનઃ ॥

૬. ઇતિ શ્રુતં ગુરુમુખાત્ શાસ્ત્રસઙ્ઘોદિતં મુને ।
અત્ર પ્રવસતોઽસ્માકં સ્ત્રીહેતોરપિ કામિનઃ ॥

૭. દૈવાદિહ વરં લબ્ધં તવાઙ્ઘ્રિકમલદ્વયમ્ ।
ઇતિ હૃષ્યામિ નિતરાં ભૂયો ભૂયોઽસ્તુ ચેતસિ ॥

૮. અપિ ગ્રીષ્મે નન્દનસ્થાઃ તાપં પશ્યન્તિ ન ક્વચિત્ ।
વિયુક્તભોગસૌભાગ્યો ન શોચામિ ત્વદાશ્રયાત્ ॥

૯. યેન ચૈવોપદિષ્ટેન ધર્મેણાપિ શ્રુતેન ચ ।
શ્રેયઃ પ્રાપ્સ્યામ્યહં બ્રહ્મન્ તથૈવાનુગૃહાણ મામ્ ॥

૧૦. આવિર્ભૂતઃ સ્વયં શમ્ભુઃ ઇન્દ્રકીલે મહાસ્થલે ।
કથં પ્રસાદમકરોત્ તામ્રાયૈ કેન હેતુના ॥

૧૧. તત્ અત્ર શ્રોતુમિચ્છામિ પરં કૌતૂલં હિ મે ।
ઇન્દ્રકીલમિતિ ખ્યાતં તત્ ક્ષેત્રં કેન હેતુના ॥

૧૨. વિસ્તરાત્ ભગવન્ સર્વં બ્રૂહિ સર્વજ્ઞે મે ગુરો ।
ઇત્થં સમ્પૃષ્ટસંપ્રશ્નઃ શઙ્ખયોગી મહાતપાઃ ॥

૧૩. વ્યાજહાર કથાં પુણ્યાં વીરસેનાય ભૂભુજે ।
વ્યાજહાર કથાં પુણ્યાં સોપખ્યાનાં પુરાતનીમ્ ॥

૧૪. સાવધાનમના ભૂત્વા વક્ષ્યામિ શ્રુણુ પાર્થિવ ।
વાતાપિવરિર્ભગવાન્ મુનિઃ કલશસમ્ભવઃ ॥

૧૫. સાગરેણ સરિત્શ્રેષ્ઠાં સંયોજ્ય મલયાત્મજામ્ ।
દૃષ્ટ્વા કલ્યાણલિઙ્ગં ચ જ્યોતિસ્થાનં પ્રણમ્ય ચ ॥

૧૬. પુટાર્જુનં પ્રણમ્યાગ્રે તથા ભૃગ્વાશ્રમે હરિમ્ ।
સંપ્રતિષ્ઠાપ્ય ગોષ્ઠીશં હયગ્રીવાશ્રમે તથા ॥

૧૭. વિસર્જયિત્વા લોકેષુ સ્વેષુ દેવાન્ ઋષીનપિ ।
ભૂયઃ સ્વાશ્રમમાસાદ્ય લોપામુદ્રાસમન્વિતઃ ॥

૧૮. દેવીમારાધયન્ વિપ્રાન્ તામ્રામપિ સમર્હયન્ ।
    ચકાર વિવિધાન્ તત્ર વાજપેયમુખાન્ મખાન્ ॥

૧૯. નિત્યશ્રાદ્ધં ભૂતબલિં દેવાદીનાં પ્રવર્તયન્ ।
    અતિથ્યપ્યાગતાન્ અન્યાન્ બન્ધૂન્ અપ્યાશ્રિતાન્ સતઃ ॥

૨૦. અન્નપાનાદિભિર્દ્રવ્યૈઃ પ્રત્યહં સંપ્રહર્ષયન્ ।
    ગાર્હસ્ત્યાન્ પરમાન્ ધર્માન્ સ ચકાર ઘટોદ્ભવઃ ॥

૨૧. એવં તપસ્યતિ મુનૌ સ્વાશ્રમે પરમાદ્ભુતે ।
    સિદ્ધભૂમિરભૂત્ તસ્માત્ સમન્તાત્ દશયોજનમ્ ॥

૨૨. અવગ્રહદશાદોષો ન જાગર્તિ તદાજ્ઞયા ।
    કાલવર્ષી ચ પર્જન્યઃ સુખસ્પર્શી ચ મારુતઃ ॥

૨૩. હિમઘર્માદયઃકાલગુણાઃશાસન્ સમાઃતથા ।
    જનાશ્ચ સર્વે તત્રત્યાઃ ધર્મૈકનિરતા અભવન્ ॥

૨૪. આશ્રમાત્ યોજનાયામં પરિતઃ પર્વતો મુનેઃ ।
    નિત્યં કૃતયુગાવસ્થા કલ્પિતા કાલહારિણા ॥

૨૫. તિર્યઞ્ચોઽપિ ન કુર્વન્તિ જાતિસામાન્યવૈરતામ્ ।
    સર્વેઽપિ જન્તવઃતત્ર સહસા સબલાન્ મુને ॥

૨૬. ધ્યાયન્ત્યહર્નિશં શમ્ભું તીર્થે મજ્જન્તિ યોગવિત્ ।
    ઉચ્ચરન્તિ મુહુર્વેદવાક્યાન્યપિવિલાસતઃ ॥

૨૭. બહુના કિં પ્રલાપેન શ્રુણુ રાજન્ મહામતે ।
    તદાશ્રમપદં સર્વં બ્રહ્મલોકમિવાભવત્ ॥

૨૮. યથા પ્રાપ્ય શ્રુતિઃશૂદ્રૈઃસ્વર્ગપ્રાપ્યૈઃયથા જનૈઃ ।
    તથા તદાશ્રમપદમપ્રાપ્યમકૃતાત્મભિઃ॥

૨૯. તદાશ્રમસ્યોપકણ્ઠે વૃષાઙ્કનગરે શુભે ।
    વિજહાર ગૃહે રમ્યે માલા મલયનન્દિની ॥

૩૦. સ્નાનાભરણવસનદેવાર્ચનજપાદિભિઃ ।
    હવનાહારસંલાપકથાતામ્બૂલકૌતુકૈઃ ॥

૩૧. લીલાસંલાપકથનૈઃ નિનાયાહનિ નિત્યશઃ ।

તથૈવ રજનીં નીત્વા પ્રબુધ્ય પ્રત્યહમ્ ॥

૩૨. નિત્યમુલ્લાસયામાસ ચિત્તં સ્વાશ્રિતરક્ષણે ।
એવં કતિપયેષ્વેષુ દિવસેષુ યાતેષ્વથ ॥

૩૩. નીલબિન્દુભિરાક્રાન્તં તામ્રાયા મુખપઙ્કજમ્ ।
અભૂતપૂર્વં પ્રત્યૂષે વિસ્મયાવિષ્ટમાનસાઃ ॥

૩૪. વિસ્મયં પરમં જગ્મુઃ કિમેતત્ ઇતિ વિસ્મિતાઃ ।
તાવત્ કુમુદ્વતી દૃષ્ટ્વા નીલિમાનં તદાનને ॥

૩૫. ઉપસૃત્ય મહાદેવીં પ્રાઞ્જલિર્વાક્યમબ્રવીત્ ।
અમ્બ તે વદનામ્ભોજે દૃશ્યતે નીલિમા મહાન્ ॥

૩૬. કારણં નાત્ર પશ્યામિ કેનવેતિમલીમસમ્ ।
ઇત્યુક્ત્વા રત્નમુકુરં કર તસ્ય સમર્પયત્ ॥

૩૭. સા સ્વમાસ્યામ્બુજં દૃષ્ટ્વા તસ્મિન્ દર્પણમણ્ડલે ।
ઇત્થં કૌતુકભિન્નાન્તઃકરણા કાઞ્ચનારુણા ॥

૩૮. પશ્યન્તી ક્ષણમાત્રેણ ન દદર્શ મલીમસમ્ ।
નિવૃત્ય દર્પણાત્ વક્ત્રં ચેતઃ ચલયતી તતઃ ॥

૩૯. અતઃ કન્દલિતાશ્ચર્યા તટિની મલયાત્મજા ।
શફરીમિવ સઞ્ચાલ્ય લોચને પરિતઃ ક્ષણાત્ ॥

૪૦. ઉત્કર્ષન્તી ભુવાત્ ઊર્ધ્વં તરઙ્ગનિકરશ્રિયૌ ।
ઉદ્ધૂન્વાલકશ્રેણીં શૈવાલકલિકામિવ ॥

૪૧. સવ્યાનં કુચયોઃ કૃત્વા ફેનપુઞ્જમિવોજ્જ્વલમ્ ।
પ્રવાહરૂપા સમ્ભૂયાપ્યુન્નયન્તીવ ભૂપતે ॥

૪૨. ગુરવે કુમ્ભજન્માય નિવેદયિતુમુત્સુકા ।
ઉત્થાય શયનાત્ અસ્માત્ કાલ્યં કર્મ સમાપ્ય ચ ॥

૪૩. સખીભિઃ સમાયુક્તા પ્રયયાવાશ્રમં મુનેઃ ।
સ્તૂયમાના મુનિગણૈઃ સિદ્ધૈઃ દેવૈરભિષ્ટુતા ॥

૪૪. કિઙ્કરૈરભિભૂયિષ્ઠૈઃ નાનાપ્રહરણોજ્જ્વલૈઃ ।
સમન્તતોઽનુગચ્છદ્ભિઃ સેવ્યમાના સખીજનૈઃ ॥

૪૫. હંસારૂઢા ચામારાભ્યાં વીજ્યમાના ચ પાર્શ્વયોઃ ।
છત્રેણ ધ્રિયમાણેન ધવલેનૈવ મૂર્ધનિ ॥

૪૬. શોભમાના મહારાજ લક્ષ્મીરિવ તદાયયૌ ।
અવરુહ્ય તતો યાનાત્ આશ્રમં પ્રવિવેશ સા ॥

૪૭. તામાગતાં સમાલોક્ય દેવીં કલશસમ્ભવઃ ।
પદાનિ પઞ્ચષાણ્યેવ ભક્ત્યા ચાભિમુખં તથા ॥

૪૮. પાણિભ્યામાલમ્બ્ય સાનન્દં અનુરાગેણ ભૂયસા ।
અન્તરાનીય ભવનં આસને વિનિવેશ્ય તામ્ ॥

૪૯. અભિનન્દ્યાર્ચયિત્વા તુ પ્રીત્યા વચનમબ્રવીત્ ।
અમ્બ સ્વાગતમાનન્દકલિકે મલયાત્મજે ॥

૫૦. કચ્ચિત્ તીર્તેન લોકાન્ ત્રીન્ પાહિ પાપપ્રણાશિની ।
કચ્ચિત્ મનોથાઃ પૂર્ણાઃ કચ્ચિત્ ક્ષેમં ગૃહે તવ ॥

૫૧. કચ્ચિત્ સ્નિહ્યતિ તે ભર્તા ધર્માત્મા સરિતાં પતિઃ ।
કચ્ચિત્ પરિણતા ભૂરિ મણયઃ ત્વત્સુધા ઇવ ॥

૫૨. ભક્તેષુ ભૃત્યવર્ગેષુ બ્રાહ્મણેષુ તટદ્વયે ।
યોગક્ષેમાભિવૃદ્ધિસ્તુ કચ્ચિત્ જાગર્તિ ગોષુ ચ ॥

૫૩. તવાગમનં મન્યે સ્વસ્તયે જગતામિતિ ।
સર્વં કથય કલ્યાણિ ત્વદાગમનકારણમ્ ॥

૫૪. ઇતિ પૃષ્ટા તદા તેન મુનિના સાદરં નદી ।
પ્રણમ્યાઞ્જલિના રાજન્ વ્યાજહાર મુનીશ્વર્મ્ ॥

૫૫. દેવી –
ભગવન્ ભૂરિકરુણાવરુણાલય તે ગુરો ।
અનુગ્રહાન્ મયિ મુને સકલં કુશલં ખલુ ॥

૫૬. સર્વે દેવાશ્ચ વિપ્રાશ્ચ સિદ્ધાશ્ચ નિયમાવૃતાઃ ।
અનુગૃહ્ણન્તિ માં નિત્યં તવ સંશ્રયગૌરવાત્ ॥

૫૭. તથાપિ મુનિશાર્દૂલ વર્તન્ત્યાં ભવને સુખમ્ ।
ઇદમેવ મનસ્યેકં વ્યાકુલં પરિક્રન્દતિ ॥

૫૮. ઉત્થિતાયાઃ પ્રભાતાયાં શર્વર્યાં વદને મમ ।

નીલિમા દૃશ્યતે નિત્યં સમયાત્ નાશમેષ્યતિ ॥

૫૯. કેન વા કારણેનેતિ મયા ન જ્ઞાયતે મુને ।
યથા મે ન ભવેત્ દોષઃ તથા કિમપિ ચિન્ત્યતામ્ ॥

૬૦. ઇતિ શ્રુત્વા વચસ્તસ્યાઃ સવિમર્શં ઘટોદ્ભવઃ ।
ક્ષણં મૌનમુપાગમ્ય વિસ્મિતો વાક્યમબ્રવીત્ ॥

૬૧. માતા મલયસન્તાનકલ્પવલ્લી મણિપ્રસૂઃ ।
પ્રસીદ વાચશ્શ્રોતવ્યાઃ વક્ષ્યમાણા મયાધુના ॥

૬૨. ત્વય્યમ્બ કિલ મજ્જન્તો નિત્યં પાત્કિનો નરાઃ ।
વિમુક્તપાપા ગચ્છન્તિ ત્વચં મુક્ત્વેવ પન્નગાઃ ॥

૬૩. પ્રત્યહં બ્રહ્મહત્યાનાં કોટયો માનવૈઃ કૃતાઃ ।
ક્ષાલ્યન્તે તીર્થતોયેન પુણ્યેન તવ શામ્ભવી ॥

૬૪. ગોઘ્નશ્ચૈવ કૃતઘ્નશ્ચ ભ્રૂણહા ગુરુતલ્પગઃ ।
વઞ્ચકઃ પિશુનો ઘોરઃ મધ્યપો જીવગાતકઃ ॥

૬૫. એતે ચાન્યે ચ પાપિષ્ઠાઃ ત્વદમ્બુગણસેવયા ।
પ્રયાન્તિ નિજલાકારાઃ જ્યોતિર્માર્ગેણ ચાર્કવત્ ॥

૬૬. પાપક્ષાલનકાલુષ્યં દૃશ્યતેઽમ્બ તવાનને ।
શનૈઃ નશ્યન્તિ ભૂયોઽપિ તમઃ સૂર્યાંશુભિર્યથા ॥

૬૭. યેનેદં ન ભવેત્ વક્ત્રે કલુષં પ્રત્યહં તવ ।
તમુપાયં પ્રવક્ષ્યામિ શ્રુણુ કલ્યાણિ સાદરમ્ ॥

૬૮. ઇન્દ્રકીલમિતિ ખ્યાતં તવ તીરે મહાસ્થલમ્ ।
તત્રાભ્યેત્ય વ્રતં દિવ્યં શામ્ભવં કર્તુમર્હસિ ॥

૬૯. વ્રતેનાનેન નિયતા યેઽર્ચયન્તિ મહેશ્વરમ્ ।
તેષાં દર્શનમાત્રેણ દૂરે નશ્યન્તિ પાતકમ્ ॥

૭૦. દેવી –
ઇન્દ્રકીલમિતિ ખ્યાતં તત્ ક્ષેત્રં કેન હેતુના ।
કિં વા વ્રતમિતિ ખ્યાતં કર્તવ્યં ચ કથં ભવેત્ ॥

૭૧. કેન વા વિધિના બ્રહ્મન્ કેન મન્ત્રેણ વા પુનઃ ।
એતત્ સર્વમશેષેણ વદ વિસ્તાર્ય વૈ ગુરો ॥

૭૨. અગસ્ત્યઃ –
માતસ્તે કથયિષ્યામિ ક્ષેત્રસ્યાભ્યુદયં મહત્ ।
પુરા વૃત્રભયાદિન્દ્રઃ દેવૈરગ્નિપુરોગમૈઃ ॥

૭૩. સ્તુત્વા દધીચિમભ્યેત્ય યયાચેઽસ્થિ તદઙ્ગજમ્ ।
સ તુ દેવાન્ સમભ્યર્ચ્ય યથાર્હં મુનિપુઙ્ગવઃ ॥

૭૪. મનસા ચિન્તયામાસ કિં વા યુક્તમિહેતિ ચ ।
અહો વિચિત્રરૂપેયં લીલાદિ પરમેશિતુઃ ॥

૭૫. સમત્વે જીવલોકેઽપિ ભિન્નતા પરિદૃશ્યતે ।
અવિવેકવિવેકાભ્યાં દ્વિધા સર્વત્ર જન્તુષુ ॥

૭૬. કાલભૂમિબલાત્ તોયે યથા રૂપરસોદયઃ ।
તથાપિ યોનિદોષેણ શુદ્ધસ્યાપ્યાત્મનઃ પરમ્ ।
૭૭. અજ્ઞો ન જ્ઞાયતે વિષ્વખણ્ડદં તમ ઇવ શ્રમમ્ ।
જ્ઞાનાજ્ઞાનબલાભ્યાં તુ જીવાત્મા બુદ્ધિસંસ્થિતઃ ॥

૭૮. કૃષ્યતે પાપપુણ્યેષુ કારણં કર્મ તત્ ભવેત્ ।
કર્મણા જાયતે જન્તુઃ કર્મણૈવ પ્રમીયતે ॥

૭૯. તરન્તિ કર્મણા દુઃખં તેન દુઃખેતરં પુનઃ ।
માયયા ભાજનં જન્તુઃ દેહસ્ય સુખદુઃખયોઃ ॥

૮૦. તસ્માત્ અવિદ્વાન્ સર્વત્ર મોહં યાતિ ન ચેતરઃ ।
ચરાચરાવૃતે લોકે સર્વઃ સ્વાર્થં સમીહતે ॥

૮૧. નાન્યસ્ય દુઃખં જાનાતિ સાભિજ્ઞત્વેઽપિ કિઞ્ચન ।
સ્થાવરાત્ જઙ્ગમં શ્રેષ્ઠં જઙ્ગમાચ્ચ જરાયુજમ્ ॥

૮૨. જરાયુજાચ્ચ મર્ત્યત્વં મર્ત્યત્વેઽપ્યધિકો બુધઃ ।
વિપશ્ચિતોઽપિ ગીર્વાણાઃ શ્લાઘ્યાઃ સર્વત્ર જન્તુષુ ॥

૮૩. તેષુ બુદ્ધિર્બલં ધૈર્યં જ્ઞાનં વિજ્ઞાનમેવ ચ ।
દયા સત્યં ચ ધર્મશ્ચ લોકસઙ્ગ્રહતા તથા ॥

૮૪. એતે પ્રતિષ્ઠા નિત્યન્તુ દેવેષુ પરમાત્મતા ।
પ્રવિત્તિઃ પરચિત્તસ્ય સુવૃત્તં જ્ઞાયતેતરામ્ ॥

૮૫. દયાપ્રભૃતિ જાગર્તિ કલ્પવલ્લીવ નન્દને ।
તેષાં મદ્વિષયે કિન્તુ કરુણા બાલિશા ભવેત્ ॥

૮૬. સ્વપ્રયોજનમુદ્દિશ્ય પરહિંસારતઃ કથમ્ ।
અપિ રોગગણૈઃ ક્લાન્તાઃ દુસ્ત્યજા પ્રાણિનાં તનુઃ ॥

૮૭. વિદેહસ્યાત્મનઃ ક્વાપિ પુરુષાર્થચતુષ્ટયમ્ ।
નૈવોપક્રિયતે પાત્રં વિના ક્ષીરમિવ સ્ફુટમ્ ॥

૮૮. કથં શરીરં સન્ત્યજ્ય સુકૃતં કર્તુમુત્સહે ।
હા હન્ત દેવમારાધ્ય મદન્યે સુખભાગિનઃ ॥

૮૯. અહમેકે જીવલોકે દૈવેન નિહિતોદયઃ ।
ઔષધાત્ રોગશમનં તીર્થાત્ પાતકનાશનમ્ ॥

૯૦. ગવા ગાર્હસ્થ્યસૌભાગ્યં દૈવાત્ સર્વં હિ લભ્યતે ।
વિપરીતે વિધૌ કિન્નુ કથયે કેન વા પુનઃ ॥

૯૧. તથાપિ સર્વધર્મેષુ પરોપકૃતિરેવ હિ ।
ગરીયાન્ ઇતિ શંસન્તિ શ્રુતયશ્ચ સનાતનાઃ ॥

૯૨. ધર્મસાધનમપ્યેવં દેહં જન્તોઃ પ્રકલ્પિતાઃ ।
દેવેભ્યઃ સંપ્રદાયાહં શ્રેયઃ પ્રાપ્સ્યામ્યહં નનુ ॥

૯૩. અર્થિનઃ ખલુ ગીર્વાણાન્ પ્રીણયિત્વા શરીરતઃ ।
દુષ્પ્રાપમપરૈઃ પુણ્યૈઃ યાસ્યામિ પરમાં ગતિમ્ ॥

૯૪. ઇતિ નિશ્ચિત્ય મનસા મુનિર્ધૈર્યં સમાસ્થિતઃ ।
પ્રીણયન્ અખિલાન્ દેવાન્ વ્યાજહાર બિડૌજસમ્ ॥

૯૫. દધીચિઃ –
ભવન્તઃ સર્વ એવાત્ર ભદ્રં પ્રાપ્નુત મા ચિરમ્ ।
સત્પાત્રેષ્વેવ યુષ્માસુ દાસ્યામ્યેતત્ કલેવરમ્ ॥

૯૬. ભવન્તઃ પ્રતિગૃહ્ણન્તુ ગતિં યાસ્યે પરામહમ્ ।
ઇત્યુક્તો યોગમાસ્થાય સંપ્રહૃષ્ટો મહામુનિઃ ॥

૯૭. અપાનવાયુમાકુઞ્ચ્ય સઞ્ચાલ્યાધારતોઽનિલમ્ ।
સુષુમ્નાધ્વાનમાવિશ્ય પ્રાણાન્ આદાય વેગતઃ ॥

૯૮. ભૂતાન્ ભૂતેષુ સંલીય ગુણેષ્વપિ ગુણાન્ ક્રમાત્ ।

પ્રશામ્ય ચારિષ્ટવર્ગં લઘ્વીકૃત્યેન્દ્રિયાવલિમ્ ॥

૯૯. અવસ્થામભિભૂયાગ્રે નીત્વા ષટ્ચક્રમણ્ડલમ્ ।
ભ્રૂમધ્યે પ્રાણમારોપ્ય પરિક્રમ્યામૃતાલયમ્ ॥

૧૦૦. મહાપદ્મે તુ વિક્રમ્ય પ્રાપ્યાનન્દસુધામપિ ।
બ્રહ્મરન્ધ્રં વિનિર્ભિદ્ય તેજોરાશિરકલ્મષઃ ॥

૧૦૧. પ્રાપ્ય નાદાન્તમુત્તસ્થૌ વ્યોમયાનં પ્રસાદયન્ ।
મધ્યેનાદિત્યમુદ્ગમ્ય બ્રહ્મલોકમવાપ સઃ ॥

૧૦૨. દૃષ્ટ્વૈવ મુનિવર્યસ્ય મહિમાનં દિવૈકસઃ ।
વિસ્મયં પરમં જગ્મુઃ બ્રહ્માદ્યખિલદેવતાઃ ॥

ઇતિ વિંશોઽધ્યાયઃ ।   Pro.Total = 1357 + 102 =1459.

## એકવિંશોઽધ્યાયઃ

વિશ્વકર્મનિર્મિતવજ્રાયુધેન વૃત્રહનનમ્ ।
તામ્રપણ્યાઃ શામ્ભવવ્રત અનુષ્ઠાનેન પાપવિમોચનં સ્વસ્થાનગમનં ચ ।

૧. શ્રુણુ દેવિ પ્રવક્ષ્યામિ દેવાનાં ચરિતં મહત્ ।
યસ્ય સ્મરણ માત્રેણ નરઃ પાપૈઃ પ્રમુચ્યતે ॥

૨. એવમેયુષિ વૈ તસ્મિન્ મુનૌ બ્રહ્મણિ નિર્મલે ।
તુષ્ટુવુઃ મુનયો દેવાઃ સાધુ સાધ્વિતિ વાદિના ॥

૩. તતો વિષ્ણુમુખાઃ દેવાઃ સંપ્રલબ્ધમનોરથાઃ ।
વિશ્વકર્માણમાહૂય વચનં ચેદમબ્રુવન્ ।

૪. એભિઃ અસ્થિચયૈરેવ વજ્રં કુરુ મહામતે ।
યેન વૃત્રઃ સુખં વધ્યઃ ભવેત્ ઇન્દ્રેણ ધીમતા ॥

૫. અનુશિષ્ટઃ સુરૈરેવં ઓમિત્યાભાષ્ય વર્ધકિઃ ।
પ્રણમ્ય દેવતાઃ સર્વાઃ પ્રસન્નેન્દ્રિયમાનસઃ ॥

૬. કૃતાઞ્જલિઃ પ્રહ્વતનુઃ પરિક્રમ્ય તનું મુનેઃ ।
ઇદમાહ વચઃ તિષ્ઠન્ શ્રુણ્વતાં ત્રિદિવૌકસામ્ ॥

૭. આજ્ઞયા સર્વદેવાનાં ઋષેરેતત્ કલેવરમ્ ।
પાણિભ્યાં સંસ્પૃશામ્યદ્ય દેવસ્યાસ્ય વિવસ્વતઃ ॥

૮. પશ્યતા ચક્ષુષાભીક્ષ્ણં હિમાંશોરમૃતાત્મનઃ ।
બલેન વિષ્ણો રુદ્રસ્ય ચાલયિષ્યે મહદ્વપુઃ ॥

૯. ઇત્થં પ્રદક્ષિણીકૃત્ય સમાદાતુમુપેયુષિ ।
સમજૃમ્ભત ગમ્ભીરો નાદો મૃતકલેવરાત્ ॥

૧૦. અગ્નિવર્ણો મહાતેજા વચનં ચેદમાદદે ।
ન નિધેયમિદં ભૂમૌ નેક્ષ્ણીયમસાધુભિઃ ॥

૧૧. અનેનાસ્માન્ મહાબાહો વજ્રં કુરુ મહાપ્રભમ્ ।
ઇત્યુક્ત્વાકાશામાવિશ્ય સ ભૂતઃ પ્રયયૌ ક્ષણાત્ ॥

૧૨. લબ્ધ્વાજિનં મહાદેવાત્ તસ્મિન્ સ્થાપ્ય તનું મુદા ।
ઉદ્ધૃત્યાસ્થિચયં તસ્માત્ ચક્રે વજ્રાયુધં બલી ॥

૧૩. ક્રિયમાણે તથા વજ્રે ભારાક્રાન્તા વસુન્ધરા ।
નૌરિવામ્ભસિ નિર્ધૂતા ચકમ્પે ચણ્ડવાયુના ॥

૧૪. ચરાચરેષુ ભૂતેષુ ક્રન્દમાનેષુ સર્વશઃ ।
ઇન્દ્રાવિષ્ણૂ દયાવન્તૌ વજ્રશેષૈઃ મહત્તરૈઃ ॥

૧૫. કીલૈઃ દૃઢતરૈઃ ઉર્વીં કીલયેતાં તતસ્તતઃ ।
મહેન્દ્રે મલયે વિન્ધ્યે હિમાદ્રૌ ગન્ધમાદને ।

૧૬. કલિન્દે મણિકૂટે ચ તથા કાલાઞ્જને ગિરૌ ।
કોણાચલે ચન્દ્રકૂટે મન્થરે સહ્યપર્વતે ॥

૧૭. શરત્વન્ત્વમ્બરાદ્રૌ ચ શઙ્ખકૂટે સુરાલયે ।
એષુ ષોડશશૈલેષુ કીલિતં હરિણા પુરા ॥

૧૮. તતઃ સ્વસ્થાભવત્ ભૂમિઃ કીલિતા વજ્રકોટિભિઃ ।
તદાદિ ષોડશસ્થાનમિન્દ્રકીલમિતિ ક્ષિતૌ ॥

૧૯. એતાનિ ધર્મસ્થાનાનિ સદ્યઃ પાપહરાણિ હિ ।
અનુગ્રહાન્ મહેન્દ્રસ્ય લઘુના ચૈવ કર્મણા ॥

૨૦. સિધ્યન્તિ સર્વજન્તૂનાં સિદ્ધયોઽષ્ટૌ ન સંશયઃ ।
એવં દૃઢીકૃતાયાન્તુ મેદિન્યાં સકલાઃ પ્રજાઃ ॥

૨૧. અભ્યનન્દન્ ભયં ત્યક્ત્વા દેવાશ્ચ સહ ગુહ્યકૈઃ ।

સોઽપિ વજ્રં વિધાયૈવ પ્રાદાત્ ઇન્દ્રાય ધીમતે ॥

૨૨. નિહત્ય વૃત્રં તેનૈવ સ્વર્ગમાપપુનર્વૃષા ।
શચ્યા શતક્રતુર્દેવૈઃ પ્રાપ્તરાજ્યઃ પ્રસન્નધીઃ ॥

૨૩. વરાન્ બહૂન્ અદાત્ એષુ સ્થાનેષુ સહ વિષ્ણુના ।
તસ્માત્ ત્વમમ્બ કલ્યાણિ વયસીભિઃ સમન્વિતા ॥

૨૪. ગત્વેન્દ્રકીલમસ્માભિઃ વ્રતચર્યાં પ્રવર્તય ।
તત્ ક્રમં ખલુ વક્ષ્યામિ તન્મે નિગદતઃ શ્રુણુ ॥

૨૫. યદા દિવાકરો દેવિ ચાપરાશિમુપૈતિ સઃ ।
તદારભ્ય વ્રતં કાર્યં યાવન્મકરભાગ્ભવેત્ ॥

૨૬. પ્રાતઃ સ્નાત્વા મહાનદ્યાઃ કાલ્યં કર્મ નિવૃત્ય ચ ।
આચાર્યમ્મગ્રે વૃણુયાત્ અભ્યર્ચ્ય ગનનાયકમ્ ॥

૨૭. નદીતીરે મહાશૈલે ગોષ્ઠે વા ગુરુમન્દિરે ।
દેવાલયે તથા કુર્યાત્ સ્થણ્ડિલં ગોમયેન તુ ॥

૨૮. પઞ્ચવર્ણૈઃ વિધાતવ્યં પદ્માકારં તુ મણ્ડલમ્ ।
તત્રાર્ચયેન્મહાદેવં ગૌરીં મઙ્ગલદેવતામ્ ॥

૨૯. આવાહનાદિ કર્તવ્યં મહારુદ્રાખ્યવિધયા ।
અનાદિવિધયા દેવીમર્ચયેત્ વિધિનાક્ષતૈઃ ॥

૩૦. તસ્ય દક્ષિણભાગે તુ સ્વસ્તિકાખ્યે ચ મણ્ડલે ।
ધાન્યપૂર્ણં પ્રતિષ્ઠાપ્ય કલશં સૂત્રવેષ્ટિતમ્ ॥

૩૧. તસ્મિન્ ધાત્રીં સમાવાહ્ય પૂજ્ય ગન્ધાક્ષતૈરપિ ।
પ્રથમં સોમમીશાનં દ્વિતીયં શઙ્કરં હરમ્ ॥

૩૨. તૃતીયં ગિરિશં ભીમં શાન્તં શર્વં ચતુર્થકમ્ ।
ગઙ્ગાધરં શશધરં પઞ્ચમં પરિકીર્તિતમ્ ॥

૩૩. કામદં કામદહનં ષષ્ઠમાહુઃ મનીષિણઃ ।
સપ્તમં શૂલિનઞ્ચોગ્રં શમ્ભું ભર્ગમથાષ્ટમમ્ ॥

૩૪. એતાનિ યુગ્મનામાનિ શઙ્કરસ્ય મહાત્મનઃ ।
ઉચ્ચરન્ અર્ચયેત્ તત્ર બિલ્વપત્રૈઃ અખણ્ડકૈઃ ॥

૩૫. તથૈવ ગૌરીનામાનિ શ્રુણુ માતઃ સરિદ્વરે ।
પ્રથમં ગિરિજામાર્યાં ગૌરીમમ્બાં દ્વિતીયકમ્ ॥

૩૬. તૃતીયં શામ્ભવીં દુર્ગાં માયાં હૈમવતીં તતઃ ।
પઞ્ચમાં પઞ્ચમીં કાલીં ષષ્ઠીં કાત્યાયનીમિલામ્ ॥

૩૭. સપ્તમીમન્નદાં સત્યાં અષ્ટમીમરુણાં શ્રિયમ્ ।
એવમભ્યર્ચ્ય દેવેશમક્ષતૈઃ યુગ્મનામભિઃ ॥

૩૮. તથૈવ દેવીમભ્યર્ચ્ય શતપત્રૈર્યથાવિધિ ।
ધૂપૈર્દીપશ્ચ નૈવેદ્યૈઃ તામ્બૂલાદ્યુપચારકૈઃ ॥

૩૯. પૂજયેત્ મન્ત્રબ્મન્ત્રૈઃ અર્ઘ્યં દદ્યાત્ સમન્ત્રકમ્ ।
નમોઽસ્તુ નીલગ્રીવાય ગૌર્યૈ દેવ્યૈ નમો નમઃ ॥

૪૦. અર્ઘ્યં દાસ્યામિ યુવયોઃ પ્રીતૌ મે ભવતસ્સદા ।
ઇતિ મન્ત્રં સમુચ્ચાર્ય દદ્યાત્ અર્ઘ્યં ત્રયં બુધઃ ॥

૪૧. તતઃ ક્ષમાપયેત્ દેવીં સ્તોત્રૈઃ વેદાન્તગર્ભિતૈઃ ।
તતો ધાન્યકૂટં દદ્યાત્ સતામ્બૂલં સદક્ષિણમ્ ।
૪૨. મન્ત્રમુચ્ચાર્ય ગુરવે વ્રતસ્ય પરિપૂર્તયે ।
ગુરો ત્વમસિ વિપ્રેન્દ્ર પ્રતિગૃહ્ય મદર્પિતમ્ ॥

૪૩. અભીપ્સિતં ફલં દેહિ પાપં નાશય મે ગુરો ।
વિધાયૈવં મહેસસ્ય પૂજામભ્યુદયાવહામ્ ॥

૪૪. પ્રસાદં પ્રાપ્ય ચોદ્વાસ્ય પુનરાગમનાય હિ ।
એવમેવ હવિષ્યાશી માસમેકં નિરન્તરમ્ ॥

૪૫. મકરં ગચ્છતિ તથા દેવદેવે દિવાકરે ।
એવં સમ્પૂજ્ય ગૌરીશં ગૌરીમપિ વિધાનતઃ ॥

૪૬. પૂજાન્તે પૂજયેત્ ભક્ત્યા ગુરું દેવધિયા સુધીઃ ।
કલ્માષવર્ણાં કપિલાં અથવા ધવલામપિ ॥

૪૭. ધેનું દદ્યાત્ હિરણ્યેન સવત્સાં મન્ત્રપૂર્વકમ્ ।
બ્રહ્મણાન્ ભોજયિત્વા તુ તદનુજ્ઞામવાપ્ય ચ ॥

૪૮. પારણાં બન્ધુભિઃ કુર્યાત્ ઘૃતક્ષીરાદિભિસ્સહ ।
એવં વિધે તુ વિહિતે દિનમેકમથાપિ વા ॥

૪૯. ત્રિરાત્રં પઞ્ચરાત્રં વા સર્વપાપૈઃ પ્રમુચ્યતે ।
તસ્મૈ પ્રસીદતિ શિવઃ શિવયા સહ સન્તતમ્ ॥

૫૦. ઇહ લોકે પરત્રાપિ દુર્લભાન્યપિ બધ્યતે ।
એવં હિ દેવદેવસ્ય વ્રતં કર્તુર્હિ સર્વતઃ ॥

૫૧. સદ્યઃ પાપાનિ નશ્યન્તિ દીર્ઘાયુષ્યં ચ વિન્દતિ ।
અસ્ય વ્રતસ્ય માહાત્મ્યં વક્તું વર્ષશતૈરપિ ॥

૫૨. નશક્યતે મયા તાપિ સંક્ષેપાત્ કતિથં તવ ।
ઋષિઃ –
ઇત્થં શ્રુત્વા મુનેર્દેવી પ્રીયમાણા પુનઃપુનઃ ॥

૫૩. તેનૈવ ગુરુણા સાર્ધં ઇન્દ્રકીલમુપેત્ય સા ।
વૃશ્ચિકે મુચ્યમાને તુ રવાવેયુષિ વૈ ધનુઃ ॥

૫૪. પ્રવિવેસ તથા દીક્ષાં ગુરુણા મલયાત્મજા ।
ચકાર પૂજાં વિધિવત્ મહાનિયમમાસ્થિતા ॥

૫૫. આચરન્ત્યાં વ્રતં દેવ્યાં પઞ્ચમેઽહનિ ભૂપતે ।
જપ્યમાણેષુ મન્ત્રેષુ પૂજ્યમાને ચ મણ્ડલે ॥

૫૬. પશ્યત્સુ સર્વભૂતેષુ સમુદ્ગચ્છતિ ભાસ્કરે ।
તત્ સ્થણ્ડિલાત્ આવિરભૂત્ લિઙ્ગરૂપી સદાશિવઃ ॥

૫૭. તૈજસં રૂપમાસ્થાય ભિત્વા પાતાલસપ્તકમ્ ।
સમજૃમ્ભત સૌભાગ્યાત્ સર્વં વ્યાપ્ય શરીરવત્ ॥

૫૮. દદૃશુઃ સર્વભૂતાનિ લિઙ્ગં આનન્દકન્દવત્ ।
અભૂતભૂતમાશ્ચર્યમભિજાતં મણિપ્રભમ્ ॥

૫૯. વેદાનામુદયસ્થાનં તેજસામિવ પઞ્જચમ્ ।
પુણ્યાનામેકભવનં લિઙ્ગં દૃષ્ટ્વા તુ શામ્ભવમ્ ॥

૬૦. સર્વે મુમુદિરે લોકાઃ પૂર્ણકામા ઇવ ક્ષણાત્ ।
વવર્ષુઃ પુષ્પવર્ષાણિ દેવાસ્સિદ્ધપુરોગમાઃ ॥

૬૧. દેવદુન્દુભયો નેદુઃ વાગભૂત્ સુખસંશ્રવા ।
પાપનાશ મહાદેવ હરિચૂડામણે વિભો ॥

૬૨. પ્રસીદ ભગવન્ પાપાત્ પરિત્રાહિ જગત્ત્રયમ્ ।

ઇત્થં દેવગિરો વિષ્વક્ અભ્યજૃમ્ભન્ત પુષ્કલાઃ ॥

૬૩. દેવી મલયજા પુણ્યા પૂજયન્તી પુરઃ સ્થિતા ।
દદર્શ પરમાનન્દકન્દલાકારદર્શનમ્ ॥

૬૪. શિવલિઙ્ગં મણિમયં દીપ્યમાનં સ્વતેજસા ।
હર્ષગદ્ગદયા વાચા જયેતિ પરિશંસિની ॥

૬૫. ઉદઞ્ચત્ચારુરોમાઞ્ચ સમુત્થાય નિજાસનાત્ ।
મૌલૌ કમલશોભામુદ્ધાન્તી નિજાઞ્જલિમ્ ॥

૬૬. આનન્દબાષ્પપૂરાભ્યાં લોચનાભ્યામવિશ્રમમ્ ।
સ્વવારિપૂરવિભ્રાન્તિં દર્શયન્તીવ સન્તતિમ્ ॥

૬૭. વિકિરન્તી સ્મિતજ્યોત્સ્નાં મુક્તાજાલમિવ સ્વકમ્ ।
ઈષત્ આનન્દદેહા તુ તુષ્ટાવ પરમેશ્વરમ્ ॥

૬૮. દેવી –
ભવાય ભવનાશાય નમઃ પાપાપહારિણે ।
પરિપૂર્ણાય પૂર્ણેન્દુવદનાય નમો નમઃ ॥

૬૯. નમો વિશ્વાય પતયે વિશ્વરક્ષાવિનોદિને ।
વેદવેદાન્તવેદ્યાય નમસ્તે વિદિતાત્મને ॥

૭૦. શર્વાય નિર્વિકારાય શમ્ભવે વેધસે નમઃ ।
ગઙ્ગાધરાય ગૌરાય ગિરીશાય નમો નમઃ ॥

૭૧. પાપઘ્નાય ભયઘ્નાય પરઞ્જોતિસ્વરૂપિણે ।
વિરૂપાક્ષાય વીરાય વિધાત્રે બ્રહ્મણે નમઃ ॥

૭૨. અવ્યક્તવ્યક્તરૂપાય વ્યક્તિવિન્યાસસાક્ષિણે ।
વિશ્વરક્ષાધ્વરૈકાન્તદીક્ષિતાય નમો નમઃ ॥

૭૩. નમઃ સોમાવતંસાય ધાત્રે ભસ્માઙ્ગરાગિણે ।
ગિરીશાયાખિલેશાય પાપનાશાય તે નમઃ ॥

૭૪. કર્મણે નિર્મિતાશેષભુવનઘ્નાય હારિણે ।
વિશ્વત્રાણાય વીરાય કાલરુદ્રાય તે નમઃ ॥

૭૫. નમઃ પાપવિનાશાય પાપનાશાય શમ્ભવે ।
પાતકધ્વાન્તરવયે શિવયાશ્લિષ્ટ મૂર્તયે ॥

૭૬. નમો નમસ્તુભ્યં નમસ્તુભ્યં પિનાકિને ।
નમસ્તુભ્યં નમસ્તુભ્યં નમસ્તુભ્યં નમો નમઃ ॥

૭૭. શિવશમ્ભો મહાદેવ દેવદેવ સદાશિવ ।
જગન્નાથ જગન્નાથ પાપનાશ નમો નમઃ ॥

૭૮. ઇથં સ્તુવન્ત્યાં તામ્રાયાં વિસ્મિતેષુ જનેષ્વપિ ।
તલ્લિઙ્ગાત્ મૂર્તિમાનગ્રે પ્રત્યદૃશ્યત શઙ્કરઃ ॥

૭૯. ગઙ્ગાધરઃ શશિધરઃ શિતિગ્રીવઃ ત્રિલોચનઃ ।
શૂલટઙ્કાસમાયુક્તઃ દરસ્મેરમુખામ્બુજઃ ॥

૮૦. મેઘદુન્દુભિગમ્ભીરં વચનં વ્યાજહાર સઃ ।
સદાશિવઃ –
અયિ મઙ્ગલમાઙ્ગલ્યે વત્સે મલયનન્દિનિ ॥

૮૧. વ્રતેનાચરિતેનાદ્ય ત્વયા પ્રીતોઽસ્મિ શોભને ।
સન્તુ તે મત્પ્રસાદેન પરિપૂર્ણા મનોરથાઃ ॥

૮૨. ત્વન્નામ કીર્તનાત્ ધ્યાનાત્ સ્પર્શનાદપિ મજ્જનાત્ ।
બ્રહ્મહત્યાદયઃ પાપાઃ ભસ્મીભૂતા ભવન્તુ ચ ॥

૮૩. કોટયો બ્રહ્મહત્યાનામસઙ્ખ્યાકઃ પ્રકોટયઃ ।
સદ્યઃ પ્રલયમાયાન્તુ ત્વદમ્બુગણસેવનાત્ ॥

૮૪. યે ચ સ્નાન્ત્યપિ મજ્જન્તિ ધર્મદ્રવેઽમ્ભસિ ।
સદ્યઃ પ્રલયમાયાન્તુ મહાપાતકકોટયઃ ॥

૮૫. ભસ્મીભૂતાઃ ભવિષ્યન્તિ વહ્નિના તૂલરાશિવત્ ।
બ્રહ્માણ્ડોદરતીર્થાનિ મહાપાપહરાણ્યપિ ॥

૮૬. પ્રત્યબ્દં ત્વામુપેત્યાત્ર નિર્મલાનિ ભવન્તુ હિ ।
ત્વાં વિશન્તુ ન પાપાનિ ત્વદ્ભક્તાનામપિધ્રુવમ્ ॥

૮૭. પ્રસન્નોઽસ્મિ વરારોહે કામાનિષ્ટાન્ દદામિ તે ।
વૃણીષ્વ વરમવ્યગ્રે લોકાનાં હિતકામ્યયા ॥

૮૮. શ્રીદેવી –
ભગવન્ નિત્યસાન્નિધ્યં અત્ર કર્તું ત્વમર્હસિ ।

યદ્યહં ભાજનં શમ્ભો ત્વત્કૃપાયાઃ પુરાન્તક ॥

૮૯. અત્રૈવ હિ વસન્ નિત્યં લોકાન્ અનુગૃહાણ ભો ।
તદેતત્ નામ વિમલં પાપનાશ ઇતીરિતમ્ ॥

૯૦. પ્રસાદાત્ તવ સર્વત્ર લોકે વિખ્યાતિમૃચ્છતિ ।
ચાપાદિત્યે તુ યે કેચિત્ સ્નાત્વાત્રામ્ભસિ મામકે ॥

૯૧. ત્વાં પશ્યન્તિ જનાઃ તેષાં નૈવ ભૂયાત્ પુનર્ભવઃ ।
પૂર્ણા કુમુદ્વતી ચૈવ મયાત્ર સહ સઙ્ગતે ॥

૯૨. અત્ર મજ્જન્તિ યે મર્ત્યાઃ તાન્ સ્પૃશન્તિ ન પાતકાઃ ।
વ્યોમપુષ્કરિણીતીર્થં ત્રિણદીસઙ્ગમં તહા ॥

૯૩. યે સ્પૃશન્ત્યપિ મજ્જન્તિ તેષાં નાસ્તિ પુનર્ભવઃ ।
ઇત્યર્થિતો મહાદેવઃ તથા શૈલેન્દ્રકન્યયા ॥

૯૪. તથેત્યુક્ત્વા મહાલિઙ્ગે પ્રવિવેશ પુનઃ શિવઃ ।
તતઃ પ્રહૃષ્ટા મલયાત્મજા નદી પ્રસાદમાસાદ્ય સદાશિવાદિયમ્ ।
૯૫. સમન્વિતા કુમ્ભભુવા ચ દર્શનં યથોચિતં તત્ર ચકાર સમ્ભ્રમાત્ ।
ઉપાગતે પૂષણિ પુણ્યભાજનં પ્રવિષ્ટરૂપં મકરં મનોહરમ્ । ૧
શિવાત્ અવાપ્યાભ્યુદયં મણિપ્રસૂઃ સ્વાવાસભૂમિં મુનિનાપ્યવાપ ॥

ઇતિ એકવિંશોઽધ્યાયઃ । Pro.Total = 1459 + 95 = 1554.

## દ્વાવિંશોઽધ્યાયઃ

તામ્રપર્ણ્યા ઉત્પત્તિમારભ્ય સઙ્ગમપર્યન્તં
વિદ્યમાનાનાં તીર્થાનાં નામધેયાનિ ।

વીરસેનઃ ઉવાચ -
૧. અહો મલયનન્દિન્યાઃ ચરિતં ચિત્તતોષણમ્ ।
શ઼ૃણ્વતોઽપિ ન મે તૃપ્તિં પ્રયચ્છતિ તદદ્ભુતમ્ ॥

૨. પાવનઃ પાપનાશાખ્યઃ પરમાત્મા સદાશિવઃ ।
સેવ્ય એવ સદા લોકૈઃ પુરુષાર્થાનુકાઙ્ક્ષિભિઃ ॥

૩. શ્રુતાઃ ચ મહિમા તસ્યાઃ તામ્રયાશ્ચ વિશેષતઃ ।
ચરિતં શ્રોતુમિચ્છામિ વદ મે વિસ્તરાત્ ગુરો ॥

૪. કાનિ પુણ્યાનિ તીર્થાનિ કાનિ ચાયતાનિ અપિ ।
તદશેષં ક્રમેણૈવ સોપાખ્યાનં મહામુને ॥

૫. પ્રકાશાય યથાતત્ત્વં લોકાનિવ દિવાકરઃ ।
કૂલદ્વયે મહાનદ્યાઃ મધ્યે સાગરશૈલયોઃ ॥

૬. કાનિ પુણ્યાનિ તીર્થાનિ કાનિક્ષેત્રાણિ વૈ પુનઃ ।
મુખ્યાનિ આચક્ષ્વ મે બ્રહ્મન્ શ્રુણ્વતો મે કુતૂહલમ્ ॥

૭. ઋષિઃ –
રાજન્ કથયતો નિત્યં કથાં પાપાપહારિણીમ્ ।
સાવધાનેન મનસા શ્રુણુ શ્રવણમઙ્ગલમ્ ॥

૮. આસાગરં મહારાજ સંપ્રવૃત્તા મહાનદી ।
પુણ્યક્ષેત્રૈઃ આશ્રમૈશ્ચ દેવાગારૈઃ દ્વિજાલયૈઃ ॥

૯. સમ્પૂર્ણકૂલા કલ્યાણી નિત્યોત્સવપરિષ્કૃતા ।
શિવક્ષેત્રાણ્યસઙ્ખ્યાનિ વિષ્ણુક્ષેત્રાણ્યનેકશઃ ॥

૧૦. તથા હેરમ્બભવનં માતૃસ્થાનાન્યનેકશઃ ।
સ્કન્દેન્દુભાસ્કરાવાસાનિ આશ્રમાઃ પુણ્યકર્મણામ્ ॥

૧૧. એષાં દર્શનમાત્રેણ નરઃ પાપૈઃ પ્રમુચ્યતે ।
એતાનિ ક્રમશો વક્ષ્યે તીર્થક્ષેત્રાણિ ભૂપતે ॥

૧૨. ગુહાદ્વારાત્ વિનિષ્ક્રમ્ય વિભક્તા પઞ્ચધા નદી ।
પરુષ્ણી કમલા ચૈવ ઘૃતધારાભિધા તથા ॥

૧૩. એતાઃ તિસ્રો મહાનદ્યઃ પશ્ચિમાશાં પ્રવર્તિતાઃ ।
દક્ષિણાભિમુખી પુણ્યા પ્રયાતિ વરુણાલયમ્ ॥

૧૪. પૂર્વાશાં પ્રવૃત્તા સા પરાશક્તિસમુદ્ભવા ।
તામ્રપર્ણીતિ વિખ્યાતા પ્રયાતિ વરુણાલયમ્ ॥

૧૫. તસ્યાસ્તુ દક્ષિણે તીરે તીર્થમૂર્જાખ્યમિષ્યતે ।
તથાપ્યુત્તરભાગે તુ ઇષાખ્યમપરં શુભમ્ ॥

૧૬. એતયોર્મજ્જનાત્ એવ નરો વિજ્ઞાનભાગ્ ભવેત્ ।
તસ્યાપિ પૂર્વદિગ્ભાગે વૃષાङ્કં તીર્થમુત્તમમ્ ॥

૧૭. યત્ર દેવી તામ્રપર્ણી સાન્નિધ્યં કુરુતે સદા ।

તતોઽપિ દક્ષિણે તીરે તીર્થ્યમાગસ્ત્યમુચ્યતે ॥

૧૮. અગસ્ત્યેશાભિતં લિઙ્ગં દર્શનાત્ મુક્તિદં નૃણામ્ ।
તત્ સમીપે ચક્રતીર્થં પાવનાખ્યં ચ તત્પરમ્ ॥

૧૯. વામનં પશ્ચિમે તીરે વામનેન પ્રકલ્પિતમ્ ।
તસ્માત્ ઉત્તરતઃ કિઞ્ચિત્ તીર્થં હેરમ્બનિર્મિતમ્ ॥

૨૦. તત્પરો નારસિંહાખ્યં તીર્થં તેન વિનિર્મિતમ્ ।
ભોગિરાજનદીતીર્થં તામ્રાયાં પૂર્વરોદસિ ॥

૨૧. ગુપ્તિકુમ્ભાદ્રિણોર્મધ્યે પ્રોક્તાન્યેતાનિ ભૂપતે ।
કુમ્ભાદ્રિશૃઙ્ગાત્ સ્રવતે સરિત્ ઉત્તરતઃ શુભા ॥

૨૨. કલમ્બતીર્થમિત્યુક્તં બાણતીર્થં ચ તત્ કિલ ।
પાઞ્ચજન્યં તત્સમીપે સરિત્ રોદસિ પશ્ચિમે ॥

૨૩. તતઃ ચક્રશિલાતીર્થમુત્તરેણ સમીપતઃ ।
તસ્યાપ્યુત્તરભાગે તુ હયગ્રીવાશ્રમં મહત્ ॥

૨૪. તત્રૈવ ખલુ વારાહં મુનિ તીર્થં તદન્તિકે ।
તત્ર તામ્રા દ્વિધા ભૂતા પૂર્ણા પ્રવહતે નદી ॥

૨૫. આશ્રમાત્ પશ્ચિમે ભાગે તીર્થં પૈશઙ્ગિલં વિદુઃ ।
યત્ર મુક્તાશિલા નામ નિત્યં મુનિજનોષિતાઃ ॥

૨૬. ઇરાવતી નામ પુણ્યા વાયુકૂટાત્ સમુત્થિતા ।
પશ્ચિમાભિમુખીં તામ્રામુપયાતિ સરિદ્વરામ્ ॥

૨૭. તત્રૈવ મુનિ તીર્થં તુ મુનિભિઃ પરિકલ્પિતમ્ ।
તતોઽપ્યુત્તરભાગે તુ કન્યાતીર્થં પ્રચક્ષતે ॥

૨૮. યત્ર રુદ્રઃ તપસ્તપ્ત્વા પ્રાપ સર્વજ્ઞતાં પુરા ।
તદાદિ મુનયઃ પ્રાહુઃ પુણ્યાં રુદ્રાટવીમિમામ્ ॥

૨૯. તત્ સમીપે બ્રહ્મશય્યા શિલા કુઙ્કુમસન્નિભા ।
તત્ર તામ્રા ત્રિધા ભૂતા ત્રયીવોદ્વહતે સરિત્ ॥

૩૦. તત્રાપિ વારુણી તીર્થં વરુણોઽર્ચયતે વિધિમ્ ।
પ્રસાદં બ્રહ્મણઃ પ્રાપ્ય જલેશત્વમવાપ્તવાન્ ॥

૩૧. તસ્યાસ્તુ પશ્ચિમે તીરે રમતા તીર્થં પ્રચક્ષતે ।
તત્ર દેવી કમલજા તપસ્તપ્ત્વા મહત્તરમ્ ॥

૩૨. હરેઃ વક્ષસ્થલં પ્રાપ દુષ્પ્રાપં સર્વજન્તુષુ ।
તદન્તિકે મૃગમુખં પાષાણં યત્ર  દૃશ્યતે ॥

૩૩. તત્રૈવ કપિલા તીર્થં ધેન્વા કપિલયા કૃતમ્ ।
એતાનિ પુણ્યતીર્થાનિ દેવકૢપ્તાનિ ભૂપતે ॥

૩૪. જ્યોતિર્મણેઃ કુમ્ભગિરેઃ અન્તરાલગતાનિ હિ ।
જ્યોતિર્મણિમુખે તામ્રા ચન્દ્રસેનાં સમેષ્યતિ ॥

૩૫. તદસ્તુ પાપનાશાખ્યં તીર્થં પૈનાકમેવ તત્ ।
તસ્યાપિ કિઞ્ચિત્ ઈશાને તીર્થં નારદસંજ્ઞિતમ્ ॥

૩૬. તસ્માત્ ઉદીચ્યાનાં તીર્થાનાં પઞ્ચવારણમિષ્યતે ।
તતઃ પ્રાચેતસઃ તીર્થં ધારાદ્રેઃ ઉપકર્ણતઃ ॥

૩૭. ત્રિણદી સઙ્ગમં તીર્થં પાપનાશસ્ય સન્નિધૌ ।
તસ્માત્ ઉત્તરભાગે તુ કૂર્મકૂટાન્તિકે તટે ॥

૩૮. તુમ્બુરોઃ પર્વતસ્યાપિ તીર્થે પુણ્યતમે શુભે ।
પાપનાશાત્  ઉત્તરતઃ તટે નદ્યાસ્તુ પશ્ચિમે ॥

૩૯. નિર્મિતં કપિલેનૈવ તીર્થં સર્વાર્થસાધકમ્ ।
આરભ્ય પુષ્કરસરઃ ધારાદ્રેઃ અવસાનકમ્ ॥

૪૦. પ્રોક્તાન્યેતાનિ તીર્થાનિ પુણ્યાનિ જગતીપતે ।
તામ્રાયાઃ દક્ષિણે તીરે દેવી તીર્થં પ્રશસ્યતે ॥

૪૧. મુક્તાવતી મણિવતી મિલિત્વા યત્ર સઙ્ગતે ।
તત્ર સાન્નિધ્યકરણી નિત્યં કાત્યાયની પરા ॥

૪૨. ક્ષેત્રં મુક્તાવતી ઘોરા નદ્યોરભ્યન્તરં મહત્ ।
તામ્રાયાઃ દક્ષિણે તીરે ચન્દ્રકેતુમથોત્તરે ॥

૪૩. ધર્મારણ્યમિતિ ખ્યાતં મુનીન્દ્રનિલયં વિદુઃ ।
તત્ર તીર્થાનિ અસઙ્ખ્યાનિ નાલં વક્તું મયા વિભો ॥

૪૪. બહુત્વાત્ બ્રહ્મત્વત્વાત્ ચ માહાત્મ્યાત્ ચ કેવલમ્ ।
તામ્રાયા ઉત્તરે તીરે દીપતીર્થં પ્રચક્ષતે ॥

૪૫. શાલાતીર્થં તત્ સમીપે કાશ્યપં તુ તતઃ પરમ્ ।
કણ્વાખ્યં બ્રહ્મદાખ્યં ચ ગોષ્ઠીશાખ્યં ચ કથ્યતે ॥

૪૬. આનદીસઙ્ગમમારભ્ય યાવદ્ઘોરાસમાગમમ્ ।
એતાનિ પુણ્યતીર્થાનિ કથિતાનિ મહામતે ॥

૪૭. અગ્રેઽપ્યામલકારણ્યાત્ કણ્વતીર્થાત્ તથોત્તરે ।
માણ્ડવ્યતીર્થમિત્યુક્તં તામ્રાયાઃ પશ્ચિમે તટે ॥

૪૮. તદભ્યાશે મિત્રતીર્થં ઘટના સઙ્ગમં ચ તત્ ।
પ્રાચ્યાં દિશિ વિતન્વાના મુખ્યા મલયનન્દિની ॥

૪૯. પ્રયાતિ તત્રોત્તરતઃ તીર્થં માનવમુચ્યતે ।
મનુના નિર્મિતં પૂર્વં સ્થાપયિત્વા સદાશિવમ્ ॥

૫૦. તસ્માત્ તુ દક્ષિણે તીરે પુટાર્જુનપુરે શુભે ।
શિવલિઙ્ગાત્ પશ્ચિમતઃ તીર્થં ગૌતમ સંજ્ઞિતમ્ ॥

૫૧. સુરેન્દ્રમોક્ષણં નામ તત્ પ્રસિદ્ધમભૂત્ પુનઃ ।
તસ્માત્ દક્ષિણતઃ તીર્થં નામ્ના પૈશાચમોચનમ્ ॥

૫૨. ઘટના સર્યૂ તામ્રા ત્રિવેણી સ્નાનમાચરેત્ ।
ધર્મધારાખ્યતીર્થં તુ દેવાત્ ઉત્તરતો ભવેત્ ॥

૫૩. તસ્યાપિ પૂર્વદિગ્ભાગે કર્મતીર્થં પ્રચક્ષતે ।
પુટાર્જુનાત્ દક્ષિણતઃ સિદ્ધતીર્થમુદાહૃતમ્ ॥

૫૪. તદભ્યાશે દક્ષિણતઃ તામ્રાયાઃ પૂર્વરોદસિ ।
ગજેન્દ્રમોક્ષમિત્યુક્તં પ્રસિદ્ધં ભુવનત્રયે ॥

૫૫. ઘોરા તામ્રા સઙ્ગમાત્ તુ યાવત્ શૌણ્ડીરકં ભવેત્ ।
તાવત્ તીરદ્વયે ચાપિ તીર્થાયેતાનિ ભૂપતે ॥

૫૬. મહાનાગાલયં નામ ક્ષેત્રં કુરવકાવૃતમ્ ।
તામ્રાયાઃ દક્ષિણે તીરે તીર્થં પુષ્પવનેશિતુઃ ॥

૫૭. તસ્માત્ ઉતરતઃ તીરે ભદ્રારણ્યં પ્રચક્ષતે ।
તત્ર કામપુરં નામ પાણ્ડ્યરાજવિભૂષણમ્ ॥

૫૮. ગન્ધર્વકન્યાશાપેન દેવભોગવિવર્જિતઃ ।

કુબેરતનયો નામ્ના મણિગ્રીવ ઇતિ શ્રુતઃ ॥

૫૯. તત્રૈવ વાસમકરોત્ સભાર્યઃ સપરિચ્છદઃ ।
આશાપમોક્ષં વસતા તેનૈવ નિયતાત્મના ॥

૬૦. આરાધિતો મહેશાનઃ પ્રસાદમકરોત્ વિભુઃ ।
અનુજ્ઞાતઃ મણિગ્રીવો હેરમ્બેણાત્મવિધયા ॥

૬૧. ભૈરવં પૂજયિત્વા તુ તામ્રાયાં મજ્જનં વ્યધાત્ ।
સદ્યો વિમુક્તશાપસ્તુ કૃતાર્થઃ સ્વપુરં યયૌ ॥

૬૨. તદાદિ ભૈરવતીર્થં યમતીર્થં તદન્તિકે ।
તત્ પૂર્વભાગે પ્રથિતં ગોતીર્થં ધર્મવર્ધનમ્ ॥

૬૩. દક્ષિણાબ્ધિમુખે તામ્રા દૃશ્યતે તત્ર પાવની ।
અત્ર નીલવનં નામ પરિતો યોજનાયતમ્ ॥

૬૪. તત્ર જ્યોતિર્મતા નામ ઋષયઃ ઊર્ધ્વમન્થિનઃ ।
તેષામાયતનં ક્ષેત્રં દર્શનાત્ મુક્તિદં નૃણામ્ ॥

૬૫. તસ્માત્ દક્ષિણતઃ કિઞ્ચિત્ દશ પઞ્ચ ચ સપ્ત ચ ।
ગોતીર્થાત્ દક્ષિણે ભાગે તામ્રાયાઃ દક્ષિણે તટે ॥

૬૬. દુર્ગાતીર્થમિતિ ખ્યાતં યત્ર દુર્ગા વિરાજતે ।
તત્પૂર્વભાગે ક્રોશાર્ધાત્ વિષ્ણુતીર્થં મહામતે ॥

૬૭. તદગ્રે સોમતીર્થં ચ વ્યાસતીર્થં તદન્તિકે ।
માર્કણ્ડેયં મહાતીર્થં રોમશં ચ તતઃ પરમ્ ॥

૬૮. તતો દૌર્વાસસં તીર્થં તદગ્રે ભાર્ગવં મહત્ ।
અર્ધક્રોશાત્ પૂર્વભાગે વૈનતેયાશ્રમાન્તિકે ॥

૬૯. કચાલિકા નામ નદી નન્દાટવિસમુદ્ભવા ।
નન્દિનીમિતિ શંસન્તિ તદરણ્યોદ્ભવેતિ ચ ॥

૭૦. નન્દિનીસઙ્ગમં તીર્થં તદરણ્યોદ્ભવેતિ ચ ।
નન્દિનીસઙ્ગમં તીર્થં વૈનતેયસ્ય પક્ષિણઃ ॥

૭૧. તતોપ્યુદીચ્યાં તામ્રાયાં કૂલે કુન્દાટવી તટે ।
છાયાતીર્થમિતિખ્યાતમાદેશાત્ પરમેશિતુ ॥

૭૨. યત્ર છાયાં સમુદ્વીક્ષ્ય તીર્થે સ્વાનપિ પાતકી ।
મુચ્યતે સર્વપાપેભ્યો નિષ્ટપ્તતપનીયવત્ ॥

૭૩. પ્રવાલમઞ્જરી નામ વિદ્યાધરવધૂઃ પુરા ।
આરાધ્ય ધાત્રીં તપસા લબ્ધ્વૈતત્ પરમાશ્રમમ્ ॥

૭૪. દિવ્યવર્ષશતં તત્ર તતાપ પરમં તપઃ ।
તસ્યાઃ પ્રસાદં કુર્વન્ત્યાઃ ભવાન્યા તત્ર કલ્પિતમ્ ॥

૭૫. તીર્થં છાયાભિતં નામ મહાપાતકનાશનમ્ ।
તતોઽપિ પૂર્વદિગ્ભાગે ગાન્ધર્વં તીર્થમુત્તમમ્ ॥

૭૬. તદગ્રે ભાનુતીર્થં તુ ભાનુના નિર્મિતં પુરા ।
તતઃ પરં બ્રહ્મવનં સમન્તાત્ યોજનદ્વયમ્ ।
૭૭. આર્દ્રાવતીચન્દનદ્યોઃ મધ્યે જ્યોતિર્વનં મહત્ ।
તત્ર પ્રભાવતી તીર્થં ગૌરીતીર્થં મહત્તરમ્ ॥

૭૮. તથા સારસ્વતં તીર્થં વૃષતીર્થં ચ પુણ્યદમ્ ।
આર્દ્રાપગા સઙ્ગમે તુ ચન્દ્રશાલાભિતે સ્થલે ॥

૭૯. મન્ત્રેશ્વરાત્ ઉત્તરતો મન્ત્રતીર્થં મહત્તરમ્ ।
શ્યામાનદ્યાઃ પરં રાજન્ તીરયોરુભયોરપિ ॥

૮૦. બ્રહ્મારણ્યમિતિ ખ્યાતં તીર્થાનિ શતશોઽત્ર વૈ ।
દુર્ગાતીર્થં સમારભ્ય યાવત્ કન્ધરભૂધરમ્ ॥

૮૧. કથિતાન્યેવ તીર્થાનિ શ્રુણુ રાજન્ તતઃ પરમ્ ।
તામ્રાયાઃપશ્ચિમે તીરે યાગતીર્થમિતીરિતમ્ ॥

૮૨. કિઞ્ચિત્ ઉત્તરતઃ તસ્માત્ રુદ્રાખ્યં તીર્થમુત્તમમ્ ।
ક્ષિપ્તપુષ્પવતીતીર્થમુત્તરેણ તદન્તિકે ॥

૮૩. તતોઽર્ધક્રોશતો રાજન્ આર્ષતીર્થં પ્રશસ્યતે ।
તસ્માત્ તુ દક્ષિણે તીરે શ્યામાશઙ્ગાત્ ચ પૂર્વતઃ ॥

૮૪. બ્રહ્મારણ્યે ચતુઃસ્થાનમગ્નિતીર્થમુદાહૃતમ્ ।
એષા બ્રહ્મવને તામ્રા ક્રોશાર્ધં પૂર્વવાહિની ॥

૮૫. ઉત્તરાભિમુખી ક્રોશત્રિતયં ચ તતઃ પરમ્ ।
પુનઃ ક્રોશાત્રયં પૂર્વવાહિની બ્રહ્મકાનને ॥

૮૬. એતાવત્ પરમં ક્ષેત્રં તીરયોરુભયોરપિ ।
મહાતીર્થં વિના રાજન્ દૃશ્યતે ન પદાન્તરમ્ ॥

૮૭. ઘર્ઘરાત્ અગ્નિદિગ્ભાગે તામ્રાયાઃ પૂર્વરોદસિ ।
સ્મૃતિ તીર્થમિત્યુક્તં તામ્રાયાઃ પૂર્વ રોદસિ ॥

૮૮. ભુજઙ્ગમોક્ષણં તીર્થં તીર્થં સૂચીનુખં તતઃ ।
સિંહતીર્થં કેતુતીર્થં ઉષાતીથં હલાનનમ્ ॥

૮૯. તતોયુત્તરતીર્થે તુ રામતીર્થં પ્રશસ્યતે ।
ઋષિતીર્થં પાદતીર્થં તીર્થં પાપવિમોચનમ્ ॥

૯૦. અતઃ પરં પ્રવક્ષ્યામિ બ્રહ્મારણ્યાત્ મહીપતે ।
તત્ ક્ષેત્રાદિપરં રાજન્ નામ્ના ભિન્નરથં વનમ્ ॥

૯૧. તીરે ચ દક્ષિણે યસ્યાઃ પક્ષિતીર્થં પ્રશસ્યતે ।
અશ્રુતીર્થં હાસતીર્થં સંસૃલાખ્યં તતઃ પરમ્ ॥

૯૨. તથૈવોત્તરતીરે ચ નદીસ્તમ્ભનમુચ્યતે ।
પૂજાપત્તનમિત્યુક્તં તદગ્રે દુરિતાપહમ્ ॥

૯૩. મહાલોહિતસંસર્ગાત્ શ્યામાતીર્થં પ્રશસ્યતે ।
તતો વિષ્ણુવનં નામ યત્ર ચિત્રા મહાનદી ॥

૯૪. સૈષા મલયનન્દિન્યાઃ સઙ્ગતા પાપહારિણી ।
નદ્યાઃ ઉત્તરે તીરે ષટ્ક્રોશાયામવિસ્તૃતે ॥

૯૫. ગોતીર્થં વિષ્ણુતીર્થં ચ કુશસ્તમ્ભાયિતં તથા ।
મૃત્યુઞ્જયં નામ તીર્થં તીર્થં વૈ તૈત્તરીયકમ્ ॥

૯૬. રાજસૂયાભિતં તીર્થં સપ્તમં ચન્દ્રિકાવૃતમ્ ।
તસ્યૈવ દક્ષિણે તીરે સપ્તર્ષીણાં મહાત્મનામ્ ॥

૯૭. તીર્થાનિ સપ્તક્ષેત્રેષુ કુરઙ્ગઃ તીર્થમુચ્યતે ।
બૃહદ્વનાત્ અથ ક્ષેત્રં માહિષ્મં નામ નામતઃ ॥

૯૮. તત્ર તીર્થાનિ પુણ્યાનિ શતશોઽથ સહસ્રશઃ ।
તસ્યવોત્તરતીરે તુ શ્રીમત્ ચન્દનકાનને ॥

૯૯. શ્રીવૈકુણ્ઠાભિતં તીર્થં સમીપે શારધાભિતમ્ ।
તસ્માત્ દક્ષિણતઃ કિઞ્ચિત્ સ્મરાલાખ્યં પ્રચક્ષતે ॥

૧૦૦. મહાકુસુમવૃષ્ટિશ્ચ તથૈવ શતબુદ્બુદમ્ ।
તદસ્તુ પૂર્વદિગ્ભાગે માયારણ્યં પ્રચક્ષતે ॥

૧૦૧. ગ્રાવાખ્યં કુરુતો યસ્માત્ નામ્ના ગ્રવાઙ્કુરં પુનઃ ।
કાન્તીશ્વરાભિતં તીર્થં કૈવલ્યં ચ નિયમ્યતે ॥

૧૦૨. તસ્યાસ્તુ દક્ષિણે તીરે શ્રીરમાનગરં મહત્ ।
ચિઞ્ચારૂપેણ યત્રાસ્તે વિનિદ્રો ભુજગેસ્વરઃ ॥

૧૦૩. પ્રાપ્તસારૂપ્યસૌભાગ્યઃ ચતુર્બાહુઃ ખગેશ્વરઃ ।
ન મુઞ્ચતિ શુભં ક્ષેત્રં હરિસેવનલાલસઃ ॥

૧૦૪. યત્ર સિદ્ધખગા નિત્યમુચ્ચરન્તિ મહામનુમ્ ।
યત્ર સ્થિતાનાં મર્ત્યાનામન્તે હરિપદં ધ્રુવમ્ ॥

૧૦૫. જપન્તિ રુદ્રાઃ તત્રૈવ હરિરિત્યક્ષરદ્વયમ્ ।
યત્ર દેહપરિત્યાગં કર્મત્યાગમુદાહૃતમ્ ॥

૧૦૬. રમાં રમયતા નિત્યં હરિણાપિ ન મુચ્યતે ।
તસ્ય ક્ષેત્રસ્ય માહાત્મ્યં હરિર્વેત્તિ ન ચાપરે ॥

૧૦૭. તત્ર તીર્થં પ્રવક્ષ્યામિ ગદતઃ શ્રુણુ મે વિભો ।
ભોગિતીર્થં પદ્મતીર્થં ચક્રતીર્થમનન્તરમ્ ॥

૧૦૮. શઙ્ખરાજાભિતં તીર્થં ધર્મતીર્થમનન્તરમ્ ।
મેખલાખ્યં મહત્ તીર્થં તતઃ પઞ્ચાયુધં મહત્ ॥

૧૦૯. શતરુદ્રીયં તીર્થં વેણુતીર્થમનન્તરમ્ ।
ઉક્તાન્યેતાનિ તીર્થાનિ શ્રીપુરે પ્રથિતાનિ તુ ॥

૧૧૦. નિધિતીર્થં કાલતીર્થં દિવા/નિશાતીર્થમનન્તરમ્ ।
શ્રુતિતીર્થં કલાતીર્થં યત્ર સાક્ષાત્ હરિસ્સ્વયમ્ ॥

૧૧૧. તતો મઙ્ગલતીર્થં ચ પિતૃતીર્થમનન્તરમ્ ।
તદગ્રે વ્યાઘ્રતીર્થં સ્યાત્ તતઃ સોમવનં મહત્ ॥

૧૧૨. વાસ્તુતીર્થં સોમતીર્થં ચણ્ડિકાતીર્થમગ્રતઃ ।
વલ્લીતીર્થં હર્ષતીર્થં ગૌરીતીર્થમનન્તરમ્ ॥

૧૧૩. શમ્ભુનારાયણં તીર્થં શઙ્ખરાજાભિતં તથા ।

એતાનિ સોમારણ્યે તુ પ્રથિતાનિ મહીતલે ॥

૧૧૪. નદ્યાઃ તયોઃ ઉત્તરે તીરે ગુહાનાલાસ્યદર્શને ।
બહુબિન્દુહરં તીર્થં ત્રયીતીર્થં સમન્તતઃ ॥

૧૧૫. મુક્તિમુદ્રાભિતં તીર્થં જ્ઞાનતીર્થમતઃ પરમ્ ।
તથા પુનર્નવં તીર્થં તત્સમીપે મદાવલમ્ ॥

૧૧૬. તથાપ્યગસ્ત્યતીર્થં ચ તીર્થં ભૈરવસંજ્ઞકમ્ ।
તદસ્તુ સઙ્ગમં તીર્થં તત્ ત્રિધા પરિકીર્તિતમ્ ॥

૧૧૭. ગાયત્રં ચાપિ સાવિત્રં સારસ્વતમતઃ પરમ્ ।
એતાનિ પુણ્યતીર્થાનિ પ્રોક્તાનિ તવ ભૂપતે ॥

૧૧૮. એષાં દર્શનમાત્રેણ મહાવ્રતફલં ભવેત્ ।
એતાનિ અધુના રાજન્ સંક્ષેપાત્ પરિકિર્તિતમ્ ॥

૧૧૯. અનુક્તાન્યપિ તીર્થાનિ શતશોऽથ સહસ્રશઃ ।
તથાપિ તેષુ ચ સ્થાનાં તીર્થાનાં રાજસત્તમ ।
માહાત્મ્યં સંપ્રવક્ષ્યામિ શ્રુણુ રાજન્ યથાતથમ્ ॥

ઇતિ દ્વાવિંશઃ સર્ગઃ ।　　　Pro Total = 1554 + 119 =1673.

## ત્રયોવિંશઃ સર્ગઃ

શ્યેનોપાખ્યાન મ્ ।

૧. રાજન્ મલયજાતાયાઃ તીરયોરુભયોરપિ ।
અપિ ગોષ્પદમાત્રં વા ન હિ તીર્થં વિના સ્થલમ્ ॥

૨. પદે પદે તીર્થમયી તામ્રપર્ણી સરિદ્વરા ।
દેવૈશ્ચ ઋષિભિસ્સિદ્ધૈઃ શમ્ભુવિશ્વમ્ભરાદિભિઃ ॥

૩. ઉપાસ્યામાના માહાત્મ્યાત્ તટિનીતટસંસ્થિતૈઃ ।
નૈવ મુઞ્ચન્તિ તટિનીમપિ બ્રહ્મપુરોગમાઃ ॥

૪. કાઙ્ક્ષન્તઃ સિદ્ધિમતુલાં મહતીં મલયાત્મજામ્ ।
ઉક્તેષુ એતેષુ તીર્થેષુ બ્રહ્મભૂતેષિ ભૂપતે ॥

૫. એકૈકસેવામાત્રેણ મુક્તિં યાતાઃ સહસ્રશઃ ।

અપિ કીટપતઙ્ગાદ્યાઃ તરુગુલ્માદયઃ પરે ॥

૬. સિદ્ધિં પરામનુપ્રાપ્ય ભુક્ત્વાન્ ભોગાન્ યથેપ્સિતાન્ ।
તદન્તે મુક્તિમાપન્નાઃ કિં પુનર્મનુજા ભુવિ ॥

૭. પ્લવમાનં ભવામ્ભોધૌ ક્લિશ્યમાનં જનમ્ ।
સમાલોક્ય મહાદેવી પ્રાર્થિતા પરમાત્મના ॥

૮. કરુણાસાન્દ્રહૃદયા શિવૈકકલયા પુરા ।
તીર્થરૂપં સમાદાય વર્ધતે મલયાચલાત્ ॥

૯. તસ્માત્ અત્રૈવ દેવાઃ ચ બ્રાહ્મણાઃ સ્મૃતયસ્તથા ।
ક્રતવો મન્ત્રતન્ત્રાખ્યાઃ નિત્યમત્ર વસન્તિ હિ ॥

૧૦. નૈવ પાતકસઙ્ઘાતૈઃ બાધ્યન્તે તીરયોર્જનાઃ ।
એષુ પુણ્યતમેષ્વસ્યાઃ મયોક્તેષુ મહામતે ॥

૧૧. પ્રસિદ્ધાનિ વિશેષેણ નિબોધત નરાધિપ ।
શાલાતીર્થં દીપતીર્થં ગજેન્દ્રવરદાલયમ્ ॥

૧૨. પુટાર્જુનપુરસ્થાનં મહાદુર્ગાલયં તથા ।
મણિગ્રીવપુરં ચૈવ ચૈવ સોમરાજવિમોક્ષણમ્ ॥

૧૩. વ્યાસાશ્રમં રોમશાખ્યં મહાજ્યોતિર્વનં તથા ।
છાયાતીર્થં મન્ત્રતીર્થમગ્નિવાયું ચતુષ્ટયમ્ ॥

૧૪. બ્રહ્મવૃદ્ધપુરં નામ તીર્થં વિષ્ણુવનં તથા ।
વૈકુણ્ઠં શ્રીપુરં સ્થાનં સોમારણ્યસઙ્ગમમ્ ॥

૧૫. એતાનિ ખલુ મુખ્યાનિ પુરાણે પઠિતાન્યપિ ।
બ્રાહ્મણા ઇવ મર્ત્યેષુ કપિલા ઇવ ધેનુષુ ॥

૧૬. યથોપનિષદઃ શ્રેષ્ઠાઃ વેદેષુ મનુજાધિપ ।
વિંશત્યેતાનિ મુખ્યાનિ તથા તીર્થેષ્વમીષુ ચ ॥

૧૭. સર્વોત્કૃષ્ટા તામ્રપર્ણી શિવાદ્યૈરપિપૂજિતા ।
અનેકકોટિ તીર્થાનાં બ્રહ્માણ્ડોદરવર્તિનામ્ ।
સૈષા સ્યાત્ અધિદેવતા ॥

૧૮. ક્રતૂનામપિ મન્ત્રાણાં કોટિઃ સ્યાત્ જગતીતલે ।
મહાપાત્કકોટીનામન્યેષામપિ ભૂપતે ॥

૧૯. અવસ્થાનસ્થલમિદં પ્રાહુઃ તીરયુગં તથા ।
અપાયમાપદામમ્ભઃ તમસામંશુમાનિવ ॥

૨૦. નીહારમિવ પદ્માનાં અનીતિઃ યશસામિવ ।
તામ્રપર્ણીતટદ્વન્દ્વં પાપાનામપનોદને ।(અઘાનામપમાર્ગણમ્)
૨૧. નૈવોપાયાન્તરં કિઞ્ચિત્ અત્ર બ્રહ્માણ્ડગહ્વરે ।
પ્રાણાયામાત્ પઞ્ચગવ્યાત્ સુષુમ્નાનુપ્રવેશનાત્ ॥

૨૨. પ્રાજાપત્યાત્ ભગોઃ પાદાત્ હવ્હવાહાનુવેશનાત્ ।
યત્ફલં લભ્યતે પુંસાં તદત્ર સ્નાનતો ભવેત્ ॥

૨૩. અત્રેતિહાસં પરમં પુરા ગીતં મહર્ષિણા ।
શ્રુણુ રાજન્ યથાવૃત્તં વક્તુમાશ્ચર્યસંયુતમ્ ॥

૨૪. પુરા કૃતયુગે કશ્ચિત્ વિષયે પાણ્ડ્યભૂભૃતઃ ।
નિવસન્ શિંશુપારણ્યે કણ્ટકો નામ લુબ્ધકઃ ॥

૨૫. કુટુમ્બભારં ધત્તે માંસેનારહરહર્નયન્ ।
સ કદાચિત્ ધનુષ્પાણિઃ શરી પાશાદિયન્ત્રવાન્ ।
મૃગયા રસિકો ભૂત્વા ચચારારણ્યવીથિકામ્ ॥

૨૬. પરિતઃ પાશયન્ત્રાણિ વિસ્તારયતિ વાગુરામ્ ।
ભ્રામયિત્વા પક્ષિકુલાન્ કરુણં મૃગયૂથિકામ્ ॥

૨૭. આત્માનં ગોપયન્ વૃક્ષકોટરે કુટિલાશયઃ ।
પ્રત્યયાય વિહઙ્ગાનાં મધુરં સમગાયત ॥

૨૮. વ્યાધે વ્યવસ્થિતે તાવત્ એવમુત્ખણ્ડિતાશયે ।
તરુસ્કન્ધાત્ અવપ્લુત્ય કપોતમિથુનદ્વયમ્ ॥

૨૯. પપાત વાગુરાયન્ત્રે લોકમાશામુખે યથા ।
સંહૃષ્ટહૃદયો દૃષ્ટ્વા પતિતાન્ તુ પતત્રિણઃ ॥

૩૦. ગૃહીત્વા તાન્ પેટિકાયાં બદ્ધ્વા દૃઢતરં પરમ્ ।
સ્વપુત્રહસ્તે વિન્યસ્ય પ્રશમન્ અગમત્ પુનઃ ॥

૩૧. અપયાતે તુ પિતરિ સ પુલિન્દાત્મસમ્ભવઃ ।
ક્વાપિ મૂલે તરોઃ સ્થિત્વા જન્તુગ્રહણતત્પરઃ ॥

૩૨. ચકાર યન્ત્રમતુલં યાવત્ બુદ્ધિબલોદયમ્ ।
તાવત્ અન્તરમાસાદ્ય શ્યેનો માનોન્નતોऽમ્બરાત્ ॥

૩૩. અભ્યેત્ય પેટિકામાશુ સ્વયા ચઞ્ચ્વોજ્જહાર ચ ।
ઉપર્યુપરિ ચારણ્યાત્ ઉત્પતન્ વ્યોમવર્ત્મના ॥

૩૪. સુદૂરમતિવેગેન સન્નિનાય પક્ષિરાટ્ ।
દૃશ્યાદૃશ્યાધ્વના વ્યોમ્નિ વલમાને વિહઙ્ગમે ॥

૩૫. ચણ્ડવાતઃ સમભવત્ વાત્યાયુધવિભીષણઃ ।
તરવોન્મૂલિતા ભૂરિ શાખા ગગનતોऽપતન્ ॥

૩૬. ક્વચિત્ ચ ધૂલિવર્ષેણ ક્વચિત્ પાષાણવૃષ્ટિભિઃ ।
મૃતા નષ્ટા વિહઙ્ગાશ્ચ નિપેતુઃ શતકોટયઃ ॥

૩૭. ઘૂર્ણમાનો વિહઙ્ગોऽયં વાતેન વિવશીકૃતઃ ।
પપાત તોયે તામ્રાયાઃ પૂર્વપુણ્યફલાત્ ॥

૩૮. ઉપશાન્તે ચણ્ડવાતે કશ્ચિત્ દ્વિજવટુઃ પટુઃ ।
ઇતસ્તતઃ પરિક્રમ્ય દૃષ્ટ્વા તામપિ પોતકામ્ ॥

૩૯. પ્રસન્નો મે શિવ ઇતિ જગ્રાહ ધનશઙ્કયા ।
છિત્વા પાશાદિકં સર્વં વિકટય્યાવલોકિતે ॥

૪૦. તત્પક્ષિમિથુનદ્વન્દ્વં ઉત્પપાત તથામ્બરે ।
ઉત્ક્રાન્તે ચ દ્વિજસુતે સ્મયમાને પુનઃપુનઃ ॥

૪૧. પક્ષિણૌ વૃક્ષમારુહ્ય નિવસન્તોऽતિમાત્રકમ્ ।
પરસ્પરં સમાલોક્ય રુરુદુઃ સુસ્વરં ભૃશમ્ ॥

૪૨. સોऽપિ શ્યેનઃ સમુત્તીર્ય તીરમાસાદ્ય કુત્રચિત્ ।
પક્ષાન્ ઉદ્ધૂય તુણ્ડેન કણ્ડૂયાઙ્ગાનિ કૃત્સ્નશઃ ॥

૪૩. ઉચ્ચૈરુન્નમ્ય મૂર્ધાનં દીર્ઘીકૃત્ય શિરોધરામ્ ।
દિવિ ગત્વા તથા તત્ર તરુસ્કન્ધમુપારુહત્ ॥

૪૪. પારાવતકુલં દૃષ્ટ્વા વેપમાનં સસાધ્વસમ્ ।
નિર્મુક્તવૈરઃ કરુણમુપસૃત્ય તદન્તિકે ॥

૪૫. પક્ષાભ્યાં પરિમૃજ્યૈતાન્ આશ્લિષ્ટઃ તૈરપિ સ્વયમ્ ।
સહસા ક્રન્દમાનઃ તુ રુરોદ ભૃશદુઃખિતઃ ।

તદન્તિકે તુ પક્ષાભ્યાં વીજયન્ તૈરપિ સ્વયમ્ ॥

૪૬. ઇત્યન્યોન્ય સંશ્લિષ્ટશ્યેનપારાવતાવલિઃ ।
વ્યાજહાર દ્વિજસુતઃ વિસ્મિતાન્તરમાનસઃ । કસ્ત્વં શ્યેન
મહાભાગ કે યૂયં ચ કપોતકાઃ ॥

૪૭. કથં વા જાતિવૈરત્વે સૌહાર્દં પરિવર્તતે ।
હેતુના કેન સઞ્જાતં મહાશોકસ્યકારણમ્ ॥

૪૮. કથયન્તુ યથાતત્ત્વં વક્તવ્યં યદિ મે ખગાઃ ।
ઇતિ પૃષ્ટઃ તથા તેન શ્યેનો વચનમબ્રવીત્ ॥

૪૯. શ્રુણુ બ્રહ્મન્ પ્રવક્ષ્યામિ કર્મણઃ ફલમિદૃશમ્ ।
પુરા કામ્ભોજવિષયે નગરી દર્શના ॥

૫૦. રત્નાકરીતિ વિખ્યાતા વિચિત્રભવનોજ્જ્વલા ।
મણિસાલાવૃતા રમ્યા સર્વતો યોજનાયતા ॥

૫૧. મહાપરિઘસંવીતા સુવિભક્તમહાપથા ।
પ્રાસાદશતસમ્પાતા સુપ્રસન્ન જલાશયા ॥

૫૨. ઉદ્યાનબહુલાનન્દા નવમાણિક્યગોપુરા ।
મહાજનસમાકીર્ણા પતાકાધ્વજમાલિની ॥

૫૩. પરિઘેણાવૃતેનૈષા નવકાઞ્ચીવ ભાસતે ।
વિશાલા બહુવિસ્તારા અયોધ્યાપરિપન્થિભિઃ ॥

૫૪. એવમભ્યુદયાકારાં નગરીં પરિપાલયન્ ।
રાજા રવિકુલોત્પન્નો નામ્ના વિક્રાન્તકેસરી ॥

૫૫. શૂરો યુવા ધર્મપરઃ શાન્તઃ સમરકૌતુકી ।
ગુરુસેવી ભક્તિપરો યજ્વા ભોક્તા દયાનિધિઃ ॥

૫૬. નિત્યમભ્યર્ચયન્ વિપ્રાન્ ગુરૂન્ દેવાન્ પિતૄન્ તથા ।
તસ્મિન્ શાસતિ ભૂપાલે ધર્મઃ સન્ધુક્ષિતો જનૈઃ ॥

૫૭. યુગપત્ નિદધે ભૂમૌ ચરણાનાં ચતુષ્ટયમ્ ।
તદ્રાજ્યે નિત્યસાન્નિધ્યં અકુર્વન્ હવ્યભાગિનઃ ॥

૫૮. એવં ભૂતસ્ય રાજર્ષેઃ કાલેન મહિષી તથા ।
અસૂત તનયદ્વન્દ્વં કાલિકેવાજનિ દ્વયમ્ ॥

૫૯. વવૃધાતે સુતૌ બાલૌ પોષિતૌ દ્વિજસમ્મતૌ ।
જાતકર્માદિકં સર્વં પિતા ચક્રે સ્વપુત્રયોઃ ॥

૬૦. વૈજયન્તં જયન્તં ચ નામ્ના તૌ વિદધે પુનઃ ।
કૃતચૌલોપનયનૌ વેદવેદાઙ્ગપારગૌ ॥

૬૧. ધનુર્વેદમધીયાગ્રે જ્ઞાત્વા કામકલામપિ ।
રૂપયૌવનસમ્પન્નૌ ચક્રતુઃ હર્ષણં પિતુઃ ॥

૬૨. તતો મગધરાજસ્ય રૂપેણાપ્રતિમે સુતે ।
અનઙ્ગમઞ્જરીં નામ્ના પરામિન્દુપતાકિનીમ્ ॥

૬૩. ભ્રાતરાવુપયેમે તે ક્રમેણ ગુરુશાસનાત્ ।
અનઙ્ગમઞ્જરીં લબ્ધ્વા વૈજયન્તો મુદાન્વિતઃ ॥

૬૪. રેમે રતિમિવાસાદ્ય કામરાજો વિલાસિનીમ્ ।
જયન્તં પતિમાસાદ્ય ધનદેવેન્દુપતાકિની ॥

૬૫. સંપ્રાપ પરમં સૌખ્યં પૌલોમીવ શતક્રતુમ્ ।
પિતર્યુપરતે પુત્રૌ પ્રાપ્ય રાજ્યમખણ્ડકમ્ ॥

૬૬. બુભુજાતે મદાવિષ્ટૌ ભોગાન્ ચ વિવિધાન્ તતઃ ।
એવં નિવસતોઃ બ્રહ્મન્ સ્નિગ્ધયોઃ દૈવયોગતઃ ॥

૬૭. વિષમા સમભૂત્ કામમનીષા યુગપત્ તયોઃ ।
અનુજસ્ય પ્રિયાં જ્યેષ્ઠઃ તત્પ્રિયામનુજસ્તથા ॥

૬૮. કાઙ્ક્ષન્તૌ ચિન્તયાવિષ્ટૌ અભૂતાં યત્નમાસ્થિતૌ ।
તાવત્ વસુગણસ્યાસીત્ ઋષેઃ પુત્રો યુગન્ધરઃ ॥

૬૯. ધર્મજ્ઞોઽપિ યુવા દૈવયોગાત્ કાપાલિકો ભ્રમન્ ।
ઘુટિકાસિદ્ધિમાસાદ્ય વશ્યાકર્ષણતન્ત્રવિત્ ॥

૭૦. પરીત્ય વિવિધાન્ દેશાન્ પૂજ્યમાનશ્ચ કામિભિઃ ।
ક્રમાત્ રત્નાકરીં પ્રાપ કૌતૂહલદિદૃક્ષયા ॥

૭૧. અસંયુક્તાન્ યોજયાનઃ સંયુક્તાન્ ચ વિયોજયન્ ।
કલિં સ્નિગ્ધેષુ કુર્વાણઃ સ્નેહમુત્પાદયન્ પુનઃ ॥

૭૨. ઇન્દ્રજાલમુખાવિદ્યાઃ દર્શયન્ કૌતુકાવહાઃ ।

ઇત્થં વસન્તં સ્વપુરે વૈજયન્તો વિમૃશ્ય સઃ ॥

૭૩. એકાન્તે સમુપાગમ્ય સન્તોષ્ય વિવિધૈર્ધનૈઃ ।
પ્રાહા વાચા સવિનયં પાદયોઃ પ્રણિપત્ય ચ ॥

૭૪. ભગવન્ યોગિનાં વર્ય શિષ્યરક્ષામણે ગુરો ।
પ્રણતં પાદકમલે ભૃત્યં માં ત્રાતુમર્હસિ ॥

૭૫. ચિન્તાશોકાર્ણવે ઘોરે પ્લવમાનમવિશ્રમમ્ ।
ત્રાહિ ત્રાહિ ગતિર્ભૂયાત્ ત્વત્વાગિયમનુગ્રહાત્ ॥

૭૬. ઇતિ તેન મહીપેન યાચમાનઃ સ યોગવિત્ ।
યુગન્ધરઃ સગમ્ભીરમિદં વચનમબ્રવીત્ ॥

૭૭. યુગન્ધરઃ –
ચિન્તયાલં મહારાજ સ્વસ્તો ભવિતુમર્હસિ ।
કિં તે વ્યવસિતં સ્વાન્તે કા વા તે ચ પરિશ્રમા ॥

૭૮. અપકર્ષામિ તે તાપમાશા ફલવતી ભવેત્ ।
કામં તે પૂરયિષ્યામિ યદિ ત્રૈલોક્યદુર્લભાન્ ॥

૭૯. અવિચારેણ વક્તવ્યમદ્યૈવ ખલુ કાઙ્ક્ષિતમ્ ।
સ એવં સિદ્ધવર્યેણ સસાન્ત્વમનુશાસિતઃ ॥

૮૦. ભૂયઃ સમાદધે બ્રહ્મન્ વચનં સ નરેશ્વરઃ ।
ચિન્તામણિમિવાસાદ્ય ત્વાં સચૈતન્યવિગ્રહમ્ ॥

૮૧. લબ્ધકામો ભવિષ્યામિ નાત્ર કાર્યા વિચારણા ।
વિજ્ઞાપ્યમત્ર શ્રોતવ્યંસાનુગ્રહમિદં મમ ॥

૮૨. ભ્રાતૃપત્ની પુરાસ્માકં મનસા સંવૃતા કિલ ।
તદર્થે વઞ્ચિતઃ તત્રાપ્યાહરિષ્યે યથા મુને ॥

૮૩. નારીમતલ્લિકામેનાં ચિન્તયાનોઽહમન્વહમ્ ।
ન લભે શર્મ સૌખ્યં વા દાવદગ્ધ ઇવ દ્રુમઃ ॥

૮૪. માલેયં અઙ્ગારમિવ દહતિ માં સૂચિકોપમમ્ ।
શય્યામસનિમાશઙ્કે હાલાહલમિવાશનમ્ ॥

૮૫. આતટઙ્કુલતાશ્લેષશૂન્યં ભાતિ જગત્ત્રયમ્ ।
યાવાત્ તવ પ્રસાદેન લપ્સ્યે પરમનિર્વૃતિમ્ ॥

૮૭. તથૈવાભ્યુદયં મન્યે જન્મ ચેદં મયાર્જિતમ્ ।
બહુના કિં પ્રલાપેન શ્રુણુ મે તાપગૌરવમ્ ।
૮૮. ત્વત્પ્રસાદમનાસાદ્ય નાહં જીવિતુમુત્સહે ।
ઇત્યુક્ત્વા પાદયોસ્તસ્ય પપાત વિરહાતુરઃ ॥

૮૯. ઇત્થં મોહાન્ધતામિસ્રસાગરોર્મિપરિપ્લુતમ્ ।
દૃષ્ટ્વા યુગન્ધરો યોગી સાનુકમ્પેન ચેતસા ॥

૯૦. રાજાનં તં સમાશ્વાસ્ય ભૂયો વચનમબ્રવીત્ ।
યુગન્ધરઃ –
અનભિજ્ઞાતમન્ત્રૈસ્તુ સ્વમનોરથમવાપ્તવાન્ ॥

૯૧. તાપેનાલં મહારાજ સાધયિષ્યામિતે પ્રિયમ્ ।
ઇત્યુક્ત્વા વશ્યકરિણીં તથાપ્યાકર્ષણીમપિ ॥

૯૨. પ્રાદાત્ તસ્મૈ તુ ઘુટિકાં નાનાવિધવિનોદિનીમ્ ।
વૈજયન્તો તતો લબ્ધ્વા સ્વમનોરથસાધનમ્ ॥

૯૩. અન્યૈરપ્યનભિજ્ઞાતમાસાદ્ય ભવનં નિજમ્ ।
અથૈવ વિદધે કૃત્યં સંપ્રાપ્ય ચ મનોરથમ્ ॥

૯૪. જયન્તોઽપિ દ્વિજશ્રેષ્ઠાત્ તં પ્રાપ સ્વમનોરથમ્ ।
અનભિજ્ઞાતમન્ત્રૈસ્તુ સ્વમનોરથમવાપ્તવાન્ ॥

૯૫. ઇત્થં કામાતુરાવેતૌ શક્ત્યા કાપાલિકસ્ય તુ ।
સ્વયોઃ સ્ત્રિયૌ પરિવૃત્ય આસ્તાં સંહૃષ્ટમાનસૌ ॥

૯૬. તયોઃ પુરોહિતઃ કશ્ચિત્ ઉદ્દાલક ઇતિ શ્રુતઃ ।
અર્થૈકલુબ્ધકો ભૂત્વા તચ્ચિત્તારાધકઃ સ્વયમ્ ॥

૯૭. કુર્વન્ તદુપધાં ભૂરિ ધર્મજ્ઞોઽપિ દ્વિજાધમઃ ।
નિનાય કાલં બહુલં રાજપાપસ્ય ભાજનમ્ ॥

૯૮. એવં રાજાધમૌ પાપૌ ભ્રાતૃપત્નીપરિગ્રહૌ ।
વિમત્તૌ રાજમાર્ગાણાં નારીવિષયલમ્પટૌ ॥

૯૯. ધનલુબ્ધૌ મદાવિષ્ટૌ હિંસન્તૌ સકલાઃ પ્રજાઃ ।
કાપાલિકેભ્ય ધૂર્તેભ્યઃ સઞ્જાતપાપપુઞ્જકૌ ॥

૧૦૦. અભૂતામઙ્ગનાસક્તૌ કુલાચારવિવર્જિતૌ ।
    એવં નિવસતોર્ભ્રાત્રોઃ શત્રુભિઃ બલવત્તરૈઃ ॥

૧૦૧. પુરં ગ્રામાદિકં રાજ્યં હૃતં સબલવાહનમ્ ।
    ભ્રષ્ટરાજ્યૌ નિર્ધનિનૌ સ્ત્રીભ્યાં સાકં પુરોધસા ॥

૧૦૨. નગરાત્ અપયાતાઃ તે અરણ્યાનીં ગતાઃ તથા ।
    સહ્યં ગિરિમુપાગમ્ય કસ્મિંશ્ચિત્ તરુકોટરે ॥

૧૦૩. અનભિજ્ઞાતમરિભિઃ અત્યૂષુઃ તે ભયાતુરાઃ ।
    એતસ્મિન્નન્તરે બ્રહ્મન્ સ કાપાલિઃ યુગન્ધરઃ ॥

૧૦૪. બ્રષ્ટરાજ્યાવિમૌ શ્રુત્વા તાવન્વિષ્ય યયૌ દ્રુતમ્ ।
    તતસ્તતઃ સમન્વિષ્ય સહ્યમાસાદ્ય પર્વતમ્ ॥

૧૦૫. દદર્શ પરમુદ્વિગ્નૌ બ્રાતરુ દીનમાનસૌ ।
    તં દૃષ્ટ્વા સહસોત્થાય નેમતુઃ હૃષ્ટમાનસૌ ॥

૧૦૬. તૌ તદરણ્યે મિલિતૌ તત્પુરોધાઃ ચ દીનધીઃ ।
    તમેવ શરણં પ્રાપુઃ ક્ષુત્પિપાસાશ્રમાતુરાઃ ॥

૧૦૭. એતાન્ સુદુઃખિતાન્ દૃષ્ટ્વા સ તુ કાપાલિકઃ કૃતી ।
    સાન્વયાનો મુહુર્વાચા યોગક્ષેમમકલ્પયત્ ॥

૧૦૮. ઇત્થં દ્વિજશ્ચ નરપાલસુતાવુભૌ ચ
    કાપાલિકશ્ચ વિષયૈકપરા વિમૂઢાઃ ।
    પર્યાક્રમાત્ રતિમવાપ્ય નૃપાલપુત્ર્યોઃ આસન્
    વનેઽપિ સુખિતઃ પ્રમદાનુવાસાત્ ॥

ઇતિ ત્રયોવિંશઃ સર્ગઃ ।    Pro.Total = 1673 + 108 = 1781.

## ચતુર્વિંશોઽધ્યાયઃ

અગ્નીશ્વરેણ લિખિતં શ્યેનોપાખ્યાન મ્ ।

૧. વીરસેનઃ –
    કથેયં જગદાનન્દજનની ચન્દ્રિકોપમા ।
    બ્રહ્મન્ તવ મુખામ્ભોજાત્ ઉદિર્ણા મલયાત્ ઇવ ॥

૨. કથં તિરશ્ચાં વાત્સલ્યમન્યોન્યં સંપ્રવર્તિતમ્ ।

પરં સ્નેહં તથા ચક્રે શ્યેનઃ તત્ર દયાનિધે ॥

૩. શઙ્ખઃ –
આકર્ણ્ય મહારાજકથામેનાં પુરાતનીમ્ ।
વર્ણયામિ સમાખ્યતં પક્ષિણા દ્વિજસૂનવે ॥

૪. કથામેતાવતીં કર્ણવિષયીકૃત્ય વિસ્મિતઃ ।
સ વિપ્રસુનુર્ભૂયોઽપિ વચનં ચેદં ચાદધે ॥

૫. દ્વિજકુમારઃ –
પક્ષિરાજ મહાબુદ્ધે ત્રિકાલજ્ઞાનવારિધે ।
નાભ્યેતિ ભવતો બુદ્ધ્યા સમતામપિ ગીષ્પતિઃ ॥

૬. શુદ્ધવર્ણતયા વાચો વ્યજ્યતે દ્વિજમુખ્યતા ।
રસમાર્દવગામ્ભીર્યવર્ણાલઙ્કારભૂષિતા ॥

૭. વિભાતિ વાગિયં શુદ્ધા તવૈવ તરુણી યથા ।
મહાભાગ્યવશહ્યેષા મનીષા દ્વિજપુઙ્ગવ ॥

૮. નાન્યત્ર રમતે ચિત્તં અનુરક્તા સતી યથા ।
ભૂયોઽપિ શ્રોતુમિચ્છામિ કત્જામેનાં પુરાતનીમ્ ॥

૯. સહ્યાદ્રિ ગિરિં પ્રાપ્ય સસ્ત્રીકૌ રાજનન્દનૌ ।
કિઞ્ચક્રતુર્વઞ્ચકિનૌ યુક્તદૃષ્ટપુરોહિતૌ ॥

૧૦. પ્રાપ્ય કાપાલિકં બન્ધું તદશેષં તુ વર્ણ્યતામ્ ।
શ્યેનઃ –
શ્રુણુ બ્રહ્મન્ પ્રવક્ષ્યામિ યત્કૃતં પૂર્વજન્મનિ ॥

૧૧. રાજભોગપરિભ્રષ્ટોવૈજયન્તઃ સહાનુજઃ ।
વન્યમૂલે ફ્લાહારઃ પરિવૃત્યતતસ્તતઃ ॥

૧૨. પ્રિયાદર્શનસૌભાગ્યસુધામાત્રેણ જીવિતઃ ।
પ્રાપ્ય કાપાલિકં દૈવાત્ આશ્વસ્તઃ તમિદં જગૌ ॥

૧૩. વૈજયન્તઃ –
ભગવન્ કરુણામૂર્તે ભક્તાભીષ્ટ સુરદ્રુમ ।
મદ્રક્ષણાય દેવેન દર્શિતોઽનિ દયાનિધિઃ ॥

૧૪. દુઃખાતપાનુતપ્તસ્ય છાયાદસ્ત્વં સુરદ્રુમઃ ।

કુત આયાસિ ભગવન્ કેન વાસિ પ્રબોધિતઃ ॥

૧૫. અહો દયાત્ર ચ મુને વિકૢલેષુ જનેષ્વપિ ।
લોકોપકારશીલાનાં પ્રવૃત્તિસ્તુ ભવાદૃશામ્ ॥

૧૬. ન બિભેમિ ન ખિન્નોઽસ્મિનૈવ ભ્રાન્તોઽસ્મિ સર્વતઃ ।
તવાગમનસૌભાગ્યસંપ્રાપ્તયા કરુણાનિધે ॥

૧૭. ઇત્થં ભ્રમન્મુહુર્વાચા પરિતો બાષ્પલોચનઃ ।
પતિત્વા પાદયોસ્તસ્ય પ્રણમ્ય તમવોચત ॥

૧૮. તં ભુજાભ્યામવસ્થાપ્ય પરિમૃજ્યાસ્યલોચને ।
સ્મિતપૂર્વમુવાચેદં કાપાલિકમતાનુગઃ ॥

૧૯. કાપાલિકઃ -વત્સ મા શોકમોહાભ્યાં ધૈર્યમાલમ્બ્ય સત્વરમ્ ।
વિજહીહિ ભયં તીવ્રં સન્તાપં મુઞ્ચ માનસમ્ ॥

૨૦. અવસ્થિતસુહૃત્યસ્મિન્ ત્વયા કાલો વનક્ષમઃ ।
યાવજ્જીવં વિધાસ્યામિ સાહાય્યં સૌખ્યહેતવે ॥

૨૧. કાચિત્ અસ્તિ મહાવિદ્યા અરિવર્ગવશઙ્કરી ।
તયાહં પાલયિષ્યામિ મા વિચારોઽસ્તુ મામકૈઃ ॥

૨૨. ઇતઃ પરં ઇહાસ્માભિઃ ગન્તવ્યો મલયાચલઃ ।
તત્ર પ્રવર્તિતા મહાપુણ્યા મુનિના કુમ્ભજન્મના ॥

૨૩. તામ્રપર્ણીતિ વિખ્યાતા સર્વતીર્થનિશેવિતા ।
ભુક્તિદા મુક્તિદા નૃણાં સ્નાનદાનાનુવર્તનૈઃ ॥

૨૪. યત્ર પાટવરાટીષુ મલ્લિકાવેલ્લિતાસુ ચ ।
રમન્તે રમણોપેતાઃ સ્વૈરં સુરસુમધ્યમાઃ ॥

૨૫. તામ્રપર્ણી સુધાસારા વિવિધાસારવિભ્રમા ।
માકન્દસ્કન્ધવિહરન્ કોકિલાલાપચારુષુ ॥

૨૬. યત્ર સાનુષુ સાનન્દં ગાયન્તિ ખલુ કિન્નરાઃ ।
મકરન્દપ્રવર્ષેણ નિત્યદુર્દિનશઙ્કયા ॥

૨૭. પુલિન્દશબરીવર્ગૈઃ આમુક્તમણિકર્બુરમ્ ।
અદ્રિરાજમુપાસન્તે મન્દં ગન્ધવહાઃ પુનઃ ॥

૨૮. નિત્યપુષ્પફલિનો વૃક્ષા નૈવ મુઞ્ચન્તિ તત્ર તુ ।
અકાલફલિનો વૃક્ષાઃ નિત્યપુષ્પાઃ મધુસ્વરાઃ ॥

૨૯. ઇક્ષુચ્છાયાવૃતે ગુલ્મે નિષાદિન્યઃ ચરન્તિ હિ ।
તામ્રાયાઃ મલયનન્દિન્યાઃ સ્રોતોભાગે તતસ્તતઃ ॥

૩૦. જનાઃ વિન્દન્તિ રત્નાનિ નાનારૂપાણિ ભૂરિશઃ ।
દ્રોણમાત્રપ્રમાણાનિ મધૂનિ પ્રતિભૂરુહમ્ ॥

૩૧. યલ્લતાસદનસ્થાનાત્ નૈરાશ્યં મણિભૂમિકે ।
અપરે માધવીં ભૂરિ મધુધારાં ઘનાટવીમ્ ॥

૩૨. વયં તુ સર્વશાસ્ત્રજ્ઞા પરિશીલિતભૂરિતિ ।
વિના મલયસૌભાગ્યં સ્તોતુમન્યં કથં ક્ષમમ્ ॥

૩૩. ત્રૈલોક્યભાગ્યપૂર્ણસ્ય મલયસ્ય કુતસ્સ્વયમ્ ।
સારવિત્ સર્વલોકસ્ય લોપામુદ્રાપતિર્મુનિઃ ॥

૩૪. નૈવ મુઞ્ચન્તિ ગન્ધાદ્રિકટકં પાવનં મહત્ ।
અથ સુખાર્થિભિઃ મર્ત્યૈઃ ઉપાસ્યોઽયં મહીધરઃ ॥

૩૫. ઇત્થમાશ્વાસ્ય કાપાલી ભ્રાતરુ નૃપનન્દનૌ ।
સભ્રાતૃભ્યાં સભાર્યાભ્યાં બ્રાહ્મણેન પુરોધસા ॥

૩૬. સહ નિષ્ક્રમ્ય સહ્યાદ્રેઃ મલયં પ્રત્યપદ્યત ।
સર્વતઃ શોભમાનં ચ સાનન્દમિવ યોગિનામ્ ॥

૩૭. શારદાભ્રસમાકારૈઃ શિખરૈઃ સાધુસેવિતૈઃ ।
ઉલ્લિખન્તમિવાકાશં નાનાધાતુવિચિત્રિતમ્ ॥

૩૮. અવિચ્છિન્નૈઃ હારવર્ણૈઃ નિર્ઝરૈઃ સમલઙ્કૃતમ્ ।
કેરનારઙ્ગપાટીરપાટલાઙ્કોલદાડિમૈઃ ॥

૩૯. માલૂરામલકૈલૈશ્ચ કુન્દમન્દારતિન્દુકૈઃ ।
તમાલકલિવાનીરનાગકેસરચમ્પકૈઃ ॥

૪૦. મધુમાકન્દકઙ્કેલિવકુલાસનસાયકૈઃ ।
માધવીબન્ધુબન્ધૂકરમ્ભેન્દ્રાણીન્દ્રપાદપૈઃ ॥

૪૧. પુષ્પિતૈરપરૈર્વૃક્ષૈઃ ફલિતૈઃ પલ્લવોજ્જ્વલૈઃ ।
અલઙ્કૃતં મહાવૃક્ષૈઃ અન્યૈરપ્યચલોપમમ્ ॥

૪૨. વસન્તસ્યાપિ વસન્તઃ મહોદયતરો ગુરુઃ ।
 ગ્રીષ્મસ્યાપ્યુષ્ણતો યોગી મહાગરલવાહિની ॥

૪૩. મકરન્દકણૈઃ ભૂરિ વર્ષતો મલયાચલઃ ।
 પુણ્યોદકકરણૈઃ સ્વચ્છવાપીભિઃ શરદાગમઃ ॥

૪૪. નવનિર્ઝરિણીશીતમરુતાહિમતુન્દિલઃ ।
 શિશિરાચન્દનારણ્યે સઞ્ચરત્ગન્ધવાહિના ॥

૪૫. સમર્તુ સુખસમ્પન્ના સમસ્તજનસેવિતા ।
 મલયો માલયામાસ બન્ધૂન્ ઇવ સમાગતાન્ ॥

૪૬. તેઽપિ તં ગિરિમાસાદ્ય કસ્મિંશ્ચિત્ પ્રૌઢગહ્વરે ।
 ચક્રુર્નિવાસમાસન્નદીપૂરાદિસૌષ્ઠવમ્ ॥

૪૭. તૌ ચ દૃષ્ટ્વા નૃપસુતૌ તે ચ રાજકુમારિકે ।
 પુરોહિતશ્ચ કાપાલી નનન્દુઃ સ્થલસૌષ્ઠવાત્ ॥

૪૮. સ્નાત્વા તીર્થે મહાપુણ્યે તામ્રાયાઃ પરમાદ્ભુતે ।
 ભુઞ્જાન વન્યમાહારમૂષુઃ તત્ર યથાસુખમ્ ॥

૪૯. એવં નિવસતાં તેષાં કાપાલી સ યુગન્ધરઃ ।
 સાન્ત્વયિત્વા પુનર્વાક્યમુવાચ નૃપનન્દનૌ ॥

૫૦. યુગન્ધરઃ –
 શ્રુણ્વન્તુ મે વચઃ પથ્યં સર્વેષાં જીવનપ્રદમ્ ।
 રાત્રૌ નારીં સમાહૂય તસ્યામાવાહ્ય યક્ષિણીમ્ ॥

૫૧. પૂજયિત્વા યથાન્યાયં તયા કાર્યા રતિક્રિયા ।
 એવમાચરતાં યક્ષી પ્રત્યહં વરદા સતી ॥

૫૨. દદાતિ કનકં શુદ્ધં નિષ્કમાત્રં ન સંશયઃ ।
 ઇતિ બ્રુવતિ વૈ તસ્મિન્ સર્વે સન્તુષ્ટમાનસાઃ ॥

૫૩. તથૈવાસ્ત્વિતિ સમ્ભાષ્ય તુષ્ટુવુશ્ચ પુનઃપુનઃ ।
 ઇત્થં સંવર્તમાનાનામુત્થિતાનામુષસ્યપિ ॥

૫૪. લબ્ધમાસીત્ નિષ્કમાત્રં તપનીયં મહામતે ।
 તતઃ કમપિ તત્રસ્થં વ્યાધમાહૂય ભૂપતે ॥

૫૫. વચનં પ્રાહ કાપાલી સર્વાન્ આમન્ત્ર્ય મન્ત્રવિત્ ।
પુલિન્દવર્ય કાર્યેષુ ચતુરઃ પ્રતિભાતિ મે ॥

૫૬. અતોઽસ્માસુ સુહૃત્ ભૂત્વા સપ્તમઃ સુખભાગ્જનઃ ।
યાવજ્જીવં નિવસિતું ત્વમર્હસ્યપ્રમાદતઃ ॥

૫૭. પ્રત્યહં નિષ્કમાત્રેણ જીવામઃ સમભાગતઃ ।
અહોરાત્રસ્ય ચૈકસ્ય યાવતા પરિવર્તયે ॥

૫૮. તાવતા નિવનિષ્કેણ વસ્તુજાતં સુવર્ણતઃ ।
યત્ર જીવનસામગ્રી યત્ર સમ્પૂર્ણકાઞ્ચનમ્ ॥

૫૯. દત્વા તસ્ય કરે સ્વર્ણં તદાદાતું ત્વમર્હસિ ।
દત્તમેતેન કનકમાદાય સ વનેચરઃ ॥

૬૦. બાણશૂકાપિદાનસ્ય શબરેન્દ્રસ્ય કસ્યચિત્ ।
પ્રદાય કાઞ્ચનં વાચમિદમાહ કૃતાઞ્જલિઃ ॥

૬૧. વનેચરઃ –
દેવાકર્ણય વિજ્ઞાપ્યં સ્વામિકાર્યપ્રયોજનમ્ ।
મમાપિ જીવનં તસ્માદાગતોઽસ્મિ તવાન્તિકમ્ ॥

૬૨. નિષ્કમાત્રં હેમખણ્ડં દશવર્ણાદિકં ખલુ ।
કસ્યચિત્ સિદ્ધનાથસ્ય દેહ્યહોરાત્રભોજનમ્ ॥

૬૩. અહં તુ સપ્તમઃ તસ્ય પુરુષઃ પરિચારકઃ ।
યાવતા સુખિનસ્તે તુ મૃષ્ટાન્ના મૃષ્ટભોગિનઃ ॥

૬૪. તાવદ્ધિ દેહિ વસ્તૂનિ તણ્ડુલાદીનિ ભૂરિશઃ ।
ઇતિ દત્વા હેમખણ્ડં સમાદાય પુલિન્દરાત્ ॥

૬૫. તસ્મૈ પ્રાદાત્ પ્રાદાત્ પ્રહૃષ્ટાત્મા સમ્ભારાન્ સકૃદાદિકાન્ ।
મુદ્ગસર્ષપગોધૂમશાલિતણ્ડુલસંયુતાન્ ॥

૬૬. કન્દમૂલફલોપેતાન્ મધુમાધ્વીકપૂર્વકાન્ ।
પૂગનાગકદલ્યાદીન્ ગન્ધદ્રવ્યસમન્વિતાન્ ॥

૬૭. મહાભોગાન્ પ્રદાયૈવ પ્રોવાચ વચનં પુનઃ ।
બાણશૂકઃ –
નિત્યમેવં પ્રદાસ્યામિ યથાનેતાસિ કાઞ્ચનમ્ ॥

૬૮. નાન્યત્ર દેયં કનકં સિદ્ધદત્તમિદં ખલુ ।
મામકોऽસિ ભવાન્ ભૃત્ય તસ્માત્ આજ્ઞાપયામ્યહમ્ ॥

૬૯. તવ દાસ્યામિ પરમમનર્ઘ્યં પારિતોષિકમ્ ।
ઇત્યુક્ત્વા પ્રેષયિત્વા તં તત્કાઞ્ચનમનુત્તમમ્ ॥

૭૦. રહસ્તામ્રઘટે ક્ષિપ્ત્વા સ કોશભવને ન્યધાત્ ।
સ ભૃત્યોऽપિ સમાદાય સમ્ભારાન્ અપિ ભાજનૈઃ ॥

૭૧. કાપાલિકસ્ય પુરતઃ યાથાતથ્યં ન્યવેદયત્ ।
તત્ સર્વં સમધા કૃત્વા સ સંપ્રીતો યુગન્ધરઃ ॥

૭૨. અંશમેકમદાત્તસ્મૈ સોऽપિ લબ્ધ્વા ગૃહં યયૌ ।
અપરેદ્યુરુપેત્યૈનં યોગિનં તમતન્દ્રિતઃ ॥

૭૩. તસ્માત્ કાઞ્ચનમાદાય સ દૂતઃ તુષ્ટમાનસઃ ।
દત્વા પુલિન્દનાથાય તસ્માત્ સમ્ભારમાત્મવાન્ ॥

૭૪. સોऽપિ સર્વં સમાવેદ્ય વસ્તુજાતં પ્રસન્નધીઃ ।
તત્ દત્તં કાઞ્ચનં ભૂયો ઘટે નિક્ષિપ્તવાન્ પ્રભુઃ ॥

૭૫. દૂતાનીતં વિભજ્યૈકમંશં દત્વા વ્યસર્જયત્ ।
યુગન્ધરઃ બહુવિધૈઃ મૃષ્ટાન્નૈઃ ઘૃતસમ્પ્લુતૈઃ ॥

૭૬. ભોજયિત્વા સ્વયં ભુઞ્જન્ અવાત્સીત્ ગિરિગહ્વરે ।
પ્રાતઃ સ્નાતાઃ તામ્રપર્ણ્યાં માલિન્યક્ષયહેતવે ॥

૭૭. સાલઙ્કારાઃ પ્રતિદિનં સ્રક્ચન્દનવિભૂષણૈઃ ।
ભક્ષ્યભોજ્યવિશેષૈશ્ચ માંસમૈરેયસંસ્કૃતૈઃ ॥

૭૮. તર્પયન્તઃ સ્વગાત્રાણિ સંહૃષ્ટાશ્ચપરસ્પરમ્ ।
હસન્તો હાસયન્તશ્ચ ગાયન્તશ્ચ કલનિસ્સ્વનમ્ ॥

૭૯. અનઙ્ગતન્ત્રસારજ્ઞાઃ ક્રીડન્તઃ પ્રમદાયુતાઃ ।
ચન્દનદ્રુમવાટીષુ કદમ્બવિપિનેશુ ચ ॥

૮૦. સરિત્રોદસ્સુ રમ્યેષુ પુષ્પિતોદ્યાનભૂમિષુ ।
ગુહાસુ મણિદીપ્તાસુ માધવીમણ્ડપેષ્વપિ ॥

૮૧. માધ્વીપાનમદાવિષ્ટાઃ વિજહ્રુઃ તત્ર તત્ર તે ।
ઇત્થમબ્દત્રયં તેષાં નિમિષાર્ધમિવાભવત્ ॥

૮૨. સોઽપિ રાજા પુલિન્દાનાં આશ્ચર્યાવિષ્ટમાનસઃ ।
કદાચિત્ કનકં સર્વં સહ મન્ત્રિભિઃ ॥

૮૩. ઘટમાલોકયામાસ ધનલુબ્ધો નિશામુખે ।
ન દદર્શ ઘટે તસ્મિન્ સઞ્ચિતં નવકાઞ્ચનમ્ ॥

૮૪. કુતો ગતમિદં સર્વં ચોરૈરપિહૃતં તુ વા ।
પુત્રદારાભિઃ કિન્તુ વઞ્ચિતોઽહમથાપિ વા ॥

૮૫. નીયન્તે વા મહાભૂતૈઃ સઞ્ચિતં કિં ન દૃશ્યતે ।
મયા વિના ન ગન્તવ્યમન્યૈઃ કોશગૃહં ખલુ ॥

૮૬. ન વઞ્ચયન્તિ મે દારાઃ નૈવ દ્રુહ્યન્તિ મે સુતાઃ ।
કુતો ગતમિદં સર્વં કિં ન ગૃહ્ણામિ દુર્દમમ્ ॥

૮૭. અથવા કાઞ્ચનસ્યાપિ કિન્નુ શક્તિઃ પલાયને ।
સિદ્ધદત્તમિદં સ્વર્ણં સિદ્ધેનાપિહૃતં ધ્રુવમ્ ॥

૮૮. અન્યથા મમ ગેહેઽસ્મિન્ કઃ સમર્થઃ પ્રવેશને ।
અપ્રમાદં હિ રક્ષન્તિ પરિતો નગરં ભટાઃ ॥

૮૯. અદૃશ્યદૃશ્યસઞ્ચારાઃ યોગિનો હિ ન સંશયઃ ।
તસ્માત્ વિચારણીયં મે કાર્યમસ્તિ મહત્તરમ્ ॥

૯૦. ઇતિ નિશ્ચિત્ય મનસા વનેચરકુલેશ્વરઃ ।
અન્વ્યુરાગતં ભૂયઃ ભૃત્યં કનકસંયુતમ્ ॥

૯૧. આહૂય માનયિત્વા તુ રહસ્યાહ વિશામ્પતે ।
બાણશૂક –
અયે વનચર કથં કેન જીવસિ કર્મણા ॥

૯૨. અવિચાર્ય મમૈવ ત્વં જીવસ્યન્યત્ર સઞ્ચરન્ ।
ત્વત્તોઽન્યસ્ય સુહૃદસ્માકં નાસ્ત્યેવ ભુવનત્રયે ॥

૯૩. ત્વત્ સહાયાત્ બહુધનં લબ્ધમન્યત્ર દુર્લભમ્ ।
ઇતઃ પરં કરિષ્યામિ પ્રાદાન્યત્વે દુરાવહમ્ ॥

૯૪. સિદ્ધઃ સ તુ મહાયોગી ક્વ ગતસ્તે પરિચ્છદઃ ।
ગૂં પ્રણૌમિ તંયેન વિધિના સ્પૃષ્ટમાયિના ॥

૯૫. સજ્જનાશ્રયતઃ સર્વે ભવન્તિ સુખિનો નૃપાઃ ।
સત્સઙ્ગાત્ એવ જાયન્તે સમ્પદસ્તુ પદે પદે ॥

૯૬. સર્વં કથય મે ભૃત્ય યથાવૃત્તં યથાસ્થિતિ ।
અપિ દેવસહાયસ્ય કાઙ્ક્ષણીયો નૃપશ્રિયઃ ॥

૯૭. રાજાનુકૂલહીનસ્ય દેવોઽપિ ન સુખપ્રદઃ ।
દેવવત્ ગુરુવત્ પશ્યન્ રાજાનં પર્યુપાસતે ॥

૯૮. તસ્યોભયત્ર જાયન્તે ફલાનિ સુખહેતવે ।
અતસ્ત્વામનુશાસ્યેઽહં તથા સાહાય્યકૃત્ભવઃ ॥

૯૯. તં ચ તત્ત્વસતિં ચૈવ સંપ્રદર્શય મા ચિરમ્ ।
મત્ વૃત્તાન્તં ન વક્તવ્યં તસ્મૈ સિદ્ધાય યોગિને ॥

૧૦૦. શ્વઃ પ્રાતરત્ર ગન્તવ્યં તતો વક્ષ્યામિ તે હિતમ્ ।
દત્વોપકરણાન્યસ્મૈ યથાપૂર્વં સ ભૂપતિઃ ॥

૧૦૧. પ્રેષયામાસ તં ભૃત્યં અનભિજ્ઞાનમન્યતઃ ।
તત્ દત્તં કનકં પ્રાસ્ય તત્ર નિક્ષિપ્ય ભાજને ॥

૧૦૨. સ્થાપ્ય સંરક્ષયામાસ યાવદભ્યુદયં રવેઃ ।
વ્યુષ્ટાયામથ રાત્ર્યાં તુ ન દદર્શ પુનર્ઘટે ॥

૧૦૩. વિસ્મયાવિષ્ટહૃદયો લુબ્ધકાનામનીશ્વરઃ ।
સ્વભટાન્ આનયામાસ બાણકાર્મુકધારિણઃ ॥

૧૦૪. સન્નદ્ધાઃ સર્વ એવૈતે ભર્તુરાજ્ઞાનુશાસનમ્ ।
રાજદ્વારે સમાવવૃઃ શતશોઽથ સહસ્રશઃ ॥

૧૦૫. ચક્રચાપધરાઃ કેચિત્ અસિધેનુકધારિણઃ ।
અપરે શૂલશક્ત્યૃષ્ટિભિણ્ડિભાલવરાયુધાઃ ॥

૧૦૬. શૂરાઃ સમરસન્નદ્ધાઃ નીલકુઞ્ચિતમૂર્ધજાઃ ।
આજગ્મુર્ભયસમ્ભ્રાન્તાઃ મેઘા ઇવ ઘનાગમે ॥

૧૦૭. એતસ્મિન્નન્તરે દૂતઃ સમાયાતઃ સકાઞ્ચનઃ ।
તેન સાર્ધમસૌ રાજા સૈન્યેન મહતાવૃતઃ ॥

૧૦૮. યત્ર કાપાલિકો દુષ્ટઃ તૌ ચ રાજેન્દ્રનન્દનૌ ।
સ તમાવૃત્ય તં દેશં કરે જગ્રાહ તં શઠમ્ ॥

૧૦૯. તૌ ચ રાજસુતૌ ભીતૌ સપત્નીકૌ દ્વિજાન્વિતૌ ।
નિરુધ્ય તાન્ ઉવાચેદં રાજા કાપાલિકં વચઃ ॥

૧૧૦. યોગીન્દ્ર સર્વશાસ્ત્રજ્ઞ ત્વાં સેવિતુમિહાગતમ્ ।
મામવેહિ દયામૂર્તે સમચિત્તા ભવાદૃશાઃ ॥

૧૧૧. અપ્રયુયુદ્ધાભિમુખ્યસ્ય શત્રું પ્રતિ મમ પ્રભો ।
અર્થસાધનચક્રસ્ય ભવ ભવ્યકરો ગુરુઃ ॥

૧૧૨. ઇત્યુક્તવતિ વૈ તસ્મિન્ વનેચરકુલેશ્વરે ।
ધીરઃ પ્રોવાચ કાપાલી તં ભૂયઃ કૈતવાત્મકઃ ॥

૧૧૩. રાજન્ ક્રમેણ દાસ્યામિ કોટિનિષ્કં ન સંશયઃ ।
પૂરયિષ્યામિ તે ગેહં મણિકાઞ્ચનભૂષણૈઃ ॥

૧૧૪. તત્ વશોઽનર્થકં મત્વા સૂક્ષ્મબુદ્ધ્યા પુલિન્દરાટ્ ।
અદ્યૈવ ખલુ દાતવ્યં કોટિનિષ્કમથાપિ વા ॥

૧૧૫. લબ્ધારોગ્યસ્ય કિં ભૂયઃ ભૈષજ્યવિધિના મુને ।
અનર્થકમધીયાનો સ્પષ્ટાક્ષરપદ્ધતિમ્ ॥

૧૧૬. અપ્રમાણ્યં વિનિશ્ચિત્ય મેધાવી સ મહીપતિઃ ।
ખડ્ગમાદાય કોપેન કાલરાત્રસમપ્રભમ્ ॥

૧૧૭. ચિચ્છેદ તરસા તેષાં શિરાંસિ ગતચેતસામ્ ।
તૌ રાજપુત્રાન્ વિપ્રં ચ દેશભાર્યે યુગન્ધરમ્ ॥

૧૧૮. એવં ચ વઞ્ચ્યતાં તેષાં વિશ્વસ્તેષુ જનેષ્વપિ ।
નિગ્રહો નૈવ દોષાય વ્યાઘ્રાણામિવ કાનને ॥

૧૧૯. ઇત્યુક્ત્વા સ પુલિન્દેન સ્વભટૈઃ સંવૃતો યયૌ ।
તે તુ દુર્મતિમાસાદ્ય સ્વકૃતેનૈવ કર્મણા ॥

૧૨૦. બધ્યમાના યમભટૈઃ પ્રાપુઃ સંયમનીપુરીમ્ ।
તુલ્યદૃષ્ટોપમાઃ સર્વે તુલ્યદુષ્કૃતકારિણઃ ॥

૧૨૧. તુલ્યકાલહતા ભૂયઃ બભ્રમુર્યમસન્નિધૌ ।
મહાનદીતીર્થનિષેવણેન ન યાતનામપ્યભયાનુવિદ્ધાઃ ।
દૃષ્ટ્વૈવ બાધામપિ નારકાણાં કાલં મહાન્તં ખલુ તત્ર સંસ્થાઃ ॥

૧૨૨. યમાજ્ઞયા ભૂમિમનુપ્રવિષ્ટાઃ તિર્યક્ત્વભાવેઽપિ પુનસ્સમેતાઃ
પુણ્યોદકસ્પર્શનભાગ્યલાભાત્ ત્રિકાલવિજ્ઞાનમિદં ચ લબ્ધમ્ ।
પારાવતૌ રાજસુતાવિમૌ તૌ શોકાભિતપ્તૌ પ્રમદાસહાયૌ
યુગન્ધરોઽહં દ્વિજપુઙ્ગવસ્ત્વં પુરોહિતઃ પૂર્વભવે વિચિત્રમ્ ॥

ઇતિ ચતુર્વિંશોઽધ્યાયઃ । Pro.Total = 1781 + 122 =1901.

## પઞ્ચવિંશોઽધ્યાયઃ

યમગીતા ।

૧. દ્વિજકુમારઃ –
પક્ષિરાજ મહાબુદ્ધે સર્વજ્ઞાનકલાનિધે ।
અપિ તિર્યક્ત્વમાસાદ્ય જાનન્તે યોગિનામિવ ॥

૨. વયં પૂર્વભવે પાપાત્ પ્રાપ્તા દુર્મરણં પુનઃ ।
કીદૃશી ગતિરસ્માકમનુભૂતા યમાલયે ॥

૩. શ્યેનત્વં કેન વા પ્રાપ્તં કર્મણાસ્મિન્ભવે નઃ ચ ।
પારાવતત્ત્વમેતેષાં ગતમાસીત્ સુદુસ્સહઃ ॥

૪. તુલ્યપાપસમાચારે બ્રાહ્મણત્વં કથં મયિ ।
સભાયાં ધર્મરાજસ્ય કઃ પ્રસઙ્ગઃ સમીરિતઃ ॥

૫. ઇતઃ પરમિહાસ્માકં કાગતિર્દૈવચોદિતા ।
એતત્ સર્વમશેષેણ શ્રોતુમિચ્છામિ હે સખે ॥

૬. શઙ્ખઃ –
ઇતિ પૃષ્ટઃ તદા શ્યેનઃ સાદરં દ્વિજસૂનુના ।
વિહાય માનસં દુઃખં ધૈર્યમાલમ્બ્ય ચેતસિ ॥

૭. કિઞ્ચિત્ વિશ્રામ્ય સોચ્છ્વાસં પ્રાહેદં પક્ષિરાટ્ દ્વિજમ્ ।
હન્ત તે કથયિષ્યામિ વિચિત્રં વિસ્મયાવહમ્ ॥

૮. શ્રુતં દૃષ્ટં યમપુરે યદસ્માભિરનુષ્ઠિતમ્ ।
યથાનુશાસિતં રાજ્ઞા સભાયાં સૂર્યસૂનુના ॥

૯. યદા વ્યાધાધિરાજેન નિહતાઃ તીવ્રમન્યુના ।
તથૈવ પ્રાપ્તમસ્માભિઃ વપુરત્યન્તનિન્દિતમ્ ॥

૧૦. પરિતો મેઘસઙ્કાશાઃ સાયુધા યમકિઙ્કરાઃ ।
આવૃત્ય ભર્ત્સયન્તોઽસ્માવિનિન્યુર્યમસંસદમ્ ॥

૧૧. પ્રણમ્ય યમરાજાનં ઊચુર્વિનયસંસ્થિતાઃ ।
પ્રસીદ નાથ ભૃત્યેષુ ભક્તેષ્વસ્માસુસામ્પ્રતમ્ ॥

૧૨. સમાકર્ણય વિજ્ઞાપ્યં અસ્માભિઃ સમુદીરિતમ્ ।
રાજશાસનમાદાય મૂર્ધ્ના ચૂડામણિં યથા ॥

૧૩. મલયાદ્રિં સમાસાદ્ય નીત્વા મ્લેચ્છહતાનિમાન્ ।
યાતનાં કર્તુમારોપ્ય સમાનીતાઃ તવાન્તિકમ્ ॥

૧૪. નાલં પન્થાય પાપાનામેતેષાં રચના વિભો ।
અસ્મદાયુધજાલાનિ નાલં ખણ્ડયિતું પુનઃ ॥

૧૫. ક્ષિપ્તમુલ્કાસહસ્રં ચ પુષ્પાયન્તે હિ પાપિષુ ।
ન જલૂકા ન વા સર્પા નખગા નૈવ દંશકાઃ ॥

૧૬. એતાં શિક્ષયિતું રાજન્ ન વ્યાઘ્રા નવ્યાધયોઽપિ વા ।
ન વયં શિક્ષિતારસ્તુ કિં કુર્મઃ કર્મ વૈ પરમ્ ॥

૧૭. ઇતિ તેષાં વચઃ શ્રુત્વા રાજા વૈવસ્વતો યમઃ ।
સ્મયમાનઃ સાન્તમન્તઃ કુપિતો વાક્યમબ્રવીત્ ॥

૧૮. આગચ્છન્તુ ભટાઃ શીઘ્રં નાનાશસ્ત્રાસ્ત્રપાણયઃ ।
છિન્દન્તુ ખડ્ગૈઃ ગાત્રાણિ છેદયન્તુ શરૈસ્તનૂઃ ॥

૧૯. તદસ્ત્ર જ્વલિતોલ્કાભિઃ પોથયન્તુ ચ મુદ્ગરૈઃ ।
ભર્જન્તુ કટાહેષુ તૈલ સન્ધુક્ષ્તેષુ ચ ॥

૨૦. બધ્નન્તુ પાશૈર્વિવિધૈઃ કષન્વઙ્ગારરાશિષુ ।
ઉત્પાટયન્તુ રસનાં કૃષ્યન્ત્વન્ત્રાણિ જમ્બુકૈઃ ॥

૨૧. ક્રકચૈર્દરિયન્ત્વેતાન્ ચૂર્ણયન્તુ પુનઃ પુનઃ ।
ઇતિસમ્પન્નગમ્ભીરમ્મુચ્ચૈર્બ્રુવતિ ચાન્તકે ॥

૨૨. સર્વોદ્યોગેન તે દૂતાઃ તાડયામાસુરોજસા ।
મુસલૈઃ પાટ્યમાનૈશ્ચ શૂલશક્તિપરશ્વથૈઃ ॥

૨૩. ઉલ્કાશતૈરઙ્કુરૈર્વા દુઃખં તે ન પ્રતિપેદિરે ।
પૂષ્પવૃષ્ટિભિરાવિષ્ટાઃ ગન્ધાલિપ્તા ઇવાભવન્ ॥

૨૪. પરિશ્રાન્તા ભટાસ્સર્વે તૂષ્ણીમાસન્ સમન્તતઃ ।
    ન વ્યધ ન ક્ષુધા તેષાં પાપિષ્ઠાનાં યમાન્તિકે ॥

૨૫. કિમેતત્ ઇતિ જલ્પન્તો દૂરે તસ્થુર્વૃથોદ્યમાઃ ।
    વિસ્મયાકુલચિતાનાં કિમેતત્ ઇતિ જલ્પતામ્ ॥

૨૬. સભ્યાનામભવત્ ઘોષં મેઘાનામિવ ગર્જતામ્ ।
    ચિન્તયાને પિતૃપતૌ ચિત્રગુપ્તે ચ વિસ્મિતે ॥

૨૭. કાલે કલનસમ્ભગ્ને ભૃત્યે ધ્યાનમુપેયુષિ ।
    હીણેષુ કિઙ્કરેષ્વેવં પ્રશાન્તે જનનિસ્સ્વને ॥

૨૮. અમ્બરાદશરીરાભૂત્ ક્વાપિ વાગમ્બુદસ્વના ।
    અશક્યા શિક્ષિતું હ્યેતે મહાતીર્થનિષેવણાત્ ॥

૨૯. અવજ્ઞયાપિ તામ્રાયાઃ મજ્જન્તઃ તીર્થવારિણા ।
    હન્યન્તે પાતકૈસ્સર્વૈઃ ન વૃષ્ટ્યા પર્વતા ઇવ ॥

૩૦. ઇતિ શ્રુત્વા યમો રાજા ભયસંવિગ્નમાનસઃ ।
    કૃતાઞ્જલિર્વેપમાનઃ સગદ્ગદમિદં જગૌ ॥

૩૧. યમઃ –
    અહો મહોદયમિદં શ્રુતં મે ચિરકાલતઃ ।
    કૃતાનિ સુકૃતાન્યત્ર ફલિતાનિ ન સંશયઃ ॥

૩૨. યસ્યાઃ શ્રવણમાત્રેણ મુચ્યન્તે જન્તવો ભયાત્ ।
    તામિદં ત્વત્પ્રસઙ્ગેન શ્રુણોમિ શ્રુતિલાલિતામ્ ॥

૩૩. યામાહુઃ શ્રુતયો નિત્યં પાપઘ્નીં મલયાત્મજામ્ ।
    સ્તુવન્તિ મુનયો નિત્યં નિષ્પાપાઃ પાવનીં ચ તામ્ ॥

૩૪. યત્ર વેદાશ્ચ મન્ત્રાશ્ચ ક્રતવો બ્રહ્મચોદિતાઃ ।
    યત્પયઃકણિકામાત્ર પવિત્રીકૃતમૂર્તયઃ ॥

૩૫. યત્પ્રવાહેન યા પૂતાઃ મૂર્તયઃખલુ કીર્તયઃ ।
    યત્તોયમમૃતં પ્રાહુઃ બ્રહ્માત્મકમકલ્મષમ્ ॥

૩૬. યત્ર નારાયણઃ સાક્ષાત્ વટુરૂપેણ વર્તતે ।
    ઇરાવતી ધેનુમતી પરુષ્ણી ભવની સુધા ॥

૩૭. અરુણા ચેતિ વેદાન્તવચોભિઃ પરિગીયતે ।
યત્તીર્થપરિણામેન જાયન્તે મણયો ભુવિ ॥

૩૮. સદાશિવેન નિયતા કણ્ઠાભરણમાલિકા ।
વિષ્ણુચૂડામણિરિયં હૃલ્લેખા ભારતીપતેઃ ॥

૩૯. અદૃશ્યા સર્વભૂતાનામાદિશક્તિરનામયા ।
પ્રાર્થિતા શઙ્કરેણાદૌ તીર્થાકારા પ્રદૃશ્યતે ॥

૪૦. તાં નુમઃ પરમાનન્દજનનીં મલયાત્મજામ્ ।
પુરતઃપાતુ માં નિત્યં પાપઘ્ની લલિતેશ્વરી ॥

૪૧. પૃષ્ઠતઃ સતતં પાતુ પાટીરાચલકન્યકા ।
દક્ષિણે ચાક્ષુષી નિત્યા વામા માણિક્યગર્ભિણી ॥

૪૨. અધસ્તાત્ ઉપરિષ્ટાત્ ચ પાતુ માં પદ્મગર્ભિણી ।
દિવાનિશં મહાદેવીં તામ્રપર્ણીં સ્મરામ્યહમ્ ॥

૪૩. સ્મરામિ સાયં પ્રાતઃ તાં સાવિત્રીં તીર્થદેવતામ્ ।
ઇતિ સ્તુવન્ યમો રાજા મૂર્ધ્ના મુકુલિતઞ્જલિઃ ॥

૪૪. આનન્દબાષ્પપૂરાભ્યાં લોચનાભ્યાં વિલોકયન્ ।
ધાયન્ સ્તુવન્ નમસ્યંશ્ચ ક્ષણં મૌનમુપાગમત્ ॥

૪૪. ઇતિ સ્તુવન્તં રાજાનં સર્વે તસ્ય સભાસદઃ ।
પ્રણિપત્ય મહાભાગાઃ મિલિત્વા વાચમૂચિરે ॥

૪૬. સભ્યાઃ ઊચુઃ –
ભગવન્ સર્વધર્મજ્ઞ ધર્મરાજ દયાનિધે ।
અસ્યાઃ પ્રભાવં તામ્રાયાઃ શ્રોતુમિચ્છામહે વયમ્ ॥

૪૭. યદમ્બુલેશસમ્પર્કાત્ યાતના નૈવ જન્તુષુ ।
આશ્ચર્યાદિવ તામ્રાયાઃ પશ્યામો વિભો ॥

૪૮. હન્ત વઃ કથયિષ્યામિ કથાં કલિનિવારણીમ્ ।
દૃષ્ટા મયા કાચિત્ કથા કૌતૂહલાવહા ॥

૪૯. તામિદાનીં પ્રવક્ષ્યામિ શ◌ૃણ્વન્તુ વિનયોજ્જ્વલાઃ ।
પુરા કૃતયુગે કશ્ચિત્ હરિસ્વામીતિ વિશ્રુતઃ ॥

૫૦. વેદવેદાન્તવિત્ દાન્તઃ શાન્તઃ સર્વસમઃ સુધીઃ ।

ભાર્યાં પુત્રેષુ નિક્ષિપ્ય સમારોપ્ય હુતાશનમ્ ॥

૫૧. તૃતીયમાશ્રમં પ્રાપ્ય યોગી નિયત માનસઃ ।
તપશ્ચચાર સુચિરં તામ્રાયાઃ ઉત્તરે તટે ॥

૫૨. યાજ્ઞવલ્ક્યાશ્રમે પુણ્યે બ્રહ્મજ્ઞાનવિધિત્સયા ।
પ્રાપ્ય પ્રસન્નાત્ વરુણાત્ બીજમૌર્વારુકં શુભમ્ ॥

૫૩. વાપયિત્વાશ્રમાભ્યાશે રરક્ષોપવનપાદપૈઃ ।
સૈષા પ્રધાનિની વીરુત્ આવૃતા બાહુમાત્રકઃ ॥

૫૪. ફલત્યરહરહઃ પક્વમેકમેકં સુધારસમ્ ।
તત્ર ત્રિવર્ગમારાધ્ય ચકારાહારમાત્મવાન્ ॥

૫૫. એતસ્મિન્નન્તરે કશ્ચિત્ વિપ્રો વાસિષ્ઠગોત્રજઃ ।
કુટુમ્બભરણાસક્તઃ શ્રોત્રિયઃ ચ વિશેષતઃ ॥

૫૬. ભાનુચિત્ત ઇતિ ખ્યાતઃ કૃત્યાકૃત્યવિચારવિત્ ।
અવિરક્તદયાચિત્તમાશાપરવશં વહન્ ॥

૫૭. મલિમ્લુચાનાં શૂરાણાં વદાન્યાનાં સ ભૂસુરઃ ।
પૌરોહિત્યધુરં ચક્રે તત્ દત્તૈર્વૃત્તિમાચરન્ ॥

૫૮. હરિસ્વામિનનમાસાદ્ય સખિત્વાત્ અભ્યવાદયત્ ।
તમાગતં પ્રીણયિત્વા હરિસ્વામી મહામુનિઃ ॥

૫૯. બભાષે વચનં ચેદૌપવિષ્ટં સુહૃત્તમમ્ ।
સખે તવ ગૃહે કશ્ચિત્ કુશલં પરિવર્તતે ॥

૬૦. કિમર્થમાગતોઽસિ ત્વં કસ્તે ચિત્તમનોરથઃ ।
સર્વં કથય મે તથ્યં શ્રોતવ્યં મે સુહૃત્તયા ॥

૬૧. ભાનુચિત્તઃ –
ભગવન્ કુશલં સર્વં ખ્રુપયા તવ મે ગૃહે ।
ત્વદઙ્ઘ્રિવન્દનાસક્તઃ સઙ્ક્રમસ્નાનવાઞ્છયા ॥

૬૨. અતસ્સિંહસ્સમારૂઢે ભાસ્કરે લોકલોચને ।
તામ્રપર્ણીજલસ્નાનં અશ્વમેધફલાધિકમ્ ॥

૬૩. ઇતિ ગર્જતિ સર્વત્ર ગાથા પૌરાણિકી કિલ ।
સ્નાતુમિચ્છામિ ભગવન્ ત્વદનુજ્ઞાપુરસ્સરમ્ ॥

૬૪. શ્રુત્વૈવં વચનં તસ્ય હર્ષમાણઃ પુનઃપુનઃ ।
પુનરેવાપરં વાક્યં સુહૃદં પ્રત્યભાષત ॥

૬૫. સુહૃત્ તવૈવાગમનાત્ સન્તુષ્ટોઽસ્મિ મહામતે ।
સ્નાત્વા તીર્થં યથાન્યાયમત્રાદિત્યં વિધાય ચ ॥

૬૬. ઉષિત્વા રજનીમદ્ય તે ગન્તાસિ ગૃહં પ્રતિ ।
ઇત્થં સમ્માનિતસ્તેન મુનિના સ મહીસુરઃ ॥

૬૭. સ્નાત્વા તીર્થે મહાપુણ્યે તર્પયિત્વા પિતૄન્ સુરાન્ ।
પુનઃ તદાશ્રમં પ્રાપ્ય નિયમાન્ત્ યથાવિધિ ॥

૬૮. ઔર્વારુકફલેનૈવ સુધાસારાતિશાયિના ।
મુનિદત્તેન નિર્વૃત્ય પ્રાણાહુતિવિધિં ક્રમાત્ ॥

૬૯. ઉષિત્વા રજનીમેકાં તેન સાર્ધં મહર્ષિણા ।
તમાપૃચ્છ્ય પ્રભાતાયાં પ્રસ્થાતુમુપચક્રમે ॥

૭૦. દૃષ્ટ્વા તદાશ્રમાભ્યાશે ઉર્વારુકલતાં શુભામ્ ।
કુતૂહલેન મનસા ફલમાહૃત્ય સત્વરમ્ ॥

૭૧. જગામ સ્વગૃહં વિપ્રઃ સકુટુમ્બોભ્યભક્ષયત્ ।
હરિસ્વામી સમુત્થાય સ્નાત્વા સૂર્યમુપાસ્ય ચ ॥

૭૨. નિવૃત્ય કાલ્યં નિયમં હુતાગ્નિઃ કૃતકૃત્યવિત્ ।
ફલાહારાય મધ્યાહ્ને સોર્વારુકમુપાગમત્ ॥

૭૩. ન દદર્શ ફલં તત્ર ક્ષુધાર્ત ઇદમબ્રવીત્ ।
યેન વાપહૃતં પક્વં ત્રિવર્ગોદયહેતુકમ્ ॥

૭૪. સ પાપી ભવિતાત્રૈવ જમ્બુકો નાત્ર સંશયઃ ।
ઇતિ શપ્ત્વા મુનિઃ કોપાત્ પ્રાપ્ય ચોપાષિતો ગૃહમ્ ॥

૭૫. ભાનુદત્તસ્સ વિપ્રોઽપિ શતસ્તેન મહાત્મના ।
ગોમાયુત્વમવાપ્યૈવ નિર્ગતસ્સ્વગૃહાદસૌ ॥

૭૬. દુઃખેન મહતાવિષ્ટો મુનેસ્તસ્યાશ્રમં યયૌ ।
ચુક્રોશ બહુધા તત્ર વેપમાનઃ પરિભ્રમન્ ॥

૭૭. હરિસ્વામી તદાજ્ઞાય દિવા ગોમાયુનિસ્સ્વનમ્ ।

વિનિર્ગત્યાશ્રમદ્વારે દદર્શાગ્રે તુ જમ્બુકમ્ ।
૭૮. સોઽપિ તીવ્રં સમાગત્ય પાદયોઃ પ્રણિપત્ય ચ ।
લુઠમાનઃ તદા દુઃખાત્ સમાક્રન્દત્ મુનિં પ્રતિ ॥

૭૯. કિમેતત્ ઇતિ સઞ્ચિન્ત્ય દૃષ્ટ્વા દિવ્યેન ચક્ષુષા ।
ગોમાયુમવદત્ ધીમાન્ સખિત્વાત્ કરુણાનિધિઃ ॥

૮૦. સખે મયાનભિજ્ઞેન શપ્તોઽસિ ધૃતમન્યુના ।
ભવિતવ્યે ન શોચન્તે પણ્ડિતાઃ શાન્તબુદ્ધયઃ ॥

૮૧. તવાવિકતઃ પ્રાપ્તં નવમેતત પરાભવમ્ ।
અનુભૂયાલ્પકાલેન શ્રેયો વિન્દતિ શાશ્વતમ્ ॥

૮૨. ભક્તિઃ પરશિવે ભૂયાત્ વાગસ્તુ તવ વૈખરી ।
બુદ્ધિસ્તુ સતતં સમ્યક્ સતતં મદનુગ્રહાત્ ॥

૮૩. યાવદભ્યેતિ સવિતાચાપરાશિમિતઃ પરમ્ ।
તદત્ર મજ્જનાયૈવ તામ્રપર્ણ્યામિતઃ પરમ્ ॥

૮૪. નિર્મુક્તસાપો ભવિતા મેઘમુક્ત ઇવાંશુમાન્ ।
મદાશ્રસ્યોપખણ્ડે શિલાગર્તે વસિષ્યસિ ॥

૮૫. તાવત્ મદાજ્ઞયા સર્વે નૈવ હિંસન્તિ સંસ્થિતમ્ ।
ઇત્થમાશ્વાસિતઃ શાપાત્ કથિતો મુનિનામુના ॥

૮૬. ઉવાસાન્યનેકાનિ ગણયન્નેષ જમ્બુકઃ ।
તાવત્ તદ્દેશભૂપાલઃ પાણ્ડ્યઃ પરપુરઞ્જયઃ ॥

૮૭. શ્રુત્વા જનપદં સર્વં ચોરૈરપ્યાહૃતં મુહુઃ ।
કુપિતઃ સેનયા સાર્ધમાવૃત્ય ગિરિકાનનમ્ ॥

૮૮. જગ્રાહ નિખિલાન્ સર્વાન્ તસ્કરાન્ સપરિચ્છદાન્ ।
સર્વાન્ આનીય સૈન્યેન શૂલપ્રોતાન્ અકારયત્ ॥

૮૯. દૂરતો વાયુનાકૃષ્ટં શવગન્ધં સ જમ્બુકઃ ।
આઘ્રાય કૌતુકી વેગાત્ નિસ્સસાર બિલોદરાત્ ॥

૯૦. શિલાગર્તાત્ વિનિષ્ક્રાન્તઃ પ્રયયૌ યત્ર તે હતાઃ ।
દદર્શ ચોરાન્ શૂલપ્રોતાન્ ભક્ષ્યમાણાન્ તુ વાયસૈઃ ॥

૯૧. લુણ્ઠિતાન્ ચ ખગૈઃ તીવ્રૈઃ શ◌ૃગાલૈઃ ચોપખણ્ડિતાન્ ।

તુણ્ડેનોત્પાટ્યમાનાન્ ચ ગૃધ્રસઙ્ઘૈઃ બિલોદ્ધૃતૈઃ ॥

૯૨. ઇતસ્તતો ભક્ષ્યમાણાન્ ભષકૈઃ શ્વાપદૈરપિ ।
ક્ષણેનોદ્ગમ્ય તત્પ્રાન્તં ચિન્તયામાસ સ જમ્બુકઃ ॥

૯૩. કિમારબ્ધમિદં પાપં મયા સર્વત્ર કુત્સિતમ્ ।
જાત્યા ન જમ્બુકોઽહં છન્દોગાન્વયસમ્ભવઃ ॥

૯૪. અવિવેકતયા પાપં કૃત્વા જમ્બુકતાં ગતઃ ।
પતિતં તારયેત્ વિદ્વાન્ આત્માનમાસ્થિતઃ ॥

૯૫. હતં નિઘ્નન્તિ કુત્રાપિ પતિતં કઃ પ્રપાતયેત્ ।
દૃષ્ટ્વા સ્પૃષ્ટ્વાપિ મજ્જન્તિ શવં તીર્થેષુ માનવાઃ ॥

૯૬. કથં રમે શવાહારે જાનન્નપિ યથોચિતમ્ ।
પુરા કુન્તલરાજસ્તુ નાગકેતુરિતિ શ્રુતઃ ॥

૯૭. પર્ણાદસ્ય ચ શાપેન વ્યાઘ્રો ભૂત્વા મહાવને ।
ધેનું હત્વા ઋચીકસ્ય જ્ઞાત્વા ભક્ષિતવાન્ પુનઃ ॥

૯૮. અપિ શાપાન્તમાસાદ્ય તતો ગોહત્તિમાપ્તવાન્ ।
વસિષ્ઠશાપાત્ રક્ષોઽભૂત્ કલ્માષાઙ્ઘ્રી મહીપતિઃ ॥

૯૯. બ્રાહ્મણીશાપજં દોષં મુક્તશાપોઽપ્યવાપ્તવાન્ ।
ઇત્થં વિચાર્ય સુચિરં નિવૃત્તઃ શવભક્ષણાત્ ॥

૧૦૦. પુનર્મનીષામાશ્રિત્ય નિસ્સૃત્ય મતિમાનસૌ ।
સવિમર્શં પુનઃકાર્યં કમપ્યેવમચિન્તયત્ ॥

૧૦૧. એતેષામેવ ચોરાણામહં સિદ્ધઃ પુરોહિતઃ ।
તત્તૈરેષાં ધનૈરેવ પોષિતોઽહં ચિરં ખલુ ॥

૧૦૨. એતેષાં સદ્ગતિં દત્વા ઋણાન્મુક્તો ભવામ્યહમ્ ।
ઇતિ નિશ્ચિત્ય મૃગધૂર્તઃ કુતૂહલાત્ ॥

૧૦૩. તેષામસ્થીનિ સર્વાણિ પતિતાનિ મહીતલે ।
વિકૃષ્ય તીર્થે ચિક્ષેપ તમ્રાયાઃ પર્માદ્ભુતે ॥

૧૦૪. સ્વયં સ્નાતો મહાનદ્યાં શિલાગર્તં પુનર્યયૌ ।
સર્વે સભ્યાઃ પરં ચિત્રં શ ૃણુધ્વં મામકા જનાઃ ॥

૧૦૫. તેષામાજન્મપાપાનાં તામ્રાયામસ્થિસઞ્ચયે ।
પતિતે જમ્બુકક્ષિપ્તે તામ્રોદા હતપાપિનઃ ॥

૧૦૬. પશ્યમાનઃ તતો ઘોરે નરકે દુસ્સહે પુનઃ ।
નિર્જગ્મુઃ સૂર્યસઙ્કાશાઃ કન્દર્પસમવિગ્રહાઃ ॥

૧૦૭. અપ્સરોગુણમાન્યેન વપુષા મણિચારુણા ।
વિમાનમારુહ્ય શુભં સર્વે સ્વર્ગમુપાગમન્ ॥

૧૦૮. એવં દૃષ્ટં મયા સભ્યાઃ તામ્રાયાઃ પરમાદ્ભુતમ્ ।
ય  તદાદિનિત્યં મલયેન્દ્રકન્યાં આરાધયન્ વાગ્ભિરનુત્તમાભિઃ ।
એવં નયિહ્યામિ યથાનુકૂલં તત્દર્શનં દૂરત એવ કુર્વન્ ॥

૧૦૯. વૈમાનિકાસ્તે નુ સમેત્ય તામ્રાં વિશોધ્ય પાપાદપિ ભાનુદત્તમ્ ।
પ્રસાદ્ય ભૂયોઽપિ ગુરું પ્રપન્નાઃ તેનાનુશિષ્ટાઃ પ્રયયૌ સ્વલોકાન્ ॥

ઇતિ પઞ્ચવિંશોઽધ્યાયઃ ।       Pro.Total = 1901 + 109 = 2010.

## ષડ્વિંશોઽધ્યાયઃ

શ્યેનપારાવતાનાં પુણ્યલોકગમનમ્ -
દ્વિજસુતસ્ય તામ્રપર્ણીપ્રસાદાત્ બ્રહ્મપદપ્રાપ્તિઃ ।

૧. યમઃ –
વિચિત્રેયં કથા ખ્યાતા તીર્થમાહાત્મ્યરૂપિણી ।
શ્રવણાત્ કીર્તનાત્ વાપિ પાપઘ્ની નાત્ર સંશયઃ ॥

૨. અસ્યાઃ પ્રભાવં વક્તું વા શ્રોતું વા વર્ષકોટિભિઃ ।
નાલમાદિપરાશક્તેઃ માલાયાઃ શોભનોદયમ્ ॥

૩. પ્રત્યહં મામકાસ્સર્વે નમસ્કૃત્ય સરિદ્વરામ્ ।
જપન્ તન્નામધેયાનિ પુણ્યાન્યાત્મશુદ્ધયે ॥

૪. એતાવત્ ઉક્ત્વા વચનં રાજા વૈવસ્વાન્તકઃ ।
ભટાન્ આહૂય ભૂયોઽપિ સભાયામભ્યભાષત ॥

૫. ષડેતે તીર્થસંસર્ગાત્ શુદ્ધા યાતનાભયવર્જિતાઃ ।
તથાપિ કર્મસુદ્ધ્યર્થં પશ્યન્તુ નરકાન્ બહૂન્ ॥

૬. ઇત્યાજ્ઞપ્તા ભટાસ્તેન નીત્વાસ્માન્ યમશાસનાત્ ।

નરકાન્ દર્શયામાસુઃ શતશોઽથ સહસ્રશઃ ॥

૭. રૌરવં કાસ્વરં ચૈવ કુમ્ભીપાકં શરારુકમ્ ।
મહારૌરવમાતઙ્ગં કૃમિશં કૃમિભક્ષકમ્ ॥

૮. બાલાભક્ષં વીચિકં ચ તપ્તવાલુકમંશુકમ્ ।
રેતઃકુણ્ડં પૂતિગન્ધં કશ્મલં શમલં મલમ્ ॥

૯. એતાન્ અન્યાન્ ચ ભૂયિષ્ઠાન્ નારકૈર્વિવિધૈર્જનૈ ; ।
શૂલપ્રોતાન્ ભક્ષ્યમાણાન્ ક્રકચૈર્દારિતાનપિ ॥

૧૦. કુઠારૈર્ભેદ્યમાનાન્ ચ ભક્ષ્યમાણાન ચ વાયસૈઃ ।
સઞ્છિન્નાન્ ક્ષારસઙ્ક્લિન્નાન્ અઙ્ગરે તૈલલેપિતાન્ ॥

૧૧. એવમન્યાન્ ચ બહુલાન્ પીડ્યમાનાન્ સમન્તતઃ ।
દૃષ્ટ્વા દૃષ્ટ્વા વયં સર્વે વેપમાના ભયાતુરાઃ ॥

૧૨. ચતુરાશીતિસાહસ્રવર્ષાણ્યેવોષિતાઃ કિલ ।
પુનર્યમાન્તિકં નીતાઃ સન્દિષ્ટા તેન સૌરિણા ॥

૧૩. શ્લાઘ્યવંશસમ્ભૂતઃ ધર્મજ્ઞઃ શ્રુતિપારગઃ ।
દુસ્સમ્પર્કેઽપિ ભુઞ્જાનઃ ગાયત્ર્યા ચાભિયન્ત્રિતઃ ॥

૧૪. અત એવ પુનર્વિપ્રો ભવિતા નાત્ર સંશયઃ ।
વર્ણાન્તરગતઃ પાપી કાપાલી સર્વવઞ્ચકઃ ॥

૧૫. શ્યેનોઽયં ભવિતા નૂનં નિજકર્મનિયન્ત્રિતઃ ।
એતે પારાવતા ભૂત્વા વસન્તુ રુચિરં વને ॥

૧૬. યદા તામ્રા નદી તોયે મજ્જન્તઃ શુભદાયકે ।
તદાસ્તુ ભૂયસી શુદ્ધિઃ પૂર્વજન્મસ્મૃતિર્ભવેત્ ॥

૧૭. ષણ્ણાં સમાગમો યાવત્ તાવ્ત્ સ્નાત્વા નદીજલે ।
કર્માનુરૂપં ગચ્છન્તુ સ્વર્ગતિં દિવ્યભોગિનઃ ॥

૧૮. દ્વિજોઽયં જ્ઞાનસમ્પન્નઃ કર્મિષ્ઠઃ ચ વિશેષતઃ ।
ઇષ્ટ્વા બહુવિધૈર્યજ્ઞૈઃ અપિ દેવાન્ પિતૄન્ ઋષીન્ ॥

૧૯. અક્ષયં શામ્ભવં લોકં પ્રયાતુ પ્રાર્થિતં યથા ।
ઇત્થં યમેન સન્દિષ્ટાઃ પ્રાપ્તા વયમિહ દ્વિજ ॥

૨૦. સ પુરોધાસ્ત્વસ્માકં અહં કાપાલિકો મતઃ ।
રાજપુત્રાવિમૌ જ્ઞેયૌ સભાર્યૌ પક્ષિવેષકૌ ॥

૨૧. ઇતઃ પરં સદા ભૂયાત્ અસ્માકં પરમા ગતિઃ ।
દેવો ગુરુશ્ચ બન્ધુશ્ચ સખા માતા પિતા ભવાન્ ॥

૨૨. પાલનીયા વયં સર્વે ભવતા દ્વિજબન્ધુના ।
વયં ત્વાં શરણં પ્રાપ્તાઃ સવિત્રીમિવ પાલકાઃ ॥

૨૩. શઙ્ખઃ –
ઇત્થં બ્રુવાણં ભીતાસ્તે પક્ષિણશ્શોકકર્શિતાઃ ।
નિપેતુઃ પાદયોસ્તસ્ય બ્રાહ્મણસ્ય મહાત્મનઃ ॥

૨૪. સમાશ્વાસ્ય ગિરા રાજન્ સમ્ભાવ્ય ચ મહામતિઃ ।
સ્મયમાનોઽશ્રુપૂર્ણાક્ષઃ તૂષ્ણીં ક્ષણમતિષ્ઠત ॥

૨૫. પ્રસન્નાત્મા તતસ્તે તુ સાકમેત્ય મહાનદીમ્ ।
પક્શિણઃ સ્નાપયામાસ અહામન્ત્રં સમુચ્ચરન્ ॥

૨૬. સર્વે મમજ્જુર્વિહગાઃ સંપ્રાપ્ય મલયાત્મજામ્ ।
તીરમાસાદ્ય સદ્યૈવ તત્યજુઃ તનુમાત્મનઃ ॥

૨૭. કોટિકન્દર્પલાવણ્યં બિભ્રાણા ભાસ્વરં વપુઃ ।
દ્વિજં પ્રદક્ષિણીકૃત્ય નમસ્કૃત્ય પુનઃપુનઃ ॥

૨૮. વૈમાનિકાવૈમાનિકાસ્તતો જગ્મુર્મહાભાગાસ્સુરાલયમ્ ।
ઇત્થં વિચિત્રમાલોક્ય લબ્ધપૂર્વભવસ્મૃતિઃ ॥

૨૯. નિર્વિણ્ણચિત્તો દુઃખેન તપસે કૃતનિશ્ચયઃ ।
અવગાહ્ય મહાતિર્થં સંસ્તુવન્ મલયાત્મજામ્ ॥

૩૦. સ્વપિત્રોઃ કથયામાસ વૃત્તાન્તમિદમદ્ભુતમ્ ।
કથઞ્ચિત્ ઉપલભ્યાસૌ અનુજ્ઞામભિવાદ્ય ચ ॥

૩૧. પ્રાપ્યેન્દ્રકીલં પરમં ક્ષેત્રં ક્ષેમકરં નૃણામ્ ।
હૃદિ ધ્યાત્વા મહાદેવીં માલાં મલયનન્દિનીમ્ ॥

૩૨. તતાપ પરમં બાલોઽપ્યમરૈરનુભાવિતમ્ ।
અભક્ષો વાયુભક્ષઃ શીર્ણપર્ણાશનસ્તથા ॥

૩૩. ચકરોગ્રં તપઃશ્રીમાન્ ત્રિલોકીવિસ્મયાવહમ્ ।

એવં વર્ષત્રયે પૂર્ણે સન્તુષ્ટા તીર્થદેવતા ॥

૩૪. આવિર્બભૂવ તસ્યાગ્રે સેવ્યમાના સુરાસુરૈઃ ।
ધોતયન્તી દિશસ્સર્વાઃ સ્વભાસા કુઙ્કુમૈરિવ ॥

૩૫. વત્સ તાતેત્યુદારાર્થૈઃ વચનૈઃ પ્રીણયત્યમુમ્ ।
શ્રીદેવી –
વત્સ તાત પ્રસન્નોઽસ્મિ તપસાનેન ભૂયસા ।
દાસ્યામિ કામાન્ અખિલાન્ દુર્લભાનપિ ભૂતલે ॥

૩૬. અલં પરિશ્રમેણાત્ર વરાન્ વરય સુવ્રત ।
ઇતિ શ્રુત્વા વચો માતુઃ સ બાલઃ પ્રીતમાનસઃ ॥

૩૭. સમાધિમુપસંહૃત્ય સમુન્મીલ્ય વિલોચને ।
દદર્શાગ્રે મહાદેવીં બાલાતપસમપ્રભામ્ ॥

૩૮. નાનામણિગણાકીર્ણૈઃ ભૂષણૈરપિ ભૂષિતામ્ ।
મન્દસ્મિતામિન્દુભૂષનાં ભુવનેશ્વરીમ્ ॥

૩૯. મુનિવૃન્દૈસ્સેવ્યમાનાં તીર્થશક્તિગણાવૃતામ્ ।
ઇત્થં ચરાચરમયીં દેવીમાલોક્ય સમ્ભ્રમાત્ ॥

૪૦. પ્રણમ્ય પુરતો મૂર્ધ્નિ તુષ્ટાવ મલયાત્મજામ્ ।
બ્રહ્મચારી –
પ્રસીદ માતર્માહેશિ મલયાદ્રિસમુદ્ભવે ॥

૪૧. મહાપાતકજમ્ભાલપરિશોષણભાસ્કરે ।
પાપાન્ધકારસઙ્ઘાતભઞ્જનૈકાર્કમણ્ડલે ॥

૪૨. પરિતાપાપહે ભાસ્વન્મહામણિમહોદયે ।
કલ્યાણિ કમલાવાસે મહામલયનન્દિનિ ॥

૪૩. માયાજાલમહાધ્વાન્તપરિપન્થિપયઃકણે ।
ધર્મદ્રવે ભગવતિ ભવજ્વાલાપહારિણિ ॥

૪૪. પ્રસીદ પ્રણવાકારે પ્રાક્તને તારકોદયે ।
તામ્રપર્ણિ જગન્માતઃ પ્રસીદ મયિ સન્તતમ્ ।
૪૫. જન્મહારિણિ જન્તૂનાં પાપહારિણિ મજ્જતામ્ ।
ભયહારિણિ ભક્તાનાં ભોગદે પુણ્યકર્મણામ્ ॥

૪૬. કુમ્ભસમ્ભવસૌભાગ્યસાધને કામદોહિનિ ।
પાપઘ્નિ ભવપઙ્કઘ્નિ પરમાનન્દદાયિનિ ॥

૪૭. પાટીરશૈલતનયે પવિત્રે તે નમો નમઃ ।
સમ્સ્તતીર્થજનનિ સમાનાધિકવર્જિતે ॥

૪૮. અનાદિશક્તિસમ્ભૂતે પૂર્વે પૂર્વે નમો નમઃ ।
સ્વર્ગસોપાનસુભગૈઃ તરઙ્ગૈરુપશોભિતે ॥

૪૯. આવર્તરૂપૈઃ પ્રણવૈરભિરામે નમો નમઃ ।
ત્રિલોકજનનીશાનહૃદયાબ્જવિહારિણિ ॥

૫૦. વિધાતૃવિષ્ણુસમ્ભાવ્યે તીર્થમાતર્નમોઽસ્તુ તે ।
ત્વદઙ્ઘ્રિભક્તિરચ્છિન્ના મયિ ભૂયાન્નિરન્તરા ॥

૫૧. ત્વદન્યત્ર મનો મે સ્યાન્ન કદાચિત્ દયાત્મિકે ।
ત્વત્તીરે વસતિર્ભૂયાત્ ત્વત્પાદજલસેવયા ॥

૫૨. આનન્દબાષ્પપૂર્ણાભ્યામક્ષિભ્યાં ત્વાં વિલોકયે ।
ત્વત્કથામૃતપૂરેણ પૂરયે શ્રવણદ્વયમ્ ॥

૫૩. મનસા ભાવયિષ્યામિ માતસ્ત્વામેવ સન્તતમ્ ।
મમેન્દ્રિયાણિ સર્વાણિ સદા સેવનપૂજને ॥

૫૪. મામનન્યગતિં ભક્તં મા મુઞ્ચ મલયાત્મજે ।
મહામઙ્ગલદે દેવિ માતર્મયિ દયાં કુરુ ॥

૫૫. ત્વાં વિશ્વસ્ય વસામ્યમ્બ ત્વન્નસ્ત્રાણકરી પરા ।
અન્યાં ગતિં ન પશ્યામિ ત્વયૈવ મમ જીવનમ્ ॥

૫૬. ઇત્થં સ સંસ્તુવન્ રાજન્ રોમાઞ્ચિતકલેવરઃ ।
ભૂયઃ પપાત પાદાબ્જે ભગવત્યાસ્ભૂસુરઃ ॥

૫૭. એવં મલયજા દેવી સંસ્તુતા બ્રહ્મચારિણા ।
પ્રાર્થિતા ચ પુનર્ભક્ત્યા તમુત્થાપ્ય ચતુર્ભુજૈઃ ॥

૫૮. પરિમૃજ્યામૃતાકારૈઃ પ્રેમ્ણા સ્વકરપઙ્કજૈઃ ।
વિકિરન્તીવ પીયૂષૈઃ મન્દસ્મેરાંશુસઞ્ચયૈઃ ॥

૫૯. વીણાનાદામૃતાચાર્યૈઃ વચનૈર્વ્યાજહાર તમ્ ।
યથાભિલષિતં તાત તથાસ્તુ તવ સન્તતમ્ ॥

૬૦. તવ સન્તુ ચતુષ્ષષ્ટિકલા કૌતૂહલાવહા ।
છન્દાંસ્યયાતયામાનિ ભવન્તુ મદનુગ્રહાત્ ॥

૬૧. કુર્વન્ત્વનુગ્રહે સર્વે બ્રહ્મરુદ્રમુખાસ્સુરાઃ ।
કૌતૂહલાવહા લક્ષ્મીર્ભૂયાત્ ત્વય્યનપાયિની ॥

૬૨. જીવન્ વર્ષસહસ્રાણિ મહાભાગ્યસમન્વિતઃ ।
પુત્રપૌત્રૈઃ પરિવૃતઃ ભુક્ત્વા ભોગાન્ યથેપ્સિતાન્ ॥

૬૩. ઇષ્ટ્વા યજ્ઞૈસ્સુરાન્ સર્વાન્ વિપુલૈરાપ્તદક્ષિણૈઃ ।
તતસ્તે ભવિતા કીર્તિઃ પ્રાર્થિતા સકલૈસ્સુરાઃ ॥

૬૪. સર્વે વદન્તુ ત્વામુગ્રતપસં મમ ચાજ્ઞયા ।
નિત્યમારાધયન્ શમ્ભું ભક્ત્યા મામપિ માતરમ્ ॥

૬૫. ગૃહં ગચ્છ યથાસૌખ્યં સર્વતો ભદ્રમસ્તુ તે ।
ઇત્થં તં બાલમાશ્વાસ્ય દેવી તીર્થૈકદેવતા ॥

૬૬. ભૂયઃ પ્રવાહમધ્યે તુ પ્રવિવેશ મહાનદી ।
તમુગ્રતપસં પ્રાહુઃ સર્વે સિદ્ધાઃ સુરાસુરાઃ ॥

૬૭. પૂજ્યમાનો મુનિગણૈઃ ભૂતૈશ્ચ વિવિધૈરપિ ।
પ્રાપ્ય સ્વાશ્રમં પિત્રોઃ પાદયોરભ્યવાદયત્ ॥

૬૮. મૂર્ધ્ન્યાઘ્રાય નન્દ્યૈનં પિતરાવાપ્યનન્દતામ્ ।
તતો ભરદ્વાજમુખાત્ વેદાનભ્યસ્ય બુદ્ધિમાન્ ॥

૬૯. વેદાન્ ચ વિવિધાન્ ચાન્યાઃ કલાઃ કૌતૂહલાવહાઃ ।
ગુરુદક્ષિણયાચાર્યં સમ્પૂજ્ય તદનુગ્રહાત્ ॥

૭૦. મેધાતિથેઃ સુતાં તન્વીં નામ્ના શાલાવતીં શુભામ્ ।
ઉપયેમે વિધાનેન સર્વેષાં પ્રીતિવર્ધનમ્ ॥

૭૧. તયૈવ ભાર્યયા સાર્ધં ગાર્હસ્થ્યમનુવર્તયન્ ।
ચકાર વાજપેયાદીન્ ક્રતૂન્ વિપુલદક્ષિણાન્ ॥

૭૨. મણિગ્રીવપુરે નિત્યં નિવસન્ સ્વગૃહે સુધીઃ ।
પ્રત્યબ્દં તીર્થયાત્રાં તુ તીરયોરુભયોરપિ ॥

૭૩. આરભ્ય મલયં શૈલમાસાગરમતન્દ્રિતઃ ।

પુત્રદારસમાયુક્તં શિષ્યૈશ્ચ સહિતો વશી ॥

૭૪. સ્નાનં ચકાર વિધિવત્ તીર્થશ્રાદ્ધસમન્વિતમ્ ।
તામ્રપર્ણીં સમભ્યર્ચ્ય પ્રતિમાયાં સમન્ત્રકમ્ ॥

૭૬. અભ્યર્ચ્ય નામભિર્દિવ્યૈઃ ભોજયિત્વા દ્વિજોત્તમાન્ ।
દક્ષિણાભિર્યથાન્યાયં આશાનુગુણમર્ચયન્ ॥

૭૭. નિત્યં ત્રિષવણસ્નાયી નિનાય સમયં ક્રમાત્ ।
ત્રિશતાધિકસાહસ્રપઞ્ચકં શરદાં યયૌ ॥

૭૮. જીવન્ પુત્રેષુ વિન્યસ્ય ગૃહધર્માન્ સનાતનાન્ ।
મલયે તપ આતિષ્ઠન્ સંપ્રાપ બ્રહ્મણઃપદમ્ ॥

૭૯. પુનઃકલ્પાન્તરે રાજન્ મહાતીર્થસ્યવૈભવાત્ ।
જન્મલબ્ધં વિધેરાસીત્ સનકો યોગિનાં વરઃ ॥

૮૦. અદ્યાપિ તીર્થમાહાત્મ્યાત્ તીર્થવત્ ભુવનત્રયમ્ ।
પુનાતિ દર્શનેનૈવ મહસા સૂર્યસન્નિભઃ ॥

૮૧. અસ્ય સઞ્ચરમાણસ્ય સમન્તાત્ આદિયોગિનઃ ।
વાયોરિતિ ગતિઃ ક્વાપિ નૈવ સમૃધ્યતે ખલુ ॥

૮૨. અપ્યન્યે પાપિનો મર્ત્યાઃ શતશોઽથ સહસ્રશઃ ।
યત્તીર્થકણિકા માત્રસ્પર્શનાત્ એવ ભૂપતે ॥

૮૩. નિધૂતપાપા ગચ્છન્તિ પદં બ્રહ્મ સનાતનમ્ ।
યદમ્બુકણિકાશક્તિમહિમા સાગરોપમઃ ॥

૮૪. તસ્માત્ અસ્યાસ્તુ માહાત્મ્યં વક્તું વાચામગોચરમ્ ।
નાલં વર્ષશતેનાપિ વિસ્તરેણ ગિરાં પતેઃ ॥

૮૫. પ્રવક્તુર્વાગનેકાર્થા યુક્તિસાધનસંશ્રુતા ।
અપિ દેશાન્તરગતાઃ પાપાત્મનો યદૃચ્છયા ॥

૮૬. ગૃણન્તઃ પરિમુચ્યન્તે નામાન્યસ્ય તુ ભૂરિશઃ ।
તસ્માત્ ત્વમપિ ન્રાજેન્દ્ર દૈવયોગાદિહાગતઃ ॥

૮૭. સ્નાત્વા તીર્થેષુ સર્વેષુ તામ્રપર્ણ્યાં સમાહિતઃ ।
દત્વા દાનાનિ ભૂરીણિ તામ્રામભ્યર્ચ્ય પાવનીમ્ ॥

૮૮. અનુગ્રહાન્ મહાદેવ્યાઃ પ્રાપ્ય કામાન્ અનુત્તમાન્ ।
ભૂયો ગન્તાસિ સ્વર્લોકં સુખભોગસમૃદ્ધિમત્ ॥

૮૯. ઇતિ તસ્ય મુનેર્વાક્યં આકર્ણ્ય સ મહીપતિઃ ।
પરમાનન્દનિર્મગ્નહૃદયો દયિતાન્વિતઃ ॥

૯૦. સંસ્તુવન્ મુનિશાર્દૂલં હર્ષગદ્ગદયા ગિરા ।
ભૂયો ધર્માન્ ચ શુશ્રૂષુઃ પ્રાઞ્જલિર્વાક્યમબ્રવીત્ ॥

ઇતિ ષડ્વિંશોઽધ્યાયઃ ।  Pro.Total = 2010 + 90 = 2100.

## સપ્તવિંશોઽધ્યાયઃ

વસુમના ઇતિ નામ્ના રાજ્ઞા અગસ્ત્યવચનેન
તામ્રપર્ણ્યાસ્નાનપૂર્વકં કાશ્યપતીર્થે યાગઃ કૃતઃ ।

૧. રાજા –
ન હિ સ્થિરતયા મેરોઃ પુરુષઃ સદૃશઃ કિલ ।
પારાવારસ્ય ગામ્ભીર્યં પરત્ર ન હિ વિદ્યતે ॥

૨. બ્રહ્મણસ્સર્ગસામર્થ્યં બ્રહ્મણ્યે ન ચાન્યતઃ ।
તથૈવ તામ્રપર્ણ્યાસ્તુ તીર્થશક્તેસ્ત્વતુલ્યતા ॥

૩. ન હિ જાગર્તિ કુત્રાપિ પરત્ર ભુવનત્રયે ।
સુધાસારસ્થિતં સ્વાદુલહરી કિમુ ચાન્યતઃ ॥

૪. તથા માહાત્મ્યં મહિમા તામ્રાયામેવ દૃશ્યતે ।
અસ્યાઃ પ્રભાવં ભૂયોઽપિ શ્રોતવ્યં મે મહામુને ॥

૫. પુણ્ડ્રેક્ષુદુગ્ધોલ્લસિતં સ્વાદુતા લોકરઞ્જની ।
પ્રતિપદ્ય વિશિષ્ટા હિ રસનાગ્રે પ્રકાશતે ॥

૬. તથૈવાસાગરં તામ્રા મહાપાતકનાશિની ।
કથિતા વિંશતિસ્થાને વિશિષ્ટેતિ ત્વયા ગુરો ॥

૭. તસ્માત્ તેષાં તુ તીર્થાનાં માહાત્મ્યં મહદદ્ભુતમ્ ।
સોપાખ્યાનં તુ વિસ્તાર્ય કથયસ્વ યથાતથમ્ ॥

૮. શઙ્ખઃ –
મહારાજાધિસમ્ભૂતં કથાં કલિમલાપહામ્ ।

શ઼ૃણુષ્વ સાવધાનેન વક્ષ્યમાણામિમાં મયા ॥

૯. પુરા વસુમના નામ રાજાસીત્ દ્વાપરે યુગે ।
યયાતિનઃ તુ દૌહિત્રઃ સગરિષ્ઠઃ પ્રતાપવાન્ ॥

૧૦. વિજિત્ય સકલામુર્વીં ધનમાદાય પુષ્કલામ્ ।
ગચ્છન્ એવ મહારાજ દદર્શાધ્વાન્તરે સ્વયમ્ ॥

૧૧. પરીતં તપસાં રાશિં મુનિ સાક્ષાત્ ઇવેશ્વરમ્ ।
ત્રિકાલવેદિનં ગર્ગમાચાર્યં સર્વદેહિનામ્ ॥

૧૨. ઉપગમ્યાભિવાદ્યૈનં પ્રશ્રિતો વાક્યમબ્રવીત્ ।
સ્વાગતં તે મહાભાગ પ્રસીદ કરુણાનિધે ॥

૧૩. દૂરાભ્યાગમનશ્રાન્ત્યા તનુસ્તે તનુતાં ગતા ।
વિશ્રાન્તિર્યાવતા તાવત્ ભૂયાત્ આસીદમાસનમ્ ॥

૧૪. અપૂર્વદર્શનં બ્રહ્મન્ તવ પાદામ્બુજં મમ ।
પુરા કૃતાનાં ધર્માણામિષ્ટાપૂર્તકૃતાત્મનામ્ ॥

૧૫. ફલાનિ પર્પ્ક્વાનિ મન્યે ત્વદ્દર્શનાત્ અહમ્ ।
ચિરકાઙ્ક્ષિતમેતત્ હિ શ્રીમત્ આગમનાત્ અયમ્ ॥

૧૬. ઇતઃ પરં યતિષ્યેઽહં ત્વદભીપ્સિતસાધને ।
નિયુઙ્ક્ષ્વ માં મહાયોગિન્ કૃત્યેષ્વભિમતે ॥

૧૭. સન્તં ભવન્તમારાધ્ય કૃતકૃત્યો ભવામ્યહમ્ ।
ઇત્યભિષ્ટૂય વચનૈરર્હણૈરપિ સાદરમ્ ॥

૧૮. પૂજયિત્વાનુયાચન્ તં કૃતાઞ્જલિરુપસ્થિતઃ ।
જહાસ કિઞ્ચિત્ ઉદ્વિગ્નો નોત્તરં પ્રત્યપદ્યત ॥

૧૯. પુનઃ પ્રસાદયન્ વાચા મુનિમાહ મહીપતિઃ ।
હેયમસ્તિ કિમસ્માસુ ભગવન્ કથ્યતામિહ ॥

૨૦. નાઙ્ગીકરોષિ મદ્વાક્યં કિં વા હાસસ્ય કારણમ્ ।
ત્વદ્વચઃ શ્રવણોત્કણ્ઠા વાઞ્છા કિન્ન પૂર્યતે ॥

૨૧. દર્શનાત્ આપ્તહર્ષસ્ય મનો ડોલાયતે મમ ।
ચન્દ્રઃ ચકોરં પુષ્ણાતિ ચાતકં ચ ઘનાઘનઃ ॥

૨૨. તથા સન્તઃ વિનીતં હિ ભૂષયન્તિ ભવાદૃશાઃ ।
ઇત્થં વ્યાકુલચિત્તસ્ય વૈમનસ્યં મહીપતેઃ ॥

૨૩. દૃષ્ટ્વાતિકરુણં પ્રેમ્ણા ગર્ગો મુનિરભાષત ।
રાજન્ ત્વયિ ન પશ્યામિ હેયમદ્યાપિ શત્રુહન્ ॥

૨૪. કલઙ્કુતા ચન્દ્રમસિ વૈષમ્યં ક્ષીરસાગરે ।
ગૌરીગુરૌ તુ જડતા કૌટિલ્યં હિ શરાસને ॥

૨૫. તીક્ષ્ણતા ભાસ્કરે નિત્યા દોષતા રજનીમુખે ।
ચિન્તામણૌ ચ કાઠિન્યં પશુત્વં કામધેનુષુ ॥

૨૬. એવં દોષૈકભૂયિષ્ઠે વિસ્તીર્ણે વિશ્વગહ્વરે ।
ત્વય્યેકસ્મિન્ ન પશ્યામિ દોષં ક્ષીરે યથા વિભો ॥

૨૭. તથાપિ દોષં દૃષ્ટ્વાહં ત્વય્યર્કેઽપ્યુપરાગવત્ ।
આગતોઽસ્મિ હિ તદ્વક્તુમધુના સત્વરં ત્વયિ ॥

૨૮. ત્વયા સાગરપર્યન્તા વસુધા દિગ્જિગીષયા ।
પરં પર્યટતા ભૂરિ તુરઙ્ગરથકુઞ્જરૈઃ ॥

૨૯. સાર્ધમક્ષૌણીલક્ષૈઃ વ્યક્તમુદ્વેજિતા મહી ।
ભિન્નાનિ દેવતાગારાણિ દૂષિતાનિ સ્થલાન્યપિ ॥

૩૦. બ્રહ્મક્ષેત્રાણિ શતશો નાશિતાનિ તતસ્તતઃ ।
ભિન્નારામાણિ પુણ્યાનિ ગ્રામાણ્યાત્મવતામપિ ॥

૩૧. સંક્ષુબ્ધજનસમ્પાતમર્યાદપ્રચારકમ્ ।
અસ્વચ્છન્દાશ્રમાચારમપવિદ્ધફલોદયમ્ ॥

૩૨. હાહાકારાવૃતં રાજ્યં સઞ્જાતં ભવતા ખલુ ।
તદ્દોષાદેવ રાજેન્દ્ર ક્ષીણમાયુઃ ક્ષણાદિવ ॥

૩૩. ઇતઃ પરં દ્વાદશાહાત્ મૃત્યુઃ ત્વામુપગચ્છતિ ।
તસ્માત્ તદ્દોષશમનં પ્રાયશ્ચિત્તં સમાચર ॥

૩૪. દાશાર્હેણમાહૂતો યજ્ઞાર્થં યત્ર ભૂભુજા ।
ત્વરિતં ગન્તુમિચ્છામિ રાજાધાની મહાત્માનઃ ॥

૩૫. મથુરાં માધવો યત્ર સાન્નિધ્યં કુરુતે સદા ।
યામાસાદ્યાવમુચ્યન્તે જન્તવઃ કર્મબન્ધનાત્ ॥

૩૬. અતસ્ત્વમત્ર નિકટે મલયે મઙ્ગલાલયે ।
લોપામુદ્રાપતિશ્શ્રીમાન્ વસતે તપસાં નિધિઃ ॥

૩૭. તં ગચ્છ શરણં શીઘ્રં માવિલમ્બોઽસ્તુ ભૂપતે ।
સ ત્વાં પાલયતિ શ્રીમાન્ અપિ સંયમનીં ગતમ્ ॥

૩૮. પુરા ગણ્ડૂલનગરે રાક્ષસેનાપિ ભક્ષિતમ્ ।
પદાતિકુલસમ્મર્દપતાકાધ્વજમાલિનીમ્ ॥

૩૯. ધ્વજિનીં સ્વાં મહાનાથામુપ્વેશ્ય નદીતટે ।
સ રાજા વિનયોપેતઃ સંપ્રાપ કલશોદ્ભવમ્ ॥

૪૦. ઉપસૃત્યાગસ્ત્યસ્ય કૃતાઞ્જલિરુદારધીઃ ।
અભ્યવાદયદાત્માનં પ્રબ્રુવન્ એવ ભૂપતે ॥

૪૧. તં દૃષ્ટ્વા મુનિશાર્દૂલઃ રાજાનં સૂર્યવંશજમ્ ।
અભિનન્દ્યોપચારાદ્યૈઃ યથાવત્ અભિપૂજ્ય ચ ॥

૪૨. સ્મયમનો મુનિઃ પ્રીત્યા રાજાનમિદમબ્રવીત્ ।
અગસ્ત્યઃ –
સ્વાગતં તે મહારાજ પરિશ્રાન્તોઽસિ કેન ચ ॥

૪૩. કિં તે વ્યવસિતં ચિત્તે કિં ચિકીર્ષુસ્સમાગતઃ ।
ચિન્તાકુલ ઇવાભાસિ કારણં વક્તુમર્હસિ ॥

૪૪. રાજન્ તવાભ્યગમનાત્ સંહૃષ્ટોઽસ્મિ મહામતે ।
સર્વં કથય તત્ત્વેન માસ્તુ ચિન્તા પરિશ્રમઃ ॥

૪૫. અપનેષ્યામિ શોકં તે નાત્ર કાર્યા વિચારણા ।
આસાગરમિમામુર્વીં જિતવાનસિ લાઘવાત્ ॥

૪૬. અસઙ્ખ્યાતાનિ રત્નાનિ નાનાવર્ણાનિ ભૂતલે ।
આર્જિતાનિ સહેમાનિ દેવભોજ્યાનિ સર્વતઃ ॥

૪૭. જ્ઞાતં મે સકલં વૃત્તં સમાધિમુપજગ્મુષા ।
ઇત્યાકર્ણ્ય મુનેર્વાક્યં પીયૂષમિવ કર્ણયોઃ ॥

૪૮. ચિન્તામન્તર્ગતાં ત્યક્ત્વા પ્રાઞ્જલિઃ પ્રત્યભાષત ।
વસુઃ –

બ્રહ્મન્ ભક્તજનાનન્દપારિજાતપદામ્બુજ ॥

૪૯. શરણં ત્વાં પ્રપન્નોઽસ્મિ શ્રૂયતાં વચનં મમ ।
મયા સઞ્ચરતાં ભૂમિં દિગન્તવિજિગીષયા ॥

૫૦. યદૃચ્છયા ગર્ગમુનિઃ પૂજનીયોઽભિપૂજિતઃ ।
લોકસન્તાપસઞ્જાતપાપાત્ આયુઃ ક્ષયં મમ ॥

૫૧. મહ્યં સદ્કથયન્ પ્રાયાત્ સ મુનિર્મથુરાપુરીમ્ ।
દીર્ઘાયુર્યોગસિદ્ધ્યર્થં ત્વામસ્મિશરણં ગતઃ ॥

૫૨. તતસ્તમાશ્વાસ્ય ગિરા ભગવાન્ કલશોદ્ભવઃ ।
વિચાર્ય સર્વશાસ્ત્રાણિ વિમૃશ્ય નિગમાન્યપિ ॥

૫૩. નિશ્ચિતાર્થો મુનિઃ પ્રીત્યા પ્રાહ ગમ્ભીરયા ગિરા ।
અગસ્ત્યઃ –
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ પ્રાયશ્ચિત્તં તુ પાપ્મનામ્ ॥

૫૪. એષા મહાનદી પુણ્યા ઘૃતમાલા મધુદ્રવા ।
તામ્રપર્ણીતિ વિખ્યાતા નિગમાન્તવિલાસિની ॥

૫૫. પણ્ડિતૈઃ પઠ્યતે નિત્યં પુરાણેષુ પુનઃપુનઃ ।
પરુષ્ણીતિ સુપર્ણેતિ તામ્રેતિ શ્રુતયો જગુઃ ॥

૫૬. ધર્મદ્રવેતિ સર્વત્ર કથ્યતે હિ સુરાસુરૈઃ ।
યત્તીર્થમહિમાં નિત્યં વદન્તિ વચસામરાઃ ॥

૫૭. હરિરત્રૈવ ભગવાન્ આસ્તે સિદ્ધજનેડિતઃ ।
શમ્ભુરત્રૈવ દીવી ચ જગતાં જનની પરા ॥

૫૮. અત્ર મન્ત્રાશ્ચ વેદાશ્ચ ક્રતવોઽગ્નિમુખાસ્સુરાઃ ।
યદમ્બુકણિકાપાનાત્ બ્રહ્મહત્યાપિ નશ્યતિ ॥

૫૯. ગોઘ્નશ્ચૈવ કૃતઘ્નશ્ચ ભ્રૂણહા ગુરુતલ્પગઃ ।
યદમ્બુમજ્જનાન્મુક્તા મજ્જન્તો બ્રહ્મભાવિતાઃ ॥

૬૦. અતઃ અસ્યામ્બુલાભેન વિન્દન્તિ મનુજા ભુવિ ।
સુલભાદેવ રાજેન્દ્ર પુરુષાર્થચતુષ્ટયમ્ ॥

૬૧. તમાત્ મદુપદેસેનસ્નાનં કુરુ યથાવિધિ ।
નિર્મુક્તપાપો ભવિતા દીર્ઘમાયુશ્ચ વિન્દસિ ॥

૬૨. ઇતિ તદ્વચનાદેવ તં પુરોધાય કુમ્ભજમ્ ।
    સ્નાનં ચકાર તામ્રાયાં તથા વસુમના નૃપઃ ॥

૬૩. યદા તદમ્બુપૂરે તુ સન્નિમગ્નકલેવરઃ ।
    તાવત્ કલાકલાકારૈઃ બુદ્બુદૈસ્તિમિરોપમૈઃ ॥

૬૪. વ્યાપ્તં બભૂવ તત્સર્વં સમન્તાત્ ક્રોશમાત્રકમ્ ।
    નીલામલસમાકારં તામ્રાજલમદૃશ્યત ॥

૬૫. સ્નાત્વા તીરં સમાસાદ્ય દૃષ્ટ્વા કલુષિતાં નદીમ્ ।
    મુનિમાહ સ ભૂપાલો વિસ્મિતેનાન્તરાત્મના ॥

૬૬. રાજા –
    ભગવન્ કિમિદં તીર્થં નીલીજલસમપ્રભમ્ ।
    મેઘૈરિવ નભો વ્યાપ્તં સુવ્યક્તં કથ્યતાં મમ ॥

૬૭. અગસ્ત્યઃ –
    રાજન્ ત્વયિ ગતાઃ પાપાઃ નિર્ગતાઃ તીર્થવૈભવાત્ ।
    નિર્મુક્તપાપોઽસિ ભવાન્ મેઘાપાયે અંશુમાનિવ ॥

૬૮. ઇતિ બ્રુવતિ રાજાનં મુનૌ વાતાપિવરિણિ ।
    નિશ્વાસમલિનીભૂતમાદર્શં તત્ક્ષણાદિવ ॥

૬૯. મણિવર્ણમભૂત્તોયં તામ્રાયાઃ પરમાદ્ભુતમ્ ।
    તાવત્ ગીર્વાણનિર્મુક્તા પુષ્પવૃષ્ટિસ્તુ પુષ્કરાત્ ॥

૭૦. પપાત પરિતઃ તત્ર પરમાનન્દનિર્ભરા ।
    સમન્તાત્ અભવત્ વાણી દેવસિદ્ધસમીરિતા ॥

૭૧. દીર્હાયુષ્મન્ મહારાજ શ્રેયઃ પ્રાપ્નુહિ સર્વતઃ ।
    ઇતિ વૈ મઙ્ગલવાચઃ પુરઃ શ ૃણ્વન્ સુરેરિતા ॥

૭૨. પ્રાઞ્જલિ અ; તાન્ અભિષ્તૂય મુનિપ્રોક્તેનવર્ત્મના ।
    પુનઃ સ્નાત્વા મહાનદ્યાં કૃતકૃત્યઽભવત્ તદા ॥

૭૩. તત્રોષિત્વા ત્રિરાત્રં તુ મુનિનાનેન માનિતઃ ।
    આસાગરં તીર્થયાત્રાં તીરયોરુભયોરપિ ॥

૭૪. યથાન્યાયં વિધાયાસૌ પુનરામલકાટવીમ્ ।

પ્રાપ્ય કાશ્યપતીર્થે તુ ચક્રે બલનિવેશનમ્ ॥

૭૫. ઉષિત્વા કતિચિત્ માસાન્ ઉપાસ્ય મલયાત્મજામ્ ।
યિયક્ષુઃ ચિન્તયામાસ કુત્ર વેતિ મહામતિઃ ॥

૭૬. સર્વોત્કૃષ્ટા જન્હુકન્યા સૈષા મન્દાકિની કિલ ।
યત્ર જપ્તં હુતં દત્તમનન્તફલમુચ્યતે ॥

૭૭. તત્રૈવ હયમેધેન યક્ષ્યે દેવાન્ યથાવિધિ ।
આત્માનં ભાવયિષ્યામિ કુતકૃત્યો ભવામ્યહમ્ ॥

૭૮. ઇતિ નિશ્ચિત્ય મનસા સૈન્યેન મહતા વૃતઃ ।
પ્રાપ્ય ભાગીરથીતીરં તત્ર દીક્ષામુપાવિશત્ ॥

૭૯. મણિસ્તમ્ભશતોપેતા તપ્તકાઞ્ચનવેદિકા ।
શાલા પરમકલ્યાણી શ્રીમતી રુરુચેતરામ્ ॥

૮૦. યત્ર સભ્યાઃ સમભવન્ યજ્વાનો દીર્ઘદર્શિનઃ ।
હૂયમાને હવ્યવાહે સમ્ભૂતે સામનિસ્સ્વને ॥

૮૧. મન્ત્રેષુ જપ્યમાનેષુ પ્રહૃષ્ટેષુ દ્વિજાદિષુ ।
ગઙ્ગા પરમસમ્પૂર્ણા  મહાતોયોર્મિફેનિલા ॥

૮૨. આવર્તશતસઙ્ઘાતા સુધામ્ભોનિધિસન્નિભા ।
આવૃત્ય તીરયુગલીમુત્પપાતાતિવેગવત્ ॥

૮૩. સહ સભ્યૈસ્સમાધાય શાલામુજ્જ્વલિતાનલામ્ ।
એવં નષ્ટેષુ સર્વેષુ રાજા દુઃખપરિપ્લુતઃ ॥

૮૪. આકૃષ્ય સહ સૌભાગ્યાં નાશયામાસ વૈ ક્ષણાત્ ।
દૈવાત્ વિમુક્તઃ તત્ પૂરાત્ આયુઃશેષેણ ભૂપતે ॥

૮૫. તપસા તોષયામાસ ગઙ્ગાધરમુદારધીઃ ।
માસમાત્રેણ ભગવાન્ આશુતોષઃ સદાશિવઃ ॥

૮૬. વરેણ છન્દયામાસ તં દેવં પ્રાઞ્જલિર્જગૌ ।
રાજા –
ભગવન્ કરુણામૂર્તે પ્રસીદ મયિ શઙ્કર ॥

૮૭. યદિ મે તપસા તુષ્ટઃ યદ્યહં ત્વત્કૃપાસ્પદઃ ।
શાલા મે સહપત્નીકો સદ્વિજા સહુતાશના ॥

૮૮. સસમ્ભારાગ્રતો મેઽસ્તુ વરમેનં વૃણે પ્રભો ।
ઇત્યુક્તસ્તં પુનઃ પ્રાહ ભગવાન્ પ્રમથેશ્વરઃ ॥

૮૯. સદાશિવઃ –
રાજન્ મત્પ્રાણકલિકા તડિની મલયાત્મજા ।
અનભિજ્ઞેન ભવતા દૂષિતા પાપચેતસા ॥

૯૦. યસ્યાનુગ્રહલાભેન દીર્ઘાયુષ્યમવાપ્તવાન્ ।
પાપપઞ્જરનિર્મુક્તઃ સ ત્વં દૂષિતવાનસિ ॥

૯૧. જનનીમવમત્યૈવ એવતાન્તરમિચ્છસિ ।
અપહાય ચ ગાયત્રીં મન્ત્રાન્તરમભીપ્સસિ ॥

૯૨. યત્ર ગઙ્ગા ચ યમુના ચ યત્ર ગોદાવરી નદી ।
તીર્થાનાં હૃદયં હ્યેષા દેવાનાં બલમુચ્યતે ॥

૯૩. મન્ત્રાણાં મન્ત્રશક્તિસ્તુ કર્મશક્તિસ્તિ કર્મિણામ્ ।
વેદદ્રવા વિશ્વમાતા બ્રહ્મવિષ્ણ્વાદ્યુપાસિતા ।
૯૪. તામિમામદ્રિસમ્ભૂતાં ત્વમુપેક્ષિતવાનસિ ।
તામેવ ભૂયસ્સંપ્રાપ્ય પ્રણવાર્થપ્રદીપિકામ્ ॥

૯૫. તપસા મન્ત્રતન્ત્રાભ્યાં તાં તોષયિતુમર્હસિ ।
તદનુગ્રહલાભેન તત્ર શાલાં પુનર્ભવામ્ ॥

૯૬. સસમ્ભારાગ્નિપત્નીકાં લપ્સ્યસે નાત્ર સંશયઃ ।
ઇત્યુક્ત્વાન્તર્હિતે શમ્ભૌ સોઽપિ રાજા ભયાતુરઃ ॥

૯૭. ઇત્થમાન્તર્હિતે દેવે સ રાજા માધવીસુતઃ ।
તદતિક્રમણાઘૌઘસમ્ભ્રાન્તસ્વાન્તસન્તતિઃ ॥

૯૮. ભયાદિરેકરોમાઞ્ચકઞ્ચુકીકૃતવિગ્રહઃ ।
સમભ્યેત્ય પુનઃ પુણ્યાં ઘૃતધારાં પયસ્વિનીમ્ ॥

૯૯. કાશ્યપાશ્રમમાસાદ્ય તપઃ ચક્રે સુદારુણમ્ ।
અઙ્ગુષ્ઠાગ્રેણ વસુધાં સંસ્પૃશન્ પશ્ચિમોમુખમ્ ॥

૧૦૦. ઊર્ધ્વબાહુર્નિરાહારો હૃદિ ધ્યાયન્ જગત્પ્રસૂમ્ ।
તપનીયામ્બુજારૂઢાં બાલામ્બુજસમપ્રભામ્ ॥

૧૦૧. ચતુર્ભુજાં ત્રિણયનાં કૌસુમ્ભામ્બરધારિણીમ્ ।
નવમાણિક્યકોટીરકિરણારુણિતામ્બરામ્ ॥

૧૦૨. તપ્તચામીકરાકારપયોધરધરાધરામ્ ।
ચારુગ્રૈવેયકેયૂરવલયાવલિભાસુરામ્ ॥

૧૦૩. આપાતકેશઘટિતૈઃ ભૂષણાં મણિભૂષણૈઃ ।
મન્દસ્મેરાંશુસમ્ભિન્નસમસ્તતિમિરચ્છટામ્ ॥

૧૦૪. કરુણાપાઙ્ગપીયૂષસન્દર્ભિતચરાચરામ્ ।
સમસ્તતીર્થજનનીં ચન્દનાચલકન્યકામ્ ॥

૧૦૫. ધ્યાયન્ સ્વહૃદયામ્ભોજે નિશ્ચલઃ સમતિષ્ઠત ।
તેનૈવ તપ્સા દેવી સન્તુષ્ટા માસમાત્રતઃ ॥

૧૦૬. સાન્નિધ્યં પુરતઃ તસ્ય ચકાર કરુણાર્દ્રધીઃ ।
વત્સ તે તપસનેન સન્તુષ્ટહૃદયાસ્મ્યહમ્ ॥

૧૦૭. તવેપ્સિતાનિ સર્વાણિ પ્રાપ્તાનિ મદનુગ્રહાત્ ।
પશ્ય ભદ્રાણિ દાસ્યામિ કામ?ઓઽપ્રીવ કાઙ્ક્ષિતમ્ ॥

૧૦૮. ઇતિ શ્રુતિસુખાકારાં સુખાકારાં સમાકર્ણ્ય તુ ભારતીમ્ ।
સમાધિં સઙ્કુચન્નગ્રે દદર્શ પરમેશ્વરીમ્ ॥

૧૦૯. યથાન્તઃ સ્વાન્તમદ્રાક્ષીત્ તથૈવ પુરતો નૃપઃ ।
આનન્દમગ્નહૃદયો મૂર્ધ્ના મુકુલિતાઞ્જલિઃ ॥

૧૧૦. હર્ષગદ્ગદયા વાચા વ્યાચષ્ટે સ્વેષ્ટદેવતામ્ ।
રાજા –
દેવિ પ્રસીદ કલ્યાણિ પ્રસીદ મલયાત્મજે ॥

૧૧૧. આગઃ ક્ષમસ્વ દેવેશિ મૂઢસ્યાકાર્યવેદિનઃ ।
ત્વદઙ્ઘ્રિપઙ્કજે ભક્તિઃ અનપાયાસ્તુ મે સદા ॥

૧૧૨. મનોરથા મે સુલભાસ્ત્વત્પાદામ્બુજલાભતઃ ।
યથા મય્યનભિજ્ઞત્વં ન ભૂયાત્ અપિ જન્મસુ ॥

૧૧૩. તથા પ્રસીદ સર્વેશિ ત્વામહં શરણં ગતઃ ।
ઇતિ બ્રુવતિ રાજેન્દ્રે ગઙ્ગાદ્યાસ્સરિતસ્સદા ॥

૧૧૪. આજગ્મુરખિલા રાજન્ પશ્યત્સુ સકલેષ્વપિ ।

સર્વાસ્તમેનં રાજાનમનુશાસ્ય સરિદ્વરામ્ ॥

૧૧૫. તસ્યૈવ પુરતસ્સર્વાઃ તામ્રાયાસ્તનમણ્ડલે ।
અભિજગ્મુર્મહારાજ તદદ્ભુતમિવાભવત્ ॥

૧૧૬. સા તસ્યાભીપ્સિતાન્ કામાન્ પ્રદાયાન્યત્ર સુદુર્લભાન્ ।
સર્વતીર્થમયી ભૂયઃ તામ્રાભ્યન્તરધીયત ॥

૧૧૭. સ ભૂમિપાલો મલયાત્મજાયાઃ લબ્ધ્વા પરાણ્યભ્યુદયાનિ તસ્યાઃ ।
સંપ્રાપ્ય શાલાં સહ ભાર્યયાસૌ ચકાર વિપ્રૈઃ ક્રતુમાર્યગૃહ્યમ્ ॥

સપ્તવિંશોધ્યાયઃ ।  Pro.Total = 2100 + 117 =2217.

## અષ્ટાવિંશોઽધ્યાયઃ

દેવાનાં કાર્યાર્થં તપઃ કુર્વતોઃ કાશ્યપાદિત્યોઃ તામ્રપર્ણ્યાઃ
વરદાનં કાશ્યપેન લિઙ્ગપ્રતિષ્ઠા ।

૧. શ્રી સૂતઃ –
ઇત્યાકર્ણ્ય કથાં પુણ્યાં વિચિત્રોપકથાન્વિતામ્ ।
વીરસેનઃ પુનર્વાક્યમુવાચ મુનિપુઙ્ગવમ્ ॥

૨. વીરસેનઃ –
અહો ભગવતા પ્રોક્તા કથેયં કલુષાપહા ।
શ્રુતાપિ ભૂયઃ શ્રોતવ્યા સંશયસ્ય વ્યપોહને ॥

૩. તપસારાધિતા દેવી રાજ્ઞા મલયનન્દિની ।
કથં તસ્મૈ વરાન્ પ્રાદાત્ મહીભર્તુશ્ચ કાઙ્ક્ષિતાન્ ॥

૪. કથં સા પ્રાદુરભૂત્ કથં નદ્યસમાયયુઃ ।
અનુશાસ્ય કથન્ત્વેનાં વિવિશુઃ દદૃશાન્તરે ॥

૫. એતત્ સર્વમશેષેણ વદ વિસ્તરતો મમ ।
શઙ્ખઃ –
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ કથાં કલુષનાશિનીમ્ ॥

૬. તામ્રપર્ણી મહાદેવી તપસા પ્રીતમાનસા ।
તદા નદ્યાસ્તટે શાલા પતાકાધ્વજમાલિની ॥

૭. સસભ્યા સહપત્નીકા સમ્ભારાગ્નિમણ્ડલા ।

યથાપૂર્વં સમભવત્ પુરતસ્તસ્ય ભૂપતેઃ ॥

૮. તાવત્ તામ્રાપ્રવાહસ્તુ નનાવર્ણેવ દૃશ્યતે ।
તત્તીરપૂરાત્ તુ ઉત્તસ્થુઃ ગઙ્ગાદ્યાઃ સરિતઃ તદા ॥

૯. ગોક્ષીરવર્ણા તરુણી નાનાભરણભૂષિતા ।
ગઙ્ગા સમાયયુ દેવી ભાસા ભુવનપાવની ॥

૧૦. તામ્રે ત્વયા બાલતયા પ્રાપ્તં પરિભવં મહત્ ।
એષા ત્વત્પ્રાણશક્તિસ્તુ પરાશક્તિસમુદ્ભવા ॥

૧૧. ઇન્દ્રનીલમણિચ્છાયા યમુના પાપહારિણી ।
અભ્યાગમત્ અશેષસ્ય લોકસ્ય ક્ષેમદાયિની ॥

૧૨. પદ્મરાગમણિચ્છાયા ભારતી ગજસેવિતા ।
સમાયાતા સમસ્તસ્ય સર્વમઙ્ગલદાયિની ॥

૧૩. ગોદાવરી ગૌરવર્ણા પીતામ્બરસમાવૃતા ।
કહ્લેલીકુસુમોત્તંસા સંપ્રાભાભરણોજ્જ્વલા ॥

૧૪. નર્મદા શઙ્ખધવલા કર્પૂરાભા કુમુદ્વતી ।
શોણભદ્રા કાઞ્ચનાભા ફલ્ગુની કુઙ્કુમારુણા ॥

૧૫. કર્પૂરવર્ણા કાવેરી વેગવત્યમ્બુજારુણા ।
એતાઃ ચાન્યાઃ તહા નદ્યઃ બહ્વ્યઃ નારીવપુર્ધરાઃ ॥

૧૬. સાલઙ્કારાઃ સાનુલેપાઃ સવાહનપરિચ્છદાઃ ।
સમાગત્ય મહાદેવીમુપતસ્થુઃ સમાહિતાઃ ॥

૧૭. તત્ર રાજાનમાહૂય ગઙ્ગા વચનમબ્રવીત્ ।
શ્રી ગઙ્ગા –
રાજન્ બાલતયા પ્રાપ્તં ત્વયા પરિભવં મહત્ ॥

૧૮. એષા મત્પ્રાણશક્તિસ્તુ તામવૈહિ મમાત્મિકામ્ ।
અહં મલયજાતાસ્મિ પરાશક્તિસમુદ્ભવા ॥

૧૯. આવયોર્નૈવ ભેદોઽસ્તિ ભેદબુદ્ધિર્વિનશ્યતિ ।
એષા રુદ્રપ્રભા નામ વેદેષુ પરિપઠ્યતે ॥

૨૦. મરુદ્વૃધેતિ માલેતિ પરુષ્ણીતિ પરેતિ ચ ।
સંપ્રશંસન્તિ તામ્રેતિ શ્રુતયો મલયાત્મજામ્ ॥

૨૧. ગુહાચરી ગુહ્યરૂપા પવિત્રી પાપનાશિની ।
 માલા મલયપુત્રીતિ માનયન્તિ સુરાસુરાઃ ॥

૨૨. અત્ર સર્વમિદં જાતમસ્યામેવ પ્રતિષ્ઠિતમ્ ।
 એનામાશ્રિત્ય વિન્દન્તિ હ્યમૃતત્ત્વં તુ જન્તવઃ ॥

૨૩. સામાન્યા તટિનીયન્તુ વદત્યેનાં સ પાતકી ।
 પશ્યતે નરકે ઘોરે યાવત્ આભૂતસમ્પ્લવમ્ ॥

૨૪. ઇતઃ પરં મહારાજ માવમંસ્થાઃ કદાચન ।
 ઇત્થં ગઙ્ગાનુશાસ્યૈનં લોકાનામેવ પશ્યતામ્ ॥

૨૫. સંવિવેશ તથા ગઙ્ગા તામ્રાયાઃ સ્તનમણ્ડલે ।
 તથૈવ યમુનાદ્યાશ્ચ નાનારૂપાઃ સરિદ્વરાઃ ॥

૨૬. ક્રમાત્ ઉપાવિશન્ સર્વાઃ પઞ્જરે શારિકા ઇવ ।
 એતત્ વિચિત્રં પશ્યન્તો બ્રહ્મનારાયણાદયઃ ॥

૨૭. પુષ્પવૃષ્ટિમુચસ્સર્વે અસ્તુવન્ મલયાત્મજામ્ ।
 સ્તુવત્સુ સર્વદેવેષુ પતહાડમ્બરેષુ ચ ॥

૨૮. આશ્ચર્યાવિષ્ટચિત્તેષુ સર્વેષુ ભુવનેષ્વપિ ।
 સ્તૂયમાના મહાદેવી તામ્રા વચનમબ્રવીત્ ॥

૨૯. શ્રી દેવી –
 રાજન્ મનોરથાસ્સન્તુ મમાનુગ્રહાસ્તવ ।
 યજ્ઞશેષં સપત્નીકઃ કર્તુમર્હસિ ભૂસુરૈઃ ॥

૩૦. કીર્તિસ્તે ચન્દ્રિકાકારા લોકે વિસ્તારમૃચ્છતુ ।
 એતત્ તીર્થં પ્રશંસન્તુ શાલાતીર્થમિતિ ધ્રુવમ્ ॥

૩૧. અત્ર સ્નાતા નરાસ્સર્વે ભવન્તુ સુખભાગિનઃ ।
 ભુક્તિર્મુક્તિશ્ચ સર્વેષાં મજ્જતાં પિબતામપિ ॥

૩૨. અભૂતામેવ શાશ્વત્યૌ નાત્ર કાર્યા વિચારણા ।
 એવં દેવી વચઃ પ્રોક્ત્વા રાજાનં માધવીસુતમ્ ॥

૩૩. શાલાતીર્થે તદા તસ્મિન્ તામ્રાભ્યન્તરધીયત ।
 તતો વસુમના પ્રાપ્ય વરાન્ અભિમતાન્ બહૂન્ ॥

૩૪. સંપ્રહૃષ્ટમનાઃ ભૂયઃ સ્વયજ્ઞં સમપાદયત્ ।
સર્વે દેવાશ્ચ સિદ્ધાશ્ચ સ્તુવન્તઃ તીર્થવૈભવમ્ ॥

૩૫. રાજાનમપિ સમ્ભાવ્ય સ્વાનિ સ્વાનિ પદાન્યગુઃ ।
તત્ર ચાવભૃથસ્નાનં વિધાય વિધિપૂર્વકમ્ ॥

૩૬. કાશ્યપેશં સમભ્યર્ચ્ય દાહકેશં પ્રણમ્ય ચ ।
મુનીન્ આમન્ત્ર્ય તત્રસ્થાન્ સભાર્યઃ સપુરોહિતઃ ॥

૩૭. સ્વરાજધાનીં સંહૃષ્ટઃ પ્રાયાત્ પ્રાસાદમાલિકામ્ ।
તતસ્તત્ર સ્થિતાસ્સર્વે દૃષ્ટ્વા ક્ષેત્રસ્ય વૈભવમ્ ॥

૩૮. સન્તોષં પરમં પ્રાપ્તઃ કાશ્યપશ્ચ મહામુનિઃ ।
તસ્માત્ રાજન્ મહાતીર્થે તત્ર સ્નાનં સ્માચર ॥

૩૯. ક્રોશાર્ધવિસ્તૃતં ક્ષેત્રં તેજઃસ્થાનં પ્રકીર્તિતમ્ ।
પુરા કૃતયુગે રાજન્ મનૌ સાવર્ણિકેઽન્તરે ॥

૪૦. અદિતિર્દેવજનની કાઙ્ક્ષન્તી વિજયં હરેઃ ।
ભર્તારં કાશ્યપં પ્રાપ્ય પપ્રચ્છ પ્રણતા સતી ॥

૪૧. કેનોપાયેન વૈ બ્રહ્મન્ જયમેષ્યન્તિ મે સુતાઃ ।
તમુપાયં સમુપાચક્ષ્વ દેવેષુ કરુણાં ગુરુઃ ॥

૪૨. ઇત્થં તયા પ્રાર્થિતોઽસૌ કાશ્યપઃ તપસાં નિધિઃ ।
શ્રુણુ પ્રિયે વચઃ પથ્યં તત્ તથા કર્તુમર્હસિ ॥

૪૩. અનાદિમિથુનોદ્ભૂતા યા સરિન્મલયાતજા ।
સૈષા સર્વસ્ય લોકસ્ય વિજ્ઞેયા કામદોહિની ॥

૪૪. અતસ્ત્વમુપગમ્યેનામારાધય વિધાનતઃ ।
તદનુગ્રહલાભેન ભવન્તુ જયિનસ્સુરાઃ ॥

૪૫. અહમપિ આગમિષ્યામિ ત્વમગ્રે ગચ્છ સત્વરમ્ ।
ઇત્થં ભર્ત્રા નિયુક્તા સા દેવી દેવપ્રસૂર્મુદા ॥

૪૬. તામ્રામાસાદ્ય નિયમાત્ સ્નાત્વા તત્રૈવ સંસ્થિતા ।
તપશ્ચકાર સુચિરં દુશ્ચરં ભુવનત્રયે ॥

૪૭. સ્વવધાય તપ્સ્યન્તીં જ્ઞાત્વા સર્વેઽપિ દાનવાઃ ।
તપો વિઘાતં કુર્વાણાઃ સમાવવૃરલક્ષિતાઃ ॥

૪૮. સાપિ ચન્દનશૈલેન્દ્રતનયા સર્વદર્શિની ।
નિવાર્ય વિઘ્નજાલાનિ દાનવાચરિતાન્યપિ ॥

૪૯. તત્ર ક્ષણાય વિદધે પ્રાકારં જ્વલનાત્મકમ્ ।
જ્વાલામાલાસમાયુક્તં પ્રાકારં પરમાદ્ભુતમ્ ॥

૫૦. વિલોક્ય ભયસમ્ભ્રાન્તા દૈત્યાઃ જગ્મુર્યથાગતમ્ ।
અદિતિર્દેવજનની વહ્નિમણ્ડલમધ્યગા ॥

૫૧. ધ્યાનારૂઢા નિશ્ચલાઙ્ગી ધ્યાયન્તી પરમેશ્વરીમ્ ।
અન્તર્બહિરવિચ્છિન્નમવસત્ તન્મયં જગત્ ॥

૫૨. તતઃપ્રસન્ના વરદા તસ્યાઃ પ્રાદુરભૂત્ પુરઃ ।
સહસ્રાદિત્યસઙ્કાશાં સાન્દ્રસિન્દૂરપાટલામ્ ॥

૫૩. ચતુર્ભુજાં ત્રિણયનાં તપ્તહાટકભૂષિતામ્ ।
તીર્થકન્યાશતોપેતાં દૃષ્ટ્વા પરમહર્ષિતા ॥

૫૪. સભ્રૂભઙ્ગં સમુત્થાય બદ્ધાઞ્જલિપુટા સતી ।
તુષ્ટાવાદિતિરવ્યગ્રા ગિરા ગદ્ગદયા મુદા ॥

૫૫. અદિતિઃ –
યા શક્તિરન્તર્જાગર્તિ લોકાનાં પ્રાણરૂપિણી ।
યા પુનર્જીવનાખ્યા સ્યાત્ તાં ત્વાહં શરણં ગતા ॥

૫૬. ગાયન્તિ શ્રુતયો નિત્યં તીર્થરૂપાં મરુદ્વૃધામ્ ।
તાં ત્વામખિલતત્ત્વાર્થાં માહેયીમાશ્રયે શ્રિયમ્ ॥

૫૭. હેતુરાદાવશેષસ્ય જીવનત્વે વ્યવસ્થિતા ।
મૃત્યુઃ પ્રાણભૃતાં ભૂયો યદંશેન પ્રવર્તિતઃ ॥

૫૮. અનાદિશક્તિરવ્યગ્રા નિગ્રહાનુગ્રહક્ષમા ।
સા ત્વં લોકહિતાયૈવ જાતા હિ મલયાત્મજા ॥

૫૯. મન્ત્રસક્તિં પ્રશંસન્તિ સન્તઃ કર્મકલાં પુનઃ ।
ત્વમેવ ફલદા લોકે તીર્થમાતર્નમોઽસ્તુ તે ॥

૬૦. શિવઃ શિવાન્વિતો ભૂરિ તપસારાધ્ય માધવિ ।
ત્વામેવ લબ્ધવાન્ આદૌ તસ્માત્ ત્વાં શરણં વ્રજે ॥

૬૧. માલેયી મલયા નન્દા ગઙ્ગા ભાગીરથીતિ ચ ।
ઘૃતધારા પરુષ્ણીતિ પઠ્યસે ત્વં પુરાતનૈઃ ॥

૬૨. પ્રસીદ મલયાનન્દે તામ્રે માતઃ પ્રસીદ મે ।
અબ્ધિપત્નિ નમસ્તુભ્યં નમસ્તુભ્યં નમો નમઃ ॥

૬૩. ઇતિ સ્તુવન્ત્યાઃ પુરતો દેવમાતુર્મહીપતે ।
પ્રસન્ના પ્રાહ કલ્યાણી તામાહૂય ગિરા પુનઃ ॥

૬૪. દેવમાતર્મહાભાગે પ્રીતાસ્મિ તપસા તવ ।
ઇત આરભ્ય વૈ દેવા અવધ્યા દાનવૈઃ પરૈઃ ॥

૬૫. મચ્છક્ત્યા વર્ધિતાત્માનો જેષ્યન્તુ દનુજાદિકાન્ ।
જયલક્ષ્મીર્ભવિષ્યામિ નિત્યા દેવેષ્વહં સદા ॥

૬૬. મત્પ્રસાદાત્ ભવિષ્યન્તિ સફલાસ્તે મનોરથાઃ ।
ત્વયા કૃતમિદં સ્તોત્રં યે પઠન્ત્યરુણોદયે ॥

૬૭. તેષાં દર્શનમાત્રેણ દૂરે નશ્યતિ પાતકમ્ ।
ત્રિસન્ધ્યં પઠતાં નૃણાં ધ્યાત્વા માં શુદ્ધચેતસામ્ ॥

૬૮. હયમેધાવભૃથસ્ય ફલં ભવતિ શાશ્વતમ્ ।
યે ચ ત્વાં અત્ર નિયતા સર્વે ગીર્વાણમાતરમ્ ॥

૬૯. નમસ્કૃત્ય યથાન્યાયં તીર્થે મજ્જન્તિ મામકે ।
તેષાં મનોરથાઃ પુણ્યાઃ ભવિષ્યન્ત્યનપાયિનઃ ॥

૭૦. અન્તે કૈવલ્યસૌભાગ્યં તેષાં દાસ્યામ્યસંશયમ્ ।
ઇતિ બ્રુવત્યામમ્બાયાં અમ્બરાત્ અદ્ભુતાવહા ॥

૭૧. દેવતાનાં ઘનારાવા જગર્જે દેવચોદિતા ।
પુષ્પવૃષ્ટિસ્સુમહતી પપાતામોદનિર્ભરા ॥

૭૨. વિમાનૈઃ કાઞ્ચનાકારૈઃ અભ્યાજગ્મુર્દિવૌકસઃ ।
મુનયો નારદાદ્યાઃ ચ સનકાદ્યાઃ ચ યોગિનઃ ॥

૭૩. સ્તુવન્તઃ શ્રુતિસમ્ભાવ્યૈઃ વચનૈર્મલયાત્મજામ્ ।
કાશ્યપશ્ચ મહાતેજાઃ પ્રજાપતિરકલ્મષઃ ॥

૭૪. દેવીં તામ્રામભિષ્ટૂય સમાશ્વાસ્યાદિતિં પ્રિયામ્ ।
દેવીમારાધયામાસ યથાવત્ વિજિતેન્દ્રિયઃ ॥

૭૫. તતો દેવગિરા રાજન્ વહ્નિપ્રાકારમણ્ડલાત્ ।
ઉત્તસ્થુર્દીપિકા વ્યોમ્ના શતશોઽથ સહસ્રશઃ ॥

૭૬. શતક્રતુમુખેષ્વેષુ પ્રાવિશન્ ક્રમશોઽમ્બરે ।
તમાત્ દુરાસદા દૈત્યૈઃ અભવન્ તે દિવૌકસઃ ॥

૭૭. પ્રાપ્તપૌરુષવીર્યેષુ તેજિષ્ઠેષ્વમરેષ્વપિ ।
અદિતિં કાશ્યપઞ્ચૈવં અનુગૃહ્ય મરુદ્વૃધા ॥

૭૮. પુનરન્તરધાત્ તીર્થે માલા મલયનન્દિની ।
દેવાઃ કાશ્યપમામન્ત્ર્ય માતરં ચાભિવાદ્ય ચ ॥

૭૯. જગ્મુર્યથાગતં સર્વે પ્રશંસન્તો મહાનદીમ્ ।
તતસ્સહર્ષં મુનિભિઃ કાશ્યપઃ તપસાં નિધિઃ ॥

૮૦. તત્ર લિઙ્ગં પ્રતિષ્ઠાપ્ય સમભ્યર્ચ્ય વિધાનતઃ ।
સપત્નીકઃ તપશ્ચક્રે સુચિરં શમ્ભુસન્નિધૌ ॥

૮૧. વિધાય શાલાં વિબુલાં સપ્તતન્તૂન્ સદક્ષિણાન્ ।
વિધાય પરમાં સિદ્ધિં સંપ્રાપેતરદુર્લભામ્ ॥

૮૨. શિવશર્માભિધઃ કશ્ચિત્ ભૂસુરો ભૂરિપુણ્યભૂઃ ।
ગઙ્ગાતીરાત્ સમભ્યેત્ય વાજપેયમપારયત્ ॥

૮૩. ગુરુણા કાશ્યપેનૈવ તેન સિદ્ધિં પરાં ગતઃ ।
કસ્યચિત્ દ્વિજવર્યસ્ય જલાત્ ઉન્મજ્જતઃ પુરા ॥

૮૪. દીપહસ્તસ્ય ભગવાન્ અનુગ્રહવિધિત્સયા ।
આવિર્બભૂવ ભગવાન્ દાહકેશ્વરસંજ્ઞિતઃ ॥

૮૫. એતત્ વૃત્તાન્તંઆકર્ણ્ય રાજા વસુમના વિભુઃ ।
લબ્ધવાન્ અત્રાભ્યેત્ય શાલાં ગઙ્ગામ્ભસાવૃતામ્ ॥

૮૬. તીર્થસ્યાસ્ય પ્રભાવેન રાજાનો મુનયઃ પરે ।
લેભિરે પરમાં સિદ્ધિમિહ ચામુત્ર ચાદ્ભુતામ્ ॥

૮૭. યે ચેમાં પરમાં પુણ્યાં કથાં પાપપ્રણાશિનીમ્ ।
શ્રુણ્વન્તો વા પઠન્તો વા ન શોચન્તિ પુનશ્ચ તે ॥

ઇતિ અષ્ટાવિંશોઽધ્યાયઃ ।  Pro.Total = 2217 + 87 = 2304.

## એકોનત્રિંશોઽધ્યાયઃ

કાશ્યપેન ઈશ્વરસ્તુતિઃ ।
શિવશર્માખ્યસ્ય બ્રાહ્મણસ્ય કાશ્યપતીર્થાદિપ્રશ્નપૂર્વકં
કાશ્યપં પ્રતિ પ્રશ્નઃ ।

૧. શ્રી સૂતઃ –
શ્રુત્વેદં વીરસેનશ્ચ કથાં રાજા કુતૂહલાત્ ।
પ્રશસ્ય શઙ્ખં પ્રાહેદં વચનં વિનયોજ્જ્વલમ્ ॥

૨. રાજા –
યથા પુરા વસુમનાઃ શ્રુતવાન્ મુનિપુઙ્ગવ ।
તથાહં શ્રોતુમિચ્છામિ કથાં કાશ્યપસંશ્રયામ્ ॥

૩. કથં સંસ્થાપયામાસ મહાદેવં સ કાશ્યપઃ ।
તત્ર સ્વયં ચાવિરભૂત્ દાહકેશ્વરસંજ્ઞકઃ ॥

૪. એતત્ વિસ્તાર્ય ભગવન્ શંસ મે કરુણાનિધે ।
ઇત્થં રાજ્ઞા પ્રોચ્યમાનઃ શઙ્ખયોગી મહાતપાઃ ॥

૫. પ્રશસ્ય ભૂયો રાજાનં પ્રત્યભાષત હર્ષવત્ ।
શ્રી શઙ્ખઃ –
રાજન્ ધર્મભૃતાં શ્રેષ્ઠ તવ પ્રિયમભીપ્સતા ॥

૬. મયાધુના કથ્યમાના શ્રોતવ્યા ભવદાધુના ।
પુરા પ્રજાપતિર્ધીમાન્ કાશ્યપિઃ સહ ભાર્યયા ॥

૭. અદિત્યા સમભિષ્ટૂય નદીં મલયસમ્ભવામ્ ।
તત્પ્રસાદોપલાભાય ભૂપો નિશ્ચિત્ય બુદ્ધિમાન્ ॥

૮. સહ દેવૈર્મુનિગણૈઃ તત્ર દીક્ષામુપાગમત્ ।
સત્રમાઙ્ગીરસં નામ પરં સર્વાત્મસાધનમ્ ॥

૯. અપારયાત્ અમેયાત્મા પ્રીણયન્ ગુરુમીશ્વરમ્ ।
ઋત્વિજો દક્ષિણાભિઃ તોષયન્ સપ્રસર્પકાન્ ॥

૧૦ કૃત્વાબભૃથં સ તામ્રાયાં સ્નાનં સન્તુષ્ટમાનસઃ ।
તાવત્ ઉત્તરવેદ્યાં તુ સ્થાપ્ય લિઙ્ગમનુત્તમમ્ ॥

૧૧. શિવમારાધયામાસ સ્વમનોરથસિદ્ધયે ।
સમાધિસિદ્ધૈર્દ્રવ્યૈશ્ચ મન્ત્રૈઃ નિગમસમ્ભૃતૈઃ ॥

૧૨. એવમર્ચયતસ્તસ્ય કાશ્યપસ્ય મહામતેઃ ।
વર્ષાણાં ત્રિશતં રાજન્ અત્યગાત્ નિમિષોપમઃ ॥

૧૩. એવમારાધિતસ્તેન ભગવાન્ પ્રમથેશ્વરઃ ।
તલ્લિઙ્ગાન્મૂર્તિમાનાસીત્ સ્વભાસા ભાસયન્ નભઃ ॥

૧૪. અઙ્કેનાદાય ગિરિજામશેષભુવનપ્રસૂમ્ ।
સાક્ષાત્ ચર્મમયં શ્વેતં વૃષમારુહ્ય વાહનમ્ ॥

૧૫. શૂલટઙ્કમૃગાભીતિવરદાનપરશ્વથૈઃ ।
ભુજૈરુદ્દામવલયૈરહિરાજાઙ્ગદોજ્જ્વલૈઃ ॥

૧૬. ભાસમાનઃ સ્વકોટીરઘટિતેન્દુકલોજ્જ્વલૈઃ ।
સ્તૂયમાનઃ સુરગણૈઃ સિદ્ધગુહ્યકચારણૈઃ ॥

૧૭. પ્રીણયન્ મધુરૈર્વાક્યૈઃ કાશ્યપં સમભાષત ।
શ્રી ભગવાન્ –
ત્વયાહં પૂજિતો ભક્ત્યા મન્ત્રેણ વિધિપૂર્વકમ્ ॥

૧૮. પ્રીતોઽસ્મ્યભીપ્સિતાન્ કામાન્ વૃણીષ્વ તપસાં નિધે ।
ઇત્યુક્તો દેવદેવેન મહાદેવેન કાશ્યપઃ ॥

૧૯. પુનઃપુનઃ તુ સંસ્પૃશ્ય સ મૂર્ધ્ના તત્પદામ્બુજમ્ ।
બદ્ધાઞ્જલિપુટઃ તિષ્ઠન્ ભક્તિનમ્રાત્મવિગ્રહઃ ॥

૨૦. તુષ્ટાવ પરમેશાનં સ્તોત્રૈઃ શ્રુત્યન્તસંસ્કૃતૈઃ ।
નતોઽસ્મ્યહં નાથ નવેન્દુભૂષણં સદાશિવં ત્વાં સકલસ્ય હેતુકમ્ ॥

૨૧. યદઙ્ઘ્રિપઙ્કેરુહસંસ્મૃતિર્જયત્યશેષમોક્ષૈકનિધાન દીપિકા ।
શિખાપિરન્તશ્રુતિકલ્પશાખિનામવિશ્રમોચ્ચાવચમન્ત્રપલ્લવૈઃ ॥

૨૨. પ્રસાદ્યતે ત્વત્પદપદ્મમીશ યત્ ત્વદન્યતઃ ક્વાપિ ન યાતુ મે મનઃ ।
મહેશ માયા તવ વિશ્વમોહિની ન લઙ્ઘ્યતે બ્રહ્મપુરન્દરાભિઃ ॥

૨૩. તથાપિ મા ત્વત્કરુણૈકભાજનં પરાભવિષ્યત્વભવાય ન ક્વચિત્ ।
તવેશ નિષ્યન્દમિદં ત્વયા જગદ્ધ્વજસ્ત્વમઙ્ગીકુરુતે ચરાચરૈઃ ॥

૨૪. તથાપિ સૈષા મયિ ભૂયસી ભવેત્ ચકોરસઙ્ગે શસિનો યથા રુચિઃ ।

અશક્તમપ્યન્તરલીલયા જગત્ યથૈવ શક્ત્યા વિમલીકરોષિ યત્ ॥

૨૫. દયૈવ મે ચેતસિ સન્તતં શ્રિયા કુરુષ્વ લીલાં ભવ પાર્વતીપતે ।
બિભેમિ ભીમાત્ વિષયાન્ મહાવિષાન્ મહેશ વિશ્વાદિવિષાપહન્ વિભો ॥

૨૬. મદીયમિત્યેવમનુસ્મરન્ જનં ત્રિધાપથઃ ત્રાતુમિહાર્હસીશ્વર ।
અલં પરિશ્રામ્ય ભવાર્ણવોદરે દુરાશયા હ ભ્રમતે પુનઃપુનઃ ॥

૨૭. ઇતઃ પરઞ્ચાહવભીતભઞ્જનં નિરઞ્જનં યામિ વિભો ભવત્પદમ્ ।
વિભક્તનાનાગુણકર્મરૂપિણા ન જન્મના પ્રાણિસુખા કૃતાપિ મે ॥

૨૮. અપત્યદારાદિભયાદુપાગતં વિભોઽનુગૃહ્ણીષ્વ મહેશ મામિતઃ ।
દયાનિધે દેવ દિવાનિશં ભયાદયાતયામઃ તવ ભૃત્યમેવ મામ્ ॥

૨૯. અતર્કિતાપાતદયાવિલોકનૈઃ પરં પરિત્રાહિ સુતાનિવ પ્રસૂઃ ।
ઉમાપતે વિશ્વપતે સતાં પતે પતે પશૂનામપિ રુદ્ર વાક્પતે ॥

૩૦. પ્રસીદ સાન્દ્રાભ્યુદયપ્રસન્નયા દૃશા યયા વિશ્વમિદં હિ મઙ્ગલમ્ ।
ન કર્મણા ન પ્રજયા ન સમ્પદા નયોગસિધ્યા ન મનઃ સમાધિભિઃ ॥

૩૧. પરં ન પશ્યન્તિ પદં તવ દર્શનાં
વિનાપિ ભક્તિં ભગવન્ પ્રસીદ તામ્ ।
પરઃશતૈઃ જન્મભિરન્વહં ભયાત્ પુનઃપુનઃ શ્રાન્તિમુપેયુષા મયા ॥

૩૨. અભઙ્ગુરાનન્દસુતો દયોદયાં તવાઙ્ઘ્રિપઙ્કેરુહમાશ્રમદ્ય હિ ।
કથઞ્ચિદાપન્નમનુગ્રહેણ મે નમોક્તુમર્હસ્યવિલમ્બમેવ ભો ॥

૩૩. સ્તનન્ધયં સ્વં વિષમસ્થમપ્યહો જનન્યનાશ્રયાત્મજં યથા ।
અખણ્ડકર્પૂરવલક્ષમેકતઃ પરસ્થકસ્તૂરિકયા સમપ્રભમ્ ॥

૩૪. વપુસ્તવેદં વૃષભધ્વજાવૃતં ન યાતુ ચિત્તાતપરત્ર મામકાત્ ।
નમઃ પુરાણાય પુરાણમૂર્તયે નમોસ્ત્વનાન્તવધૂકુટુમ્બિને ॥

૩૫. અનામગોત્રાય જગત્રયોદયસ્થિતિક્ષયોલ્લાસકટાક્ષવર્ચસે ।
પ્રસીદ ગૌરીશ નિશાવિટાર્ભક પ્રગલ્ભકોટીરકુટુમ્બિભોગિને ॥

૩૬. દ્યુસિન્ધુસન્ધુક્ષિતકૈશિકાય તે સદાશિવાયામૃતમૂર્તયે નમઃ ।
શઙ્ખઃ –
ઇત્થં વાચા સુધાસારસૌભાગ્યૈકસમગ્રયા ॥

૩૭. સંસ્તુવન્ પરમેશાનં કાશ્યપો હર્ષગદ્ગદઃ ।

ભૂયઃ તદઙ્ઘ્રિમૂલે તુ સાષ્ટાઙ્ગં પ્રણનામ હ ॥

૩૮. ઉત્થાપ્ય ચૈનં બાહુભ્યાં પરિમૃજ્ય દયાનિધિઃ ।
પ્રાહ ગમ્ભીરયા વાચા ભૂયો ભૂયઃ પ્રહર્ષયન્ ॥

૩૯. શ્રી સદાશિવઃ –
બ્રહ્મન્ ત્વયા પૂજિતોઽહં સંસ્તુતશ્ચ વિધાનતઃ ।
પ્રીતોઽસ્મિ નિતરાં ભક્ત્યા સુધયૈવ દિવૈકસઃ ॥

૪૦. તવ પ્રીતિમિહાપારાં કુર્વન્ નિર્વાણહેતુકીમ્ ।
વસામિ નિત્યમિચ્છન્ત્યા હૈમવત્યા સમન્વિતઃ ॥

૪૧. સર્વેષામેવ જન્તૂનાં દાસ્યે નિર્વાણસમ્પદમ્ ।
યે વાત્ર તીર્થે તામ્રાયાં ત્વદીયે વિધિપૂર્વકમ્ ॥

૪૨. માં પશ્યન્તિ સકૃદ્વાપિ સ્નાત્વા તેષાં ન બન્ધનમ્ ।
ત્વયા કૃતમિદં સ્તોત્રં સાયં પ્રાતર્મમાગ્રતઃ ॥

૪૩. યે પઠન્તિ લભન્તે તે પુરુષાર્થચતુષ્ટયમ્ ।
તથૈવાભિમતં બ્રહ્મન્ દાસ્યામ્યત્યાવિલમ્બિતઃ ॥

૪૪. ઇતો ભાવિનિ કલ્પે તુ બ્રહ્મન્ રાથન્તરે ભવાન્ ।
ભવિતા કપિલો નામ્ના મદંશપરિભાવિતઃ ॥

૪૫. તદા તાપાભિભૂતાનાં પ્રજાનાં શરણં જુષામ્ ।
તત્પાપહત્યૈ દયયા સાઙ્ખ્યયોગં પ્રદાય તુ ॥

૪૬. તતો માં કેવલં નિત્યં પ્રાપ્નુમર્હસ્યંશયમ્ ।
તત્રૈવ નિવસન્ નિત્યમવિમુક્તિં પ્રદર્શયન્ ॥

૪૭. મોક્ષશ્રિયં પ્રદાસ્યામિ સર્વેષામેવ દેહિનામ્ ।
અત્રાનીતા મયા કાશી મુક્તિમુદ્રાપ્યભઙ્ગુરા ॥

૪૮. ક્રોશપઞ્ચકવિસ્તારં દુર્જ્ઞેયો પાપચેતસામ્ ।
અદિત્યાસહિતોત્રૈવ સુખમાસ્સ્વ મહામતે ॥

૪૯. ઇત્યુક્ત્વા ભગવાન્ શમ્ભુઃ તસ્મિન્ લિઙ્ગે સુધાત્મિકે ।
પ્રાવિશત્ ગૌર્યયા સાર્ધં પશ્યતાં મહતામપિ ॥

૫૦. શઙ્ખઃ –
ઇત્થં તે કાશ્યપેશસ્ય મહિમા વર્ણિતો મયા ।

સ એષ સર્વે શમ્ભું પરાં મૂર્તિં લિઙ્ગમયીં પુનઃ ॥

૫૧. ભક્તસ્ય કસ્તચિત્ હેતોઃ ઉજ્જહાર વિલાસવત્ ।
તમસ્તુવન્ વ્યોમ્નિ સિદ્ધાઃ દાહકેશ્વરમિત્યુત ॥

૫૨. તત્ર દેવાશ્ચ સિદ્ધાશ્ચ ઋષયો નારદાદયઃ ।
સ્તુવન્તો વિકિરન્તશ્ચ પુષ્પાણ્યાજગ્મુરમ્બરાત્ ॥

૫૩. સમાગતેષ્વેવં શિવશર્મા મહેશ્વરઃ ।
આગત્ય કાશ્યપાત્ તસ્માત્ શ્રુત્વા માહાત્મ્યમીશિતુઃ ॥

૫૪. તમેવ ગુરુમાસાદ્ય સૌત્રામણિમકારયત્ ।
ઇતિ શ્રુત્વા મહીપાલો વિસ્મયાવિષ્ટમાનસઃ ॥

૫૫. પુનઃપ્રણમ્ય યોગીન્દ્રં વિન્યાત્ વાક્યમબ્રવીત્ ।
વીરસેનઃ –
કસ્ય ભગવાન્ શમ્ભુઃ ભક્તસ્ય પ્રીતિમાવહન્ ॥

૫૬. કથમાવિરભૂત્ ઈશો મહાલિઙ્ગસ્વરૂપધૃત્ ।
સ ભક્તઃ કિઞ્ચકારાસૌ કથં પ્રાપન્મનોરથમ્ ॥

૫૭. કાશ્યપાત્ અશ્રુણોતેનાં શિવશર્મા કથાં કથમ્ ।
એતત્ મે વિસ્તરાત્ બ્રહ્મન્ વક્તુમર્હસિ સામ્પ્રતમ્ ॥

૫૮. ઇત્થમભ્યર્થિતઃ શઙ્ખઃ સંપ્રશસ્ય મહીપતિમ્ ।
પુનઃ પ્રાહ કથાં પુણ્યાં કથામીશાન સઙ્ગિનીમ્ ॥

૫૯. શ્રી શઙ્ખયોગી –
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ કથાં શ્રેયસ્કરીમિમામ્ ।
પુરા કશ્ચિન્મુનેઃ પુત્રઃ સાક્ષ્તસ્ય દયાનિધેઃ ॥

૬૦. શિવશર્મેતિ વિખ્યાતો વેદવેદાઙ્ગપારગઃ ।
વિરક્તઃ સર્વ ભોગેભ્યઃ પરાં ગતિં યિયાસિષુઃ ॥

૬૧. તીર્થયાત્રાં સમુદ્દિશ્ય ચકાર પૃથિવીમિમામ્ ।
પરિક્રમ્ય બહૂં દેશાન્ સ્નાત્વા તીર્થોદકેષ્વપિ ॥

૬૨. આસસાદાદ્ભુતાકારાં મલયં ચન્દનાલયમ્ ।
તત્ર સ્નાત્વા મહાન્દ્યાં તર્પયિત્વા પિતૄન્ સુરાન્ ॥

૬૩. નાનામણિપ્રસૂં પુણ્યાં નલિનોત્પલગન્ધિનીમ્ ।

આશ્રમૈર્મુનિમુખ્યાનાં દેવાનામાલયૈરપિ ॥

૬૪. અગ્રહારૈરાપ્તકામૈઃ અધિષ્ઠિતતટદ્વયામ્ ।
ક્વચિત્ સામાનિ ગાયદ્ભિઃ અધીયાનૈઃ ઋચઃ ક્વચિત્ ॥

૬૫. અથર્વાણ્યુચ્ચરદ્ભિશ્ચ પ્રગિરદ્ભિર્યજૂંષિ ચ ।
પુરાણાનિ પ્રશંસદ્ભિઃ ચ તટતીરે સઙ્ઘશઃ ॥

૬૬. સમન્તાત્ નિબિડીભૂતતટારામોપશોભિતમ્ ।
હોમધૂમસમાક્રાન્તૈઃ ઘનાસક્તૈરિવદ્રુમૈઃ ॥

૬૭. સમૃદ્ધોદ્યાનસમ્પન્નાં હંસસારસલાલિતામ્ ।
ગાયદ્ભિરુચ્ચૈર્ગન્ધર્વૈઃ નૃત્યદ્ભિઃ ચાપ્સરોગણૈઃ ॥

૬૮. નાનોદ્યાનસભાગેહસમ્પન્નતટશાલિનીમ્ ।
નિત્યકલ્યાણનિલયાં નિરન્તરસુખપ્રદામ્ ॥

૬૯. નાનાધાન્યધનોપેતાં નાનાજનપદોજ્જ્વલામ્ ।
મહાનદીમભિષ્ટૂય શિવશર્મા મહામતિઃ ॥

૭૦. અગસ્ત્યમુનિમાનમ્ય લોપામુદ્રાં યશસ્વિનીમ્ ।
તત્પ્રસાદમનુપ્રાપ્ય તમાપૃચ્છ્યસહાનુગૈઃ ॥

૭૧. ઇન્દ્રકીલે મહાદેવં પાપાનાશેશ્વરં વિભુમ્ ।
પૂજયિત્વોષિતઃ તત્ર નિશામેકામસૌ વ્રતી ॥

૭૨. તતોષસ્યુપવૃત્તાયામુત્થિતઃ સ્નાતુમુદ્યતઃ ।
કિઞ્ચિત્ દૂરં પરિક્રમ્ય શુશ્રાવ શ્રૌતસૌભગમ્ ॥

૭૩. પુરસ્તાત્ જનસમ્મર્દસન્નાદં સાન્દ્રસૌભગમ્ ।
ભાસમાનો ભુવો વ્યોમસ્વભાસાનુસારથૈઃ ॥

૭૪. વિસ્મયાનઃ તદાશ્ચર્યં દ્રષ્ટુકામઃ ત્વરાન્વિતઃ ।
સ્નાત્વા સન્ધ્યામુપાસ્યૈવ સમુપસ્થાય ચ ભાસ્કરમ્ ॥

૭૫. સશિષ્યઃ સાગ્નિહોત્રઃ ચ પ્રાયાત્ પ્રાચીં દિશં મુનિઃ ।
અતીત્ય દૂરમધ્વાનં ખમારૂઢે દિવાકરે ॥

૭૬. આસસાદ વનં પુણ્યં નાનાદ્રુમલતાયુતમ્ ।
વિમુક્તમત્સરૈઃ શાન્તૈઃ મૃગપક્ષિગણૈર્વૃતમ્ ॥

૭૭. સિદ્ધૈર્મુનિગણૈઃ પુણ્યૈઃ સેવ્યમાનમિતસ્તતઃ ।
તદ્વનં પ્રવિશન્નગ્રે ચાદ્રાક્ષીત્ કાશ્યપાશ્રમમ્ ॥

૭૮. વિકીર્યમાણઃ ભૂભાગં મન્દારકુસુમોત્કરૈઃ ।
યૂથૈર્જનાનાં સઙ્ઘાતૈઃ મિથઃ કથયતાં કથાઃ ॥

૭૯. આનન્દનિર્ભરૈઃ સિદ્ધૈઃ મુનિશિષ્યૈઃ સમાવૃતામ્ ।
સંપ્રવિશ્યાશ્રમં શ્રીમત્ શિવશર્મા કૃતાઞ્જલિઃ ॥

૮૦. તમગ્નિહોત્રમાલિનં દૃષ્ટ્વાદિત્યા સમન્વિતમ્ ।
સ્વશર્મ પ્રબ્રુવન્ ઉચ્ચૈઃ શિવશર્માભ્યવાદયત્ ॥

૮૧. અર્હયિત્વા તમાસીનં બૃસ્યામેવ પ્રજાપતિઃ ।
કાશ્યપઃ –
સ્વાગતં તે સર્વધર્મજ્ઞ શિવશર્મન્ પ્રસન્નધીઃ ॥

૮૨. પ્રીતોઽસ્મ્યાગમનાદેવ સુહૃદઃ તવ સામ્પ્રતમ્ ।
વિજિત્ય ચારિષડ્વર્ગમિન્દ્રિયગ્રામમાત્મનઃ ॥

૮૩. અમુઞ્ચતઃ ચ કર્માણિ નિર્મુક્તફલબન્ધનઃ ।
લોકસઙ્ગ્રહમિચ્છન્તો વિશ્રાન્ત્યકુતો ભયાઃ ॥

૮૪. ત્વમતઃ પૂજનીયઃ શ્લાઘનીયશ્ચ કેવલમ્ ।
અત્રાતિથ્યં વિધાસ્યામિ સાનુગસ્ય વિશેષતઃ ॥

૮૫. પુણ્યે મલયનન્દિન્યાઃ તીર્થે પાટીરગન્ધિનિ ।
સ્નાત્વાવિલમ્બં સન્તર્પ્ય પિતૄન્ દેવાન્ ઋષીનપિ ॥

૮૬. અવગાહ્ય દીપતીર્થમાદિત્યં કુણ્ડમેવ ચ ।
પુરુષોત્તમં કાશ્યપેશં દાહકેશં પ્રણમ્ય ચ ॥

૮૭. શીઘ્રમાગચ્છ સુમતે દિવામધ્યઙ્ગતો રવિઃ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા કાશ્યપસ્ય પ્રજાપતેઃ ॥

૮૮. શિવશર્મા મહાતેજાઃ તં પ્રાઞ્જલિરભાષત ।
શિવશર્મા –
ભગવન્ કરુણામૂર્તે ભવત્પાદાબ્જસેવયા ॥

૮૯. સ્નાતાનિ સર્વતીર્થાનિ પૂજિતાશ્ચૈવ મે સુરાઃ ।
મન્યે ચ સફલં જન્મ સફલો મે પરિશ્રમઃ ॥

૯૦. તથાપિ તત્ તથા કર્તુમુત્સહે ગુરુશાસનાત્ ।
સ્નાત્વા સમાગમિષ્યામિ દેવં દૃષ્ટ્વા સદાશિવમ્ ॥

૯૧. ઇત્યુક્ત્વા પુનરાનમ્ય તીર્થસ્નાનાય નિર્યયૌ ।
સ્નાત્વા કાશ્યપતીર્થે ચ દીપતીર્થે ચ મન્ત્રવત્ ॥

૯૨. તથાપ્યાદિત્યકુણ્ડે ચ તીર્થશ્રાદ્ધસમન્વિતમ્ ।
દેવમારાધ્ય વિધિના પુનઃ કાશ્યપમાસદત્ ॥

૯૩. પ્રતિગૃહ્ય તથા તીર્થં સાનુગઃ તુષ્ટમાનસઃ ।
ભુક્તવન્તં ચ વિશ્રાન્તમુપગમ્ય મહામુનિમ્ ॥

૯૪. પ્રણમ્ય પરિપપ્રચ્છ શિવશર્માદિવિસ્મિતઃ ।
શિવશર્મા –
પ્રસીદ ભગવન્ મહ્યં પ્રસીદ કરુણાનિધે ॥

૯૫. ત્વદનુગ્રહતઃ શ્રોતું વાઞ્છામિ ચ મનોગતમ્ ।
ઇન્દ્રકીલાદહં પ્રાપ્તઃ પ્રાપ્તઃ સ્નાતુમુદ્યતઃ ॥

૯૬. તદા કૌતૂહલાકારાઃ સમદૃશ્યન્ત પૂર્વતઃ ।
જનાઃ ગન્ધર્વસઙ્કાશાઃ મહામાણિક્યપાટલાઃ ॥

૯૭. સ્રગ્વિણઃ ચારુવસનાઃ મણિકાઞ્ચનભૂષણાઃ ।
ગચ્છન્તશ્ચ વિમાનૈઃ સ્વૈઃ મેરુશૃઙ્ગસમપ્રભૈઃ ॥

૯૮. સ્ત્રિયો વિદ્યુલ્લતાકારાઃ ગાયન્ત્યો મધુરસ્વરમ્ ।
તેષાં તાસાં ચ સઙ્ગીતૈઃ દિશો મુખરિતાભવન્ ॥

૯૯. તથારુણભુવા તેન સન્ધુક્ષિતમિતસ્તત ।
જનયન્તો ભાનુશઙ્કાં જન્તૂનાં ભૂમિચારિણામ્ ॥

૧૦૦. અસ્માકમક્ષિપદવીં મણ્ડયન્તો યયુશ્શુભાઃ ।
તાનહં શ્રુતુમિચ્છામિ કે તે કુત્ર સમાગતાઃ ॥

૧૦૧. વ્યક્તં મે બ્રૂહિ ભગવન્ કથાં કૌતૂહલાત્મનઃ ।
શઙ્ખઃ –
ઇત્થં વચઃ સમાકર્ણ્ય પ્રાજ્ઞસ્ય
શિવશર્મણઃ । અભિનન્દ્ય મહાતેજાઃ કાશ્યપો વાક્યમબ્રવીત્ ॥

ઇતિ એકોનત્રિંશોઽધ્યાયઃ ।        Pro.Total = 2304 + 101 =2405.

# ત્રિંશોઽધ્યાયઃ

દીપિકેશ્વરોદ્ભવઃ ।

૧. શ્રુણુ બ્રહ્મન્ પ્રવક્ષ્યામિ તદેવ પરમાદ્ભુતમ્ ।
સર્વપાપક્ષયકરં શ{ૃ}ણ્વતાં હર્ષવર્ધનમ્ ॥

૨. અત્ર દેવો મહાદેવઃ કૃપયા કસ્યચિન્મૂલેઃ ।
પ્રસાદાય મહાલિઙ્ગરૂપી પ્રાદુરભૂત્ વિભુઃ ॥

૩. તદુત્સવદિદૃક્ષૂણાં મહતાં ત્રિદિવૈકસામ્ ।
સમાજસ્સર્વસિધ્ધાનાં ગન્દ્ર્વાપ્સરસામપિ ॥

૪. આગતાઃ પૂર્વદિવસે શિવાનુગ્રહકાઙ્ક્ષયા ।
એતે તે ભવતા દૃષ્ટાઃ સ્ત્રિયશ્ચ પુરુષા અપિ ॥

૫. ભવન્તં પુણ્યતીર્થેષુ સેવયા સમુપાગતમ્ ।
ઇતોઽવિદૂરે દ્રષ્ટવ્યં લિઙ્ગં શમ્ભોર્મણિપ્રભમ્ ॥

૬. મન્યે ભવન્તં પુણ્યાનાં ભાજનં પુણ્યયોગતઃ ।
ઇતિ બ્રુવતિ ધર્મજ્ઞે કાશ્યપે કલુષાપહે ॥

૭. સંપ્રહૃષ્ટમના રાજન્ પ્રત્યભાષત ભૂસુરઃ ।
શિવસર્મા –
કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મ્યહં ધ્રુવમ્ ॥

૮. પુરા કૃતાનાં પુણ્યાનાં પરિપાકાત્ ઇહાગતઃ ।
કો વા દ્વિજો મહાભાગઃ શિવાનુગ્રહભાગભુક્ ॥

૯. લિઙ્ગાકારઃ કથં ભૂમેઃ ઉત્થિતઃ પરમેશ્વરઃ ।
કથમાવિરભૂત્ સઙ્ઘો દેવાનાં વ્યોમવર્ત્મનામ્ ॥

૧૦. કથાં યથાવત્ વિસ્તૃત્ય વક્તુમર્હસિ મે ગુરો ।
કાશ્યપઃ –
શ્રુણુ બ્રહ્મન્ કથાં પુણ્યાં માહાત્મ્યં ત્રિપુરદ્વિષઃ ॥

૧૧. અતૃપ્તિજનની ચેયં શ{ૃ}ણ્વતાં પરમાં ગતામ્ ।
વિષયે પાણ્ડ્યભૂપાનામુત્તરેણ મહામતે ॥

૧૨. વેણુવત્યાઃ તટે રમ્યે નાનાદ્રુમલતાચિતે ।
અગ્રહારો મહાનાસીત્ કલમ્બ ઇતિ વિશ્રુતઃ ॥

૧૩. ધનિનઃ તત્ર ભૂયિષ્ઠાઃ બ્રાહ્મણા વેદપારગાઃ ।
યજ્વાનો ભક્તિમન્તશ્ચ મહાદેવે વિશેષતઃ ॥

૧૪. તેષાં મધ્યે તુ મેધાવી પ્રોક્તસ્ય તનયાન્વયઃ ।
પ્રમોદો નામ ધર્માત્મા વેદવેદાઙ્ગપારગઃ ॥

૧૫. દાતાગ્નિહોત્રી ધર્મિષ્ઠઃ કુટુમ્બી પુત્રપૌત્રવન્ ।
ગાર્હસ્થ્યં વર્તયામાસ કર્મકાલવિભાગવિત્ ॥

૧૬. પિતર્યુપરતે ભ્રાત્રા કલહીકૃત્ય હેતુતઃ ।
દાયં વિભજ્ય તસ્મૈ તુ સ્વયમન્યત્ર સંસ્થિતઃ ॥

૧૭. એવં વર્તયતઃ તસ્ય કાલેનાલ્પીયસા સુતઃ ।
મમાર ભાર્યા પૌત્રાઃ ચ પુત્રી ચ પૌત્રી ચ પાલિકા ॥

૧૮. એવં માસાન્તરે પ્રાપ્ય દ્વિજો દુઃખં સુદુસ્સહમ્ ।
ચિન્તયાનઃ કર્મફલં અન્તસ્તાપાકુલોઽભવત્ ॥

૧૯. અચિન્તિતં કિમેતન્મે પ્રાપ્તં પરિભવં મહત્ ।
અનુકૂલાં ધર્મપત્નીં વિહાય ગૃહમેધિનઃ ॥

૨૦. કથં ભવતિ ગાર્હસ્થ્યં વિકર્ણસ્યેવ કુણ્ડલમ્ ।
કથં જીવામ્યહં હિત્વા પુત્રં વિનયોજ્જ્વલમ્ ॥

૨૧. આગતોઽસ્મિ ગતઃ પુત્રગતોઽસિસ્નેહમુત્સૃજન્ ।
કિં કરિષ્યામ્યહં કેન જીવામિ વિધુરો જડઃ ॥

૨૨. વૃદ્ધસ્ય બન્ધુહીનસ્ય કા ગતિઃ કથ્યતાં પ્રિયે ।
અધર્માચરતાન્નિત્યં ધનલાભેન મૂઢવત્ ॥

૨૩. વઞ્ચિતઃ સહજો ભ્રાત્રા પુત્રાદપિ હિતપ્રદઃ ।
તદ્દોષાત્ પ્રાપ્તમધુના વ્યસનં દુસ્સહં મયા ॥

૨૪. ઇતઃ પરં ધનં દત્વા ભ્રાત્રે પિત્રાનુસઞ્ચિતમ્ ।
તીર્થયાત્રાં કરિષ્યામિ નાન્યથા ગતિરસ્તિ મે ॥

૨૫. ઇતિ પ્રમોદો નિશ્ચિત્ય બ્રાહ્મણો દુઃખકર્શિતઃ ।
ઘટપૂર્ણં ધનં તસ્મૈ સાન્ત્વયિત્વા દદૌ પુનઃ ॥

૨૬. વેણુદણ્ડં સમાપૂર્ય રત્નાદ્યૈર્વસુભિર્દૃઢમ્ ।
વિધાય તન્મુખં લોહૈઃ તદાદાય સ્વપાણિના ॥

૨૭. નિવાર્યમાણો બહુધા ભ્રાત્રા બહુભિરપ્યસૌ ।
વૃદ્ધોઽપિ નિર્વિઘ્નતયા નિર્જગામ ગૃહાત્ વ્રતી ॥

૨૮. ઉત્તરાભિમુખો ગત્વા ક્રોશમાત્રં શ્રમાતુરઃ ।
યષ્ટિમાત્રસહાયસ્તુ તરુષણ્ડ ઉપાવિશત્ ॥

૨૯. તત્ર કશ્ચિત્ યતિઃ દૃષ્ટ્વા વૃદ્ધં સાહસિકપ્રિયમ્ ।
ઉપગમ્યાન્તિકં તસ્ય વિસ્મિતો વાક્યમબ્રવીત્ ॥

૩૦. યતિઃ –
કિન્તે વ્યવસિતં વૃદ્ધ કથ્યતાં યદિ મન્યસે ।
ઇયાનેદ્ય પરિશ્રાન્તઃ કિયત્ ગન્તાસ્યતઃ પરમ્ ॥

૩૧. ઇતિ પૃષ્ટવતઃ તસ્ય બહુમાન્ય વચો યતેઃ ।
યથાવત્ કથયામાસ પ્રમોદો વૈ સ્વમીહિતમ્ ॥

૩૨. ઇત્થં વદન્તં સમૃધ્ય પુનરાહ યતીશ્વરઃ ।
અકાર્યમિદં પ્રાપ્યં સ્થવિરેણ ત્વયા દ્વિજ ॥

૩૩. એતત્ બાલવતાં સાધ્યં ચિન્તિતં ભવતાધુના ।
વિહાયેમાં મતિં સાધો ગન્તાસિ સ્વગૃહં પ્રતિ ॥

૩૪. યદિ તે સુદૃઢા બુદ્ધિઃ અવિમુક્તદિદૃક્ષયા ।
તત્રોપાયં પ્રવક્ષ્યામિ ઋજુમાર્ગેણ સાધિતુમ્ ।
સ્નાતા મુનિના યેન વિધિના દક્ષિણા હરિત્ ॥

૩૫. યદઙ્ઘ્રિપઙ્ગજાસક્તસૌભાગ્યસુદૃઢામહી ।
દુર્વારદર્પો વિન્ધ્યોઽપિ યેન બદ્ધ(વન્ધ્ય)મનોરથઃ ॥

૩૬. નિઃશેષાબ્ધિજલં યેન પાણૌ ચુલુકિતં પુરા ।
નિરામયમિદં યેન કૃતં વાતાપિવરિણા ॥

૩૭. ગાવો વિપ્રાશ્ચ મન્ત્રાશ્ચ ક્રતુઃ ધર્મશ્ચ પાલિતાઃ ।
તં યાહિ શરણં શીઘ્રં સ તે શ્રેયો વિધાસ્યતિ ॥

૩૮. ઇત્યુક્ત્વા મન્ત્રરાજં તુ તસ્મૈ સન્દિશ્ય મસ્કરી ।

તં દ્વિજં પ્રેષયામાસ તામ્રાયાઃ કિલ રોદસિ ॥

૩૯. સોઽપિ પ્રમોદઃ સુપ્રીતઃ પ્રાપ્ય મન્ત્રં યતિવરાત્ ।
તમામન્ત્ર્ય ગુરૂન્ નત્વા સંપ્રાપ મલયાત્મજામ્ ॥

૪૦. તત્ર કાશ્યપતીર્થે તુ સ્નાત્વા જપ્ત્વા મહામનુમ્ ।
મહાદેવં દદર્શાગ્રે લિઙ્ગરૂપિણમાત્મવાન્ ॥

૪૧. તત્ર ભક્તં સમાહૂય દ્વિજં કઞ્ચન સંસ્થિતમ્ ।
સખીકૃત્ય વચઃ પ્રાહ પ્રમોદઃ શિવસન્નિધૌ ॥

૪૨. પ્રમોદઃ –
સખે ત્વાં વરયામ્યદ્ય સુહૃત્વે ધર્મચારિણમ્ ।
યાવત્ કુમ્ભભવં દૃષ્ટ્વા પુનરેષ્યામ્યહં ધ્રુવમ્ ॥

૪૩. તાવત્ યષ્ટિમિમાં બ્રહ્મન્ મત્પ્રાણસદૃશીમિહ ।
પાલયિત્વા યથાયુક્તં પુનર્મે દાતુમર્હસિ ॥

૪૪. એવમાકર્ણ્ય તત્ વાક્યં સ વિપ્રઃ પ્રીતિપૂર્વકમ્ ।
તસ્માત્ આદાય તાં યષ્ટિં સ્વવેશ્મન્યભ્યપાલયત્ ॥

૪૫. સોઽપિ વિન્યાસ્ય વિશ્વસ્તે બ્રાહ્મણે યષ્ટિમાત્મનઃ ।
પ્રાયાન્મહીધરશ્રેષ્ઠમગસ્ત્ય યત્ર વર્તતે ॥

૪૬. પિનાકસરસઃ તીરે સ્થિત્વા નિયતમાનસઃ ।
જજાપ મન્ત્રરાજાનં ધ્યાયન્ મુનિમતન્દ્રિતઃ ॥

૪૭. નિરાહારત્રિરાત્રં તુ વિનિદ્રોઽનન્યમાનસઃ ।
નિશ્ચલોભૂત્ વ્રતી તત્ર પરં નિર્વાતદીપવત્ ॥

૪૮. એવં નિવસતઃ તસ્ય પુરતઃ કુમ્ભસમ્ભવઃ ।
પ્રાદુર્બભૂવ ભૂયિષ્ઠં ધર્મનિષ્ઠસ્ય સાદરમ્ ॥

૪૯. અગસ્ત્યઃ –
ત્વયાહં તોષિતો બ્રહ્મન્ સ્તોત્રેણાનેન સામ્પ્રતમ્ ।
સર્વાન્ કામાન્ પ્રદાસ્યામિ સાક્ષાદિવ વસુદ્રુમઃ ॥

૫૦. એતત્ રહસ્ય સ્તોત્રં મે ગોપનીયમિદં ત્વયા ।
પાપિષ્ઠાનાં ન દાતવ્યં દૂષકાનાં વિશેષતઃ ॥

૫૧. બ્રાહ્મણેષુ ચ ભક્તેષુ ધર્મનિષ્ઠેષુ સાધુષુ ।

દીનેષુ દેયમેતત્ તુ સ્તોત્રં નાન્યત્ર સત્તમ ॥

૫૨. યે પઠન્તિ સ્તુતિમિમાં મદ્ભક્તાઃ ચ દિને દિને ।
તેષામિષ્ટાન્ પ્રદાસ્યામિ નાત્ર કાર્યા વિચારણા ॥

૫૩. તે ભવન્ત્યવિઘાતેન ચિન્તિતાસ્તુ મનોરથાઃ ।
ઇતિ બ્રુવાણં તં દૃષ્ટ્વા પ્રમોદઃ કુમ્ભસમ્ભવમ્ ॥

૫૪. પ્રણિપત્ય પદામ્ભોજાં સંસ્પૃશન્ સ્વમૌલિના ।
હર્ષગદ્ગદયા વાચા વ્યાજહાર મુનીશ્વરમ્ ॥

૫૫. ભગવન્ કરુણામૂર્તે પ્રસીદ મમ સન્તતમ્ ।
ત્વત્પાદદર્શનાત્ અદ્ય પૂર્ણકામોઽસ્મ્યહં મુને ॥

૫૬. ત્વયિ ભક્તિરવિચ્છિન્ના ભૂયાન્મે પુષ્કલોદયા ।
કૂલે મલયનન્દિન્યાઃ વાસોસ્તુ સતતં પુનઃ ॥

૫૭. વિશેષેણ મનીષા મે કાશિદર્શનલાલસા ।
બન્ધુહીનસ્ય વૃદ્ધસ્ય મમત્વં પરમાગતમ્ ॥

૫૮. ઇતિ શ્રુત્વા વચસ્તસ્ય ભગવાન્ કુમ્ભસમ્ભવઃ ।
અસ્તિ કાઙ્ક્ષિતમિત્યુક્ત્વા કરે દત્વા ચ દીપિકામ્ ॥

૫૯. પૈનાકે મજ્જયામાસ તં વિપ્રં સરસિ સ્મયન્ ।
ઉન્મમજ્જ ક્ષણાત્ એવ કુમ્ભયોનેરનુગ્રહાત્ ॥

૬૦. ગઙ્ગાનદીમયાત્ કાશિપુર્યાં સહ દીપિકયા દ્વિજઃ ।
સ્નાત્વા દ્વિજોઽસૌ મણિકર્ણિકાયાં ડુણ્ડીશ્વરં દણ્ડધરં ચ નત્વા ॥

૬૧. વિશ્વેશમભ્યર્ચ્ય તથાન્નપૂર્ણાં શ્રીભૈરવં ચ પ્રણનામ મૂર્ધ્ના ।
સ નિત્યયાત્રાં વિધિવત્વિધાય ભૂયઃ પ્રયાણાભિમુખઃ પ્રમોદઃ ॥

૬૨. સંપ્રાપ્ય તીરં મણિકર્ણિકાયાં દદર્શ તન્વીસહિતં યુવાનમ્ ।
સ યુવા તં દૃષ્ટ્વા ભ્રમમાણમિતસ્તતઃ ॥

૬૩. વ્યાજહાર સમાહૂય મેઘગમ્ભીરયા ગિરા ।
કિં તે વ્યવસિતં બ્રહ્મન્ કા તે ચિન્તા સુદુસ્સહા ॥

૬૪. વક્તવ્યં યદિ મે વ્યક્તં સાધયામ્યહં ધ્રુવમ્ ।
પ્રમોદઃ –
સખે બન્ધુવિહીનસ્ય સ્થવિરસ્ય વિશેષતઃ ॥

૬૫. મુનેરનુગ્રહાલ્લબ્ધં અગસ્ત્યસ્ય મહાત્મનઃ ।
મનીષિતં મહાભાગ્યં નાનારૂપમહોદયમ્ ॥

૬૬. ઇતઃ પરં મે ગન્તવ્યં માલેય્યાકૂલમદ્ભુતમ્ ।
ઇતિ બ્રુવાણં તં વિપ્રં હૃષ્ટવન્તૌ હિ દમ્પતી ॥

૬૭. સદીપિકાકરં ભૂયો મજ્જયામાસ તજ્જલે ।
ઉન્મમજ્જ ક્ષણાદેવ સહ દીપિકયા તદા ॥

૬૮. ષોડશાબ્દવયાઃ બ્રહ્મન્ કામરાજસમદ્યુતિઃ ।
પશ્યતાં સર્વજન્તૂનાં તામ્રપર્ણ્યા પ્રવાહતઃ ॥

૬૯. સમાસસાદ તત્ તીરં સ્વભાસા ભાસયન્ ઇવ ।
તં દૃષ્ટ્વા વિસ્મયં જગ્મુઃ સર્વે તીરનિવાસિનઃ ॥

૭૦. સમ્પૃછ્યમાનો બહુધા બભાષે શામ્ભવીં કથામ્ ।
સ્નાત્વા કૃત્વાહ્નિકાં કર્મ દૃષ્ટ્વાભ્યર્ચ્ય સદાશિવમ્ ॥

૭૧. સ્વમિત્રં સમુત્થાપયામાસૌ યષ્ટિં સ્વામભ્યયાચત ।
સસાન્ત્વં યાચમાનોઽપિ સાભિજ્ઞાતં યથોચિતમ્ ॥

૭૨. તિરસ્કૃત્ય વચસ્સદ્યઃ કુપિતઃ પ્રાહ વઞ્ચકી ।
કસ્ત્વં કુતસ્સમાયાતઃ કિં માં પૃચ્છસિ બન્ધુવત્ ॥

૭૩. કસ્ય વા ત્વં પ્રિયો બન્ધુઃ કા તે યષ્ટિઃ ચ કીદૃશી ।
વિશ્વબઞ્ચકિનં મન્યે ત્વામહં સાહસપ્રિયમ્ ॥

૭૪. દિવાપિ તિમિરં કર્તું શક્યતે માયવિદ્યયા ।
અખણ્ડપ્રલયં કર્તુમિન્દ્રજાલપરિશ્રમી ॥

૭૫. ત્વયા સખ્યં ન પશ્યામિ તમસ્તોમાતપોમમ્ ।
એવં બ્રુવાણં ભૂયોઽપિ પ્રમોદઃ પ્રત્યભાષત ॥

૭૬. સખે મમ વચસ્સત્યં શ્રુણુ કારુણ્યપૂર્વકમ્ ।
અનુગ્રહાત્ મહેશસ્ય વૃદ્ધોઽપિ તરુણોઽભવમ્ ॥

૭૭. રત્નકાઞ્ચનસમ્પૂર્ણં વેણુદણ્ડં મયાર્પિતમ્ ।
ભૂયઃ પ્રદેહિ મિત્ર ત્વં તેન શ્રેયો ભવિષ્યતિ ॥

૭૮. નાહં મુઞ્ચામિ ચાટૂક્ત્યા ત્વામહં કૈતવાત્મકમ્ ।

પ્રાયશ્ચિત્તાનિ પાપાનામશેષાણાં મહાત્મના ॥

૭૯. શ્રુતિસ્મૃતિપ્રસિદ્ધાનિ ન મિત્રદ્રોહિણં ક્વચિત્ ।
વઞ્ચકસ્યાપિ લુબ્ધસ્ય મહાપાપસ્ય ઘાતિનઃ ॥

૮૦. મિત્રદ્રોહસ્ય લોકેઽસ્મિન્ નૈવ ગન્તાસિ પાત્રતામ્ ।
ન શક્યં શુદ્ધાનાં સાધો નષ્ટાયુનાપિ ભૂમિપૈઃ ॥

૮૧. હાલાહલાત્ અસિ મુખાત્ ન બિભ્યતિ ન બાડવાત્ ।
તેષામપિ મહાઘોરાત્ દુસ્સહં મદ્ધનં ધ્રુવમ્ ॥

૮૨. ઇત્થં બ્રુવતિ વૈ તસ્મિન્ સ ખલઃ કઠિનાશયઃ ।
શ્રુણ્વતામેવ સર્વેષાં ભૂયો વચનમબ્રવીત્ ॥

૮૩. મયા ન દૃષ્ટપૂર્વોઽયં કુતસ્સમ્ભાષણં મિથઃ ।
શિવ એવ પરસ્સાક્ષી સર્વગઃ સર્વદર્શનઃ ॥

૮૪. શ્વઃ પ્રમાણં કરિષ્યામિ તં વિધાયાત્ર સાક્ષિણમ્ ।
સ એવ વક્તા સર્વસ્ય પ્રમાણં તત્ત્વનિર્ણયે ॥

૮૫. ઇતિ સર્વે સમાકર્ણ્ય સાધુ સાધ્વિતિ સંસ્થિતાઃ ।
અવોચત્ અભિનન્દ્યૈતત્ શ્રુણ્વન્તોઽભિસભાસદઃ ॥

૮૬. ન શક્તા નિશ્ચિતું તત્ત્વં ધર્મસ્યાદિ તનીયસઃ ।
પ્રમોદોઽપિ પરં ખિન્નઃ કસ્યચિત્ વેશ્મનિ ક્ષપામ્ ॥

૮૭. નિનાય ચ શનૈઃચિન્તામન્દીભૂતસ્વનિદ્રયા ।
વઞ્ચકોઽપિ ચ તં પ્રાપ્ય કાશ્યપેશં નિશામુખે ॥

૮૮. પૂજયામાસ મન્ત્રેણ તત્તોષણવિધાનવિત્ ।
સન્તુષ્ટઃ તં તત્તદા શમ્ભુઃ પ્રાદુર્ભૂતોભ્યભાષત ॥

૮૯. શિવઃ –
કિં તે પ્રિયં મયા કાર્યં ઉચ્યતાં સાધયામ્યહમ્ ।
ઇતિ દેવેરિતઃ ક્ષુદ્રઃ પુનઃ પ્રાહ સદાશિવમ્ ॥

૯૦. યાવત્ પ્રમાણં ક્રિયતે મયા તાવત્ દયાનિધે ।
એતસ્મિન્ અમ્બુસમ્પૂર્ણે ઘટે સાન્નિધ્યકૃત્ ભવ ॥

૯૧. એવં સંપ્રાર્થિતઃ તેન તથેત્યુક્ત્વા તથાહૃતે ।
ઘટે સમાવિશત્ તસ્ય પ્રીતિં કુર્વન્ સદાશિવઃ ॥

૯૨. તસ્માત્ સમીપે સહસા નીત્વા ચિઞ્ચાતરોરધઃ ।
સ દયાલુરસૌ શમ્ભુઃ સ્વપ્ને સંપ્રાપ્ય વિસ્મિતમ્ ॥

૯૩. પ્રમોદં પ્રાહ ભગવન્ દર્શયન્ ભક્તવશ્યતામ્ ।
સ્થાપયામાસ કાપટ્યં કુર્વાણઃ તં દ્વિજં પ્રતિ ॥

૯૪. તતઃ સ્વભવનં પ્રાપ્ય સુખં સુષ્વાપ વઞ્ચકિઃ ।
પશ્યન્ એવ સમં વિશ્વં યઃ પાતિ દુરિતાર્ણવાત્ ॥

૯૫. શિવઃ –
ઉત્તિષ્ઠ સાધો મા ખેદૈઃ ત્વદર્થં ત્વામુપૈષ્યતિ ।
પ્રત્યયં નૈવ કર્તવ્યં ત્વયા ચ શિવસન્નિધૌ ॥

૯૬. ચિઞ્ચામૂલે તુ કર્તવ્યં દ્રષ્ટવ્યં મહામતે ।
તત્રૈવ વસામ્યદ્ધા તવ સાધયિતું ધનમ્ ॥

૯૭. ઇત્યુક્ત્વાન્તર્દધે શમ્ભુઃ પ્રબુદ્ધઃ સોઽપિ સમ્ભ્રમાત્ ।
શિવો મે રક્ષિતા ભૂયાત્ ઇતિ સંપ્રાર્થયન્ મુદા ॥

૯૮. પ્રાતઃ સ્નાત્વા દીપતીર્થે કાલ્યં કર્મ સમાપ્ય ચ ।
દેવાગારસ્ય સંપ્રાપ્તઃ દ્વારં સર્વજનાવૃતમ્ ॥

૯૯. સ વઞ્ચકી સમાગત્ય પશ્યતાં ઇત્યુવાચ તમ્ ।
સ ગત્વા દેવદેવસ્ય પુરઃ પ્રત્યયકૃત્ દ્વિજઃ ॥

૧૦૦. મૃષા તદનુમન્તા ચ સર્વે રૌરવયાયિનઃ ।
અતસ્ત્વયા ચ કર્તવ્યં મયા વા પાપભીરુણા ॥

૧૦૧. દ્રષ્ટવ્યં નિકટે ચ શમ્ભોઃ મૂલે ચિઞ્ચામહીરુહમ્ ।
સર્વતઃ પરિપૂર્ણસ્ય દેવેશસ્ય દયાનિધેઃ ॥

૧૦૨. નાસ્તિ કિં મહસ્તત્ર ભક્તરક્ષણક્ષમ ; ।
ઇત્યુક્તવતિ વૈ તસ્મિન્ સર્વે સન્તઃ સમાહિતાઃ ॥

૧૦૩. સાધુ સાધ્વિતિ તં વાક્યં પ્રશંસુઃ સમન્તતઃ ।
સ સર્વજનસમ્ભાવ્યમન્યથા કર્તુમક્ષમઃ ॥

૧૦૪. તથા સ તરુમૂલેઽસ્મિન્ પ્રત્યયં દુર્મના ઇવ ।
યથા મયાસ્ય નાદત્તા યષ્ટિઃ કાઞ્ચનગર્ભિણી ॥

૧૦૫. ન વિન્યસ્તા મય્યનેન સાક્ષી દેવઃ સદાશિવઃ ।
ઇત્થં જલ્પતિ ચ વ્યાજાત્ અનારબ્ધે દ્વિજાધમે ॥

૧૦૬. તત્તરોઃ કોટરાત્ અગ્રે જ્વાલામાલાસમન્વિતઃ ।
પ્રાજજૃમ્ભે મહાક્ષિઃ બડવાનલસન્નિભઃ ॥

૧૦૭. તેન દગ્ધમભૂત્ વૃક્ષં નાનાસ્કન્ધપ્રકાશકમ્ ।
સોઽપિ ભસ્મીકૃતઃ પાપી સર્વેષાં પશ્યતાં તદા ॥

૧૦૮. તદગ્નિમધ્યે નિર્ભિદ્ય મહામાણિક્યસન્નિભઃ ।
તાવત્ કલાકલારાવહાહાકારાનનાદિભિઃ ॥

૧૦૯. લિઙ્ગરૂપી મહાદેવો દદૃશે લોકવિસ્મિતઃ ।
પપાત પુષ્પવૃષ્ટિઃ ચ ભદ્રશ્રીગન્ધબન્ધુરા ॥

૧૧૦. દ્યાવા પૃથિવ્યોરુદરં પૂર્યમાણમભૂત્ દ્વિજ ।
તાવત્ દુન્દુભયો નેદુઃ અમ્બરાત્ અમરાહતાઃ ॥

૧૧૧. વિમાનૈર્નિબિડં વ્યોમ દેવાનામિવ ભાસ્વરૈઃ ।
તુષ્ટુવુર્મુનયસ્સિદ્ધાઃ દેવાશ્ચ સહચારણાઃ ॥

૧૧૨. સોઽપિ બદ્ધાઞ્જલિર્મૂર્ધ્ના પ્રમોદો હર્ષપૂરિતઃ ।
તં દૃષ્ટ્વા દેવદેવસ્ય પ્રસાદં લિઙ્ગરૂપિણઃ ॥

૧૧૩. વેપમાનઃ ઇવાસાદ્ય વિસ્મિતેનાન્તરાત્મના ।
તુષ્ટાવ જગદીશાનં વાગ્ભિરગ્ર્યાભિરગ્રતઃ ॥

૧૧૪. પ્રમોદઃ –
પ્રાયઃ પ્રપન્નાર્તિહરોઽસિ નાથ પ્રપન્નસર્વેન્દ્રિયવૃત્તિભાજામ્ ।
અમુક્તસાન્નિધ્યકરો બુધાનાં અતઃ ત્વમન્યં શરણં ન પશ્યે ॥

૧૧૫. પ્રવાતશીલઃ પ્રહતેષુ નિત્યં પ્રસિદ્ધમેતત્ વચનં ત્રયીષુ ।
અનર્ચતો મે કૃપણસ્ય શમ્ભો કૃપાકરોઽયં તદહો વિચિત્રમ્ ॥

૧૧૬. ઉપેયુષામેવ તનોતિ કામં સુરદ્રુમશ્ચોત્ર કથં ન દૃષ્ટમ્ ।
પાદારવિન્દોઽનુસ્મરણોનુતાપી દૂરે મમાનુગ્રહકૃત્ વિચિત્રમ્ ॥

૧૧૭. પવિત્રિતં જન્મજગત્ત્રયો યત્ ત્વયા કૃપાલોચનપાતિતસ્ય ।
મમાધુના મઙ્ગલપુણ્યપૂર્ણા સ્વયં સમાનન્દસુસમ્પદો યત્ ॥

૧૧૮. નમઃશિવાય ચ શુભહેતુહેતવે સુધાંશુચૂડામણયે નમો નમઃ ।

નગાત્મજાલિઙ્ગિતચારુમૂર્તયે સહસ્રકૃત્વઃ પ્રણતોઽસ્મિ નિત્યમ્ ॥

૧૧૯. ગિરીશ વિશ્વેશાધુના પુનીહિ પુણ્યેન કૃપાક્ષિવર્ચસા ।
પુરત્રયધ્વંસનપુઞ્જિતશ્રીઃ કિમદ્ભુતં ભૂરુહમાત્રતક્ષણમ્ ॥

૧૨૦. વૃષાઙ્ક વિશ્વાધિક ભર્ગ તે પાદામ્બુજારાધાનભાગ્યદાયિના ।
વિલોકનેનાશુ વિલોકયાધુના પ્રપન્નમેનં જનમાર્તિભઞ્જન ॥

૧૨૧. શમ્ભો તવાલં જનિતાનિલભાગધેયમન્તે
વિચિન્તયતિ વિશ્વમિદં સમસ્તમ્ ।
ત્વય્યદ્ભુતામધુના તરુમાત્રદાહલીલા કોપભરાત્ દયાલો ॥

૧૨૨. પ્રસીદ મયિ સન્તતં પ્રમથનાથગાથેતર
પ્રવાહ કરુણામ્બુધે પ્રણતિભાતિ પાપાહન્ ।
અકાલવિલયાગમવ્યસનશઙ્કુશઙ્કાવતામપાકુરુ
ભયામયં સ્વપદસેવિનાં મા ચિરમ્ ॥

૧૨૩. કાશ્યપઃ –
ઇત્થં સ્તુતસ્તથા તેન પ્રમોદેન મહાત્મના ।
મહાલિઙ્ગાત્ સમુત્તસ્થૌ વામાર્ધવનિતાકૃતિઃ ॥

૧૨૪. પ્રભામણ્ડલમધ્યસ્થોભવન્નિવ નભસ્થલાત્ ।
પ્રણતં પ્રીણયન્ વાચા મેઘનાદગમ્ભીરયા ॥

૧૨૫. સદાશિવઃ –
બ્રહ્મન્ પ્રીતોઽસ્મ્યહં સ્તુત્યા ભક્ત્યા ચાનન્યપૂર્વયા ।
દાસ્યામિ તે વરાન્ સર્વાન્ લોકદ્વયસમેધિતાન્ ॥

૧૨૬. આયુરારોગ્યમૈશ્વર્યં રૂપયૌવનસમ્પદામ્ ।
ભવન્તુ મત્પ્રસાદેન મયિ ભક્તિશ્ચ શાશ્વતી ॥

૧૨૭. પુત્રમિત્રકલત્રાદ્યૈઃ અનુકૂલૈઃ સમન્વિતઃ ।
અત્ર સ્થિત્વા ચિરં ભુક્ત્વા મામુપૈષ્યસિ કેવલમ્ ॥

૧૨૮. ત્વત્કીર્તિલક્ષ્મીરવ્યગ્રા દીપિકાતીર્થલક્ષણા ।
અત્ર સ્નાતા નરાસ્સર્વે મત્કૃપાપાત્રતાં ગતાઃ ॥

૧૨૯. પ્રીત્યર્થં તવ વિપ્રેન્દ્ર નિત્યમત્ર વસામ્યહમ્ ।
કિમન્યત્ કાઙ્ક્ષિતં મત્તો વૃણીષ્વાવ્યગ્રયા ગિરા ॥

૧૩૦. દાસ્યામ્યસંશયં લોકે ન દેયં કિઞ્ચિદસ્તિ મે ।
ઇત્થં વિજ્ઞાય દેવસ્ય પ્રમોદો ભક્તવશ્યતામ્ ॥

૧૩૧. પુનર્વિજ્ઞાપયામાસ પ્રાઞ્જલિઃ સ્વમનોરથમ્ ।
પ્રમોદઃ –
દેવદેવદયાસિન્ધો યદિ દેયો વરો મમ ॥

૧૩૨. નિર્દગ્ધોઽયં સ્વપાપેન બ્રાહ્મણો દુર્મનસ્તથા ।
પુનર્જીવતુ દેવેશ મત્પ્રિયાર્થમનુગ્રહાત્ ॥

૧૩૩. એવમભ્યર્થિતસ્તેન ભગવાન્ પરમેશ્વરઃ ।
સ વિપ્રઃ પ્રાપ્ત સૌભાગ્યઃ સમુદ્વાહ્ય પુનર્વધૂમ્ ॥

૧૩૪. અત્રૈવ વાસં વિદધે પ્રાપ્તયષ્ટિધનાદિકઃ ।
એતત્ દૃષ્ટ્વા મહેશસ્ય લીલાકર્મ સુરાસુરાઃ
૧૩૫. પ્રસાદ્ય દેવદેવેશં સર્વે જગ્મુર્યથાગતમ્ ।
એતત્ વિચિત્રં કલશોદ્ભવસ્ય મહાનુભૂતેઃ ચરિતં હિ દૃષ્ટમ્ ।
યન્મન્ત્રજાપી પરમેશ્વરસ્ય કૃપૈકપાત્રત્વમગાત્ પ્રમોદઃ ॥

ઇતિ ત્રિંશોધ્યાયઃ ।  Pro.Total = 2405 + 135 =2540.

## એકત્રિંશોઽધ્યાયઃ

કાશ્યપસ્ય નારદેન સહ બ્રહ્મલોકગમનમ્ । ગજેન્દ્રમોક્ષણ કથાપ્રશ્નઃ ।

૧. શિવશર્મા –
અહો વિસ્તારિતા બ્રહ્મન્ કથેયં ભવતાધુના ।
ચન્દ્રમણ્ડલનિષ્ક્રાન્તા મયૂખાભિરિવ ધ્રુવમ્ ॥

૨. અત્રાહં શ્રોતુમિચ્છામિ રહસ્યં ત્વદનુગ્રહાત્ ।
કોઽસૌમન્ત્રવરો લબ્ધઃ પ્રમોદેન યતીવરાત્ ॥

૩. તમિદાનીં ગુરુમુખાત્ પ્રાપ્સ્યામિ ભવતઃ પ્રિયમ્ ।
ઇતિ સંપ્રાર્થિતસ્તેન કાશ્યપઃ પ્રાહ તં પુનઃ ॥

૪. કાશ્યપઃ –
શિવશર્મન્ મહાભાગ શ્રુણુ તે કથયામ્યહમ્ ।
યસ્ય વિજ્ઞાનમાત્રેણ સ્વયમાયાન્તિ સમ્પદઃ ॥

૫. અશ્રોત્રિયેષુ પાપેષુ વેદમાર્ગવિરોધિષુ ।
ન દાતવ્યમિદં સ્તોત્રં મન્ત્રરાજં મહામતે ॥

૬. ઋષિરિન્દ્રઃ તથાનુષ્ટુભ્ છન્દો દેવો ઘટોદ્ભવઃ ।
સર્વાભીષ્ટસ્ય સિધ્યર્થે જપોઽયં વિનિયોજિતઃ ॥

૭. પાટીરશૈલકોટીરમણિપીઠાય વેધસે ।
મુનયે કુમ્ભજાયોદ્યદનુકમ્પાબ્ધયે નમઃ ॥

૮. લોપામુદ્રાસમાયુક્તં મહાયોગાસનસ્થિતમ્ ।
પ્રસન્નં તપસાં રાશિં પ્રણુમઃ કુમ્ભસમ્ભવમ્ ॥

૯. ઇતિ ધ્યાત્વા નમસ્કૃત્ય જપેન્નામાવલિં મનુમ્ ।
અગસ્ત્યઃ કુમ્ભસમ્ભૂતો મૈતાવરુણિરબ્ધિપઃ ॥

૧૦. લોપામુદ્રાપતિશ્શ્રીમાન્ વાતાપીલ્વલભક્ષણઃ ।
વિન્ધ્યાદ્રિમથનો યોગી મહામલયકેતનઃ ॥

૧૧. સર્વતીર્થાત્મકપદો ભક્તાભીષ્ટફલપ્રદઃ ।
લોપામુદ્રાભુજાશ્લેષહર્ષરોમાઞ્ચમૂર્તિમાન્ ॥

૧૨. નામ્નાં દ્વાદશકં પુણ્યમગસ્ત્યસ્ય મહાત્મનઃ ।
પઠન્ત્યપિ શ ૃણ્વન્તિ તે વૈ સુકૃતિનઃ પરમ્ ॥

૧૩. તેષામભીષ્ટદાનાય ભગવાન્ કુમ્ભસમ્ભવઃ ।
અદ્યાભ્યુદ્યત્કરામ્ભોજો નાત્ર કાર્યા વિચારણા ॥

૧૪. યશસ્યં ધન્યમાયુષ્યં જ્ઞાનદં ભુક્તિમુક્તિદમ્ ।
નામ્નાં સ્તોત્રં પઠેત્ વિદ્વાન્ પુરુષાર્થાઃ કરે સ્થિતાઃ ॥

૧૫. વિમલહૃદયમુચ્ચૈર્વેદવેદાન્તવેદ્યં
વિધિમુખસુરપૂજ્યં ભૂતિરુદ્રાક્ષભાજમ્ ।
મુનિવરમમલાઙ્ગ્યા ધર્મપત્ન્યાપ્તભાગં
કલશજમભિરામં નૌમિ કારુણ્યમૂર્તિમ્ ॥

૧૬. ઇત્યેતત્ પરમં ગુહ્યં મન્ત્રં સર્વાર્થસાધકમ્ ।
યતીશ્વરાદનુપ્રાપ્ય પ્રાપ્તવાન્ પરમં સુખમ્ ॥

૧૭. નિત્યપ્રમોદભૂયિષ્ઠં પ્રમોદઃ પ્રાપ્તસૌભગઃ ।
ઉપર્યુપરિ ધર્મસ્ય પ્રાપ્તભૂતો ન સંશયઃ ॥

૧૮. ચન્દનાદ્રિસમુદ્ભૂતે સત્યે શઙ્કરલાલિતે ।
ત્વયિ સ્નાસ્યે સુપ્રસન્ને પાહિ માં ભવસાગરાત્ ॥

૧૯. ઇતિ મન્ત્રં સમુચ્ચાર્ય સ્નાત્વા તામ્રાનદીજલે ।
પિતૄન્ દેવાન્ ઋષીન્ તર્પ્ય નાભિદઘ્નજલે સ્થિતઃ ॥

૨૦. જપેન્મન્ત્રમિદં મન્ત્રી ત્રિવારં વિજિતેન્દ્રિયઃ ।
ષાણ્માસાદેવ સુપ્રીતઃ તસ્ય ભૂયાત્ ઘટોદ્ભવઃ ॥

૨૧. શિવશર્મન્ ત્વયા જપ્યં પ્રત્યહં પ્રીતિમિચ્છતા ।
ઇતિ તેન સમાખ્યાતાં કથાં કલિમલાપહામ્ ॥

૨૨. વિષયીકૃત્ય કર્ણસ્ય વિસ્મિતો દ્વિજપુઙ્ગવઃ ।
શિવશર્મા પુનઃપ્રાહ કાશ્યપં સ્વમનોરથમ્ ॥

૨૩. અત્ર પુણ્યતમે દેશે તામ્રપ્રણ્યાસ્તટે શુભે ।
ભવતસ્સન્નિધાવેવ ક્રતુમાહર્તુમુત્સહે ॥

૨૪. અતઃ સાધયિતાસ્માકં ભવાનેવ ગુરુર્મતઃ ।
ઇત્થં સંપ્રાર્થિતસ્તેન કાશ્યપો હૃષ્ટમાનસઃ ॥

૨૫. શિષ્યૈરાનાય્ય સમ્ભારાન્ મુનીનાનાય્ય સત્તમાન્ ।
દીક્ષાં પ્રવેશયામાસ શિવશર્માણમાત્મવાન્ ॥

૨૬. ક્રતુઃ ક્રમાત્ સમાપ્તોઽભૂદદ્ભુતો ભૂરિદક્ષિણઃ ।
આવભૃથ્યં વિધાયૈવ સન્તુષ્ટાઃ સર્વ એવ તે ॥

૨૭. કાશ્યપં પુરતઃ કૃત્વા યજ્વાનઃ ચાગ્નિસન્નિધૌ ।
કથયન્તઃ કથાઃ પુણ્યાઃ દીપતીર્થકસંશ્રયાઃ ॥

૨૮. એતસ્મિન્નન્ત્રે શ્રીમાન્નારદઃ તપસાં નિધિઃ ।
આયયૌ કાશ્યપં દ્રષ્ટુમમ્બરાત્ બ્રહ્મલોકતઃ ॥

૨૯,તં દૃષ્ટ્વા મુનિભિસ્સાર્ધં સહિતઃ શિવશર્મણા ।
કાશ્યપઃ પૂજયાઞ્ચક્રે નારદં વિધિપૂર્વકમ્ ॥

૩૦. આહ ચૈનં સુવિશ્રાન્તં પૃષ્ટ્વાનામયમવ્યયમ્ ।
કુતઃ સમાગતોઽસિ ત્વં વિવક્ષુરિવ ભાવ્યસે ॥

૩૧. સર્વં કથય મે સમ્યક્ અગસ્ત્યમિહ ચાગતમ્ ।
શ્રી નારદઃ –

અત્ર બ્રહ્માત્મકે ક્ષેત્રે વસન્તં ત્વાં મહામતે ॥

૩૨. દ્રષ્ટુમિચ્છન્નિહાયાતઃ પિતામહનિયોગતઃ ।
તવૈવ દર્શનાત્ બ્રહ્મન્ પૂર્ણકામોઽસ્મિ સત્તમ ॥

૩૩. શાલાતીર્થં દીપતીર્થં તીર્થં ચ પુરુષોત્તમમ્ ।
કાશ્યપેશં દાહકેશં પશ્ચિમાભિમુખં વિભુમ્ ॥

૩૪. તદગ્રતઃ સ્થિતં વિષ્ણું શિવકોપાપશાન્તિદમ્ ।
પિતામહસ્યાગ્નિહોત્રાત્ જાતં શ્રીમૂલસંજ્ઞકમ્ ॥

૩૫. દૃષ્ટ્વા સ્નાત્વાપિ પૂજ્યાપિ ભૂયો ભૂયો વિલોકયન્ ।
કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ વિશિષ્ય તવ દર્શનાત્ ॥

૩૬. યે ચાત્ર નિવસન્ત્યદ્ધા જીવન્મુક્તા હિ તે ધ્રુવમ્ ।
તેષાં દર્શનમાત્રેણ કૃતકૃત્યોઽસ્મિ સત્તમ ॥

૩૭. ત્વાં કાઙ્ક્ષતિ પરં સ્નેહાત્ દ્રષ્ટુમિચ્છન્પિતામહઃ ।
અગસ્ત્યઃ સહ પત્નીકો ભવનં પરમેષ્ઠિનઃ ॥

૩૮. ગન્તવ્યં હિ મયા સાર્ધં મા વિલમ્બોઽસ્તુ કાર્યતઃ ।
ઇતિ શ્રુત્વા વચસ્તસ્માત્ પ્રીયમાણઃ પુનઃપુનઃ ॥

૩૯. શિવશર્માણમામન્ત્ર્ય તત્રસ્થાન્ ચ વિશેષતઃ ।
કાશ્યપેશં દાષહકેશં હરિં ચ પુરુષોત્તમમ્ ॥

૪૦. તામ્રપર્ણીં નમસ્કૃત્ય પૂજયિત્વા ઘટોદ્ભવમ્ ।
વ્યોમયાનઃ સંપ્રતસ્થે નારદેન સહામુના ॥

૪૧. પુનઃપુનઃ ક્ષેત્રરાજં દેવીં ચ મલયાત્મજામ્ ।
મલયં ચન્દનાવાસં સમ્ભાવ્ય મુનિપુઙ્ગવઃ ॥

૪૨. દેવૈસ્સિદ્ધગણૈસ્સાર્ધં ગન્ધર્વપતગોરગૈઃ ।
પૂજ્યમાનઃ સમસ્તૈશ્ચ અર્ચ્યમાનઃ પદે પદે ॥

૪૩. ઉપર્યુપરિ મેઘાનામુત્પતન્ ભાસ્કરોપમઃ ।
સિદ્ધલોકમતિક્રમ્ય યક્ષલોકમતીત્ય ચ ॥

૪૪. મહાવાયુપદાદૂર્ધ્વં વૈશ્વાનપદં મહત્ ।
અતિક્રમ્યાર્કપદવીં સિદ્ધચારણસેવિતામ્ ॥

૪૫. નક્ષત્રાણાં ગ્રહાણાં ચ તથા સપ્તર્ષિમણ્ડલમ્ ।
ધ્રુવં પ્રદક્ષિણીકૃત્ય સ્મયમાનો મુહુર્મુહુઃ ॥

૪૬. અતીત્ય દૂરમધ્વાનં મહર્જનતપોર્જિતમ્ ।
નારાયણકરોન્મુક્ત ચક્રરાજ ઇવાપરઃ ॥

૪૭. આસસાદ શનૈર્વ્યોમ બ્રહ્મલોકં સનાતનમ્ ।
અદ્યાપિ તસ્ય મહિમા દૃશ્યતે તીર્થવિગ્રહઃ ॥

૪૮. પઞ્ચકોશપ્રમાણેન ક્ષેત્રમેતત્ વિનિર્મિતમ્ ।
અત્રાવિષ્કૃત્ય દેવોઽપિ મોક્ષલક્ષ્મી સુદુર્લભામ્ ॥

૪૯. તદાદિ સર્વજન્તૂનાં રાજન્ અદ્યાપિ દૃશ્યતે ।
એતત્ તે પુણ્યમાખ્યાનં કથિતં સારસઙ્ગ્રહમ્ ॥

૫૦. વિસ્તરાત્ વક્તુમસ્માભિઃ શ્રોતું વાપ્યગ્રયાયિના ।
નાલં વર્ષશતેનાપિ બહુત્વાત્ અવનીપતે ॥

૫૧. ઇતઃ પરં વક્ષ્યામિ કરિરાજસ્ય મોક્ષણમ્ ।
યત્ આકર્ણયતો મર્ત્યો ન ભૂયઃ તનુમાન્ ભવેત્ ॥

૫૨. શિવશર્માપિ વિપ્રેન્દ્રઃ તત્ર સ્થિત્વા કિયચ્ચિરમ્ ।
તત્રત્યાન્ એવ આમન્ત્ર્ય સાગ્નિહોત્રસમેધિતઃ ॥

૫૩. ગજેન્દ્રવરદં દૃષ્ટ્વા સ્નાત્વા ચ વિધિપૂર્વકમ્ ।
ગઙ્ગાદ્વારમગાત્ તસ્માત્ યત્રાસ્તે ભગવાન્ હરિઃ ॥

૫૪. ઇતઃ પરં પ્રવક્ષ્યામિ કરિરાજસ્ય મોક્ષણમ્ ।
યસ્ય શ્રવણમાત્રેણ કર્મબન્ધાત્ પ્રમુચ્યતે ॥

૫૫. અગસ્ત્યશાપાત્ આપન્નમાતઙ્ગત્વં દયાનિધિઃ ।
મોચયિત્વા પાણ્ડ્યભૂપં ચક્રે નિજપદાશ્રયમ્ ॥

૫૬. અદ્યાપિ દૃશ્યતે યત્ર વરદઃ સર્વદેહિનામ્ ।
ઇત્થં બ્રુવતિ યોગીન્દ્રે શઙ્ખે સંશયભેત્તરિ ॥

૫૭. પુનઃ પ્રસાદયન્ વાચા પરિપપ્રચ્છ ભૂપતિઃ ।
રાજા –
ભગવન્ યોગિનાં શ્રેષ્ઠ ધર્માખ્યાનસુધાનિધે ॥

૫૮. તં મે વિસ્તરતો બ્રૂહિ વૃત્તાન્તં ચ સવિસ્તરમ્ ।

કો વા મહીપતિઃ પાણ્ડ્યઃ કિમાઘઃ કૃતવાન્ મુને ॥

૫૯. સંપ્રાપ્ય તિર્યક્ યોનિત્વે શાપોપહતચેતસિ ।
અનુગ્રહં મુનિઃ ચક્રે કેન વા પુણ્યકર્મણા ॥

૬૦. કથ્યતાં વિસ્તરાત્ બ્રહ્મન્ શ્રોતું કૌતૂહલં હિ મે ।
ઇત્થં સાદરમર્થિતઃક્ષિતિભુજા ભૂમ્ના મુનીન્દ્રો
મુદા ચારુસ્વાદુ કથાધુનીમકથયત્ કર્ણામૃતસ્યન્દિનીમ્ ।
શ્રીવિશ્વં પરમૂર્તિકલિતાલઙ્કારસમ્ભાવિતાં
કારુણ્યૈકનિધિઃ વિધિત્સુરખિલાપાયવ્યયં શ◌ૃણ્વતામ્ ॥

ઇતિ એકત્રિંશોઽધ્યાયઃ ।            Pro.Total = 2540 + 60 = 2600.

## દ્વાત્રિંશોઽધ્યાયઃ

ગજેન્દ્રમોક્ષકથાવર્ણન મ્ ।

૧. શઙ્ખઃ –
શ્રુણુ રાજન્ પુરા વૃત્તમિતિહાસં સવિસ્તરમ્ ।
હરેર્ભગવતો ભૂરિકરુણાગૈરવાશ્રિતમ્ ॥

૨. વર્ણયામિ કલિક્લેશશમનૈકાન્તભેષજમ્ ।
પુરા વ્યાસેન કથિતં શુકાય બ્રહ્મવાદિનમ્ ॥

૩. પુરા કશ્ચિત્ અભૂત્ રાજા પાણ્ડ્યેષુ બલિનાં વરઃ ।
ઇન્દ્રદ્યુમ્ન ઇતિ ખ્યાતઃ યક્ષરાજ ઇવાપરઃ ॥

૪. ચતુર્મુખમુખામોદમેદુરા યસ્ય ભારતી ।
કલાવિશેષકલ્લોલરસનારઙ્ગસાક્ષિણી ॥

૫. નિદ્રાવિશાલશીલેન પત્યા સાસૂયમિન્દિરા ।
અવિમુક્તોદયા યસ્ય ન જહૌ વદનામ્બુજમ્ ॥

૬. યત્સૌન્દર્યસુધાસારસોચિતાક્ષિસરોરુહઃ ।
કવયો નૈવ શંસન્તિ નિર્દગ્ધાનઙ્ગવિગ્રહમ્ ॥

૭. યસ્મિન્ શાસતિ ભૂપાલે રાજનીતિવિશારદે ।
અસ્થાત્ અઙ્ગમભૂત્ ધર્મો ભૂમૌ પદચતુષ્ટયમ્ ॥

૮. યસ્ય પ્રતાપલેશેન સન્તપ્તા ઇવ શત્રવઃ ।

સમુદ્રં શરણં પ્રાપુઃ કેચિત્ કાન્તારગહ્વરમ્ ॥

૯. એવં સ રાજધર્મેણ પાલયન્ સકલાં મહીમ્ ।
અયજત્ વાજપેયેન રાજસૂયેન ચાસકૃત્ ॥

૧૦. આત્માનં પાવયામાસ હયમેધૈઃ પુનઃપુનઃ ।
યજ્ઞેન દેવાન્ સન્તોષ્ય પ્રજયા પિતૄન્ નૃપઃ ॥

૧૧. ગુરૂન્ વિપ્રાન્ ધનેનૈવ ભોગૈરાત્માનમેવ ચ ।
એવં નીત્વા સહસ્રાણાં દ્વાદશં શરદં ક્રમાત્ ॥

૧૨. વિરક્તઃ સર્વભોગેભ્યઃ વિનીતઃ પ્રવયાઃ સ્વયમ્ ।
મણિવર્ણં જ્યેષ્ઠપુત્રં ગુણશ્રેષ્ઠં વિશેષતઃ ॥

૧૩. રાજ્યેભિષિચ્ય મેધાવી તીર્થયાત્રાપરઃ સ્વયમ્ ।
પુરોહિતં સમામન્ત્ર્ય બન્ધૂન્ ચ પ્રેમવિહ્વલાન્ ॥

૧૪. કૈશ્ચિત્ સમન્વિતો વિપ્રૈઃ અનુરક્તૈઃ મહાત્મભિઃ ।
મણલૂરાત્ વિનિર્ગત્ય નગરાત્ સ મહીપતિઃ ॥

૧૫. ક્રમાન્નિષેવ્ય તીર્થાનિ તામ્રાયાઃ કૂલયોઃ દ્વયોઃ ।
આસસાદ સ ભૂદેવૈઃ પદ્મતીર્થં હરિપ્રિયમ્ ॥

૧૬. તત્ર સ્નાત્વા તર્પયિત્વા પિતૄન્ દેવાન્ ઋષીનપિ ।
તીર્થશ્રાદ્ધં ક્ષેત્રપિણ્ડં વિધાય વિધિપૂર્વકમ્ ॥

૧૭. પુરોધાય ગુરું દાન્તો ધનાનિ બહુશો દદૌ ।
સર્વેષુ પરિતૃપ્તેષુ બ્રાહ્મણેષુ સમર્હણૈઃ ॥

૧૮. માધ્યન્દિનવિધિં કૃત્વા ચકારારાધનં હરેઃ ।
ગન્ધૈઃ પુષ્પૈઃ તથા ધૂપૈઃ નીરાઞ્જનાદિભિઃ ॥

૧૯. નાનાવિધૈશ્ચ નૈવેદ્યૈઃ સ્તોત્રૈઃ શ્રુતિસમીરિતૈઃ ।
ઇત્થમભ્યર્ચ્યમાને તુ દેવે દેવીસમન્વિતે ॥

૨૦. અભ્યાયયૌ મહાતેજા મુનિઃ કલશસમ્ભવઃ ।
તત્રત્યામ્રવણે રમ્યે ગજેન્દ્રવરદપ્રભોઃ ॥

૨૧. યં વદન્તિ મહાત્માનઃ સાક્ષાત્ ભગવતઃ તનુમ્ ।
યસ્યાનુગ્રહમાસાદ્ય સર્વે જીવન્તિ જન્તવઃ ॥

૨૨. યસ્મિન્ દેવાશ્ચ મન્ત્રાશ્ચ ક્રતવો દેવતાસ્તથા ।
અવિશ્રાન્તમુપાસન્તે લોકાનાં હિતકામ્યયા ॥

૨૩. રુદ્રાક્ષમાલાબહુલો જટામણ્ડલમણ્ડિતઃ ।
શ્રૌતભસ્માઙ્ગરાગેણ ચન્દ્રમા ઇવ પાણ્ડરઃ ॥

૨૪. મુક્તામતલ્લિકામિશ્રમહામાણિક્યસમ્ભૃતામ્ ।
વ્યાવર્તયન્ અક્ષમાલામઙ્ગુષ્ઠેન મુહુર્મુહુઃ ॥

૨૫. નિરન્તરવિનિર્ગચ્છન્ મહામન્ત્રાક્ષરોર્મિભિઃ ।
ઈષત્વિસ્ફુરમાણેન લક્ષિતો દન્તવાસસા ॥

૨૬. રુરુચર્મોત્તરીયેણ કિઞ્ચિત્ આચ્છિન્નકન્ધરઃ ।
અનુગચ્છદ્ભિઃ અવ્યગ્રૈઃ શિષ્યૈઃ પરિવૃતો મહાન્ ॥

૨૭. સ્વભાસા ભાસયન્ વિષ્વક્ ભાસ્વાન્ બાલાતપૈરિવ ।
દ્રષ્ટુકામઃ પાણ્ડ્યભૂપમનુગ્રહવિધિત્સયા ॥

૨૮. તં દૃષ્ટ્વા સહસોત્તસ્થુઃ તત્રત્યાઃ સર્વ એવ તે ।
નમસ્કૃત્ય ઋષિં વિદ્વાન્ રાજપુરોહિતઃ ॥

૨૯. કૃતાઞ્જલિરુવાચેદં તમગસ્ત્યં મહામુનિમ્ ।
પુરોહિતઃ –
બ્રહ્મન્ પ્રસીદ સર્વજ્ઞ પ્રસીદ કરુણાનિધે ॥

૩૦. ત્વદઙ્ઘ્રિપદ્મસેવાયૈ રાજાભ્યેતિ ક્ષણાદિહ ।
શિવમારાધયન્નાસ્તે તાવત્ આસ્વેદમાસનમ્ ॥

૩૧. એવં બ્રુવાણે વૈ તસ્મિન્ દાન્તે રાજપુરોહિતે ।
તમનાદૃત્ય ભગવાન્ મૈત્રાવરુણિરીશ્વરઃ ॥

૩૨. તાવતા સમયેનૈવ રાજાન્તિકમુપાગમત્ ।
સ ભૂપાલોઽપિ તત્કાલે હરિપાદાબ્જલીનધીઃ ॥

૩૩. નોત્થાનમકરોત્તસ્ય પૂજાભઙ્ગભયાત્ ક્ષણમ્ ।
તાવતા કુપિતઃ શ્રીમાન્ સમુદ્ર ઇવ પર્વણિ ॥

૩૪. તવૈવ હિતકામેન ક્ષુદ્રબન્ધો મયાધુના ।
ઇયતીયમરણ્યાની લઙ્ઘિતા વિષમસ્થલી ॥

૩૫. અભ્યાગતં પરિશ્રાન્તં મામનાદૃત્ય મૂઢવત્ ।

સ્થિતોઽસિ યસ્માત્ દુર્બુદ્ધે ભવિતા ત્વં વનદ્વિપઃ ॥

૩૬. ઇતિ વાદિનિ વૈ તસ્મિન્ કુપિતે કુમ્ભસમ્ભવે ।
સ રાજા નિમિષાત્ એવ સમર્પ્યાભ્યર્હણં હરેઃ ॥

૩૭. વેપમાન ઇવોત્થાય ભીતભીતઃ પરિભ્રમત્ ।
પ્રણમ્ય પાદયોર્મૂર્ધ્ના પ્રશ્રિતઃ પ્રાહ તં મુનિમ્ ॥

૩૮. રાજા –
કિમિદં ભગવન્ ભૃત્યે ત્વય્યનાથે મય્યનાગસિ ।
આકસ્મિકમહં મન્યે શાપાશનિવિમોચનમ્ ॥

૩૯. સવિમર્શં ત્વદાદિષ્ટપદવીપરિશીલિના ।
મયા ન દૃશ્યતે બ્રહ્મન્ અપરાધાણ્ડતા વિભો ॥

૪૦. અસ્તુ ભાવ્યમિદં મહ્યમનુરૂપં હિ કર્મિણામ્ ।
ભાવિનઃ સ્વયમાયાન્તિ મેઘા ઇવ નભસ્થલે ॥

૪૧. અભાવ્યં ચ ન ભવત્યેવ વન્ધ્યાગર્ભમિવ ધ્રુવમ્ ।
તથાપ્યહં ન શોચામિ ભુઞ્જન્ આત્માનુસઞ્ચિતમ્ ॥

૪૨. એતાવત્ પાલયન્ સમ્યક્ અનુરાગાત્ ઇમં જનમ્ ।
અત્યર્થં ક્ષિપસિ બ્રહ્મન્ અપારે વૃજિનાર્ણવે ॥

૪૩. અર્ભકઃ પરિગૃહ્ણાતિ કુપિતામપિ માતરમ્ ।
અનભિજ્ઞેન મૂઢેન મયા પાપં કૃતં મયા ॥

૪૪. કૃતાન્યકૃત્ય કર્મણિ ક્ષન્તુમર્હસિ ધર્મતઃ ।
ઉપેક્ષિતા મે વિષયા ધનદારાસુતાદયઃ ॥

૪૫. ત્વદઙ્ઘ્રિપઙ્કજાસક્ત્યા મામવેહિ સમાગતમ્ ।
અવસાનં તુ શાપસ્ય કથં પ્રાપ્સ્યે સુદુસ્સહમ્ ॥

૪૬. પારમ્પર્યક્રમાત્ સર્વે વયં ત્વત્પાદસેવિનઃ ।
અહમેકઃ પરિભ્રષ્ટઃ કુવૃત્ત ઇવ ગોત્રતઃ ॥

૪૭. ઇત્થં દુઃખપરીતાત્મા વિલપન્ એવ ભૂપતિઃ ।
પપાત પાદયોસ્તસ્ય પાહિ માં પાહિ મામિતિ ॥

૪૮. એવં દુઃખપરિક્રાન્તં વેષ્ટમાનં મહીતલે ।
વિલોક્ય કુમ્ભજો ભૂયં દયાલુઃ પુનરબ્રવીત્ ॥

૪૯. અગસ્ત્યઃ –
દુઃખેનાલં મહારાજ જહીહીહ પરિભ્રમમ્ ।
મયિ મન્યુર્ન કર્તવ્યો ભવિતવ્યે વિજાનતા ॥

૫૦. ત્રિકાલજ્ઞાનચતુરા બુદ્ધિસ્તે નિરપાયિની ।
નિત્યાભવતુ દુઃખઘ્ની મત્પ્રસાદાત્ ભવિષ્યતિ ॥

૫૧. અખણ્ડજ્ઞાનજનની હરિભક્તિરનામયા ।
મદનુગ્રહાત્ અભિનવા ભૂયાત્ તવ સુખાપ્તયે ॥

૫૨. અકુતશ્ચિત્ભયો ધીરો બલવાન્ અત્ર ભૂધરે ।
નિવસન્ હરિપાદાબ્જં મા વિસ્મર મહીપતે ॥

૫૩. મલત્રયવિનિર્મુક્તો વિહરસ્વ યથાસુખમ્ ।
અનેહસા હ્રસિષ્ઠેન ભગવાન્ હરિરીશ્વરઃ ॥

૫૪. મોચયિષ્યતિ શાપાત્ ત્વાં નાત્ર કાર્યા વિચારણા ।
ઇત્યુક્ત્વા મુનિભિસ્સાર્ધં અગસ્ત્યોઽતિદયાપરઃ ॥

૫૫. તત્રૈવાન્તરધાત્ રાજન્ સર્વેષાં પશ્યતાં તદા ।
સોઽપિ રાજા શાપબલાત્ મહાનાસીત્ મતઙ્ગજઃ ॥

૫૬. નાગાયુતબલો વીરો મહાકાયો મદોત્કટઃ ।
વનદ્વિપાનાં સર્વેષાં સાર્વભૌમઃ ચચાર સઃ ॥

૫૭. કરિણઃ કરિણ્યશ્ચ શતશોઽથ સહસ્રશઃ ।
તમેનમનુતિષ્ઠન્તે દેવા ઇવ બિડૌજસમ્ ॥

૫૮. પ્રત્યહં તીર્થમુખ્યેષુ ભક્ત્યા સ્નાત્વા ગજેશ્વરઃ ।
હરિમારાધયામાસ નામભિઃ કમલોત્પલૈઃ ।
૫૯. શરીરયાત્રાં કુર્વાણઃ સત્યેન સર્વસમ્મતઃ ।
નિનાય શરદાં પઞ્ચશતં યુગશતોપમમ્ ॥

૬૦. એતસ્મિન્નેવ સમયે તત્રાષ્ટ્રે રાજદોષતઃ ।
અનાવૃષ્ટિરભૂત્ રાજન્ સર્વપ્રાણિભયાવહા ॥

૬૧. સમશિષ્યન્ત સર્વત્ર વાપીકૂપાં તુ સિન્ધવઃ ।
દુર્ભિક્ષપીડિતા સર્વે(સર્વાઃ) પ્રજાઃ પ્રાણપરીપ્સયા ॥

૬૨. અપહાય ચ તત્ રાજ્યં દેશાન્તરમુપાવિશન્ ।
તદા પ્રતિદિનં પદ્માન્યાદાયાભિસુદૂરતઃ ॥

૬૩. હરિમભ્યર્ચયન્ ભક્ત્યા કરીન્દ્રઃ કાલમભ્યગાત્ ।
અટમાનો વનતટીમન્વિષ્યન્ કુસુમાકરમ્ ॥

૬૪. આસાયં સઞ્ચરિત્વોષ્મક્ષુત્ક્ષાન્તશ્ચ શ્રમાન્વિતઃ ।
બહુદૂરમતિક્રમ્ય લમ્બમાને દિવાકરે ॥

૬૫. આસસાદ મહાનદ્યાઃ હ્રદં કમલમણ્ડિતમ્ ।
અગાધમમ્બુસમ્પૂર્ણં યાદોગણનિષેવિતમ્ ॥

૬૬. નાનાવિહગસઙ્ઘુષ્ટં કમલામોદમેદુરમ્ ।
યત્રોદીચીમુખા તામ્રા નદી પરમપાવની ॥

૬૭. તત્ર સ્નાત્વા ગજેન્દ્રોऽપિ તીર્થે સર્વશ્રમાપહે ।
ઉજ્જહાર સ ફુલ્લાનિ પદ્માન્યર્ચયિતું હરિમ્ ॥

૬૮. તાવત્ તત્ર મહાતોયે વિશાલે ગાધવર્જિતે ।
કશ્ચિત્ ગ્રાહઃ સમુત્પત્ય જગ્રાહ ચ ગજેશ્વરમ્ ॥

૬૯. બલી બલિનમાગત્ય ચરણે વિચકર્ષ હ ।
આતીરં કરિરાજોऽપિ તં વિકૃષ્ય દ્રુતં યયૌ ॥

૭૦. આપત્ય હ્રદમાકૃષ્ય મહાન્ નક્રોऽપિ જગ્મિવાન્ ।
એવમન્યોન્યબલિનૌ પરસ્પરવિકર્ષિણૌ ॥

૭૧. અવિશ્રાન્તં દ્વાદશાહમાસેદતુરવિક્લબૌ ।
નિરાહારતયા દૂરવનગહ્વરલઙ્ઘનાત્ ॥

૭૨. ક્ષીયમાણબલો દુઃખી કરિરાજસ્તુ બૃંહયન્ ।
સંસારે સ્મરતામાધિશમનં પુરુષોત્તમમ્ ॥

૭૩. પુષ્કરાગ્રોદ્ધૃતામ્ભોજઃ ક્ષાન્તશ્ચ ક્ષુત્પીડિતઃ ।
હૃદિ ધ્યાયન્ હૃષીકેશં તુષ્ટાવ દુરિતાપહમ્ ॥

૭૪. ગજેન્દ્રઃ –
નાથા નારાયણાશેષલોકાપાયવ્યપોહન ।
આદિમૂલ હૃષીકેશ દીને મયિ દયાં કુરુ ॥

૭૫. દીનબન્ધો દયાસિન્ધો સિન્ધુકન્યાનિવાસ ભો ।

આદિમૂલાર્ચનીયાઙ્ઘ્રે દીને મયિ દયાં કુરુ ॥

૭૬. ઘનશ્યાભિરામાઙ્ગ ગઙ્ગાધરમુખાર્ચિત ।
આદિમૂલાર્ચનીયાઙ્ઘ્રે દીને મયિ દયાં કુરુ ॥

૭૭. અલબ્ધશરણોઽન્યત્ર ત્રસ્યમાનઃ સ્વકર્મભિઃ ।
ઘર્મતપ્ત ઇવ છાયાં કાઙ્ક્ષે કમલલોચનમ્ ॥

૭૮. જન્મમૃત્યુજરાધ્વાન્તપરિભૂતઃ પુનઃપુનઃ ।
લોકો યથા દિનકરં કાઙ્ક્ષે કમલલોચનમ્ ॥

૭૯. ભૂયો ભૂયો પરિક્રમ્ય કર્કશે કર્મવર્ત્મનિ ।
અહમાસિતુમેકાન્તે કાઙ્ક્ષે કમલલોચનમ્ ॥

૮૦. ત્વામેવ શરણં પ્રાપ્તં ત્વયિ દત્તાખિલેન્દ્રિયમ્ ।
ઉપેક્ષસે કથં નાથ મામનાથં જનાર્તિહન્ ॥

૮૧. મન્દીભૂતાનિ ઇન્દ્રિયાણિ પ્રાણાઃ કણ્ઠગતા ઇમે ।
રક્ષ માં રક્ષ માં નાથ ત્વન્નાથં ત્વત્પરિગ્રહમ્ ॥

૮૨. ભો નાથ કિમિદં ભૃત્યે પતિતં શોકસાગરે ।
મય્યુપેક્ષા તવેદાનીં ઊષ્મેવ શિશિરદ્વિષઃ ॥

૮૩. ત્રાહિ ત્રાહિ મહામૃત્યુબડવાવહ્નિપાતનાત્ ।
ત્રાહિ માં ત્રાહિ માં આદિમૂલ મૂલાક્ષર પ્રભો ॥

૮૪. ઇત્થમાક્રન્દતસ્તસ્ય કરિરાજસ્ય સીદતઃ ।
શુશ્રાવ રિદિતં ઘોરં ભગવાન્ ગરુડધ્વજઃ ॥

૮૫. ક્ષીરાબ્ધિમધ્યે ભોગીન્દ્રે શયાનઃ ચન્દ્રપાણ્ડુરે ।
અઙ્ગાત્ ઉત્થાય પદ્માયાઃ સમ્ભ્રાન્ત ઇવ તત્ ક્ષણાત્ ॥

૮૬. અનપેક્ષિતનૈવેદ્યં અનઙ્ગીકૃતપાદુકમ્ ।
વ્યાકુલાન્તઃપુરજનં કિમર્થમિતિ સર્વતઃ ॥

૮૭. અવાહનપરિષ્કારં આરુહ્ય પતગેશ્વરમ્ ।
વ્યોમયાનઃ સંપ્રતસ્થે સ્તૂયમાનઃ સુરાસુરૈઃ ॥

૮૮. આધાવમાનૈરમરૈઃ અનાયુધકરૈઃ ભટૈઃ ।
અનુગમ્યમાનસિદ્ધૈશ્ચ સ્તુવદ્ભિર્નારદાદિભિઃ ॥

૮૯. કિરીટકોટિઘટિતૈઃ મણિભિઃ ચાપિતલ્લજૈઃ ।
કટિસૂત્રબ્રહ્મસૂત્રકનકાઙ્ગદકુણ્ડલૈઃ ॥

૯૦. ભ્રાજમાનં કૌસ્તુભેન સામોદવનમાલયા ।
સ્ફુટન્ મરકતશ્યામચારુપીતામ્બરાવૃતઃ ॥

૯૧. શઙ્ખચક્રગદાપદ્મૈઃ અલઙ્કૃતચતુર્ભુજૈઃ ।
સુનન્દનન્દપ્રમુખૈઃપાર્ષદૈરનુસેવિતઃ
૯૨. અવિલમ્બં ક્ષણાદેવ કરિરાજમુપાગમત્ ।
માભૈષ્ટેત્યભયારાવૈઃ પરિપૂર્ય દિગન્તરમ્ ॥

૯૩. તપ્તચામીકરાકારે વૈનતેયે મહાદ્યુતૌ ।
ભાસમાનઃ શ્રિયો જુષ્ટો ભગવાન્ મધુસૂદનઃ ॥

૯૪. મુમોચ સહસા ચક્રં નક્રરાજવધાય હિ ।
સ તુ નારાયણકરાન્મુક્તઃ ચક્રઃ કોટ્યર્કસન્નિભઃ ॥

૯૫. નિહત્ય ગ્રાહમમ્ભસ્થમાસસાદ પુનર્હરિમ્ ।
સ કરીન્દ્રો વિનિર્મુક્તમૃત્યુરત્યન્તવિસ્મિતઃ ॥

૯૬. અદ્રાક્ષીત્ અદ્ભુતાકારં હરિમાર્તાર્તિભઞ્જનમ્ ।
ઊર્ધ્વમુદ્યત્પુષ્કરેણ મકરન્દસુગન્ધિના ॥

૯૭. નમો નારાયણાયેતિ પાદયોર્હરિમર્ચયત્ ।
કન્દલત્કરુણાપાઙ્ગસુધાસારાભિવર્ષિણા ॥

૯૮. આલોકનેનાલિકુલં શ્રેણીપદેન ચારુણા ।
સાનુરાગેણ સમ્ભાવ્ય કરિરાજાનમચ્યુતઃ ॥

૯૯. સંપ્રમૃજ્ય ક્ષેમકરૈઃ ચતુર્ભિઃ સ્વકરામ્બુજૈઃ ।
વ્યાજહાર સમાભાષ્ય સ્મયમાનમુખામ્બુજઃ ॥

૧૦૦. વત્સ મા શોકમોહાભ્યાં વ્યાજહીહિ મનોવ્યથામ્ ।
વરાન્ વરય દુર્લભ્યાન્ અપિ બ્રહ્માણ્ડમણ્ડલે ॥

૧૦૧. શઙ્ખઃ –
ઇત્થં પ્રસન્નં વિજ્ઞાય ભગવન્તં ગજેશ્વરઃ ।
અમન્દમુચ્છ્વસન્ મૂર્ધ્ના કમ્પમાનેન ભૂયસા ॥

૧૦૨. પ્રોદ્યન્શુણ્ડાતલામૃષ્ટપયોદપટલીતટઃ ।

નત્વા જય જયેત્યુક્ત્વા વચનં ચેદમબ્રવીત્ ॥

૧૦૩. ગજેન્દ્રઃ –

ભગવન્ કરુણામૂર્તે પ્રસીદ પુરુષોત્તમ ।

નાનાયોનિસહસ્રેષુ ભ્રમમાણઃ પુનઃપુનઃ ॥

૧૦૪. ભાગધેયવશાલ્લબ્ધં ભવત્પાદામ્બુજં વિભો ।

નાહં અર્હોઽસ્મિ તુચ્છેષુ વિષયાવર્તકોટિષુ ॥

૧૦૫. અપારેષ્વર્થસારેષુ બન્ધુસંસારસિન્ધુષુ ।

માં મા મુઞ્ચ જગન્નાથ મા મુઞ્ચ પુરુષોત્તમ ॥

૧૦૬. મા નિપાતય ભીતં માં કર્મપાતાલગહ્વરે ।

ઇતિ વાચં ગજેન્દ્રસ્ય વિષયીકૃત્યકર્ણયોઃ ॥

૧૦૭. સહર્ષં વચનં ચેદં વ્યાજહાર જનાર્દનઃ ।

તથાસ્તુ કરિરાજેન્દ્ર કાઙ્ક્ષિતસ્તે મનોરથઃ ॥

૧૦૮. અત્ર મજ્જન્તિ યે મર્ત્યાઃ તીર્થે ત્વન્મોક્ષદાયિનિ ।

તેષાં દાસ્યામિ નિર્વાણપદવીં નાત્ર સંશયઃ ॥

૧૦૯. ચન્દ્રે મત્તારસહિતે સિંહેયુષિ પૂષણિ ।

સ્નાત્વાત્ર માં યે પશ્યન્તિ યે શૃણ્વન્ત્યાવયોઃ કથામ્ ॥

૧૧૦. તેષાં દાસ્યામિ સૌભાગ્યં સમ્પદો નાત્ર સંશયઃ ।

અત્રૈવ નિવસન્ નિત્યમહં ક્ષીરાર્ણવે યથા ॥

૧૧૧. ભક્તાનાં સંપ્રદાસ્યામિ સત્યમેવ મનોરથાન્ ।

પરે પુંસિ વદત્યેવં પશ્યત્સુ ભુવનેષ્વપિ ॥

૧૧૨. ગજરાજસ્ય નિર્ભિદ્ય મૂર્ધાનં સૂર્યસન્નિભઃ ।

સ ભૂમિપાલઃ સહસા સમુત્તસ્થૌ શ્રિયા જ્વલન્ ॥

૧૧૩. ઉપર્યુપરિ રોદસ્યોરન્તરં સંપ્રકાશયન્ ।

આવિવેશ હરેર્વક્ષઃ સ્ફુરત્શ્રીવત્સકૌસ્તુભમ્ ॥

૧૧૪. પુષ્પવૃષ્ટિઃ વિષ્વગભૂત્ અસ્તુવન્ સિદ્ધચારણાઃ ।

બ્રહ્મરુદ્રમુખાઃ દેવાઃ સ્તુવન્તો હરિમીડિરે ॥

૧૧૫. દિવિ ભૂમૌ તદા વાચઃ બભૂવુઃ હરિસંશ્રયાઃ ।

તદન્તરા બ્રહ્મશાપાત્ યક્ષરાટ્ નક્રરૂપતઃ ॥

૧૧૬. વિમોચિતો ભગવતા સ્વરૂપમગમત્ પુનઃ ।
દેવદેવં પ્રણમ્યાદૌ અનુજ્ઞાતોઽગમત્ પદમ્ ॥

૧૧૭. ઇત્થં સુરૈર્મુનિગણૈરભિપૂજ્યમાનઃ
સિદ્ધૈસ્સનન્દસનકપ્રમુખૈઃ સ્તુવદ્ભિઃ ।
સાકં ગણેન ભગવાન્ અરવિન્દનાભઃ
સાન્નિધ્યમત્ર વિદધે જગતાં વિભૂત્યૈ ॥

૧૧૮. ગજેન્દ્રમેવં પરિપાલયિત્વા દુઃખાત્ દુરન્તાત્ મધુકૈટભારિઃ ।
સહ શ્રિયા ચોર્વરયા ગજેન્દ્રમુખ્યૈઃ સ્વભક્તૈઃ નિવાસમ્ ॥

૧૧૯. એવં વિમોક્ષ્ય કરિરાજમશેષબન્ધુઃ
ઇન્દીવરોદરતલાભિનવસ્વમૂર્તિઃ ।
અદ્યાપિ સર્વજગતાં વરદઃ સમાસ્તે
નદ્યાસ્તટે સુઘટયન્ સ્વકૃતૈઃ સ્વભક્તાન્ ॥

૧૨૦. અખિલતિમિરહન્ત્રીમર્કશોભામિવોચ્ચૈઃ
ગજપતિપરિમોક્ષપ્રસ્તુતામાદિપુંસઃ ।
પઠતિ ય ઇહ ભક્ત્યા સત્કથાં શ્રાવયિત્વા
શ્રુતિપદમનુગૃહ્ણન્ યાતિ વિષ્ણોઃ પદં તત્ ॥

ઇતિ દ્વાત્રિંશોઽધ્યાયઃ । Pro.Total = 2600 + 120 = 2720.

## ત્રયસ્ત્રિંશોઽધ્યાયઃ

દુર્ગાતીર્થવૈભવવર્ણન મ્ ।

૧. શ્રી સૂતઃ –
એવં ગજેન્દ્રમોક્ષાં કથામાકર્ણ્ય ભૂપતિઃ ।
વીરસેનો મહીપાલો વિસ્મયં પરમં યયૌ ॥

૨. ભૂયો ભૂયો સ્વાન્તમન્તઃ કથામુલ્લાસયન્ ઇમામ્ ।
આનન્દબાષ્પપૂર્ણાભ્યાં લોચનાભ્યાં વિલોકયન્ ॥

૩. અભિષ્ટૂય મુનિશ્રેષ્ઠમભ્યભાષત સાઞ્જલિઃ ।
રાજા –

ભગવન્ મુનિશાર્દૂલ કથેયં કથિતા મયા ॥

૪. કર્ણયોરિવ પીયૂષધારા કલ્મષનાશિની ।
અજ્ઞાનધ્વાન્તશમની હરેઃ કારુણ્યસૂચની ॥

૫. કૃતાર્થયતિ મામેષા યથા તત્પાદસમ્ભવા ।
ઇતઃ પરં મે શ્રોતવ્યં દુર્ગાતીર્થસ્ય વૈભવમ્ ॥

૬. હરેરિયં ભગવતી સહજા કથિતા કિલ ।
તસ્માત્ તથૈવ વિસ્તાર્ય દુર્ગાયાઃ શ્રાવ્યમેવ મે ॥

૭. કેન વા કારણેનૈવ દુર્ગાતીર્થમિતીરિતમ્ ।
સાન્નિધ્યં તત્ર સા દેવી ચકારારાધિતા જનૈઃ ॥

૮. અનેન પુણ્યોપાખ્યાનકથનેન હિ માં ગુરો ।
પુનીહિ પુરુષાર્થાનાં યેન સ્યામ્યહમાશ્રયઃ ॥

૯. શઙ્ખયોગી –
રાજન્ કલિમલધ્વાન્તવિધ્વંસનવિનોદિનીમ્ ।
કથામશેષલોકૈકસવિત્ર્યાઃ કથયામ્યહમ્ ॥

૧૦. અવધાનાનુબન્ધેન ચેતસાકર્ણય પ્રભો ।
પુરા દેવયુગે રાજન્ મનૌ સ્વાયમ્ભુવે સતિ ॥

૧૧. કશ્ચિત્ આસીન્ મહીપાલ ; કાઞ્ચ્યાં કન્દર્પસન્નિભઃ ।
અગ્નિવર્ણ ઇતિ ખ્યાતો મેધાવી વૃદ્ધસમ્મતઃ ॥

૧૨. જુગોપ વસુધાં સર્વાં જિતામિત્રઃ પ્રતાપવાન્ ।
એતસ્મિન્નન્તરે કોઽપિ યુવા વૈશ્યઃ સમાયયૌ ॥

૧૩. આદાય વનિતારત્નં સ્પૃહણીયાં સુરાસુરૈઃ ।
મણિવીથીમુપાગમ્ય પરામૃશ્ય મુહુર્મુહુઃ ॥

૧૪. કસ્યચિત્ વૈશ્યમુખ્યસ્ય ધર્મજ્ઞસ્ય વિશેષતઃ ।
પ્રવિવેશ ગૃહં રમ્યં રાજરાજગૃહોપમમ્ ॥

૧૫. સ ગૃહસ્થો મહાબુદ્ધિઃ વૃદ્ધશ્રીકર સંજ્ઞકઃ ।
વૈશ્યઃ સમાગતં દૃષ્ટ્વા સસ્ત્રીરત્નં સુવિસ્મિતઃ ॥

૧૬. યથાર્હં પૂજયામાસ પૃષ્ટ્વાનામયમવ્યયમ્ ।
ઉપવિષ્ટે સુવિશ્રાન્તે યુવાનં પ્રાહ તં ગૃહી ॥

૧૭. કસ્ત્વં કુતસ્સમાયાસિ કેન વા કિં ચિકીર્ષયા ।
કા વેયં તરુણી ભદ્રા ત્વયાનીતા વરાનના ॥

૧૮. નિશ્ચિતું ત્વાં ન શક્તોઽસ્મિ તેજો વૈ શિષ્યસમ્પદા ।
દેવો વા મનુજો વા ત્વં સિદ્ધો વેહ સમાગતઃ ॥

૧૯. સર્વં મે કથય તાત વક્તવ્યં યદિ ચેત્ ધ્રુવમ્ ।
ઇત્થં યુવા તેન પૃષ્ટઃ પ્રીતો વક્તું પ્રચક્રમે ॥

૨૦. તાત વૈશ્યોસ્મ્યહં જાત્યા સ્વસેયં તરુણી મમ ।
ધેનુદત્તાભિધાનસ્ય ચણ્ડીનગરવાસિનઃ ॥

૨૧. તનયં વિદ્ધિ માં ભદ્ર કન્ધરં નામ નામતઃ ।
પિતર્યુપરતે માતર્શેષવિપર્યયાત્ ॥

૨૨. અહં બલોઽપિ સૌહાર્દાત્ માતેવૈનામપોષયમ્ ।
અસ્યાં તુ વર્ધમાનાયાં બાલાયાં રૂપસમ્પદા ॥

૨૩. અયાચન્ત સમાગત્ય સર્વે કામાતુરા નરાઃ ।
એવં યાચત્સુ સર્વેષુ સાસૂયેષુ તતસ્તતઃ ॥

૨૪. અસ્મત્પિતૃષ્વસુઃ પુત્રો ધની પ્રાપ્ય માં સુહૃત્ ।
પત્ન્યર્થે વરયામાસ તસ્મૈ દત્તા મયા સ્વસા ॥

૨૫. ઉદ્વાહ્ય વિધિનૈવેનામુવાસ સદને મમ ।
પઞ્ચષટ્સ્વપયાતેષુ તતો માસેષુ સૂક્ષ્મધીઃ ॥

૨૬. મામાહૂય જગદેદં મદ્ભગિન્યાઃ પતિર્વચઃ ।
માતુલેયે સખે પથ્યમાવયોઃ શ્રૂયતાં વચઃ ॥

૨૭. સર્વે કુર્વન્તિ કર્માણિ નિત્યં વર્ણોચિતાન્યપિ ।
ઊરુજાનામિવાસ્માકં વૃદ્ધિર્નિયમિતા પુરા ॥

૨૮. કૃષિવાણિજ્યગોરક્ષા કુસીદૈરુપલક્ષિતા ।
તાં વૃદ્ધિં દૈવ વિહિતામપહાયૈવ વર્તિનોઃ ॥

૨૯. આવયોર્જીવનોપાયો ન ભૂયાત્ અન્યથા ક્વચિત્ ।
અતઃ ત્વયાત્ર વસ્તવ્યં ભગિનીં રક્ષતાનિશમ્ ॥

૩૦. ગૃહાત્ નાન્યત્ર ગન્તવ્યક્તમવ્યગ્રયા ગિરા(ધિયા) ।

અહં સમુદ્રયાનેન ગત્વા દ્વીપાન્તરં સખે ॥

૩૧. આનયિષ્યે ધનં ભૂરિ વણિક્સામર્થ્યવિધયા ।
ષણ્માસાત્ આગમિષ્યામિ નાત્ર કાર્યા વિચારણા ॥

૩૨. ઇત્યુક્ત્વા તં(તાં) સમાદિશ્ય પ્રિયામાશ્વાસ્ય સુવ્રતામ્ ।
સમન્વિતઃ સાર્થવાહૈઃ પ્રયયૌ ધૈર્યસમ્પદા ॥

૩૩. અતીતસમયે તસ્મિન્ સ્વસા મે પતિદેવતા ।
ભર્તર્યનાગતે ચેયં ન ભુઙ્ક્તે ન સ્વપિત્યસૌ ॥

૩૪. શોકમોહપરિભ્રાન્તા પ્રાણાન્ ત્યક્તું સમુદ્યતા ।
સ્નેહાત્ એનાં સમાનીય ત્વત્સમિપે નિધાય ચ ॥

૩૫. અપિ દ્વીપાન્તરં ગત્વા તમાનેતુમિહોત્સહે ।
દુષ્ટાઃ મમ પુરે સર્વે બદ્ધવૈરાશ્ચ પાપિનઃ ॥

૩૬. તેભ્યો ભીતઃ કામુકેભ્યઃ ગોપયન્ દારિકામિમામ્ ।
આગતોઽસ્મિ મહાભાગ ભવન્તં પિતરં યથા ॥

૩૭. ત્વામહં શરણં પ્રાપ્તઃ સવિત્રીમિવ બાલકઃ ।
ઇત્થમુચ્ચાવચૈર્વાક્યૈઃ પ્રીતિં ધર્મં ચ વર્ધયન્ ॥

૩૮. જગ્રાહ વૃદ્ધદમ્પત્યોઃ પદદ્વન્દ્વે રુદન્નિવ ।
વ્યાકુલીકૃતચિત્તસ્ય સ્વપાદે પતિતસ્ય ચ ॥

૩૯. સાનુકમ્પં શિરઃ સ્પૃષ્ટ્વા સમુત્થાપ્ય પ્રમોદયન્ ।
પાણિના પાણિમાલમ્બ્ય નિવેશ્ય સ્વાસને સુખમ્ ॥

૪૦. પ્રમૃજ્યાશ્રુકુલે નેત્રે સ્થવિરઃ પ્રત્યુવાચ તમ્ ।
તાત મા શોકમોહાભ્યાં જહીહિ ભયમુલ્બણમ્ ॥

૪૧. એતાવત્ અનપત્યોઽહં મગ્નશોકમહાર્ણવે ।
તારિતોઽહં ત્વયા નૂનં અનપત્યત્વપાતકામ્ ॥

૪૨. ત્વં મે પુત્રઃ પુત્રિકેયં દાયાદૌ મમ સમ્પદાત્ ।
ઇતિ તાવઙ્કમારોપ્ય મૂર્ધ્નુપાઘ્રાય દમ્પતી ॥

૪૩. અગ્નિસાક્ષિકમાભાષ્ય સુખં ઊષતુરાવૃતૌ ।
કતિચિત્ દિવસાન્ ઉષ્ય સંસ્થિતો વૈશ્યનનદનઃ ॥

૪૪. શ્રીકરં વૃદ્ધમાહૂય સનયં વાક્યમબ્રવીત્ ।
વૈશ્યનન્દનઃ –
અમ્બ તાત યુવાભ્યાં તુ મદભ્યાગમનાવધિ ॥

૪૫. અનપાયં પાલનીયા દારિકેયં સુદુઃખિતા ।
અહં દૂરતરં ગત્વા તં દૃષ્ટ્વા મિત્રસત્તમમ્ ॥

૪૬. સધનઃ પુનરાયાસ્યે માતુલેયેન સંયુતઃ ।
ઇતિ વૃત્તં સમાપૃચ્છ્ય નમસ્કૃત્ય પુનઃપુનઃ ॥

૪૭. આશ્લિષ્ય ચ સમાશ્વાસ્ય ભગિનીં સ્નેહવિક્લબઃ ।
કથઞ્ચિત્ સમનુજ્ઞાપ્ય સંપ્રતસ્થે હૃષ્ટવત્ ॥

૪૮. યા સા ભગવતી સર્વજનની પરદેવતા ।
કામાક્ષીતિ પુરાણેષુ પઠ્યતે બ્રહ્મવાદિભિઃ ॥

૪૯. તાં દેવતાં પ્રણમ્યાગ્રે પ્રાર્થયામાસ ભક્તિમાન્ ।
પ્રણતાપાયશમનીમનુકમ્પાતરઙ્ગિણીમ્ ॥

૫૦. ત્વામહં શરણં યામિ ત્રાહિ માં દુરિતાર્ણવાત્ ।
અમ્બ મદ્ભગિનીં દીનાં ભર્તારમનુશોચતીમ્ ॥

૫૧. ત્વામેવ શરણં પ્રાપ્તાં બાલાં પાલય શામ્ભવીમ્ ।
ઇતિ દેવીં નમસ્કૃત્ય યયૌ દ્વીપાન્તરં સુધીઃ ॥

૫૨. તતસ્સા વૈશ્યભગિની લાલિતાશ્વાસિતા પરમ્ ।
શુશ્રૂષન્તી ચ તૌ વૃદ્ધૌ દુર્ગામારાધયન્ત્યપિ ॥

૫૩. ચિન્તયન્તી ચ ભર્તારં નિનાયાહર્ગણાન્ ક્રમાત્ ।
ગતેષ્વહસ્સુ ગણ્યેષુ ચારા દૃષ્ટ્વા નૃપસ્ય તામ્ ॥

૫૪. ત્રિલોકીવનિતામૌલિમાલામાયતલોચનામ્ ।
રાજ્ઞો નિવેદયાઞ્ચક્રુઃ કૌતૂહલસમન્વિતાઃ ॥

૫૫. મહારાજ પુરે ચાસ્મિન્ અસ્માભિર્દૃષ્ટમદ્ભુતમ્ ।
તદેકાન્તતરં તુભ્યં વિજ્ઞાપયિતુમાગતાઃ ॥

૫૬. અનુકમ્પાવલોકસ્ય યદ્યસ્મિન્ મન્યસે પદમ્ ।
ઇત્થં બ્રુવત્સુ ચારેષુ સભ્રૂભઙ્ગાવલોકનૈઃ ॥

૫૭. સ વિભુઃ ચોદયામાસ પ્રવક્તું તત્કુતૂહલમ્ ।

તતઃ પ્રાઞ્જલિરભ્યેત્ય ચારો વાચમવોચત ॥

૫૮. વૈશ્યસ્ય કસ્યચિત્ ગેહે વર્તતે વનિતામણિઃ ।
તપ્તકાઞ્ચનસઙ્કાશાસંપ્રાપ્તનવયૌવના ॥

૫૯. આપાતકેશસૌન્દર્યસિન્ધુચન્દ્રકલા કિલ ।
લક્ષ્મીનિર્માણકૌશલ્યં પુનર્દર્શયતા ભુવિ ॥

૬૦. મહાયત્નો વિરિઞ્ચેન કથઞ્ચિદપિ નિર્મિતા ।
બહુનાત્ર કિમુક્તેન સંક્ષેપાત્ શ્રૂયતાં વિભો ॥

૬૧. સેયં સ્વર્ગાત્ આગતા વા દેવી નાગાઙ્ગનાપિ વા ।
રાજરાજૈકભોગ્યા સા ન યોગ્યાન્યસ્ય કસ્યચિત્ ॥

૬૨. નિશા યોજયતા ચન્દ્રં રમયા પુરુષોત્તમમ્ ।
દેવેન સાપિ ભવતા યોજનીયેતિ ચિન્ત્યતે ॥

૬૩. ઇતિ તસ્ય વચઃ શ્રુત્વા રાજા કામવશં ગતઃ ।
ભટૈરનેકસાહસ્રૈઃ ગત્વા વૈશ્યનિકેતનમ્ ॥

૬૪. જગ્રાહાતીવ રુદતીં નારીમણિમતલ્લિકામ્ ।
નીત્વા સ્વભવનં બાલામેકાન્તે સાન્ત્વયન્ નૃપઃ ॥

૬૫. લોભયામાસ વિવિધૈઃ મણિકાઞ્ચનભૂષણૈઃ ।
દિવ્યામ્બરૈઃ દિવ્યગન્ધૈઃ ભક્ષ્યભોજ્યરસાયનૈઃ ॥

૬૬. એવં રાજ્ઞા સમાલબ્ધપાણિના વરાઙ્ગના ।
શોકમોહભયાવિષ્ટા સદ્યઃ પ્રાણાન્ જહૌ તદા ॥

૬૭. ક્ષણાત્ પઞ્ચત્વમાપન્નાં બાલામુદ્વીક્ષ્ય ભૂપતિઃ ।
વિલલાપ સુદુઃખાર્તો વાર્યમાણોઽપિ બન્ધુભિઃ ॥

૬૮. ચિત્યાં ચન્દનકાષ્ઠેન સંસ્કર્તુમુપચક્રમે ।
શિબિકામતિરોપ્યૈનાં નીત્વા પિતૃવનં મહત્ ॥

૬૯. અગ્નૌ પ્રજ્વાલ્યમાને તુ ક્રોશમાને મુહુર્જને ।
અવતીર્યામ્બરાત્ કોઽપિ ભૂતઃ શાર્દૂલવિક્રમઃ ॥

૭૦. વિદ્રાવ્ય ગદયા દૂરં શૂરાન્ રાજભટાનપિ ।
ચિતામુદ્ધૂય તદ્દેહમાદાય નિમિષાદિવ ॥

૭૧. ઉત્પપાત ઘનચ્છન્નમાકાશં પશ્યતાં નૃણામ્ ।
વિસ્મયં પરમં જગ્મુઃ સર્વે તત્ર સમાગતાઃ ॥

૭૨. તૌ વૈશ્યવૃદ્ધૌ દુઃખાર્તૌ ચિન્તયાનૌ મુહુર્મુહુઃ ।
પુરાકૃતૈરસઙ્ખ્યાતૈઃ આવાં તુ સુકૃતેતરૈઃ ॥

૭૩. અનપત્યૌ હિ સઞ્જાતૌ હા કષ્ટં સમુપસ્થિતમ્ ।
કથં તુ વક્ષ્યે ભગિનીં પૃચ્છતે વૈશ્યસૂનવે ॥

૭૪. જીવિતું પાપિનાવાવાં દારુણૌ નોત્સહાવહે ।
ઇત્યુક્ત્વા પરિતો ગેહં ક્ષિપ્ત્વાગ્નિં જહૃતુઃ તનુમ્ ॥

૭૫. સ વૈશ્યસૂનુઃ સહિતો માતુલેયેન વિત્તવાન્ ।
આયયૌ વૈશ્ય સદનં ભગિન્યાઃ પ્રિયકૃત્ સુધીઃ ॥

૭૬. શ્રુત્વા પ્રિયેતરં વાક્યં હાલાહલમિવ સ્થિતમ્ ।
ભગિનીં ચ મૃતાં શ્રુત્વા વૃદ્ધાવગ્નિમુપેયુષૌ ॥

૭૭. નિરાશૌ જીવિતે તસ્મિન્ સાકં માતુલસુનુના ।
જ્વલત્યગ્નૌ વિચિક્ષેપ સ્વતનું તરુણવત્ યુવા ॥

૭૮. ઇત્થં સર્વેષુ નષ્ટેષુ પ્રેતે ચાકાશમેયુષિ ।
સંવિવેશાથ રાજાનં સ્ત્રીહત્તિર્દારુણાકૃતિઃ ॥

૭૯. ભર્ત્સયન્તી મુહુર્વાચા ભીષયન્તી પદે પદે ।
ક્ષુધાર્તોઽપિ નિરાહારો વિનિદ્રશ્રાન્તિમાનપિ ॥

૮૦. સંપ્રાપ શરણં રાજા કણ્વાખ્યં સ્વગુરું ઋષિમ્ ।
અજાનતા મયા બ્રહ્મન્ મદાવિષ્ટેન ચેતસા ॥

૮૧. પ્રાપ્તોઽસ્મિ દુર્દશામેનામપરાં યાતનામિવ ।
ત્રાહિ ઘોરતમાત્ પાપાત્ ત્વં હિ નઃ પરમાગતિઃ ॥

૮૨. એવં પદામ્બુજોપાન્તે દૃષ્ટ્વા નિપતિતં મુનિઃ ।
સાનુકમ્પં સમાશ્વસ્ય તચ્છાન્તિં વિદધે મુનિઃ ॥

૮૩. મુનિના તેન વિધિના હૂયમાનાત્ હુતાશનાત્ ।
દુર્ગામૂર્તિમુપાદાય વિચિત્રામુપલામયીમ્ ॥

૮૪. સમુત્તસ્થૌ મહાભૂતઃ કોઽપ્યદ્ભુતવપુર્મહાન્ ।
સ તં મુનિં સમાહૂય જગાદ ઘનનિસ્સ્વનઃ ॥

૮૫,ભૂતઃ –

ઇમામૂર્તિમુપાદાય તીર્થયાત્રાં કરોત્વસૌ ।
ઉદ્વહન્તમિમાં મૂર્તિં હત્તિરેષા ન બાધતે ॥

૮૬. યત્ર દ્રવતિ પુણ્યા તે મૂર્તિરેષા શિલામયી ।
તત્રોપશાન્તિઃ પાપસ્ય નાત્ર કાર્યા વિચારણા ॥

૮૭. ઇત્યુક્ત્વાન્તર્હિતે ભૂતે તદ્દત્તાં મુનિપુઙ્ગવઃ ।
કરે દદૌ મહીપસ્ય સોઽપિ જગ્રાહ તાં મુદા ॥

૮૮. પાણિભ્યામુદ્વહન્ મૂર્તિં રાજ્યં પુત્ર નિધાય ચ ।
ગુરુમામન્ત્ર્ય સન્નમ્ય નિશ્ચક્રામ પુરાત્ બહિઃ ॥

૮૯. પ્રતિપ્રયાતે ભૂપાલે સ્ત્રીહત્તિરપિદારુણા ।
અન્વધાવત્ અનાસન્ના વાચા ભર્ત્સ્યતી મુહુઃ ॥

૯૦. સ મૂર્તિહસ્તઃ તીર્થાનિ સ્નાત્વા સ્નાત્વા યયૌ વ્રતી ।
નિષેવ્ય ગઙ્ગાં યમુનાં સરયૂં ચ શરાવતીમ્ ॥

૯૧. ફલ્ગુનીં ગૌતમીં નન્દાં કપિલાં ચ મલાપહામ્ ।
ગોદાવરીં તુઙ્ગભદ્રાં શોણામિન્દુમતીમપિ ॥

૯૨. કાવેરીં ઘનકાન્તારાં કમ્પાં વેગવતીમપિ ।
ક્રમાદવાપ્ય ભૂપાલઃ તામ્રપર્ણીં સરિદ્વરામ્ ॥

૯૩. પદે પદે તીર્થમયીં તીરયોરુભયોરપિ ।
સુરેન્દ્રમોક્ષાત્ પ્રાગ્ભાગે સોમતીર્થાત્ તુ પશ્ચિમે ॥

૯૪. નદ્યાસ્તુ દક્ષિણે તીરે મહજનનિષેવિતે ।
ચકાર વિધિવત્ સ્નાનં રાજા તત્ બિમ્બમુદ્વહન્ ॥

૯૫. યદા મમજ્જ સલિલે સંસ્તુવન્ મલયાત્મજામ્ ।
તદા તત્પાણિપદ્મસ્થા મૂર્તિરેષા શિલામયી ॥

૯૬. દ્રવીભૂતાભવત્ રાજન્ સર્વેષાં પશ્યતાં નૃણામ્ ।
તદદ્ભુતમસૌ દૃષ્ટ્વા તીરમારુહ્ય સત્વરમ્ ॥

૯૭. તદા શાપાસ્તમલિનં સ્વં વપુઃ પૂર્વવત્ શુભમ્ ।
પૃષ્ઠતઃ પરિધાવન્તીં ન દદર્શ પિશાચિકામ્ ॥

૯૮. પરમાનન્દસન્દોહમાનન્દાશ્રુપરિપ્લુતઃ ।
રોમાઞ્ચમઞ્જુલાકારં મહીપાલમુપેત્ય તુ ॥

૯૯. વામદેવો મુનિઃ પ્રાહ સાન્ત્વપૂર્વમિદં વચઃ ।
વામદેવઃ –
કિં ત્વયા રાજશાર્દૂલ દૃષ્ટમદ્ભુતદર્શનમ્ ॥

૧૦૦. યદિ વક્તવ્યમસ્માકં વદ શુશ્રૂષવે મમ ।
પૃચ્છત્યેવં મુનિશ્રેષ્ઠે બદ્ધાઞ્જલિપુટો નૃપઃ ॥

૧૦૧. જગાદ વચનં શ્લક્ષ્ણં વિસ્મિતેનાન્તરાત્મના ।
રાજા –
કૃત્વા પાપાત્મના યેન મયા પાપમજાનતા ॥

૧૦૨. દુઃખેન પૃથિવીં કૃત્સ્નાં પરં પર્યટતા ચિરમ્ ।
સ્મૃત્વા સ્મૃત્વા પ્રહૃષ્યામિ દૃષ્ટ્વા ચન્દ્રમિવામ્બુધિઃ ॥

૧૦૩. ઇતિ ભૂપવચઃ શ્રુત્વા વામદેવોઽબ્રવીત્ વચઃ ।
વામદેવઃ –
અત્રાશ્ચર્યં ન પશ્યામિ તવ પાપવ્યપોહને ॥

૧૦૪. કૃત્વેદન્નયનાદિત્યતીર્થં પરમપાવનમ્ ।
અપિ બ્રહ્મહણો મુક્તાઃ પ્રયાન્તિ પરમાં ગતિમ્ ॥

૧૦૫. પુરા પરામૃતાકારા જગતી જનની શિવા ।
આવિર્ભૂતામ્બરાત્ આદિતરુણી ભીમદર્શના ॥

૧૦૬. નાનાયુધધરા ભૂરિ શક્તિસેનાસમાવૃતા ।
દૈત્યદાનવસઙ્ઘાતાન્ મહિષાદીન્ સુદારુણાન્ ॥

૧૦૭. અસઙ્ખ્યાતાન્ નિહત્યાજૌ વિધાય જગતાં હિતમ્ ।
આસુરાસ્ત્રસમાલીઢં સન્તપ્તં સ્વકલેવરમ્ ॥

૧૦૮. અત્ર સ્નાત્વા મહાતીર્થે સુખયામાસ વિશ્વસૂઃ ।
તદાદિપરમાદુર્ગા સર્વદુર્ગાર્તિહારિણી ॥

૧૦૯. કુરુતે નિત્યસાન્નિધ્યં ભક્તાનાં હિતકામ્યયા ।
ત્વમભ્યર્ચ્ય તાં દેવીં રાજન્ કામદુધામિમામ્ ॥

૧૧૦. ઇતિ તત્ વચનાત્ રાજા તત્ર મૂર્તિં વિહાય સઃ ।

પૂજયિત્વા વિધાનેન સ્તુત્વા સ્તોત્રૈરનેકશઃ ॥

૧૧૧. તત્પ્રસાદમનુપ્રાપ્ય વરાન્ ભુવનદુર્લભાન્ ।
ભસ્મીભૂતાન્ તતો વૈશ્યાન્ પુનરુજ્જીવ્ય તાં વધૂમ્ ।
તૈસ્સાર્ધં બન્ધુભિઃ સ્નિગ્ધૈઃ સંપ્રાપ નગરીં નિજામ્ ॥

ઇતિ ત્રયસ્ત્રિંશોઽધ્યાયઃ ।   Pro.Total = 2720 + 111 = 2831.

## ચતુસ્ત્રિંશોઽધ્યાયઃ

દુર્ગાપ્રતિષ્ઠા – રાજ્ઞા વરપ્રદાનમ્ – મણિગ્રીવપુરકથાપ્રશ્નઃ ।

૧. વીરસેનઃ –
બ્રહ્મન્ શ્રુતેયં કથિતા કથા કલિમલાપહા ।
માહાત્મ્યદર્શની માતુઃ દુર્ગાયાઃ પરમાદ્ભુતા ॥

૨. અત્ર શ્રોતવ્યમસ્માકં મહાયોગીન્દ્ર મદ્ગુરો ।
કથામારાધયામાસ કયા સ્તુત્યાપ્યતોષયત્ ॥

૩. કથમગ્નૌ મૃતા વૈશ્યા સા ચતન્વી વરાઙ્ગના ।
પુનર્જીવન્તિ તત્ સર્વં યથાવત્ કથયસ્વ મે ॥

૪. શઙ્ખઃ –
રાજન્ કથયતો મત્તઃ કથાં શ્રુણુ યથાતથમ્ ।
પઠનાત્ શ્રવણાત્ યસ્માત્ નરઃ પાપૈઃ પ્રમુચ્યતે ॥

૫. સોઽગ્નિવર્ણો નરપતિઃ વામદેવેન બોધિતઃ ।
તત્ર દેવીં પ્રતિષ્ઠાપ્ય તામ્રાયાઃ દક્ષિણે તટે ॥

૬. નાનોપહારબલિભિઃ પૂજયામાસ મન્ત્રવિત્ ।
ધૂપૈઃ દીપૈઃ ચ નૈવેદ્યૈઃ મન્ત્રપુષ્પોપહારકૈઃ ॥

૭. પૂગનાગદલૈઃ પુણ્યૈઃ કર્પૂરારાર્તિકૈરપિ ।
મહાયાગક્રમૈઃ કૃત્વા બ્રહ્મજ્ઞૈઃ બ્રાહ્મણૈસ્સહ ॥

૮. પ્રદક્ષિણનમસ્કારૈઃ કાલીં સન્તોષ્ય ચણ્ડિકામ્ ।
તુષ્ટાવ પ્રાઞ્જલિઃ તિષ્ઠન્ સ્તોત્રેણાનેન ભૂપતિઃ ॥

૯. અગ્નિવર્ણઃ –
જગદ્દેવિ જગદ્ધાત્રિ દૈત્યદાનવહારિણિ ।

જય જમ્ભાન્તકનુતે વિશીર્ણવિમદોદયે ॥

૧૦. માતઃ પ્રસીદ ચામુણ્ડે દણ્ડિતાશેષદાનવે ।
દુર્ગે દુર્ગાર્તિમથને માતર્મયિ દયાં કુરુ ॥

૧૧. હરનારાયણમુખૈરમરૈરભિવાદિતે ।
મયિ પ્રસીદ વિશ્વેશિ વિશ્વરક્ષાવિચક્ષણે ॥

૧૨. માયે માયાવહે માતઃ મઙ્ગલાનાં ચ મઙ્ગલે ।
ત્રાહિ ત્રાહિ ભયત્રસ્તં સંસારાર્ણવસમ્પ્લવાત્ ॥

૧૩. સ્વભાવકરુણાપૂરતરઙ્ગિતવિલોચને ।
વઞ્ચિતાસુરસઙ્ઘાતે વરદા મે ભવામ્બિકે ॥

૧૪. ત્વદપાઙ્ગલોકાં ચ કલયા યે પરિષ્કૃતાઃ ।
ઉભયત્રાપિ તે ધન્યાઃ ત્વમતો મે ગતિર્ભવ ॥

૧૫. ત્વામાહુઃ કમલાં દુર્ગાં શ્રુતયો ભારતીમુમામ્ ।
પ્રભામર્કેન્દુવહ્નીનાં ત્વમતો મે ગતિર્ભવ ॥

૧૬. ત્વયા તતમિતં સર્વં હેતુશક્તિઃ ત્વમેકિકા ।
ત્વયા સઞ્જીવિતં માતઃ ત્વમતો મે ગતિર્ભવ ॥

૧૭. ત્વં ત્રયી ત્રિપદી ત્વં હિ હવિર્હવ્યવહઃ ક્રતુઃ ।
ઇજ્યા ત્વં યજમાન ત્વં ત્વમતો મે ગતિર્ભવ ॥

૧૮. અમ્બ પ્રસીદ પરમેશ્વરિપારિજાતવલ્લીમુશન્તિ વચનાનિ મુહુઃ શ્રુતીનામ્ ।
પાદામ્બુજદ્વયપરાગપરાયણાનાં તાં ત્વાં વ્રજામિ શરણં ભવ સુપ્રસન્ના ॥

૧૯. ઇત્થં સ્તુતા સ્વપાદાબ્જસંસક્તાશેષવૃત્તિનઃ ।
રાજ્ઞઃ પ્રાદુરભૂદગ્રે તદ્બિમ્બાદમ્બુજારુણા ॥

૨૦. ચતુર્ભુજા ચન્દ્રચૂડા મણિકાઞ્ચનભૂષણા ।
શઙ્ખચક્રગદાભીતિકરા કૌસુમ્ભશારિકા ॥

૨૧. સ્તૂયમાના મુનિગણૈ ; દેવદાનવગુહ્યકૈઃ ।
વત્સેતિ વાચા રાજાનં હર્ષયન્તી મુહુર્મુહુઃ ॥

૨૨. મેઘદુન્દુભિરાવિણ્યા ગિરામું વ્યાજહાર સા ।
અનયા પૂજયા સ્તુત્યા પ્રીતાસ્મ્યાગમસારયા ॥

૨૩. કામાનિષ્ટાન્ પ્રદાસ્યામિ વૃણુ મત્તો મનીષિતમ્ ।
રાજા –
અમ્બ પાપસમાચારે મયિ તે કરુણેદૃશી ॥

૨૪. શ્રુતિમૃગ્યાપિ મે ચર્મલોચનસ્યાપિ ગોચરા ।
યદિ યે તસ્માત્ વરો ભૂયાત્ કિમસ્તિ ભુવનત્રયે ॥

૨૫. તથાપિ કાઙ્ક્ષણીયા મે ત્વયિ ભક્તિઃ સનાતની ।
કિઞ્ચાનીતિમત્તોઽસ્મત્તો બહવો વિપદં ગતાઃ ॥

૨૬. તાનહં દ્રષ્ટુમિચ્છામિ પ્રસાદાત્ અમ્બ તે પુનઃ ।
અત્રાપિ મજ્જતાં તીર્થે મર્ત્યાનામનુગૃહ્ણધી ॥

૨૭. સાન્નિધ્યં કુરુ સન્તુષ્ટા તૃતીયોઽયં વરો મમ ।
ઇતિ સંપ્રાર્થિતા તેન પ્રસન્ના પરમેશ્વરી ॥

૨૮. સ્મિતજ્યોત્સ્નામુદ્ગિરન્તી મુક્તાવૃષ્ટિમિવોજ્જ્વલામ્ ।
અપાઙ્ગરોચિષોત્ફુલ્લનીલોત્પલતતિં યથા ॥

૨૯. દયાસિન્ધુતરઙ્ગાભે સુધામુદ્ભાવ્ય ચોપરિ ।
મન્દમાન્દોલિતોત્તંસચન્દ્રં કલયતી કરૈઃ ॥

૩૦. વ્યાજહાર ગિરા ભૂયો રાજાનં પ્રીતિપૂર્વકમ્ ।
દેવી –
યથાત્થ વચનં તાત ત્વં તથા ભવિતા ચ તત્ ॥

૩૧. સ્તુતિપૂજાનમસ્કારતીર્થપ્રાશનભક્તિભિઃ ।
સન્તુષ્ટાહં તવાભીષ્ટાન્ ઐચ્છિકી વોપપાદયે ॥

૩૨. મા વિસ્મર મહીપાલ નિત્યં મદનુશાસનમ્ ।
નિત્યં સાન્નિધ્યકરિણીમનુકમ્પાતટસ્થિતામ્ ॥

૩૩. કાઞ્ચ્યાં મામર્ચયન્ ભદ્રાણ્યશ્નુહ્યબ્દાન્ પરશ્શતાન્ ।
અન્તે તવ પ્રદાસ્યામિ સાયુજ્યમતિદુર્લભામ્ ॥

૩૪. અગ્નૌ મૃતાઃ ચ સા તન્વી સમાગચ્છત્યનામયા ।
સન્તુ ભદ્રાણિ સર્વેષાં ઇત્યુક્ત્વા તત્ર ચણ્ડિકા ॥

૩૫. સ્વપાણિપલ્લવસખીં શક્તિં ઘણ્ટાશતોજ્જ્વલામ્ ।
ક્ષિપ્ત્વા નદ્યાસ્તટે તાવત્ ક્ષણાત્ અન્તરધીયત ॥

૩૬. તચ્ચક્તિકોટિનિર્ભિન્નાત્ મહીભાગાત્ મહીપતે ।
સમુત્તસ્થૌ વૈશ્યસુતા ભોગિરાજવધૂરિવ ॥

૩૭. તત્ગર્તાત્ કન્દરાખ્યશ્ચ માતુલેયેન સંયુતઃ ।
ઉત્પેતતુઃ વૈશ્યવૃદ્ધૌ શાન્તિધર્માવિવ સ્વયમ્ ॥

૩૮. રાજ્ઞા સમ્ભાવિતાઃ સર્વે મુક્તશોકાઃ તદાભવન્ ।
સોગ્નિવર્ણઃ મહીપાલઃ તાનાશ્વાસ્ય મુહુર્મુહુઃ ॥

૩૯. તૈઃ સાકમનુપ્રાપ્ય તત્રત્યાંશ્ચ મહામુનીન્ ।
પુનઃપુનશ્ચ તત્તીર્થમતિથીકૃત્ય નેત્રયોઃ ॥

૪૦. પ્રણમ્ય શિરસા રાજા મલયં મલ્યાત્મજામ્ ।
નમોઽસ્તુ કુમ્ભજાયેતિ ભૂયો ભૂયશ્ચ સંસ્તુવન્ ॥

૪૧. પ્રતસ્થે સ્વપુરીં રમ્યાં કાઞ્ચીં કનકમણ્ડિતામ્ ।
પ્રત્યુદ્યતા પૌરજનૈઃ મન્ત્રિસેનાધિનાયકૈઃ ॥

૪૨. પ્રવિશ્ય નગરીં રમ્યામભિવાદ્ય ગુરું નિજમ્ ।
આસસાદ ગૃહં ભૂરિ મણિકાઞ્ચનભૂષિતમ્ ॥

૪૩. પ્રણતં સમ્પરિષ્વજ્ય સ્વસુતં રાજસત્તમઃ ।
સ્વરાજ્યં પાલયામાસ ધર્મેણ મઘવા યથા ॥

૪૪. તે ચ વૈશ્યવરા રાજન્ રાજ્ઞાનેનાભિપૂજિતાઃ ।
સુખમૂષુઃ સુસંહૃષ્ટાઃ તસ્મિન્નેવ પુરોત્તમે ॥

૪૫. તત્ર દુર્ગા ભગવતી ભક્તદુર્ગાર્તિહારિણી ।
અદ્યાપિ કૃતસાન્નિધ્યા તામ્રપર્ણ્યાસ્તટે શુભે ॥

૪૬. પાલયત્યનુરાગેણ ભુવનાનિ ચતુર્દશ ।
આજ્ઞયા જગદમ્બાયાઃ તીર્થાનામપિ કોટયઃ ॥

૪૭. ચક્રિરે નિત્યસાન્નિધ્યં લોકાનામઘશાન્તયે ।
પ્રાણત્યાગાત્ વરં મન્યે તીર્થં સઙ્ગ્રામમૂર્ધનિ ॥

૪૮. અસ્ત્રશસ્ત્રભયં નાસ્તિ ગતિશ્ચાપ્યનિવર્તની ।
વિસ્તરાત્ તસ્ય તીર્થસ્ય માહાત્મ્યં વત્સરાયુતૈઃ ॥

૪૯. વાગીશોઽપિ ન શક્તઃ સ્યાત્ કિં પુનર્ભુવિમાનવૈઃ ।
તસ્માત્ ઉત્તરતો રાજન્ મણિગ્રીવપુરાભિતમ્ ॥

૫૦. સ્થલં મયા પુરા પ્રોક્તં સ્મરણાત્ મુક્તિદં નૃણામ્ ।
તસ્ય માહાત્મ્યમધુના વિસ્તરાત્ શ્રોતુમર્હસિ ॥

૫૧. ભદ્રારણ્યે કામપુરં પ્રશસ્તં ભુવનત્રયે ।
દર્શનાત્ કીર્તનાત્ અસ્ય નરઃ પાપૈઃ પ્રમુચ્યતે ॥

૫૨. પુરા કુબેરતનયો મણિગ્રીવ ઇતિ શ્રુતઃ ।
ધરાવત્યાઃ સુતો રાજન્ કુસુમાયુધસુન્દરઃ ॥

૫૩. ગન્ધર્વઃ શ્રાન્તઃ શાપેન દેવભોગવિવર્જિતઃ ।
પ્રાપ્ય કામપુરં પુણ્યં સ્નાત્વા તીર્થે સભાર્યયા ॥

૫૪. નિર્મુક્તશાપઃ સંપ્રાપ્તઃ સર્વસૌભાગ્યસૌભગઃ ।
પૂજ્યમાનઃ સિદ્ધગણૈઃ અલકામભ્યગાત્ પુનઃ ॥

૫૫. સૂતઃ –
ઇત્થમાકર્ણ્ય માહાત્મ્યં કથિતં શઙ્ખયોગિના ।
વીરસેનો મહાતેજાઃ પુનઃ પપ્રચ્છ વિસ્મિતઃ ॥

૫૬. ભગવન્ યોગિનાં શ્રેષ્ઠ સર્વાગમનિધે ગુરો ।
કિઞ્ચકાર કુબેરસ્ય તનયઃ પાપમુલ્બણમ્ ॥

૫૭. કથં શશાપ ગન્ધર્વઃ તનયં કેન હેતુના ।
કથં ભદ્રાટવીં પ્રાપ સ્નાનં ચક્રે યથા જલે ।
એતત્ સર્વમશેષેણ વિસ્તરાત્ વક્તુમર્હસિ ॥

૫૮. ઇત્થં સાદરમર્થિતોઽવનિભુજા શઙ્ખઃ સતામગ્રણીઃ-
આનન્દાશ્રુશરાવિલાવપિ દૃશાચાવામૃજ્ય પાણ્યઞ્જલાત્ ।
મન્દં ગદ્ગદયા ગિરા સમધુરં પીયૂષધારાયિકાં-
ગાથામાહ મુનીરિતાં કલિમલપ્રધ્વંસનપ્રસ્તુતામ્ ॥

ઇતિ ચતુસ્ત્રિંશોઽધ્યાયઃ । Pro.Total = 2831 + 58 =2889.

## પઞ્ચત્રિંશોઽધ્યાયઃ

મણિગ્રીવકથા – મણિગ્રીવશાપવિમોચન મ્ ।

૧. શ્રીસૂતઃ –

તતઃ શઙ્ખો મહાયોગી રાજાનં સંપ્રહર્ષયન્ ।
કથાં વિસ્તારયામાસ જ્યોત્સ્નામિવ નિશાકરઃ ॥

૨. શઙ્ખયોગી –
વીરસેન મહાબાહો શ્રુણુ પુણ્યામિમાં કથામ્ ।
શ્રવણાનન્દિની સર્વજનતાપાપહારિણી ॥

૩. સાવર્ણિકે મનૌ ભૂમિમનુશાસતિ પુષ્કલામ્ ।
પુત્રો વૈશ્રવણસ્યાસીત્ મણિગ્રીવ ઇતિ શ્રુતઃ ॥

૪. દ્વિતીયઃ સર્વધર્મજ્ઞઃ સમ્પદઃ તત્ત્વદર્શિનામ્ ।
કરુણાભાજનં શમ્ભોઃ હેરમ્બસ્કન્દયોઃ સુહૃત્ ॥

૫. સ એકદા મુદાયુક્તઃ સાનુજીવિ જનાવલિઃ ।
ઉપત્યકાટવીમાપ ધારાદ્રેઃ અક્ષિકૌતુકમ્ ॥

૬. વસન્તલક્ષ્મીઃ સાન્નિધ્યં વિનિદ્રસ્તબકદ્રુમામ્ ।
સ્યન્દમાનમરન્દૌઘચમત્કારિતદુર્દિનામ્ ॥

૭. ઉત્ફુલ્લકમલામોદવાતપોતવિહારિણીમ્ ।
ફલભારસમાક્રાન્તરસાલકદલીકુલામ્ ॥

૮. મત્તભ્રમરસન્નાદાં મઞ્જુકોકિલકૂજિતામ્ ।
નાનાતરુલતાકીર્ણાં નવકાસારશીતલામ્ ॥

૯. ઇત્થમભ્યુદયાકારામરણ્યાનીમુપાગતઃ ।
દદર્શ શરદુત્ફુલ્લરાજીવરમણીયકામ્ ॥

૧૦. સ્વચ્છન્દનીલસશ્રીકસલિલાપૂરિતોદરામ્ ।
હંસસારસસઙ્ઘુષ્ટામગાધામમ્બુરાશિવત્ ॥

૧૧. વાપીં કનકપર્યન્તામનન્તમણિમૌક્તિકામ્ ।
શઙ્ખશુક્તિશતાકીર્ણાં શરચ્ચન્દ્રાંશુશીતલામ્ ॥

૧૨. તાં દૃષ્ટ્વા સમ્ભ્રમાવિષ્ટો મણિગ્રીવઃ સકિઙ્કરૈઃ ।
ઉપસ્પૃશ્ય જલં શુદ્ધમપનીય શ્રમં પુનઃ ॥

૧૩. વિજહાર તદભ્યાશે વિપિનાનિ વિલોકયન્ ।
તત્ર ગન્ધર્વરાજસ્ય ચિત્રસેનસ્ય કન્યકા ॥

૧૪. લીલવતીતિ વિખ્યાતા કામાસ્ત્રકલિકા યથા ।

સખીજનસમાયુક્તા મજ્જનાય સમાયયૌ ॥

૧૫. કાપિ તસ્યાઃ પુરઃ કમ્બુકણ્ઠી કનકપાટલા ।
સખ્યાદિષ્ટા સમાહર્તું કુસુમાનિ વનાન્તરે ॥

૧૬. યદૃચ્છયા પુષ્પવને સઞ્ચરન્તી તતસ્તતઃ ।
દદર્શાચામ્ભોજનયનં મણિગ્રીવં ઘને વને ॥

૧૭. નવકન્દર્પલાવણ્યં યુવાનં ધનદાત્મજમ્ ।
અક્ષિલક્ષ્યં ઇમં કૃત્વા વિદ્ધાભૂત્ કુસુમાયુધૈઃ ॥

૧૮. અશક્તા સોઢુમસ્ત્રસ્ય નિપાતં પુષ્પધન્વનઃ ।
તત્સમીપમુપાવૃત્ય વિનીતા વાક્યમબ્રવીત્ ॥

૧૯. કન્યા વીરસુન્દર દાસ્યસ્મિ વિજ્ઞાપ્યં શ્રૂયતાં મમ ।
અહં ગન્ધર્વરાજસ્ય કુમ્ભનાદસ્ય કન્યકા ॥

૨૦. ચિત્રલેખેતિ વિખ્યાતા ગાનવિદ્યાવિનોદિની ।
લીલાવત્યાઃ પ્રિયસખી ત્વાં દૃષ્ટ્વા લોકસુન્દરમ્ ॥

૨૧. પરાધીનાસ્મિ કામેન ત્વયિ નાથે સમેયુષિ ।
ઇયન્તં કાલમન્યસ્ય કસ્યાપિ ન પરિગ્રહા ॥

૨૨. નાઙ્ગીકરોષિ માં યત્ ત્વં પ્રાણાન્ ત્યક્ષ્યામ્યસંશયમ્ ।
ઇતિ બ્રુવાણાં તાં કન્યાં કન્દર્પસ્યાપિ મોહિનીમ્ ॥

૨૩. સાનુરાગમુવાચેદં મણિગ્રીવઃ પ્રસાદયન્ ।
મણિગ્રીવઃ –
અસ્તુ ભદ્રમહો સુભ્રુ કાઙ્ક્ષણીયં પ્રિયં મમ ॥

૨૪. બાલ્યે પિતૃવશા નારી પ્રૌઢા ભર્તૃવશે સ્મૃતા ।
પુત્રાધીના હિ વાર્ધક્યે ન સ્ત્રી સ્વાતન્ત્ર્યમર્હતિ ॥

૨૫. પિતૃદત્તા તતો ભૂયઃ વલ્લભા તે ન સંશયઃ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય ચિત્રલેખા મુદાન્વિતા ॥

૨૬. પુનઃ પ્રીતિકરં ચાસ્ય વચનં ધનદાત્મજમ્ ।
યુક્તં ધર્મજ્ઞ ભવતા કથિતં તત્ તથા ભવેત્ ॥

૨૭. યાવત્ પિત્રા ગમિષ્યામિ સુહૃદાહં સુહૃત્જનૈઃ ।
તાવત્ અત્રૈવ ભવતા વસ્તવ્યં ધર્મવેદિના ॥

૨૮. ઇત્યામન્ત્ર્ય મણિગ્રીવં સા યયૌ અમરાવતીમ્ ।
સકુમ્ભનાદો ગન્ધર્વરાજા વિજ્ઞાય કાઙ્ક્ષિતમ્ ॥

૨૯. સ્વપુત્ર્યાઃ પ્રતિનન્દ્યાત્મવલ્લભાભિસ્સમન્વિતઃ ।
બન્ધુભિશ્ચ મહાતેજાઃ સુતામાદાય સત્વરમ્ ॥

૩૦. આસસાદ હરાવાસશિખરીસાનુકાનનમ્ ।
તાવત્ સ્વપુત્રાભ્યુદયં પારયિષ્ણુઃ ધનેશ્વરઃ ॥

૩૧. સાનન્દં બન્ધુસમ્પન્નઃ તદુદ્યાનમુપાગમત્ ।
એવં તે મિલિતાઃ તત્ર યક્ષગન્ધર્વગુહ્યકાઃ ॥

૩૨. ચક્રુઃ મહોત્સવં હૃષ્ટાઃ પુરસ્કૃત્ય પુરોહિતમ્ ।
ઉદ્વાહોચિતનેપથ્યવિદ્યોદિતતવપુઃશ્રિયા ॥

૩૩. મણિગ્રીવો હવીમ્ષ્યગ્નૌ જુહાવ ગુરુણેરિતઃ ।
કુમ્ભનાદઃ સ્વતનયામલઙ્કૃત્ય સકૌતુકામ્ ॥

૩૪. દાતુમસ્મૈ સદસ્યસ્મિન્વરાન્તિકમુપાગમત્ ।
એતત્ શ્રુત્વા ચિત્રસેનસુતા લીલાવતી તદા ॥

૩૫. અભ્યભાષત સંપ્રાપ્ય મણિગ્રીવમિદં વચઃ ।
લીલાવતી –
અયે સર્વજ્ઞ સૌન્દર્યસુધાસિન્ધો ધનેશ્વર ॥

૩૬. અનયા સહ માં પાણૌ અનુરક્તાં ગૃહાણ ભો ।
યદિ નાઙ્ગીકરોષિ ત્વામનુરક્તાં ગુણશ્રિયમ્ ॥

૩૭. ન હિ તારયિતું શક્તાસ્મ્યસૂનત્ર પરાનિવ ।
ગુણશીલકુલાભિખ્યા વિદ્યદ્રવિણસમ્પદા ॥

૩૮. તુલ્યં જાનીહિ માં ભદ્ર મા કૃથાઃ મઙ્ગલચ્છિદમ્ ।
ઇતિ સઞ્જલ્પિતં તસ્યાઃ બહુમાન્ય પુનઃપુનઃ ॥

૩૯. ભૂયઃ સાનુનયં પ્રાહ સુસ્મિતો ધનદાત્મજઃ ।
ભદ્રે ભદ્રમિદં વાક્યં ભવત્યા યત્ ઉદીરિતમ્ ॥

૪૦. શ્રૂયતાં વચનં ધર્મ્યં બન્ધુનામપિ સમ્મતમ્ ।
ગુહ્યકસ્ય ચ યક્ષસ્ય બલિનો યક્ષભૂપતેઃ ॥

૪૧. પુત્રઃ પુરઞ્જયો નામ્ના નિધિઃ સૌન્દર્યસમ્પદામ્ ।
સુહૃદસ્માકમધિકઃ પ્રાણાદપિ ધનાદપિ ॥

૪૨. તદર્થે સમ્ભૃતા ત્વં હિ બન્ધુભિશ્ચાનુમોદિતા ।
અતો ન યુક્તમસ્માકં તવ ભદ્રે પરિગ્રહમ્ ॥

૪૩. ત્વત્પિત્રોરપિ સમ્ભાવ્યં નાન્યથા કર્તુમર્હસિ ।
યા કન્યા પિતૃગેગસ્થા તદાજ્ઞાપરિલઙ્ઘિની ॥

૪૪. કુલાદી કથ્યતે સદ્ભિઃ નાપવાદોઽસ્તુ તે ધ્રુવમ્ ।
સુહૃદ્ભાર્યાપહારીતિ માં ન શંસન્તુ બાન્ધવાઃ ॥

૪૫. ઇત્થં નૈરાશ્યજનનીં વાણીમાકર્ણ્ય સા વધૂઃ ।
ચિન્તાજાલપરિભ્રાન્તા ભૂયો વચનમાદદે ॥

૪૬. ભવાન્ ન ગૃહ્ણન્ મત્પાણિં વોઢુમેનાં પટુર્નહિ ।
યદિ મામપહાયાત્ર ચિત્રલેખાં વહસ્યસે ॥

૪૭. શાપોઽત્ર ભવિતા નૂનં મા કૃથાઃ સાહસં ભવાન્ ।
પ્રથમા ચિત્રલેખેયં દ્વિતીયાહં પ્રિયા તવ ॥

૪૮. ઇતિ પાઠમસઞ્જાતસ્ફુલિઙ્ગાક્ષરભીષણામ્ ।
વાણીમસહમાનાભ્યાં કર્ણાભ્યાં કમ્પયન્ શિરઃ ॥

૪૯. મણિગ્રીવઃ પુનઃ પ્રાહ કોપારુણિતવિલોચનઃ ।
કિમિદં સાહસં પાપે કર્તુમિચ્છસિ કર્કશે ॥

૫૦. ન કરિષ્યામ્યહં પાપે મિત્રદ્રોહમિદં ખલુ ।
ભૂયો યદ્યનયં વાક્યં વક્તુમિચ્છસિ ગર્વિતે ॥

૫૧. ઉત્સારયે સંસદોઽસ્માત્ ત્વં શુનીમિવ ચાધ્વરે ।
લીલાવતી –
અનુરક્તાં કામુકીં મામનન્યગતમાનસામ્ ॥

૫૨. નાઙ્ગીકરોષિ દુર્બુદ્ધે વિડ્વરાહ ઇવાસૃજમ્ ।
તસ્માત્ ત્વમનયા સાર્ધં કુરૂપો ભવ સત્વરમ્ ॥

૫૩. દેવભોગવિહીનઃ ચ તીર્થબાહ્યઃ ચિરં ભવાન્ ।
મણિગ્રીવઃ –
બન્ધુદૂષણિ દુર્દાન્તે ગન્ધર્વકુલપાંસનિ ॥

૫૪. અચિરાત્ આશ્વઘગ્રસ્તા કુરૂપા ચ ભવિષ્યસિ ।
ઇત્થમન્યોન્ય શાપેન પ્રાસાદસ્મરરૂપિણૌ ॥

૫૫. નિશ્રીકૌ નિષ્પ્રભૌ જાતૌ સર્વેષામેવ પશ્યતામ્ ।
તત્ બાન્ધવાશ્ચ સખ્યશ્ચ શોકાક્રાન્તા તદાભવન્ ॥

૫૬. અપશ્યન્તૌ ચ શાપાન્તં ભ્રમમાણૌ વિહઙ્ગવત્ ।
હેરમ્બઃ કૃપયાભ્યેત્ય સાન્ત્વયિત્વા સુહૃત્તયા ॥

૫૭. ઇદમાહ મણિગ્રીવં પ્લવમાનમિવાર્ણવે ।
સખે મા શોકમોહાભ્યાં ભવિતવ્યે સ્વકર્મભિઃ ॥

૫૮. નિષ્કૃતિં કથયિષ્યામિ શાપસ્યાસ્ય મહામતે ।
સમં લોક હિતાર્થાય દેવી શૈલેન્દ્રકન્યકા ॥

૫૯. સ્વયં તીર્થસ્વરૂપેણ તામ્રપર્ણીતિ વિશ્રુતા ।
પ્રવાહત્યભિનવા સુધાસારા પયસ્વિની ॥

૬૦. યદમ્બુકણિકાપાનાત્ જન્તુઃ કૈવલ્યભાગ્ ભવેત્ ।
તત્રાભ્યાં સહિતો યાહિ ધ્યાયન્ માં ભૈરવં શિવમ્ ॥

૬૧. પ્રાપ્યાનુજ્ઞાં ભૈરવાત્ ત્વં સ્નાનં કુરુ મહામતે ।
તાવતા મુક્તશાપસ્ત્વં ભૂયઃ પ્રકૃતિમેષ્યસિ ॥

૬૨. એતે તરુણ્યૌ ગન્ધર્વકન્યે તત્તીર્થમજ્જનાત્ ।
શાપાત્ વિમુક્તે ત્વદ્ભાર્યે ભવેતાં નાત્ર સંશયઃ ॥

૬૩. ઇત્થમાશ્વાસ્ય ભગવાન્ હેરમ્બો ધનદાત્મજમ્ ।
સ્વશુણ્ડતલયોદ્ધૃત્ય તાભ્યાં સહ સુહૃત્તમમ્ ॥

૬૪. પુષ્પવત્ નિદધે તામ્રારોદસ્યખિલપાવને ।
ઉપદિશ્ય રહસ્યં ચ તસ્ય સખ્યુર્ગણાધિપઃ ॥

૬૫. અન્તર્દધે ક્ષણાદેવ ભાસ્વાન્ ઇવ ઘનચ્છદે ।
તાભ્યાં શાપાભિભૂતાભ્યાં વધૂભ્યામુપસંશ્રિતઃ ॥

૬૬. યક્ષરાજસુતો ધીમાન્ શોકમન્તે નિગૃહ્ય સઃ ।
અનુગ્રહાત્ ગણેશસ્ય તામ્રપર્ણ્યાઃ નદીતટે ॥

૬૭. વિધાય વસતિં તત્ર નિરાહારો જિતેન્દ્રિયઃ ।
ઉપદિષ્ટેન માર્ગેણ તતાપ પરમં તપઃ ॥

૬૮. શુશ્રૂષયા તે પિતરિ(?) દમ્પતી વિનયાન્વિતૌ ।
નિન્યતુઃ સમયં યાવત્ ભવિષ્યતિ મનોરથઃ ॥

૬૯. ઇત્થં તપસ્યતઃ તસ્ય પઞ્જ પઞ્ચ દિનાન્યગુઃ ।

૭૦. અથ હૈમવતીમાશાં પ્રસ્થિતે તીવ્રરોચિષિ ।
પ્રત્યહં વર્ધમાનેન્દું બિમ્બપક્ષે પ્રવર્ધિતે ॥

૭૧. સપ્તમ્યામુત્થિતે ભાનૌ ઉદયાચલમસ્તકાત્ ।
આવિરાસીત્ નદીપૂરાત્ અંશુમાન્ ઇવ રોચિષા ॥

૭૨. મણિગ્રીવસ્ય પુરતઃ શિવો ભૈરવમૂર્તિમાન્ ।
શૂલખડ્ગાઙ્ગમુસલકપાલાસિપરશ્વથૈઃ ॥

૭૩. વરદેનાભયેનાપિ પરિષ્કૃતકરામ્બુજઃ ।
શશાઙ્કશુક્લોલ્લાસિજટમણ્ડલમણ્ડિતઃ ॥

૭૪. ભસ્માઙ્ગરાગધવલફણિરાજોપવીતિકઃ ।
બદ્ધવેત્રકરોટીભિઃ અભિજાતભુજાન્તરઃ ॥

૭૫. સ્વભાસા ભાસયન્ વિષ્વક્ અંશુમાન્ ઇવ પુષ્કરાત્ ।
આવિર્ભૂતં મહઃપુઞ્જં પુરસ્તાત્ તપસઃફલમ્ ॥

૭૬. આલોક્યહર્ષસાન્તારન્તઃ સમુત્થાય કૃતાઞ્જલિઃ ।
કિઞ્ચિત્ અન્તિકમાગમ્ય પ્રણમ્ય ભુવિ દણ્ડવત્ ॥

૭૭. જ્યાલતાન્તકોદણ્ડ નમ્રસમ્ભ્રમવિગ્રહઃ ।
તુષ્ટાવ પરમેશાનં વરદં પારિજાતવત્ ॥

૭૮. મણિગ્રીવઃ –
નમઃ સર્વજગત્કર્ત્રે પિત્રે પ્રકૃતિસાક્ષિણે ।
ભૈરવાય પરાનન્દનિધયે વેધસે નમઃ ॥

૭૯. નિયન્ત્રે સર્વલોકાનાં નિગમાગમમૂર્તયે ।
ભૈરવાય પરાનન્દનિધયે વેધસે નમઃ ॥

૮૦. રોગશોકભયક્લેશમોહતામિસ્રભાસ્વતે ।
ભૈરવાય પરાનન્દનિધયે વેધસે નમઃ ॥

૮૧. પ્રસીદ મન્ત્રાગમતીર્થદેવતાક્રતુક્રિયાક્ષેત્રવિશેષરૂપિણે ।

ભવાય પાપક્ષયહેતવે સતાં નમો નમો ભૈરવભદ્રમૂર્તયે ॥

૮૨. ઇતિ સ્તુવન્ નયનયુગાઙ્જલદ્રવં જલૌઘતઃ પદયુગમસ્ય સેચયન્ ।
પપાત તત્સવિધમસૌ મહીતલે ભવાર્ણવાત્ અવ શિવ માં ઇતીરયન્ ॥

૮૩. ઇત્થં સ્વપાદનાલીક ષટ્પદાયિતમૈલિનમ્ ।
મણિગ્રીવં સમુત્થાપ્ય દયાલુઃ સ્વકરામ્બુજૈઃ ॥

૮૪. પ્રસન્નગમ્ભીરયા વાચા ચન્દ્રચન્દ્રિકયા યથા ।
શ્રી ભગવાન્ –
તાત પ્રીતોઽસ્મિ તપસા તવ સર્વમનોજ્ઞયા ॥

૮૫. મત્પ્રસાદાત્ ભવિષ્યન્તુ તવ ભોગાઃ સનાતનાઃ ।
ત્વયિ પ્રસાદં કુર્વન્તુ બ્રહ્મવિષ્ણુમુખાસ્સુરાઃ ॥

૮૬. સર્વનિર્વાણજનિતા તામ્રા મલયનન્દિની ।
ત્વયિ પ્રસન્ના જાગર્તિ ત્વન્મનોરથપૂરણે ॥

૮૭. આભ્યાં વધૂભ્યાં સહિતઃ સ્નાનં કૃત્વા મહામ્ભસિ ।
સૂતઃ –
અનુશિષ્ટઃ ભૈરવેણ દેવેનેત્થં દયાલુના ॥

૮૮. સવધૂકઃ તં પ્રણમ્ય સસ્નૌ મન્ત્રમુદીરયન્ ।
દેવિ દીનજનાપાયદલનૈકકુઠારિકે ॥

૮૯. પાટીરશૈલતનયે પાપહારિણિ પાહિ મામ્ ।
ઇતિ સ્તુત્વા તીર્થરાજ્ઞીં ધ્યાયન્ હૃદિ ગણેશ્વરમ્ ॥

૯૦. ચક્રે સ્નાનં મહારાજ પુણ્યે પરમપાવને ।
તાવદાવિરભૂદગ્રે હેરમ્બઃ કરુણાનિધિઃ ॥

૯૧. બ્રહ્મવિષ્ણુમહેશાનપુરન્દરપુરસ્સરાઃ ।
આજગ્મુઃ તત્ર ગીર્વાણાઃ કુબેરવરુણાગ્નયઃ ॥

૯૨. વિકિરન્તઃ ચ પુષ્પાણિ પ્રશંસન્તો મહાનદીમ્ ।
સમાયાતેષુ સર્વેષુ સિદ્ધગન્ધર્વયોગિષુ ॥

૯૩. ઉન્મમજ્જ તદા તોયે તાભ્યાં સહ કુબેરભૂઃ ।
મહામરકતશ્યામકામરાજસમદ્યુતિઃ ॥

૯૪. મા વિચારોઽસ્તુ ચાત્માનમાશ્વાસ્ય મનીષયા ।

ત્વય્યનુગ્રહમાદાતુમાગતાન્ પશ્ય ભૂરિશઃ ॥

૯૫. બ્રહ્મવિષ્ણુમુખાન્ એતાન્ નમસ્કુરુ સુરોત્તમાન્ ।
પ્રીત્યર્થમત્ર દેવાનાં બન્ધૂનાં ચ વિશેષતઃ ॥

૯૬. પાણિં ગૃહાણ વૈ વધ્વોઃ ગન્ધર્વાધીશકન્યયોઃ ।
તવ કલ્યાણયોગેન ક્ષેત્રમેતત્ જગત્ત્રયે ॥

૯૭. કલ્યાણભવનં નામ્ના લોકે વિખ્યાતિમૃચ્છતુ ।
સાન્નિધ્યાત્ ભૈરવં તીર્થં ભૈરવસ્ય મહાત્મનઃ ॥

૯૮. અત્ર મજ્જન્તિ યે તીર્થે તવ પાપપ્રણાશને ।
તેષાં કામાન્ પ્રદાસ્યામિ તસ્માત્ કામપુરં ભવેત્ ॥

૯૯. ઇતિ સંપ્રીણયન્ વાચા મણિગ્રીવં ગણેશ્વરઃ ।
ગુરું પુરોહિતં કૃત્વા તસ્મિન્ એવ નદીતટે ॥

૧૦૦. પાણિં સઙ્ગ્રાહયામાસ વિધિના શઙ્કરાત્મજઃ ।
તાભ્યાં સહૈવ પત્નીભ્યાં શુશુભે ધનદાત્મજઃ ॥

૧૦૧. સ્વાહાસ્વધાભ્યાં સહિતો હવ્યવાહ ઇવોજ્જ્વલઃ ।
સંપ્રાપ્તોચિતદારસ્ય પુત્રસ્યાભ્યુદયં મહત્ ॥

૧૦૨. દૃષ્ટ્વા તુતોષ નિતરાં રાજરાજઃ સ્વબન્ધુભિઃ ।
તૌ ચ ગન્ધર્વરાજાનૌ દુહિત્રોઃ પરમોત્સવમ્ ॥

૧૦૩. નનન્દતુઃ શ્રિયં ભૂમ્યા પશ્યન્તૌ મધુમાધવૌ ।
ઇત્થં મહોત્સવં દૃષ્ટ્વા સર્વે દેવાઃ સહેશ્વરાઃ ॥

૧૦૪. સ્વાવાસાય પુનર્જગ્મુઃ કથયન્તઃ શુભાઃ કથાઃ ।
પુનઃપુનઃ તીર્થરાજ્ઞીં નમસ્કૃત્ય કૃતાઞ્જલિઃ ॥

૧૦૫. પિત્રાનુમોદિતઃ પ્રાયાત્ અલકાં ધનદાત્મજઃ ।
તદારભ્ય ગણેશસ્તુ કાલભૈરવસંયુતઃ ॥

૧૦૬. અદ્યાપિ નિજસાન્નિધ્યં કુરુતે પુણ્યદો નૃણામ્ ।
અધિભૂઃ સર્વતીર્થાનાં ભૈરવઃ શમ્ભુશાસનાત્ ॥

૧૦૭. સન્નિધત્તે યતો નિત્યં તસ્માત્ સર્વોત્તમં વિદુઃ ।
યેઽત્ર મજ્જન્તિ નિયતાઃ મન્ત્રેણાનેન માનવાઃ ॥

૧૦૮. તેષામક્ષય્યમૈશ્વર્યં ભવત્યાયુઃ શિવે રતિઃ ।
 ય ઇદમનુશ્રુણોતિ શ્રાવયેચ્ચાનુવેલં
 નિયમિતવિષયેહાવૃત્તિરાખ્યાનમગ્ર્યમ્ ।
 અભિમતપુરુષાર્થાન્ આપ્નુયાત્ આદિશમ્ભોઃ
 પદમવિકલમન્તે યત્ર ભોગાઃ હ્યવન્ધ્યાઃ ॥

ઇતિ પઞ્ચત્રિંશોઽધ્યાયઃ । Pro. Total = 2889 + 108 = 2997.

## ષટ્ત્રિંશોઽધ્યાયઃ

સોમતીર્થમાહાત્મ્ય મ્ ।

૧. રાજા –
 અહો મણિગ્રીવકથા વિચિત્રા વિસ્મયાવહા ।
 કથિતા ભવતા બ્રહ્મન્ કલ્મષાન્તકરી નૃણામ્ ॥

૨. અનયા પરિતુષ્ટોઽહં કથયા સુધયા યથા ।
 ઉભયોઃ તીરયોઃ તીર્થમાહાત્મ્યારામવીથિષુ ॥

૩. ઉપાખ્યાનમહાકલ્પશાખિનો યાન્તિ બન્ધુરાઃ ।
 સુગન્ધિનઃ સુમનસાં તીર્થૈઃ મધુમુચાં કુલૈઃ ॥

૪. ફલન્તિ પરિપક્વાનિ સદા પુણ્યફલાનિ હિ ।
 ધુન્વન્તિ કલિસન્તાપં છાયાભિરિવ સેવતામ્ ॥

૫. ફલૈરિવ ક્ષુધાં ઘ્નન્તિ કિમેભ્યઃ કલ્પકોઽપરઃ ।
 લબ્ધઃ શઙ્ખનિધિર્મે ત્વં ગુરુરૂપેણ ચાક્ષયઃ ॥

૬. ઇતઃ પરં મે શ્રોતવ્યં સોમતીર્થસ્યવૈભવમ્ ।
 તત્તીર્થસ્ય કથાજાતં સોમાખ્યત્વં મહામુને ॥

૭. તથૈવ વ્યાસતીર્થસ્ય કથાં વિસ્તાર્ય શંસ મે ।
 ઇતિ રાજ્ઞો વચઃ શ્રુત્વા શઙ્ખયોગી મહાતપાઃ ॥

૮. સ્મયમાનઃ તમાભાષ્ય કથાં વક્તું પ્રચક્રમે ।
 શઙ્ખઃ –
 મહારાજ મહાનાદ્યાઃ કીર્તિમૌક્તિકલાલિતામ્ ॥

૯. કથાં કથયતઃકર્ણવિષયીકુરુ મે વિભો ।

પુરા દક્ષસ્ય શાપેન ક્ષુભિતો રાજયક્ષ્મણા ॥

૧૦. શીતાંશુઃ શરણં પ્રાપ ભરદ્વાજમહામુનિમ્ ।
અસહ્યાત્ યક્ષ્મણઃ પાહિ દક્ષશાપસમુદ્ભવાત્ ॥

૧૧. શરણં ત્વાં પ્રપન્નોઽસ્મિ દૈવતં હિ ભવાન્ મમ ।
ઇત્થમભ્યર્થિતઃ તેન ભરદ્વાજઃ સુધાંશુના ॥

૧૨. સવિમર્શં સમાલોચ્ય શાસ્ત્રં દૃષ્ટ્વા પુનઃપુનઃ ।
ઇદમાહ ઔષધીશાનં ભરદ્વાજઃ પ્રસન્નધીઃ ॥

૧૩. દ્વિજરાજ નમસ્તુભ્યં ચિન્તાશોકાનુતાપિને ।
વદામ્યુપાયમારોગ્યહેતવે તવ સામ્પ્રતમ્ ॥

૧૪. વિદ્યા કાચન કલ્યાણી સર્વપાપવિમોચની ।
સેવિતા યદિ જન્તૂનાં નિત્યાનન્દપ્રદાયિની ॥

૧૫. પ્રસૂતે સેવતાં નિત્યં કલ્પવલ્લીવ કાઙ્ક્ષિતમ્ ।
ઇત્થમાશ્વાસ્ય સોમાય વિદ્યાં પ્રાદાન્મહામુનિઃ ॥

૧૬. પ્રાપ્તમન્ત્રઃ પ્રસન્નાત્મા ગુરું નત્વા પરીત્ય ચ ।
તમામન્ત્ર્ય યથાન્યાયં પર્યન્તે હિમભૂભૃતઃ ॥

૧૭. કૃત્વાશ્રમપદં ચક્રે તપો ઘોરતરં શશી ।
આત્મન્યહન્તામાદાય તસ્યામાદાય માનસમ્ ॥

૧૮. નિરુધ્યેન્દ્રિયસઞ્ચારમન્તઃ પશ્યન્ અતીન્દ્રિયઃ ।
નિરાહારો વિનિદ્રશ્ચ નિવાતગૃહદીપવત્ ॥

૧૯. નિશ્ચલાઙ્ગો મહાતેજાઃ નાસાગ્રન્યસ્તલોચનઃ ।
ધ્યાયન્ ગુરુપદં મૂર્ધ્નિ મન્ત્રમન્તર્મુખે રહઃ ॥

૨૦. દૈવતં હૃદિ સંસ્થાપ્ય સ્થિરધીરભ્યવર્તયત્ ।
એવં તપસ્યતઃ તસ્ય પ્રત્યયાત્ વત્સરત્રયમ્ ॥

૨૧. તત્ પુરસ્તાત્ મહાદેવી ગઙ્ગા પરમપાવની ।
સદાશિવસમાદિષ્ટા પ્રાદુરાસીત્ જગત્પ્રસૂઃ ॥

૨૨. પ્રીણયન્તી સ્મિતરુચા દ્વિગુણીકૃત્ય તત્પ્રભામ્ ।
બભાષે તપસા ક્ષીણં રોગેણાપિ વિકર્શિતમ્ ॥

૨૩. ગઙ્ગા –
દ્વિજરાજ મહાભાગ ત્વયા જીવન્તિ દેવતાઃ ।
ત્વદંશુસંશ્રયાત્ ભૂમૌ ભવન્ત્યોષધયો નનુ ॥

૨૪. ઘર્માંશુપરિભૂતાનાં ભૂતાનાં ત્વં પરાયણમ્ ।
ત્વત્દત્તામૃતસન્તૃપ્તાઃ સર્વે દેવાઃ નિરામયાઃ ॥

૨૫. તથાપિ ક્લેશયત્યેષ રાજયક્ષ્મા વપુસ્તવ ।
તસ્માદલઙ્ઘનીયો હિ વિધિર્દૈવકુલૈરપિ ॥

૨૬. ભવિતવ્યે ન શોચન્તિ પણ્ડિતાઃ હિ ભવાદૃશાઃ ।
શ્રૂયતામસ્ય દેવસ્ય મહાદેવસ્ય શાસનમ્ ॥

૨૭. મહામલયસમ્ભૂતા યત્ર પુણ્યા સરિદ્વરા ।
ગન્તવ્યં ભવતા તત્ર શાપાત્ મુક્તિમભીપ્સતા ॥

૨૮. આગમિષ્યત્યદીર્ઘેણ કાલેન વૃષભધ્વજઃ ।
વયમપ્યાગમિષ્યામઃ તવ પ્રીતિવિધિત્સયા ॥

૨૯. શિલાદસ્યોપદેશેન સ્નાનં કુરુ મહામતે ।
તામ્રાયાઃ તીર્થમાહાત્મ્યાત્ લબ્ધારોગ્યો ભવિષ્યસિ ॥

૩૦. એતાવત્ ઉક્ત્વા તસ્યાં તુ વિરતાયાં સુધાનિધિઃ ।
તામામન્ત્ર્ય નમસ્કૃત્ય સંપ્રાપ મલયાત્મજામ્ ॥

૩૧. સપ્તવિંશતિસઙ્ખ્યાતૈઃ અવરોધૈઃ અલઙ્કૃતમ્ ।
નદ્યાસ્તુ દક્ષિણે તીરે શિલાદસ્યાશ્રમં મહત્ ॥

૩૨. દૃષ્ટ્વા ચૈત્રરથપ્રખ્યં નાનાદ્રુમલતાયુતમ્ ।
અવરુહ્યામ્બરાત્ ઇન્દુઃ આશ્રમં પ્રવિવેશ હ ॥

૩૩. તં દૃષ્ટ્વા તેજસાં રાશિં શિલાદો મુનિપુઙ્ગવઃ ।
સ્વાગતેનાસનેનાપિ પૂજયિત્વાપિ સાદરમ્ ॥

૩૪. બહુમાન્ય ગિરા રાજન્ વ્યાજહાર મહામુનિઃ ।
શિલાદઃ –
ભગવન્ ઓષધીશાન પ્રીતોઽસ્મિ તવ દર્શનાત્ ॥

૩૫. પરિક્ષીણમિદં કાન્તં વપુસ્તે કેન હેતુના ।
પરિશ્રાન્ત ઇવાભાસિ ચિન્તયા પરિતપ્યસે ॥

૩૬. સર્વં કથય મે તથ્યં શ્રોતું કૌતૂહલં હિ નઃ ।
ઇતિ પૃષ્ટો મુનીન્દ્રેણ તમાહેદં નિશાકરઃ ॥

૩૭. ચન્દ્રઃ –
શ્રુણુ બ્રહ્મન્ પ્રવક્ષ્યામિ શાપાત્ દક્ષસ્ય દુઃખિત ; ।
તદ્દોષશાન્તિમન્વિચ્છન્ ત્વામિદાનીમુપસ્થિતઃ ॥

૩૮. કુર્વતાનુગ્રહં ભૂરિ દેવદેવેન શૂલિના ।
અનુશિષ્ટોઽસ્મિ ગીર્વાણતટિન્યા પ્રતિબોધિતઃ ॥

૩૯. ત્વદન્તિકમહં પ્રાપ્તો દેવદેવસ્ય શાસનાત્ ।
સંશ્રયઃ તવ વિપ્રેન્દ્ર તામ્રપર્ણ્યાં ચ મજ્જનમ્ ॥

૪૦. દ્વયમેતત્ હિ કથિતં પ્રાયશ્ચિત્તં મમ દ્વિજ ।
તસ્માત્ ત્વાં શરણં પ્રાપ્તં ત્રાહિ માં શાપકિલ્બિષાત્ ॥

૪૧. શિલાદઃ –
દ્વિજરાજ મહાભાગ શિવાજ્ઞામનુવર્તિનામ્ ।
ન પશ્યામ્યશુભં ક્વાપિ યથા મૃત્યુઃ સુદર્શિનામ્ ॥

૪૨. માતૃશાપાત્ અપુત્રાપિ મદ્ભાર્યા શમ્બરાવતી ।
તામ્રતીર્થસ્નાનયોગાદસૂત સુતમૂર્જિતમ્ ॥

૪૩. સ પુત્રો નન્દિકેશો મે સ્નાત્વાત્ર શિવસેવયા ।
મૃત્યું જિત્વા પદં લેભે બ્રહ્માદ્યૈરપિ દુર્લભમ્ ॥

૪૪. અષ્ટૌ નાગાઃ પુરાભ્યેત્ય સ્નાત્વાત્ર તટિનીજલે ।
સંપ્રાપુઃ તીર્થમાહાત્મ્યાત્ મિત્રભાવં ગરુત્મતઃ ॥

૪૫. અથ તીર્થવરે પુણ્યે ત્વં દારૈઃ સહિતો વ્રતી ।
અત્ર મઙ્ક્ત્વા મહેશસ્ય પ્રસાદાત્ ઇન્દુમૌલિનઃ ॥

૪૬. મનોરથમનુપ્રાપ્ય શ્રિયં પ્રાપ્નુહિ પુષ્કલામ્ ।
શ્વો ભવિન્યહનિ શ્રીમાન્ અહિમાંશુઃ પ્રતાપવાન્ ॥

૪૭. દક્ષિણાશાં પરિત્યજ્ય સ્વતીર્થં વિનિવર્તયન્ ।
સપ્તસપ્તિરુદગ્યાનઃ સપ્તમ્યામરુણાન્વિતઃ ॥

૪૮. સા તિથિઃ સર્વપાપઘ્ની તીર્થરૂપા પ્રશસ્યતે ।
સહાસ્માભિર્મહાનદ્યાં સ્નાનં કુરુ મહામતે ॥

૪૯. ઇતિ તત્ વચનાત્ ઇન્દુઃ પુરોધાય ભૂસુરમ્ ।
સપ્તવિંશતિ સઙ્ખ્યાતૈઃ દારૈરુદ્દામકીર્તિમાન્ ॥

૫૦. સપ્તમ્યામુદિતે સૂર્યે આસાદ્ય મલયાત્મજામ્ ।
ત્રૈલોક્યકલુષધ્વાન્તવિધ્વંસનવિનોદિનિ ॥

૫૧. પાપં નાશય મે શીઘ્રં ત્વયિ સ્નાસ્યહં શુચૌ ।
ઇતિ મન્ત્રં સમુચ્ચાર્ય મઙ્ક્ત્વા તત્તીર્થવારિણિ ॥

૫૨. નિર્મુક્તશાપમાલિન્યઃ સો મમજ્જ પુનઃ શશી ।
તાવદાવિરભૂદગ્રે મહોક્ષેન્દ્રં સમાસ્થિતઃ ॥

૫૩. નીલકણ્ઠઃ સમાશ્લિષ્ટવલ્લભાતનુતલ્લજઃ ।
અશેષસિદ્ધસઙ્ઘાતસ્તૂયમાનપદામ્બુજઃ ॥

૫૪. બ્રહ્મનારાયણમુખૈઃ ગીર્વાણૈરભિસંવૃતઃ ।
પરિતો વિકિરન્તીભિઃ અમરીભિઃ કુસુમોત્કરમ્ ॥

૫૫. સંસ્તુવત્વત્સકલામ્નાયં સન્નમત્ભુવનત્રયમ્ ।
સાનન્દસ્મેરસૌભાગ્યં સમાલોક્ય શિવં વિધુઃ ॥

૫૬. સ્તુત્વા સ્તુતિભિરાનન્દનિર્ભરઃ તત્પદામ્બુજે ।
પપાત પાહિ માં ભક્તમિત્યુચ્ચૈરુદ્ગિરન્ ગિરમ્ ॥

૫૭. તતઃ શમ્ભુઃ પ્રસન્નાત્મા સમાશ્લિષ્ય સ્વપાણિભિઃ ।
સાન્ત્વયિત્વા નિશાનાથં વ્યાજહાર સદાશિવઃ ॥

૫૮. અહો વિધો વિનાશાય સાધ્વનુષ્ઠિતમંહસામ્ ।
તવ તેજો બલં બુદ્ધિઃ યશો વૈશિષ્ટ્યમેવ ચ ॥

૫૯. તવ સન્તુ નિરાબાધજ્ઞાનવિજ્ઞાનભૂતયઃ ।
ત્વં વરિષ્ઠઃ સમસ્તાનાં દેવાનામપિ ભાસ્વતામ્ ॥

૬૦. ત્વમોષધીનામીશાનઃ ત્વં સોમઃ સોમપાયિનામ્ ।
હવ્યકવ્યોદયસ્થાનં પિતૃણાં ત્વં દિવૌકસામ્ ॥

૬૧. ત્વદ્ધ્યાનમાત્રાત્ નશ્યન્તિ વિષરોગવિપત્તયઃ ।
પિતૃણામપિ દેવાનાં જીવનાય વિશામ્પતે ॥

૬૨. શ્રુણુ વક્ષ્યામિ કાલસ્ય મર્યાદારભ્યતે પુનઃ ।
પૂર્વાપરૌ તુ ભૂયાસ્તાં પક્ષૌ ત્વત્બિમ્બલક્ષણમ્ ॥

૬૩. પૂર્વેણ તુ વર્ધન્તાં કલાસ્તવ દિને દિને ।
અપરેણ તુ પિબન્ત્યન્યે દેવાશ્ચ પિતરઃ ક્રમાત્ ॥

૬૪. ગઙ્ગાદ્યાઃ સરિતઃ પુણ્યાઃ દેવાશ્ચેન્દ્રપુરોગમાઃ ।
ત્વત્તીર્થેઽસ્મિન્ પ્રકુર્વન્તુ સન્નિધ્યં બદ્ધસૌહૃદાઃ ॥

૬૫. યે ચાત્ર પુણ્યે મજ્જન્તિ  તીર્થે સૌમ્યે તુ જન્તવઃ ।
તેષામભીષ્ટદાનાય નિત્યમત્ર વસામ્યહમ્ ॥

૬૬. ઇત્યુક્ત્વાન્તર્દધે શમ્ભુઃ સાર્ધં વિષ્ણુમુખૈસ્સુરૈઃ ।
અન્તર્હિતે ચન્દ્રચૂડે દેવદેવગણાન્વિતે ॥

૬૭. સોમઃ સોમેશ્વરં લિઙ્ગં હસ્તાભ્યાં પરિણામગમ્ ।
શિલાદસ્યોપદેશેન પૂજયિત્વા ચ સાદરમ્ ।

૬૮. પ્રાપ્ય પ્રસાદં દેવસ્ય ગુરુમામન્ત્ર્ય સાદરમ્ ।
તામ્રાં નદીમભિષ્ટૂય ભક્ત્યા માતરમમ્બિકામ્ ॥

૬૯. સહ દારૈઃ સંપ્રતસ્થે સ્વદામ પરમર્ધિમત્ ।
શઙ્ખઃ –
એવં શાપાત્ સંપ્રમુક્તસોમો યસ્માત્ મહીપતે ॥

૭૦. તદાદિ સોમતીર્થાખ્યં પ્રશસ્તં ભુવનત્રયે ।
અસ્ય તીર્થસ્ય માહાત્મ્યં સઙ્ગ્રહાત્ કથિતં તવ ॥

૭૧. પઠનાત્ શ્રવણાત્ અસ્ય મર્ત્યો રોગૈઃ પ્રમુચ્યતે ।
અતઃ પરં પ્રવક્ષ્યામિ કથા નાદામ્બુજસ્ય તે ॥

૭૨. યત્ર વિષ્ણું સમારાધ્ય વ્યાસો યોગવિદાં વરઃ ।
તત્ પ્રસાદાત્ અવપોચ્ચૈઃ બ્રહ્મજ્ઞાનમકલ્મષમ્ ॥

૭૩. જન્તૂનામેવ સર્વેષાં યાતાયાતપરિશ્રમમ્ ।
યાવત્ તત્ તીર્થ સંપ્રાપ્તિઃ તાવત્ ઇત્યાહ ધૂર્જટિઃ ॥

ઇતિ ષટ્ત્રિંશોઽધ્યાયઃ ।  Pro.ToTal = 2997 + 73 = 3070.

# સપ્તત્રિંશોઽધ્યાયઃ

નાદામ્બુજતીર્થમહિમા ।

૧. રાજા –
ભગવન્ સર્વધર્મજ્ઞ મહાયોગીન્દ્ર સદ્ગુરો ।
નાદામ્બુજમિતિ પ્રોક્તં ભવતા ક્ષેત્રમુત્તમમ્ ॥

૨. તત્ર વિષ્ણું સમારાધ્ય ભગવાન્ બાદરાયણઃ ।
બ્રહ્મજ્ઞાનં કથં પ્રાપ તન્મે કથય વિસ્તરાત્ ॥

૩. શઙ્ખઃ –
પ્રવક્ષ્યામિ કથાં પુણ્યાં પારાશર્યસ્ય યોગિનઃ ।
શ્રવણાત્ એવ પાપઘ્ની યથા મલયનન્દિની ॥

૪. પુરેયં કથિતં પુણ્યા કથા સૂતેન સૂરિણા ।
પુણ્યક્ષેત્રે નૈમિશે તુ મહર્ષીણાં મહાત્મનામ્ ॥

૫. પુરા કદાચિત્ ભગવાન્ વ્યાસઃ સત્યવતીસુતઃ ।
વેદાન્ વિભજ્ય સર્વત્ર શાખા સૂત્રાન્તરાણિ ચ ॥

૬. તેષુ પ્રવર્તકાન્ વિપ્રાન્ મન્વાદીન્ પૃથક્ પૃથક્ ।
શૌનકાદીન્ મુનીન્ કૃત્વા દેવતન્ત્રપ્રવર્તકાન્ ॥

૭. અષ્ટાદશપુરાણાનાં શ્રુતિસ્મૃત્યનુયાયિનામ્ ।
વક્તારં માં સમાદિશ્ય કૃતકૃત્યો બભૂવ હ ॥

૮. મનીષાં ચિન્તયામાસ કૃત્યશેષાં મહાતપાઃ ।
આશ્રમાચારભેદં ચ શાખાસૂત્રાન્તરાણિ ચ ॥

૯. તત્કર્તરશ્ચ વિહિતાઃ શિક્ષિતાશ્ચ યથાવિધિ ।
તેષુ તેષુ પ્રવર્તન્તે શાસ્ત્રેષુ મુનયઃ સુરાઃ ॥

૧૦. જાતા શ્રેયઃકરી નૂનં સફલો મે પરિશ્રમઃ ।
એતદેવ કિલાસ્માકમવતારપ્રયોજનમ્ ॥

૧૧. ઇતઃ પરં ઇહાસ્માકં કિં કર્તવ્યં સુખાવહમ્ ।
તદત્રૈવ કરિષ્યામિ મા ભૂત્ કાલપરિક્ષયઃ ॥

૧૨. ઇતિ નિશ્ચિત્ય ભગવાન્ કૃષ્ણદ્વૈપાયનો મુનિઃ ।

જગામ સહસા હર્ષાત્ મેરું કાઞ્ચનપર્વતમ્ ॥

૧૩. યમેનં નાકપૃષ્ઠાખ્યમારુહ્ય કિલ યોગિનઃ ।
ગચ્છન્તિ બ્રહ્મસાલોક્યં તપસા દુષ્કરં પરૈઃ ॥

૧૪. યત્ર બ્રહ્મપુરં મધ્યે સમન્તાત્ શતયોજનમ્ ।
યત્ર વિષ્ણુપદાત્ મુક્તા ગઙ્ગા પતતિ વૈ કિલ ॥

૧૫. યમાહુઃ પરમં સ્થાનં સ્વર્ગસ્યાપિ સુખપ્રદમ્ ।
નાનાસિદ્ધગણાકીર્ણં દેવગન્ધર્વસેવિતમ્ ॥

૧૬. નાનાધાતુગણૈઃ ચિત્રૈઃ સાલઙ્કારમિવ સ્થિતમ્ ।
હારાભિરામૈઃ શતશઃ નિઝરૈઃ ઉપશોભિતમ્ ॥

૧૭. દિવ્યપક્ષિગણાકીર્ણં દિવ્યસ્ત્રીશતસઙ્કુલમ્ ।
યત્ર વૈ વાતરશનાઃ ઋષયઃ ચોર્ધ્વમન્થિનઃ ॥

૧૮. તપઃકુર્વન્તિ નિયતાઃ લોકાનાં હિતકામ્યયા ।
તમાસસાદ વેગેન પિતામહદિદૃક્ષયા ॥

૧૯. દદર્શ તત્ર લોકાનાં પિતામહમનામયમ્ ।
ઉપાસ્યમાનં સર્વત્ર સનકાદ્યૈર્મહાત્મભિઃ ॥

૨૦. સ ઋચા યજુષા સામ્ના અથર્વેણાભ્યુપાસિતમ્ ।
મૂર્તિમદ્ભિર્મહામન્ત્રૈઃ સાઙ્ગૈઃ ચોપનિષદ્ગણૈઃ ॥

૨૧. સર્ગોપકરણૈરન્યૈઃ ભૂતૈઃ વ્યાહૃતિભિઃ તથા ।
સેવ્યમાનં મહાત્માનં બ્રહ્માણં ભારતીપતિમ્ ॥

૨૨. દેવગન્ધર્વસિદ્ધૈશ્ચ નારદાદ્યૈર્મહર્ષિભિઃ ।
દદર્શ પરમાસીનં સત્યસિંહાસને પ્રભુમ્ ॥

૨૩. તતઃ સત્યવતીસૂનુઃ આસસાદ કનકાચલમ્ ।
સંપ્રાપ્તઃ સર્વતોભદ્રાં સભાં સાક્ષાત્ સ્વાયમ્ભુવઃ ॥

૨૪. તત્ર સભ્યાઃ સમાસીનાઃ ઋષયઃ ચોર્ધ્વમન્થિનઃ ।
સેવન્તો પરિતો દેવં ધાતારં જગતાં પ્રભુમ્ ॥

૨૫. સનકશ્ચ સનન્દશ્ચ કૌષીતકકહોલકૌ ।
સનત્કુમારઃ પર્ણાદઃ શૈબ્યઃ શાકલ્ય એવ ચ ॥

૨૬. યજ્ઞકેતુર્હવિર્ધાનઃ કાણાદઃ કણ્વ એવ ચ ।
જમદગ્નિઃ શઙ્કુકર્ણઃ પિપ્પાલદશ્ચ રોમશઃ ॥

૨૭. ચમસો માણ્ડુકર્ણિશ્ચ હરશ્ચ કરભાજિનઃ ।
મેધાતિથિઃ સુમન્થુશ્ચ હિરણ્યસ્રુવ એવ ચ ॥

૨૮. શત્રુજિત્ પુરુજિત્ પૈલો વામદેવોઽત્રિરેવ ચ ।
ગાર્ગ્યાયણઃ સુયજ્ઞશ્ચ વસિષ્ઠો ગૌતમસ્તથા ॥

૨૯. એવમન્યે ચ મુનયઃ કુત્સગૃત્સમદાદયઃ ।
ઉપાસન્તે જગત્યોનિં સમન્તાત્ કમલાસનમ્ ॥

૩૦. એવં દૃષ્ટ્વા સભાં દૂરાત્ સન્નતસ્તુ કૃતાઞ્જલિઃ ।
પૂજ્યમાનસ્તુ મુનિભિઃ વવન્દે કમલાસનમ્ ॥

૩૧. સભાં પ્રવિશતિ વ્યાસે સાનન્દે મુનિપુઙ્ગવે ।
સભા પરમસંહૃષ્ટા સોચ્ચૈર્નાદા બભૌ ક્ષણાત્ ॥

૩૨. અભિવાદ્ય સ્વકં નામ બ્રુવન્ ધાતારમગ્રતઃ ।
ભારતી ચ તતો દેવીં પ્રણયાત્ અભ્યવાદયત્ ॥

૩૩. આગતં તં મુનિં દૃષ્ટ્વા હર્ષરોમાઞ્ચમઞ્જુલૈઃ ।
અઙ્ગૈરલઘુવૈભ્રાજૈઃ સુમેરુરિવ ભૂર્જકૈઃ ॥

૩૪. સસ્નેહૈરમૃતાલોકૈરામૃષ્ટૈશ્ચન્દ્રશીતલૈઃ ।
પ્રીણયિત્વા મુનિશ્રેષ્ઠં વ્યાજહાર પિતામહઃ ॥

૩૫. સ્વાગતં તે મુનિશ્રેષ્ઠ સુખમાસ્વેદમાસનમ્ ।
ઇદમર્ઘ્યમિદં પાદ્યમિદમાચમનીયકમ્ ॥

૩૬. ગાં ચ ગૃહ્ણીષ્વ ભદ્રં તે પ્રીતોઽસ્મિ તવ દર્શનાત્ ।
ભવદાનુષ્ઠિતં સર્વં જ્ઞાતં મે મુનિપુઙ્ગવ ॥

૩૭. મત્પ્રસાદાત્ ઇદં લબ્ધં વેદજાલં ત્વયાનઘ ।
યથાવત્ વિહિતં સર્વં કર્મકાણ્ડં દ્વિજાતિષુ ॥

૩૮. અષ્ટાદશપુરાણાનિ સેતિહાસાનિ કૃત્સ્નશઃ ।
સમાયાતાનિ કૢપ્તાનિ ત્વયા સત્યવતીસુત ॥

૩૯. વ્યાસઃ –
ધર્મશાસ્ત્રાણિ વિજ્ઞાનં ત્વત્કૃપાપરમાણવઃ ।

જ્ઞાનં વિજ્ઞાનસમ્પન્નં ત્વચ્છક્ત્યા સચરાચરમ્ ॥

૪૦. યથા તથા વિનિર્મુક્તો લોકો મૂકાયતે ધ્રુવમ્ ।
તસ્માત્ પ્રસાદાત્ ભવતઃ કૃતમેતત્ મયા પ્રભો ॥

૪૧. યદાદાવુપતિષ્ઠન્તે તથા સર્વં યથાવિધિ ।
જન્મલબ્ધં મયા બ્રહ્મન્ સત્કુલે લોકવિશ્રુતે ॥

૪૨. અભ્યસ્તાઃ શ્રુતયઃ ચૈવ તદર્થાઃ ચાવધારિતાઃ ।
આશ્રમે પ્રથમે સમ્યક્ સ્થીયતે ચ મયા વિભો ॥

૪૩. સર્વં ચ મમ વિજ્ઞાતં વિના કૈવલ્યસાધનમ્ ।
વેદૈશ્ચ નિખિલૈઃ શાસ્ત્રૈઃ કર્મજાલં પ્રતીયતે ॥

૪૪. કર્મણા નૈવ પશ્યામિ શ્રેયોઽદ્ય નિરુપદ્રવમ્ ।
કર્માણિ કુર્વતાં નૃણાં સ્વર્ગાદ્યાઃ ફલભૂતયઃ ॥

૪૫. તે ચ ક્ષીણે પુણ્યફલે પતન્તિ ચ પુનઃપુનઃ ।
કારણાન્યેવ કર્માણિ નૃણાં મરણજન્મનોઃ ॥

૪૬. કર્મણા નરકં સ્વર્ગં અનુરૂપં સમશ્નુતે ।
સ્વર્ગાત્ ચ નરકાત્ મુક્તઃ પુનર્યોનિમુપૈષ્યતિ ॥

૪૭. તસ્માત્ વેદિતુમિચ્છામિ કર્મનિર્મલકારણમ્ ।
કેન વા કર્મનિર્મુક્તઃ પરમાનન્દમૃચ્છતિ ॥

૪૮. તાદૃશં વિમલં જ્ઞાનં બ્રહ્માનન્દૈકસાધનમ્ ।
ભગવન્ મે સકરુણમુદ્દેષ્ટું ત્વમર્હસિ ॥

૪૯. છિન્ધિ મે સંશયં બ્રહ્મન્ દુઃખશોકમયપ્રદમ્ ।
કૃપયા પાહિ માં મગ્નં દુરન્તે દુઃખસાગરે ॥

૫૦. બાલં કૃચ્છ્રગતં મોહાત્ પિતા પાતિ યથા સુતમ્ ।
તથા સીદન્તમશુચૌ મામાશુ પરિપાલય ॥

૫૧. કર્મજાલપરિક્ષિપ્તાન્ ક્લિશ્યમાનાન્ મુહુર્મુહુઃ ।
દૃષ્ટ્વા ભીતોઽસ્મિ ભગવન્ દાવાગ્નિમિવ કુઞ્જરઃ ॥

૫૨. લોકસ્ય દુર્ગતિં દૃષ્ટ્વા યાતાયાતં પ્રકુર્વતઃ ।
સીદામિ ધર્મસન્તપ્તો મત્સ્યા ઇવ જલાશયે ॥

૫૩. આશ્વાસ્ય મનસ્તપ્તં ચિન્તાજલે ચિદગ્નિના ।
વાચાભયતયા બ્રહ્મન્ પર્જન્ય ઇવ વૃષ્ટિભિઃ ॥

૫૪. પ્રાઞ્જલિઃ પ્રણતકન્ધરો મુદા મઞ્જુલધ્વનિમનોજ્ઞવર્ણયા ।
શ્રાવયન્ હરિકથાં સુધાં ગિરા વ્યાજહાર સ મુનિં પિતામહઃ ॥

૫૫. બ્રહ્મા –
શ્રુણુ નાન્યમના બ્રહ્મન્ વક્ષ્યમાણં મયાધુના ।
ત્વયા સંપ્રાર્થ્યમાનસ્ય ફલસ્યોદયકારણમ્ ॥

૫૬. બોદ્ધારો બહવસ્સન્તિ સર્વવિદ્યાસુ સર્વતઃ ।
નૈવ તત્ત્વપ્રબોદ્ધારં વિના પશ્યામિ શાર્ઙ્ગિણમ્ ॥

૫૭. જ્ઞાનતઃ પ્રથમં સાક્ષાત્ હરિરેવ ન સંશયઃ ।
તદન્તે મોક્ષદશ્ચૈવ રસાનામિવ કામધુક્ ॥

૫૮. યદ્રૂપં તારકં વિષ્ણોઃ બિન્દુના કૃતલક્ષણમ્ ।
એક એવેશ્વરો વિષ્ણુઃ કૈવલ્યાદ્યખિલાર્થતઃ ॥

૫૯. યસ્તિતીર્ષુર્ભવામ્ભોધિં યો જિજ્ઞાસુઃ સુખાવહમ્ ।
સંસેવતે હરિં ભક્ત્યા મનસા કર્મણા બુધઃ ॥

૬૦. તસ્માત્ ત્વમપિ વિપ્રેન્દ્ર તમેવ શરણં વ્રજ ।
સ એવ ભગવાન્ વિષ્ણુઃ કુર્યાદિવ તવેપ્સિતમ્ ॥

૬૧. તમેવ મધુહન્તારમારાધય સમાધિના ।
તોષિતો વિધિના સમ્યક્ કૈવલ્યમપિ યચ્છતિ ॥

૬૨. વ્યાસઃ -ભગવન્ સ કથં દેવઃ પૂજનીયો મયા હરિઃ ।
કેન વાશ્રમધર્મેણ કેન મન્ત્રેણ વા પુનઃ ॥

૬૩. કુત્ર વાસ્તે હરિર્નિત્યં કુતસ્સિદ્ધિર્ભવિષ્યતિ ।
તદત્ર શ્રોતુમિચ્છામિ વદ મે કરુણાનિધે ॥

૬૪. બ્રહ્મા –
સાધુ પૃષ્ટં મુનિશ્રેષ્ઠ ભવતા ધર્મચેતસા ।
અહો સુદુર્લભા લોકે ભક્તિર્ભગવતીદૃશી ॥

૬૫. સ્નેકજન્મસંસિદ્ધૈઃ સઞ્ચિતૈઃ તપસાં ફલૈઃ ।
ભવત્યેતાદૃશી ભક્તિર્નેતરેષાં કદાચન ॥

૬૬. ભક્ત્યા પરમયા યુક્તઃ સ લોકાન્ જયતિ ધ્રુવમ્ ।
તસ્માત્ અલભ્યઃ સર્વત્ર ભક્તિયોગો નૃણાં મુને ॥

૬૭. ત્વયા બુદ્ધિર્મુનિશ્રેષ્ઠા સકલા હરિસાત્કૃતા ।
હરિસાત્કૃતચિત્તાનાં ન ગોપ્યં ગુરુભિર્ભવેત્ ॥

૬૮. અપિ ગુહ્યં ચ વક્ષ્યામિ શાસ્ત્રસારં મુને તવ ।
યો વિનીતસ્ય શિષ્યસ્ય ભક્તસ્ય પ્રણતસ્ય ચ ॥

૬૯. સ વઞ્ચયતિ પાપીયાન્ સ ગુરુર્નારકી ભવેત્ ।
વિશિષ્ય હરિભક્તાનાં ન કુર્યાત્ વઞ્જનં બુધઃ ॥

૭૦. વ્યાપ્ય વિશ્વમિદં કૃત્સ્નં એધમાનસ્ય વૈ વિભો ।
સ્થાનૈકદેશં નૈવાસ્તિ તૈલસ્યેવ તિલો યથા ॥

૭૧. તથાપિ તસ્ય કથ્યન્તે સ્થાનાન્ યદ્યુત્તમાનિ ચ ।
શ્રુતિભિઃ પરિગીતાનિ તાનિ વક્ષ્યામિ તે શ્રુણુ ॥

૭૨. મેરુપૃષ્ઠં ચ મૈનાકં ક્ષીરોદં વૃષભાચલમ્ ।
કેતુમાલં હરિદ્વારં દ્વારકા મથુરા તથા ॥

૭૩. અવિમુક્તં જગન્નાથં શ્રીરઙ્ગં શેષપર્વતમ્ ।
કુમ્ભઘોણં સેતુગર્ભં સ્યાનન્દૂરં હરિવ્રજમ્ ॥

૭૪. નાદપદ્મં ભોગપુરં નરનારાયણાલયમ્ ।
લક્ષ્મીપુરં ચ વારાહં ઇન્દ્રગોલં બૃહદ્વનમ્ ॥

૭૫. હવિર્ધાનં નૈમિશં ચ બ્રહ્મનાભં ચ શઙ્ખણમ્ ।
વજમોક્ષં ગજારણ્યં નાગચૂડં ચ વામનમ્ ॥

૭૬. સહ્યામલકમચ્છોદં સાકેતં પ્રણવાશ્રયમ્ ।
ભાગણ્ડં રૈવતં શૈબ્યં વજકોશં ખગાલયમ્ ॥

૭૭. એતાનિ પુણ્યક્ષેત્રાણિ વિષ્ણોરાયતનાનિ ચ ।
ચત્વારિંશત્ મયા બ્રહ્મન્ પ્રોક્તં યદ્યુત્તામાન્યલમ્ ॥

૭૮. એતેષુ વસતાં નૃણાં સિદ્ધો મોક્ષો ન સંશયઃ ।
અચિરાત્ લભ્યતે તેષાં હરિસાન્નિધ્યમઞ્જસા ॥

૭૯. એતાનિ પુણ્યક્ષેત્રાણિ વિભક્તાનિ ત્રિધા મુને ।
તેષાં ભેદં પ્રવક્ષ્યામિ શ્રુણ્વન્યેન ચેતસા ॥

૮૦. કાનિચિત્ વેદગીતાનિ ભોગક્ષેત્રાણિ ભૂતલે ।
તથા કાનિચિત્ અન્યાનિ કર્મસ્થાનાનિ કેવલમ્ ॥

૮૧. અપરાણ્યભિરામાણિ જ્ઞાનભાગાનિ સૂરિભિઃ ।
એષાં પ્રવક્ષ્યે પુણ્યાનાં ગુણાન્ ભેદાન્ ચ કૃત્સ્નશઃ ॥

૮૨. હરિવ્રજં મેરુશૃઙ્ગં મૈનાકં ક્ષીરસાગરમ્ ।
કેતુમાલં નાગચૂડં ઇન્દ્રગોલં બૃહદ્વનમ્ ॥

૮૩. શૈબ્યં પ્રણવકેતં ચ ભોગસ્થાનાનિ વૈ દશ ।
અન્યત્ર ભારતાત્ વર્ષાત્ એતાનિ કિલ વૈ મુને ॥

૮૪. તથા હિ ભારતે વર્ષે કૃત્વા કર્માણિ ભૂરિશઃ ।
તેષાં ફલાનિ ભુઞ્જન્તે મુનયોઽન્યત્ર નિર્મલાઃ ॥

૮૫. અત એવ કિલૈતેષાં ભોગભૂમિત્વમિષ્યતે ।
કૃતાનાં કર્મણામેષુ ફલં કર્મ સમીરિતમ્ ॥

૮૬. દશસૂત્તમદેશેષુ પુણ્યેષુ પુરુષોત્તમઃ ।
નિર્ગુણેન સ્વરૂપેણ સાન્નિધ્યં કુરુતે સદા ॥

૮૭. અત એવ ન કુર્વન્તિ કર્માણ્યેતાનિ સૂરયઃ ।
વિન્દન્તઃ સુખસંસિદ્ધિં પશ્યન્તઃ પરમં પદમ્ ॥

૮૮. દ્વારકા મથુરા ચૈવ હરિદ્વારં વૃષાચલમ્ ।
સ્યાનન્દૂરં શેષચૈલં કુમ્ભઘોણં ચ રૈવતમ્ ॥

૮૯. શઙ્ખણં ભોગનગરં નૈમિશં ચક્રમોક્ષણમ્ ।
ગજારણ્યં ચ સાકેતં વજ્રકોશં ખગાલયમ્ ।

૯૦. ભાગણ્ડં અચ્છતીર્થં ચ હવિર્ધાનં ચ વામનમ્ ।
વિંશત્યેતાનિ પુણ્યાનિ કર્મસ્થાનાનિ વૈ મુને ॥

૯૧. એતેષુ કિલ કર્માણિ કુર્વતાં વિધિપૂર્વકમ્ ।
સફલા કિલ જાયન્તે સિદ્ધયોઽષ્ટૌ ન સંશયઃ ॥

૯૨. એતેષુ પુણ્યક્ષેત્રેષુ ભગવાન્ હરિરીશ્વરઃ ।
રાજસેન ગુણેનૈવ સાન્નિધ્યં કુરુતે સ્વયમ્ ॥

૯૩. તેષુ કર્મવિશેષેણ સુપ્રીતો મધુસૂદનઃ ।

પાલયિષ્યતિ વૈ ભક્તાન્ ભવભીતાન્ ઇવામૃતમ્ ॥

૯૪. અવિમુક્તં જગન્નાથં શ્રીરઙ્ગં કમલાપુરમ્ ।
નરનારાયણક્ષેત્રં વારાહં સેતુબન્ધનમ્ ॥

૯૫. બ્રહ્મનાભં ચામલકં નાદપઙ્કેરુહં તથા ।
દશૈતાનિ મુનિશ્રેષ્ઠ જ્ઞાનક્ષેત્રાણિ ભૂતલે ॥

૯૬. એષુ સત્વગુણેનૈવ હરિરાસ્તે નિરન્તરમ્ ।
તસ્માત્ તદનુરૂપેણ તત્ત્વજ્ઞાનેન વિદ્યયા ॥

૯૭. સમાધિયુક્તાઃ સેવન્તે સર્વેન્દ્રિયજિગીષવઃ ।
નિર્મુક્તમત્સરાઃ શાન્તાઃ મુનયો મુક્તસંશયાઃ ॥

૯૮. જ્ઞાનપ્રદાનિ ચૈતાનિ મુક્તિસાધનવન્તિ ચ ।
વિમૃશ્ય સેવિતવ્યાનિ ગુણાધિક્યાનિ સૂરિભિઃ ॥

૯૯. પાપીયાન્ વા વસીયાન્ વા યો મૃતો યત્ર મુક્તિભાક્ ।
અવિમુક્તં તત્ ક્ષેત્રં મૃતં મુક્તિર્ન મુઞ્ચતિ ॥

૧૦૦. સુકૃતં દુષ્કૃતં ચૈવ વૃદ્ધિમ્મત્ર ન મુઞ્ચતિ ।
યત્ર શંસન્તિ નિર્બન્ધં કુલસ્તમ્ભે સુદુસ્સહમ્ ॥

૧૦૧. યત્ર જીવતિ વૈ જન્તૌ જ્ઞાનં નોપદિશેત્ ચેત્ શિવઃ ।
અત એવાત્ર વત્સ્યામિ યત્ર નાસ્તિ પરિશ્રમઃ ॥

૧૦૨. બ્રહ્મયોનૌ સમુત્પન્નાઃ શતવારં ધૃતવ્રતાઃ ।
તે લભન્તે જગન્નાથં નાન્યથા લભતે સુખમ્ ॥

૧૦૩. અતો ન સદ્યઃ સુખદં ક્ષેત્રં વૈ પુરુષોત્તમમ્ ।
શ્રીરઙ્ગં ચ તથા ક્ષેત્રમપિ મોક્ષદમુત્તમમ્ ॥

૧૦૪. પ્રાપ્ય રક્ષઃપતિરભૂત્ વિદધાત્મમનોરથઃ ।
તસ્માત્ અત્રાન્તરાયન્તુ શ્રેયસામસ્તિ નિશ્ચયમ્ ॥

૧૦૫. યત્ર સ્થિતાઃ મર્ત્યગણાઃ કામરાગવશાનુગાઃ ।
પ્રચ્યવન્તે સ્વાશ્રમાચારાત્ ભયમેતત્ રમાપુરે ॥

૧૦૬. અત્ર ધર્માણ્યાચરતાં વસુશાપાત્ સુદારુણાત્ ।
ધ્રુવોઽન્તરાયઃ તદ્ભીત્યા શ્રીપુરં મે ન રોચતે ॥

૧૦૭. નરનારાયણક્ષેત્રે મુનિરાસીત્ જનાર્દનઃ ।
સ્વયં જપઃ પ્રકુરુતે જિઘૃક્ષુઃ ફલમુત્તમમ્ ॥

૧૦૮. તત્ત્વોપદેશાઃ સર્વેષાં કર્તુમસ્ય જગત્પતેઃ ।
અભાવાત્ અવકાશસ્ય મનો મે ન પ્રહર્ષતિ ॥

૧૦૯. વરાહે ચ મુનિશ્રેષ્ઠઃ ભૂમિમુદ્વહતામુના ।
સમ્ભ્રામો નામ ગન્ધર્વો રક્ષાર્થે વિનિયોજિતઃ ॥

૧૧૦. તત્રત્યાનાં તુ જન્તૂનાં વાસવિઘ્નકરો યતઃ ।
અતઃ તત્રાપિ વિઘ્નાનાં સમાહારં પ્રતીયતઃ ॥

૧૧૧. યત્રાપ્સુ મજ્જતામબ્ધેર્મહાપાતકકોટયઃ ।
નશ્યન્તિ સહસા નૂનં હિમાનીવાર્કદર્શનાત્ ॥

૧૧૨. માસાત્ ઊર્ધ્વં ધનુષ્કોટ્યાં યે વસન્ત્યપિ વઞ્ચિતાઃ ।
તેષાં સુકૃતજાલાનૈ ભૈરવો ભક્ષયેત્ ધ્રુવમ્ ॥

૧૧૩. અત એવ ચિરં વસ્તુમવકાશવિપર્યયાત્ ।
પરિભ્રમતિ વૈ ચિત્તં ફલલુબ્ધ ઇવાર્ભકઃ ॥

૧૧૪. યત્ર ક્રીડતિ કલ્યાણ્યા રમયા સહ કેશવઃ ।
તત્ર મુક્તિર્નૃણાં નૂનં બ્રહ્મનાભે શ્રુતીરિતમ્ ॥

૧૧૫. તથાપિ સ્વર્ગભોગાનાં ભોક્તવ્યાન્યત્ર સૂરિભિઃ ।
અત એવ વિચારોઽસ્તિ કર્મબન્ધનશઙ્કયા ॥

૧૧૬. તથૈવ સહ્યામલકં વિષ્ણોરાયતનં મહત્ ।
સેવતાં નિયતા મુક્તિરન્તે શ્રુતિસમીરિતા ॥

૧૧૭. નૈવાત્ર વસતાં જ્ઞાનં હરિર્નોપતિ ચેત્ ઇતિ ।
પરિભ્રમતિ ચિત્તં મે દૃષ્ટ્વૌષદિમિવાર્ભકઃ ॥

૧૧૮. અત એવ પરં મન્યે શ્રેયસામુત્તમોત્તમમ્ ।
નાદપદ્મમિદં ક્ષેત્રં નાદબ્રહ્મૈકદર્શનમ્ ॥

૧૧૯. યત્ર સ્થિતાનાં જન્તૂનાં ભજતાં પ્રીતિ પૂર્વકમ્ ।
જ્ઞાનોપદેશં કુરુતે સ્તન્યં માતેવ વત્સલા ॥

૧૨૦. તસ્માત્ ત્વમપિ વિપ્રેન્દ્ર તત્ ક્ષેત્રં યાહિ મા ચિરમ્ ।
તુરીયાશ્રમધર્મેણ વર્તમાનો દિવાનિશમ્ ॥

૧૨૧. જપન્ અષ્ટાક્ષરં મન્ત્રં જ્ઞાનં પ્રાપ્સ્યસિ કેશવાત્ ।
ન લભ્યતે જ્ઞાનવિદ્યા તપસા કેશવં વિના ॥

૧૨૨. વ્યાસઃ –
એતદુક્તં ભગવતા ભવતા કરુણાત્મના ।
પીયૂષમિવ મે પીતં શ્રોત્રાભ્યાં વચનામૃતમ્ ॥

૧૨૩. શ્રુત્વૈનામદ્ભુતાં વાણીં કલ્યાણીં સર્વદેહિનામ્ ।
હૃષ્યામિ પરમાનન્દસુધાકલ્લોલસાગરે ॥

૧૨૪. હૃદયાત્ દૂરતો નષ્ટા ચિત્તસન્તાપસન્તતિઃ ।
સંપ્રાપ્તમદ્ય કલ્યાણં સફલા મે તપઃક્રિયા ॥

૧૨૫. ન તૃપ્તિમુપગચ્છામિ પિબન્નપિ કથાસુધામ્ ।
પ્રાપ્ય હૃષ્યામિ તે પાદં રસાયનમિવાતુરઃ ॥

૧૨૬. ભૂયોઽપિ શ્રોતુમિચ્છામિ કથામેનાં પુરાતનીમ્ ।
કુત્ર વા વર્તતે ક્ષેત્રં તદેતત્ જ્ઞાનસાધનમ્ ॥

૧૨૭. નાદપદ્મમિતિ ખ્યાતં વિષ્ણોરાયતનં મહત્ ।
અદ્ય તત્ ક્ષેત્રમાહાત્મ્યં વક્તુમર્હસિ મે વિભો ॥

૧૨૮. બ્રહ્મા –
પારાશર્ય મહાપ્રાજ્ઞ સર્વશાસ્ત્રવિશારદ ।
શ્રુણુ વક્ષ્યામ્યહં પુણ્યમિતિહાસં પુરાતનમ્ ॥

૧૨૯. પુરા વિશ્વમિદં કૃત્સ્નં સ્રષ્ટુકામોઽહમદ્ભુતમ્ ।
તપસા તોષયન્ દેવં વિશ્વાતીતં પુરાતનમ્ ॥

૧૩૦. તતો વર્ષસહસ્રાન્તે ધ્વાન્તે તપસિ દારુણે ।
તેજઃપુઞ્જં મયા દૃષ્ટં કોટિસૂર્યસમપ્રભમ્ ॥

૧૩૧. તત્તેજો મહદાશ્ચર્યં દુર્નિરીક્ષ્યમહં તદા ।
સભયોઽહં મુનિશ્રેષ્ઠ પ્રણયાત્ અસ્તુવં તદા ॥

૧૩૨. તાવત્તસ્મિન્ મહદ્ધામ્નિ બ્રહ્મણ્યભુદયાસ્પદે ।
સઞ્જજ્ઞે સહસો નાદો મેઘનાદ ઇવાપરઃ ॥

૧૩૩. યસ્તારક ઇતિ ખ્યાતો મન્ત્રો વેદેષુ ગીયતે ।

તમશ્રૌષં મહામન્ત્રં જગતાં બીજપૂરકમ્ ॥

૧૩૪. તદગ્રે પરમં મન્ત્રં અવાપ્યાહ મહામુને ।
અપશ્યદગ્રતો દિવ્યં કમલં તત્ર તેજસિ ॥

૧૩૫. અષ્ટપત્રં સુવર્ણાભં અષ્ટાક્ષરમયં પરમ્ ।
તસ્માદુદગ્ચ્છત્ વદનં હંસં પરમભાસ્વરમ્ ॥

૧૩૬. ચન્દ્રપાણ્ડરવર્ણાભ્યાં પક્ષાભ્યામુપશોભિતમ્ ।
સાક્ષાત્ તત્ત્વાત્મકં ભદ્રમાલોકિતમકલ્મષમ્ ॥

૧૩૭. સસત્યરૂપઃ સહસાભિજાતૈરાલોકનૈરાદિમપાસ્ય ચિત્તાત્ ।
આભાષ્ય મામાહ મુદા સ ભૂમા સૃજસ્વ લોકાનિતિ નાદરૂપી ॥

૧૩૮. અપાસ્ય મોહં મલિનાયમાનં વિચિત્રવાચા વિશદીચકાર ।
તત્ત્વાત્મકં મહ્યમથોપદિશ્ય વ્યક્તં પુનર્મે ગિરમુજ્જહાર ॥

૧૩૯. તાં પૌરુષીં ગાં કથયામિ સત્યાં શ્રુત્યન્તબદ્ધાં મુનિભિર્વિમૃશ્યામ્ ।
શ્રુણુષ્વ વિપ્રેન્દ્ર સુખાનુભૂત્યૈ સુદુર્લભાં ભૂમિતલે નરાણામ્ ॥

૧૪૦. શ્રી ભગવાન્ –
મય્યાવેશ્ય મનો નિત્યં માં યજસ્વ યથાતથમ્ ।
મામેવ ભજતાં નિત્યં દદામિ પરમાં ગતિમ્ ॥

૧૪૧. ઇત્યુક્ત્વા દર્શયામાસ નાદબ્રહ્મસરોરુહમ્ ।
ક્ષેત્રં સ્વકીયં વિમલં મહ્યં મધુનિષૂદનઃ ॥

૧૪૨. પુનરેવાહ માં ભક્તં કૃપયા પુરુષોત્તમઃ ।
આબ્રહ્મસ્તમ્બપર્યન્તં પ્રકટીકૃત્ય ચાત્મનિ ॥

૧૪૩. નાદબ્રહ્મસ્ય મે બ્રહ્મન્ વિશ્વરૂપસ્ય ભાસ્વતઃ ।
એતદેવ પરમં સ્થાનં વિદ્ધિ મદ્રૂપકં પરમ્ ॥

૧૪૪. નિત્યમત્રૈવ વત્સ્યામિ ભક્તાનાં જ્ઞાનદોઽસ્મ્યહમ્ ।
અત્ર માં યે ભજન્ત્યદ્ધા મત્તો વિન્દન્તિ તત્ફલમ્ ॥

૧૪૫. તદેતત્ પરમં ક્ષેત્રં બદ્રૂપં વિદ્ધિ વૈ મુને ।
અત્ર ભક્તાનહં સર્વાન્ પાલયિષ્યે મુહુર્મુહુઃ ॥

૧૪૬. અન્તે સંક્ષીયમાણાનિ ભૂતાનિ મમ તેજસા ।
પશ્યન્નપિ ન મુઞ્ચામિ ક્ષેત્રમેતત્ સુખાવહમ્ ॥

૧૪૭. અપિ મુઞ્ચામિ કમલામપિ મુઞ્ચામિ વૈ ક્ષમામ્ ।
નૈવ મુઞ્ચામ્યહં ભક્તાન્ ક્ષેત્રમેતં ચ શાશ્વતમ્ ॥

૧૪૮. ક્ષેત્રમેતં ન મુઞ્ચામિ મામેતં ચ ન મુઞ્ચતિ ।
પ્રીતિર્ભક્તેષુ મે નૂનં ક્ષેત્રેઽસ્મિન્ ચ તથાવિધે ॥

૧૪૯. દ્વિધા કૃત્વાહમાત્માનં વત્સ્યામિ જગદીશ્વરઃ ।
સ્થૂલરૂપમિદં ક્ષેત્રં મદીયં બોદ્ધુમર્હસિ ॥

૧૫૦. તદન્તર્જ્યોતોષાં રાશિં વિમલં કાઞ્ચનપ્રભમ્ ।
સૂક્ષ્મરૂપમિદં વિદ્ધિ મદીયં ભારતીપતે ॥

૧૫૧. કલ્પે કલ્પે પરિધૂનાન્ ભક્તાનિહ વસન્ અહમ્ ।
પાલયિષ્યામિ સત્યેન જ્ઞાનદાનેન ભૂયસા ॥

૧૫૨. તસ્માદેવેહ માં સર્વાઃ શ્રુતયઃ સૂક્ષ્મયા ગિરા ।
ભક્તપ્રિયં પ્રશંસન્તિ પુરાણાન્યપિ પદ્મજ ॥

૧૫૩. અદ્ય તે નાદરૂપેણ કમલેન સ્વયમ્ભુવા ।
દૃષ્ટવાનસિ માં યસ્માત્ ભૂયાત્ તન્નામકં સ્થલમ્ ॥

૧૫૪. મત્પ્રસાદાત્ ઇદં વિશ્વં વિધાય સચરાચરમ્ ।
મામેવારાધયન્ નિત્યં શાશ્વતીં ભૂતિમશ્નુહિ ॥

૧૫૫. ઇત્થં મામનુશાસ્યાદૌ ભગવાન્ લોકપાવનઃ ।
સ્તૂયમાનો મયા ભક્ત્યા તત્રૈવાન્તરધીયત ॥

૧૫૬. તતોઽહમપિ સંપ્રાપ્ય વિદ્યાં સર્ગોપસાધનીમ્ ।
તમેવ મનસાધાય ભગવન્તમધોક્ષજમ્ ॥

૧૫૭. સૃષ્ટ્વા ચરાચરં વિશ્વં સ્વસ્થો વત્સ્યામ્યહં મુને ।
નૈવાસ્તિ શક્તિર્મે વિદ્યામુપદેષ્ટું તવાધુના ॥

૧૫૮. તસ્માત્ ત્વમપિ વિપ્રેન્દ્ર તદેવ ક્ષેત્રમુત્તમમ્ ।
સંપ્રાપ્ય દેવમારાધ્ય મુક્તો ભવિતુમર્હસિ ॥

૧૫૯. વિન્ધ્યાત્ દક્ષિણભગે તુ પૂર્વે તુ મલયાચલાત્ ।
જ્યોતિષામયનં ક્ષેત્રં નાદામ્ભોરુહસંજ્ઞકમ્ ॥

૧૬૦. યત્ર દેવા સગન્ધર્વાઃ સિદ્ધાશ્ચ પરમર્ષયઃ ।

ઉપાસન્તે સમાગત્ય ભગવન્તં જગત્પતિમ્ ॥

૧૬૧. યત્ર વેદાશ્ચ મન્ત્રાશ્ચ મૂર્તિમન્ત ઉપાસતે ।
તત્ક્ષેત્રમધ્યે કલ્યાણી તામ્રપર્ણી સરિદ્વરા ॥

૧૬૨. સઙ્ગતા યાતિ સિદ્ધાર્થા સાગરં સરિતાં પતિમ્ ।
યત્ર બિન્દુમયી ભૂમિઃ તીર્થં ચાપિ કલાત્મિકમ્ ॥

૧૬૩. અમ્ભોજહંસરૂપેણ સદાધ્યાસ્તે હરિસ્સ્વયમ્ ।
તત્રાભ્યર્ચ્ય હરિં ભક્ત્યા વિધિના મુનયઃ પુરા ॥

૧૬૪. તત્ત્વજ્ઞાનં હરેર્લબ્ધ્વા જીવન્મુક્તાઃ ચરન્તિ હિ ।
તથૈવ રાજર્ષયઃ સમભ્યર્ચ્યાત્ર કેશવમ્ ॥

૧૬૫. તરન્તિ દુસ્તરાં માયાં વૈષ્ણવીં સુખભાગિનઃ ।
બહુના કિં મુનિશ્રેષ્ઠ વક્ષ્યે સારતરં વચઃ ॥

૧૬૬. દધિમન્થાત્ ઇવાનેકાત્ ધૈર્યં ભવમશેષતઃ ।
ચાણ્ડાલાઃ ચ સુરાપાઃ ચ પુલ્કસાઃ ચ પુલિન્દકાઃ ॥

૧૬૭. યે ચાન્યેવાત્ર સઙ્ગત્ય જ્ઞાનં વિન્દન્તિ કેવલમ્ ।
તસ્માત્ ત્વમપિ વિપ્રેન્દ્ર ગત્વા તત્ક્ષેત્રમુત્તમમ્ ॥

૧૬૮. ભજસ્વ પરયા ભક્ત્યા તતો વિન્દત્યભીપ્સિતમ્ ।
તીર્થં વિષ્ણુપદં વિદ્ધિ તદ્ધ્યાનં તીર્થમુત્તમમ્ ॥

૧૬૯. તન્નામકીર્તનં તીર્થં તીર્થં તજ્જનસઙ્ગમમ્ ।
યે ચ વૈ ભગવત્ભક્તાઃ સંસક્તાઃ સાધુચારિણઃ ॥

૧૭૦. એતે હિ તત્ત્વજ્ઞાનસ્ય ભાગિનો નાત્ર સંશયઃ ।
તત્ર ગત્વા ત્વયા બ્રહ્મન્ સમભ્યર્ચ્ય જનાર્દનમ્ ॥

૧૭૧. લઙ્ઘ્યતે વૈષ્ણવી માયા દુસ્ત્યજા દેહિનાં પરા ।
ઇત્થં પ્રસાદમુપલભ્ય વિધેઃ પ્રસન્નાત્
આધિં વિહાય મનસો મલિનત્વહેતુમ્ ।
બદ્ધાઞ્જલિસ્તુતિ પિલાલયન્ સભાયાં
સ્વાન્તં વિભોર્મુનિવરો નિરગાત્ નગેન્દ્રાત્ ॥

ઇતિ સપ્તત્રિંશોઽધ્યાયઃ ।        Pro.Total = 3070 + 171 = 3241.

## અષ્ટત્રિંશોઽધ્યાયઃ

નાદામ્બુજક્ષેત્રે વ્યાસાગમન મ્ ।

૧. પ્રણમ્ય તં સમાપૃચ્છ્ય શિષ્યૈસ્સહ મુદાન્વિતઃ ।
નિષ્ક્રાન્તો બ્રહ્મનગરાત્ હિમવન્તમુપાગમત્ ॥

૨. તત્રાપશ્યત્ વધૂસઙ્ગં વસન્તં વ્યાકુલાત્મકમ્ ।
વ્રણરક્તપરીતાઙ્ગં ક્લિશ્યમાનમિવસ્થિતમ્ ॥

૩. તાઃ ચ દૃષ્ટ્વા દયાવિષ્ટો વિસ્મયોલ્લાસિમાનસઃ ।
ઉપસૃત્ય ચ પપ્રચ્છ કા યૂયમિતિ કૌતુકાત્ ॥

૪. વ્યાસઃ –
કાશ્ચ યૂયં મહાભાગા રુજા જર્જરિતા ઇવ ।
કિં ચ વઃ કરણીયં મે વક્તવ્યં યદિ ભણ્યતામ્ ॥

૫. કન્યકાઃ –
વ્યાસં સત્યવતીસુનું જાનીમઃ ત્વાં મુનીશ્વર ।
ત્વદાગમનતઃ પ્રીતાઃ કથયામઃ ચિકીર્ષિતમ્ ॥

૬. યદપ્સુ મજ્જનાત્ મર્ત્યો મુચ્યતે સર્વકિલ્બિષૈઃ ।
તાશ્ચ તીર્થમયાઃ પુણ્યાઃ ગઙ્ગાદ્યા સરિતો વયમ્ ।
૭. સ્નાત્વા સ્નાત્વાપ્સુ નો મર્ત્યાઃ ત્યજન્ત્યંહઃ સુદારુણમ્ ।
પ્રયાન્તિ પરમં સ્થાનમન્તર્બહિરકલ્મષમ્ ॥

૮. સદ્યોત્સૃષ્ટાનિ પાપાનિ દૂષયન્તિ નઃ તનૂઃ ।
તત્પાપનાશનાયાદ્ય યાસ્યામઃ ક્ષેત્રમુત્તમમ્ ॥

૯. યસ્ય દર્શનમાત્રેણ જન્તવો જગતીતલે ।
વિમુક્તપાપાઃ ગચ્છન્તિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥

૧૦. એષા ગઙ્ગા તુઙ્ગભદ્રા ચૈષા પુણ્યા કલિન્દજા ।
એતાસ્વેકત્ર વિન્દન્તિ ભુક્તિં મુક્તિં ચ માનવાઃ ॥

૧૧. તથાપ્યેતા મહાપુણ્યાઃ તીર્થાન્તરમનામયમ્ ।
સમ્ભૂય પરમં ક્ષેત્રં નાદામ્બુજમુત્તમમ્ ॥

૧૨. ગચ્છન્ત્યનાદિનિધનમાત્મપાપાનુનુત્તયે ।
વ્યાસઃ –

અલં ભવત્યો લોકાનાં સર્વપાપપ્રશાન્તયે ॥

૧૩. તથાપિ કાઙ્ક્ષા યુષ્માકં તીર્થાન્તરનિષેવણે ।
સ્મરણાદેવ પાપઘ્ની ગઙ્ગા ચૈષાં પ્રશસ્યતે ॥

૧૪. કિં પુનર્મજ્જતાં પુંસાં કૈવલ્યાદ્યર્થસાધને ।
તથૈવ યમુના પુણ્યા હરિસાયુજ્યસાધની ॥

૧૫. કવેરજા તીર્થમહો લોકાનાં ભવભેષજામ્ ।
યા ચૈષા નર્મદા પૂર્વં બ્રહ્મલોકવિહારિણી ॥

૧૬. સર્પાણાં માતૃશબ્દાનાં સ્મૃતા તચ્છાન્તિમાતનોત્ ।
તુઙ્ગભદ્રા તથા ચૈષા શ્રીશૈલેશપ્રિયઙ્કરી ॥

૧૭. અસ્યાસ્તુ તીર્થલેશેન નૃણાં નિર્વાણદઃ શિવઃ ।
તથૈવ ચન્દ્રભાગાદ્યાઃ પુણ્યોદાઃ શ્રુતિચોદિતાઃ ॥

૧૮. અષ્ટાદશપુરાણાનિ પુણ્યાન્યાસાં પ્રસઙ્ગતઃ ।
ઇત્થમભ્યુદયાર્થાનાં નદીનાં સ્રોતસામિહ ॥

૧૯. પવિત્રકરણં તીર્થં કુતો જાગર્તિ ભૂતલે ।
એતદ્વિજ્ઞાતુમિચ્છામિ કૌતૂહલકરં પરમ્ ॥

૨૦. વક્તુમર્હત કલ્યાણ્યો મહાનદ્યઃ કૃપાત્મિકાઃ ।
એવં પૃષ્ઠવતિ વ્યાસે કૃષ્ણદ્વૈપાયને મુનૌ ॥

૨૧. ગઙ્ગા સરસ્વતી પ્રાહ વ્યાસં સત્યવતીસુતમ્ ।
ગઙ્ગા –
શ્રુણુ ત્વં વાસવીસૂનો વક્ષ્યમાણં મયાધુના ॥

૨૨. પુરા વિશ્વમિદં સૃષ્ટ્વા વિધાતા સચરાચરમ્ ।
તથૈવ તેષુ મર્યાદાં દ્વિધા ચક્રે બૃહસ્પતિઃ ॥

૨૩. અધર્મમગ્રે સસૃજે તતો ધર્મં સનાતનમ્ ।
દૈતેયાદિત્યોઃ પ્રાદાત્ તૌ ચોભૌ તત્ર ભાગિનોઃ ॥

૨૪. અધર્મં પ્રાપ્ય દૈતેયા મૂઢા હૃષ્ટા પ્રતસ્થિરે ।
દેવાશ્ચ ધર્મમાદાય ગન્તુમેવોપચક્રમુઃ ॥

૨૫. ધર્મલાભાત્ મદાન્ધાનાં દેવાનાં ચ મહાત્મનામ્ ।
કરાત્ વિગલિતો ધર્મઃ પપાત હરિપાદયોઃ ॥

૨૬. તતો દેવાઃ સમાગમ્ય ભ્રાન્તાઃ વિષ્ણુમતોષયન્ ।
સોઽપિ પ્રસન્નો ભગવાન્ દેવદેવો જનાર્દનઃ ॥

૨૭. ધર્મં સ્વપાદયુગલાત્ સસૃજે વિશ્વભૂતયે ।
સૃજ્યમાનઃ તચ્ચરણાત્ ચતુર્ધા સમજાયત ॥

૨૮. તત્ સત્યનામકં જ્યેષ્ઠં દ્વિતીયં તીર્થનામકમ્ ।
તૃતીયં ક્રતુમાહુસ્તત્ ચતુર્થં મન્ત્રમુચ્યતે ॥

૨૯. સત્યાં સુરાણાં વદને ક્રતું તેષાં કરે તથા ।
મન્ત્રં ચકાર જિહ્વાયાં તીર્થમઙ્ગેષુ માધવઃ ॥

૩૦. આહ ચૈતાન્ હરિઃ પ્રીત્યા દેવાનાં હિતકામ્યયા ।
સત્યમુખ્યાઃ તથા યૂયં પાપં હર દેહિનામ્ ॥

૩૧. ઇત્યુક્તવતિ વૈ દેવે પુનઃ પ્રાહુઃ તદીશ્વરમ્ ।
સસત્યા ઇવ શાર્દૂલ કૃતાઞ્જલિપુટાઃ પુરા ॥

૩૨. વયં તદાશાત્ દેહિનામઘસન્તતિમ્ ।
નાશયિષ્યામહે નૂનં નાત્ર કાર્યા વિચારણા ॥

૩૩. કુત્ર વા શુદ્ધિરસ્માકં ભૂયાત્ વિધીયતામ્ ।
એતત્ શ્રુત્વા વચો વિષ્ણુઃ પુનઃ પ્રાહ મુદાન્વિતઃ ॥

૩૪. અત્રાહં તીર્થરૂપેણ શ્રેયસે જગતાં સદા ।
વસામિ બ્રહ્મનિર્વાણં દર્શયન્ સર્વદેહિનામ્ ॥

૩૫. યત્ર સત્વકલાશક્તિર્મામકી પરદેવતા ।
મામેવ તીર્થરૂપેણ તામ્રાખ્યા સમુપાસતે ॥

૩૬. તદેતત્ મામકં ક્ષેત્રં નાદામ્બુજમિતીરિતમ્ ।
પરમાત્મેતિ સર્વત્ર વેદેષુ પરિપઠ્યતે ॥

૩૭. યત્ર માં અર્ચયિષ્યન્તિ સતતં સકલાઃ કલાઃ ।
તત્ર દેવાઃ ચ મે નિત્યં પાદૌ પરિચરન્તિ હિ ॥

૩૮. તત્ર યૂયં સમાગત્ય સત્યમુખ્યાઃ સમન્તતઃ ।
ધૂતપાપાઃ ભવિષ્યન્તિ પ્રત્યબ્દં મત્પ્રસાદતઃ ॥

૩૯. મદાત્મકે માર્ગશીર્ષે વ્યતીપાદેઽરુણોદયે ।

તદા મજ્જન્તિ યે તત્ર તે મુક્તા નાત્ર સંશયઃ ॥

૪૦. તત્ર જપ્તં હુતં દત્તં કૃતં કોટિગુણં ભવેત્ ।
યૂયં તસ્માત્ ઇહાગત્ય ધૂતપાપાઃ ભવિષ્યત ॥

૪૧. ઇત્યાદિષ્ટા ભગવતા સત્યમુખ્યા મહામુને ।
સ્થાનાનિ ભેજિરે સર્વે હરેરાદેશકારિણઃ ॥

૪૨. તદાદિ વયમન્યે ચ સત્યક્રતુપુરસ્સરાઃ ।
ધૂતપાપાઃ ભવિષ્યામઃ પ્રત્યબ્દં હરિદર્શનાત્ ॥

૪૩. સૂતઃ –
ઇત્યુક્તઃ ગઙ્ગાયાઃ વ્યાસઃ તાભિસ્સાકં મુદાન્વિતઃ ।
સંપ્રાપ નાદકમલં સચ્ચિદાનન્દલક્ષણઃ ॥

૪૪. દદર્શ દૂરતો વ્યાસઃ તેજઃપુઞ્જમિવ સ્થિતમ્ ।
ભગવન્તં વાસુદેવં તિષ્ઠન્તં ક્ષેત્રરૂપકમ્ ॥

૪૫. કૃતાઞ્જલિઃ કેવલતત્ત્વદર્શનં પદં હરેઃ પ્રાપ્ય પરાવરાત્ મનઃ ।
દદર્શ તીર્થં પરમં પુરાણં સ્થાનં ચ સાક્ષાત્ પ્રણવાત્મકસ્ય ॥

૪૬. વિચાર્ય નિપુણાં બુદ્ધિં વ્યાસઃ સત્યવતીસુતઃ ।
તત્રૈવ વિશ્વકર્માણં સસ્માર સ્વર્ગવર્ધકિમ્ ॥

૪૭. તાવદાવિરભૂત્તસ્ય પુરસ્તાત્ સંપ્રહર્ષયન્ ।
કિં કૃત્યમિતિ પપ્રચ્છ વિશ્વકર્મા મુનીશ્વરમ્ ॥

૪૮. અત્રૈવ દેવદેવસ્ય વિષ્ણોરભ્યુદયાત્મનઃ ।
મૂર્તિં સંસ્થાપયિષ્યામિ જન્તૂનાં દર્શનક્ષમમ્ ॥

૪૯. સમાનય ભવાનત્ર વિષ્ણોર્મૂર્તિમકલ્મષમ્ ।
ઇત્યુક્તઃ તેન સહસા કૃત્વા તાં મુનયે તદા ॥

૫૦. શુભે મુહૂર્તે દેવસ્ય મૂર્તિં સંસ્થાપ્ય મન્ત્રતઃ ।
પૂજયામાસ વિધિના કલાતીર્થેન માધવમ્ ॥

૫૧. પુષ્પૈશ્ચ તુલસીપત્રૈઃ ધૂપદીપાદિભિસ્તથા ।
તથૈવ પરમાન્નેન પૂજયામાસ વૈ મુનિઃ ॥

૫૨. તાવત્ વ્યોમ્નિ મહાનાસીત્ દેવદુન્દુભિનિસ્વનઃ ।
પુષ્પવૃષ્ટિઃ પપાતોચ્ચૈઃ દેવમુક્તા નભસ્થલાત્ ॥

૫૩. દેવાશ્ચ ઋષયશ્ચૈવ તુષ્ટુવુસ્તં મુનીશ્વરમ્ ।
 દિશઃ પ્રસેદુર્વસુધા સાનન્દાં સમજાયત ॥

૫૪. તતો મુનિઃ પ્રસન્નાત્મા શિષ્યૈઃ સહ મુદાન્વિતઃ ।
 તોષયામાસ વિધિના દેવદેવં જનાર્દનમ્ ॥

૫૫. એવં હરિં પ્રતિષ્ઠાપ્ય્ નાદબ્રહ્મણિ નિર્મલે ।
 તત્રૈવ ભગવાન્ વ્યાસઃ તપશ્ચક્રે સુદારુણમ્ ॥

૫૬. દેવસ્ય પશ્ચિમે ભાગે પીઠે શારદસંજ્ઞિકે ।
 પર્ણશાલાં શિવાં કૃત્વા તત્ર વાસમકલ્પયત્ ॥

૫૭. કલાતીર્થે કૃતસ્નાતઃ તુરીયાશ્રમધર્મતઃ ।
 સર્વત્ર પૂજયામાસ તીર્થે બિમ્બે ચ કેશવમ્ ॥

૫૮. બ્રહ્માણ્ડે યાનિ તીર્થાનિ વર્તન્તે હરિશાસનાત્ ।
 તાન્યાજગ્મુઃ તત્ર તીર્થે આત્મપાપાનુનુત્તયે ॥

૫૯. સર્વતીર્થમયં તીર્થં દૃષ્ટ્વા વ્યાસઃ કૃતાઞ્જલિઃ ।
 ઇમં મન્ત્રં જજાપોચ્ચૈઃ તીર્થાનાં સ્તોત્રમુત્તમમ્ ॥

૬૦. નમોઽસ્તુ તીર્થરાજાય હરિપાદાબ્જભૂતયે ।
 ત્વદમ્ભસાહમાત્માનં ક્ષાલયામિ પ્રસીદ મે ॥

૬૧. મહામઙ્ગલદે માતઃ મલયાદ્રિસમુદ્ભવે ।
 દાતુમર્હસિ મે તીર્થં મજ્જનાત્ મલિનાપહમ્ ॥

૬૨. માયા મલયજા પુણ્યા તામ્રા મુક્તાફલપ્રસૂઃ ।
 ગૌરી મરુદ્વૃધા ગઙ્ગા શિવચૂડા શિવોદ્ભવા ॥

૬૩. સર્વતીર્થેડિતા સત્યા સર્વપાપપ્રણાશિની ।
 જ્ઞાનપ્રદીપિકા નન્દા હરિસાયુજ્યદાયિની ॥

૬૪. ષોડશૈતાનિ નામાનિ તામ્રાયા મુનિપુઙ્ગવઃ ।
 નિત્યં સ્નાત્વા મહાતીર્થે દેવર્ષીનભિપૂજ્ય ચ ॥

૬૫. પૂજયામાસ મન્ત્રેણ મહાપુરુષવિદ્યયા ।
 એવં પૂજયતઃ તસ્ય વેદવ્યાસસ્ય ધીમતઃ ॥

૬૬. અત્યગુઃ ક્રમશો વિપ્રાઃ ક્ષણવત્ શરદાં શતમ્ ।

તતઃ કદાચિત્ ઉત્થાય પ્રાતઃ પ્રયતમાનસઃ ॥

૬૭. વિધાતીર્થે ચ સ સ્નાત્વા યાત્રાં કૃત્વા યથાવિધિ ।
પૂજયામાસ પુરુષં મન્ત્રેણાનેન મન્ત્રવિત્ ॥

૬૮. પૂજાન્તે નિયતો ભૂત્વા કૃતાઞ્જિલપુટઃ શુચિઃ ।
તુષ્ટાવ દેવદેવેશં સ્તોત્રેણ પુરુષોત્તમમ્ ॥

૬૯. વ્યાસઃ –
નમઃપરમશાન્તાય નિગમાન્તઃપ્રબોધિને ।
નિત્યાનન્દરૂપાય યોગિને બ્રહ્મણે નમઃ ॥

૭૦. યોઽસૌ વિભૂતિભિઃ સર્વં આત્મદેહસમુદ્ભવૈઃ ।
આવૃત્ય બહુધા ભાતિ ભૂષણૈરિવ હાટકઃ ॥

૭૧. નામાનિ યસ્ય પુણ્યાનિ જપન્તઃ જન્તવઃ પરમ્ ।
પદં ગચ્છન્તિ કલ્યાણં નમસ્તસ્મૈ મહાત્મને ॥

૭૨. ૐ નમો વાસુદેવાય કૃષ્ણાય પરમાત્મને ।
ભક્તપ્રિયાય શાન્તાય ભક્તિમુક્તિપ્રદાયિને ॥

૭૩. નમો નમઃપઙ્કજલોચનાય નમો નમ;પઙ્કજભૂષણાય ।
ભક્તપ્રિયાયાખિલલોકધામ્ને નમો નમો નાદનવામ્બુજાય ॥

૭૪. સ્તુવતઃ તસ્ય ભક્તસ્ય દેવોઽપ્યાહ કૃતાઞ્જલેઃ ।
ભગવાન્ –
પ્રીતોઽસ્મિ મુનિશાર્દૂલ વ્રિયતાં યદભીપ્સિતમ્ ॥

૭૫. વ્યાસઃ –
અભીપ્સિતં મે ભગવન્ તવ પાદામ્બુજદ્વયમ્ ।
નાન્યં વૃણે શ્રીનિકેતાત્ યાતાયાતશ્રમાદહમ્ ॥

૭૬. ખિન્નોઽસ્મિ કર્મજાલેન પઙ્કાક્રાન્ત ઇવ દ્વિપઃ ।
તસ્માત્ અપારદુઃખાબ્ધેઃ ત્રાતુમર્હસિ માં પ્રભો ॥

૭૭. નાનાયોનિશતારણ્યે ધાવમાનો મુર્મુહુઃ ।
નાન્તં પશ્યામિ ભગવન્ મૃગવન્મૃગતૃષ્ણયા ॥

૭૮. ત્વામખણ્ડપરાનન્દં દુર્દર્શમપિ યોગિનામ્ ।
દૃષ્ટ્વા ભૂયો ન શોચામિ યથા કુરુ તથા વિભો ॥

૭૯. શ્રી ભગવાન્ –
મા શોચથાઃ વિપ્રેન્દ્ર હર્ષં પ્રાપ્નુહિ વૈ ચિરાત્ ।
મદારાધનયુક્તાનાં ન હિ બન્ધનતો બલમ્ ॥

૮૦. યે માં ભજન્તઃ સતતં ભક્ત્યા પરમયા યુતાઃ ।
તેષાં ન જાયતે ક્વાપિ પુનઃ સંસૃતિબન્ધનમ્ ॥

૮૧. યે મામનુકરિષ્યન્તિ તે મામાયાન્ત્યસંશયમ્ ।
અન્તરાત્મનિ સર્વેષાં મયિ ચિત્તં નિવેશ્ય તુ ॥

૮૨. પ્રત્યાહારપરો ભૂત્વા પશ્ય માં યોગમુદ્રયા ।
સર્વદ્વન્દ્વસહઃ શાન્તઃ સર્વત્ર સમદર્શનઃ ॥

૮૩. મામેવ પૂજયાત્માનમત્રૈવ જ્ઞાનવિદ્યયા ।
દત્તં મયા તે નિર્વાણમન્તે વિશ્વસ્ય કેવલમ્ ॥

૮૪. એતન્મે પરમં ક્ષેત્રં યે ભજન્તિ હિ માનવાઃ ।
તેષાં દર્શય મે મુદ્રાં મદીયાં જ્ઞાન રૂપિણીમ્ ॥

૮૫. ઇત્યુક્ત્વા મુનિશાર્દૂલં દેવદેવો જનાર્દનઃ ।
દર્શયિત્વા જ્ઞાનમુદ્રાં તત્રૈવાન્તરધીયત ॥

૮૬. શઙ્ખઃ –
એવમન્તર્હિતે દેવે વ્યાસઃ સત્યવતીસુતઃ ।
અદ્યાપ્યાસ્તે હરિં ભક્ત્યા પૂજયન્ પુરુષોત્તમમ્ ॥

૮૭. તસ્માત્ તત્ક્ષેત્રમાહાત્મ્યં વક્તું વાચામગોચરમ્ ।
જ્ઞાનતોઽજ્ઞાનતો વાપિ તત્ક્ષેત્રં યસ્તુ ગચ્છતિ ॥

૮૮. તેષામજ્ઞાનસમ્ભૂતં બન્ધનં નૈવ જાયતે ।
સ્નાત્વા કલશતીર્થમિદં હિ જન્તુઃ સકૃત્ પ્રપશ્યત્યપિ દેવદેવમ્ ।
ન યાતિ માતુર્જઠરીકરણ્ટં સ મુક્ત એવાત્ર ન ચિન્તનીયમ્ ॥

૮૯. વ્યાસસ્ય સાક્ષાત્ અખિલાત્મમૂર્તેઃ ગુરોરશેષસ્ય ગુણૈકધામ્નઃ ।
શ્રુણ્વન્ ગૃણન્ વાપિ કથામુદારામપાસ્તપાપો ભવિતાચિરેણ ॥

ઇતિ અષ્ટત્રિંશોધ્યાયઃ ।  Pro.Total = 3241 + 89 =3330.

# એકોનચત્વારિંશોઽધ્યાયઃ

રોમશતીર્થપ્રસ્તાવઃ ।

૧. શઙ્ખઃ –
તસ્માત્  ઐન્દ્રીમવષ્ટભ્ય દિશં કિઞ્ચિદદૂરતઃ ।
રોમશાખ્યં મહાતીર્થં દર્શનાદઘનાશનમ્ ॥

૨. યત્તીર્થકણિકામાત્રસંસર્ગાત્ મુક્તબન્ધનાઃ ।
તિર્યઞ્ચોઽપિ પ્રપદ્યન્તે તદ્વિષ્ણોઃપરમં પદમ્ ॥

૩. પુરા શાર્ઙ્ગેણ કથિતાં કથામાકર્ણ્ય રોમશઃ ।
અદ્યાપિ ન ત્યજત્યદ્ધા તીર્થમાહાત્મ્યમિત્યતઃ ॥

૪. તસ્માત્ તત્તીર્થસદૃશં નાસ્તિ તીર્થં વિશિષ્ટતા ।
મનુષ્યત્વેઽપિ દુષ્પ્રાપ્યે જ્ઞાનવિજ્ઞાનસાધને ॥

૫. નૈવ મજ્જન્તિ તત્રૈવ તરતે હ્યાત્મવઞ્ચિતાઃ ।
અસ્વાધીનમિદં વિશ્વં વિધિના કર્મરૂપિણા ॥

૬. વિકૃષ્યતે તત્ર તત્ર બદ્ધ્વા પાશૈરિવ ધ્રુવમ્ ।
સુકૃતં દુષ્કૃતં ચૈવ કર્તું નાલં હિ જન્તવઃ ॥

૭. સ્વકૃતૈઃ સુકૃતૈરેવ પ્રાપ્નોતિ સુકૃતં પુનઃ ।
તથાપિ યત્નઃ કર્તવ્યઃ ધર્મે બુદ્ધિમતા સદા ॥

૮. યતમાનાઃ પ્રપદ્યન્તે પુણ્યતીર્થાનિ માનવાઃ ।
નાન્યથા લભ્યતે કલ્પકોટિભિઃ ચાલ્પતેજસા ॥

૯. રાજા –
ભગવન્ કા કથા તેન કથિતા શાર્ઙ્ગપક્ષિણા ।
કથાં શુશ્રાવ ભગવાન્ રોમશઃ કુત્ર વા મુનિઃ ॥

૧૦. તત્રાશ્રમપદં ચક્રે સ્વાવાસાય કથં પુનઃ ।
એતત્ સર્વમશેષેણ વદ વિસ્તરતો મમ ॥

૧૧. ઇતિ પૃષ્ટો મુનિસ્તેન શઙ્ખયોગી મહીપતિમ્ ।
સમ્ભાવ્ય ભૂયો રાજાનં વ્યાજહાર કથામિમામ્ ॥

૧૨. શઙ્ખઃ –

શ્રુણુ રાજન્ પ્રવક્ષ્યામિ કથાં શુશ્રૂષવે તવ ।
પુરા કદાચિત્ ભગવાન્ રોમશઃ તપસાં નિધિઃ ॥

૧૩. સહ શિષ્યૈઃ સિદ્ધગણૈઃ અન્યૈઃ ચાપિ મહાત્મભિઃ ।
બ્રહ્મલોકાત્ વિનિષ્ક્રમ્ય મેરુમાપ મહીધરમ્ ॥

૧૪. તત્ર ગન્ધવતી નામ વાયોરુદ્યાનવાટિકા ।
કાઞ્ચનૈઃ કદલીષણ્ડૈઃ મહામાણિક્યપાદપૈઃ ॥

૧૫. સુધાસદૃક્ષપાનીયૈઃ તપ્તહાટકપઙ્કજૈઃ ।
મહીસોપાનસમ્પન્નૈઃ વપીકૂપજલાશયૈઃ ॥

૧૬. સર્વર્તુસમ્પદોલ્લાસિમન્દમારુતમઞ્જુલૈઃ ।
અવિમુક્તમહાભાગ્યૈઃ મહામરકતસ્થલૈઃ ॥

૧૭. સર્વાર્તિશાન્તિસામગ્રીં દર્શયન્તીમિવસ્થિતામ્ ।
નાનાપક્ષિગણાકીર્ણાં નાનાસિદ્ધનિષેવિતામ્ ॥

૧૮. તાં પ્રવિશ્ય મહોદ્યાનવાટીં વાતૈકપાલિતામ્ ।
મધુદ્રવાસરસ્તીરે રસાલતરુમૂલકે ॥

૧૯. વાસં ચકાર ભગવાન્ વિશ્રમાય મહામુનિઃ ।
તમેનમુપતસ્થુસ્તે યોગિનો યોગવિત્તમાઃ ॥

૨૦. કથયન્તઃ કથાઃ ચિત્રાઃ તોષયન્તઃ પરસ્પરમ્ ।
તત્રાન્તરે મહારાજ કોઽપિ કાઞ્ચનસન્નિભઃ ॥

૨૧. નભઃ પ્રકાશયન્ ભાસા વિહગઃ પ્રત્યદૃશ્યત ।
પીતલોહિતનીલાભાન્ સ્વપક્ષાન્ વિક્ષિપન્ મુહુઃ ॥

૨૨. અખણ્ડચિત્રકલનમમ્બરે કલયન્ ઇવ ।
પરસ્પરં સમાબદ્ધચરણાઃ વિસ્તૃતચ્છદાઃ ॥

૨૩. પક્ષિસ્વનૈઃ સ્વપક્ષીયાન્ આહ્વયન્તીવ સાદરમ્ ।
તં વિલોક્ય સમાયાન્તં તત્રત્યાઃ તાદૃશાઃ ખગાઃ ॥

૨૪. ઉપગમ્ય સુસમ્ભ્રાન્તાઃ પક્ષૈઃ સંશ્લિષ્ય સૌહૃદાત્ ।
તરુસ્કન્ધે સમાનીય પરિતઃ તં વ્યતસ્થિરે ॥

૨૫. ઉપવિષ્ટં સુવિશ્રાન્તં પ્રેમ્ણા વચનમબ્રુવન્ ।
પક્ષિણઃ સખે સુહૃત્તમાન્ વિહાયાનુચરાન્ ઇમાન્ ॥

૨૬. કુત્ર યાતઃ કિમર્થં વા કથયસ્વ મહામતે ।
સુકુમારં વપુઃ કેન પરિમ્લાનમિદં તવ ॥

૨૭. ચન્દ્રશીતમિદં ગાત્રં સોષ્મલં કેન હેતુના ।
ઇતિ પૃષ્ટઃસુહૃદ્ભિઃ તૈઃ સ પક્ષીપક્ષિપુઙ્ગવૈઃ ॥

૨૮. સ્વવૃત્તાન્તં યથાતત્ત્વં વ્યાજહાર મહીપતે ।
રે રે સુહૃત્તમાઃ કિઞ્ચિત્ આશ્ચર્યં ચરતા મહીમ્ ॥

૨૯. દૃષ્ટં મયા તદ્વક્ષ્યામિ શ◌ૃણ્વન્તુ વિગતજ્વરાઃ ।
યત્ર ચન્દનશૈલેન્દ્રશિખરાત્ નિર્ગતા નદી ॥

૩૦. તામ્રપર્ણીતિ વિખ્યાતા સર્વપાપાપહારિણી ।
વહતે કુમ્ભજમુનેઃ પ્રસાદાત્ દક્ષિણાપથે ॥

૩૧. યદમ્બુપરિણામેન જાયન્તે મણયઃ પરમ્ ।
યત્તોયકણિકા પાનાદપિ કીટોદ્ભિજ્જાતયઃ ॥

૩૨. ગચ્છન્ત્યપુનરાવૃત્તિં તદ્વિષ્ણોઃપરમં પદમ્ ।
તત્ર કાચન ભીમાક્ષી રાક્ષસી વિકૃતાનના ॥

૩૩. પક્ષિપક્ષાવધૂતેન તત્તીર્થજલબિન્દુના ।
વિહાય દેહં વિકૃતં રાક્ષસં ભીમદર્શનમ્ ॥

૩૪. સ્પૃહણીયં ત્રિજગતાં પ્રાપ્ય નારીવપુઃક્ષણાત્ ।
વિમાનવરમારૂઢા ગચ્છન્તી ગગનાઙ્ગણે ॥

૩૫. દૃષ્ટા સમ્ભાષિતા ચાપિ વિસ્મયેનાન્તરાત્મના ।
તદેતદદ્ભુતં વક્તું યુષ્માકં સુહૃદામહમ્ ॥

૩૬. ઇતઃ પરં હિ ગન્તવ્યમસ્માભિઃ સહ બન્ધુભિઃ ।
તત્તીર્થવરમાપ્લુત્ય યાસ્યામિ પરમાં ગતિમ્ ॥

૩૭. કાલાતિપાતો ન કર્તવ્યઃ ગન્તવ્યા દક્ષિણાહરિત્ ।
દ્રષ્ટવ્યો મલયઃ શૈલઃ સેવિતવ્યો ઘટોદ્ભવઃ ॥

૩૮. તામ્રપર્ણી ધર્મતોયા સેવ્યા સર્વમણિપ્રસૂઃ ।
ઇતિ બ્રુવતિ પક્ષીન્દ્રે સાનન્દો રોમશો મુનિઃ ॥

૩૯. શુશ્રૂષુઃ તત્કથાં પુણ્યામુપસૃત્ય તદન્તિકમ્ ।

સમ્ભાવ્ય વાચા વિહગમભ્યભાષત હૃષ્ટવત્ ॥

૪૦. રોમશઃ –
રે રે વિહઙ્ગમમણે સદ્ગુણામૃતવારિધે ।
ધર્મૈકબુદ્ધિર્મય્યેવ યથાબ્ધૌ રત્નસન્તતિઃ ॥

૪૧. ત્વાં મન્યે સત્કુલોદ્ભૂતં ત્વામેવ તપસાં નિધિમ્ ।
વિધેઃ અન્તઃપુરં કિન્તુ વિન્યસ્તં તે મુખામ્બુજે ॥

૪૨. સુસ્પષ્ટવર્ણતા વાચિ કાન્તિર્વપુષિ તૈજસઃ ।
આર્જવં ચ દયાચિત્તે દ્વિજમુખ્યત્વશંસિની ॥

૪૩. ભસ્મચ્છન્નં વહ્નિમિવ ત્વાં મન્યે મુનિસત્તમમ્ ।
કેન કર્મવિપાકેન તિર્યક્ત્વં પ્રાપિતો ભવાન્ ॥

૪૪. નામકર્મકૃતાચારાન્ તવ તત્ત્વેન સામ્પ્રતમ્ ।
જ્ઞાતુમિચ્છામિ સૌહાર્દાત્ પૂર્યતાં મે મનોરથઃ ॥

૪૫. વક્તવ્યં યદિ મા કાલવિલમ્બોઽસ્તુ વિહગ્ગમ ।
કુત્ર દૃષ્ટં ત્વયા પુણ્યં તીર્થં શ્રેયસ્કરં પરમ્ ॥

૪૬. કા વા નિશાચરી મુક્તા મહાપાતકબન્ધનાત્ ।
સમ્ભાષિતા તયા દેવગતિં સંપ્રાપ યા કથા ॥

૪૭. મદર્થં સકલં વ્યક્તમાખ્યાહિ વિહગોત્તમ ।
ઇતિ પૃષ્ટો મુનીન્દ્રેણ તથા પક્ષી વિચક્ષણઃ ॥

૪૮. ઉદ્ધૂય પક્ષિમૂર્ધાનમાનમય્ય સ્ફુટેક્ષણમ્ ।
ઉત્ક્ષિપ્ય દક્ષિણં પાદં વ્યાજહાર સ પક્ષિરાટ્ ॥

૪૯. પક્ષી –
ભગવન્ શ્રૂયતાં વક્ષ્યે મદ્વૃત્તાન્તમશેષતઃ ।
ભગવન્ વિશ્વવૃત્તાન્તવેદિના ભવતાતતમ્ ॥

૫૦. અનુશિષ્ટઃ પ્રવક્ષ્યામિ પુનરુક્તમિવ દ્વિજ ।
પુરા શરદ્વાન્ નામાભૂત્ વૈશ્વાનરકુલોદ્ભવઃ ॥

૫૧. અર્ચિષ્માન્ ઇતિ વિખ્યાતો વેદવેદાઙ્ગપારગઃ ।
તપસામેકમયનં સમ્પદામેકમાશ્રયમ્ ॥

૫૨. આહર્તારં ક્રતૂનાં ચ વક્તારં ચ વેદશાસ્ત્રયોઃ ।

યમેનં સૂરયો વિપ્રાઃ સ્તુવન્તિ ગુરુગૌરવાત્ ॥

૫૩. જ્વાલાવત્યાં ધર્મપત્ન્યાં તપસા સપ્તસૂનવઃ ।
મિત્રોઽરિષ્ટઃ કવિસ્સન્ધિઃ અર્ચિષ્માન્ રોષણઃક્રતુઃ ॥

૫૪. સપ્તૈતે લોકવિખ્યાતાઃ વેદવેદાઙ્ગપારગાઃ ।
ક્રમાત્ ગુરુકુલે વાસં કુર્વન્તો ગૌતમાશ્રમે ॥

૫૫. નિર્યયૌ બહુલઃ કાલઃ અસ્ખલત્ બ્રહ્મચારિણઃ ।
એતસ્મિન્ અન્તરે બ્રહ્મન્ ગુરુરસ્માન્ સમાદિશત્ ॥

૫૬. પઞ્ચલક્ષાદિકાન્તુ ગવાં સંરક્ષણાય વૈ ।
મેરુસાનુષુ રમ્યેષુ તૃણતોયસમૃદ્ધિષુ ॥

૫૭. વયં ગૃહીત લગુડાઃ સન્નદ્ધાસ્તુ પદે પદે ।
વારયન્તો મહાસત્વાન્ સિંહશાર્દૂલસ્ઋાદિકાન્ ॥

૫૮. ઘૃતક્ષીરાદિપાનેન ગુર્વાદિષ્ટેન જીવિતાઃ ।
હાયનાનાં શતં સાગ્રં ક્રમાદેવં હિ યાપિતમ્ ॥

૫૯. તદા જગત્ક્ષોભકરી પ્રાણિપ્રાણાપહારિણી ।
અનાવૃષ્ટિરભૂત્ ઘોરા સાગસ્યાપિ શોષિણી ॥

૬૦. નિસ્તોયા પૃથિવી જાતા વિશીર્ણતૃણવીરુધા ।
ક્ષુધાસંક્ષુણ્ણસર્વાઙ્ગાઃ પતિતા જીવકોટયઃ ॥

૬૧. ક્ષીરાભાવાત્ મૃતા વત્સાઃ વત્સતર્યઃ તતસ્તતઃ ।
નિર્વીર્યા વૃષભાઃ જાતાઃ સહ ગોભિર્મહીતલે ॥

૬૨. ગોકુલે વ્યાકુલે ચૈવ વયમાહારવર્જિતાઃ ।
વિમૃશ્ય બુદ્ધ્યા કર્તવ્યમુપાયં પ્રાણધારણમ્ ॥

૬૩. મૃતાન્ મૃતાન્ પ્રત્યહં હિ સમાનીય પશૂન્ વયમ્ ।
વિધિના તેન માંસેન શ્રાદ્ધં કૃત્વા દિને દિને ॥

૬૪. તચ્છેષેણૈવ જીવન્તઃ સ્થિતાઃ તત્રૈવ નિર્વૃતાઃ ।
સમાસ્વેવં વર્તમાનાઃ સ્વાયુષઃ ક્ષયગૈરવાત્ ॥

૬૫. મહાવ્યાલપરિપ્લુષ્ટાઃ યુગપત્ પઞ્ચતાં ગતાઃ ।
યમસ્ય સદનં નીતાઃ કિઙ્કરૈઃ તીવ્રકારિભિઃ ॥

૬૬. તતો રાજા યમો દૃષ્ટ્વા ધર્મજ્ઞોઽસ્માન્ સમાગતાન્ ।
ચિત્રગુપ્તાદિભિઃ સભ્યૈઃ સમાલોચ્ય મુહુર્મુહુઃ ॥

૬૭. ઉવાચાસ્માન્ ભયાવિષ્ટાન્ વાચા ભેરીગભીરયા ।
યમઃ –
ભોઃ ભોઃ સત્કુલસમ્ભૂતાઃ હ્યધીતસકલાગમાઃ ॥

૬૮. નિર્ણીતાશેષધર્માઃ ચ કૃતવન્તો જુગુપ્સિતમ્ ।
તથાપિ શ્રદ્ધયા શ્રાદ્ધં સમ્યગાચરિતં પુનઃ ॥

૬૯. તતો ગોમાંસભક્ષાણામવાપ્તપિતૃતોષિણામ્(દોષિણામ્) ।
અથ જાતવ્યમધુના ન પશ્યામઃ ક્ષણાન્તરે ॥

૭૦. તસ્માત્ યુષ્માકમાપ્તાનાં ભ્રાતૃણાં સપ્તવારકમ્ ।
તિર્યગ્યોનિમુપાગમ્ય ભોક્તવ્યં કર્મણઃ ફલમ્ ॥

૭૧. તથાપિ પિતૃપૂજાયાઃ પ્રભાવાત્ બ્રહ્મસંસ્મૃતિઃ ।
અસ્તુ ત્રિકાલવિજ્ઞાનવિમલા બુદ્ધિરક્ષયા ॥

૭૨. જન્મદ્વયે ચક્રવાકાઃ ચતુર્વારં મૃગાયને ।
અન્તે શાર્ઙ્ગત્વમાસાદ્ય બ્રહ્મજ્ઞાનપરાયણાઃ ॥

૭૩. રોમશસ્ય ઋષેસ્સઙ્ગાત્ મહાતીર્થાવગાહનાત્ ।
અક્ષયં પરમં સ્થાનમન્તે ગચ્છત મા ચિરમ્ ॥

૭૪. ઇત્થં ધર્મેણ વૈ રાજ્ઞા સમાદિષ્ટાઃ વયં મુને ।
અનુભૂય ક્રમાત્ યોનિં શાર્ઙ્ગં પ્રાપ્તાઃ સુદુઃખિનઃ ॥

૭૫. ચિરમાકાઙ્ક્ષિતં ભાગ્યં ક્રમાત્ યુષ્માત્ સમાગતમ્ ।
ત્વદઙ્ઘ્રિપઙ્કજધ્યાનનિર્ધૂતાશેષકલ્મષાઃ ॥

૭૬. પ્રાપ્સ્યામઃ પરમાં સિદ્ધિં સુધાં લબ્ધ્વામરા ઇવ ।
એતાવત્ અનુભૂતં યત્કર્મજાતં મહામુને ॥

૭૭. તદશેષં સમાખ્યાતં ત્વદાજ્ઞાગૌરવાદિહ ।
તતઃ પરં વક્ષ્યામિ યન્મે દૃષ્ટં ચ કૌતુકમ્ ।
સમાકર્ણય વિપ્રેન્દ્ર સાવધાનેન ચેતસા ॥

ઇતિ એકોનચત્વારિંશોઽધ્યાયઃ । Pro.Total = 3330 + 77 =3407.

## ચત્વારિંશોઽધ્યાયઃ

તત્ર પ્રસ્થાન મ્ ।

૧. શઙ્ખઃ –

કથયિત્વાત્મવૃત્તાન્તં તથ્યમિત્થં સ પક્ષિરાટ્ ।
ભૂયઃ કલિમલાપાયકલનૈકવિનોદનીમ્ ॥

૨. કથાં કન્દલયામાસ રોમશાય મહાત્મને ।
કિઞ્ચિત્ ચઞ્ચલયન્ મૌલિં વિધૂન્વન્ પક્ષિપાલિકામ્ ॥

૩. ઉદ્ધૃત્ય દક્ષિણં પાદં વ્યાજહાર મુનીશ્વરમ્ ।
પક્ષી –
શ્રુણુ બ્રહ્મન્ પ્રવક્ષ્યામિ દૃષ્ટં મે કૌતુકં હિ યત્ ॥

૪. પ્રસાદચન્દ્ર નામાભૂત્ પાણ્ડ્યદેશે મહીપતિઃ ।
આસ્થાનમાગમસ્થાનમાવાસં સર્વસમ્પદામ્ ॥

૫. ત્રય્યાઃ સઙ્કેતસદનં સિન્ધુઃ સૌન્દર્યસમ્પદામ્ ।
યં પ્રશંસન્તિ ગન્ધર્વાઃ વસુધાવાસવં મુહુઃ ॥

૬. યત્કોદણ્ડગુણક્વાણશ્રવણાત્ અરિયોષિતામ્ ।
નિષ્પતન્તિ પરિત્રસ્તા ગર્ભા નિર્ભરબિન્દવઃ ॥

૭. ધર્મજ્ઞઃ વદાન્યઃ ચ યુવા પઞ્ચાસ્યવિક્રમઃ ।
સ રાજા મહતીં કૃત્સ્નાં ભારતી દિગ્જિગીષયા ॥

૮. પરિક્રમ્યાદાય ભૂપેભ્યો ધનમાદાય પુષ્કલમ્ ।
મણલૂરુપુરં પ્રાપ સૈન્યેન મહતા વૃતઃ ॥

૯. તત્ર તત્ વૃત્તમાકર્ણ્ય નાગરાજો મણિધ્વજઃ ।
પરિભૂતઃ શત્રુસઙ્ઘૈઃ તમેનં શરણં યયૌ ॥

૧૦. તમાગતં પૂજયિત્વા પાણ્ડ્યનાથો યથોચિતમ્ ।
પ્રસાદ્ય વાચા નાગેન્દ્રં વ્યાજહાર સકૌતુકમ્ ॥

૧૧. પ્રસાદચન્દ્રઃ –

કસ્ત્વં સખૈરેભિઃ સમાગમનકારણમ્ ।
ત્વયાનીતેન રત્નેન લોકમૂલ્યેન ભૂયસા ॥

૧૨. પ્રીતોઽસ્મિ નિતરાં સાધો કથયસ્વ મનીષિતમ્ ।
યે મામુપાગતાઃ પ્રીત્યા કાઙ્ક્ષન્તઃસ્વમહોદયમ્ ॥

૧૩. તેષાં શતગુણં કામં દાસ્યે કલ્પતરુર્યથા ।
તસ્માત્ કથય તત્ત્વેન કાઙ્ક્ષિતં કૈતવં વિના ॥

૧૪. ઇતિ પૃષ્ટો મહીપેન પ્રસન્નેન્દ્રિયચેતસા ।
સ ભોગિરાજઃ પ્રાહેદં પ્રશસ્ય જગતીપતિમ્ ॥

૧૫. નાગરાજઃ –
મહારાજ સખે સર્વજનતાતાપાપનોદન ।
ત્વયિ ચિત્રં ન પશ્યામિ વદાન્યત્વં મહોદયમ્ ॥

૧૬. શીતલત્વં નિશાનાથે પ્રતાપત્વં દિવાકરે ।
ઉત્તુઙ્ગતા મહામેરૌ ગમ્ભીરત્વં મહોદધૌ ॥

૧૭. વાગ્મિતા ગીષ્પતૌ નિત્યં વદાન્યત્વં સુરદ્રુમે ।
ત્વયિ સર્વગુણાવાસે કથં સ્તોતુમિહોત્સહે ॥

૧૮. વિચાર્ય સુચિરં બુદ્ધ્યા નિશ્ચિતાર્થોઽહમાગતઃ ।
લબ્ધમનોરથાસ્સર્વે પૂર્ણા મે સમ્પદઃ સ્થિરાઃ ॥

૧૯. ત્વદાનનેન્દુસાન્નિધ્યે મયિ તાપઃ કુતો ભવેત્ ।
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ મદાગમનકારણમ્ ॥

૨૦. જાતિસામાન્યવૈરી ચ વૈનતેયઃ ખગેશ્વરઃ ।
અસ્માસુ બન્ધુતાં યાતઃ શેષરાજસુહૃત્તયા ॥

૨૧. અકારણવિરોધેન બાધતે ડમ્ભકોઽસુરઃ ।
ઉધૂટકસ્ય દૈત્યસ્ય કન્યા કનકસુન્દરી ॥

૨૨. રૂપસૌન્દર્યવૈદુષ્યવીર્યયૌવનવત્તયા ।
તત્પુત્રં શારદં નામ્ના ભર્તારમવૃણોત્ પ્રિયા ॥

૨૩. ઉદ્વાહમઙ્ગલે તત્ર સુહૃજ્જનસમાગમે ।
અસૂયાનિર્ભરઃ પાપી સઙ્ગ્રામાય સમાહ્વયત્ ॥

૨૪. તેનાતિબલિના યુદ્ધે વયં સર્વે પરાજિતાઃ ।
ત્વયિ સૌખ્યં હિ મન્વાનાઃ ત્વયિ નિશ્ચિતમાનસાઃ ॥

૨૫. ઇતઃ પરં મહારાજ કર્તવ્યં સુવિચાર્યતામ્ ।

ઇત્યુક્તવતિ વૈ તસ્મિન્ ભુજઙ્ગે શરણાગતે ॥

૨૬. પ્રસાદચન્દ્રો ભૂપાલઃ પ્રહસન્ વાક્યમબ્રવીત્ ।

રાજા –

મા ભૈષ્ટ યૂયં ભોગીન્દ્ર ભવન્તુ સ્થિરચેતસઃ ॥

૨૭. વ્યસનં તેऽપકર્ષામિ નીહારમિવ ભાનુમાન્ ।

અદ્ય તં નાશયિષ્યામિ દાનવં પાપચેતસમ્ ॥

૨૮. ઇત્યુક્ત્વા રથમારુહ્ય સર્વગં મેરુસન્નિભમ્ ।

અકુણ્ઠિતમહાવેગૈરશ્વરત્નૈરલઙ્કૃતમ્ ॥

૨૯. મહાકાર્મુકતૂણીરશક્તિતોમરમુદ્ગરૈઃ ।

સન્નદ્ધઃ કવચી ખડ્ગી પ્રાયાત્ તેન રસાતલમ્ ॥

૩૦. સર્વતઃ કાઞ્ચનાકારા મહી માણિક્યશર્કરા ।

મહાભાગ્યસુસમ્પૂર્ણા સ્વર્ગાદપિ ગરીયસી ॥

૩૧. નન્દનાદિકસૌભાગ્યરુદ્યાનૈઃ મધુગન્ધિભિઃ ।

મહાદાનવસઙ્ઘાતૈઃ મહાભોગીન્દ્રમન્દિરૈઃ ॥

૩૨. ક્રીડન્તીભિર્વધૂભિશ્ચ સમન્તાદુપશોભિતમ્ ।

તત્ર ગઙ્ગમુખી નામ નગરી કાઞ્ચનારુણા ॥

૩૩. યસ્યાં રત્નપ્રભાજાલૈઃ ન જાનન્તિ તમઃ કલામ્ ।

મણિપ્રાકારવલયા મહાદાનવસમાકુલા ॥

૩૪. નિર્મદાખ્યેન દૈત્યેન પાલિતાં બલશાલિના ।

તં બભઞ્જ મહાબાણૈરાશીવિષોપમૈઃ ॥

૩૫. રુદ્રદત્તવરઃ શ્રીમાન્ અભેદ્યકવચો યુવા ।

તત્ર યુદ્ધે મહાઘોરે જિગાયારીન્ સમાગતાન્ ॥

૩૬. તત્ર કોટિસહસ્રાણિ દાનવાનાં મહૌજસામ્ ।

યામાર્થેનૈવ વીરેણ સર્વાન્ જિત્વા મહામુને ॥

૩૭. તદ્દૃષ્ટ્વા કર્મભૂપસ્તુ દુષ્કરં ભુવનત્રયે ।

મહાબલિમુખાસ્સર્વે તેન સખ્યં વિતેનિરે ॥

૩૮. તૈર્મહાદાનવૈસૌખ્યં પ્રાપ્ય રત્નૈર્મહાધનૈઃ ।

પ્રસાદચન્દ્રઃ સન્તુષ્ટઃ સુહૃદં પ્રીતિવર્ધનમ્ ॥

૩૯. મણિધ્વજં સ્થાપયિત્વા સ્વસ્થાને સહ સમ્પદા ।
તમામન્ત્ર્ય યથાન્યાયં મિત્રાનામન્ત્ર્ય દાનવાન્ ॥

૪૦. પ્રતિપ્રયાતે ભૂપાલે સ્વપુરીં તુ જયશ્રિયા ।
અનુવ્રજ્યાનુરાગેણ પ્રાહૈનં મણિધ્વજઃ ॥

૪૧. મહારાજ સખે કિઞ્ચિત્ કર્તવ્યં મમ વિદ્યતે ।
સફલં તુ કરિષ્યાદ્ય સાનુરાગેણ ચેતસા ॥

૪૨. કન્યાઃ ચતસ્રઃ કલ્યાણ્યો વર્તતે મમ વેશ્મનિ ।
તાસુ શેષગુણાભિખ્યાં વિદ્યાસ્વેકતમાં પ્રિયામ્ ॥

૪૩. અઙ્ગીકુરુ મહાલક્ષ્મીમનુરૂપામિવ પ્રભો ।
ઇત્યાકર્ણ્યાનુરાગેણ તથાસ્ત્વિત્યનુમાન્ય તામ્ ॥

૪૪. સ્વરાજધાનીં સંપ્રાપ્તે તે રાજ્ઞિ પ્રાજ્ઞો મણિધ્વજઃ ।
સપુત્રબન્ધુઃ સામાત્ય સહ કન્યાજનેન ચ ॥

૪૫. સહાનીત મહારાજ સર્વભોગસમૃદ્ધિમાન્ ।
તમભ્યર્ચ્યાગતં સ્નિગ્ધં સવાહનપરિચ્છદમ્ ॥

૪૬. સુમુહૂર્તે સુનક્ષત્રે સમાદિષ્ટે પુરોધસા ।
વિવાહોદ્યમં ચક્રે રાજા વિહિતકૌતુકઃ ॥

૪૭. સમાગતેષુ સર્વેષુ જ્વલત્યપિ હુતાશને ।
મણિધ્વજઃ સ્વતનયામલઙ્કૃત્ય મહાધનૈઃ ॥

૪૮. સહસૈવ સમારેભે સહિરણ્યોદપૂર્વકમ્ ।
તાવત્ કન્યાપ્યદૃશ્યાભૂત્ વિદ્યુન્મેઘાન્તરે યથા ॥

૪૯. હા હેતિ કિઞ્ચિદાલભ્ય ધૈર્યચિત્તો મણિધ્વજઃ ।
દ્વિતીયાં દાતુમારેભે સાપિ કન્યા તિરોદધે ॥

૫૦. તૃતીયા તુરીયા ક્વાપિ નષ્ટેવ જનસંસદિ ।
તતઃ શુશોચ નાગેન્દ્રઃ રાજાભ્યન્તરશોચત ॥

૫૧. મહાકષ્ટમિતિ વાચાટા સા સભાભૂત્ ભયાકુલા ।
ચિન્તાક્રાન્તે મહીપાલે નાગેન્દ્રે શોકસમ્પ્લુતે ॥

૫૨. તાવદાવિરભૂત્ વ્યોમ્ના નારદઃ તપસાં નિધિઃ ।

પ્રસાદચન્દ્રઃ તં દૃષ્ટ્વા સમુત્થાય નિજાસનાત્ ॥

૫૩. પ્રણમ્ય પૂજયિત્વૈનં વિસ્મિતો વાક્યમબ્રવીત્ ।
સ્વાગતં તે મહાયોગિન્ સર્વસંશયનાશન ॥

૫૪. ત્વદઙ્ઘ્રિપઙ્કજપ્રાપ્ત્યા કૃતકૃત્યોઽસ્મિ સામ્પ્રતમ્ ।
અભ્યુત્થાનમિદં સર્વં મન્વાનાઃ ચિત્રદર્શનમ્ ॥

૫૫. અસ્પન્દતારકેણાક્ષ્ણા પ્રતીક્ષન્તે સમન્તતઃ ।
પુરાકૃતાનાં તપસાં પચેલિમતયા મુને ॥

૫૬. મન્યે ત્વદ્દર્શનં ભૂયો જાત્યન્ધસ્ય યથા મણિઃ ।
કિં કર્તવ્યં યથા બ્રહ્મન્ કૈઙ્કર્યં પદપદ્મયોઃ ॥

૫૭. મયિ પ્રસીદ બ્રહ્મર્ષે કર્તવ્યોઽનુગ્રહઃ તથા ।
ઇત્યઞ્જલિપુરોત્તંસમૌલિના વ્યાકુલાત્મના ॥

૫૮. પ્રાર્થ્યમાનો મુનિઃ પ્રાહ રાજાનં તત્ર સંસદિ ।
સૈષા પરિષ્કૃતા સંસદ્ ચક્રાકારો વ્યતિષ્ઠત ॥

૫૯. ઇત્થં મુનીન્દ્રાગમનોત્સવેન તરઙ્ગિતાનન્દસુધાશયાનામ્ ।
સમાગતાનાં હૃદયં જનાનાં બ્રહ્માનુભૂત્યેવ સમાધિભાજામ્ ॥

ઇતિ ચત્વારિંશોઽધ્યાયઃ । Pro.Total = 3407 + 59 =3466.

## એકચત્વારિંશોઽધ્યાયઃ

રોમશતીર્થવૈભવવર્ણન મ્ ।

૧. પક્ષી –
તપોધન મહાભાગ સમાકર્ણય સાદરમ્ ।
વક્ષ્યમાણં મહાખ્યાનં શ◌ૃણ્વતાં વિસ્મયાવહમ્ ॥

૨. ઈદૃશે જનસમ્મર્દે પરમાનન્દનિર્ભરે ।
સમ્ભાવ્ય વાચા રાજાનં વ્યાજહાર સ નારદઃ ॥

૩. મહરાજ મનસ્યેવં મા ચિન્તાં કુરુ શોકતામ્ ।
ત્વયિ ચિન્તાપરે ભોગિરાજે વ્યાકુલચેતસિ ॥

૪. જનેષુ કથ્યમાનેષુ વિસ્મિતેષુ તતસ્તતઃ ।

સમાગતોઽહં કૈલાસાત્ તવ હર્ષવિધિત્સયા ॥

૫. શ્રુણુ વૃત્તાન્તમાશ્ચર્યં સહેતુકમિદં વચઃ ।
પુરા શ્રુતિવરૂધસ્ય તનયા કાપિ કર્કશા ॥

૬. ગણ્ડૂલકા નામ પત્ની બભૂવ સુમતેર્મુનેઃ ।
ધનકામા લુબ્ધચિત્તા શુશ્રૂષન્તી પતિં ગૃહે ॥

૭. નિનાય બહુલં કાલં ધનકામેન ચેતસા ।
કદાચિત્ તદ્ગૃહે બાલો મણિકાઞ્ચનભૂષણઃ ॥

૮. તનયઃ કુરુવિન્દસ્ય મહર્ષેર્ભાવિતાત્મનઃ ।
ફલૈર્ભક્ષ્યવિશેષૈશ્ચ તોષયિત્વા તમર્ભકમ્ ॥

૯. સ્વાન્તર્ગૃહં સમાનીય હત્વા જગ્રાહ ભૂષણમ્ ।
અનભિજ્ઞાતઃ પરૈશ્ચૈનં ગર્તે ચિક્ષેપ દુર્ભગા ॥

૧૦. તન્માતા જનકશ્ચૈવ ભ્રમન્તો વિપિનાન્તરે ।
નદી કચ્છેષુ ગુલ્મેષુ વિવરેષુ તતસ્તતઃ ॥

૧૧. આહ્વયન્તૌ સુતં બાલં બ્રુવન્તૌ નામ તસ્ય તુ ।
બાન્ધવૈઃ ચ પરિભ્રમ્ય ચિરકાલં મહીપતે ॥

૧૨. ક્વાપ્યલબ્ધ્વા પુનર્ગેહં પ્રાપ્ય પત્ન્યા સમન્વિતઃ ।
ઉપતસ્થે દિનેશાનં તં જિજ્ઞાસુર્વિધાનવિત્ ॥

૧૩. તાવત્ તયોઃ સમાચષ્ટ બ્રાહ્મણ્યાભિહિતં રવિઃ ।
તતઃ શાશાપ કોપેન મુનિર્દેવસ્ય સન્નિધૌ ॥

૧૪. યા બાલકં મત્તનયં નિજઘાનાર્થકામુકી ।
સૈષા ચિરતરં કાલં ભવિત્રી પુરુષાદિની ॥

૧૫. ઘોરરૂપા નિરાહારા પ્રાણિપ્રાણાપહારિણી ।
શોકસ્યાન્તમપશ્યન્તી ક્ષુત્ક્ષાન્તા ચરતુ ધ્રુવમ્ ॥

૧૬. ઇત્થં શપ્ત્વા મુનિઃ કોપાત્ સભાર્યઃ સ્વાશ્રમં યયૌ ।
સૈષા કણ્ડૂલકા તાવત્ અપહાય નિજં વપુઃ ॥

૧૭. ભૂવ દુર્ભગાકારા રાક્ષસી ઘોરદર્શના ।
નાગાયુતબલોત્સાહા નીલકુઞ્ચિતમૂર્ધજા ॥

૧૮. પદ્ભ્યાં તાલપ્રમાણાભ્યાં ભુજાભ્યાં ભયદર્શિની ।
 નિજગેહાત્ વિનિષ્ક્રમ્ય તામ્રાયા દક્ષિણે તટે ॥

૧૯. અદ્યાપિ વસતે સર્વપ્રાણિપ્રાણાપહારિણી ।
 અજય્યા સર્વલોકાનાં સર્વેષામપ્યસંશયમ્ ॥

૨૦. તયા શાપોપહતયા બાધિતાઃ મુનયઃ સુરાઃ ।
 ત્વાં મન્યમાનાઃ ત્રાતારં નારાયણમિવાપરમ્ ॥

૨૧. તવોદ્વાહાન્તરાલસ્ય કારણત્વમુપાગતાઃ ।
 ત્વદગ્રે કિલ વર્તન્તે માયચ્છન્ના હિ તાઃ સ્ત્રિયઃ ॥

૨૨. યદાસૌ રાક્ષસી નાશં નીયતે ભવતા વિભો ।
 ભવિષ્યન્તિ તતઃ પ્રીતાઃ દેવાશ્ચ મુનયઃ પરે ॥

૨૩. તવ શ્રેયાંસિ ભૂયાંસિ ભવિષ્યન્તિ ન સંશયઃ ।
 બ્રહ્મવિષ્ણુમુખાસ્ત્વાં વૈ તોષયન્તિ સમ્પદા ॥

૨૪. તાશ્ચ કન્યાઃ સમુદ્વાહ્ય ચિરં જીવિતુમર્હસિ ।
 પક્ષી –
 ઇત્થં નિશમ્ય વચનં મહર્ષેઃ ભાવિતાત્મનઃ ॥

૨૫. પ્રસાદચન્દ્રઃ ભૂપાલઃ તં પ્રણમ્ય મુનીશ્વરમ્ ।
 તથેતિ સમુપામન્ત્ર્ય સભ્યાન્ અન્યાન્ ચ ભૂસુરાન્ ॥

૨૬. આરુરોહ રથં દિવ્યં કામગં પુષ્પકોપમમ્ ।
 જગામ તીરં તામ્રાયાઃ યત્રાસ્તે સા નિશાચરી ॥

૨૭. નીલાઞ્જનશિલાકારાં ગર્જન્તીં ઘનસન્નિભામ્ ।
 નિજઘનેષુણા રાજા વજ્રેણૈવ શતક્રતુઃ ॥

૨૮. તદ્બાણભિન્ના હૃદયાત્ સ્રુવન્તી રુધ્રં બહુઃ ।
 નિપપાત મહાતોયે તામ્રાયા ભીમરાવિણી ॥

૨૯. તત્તીર્થસઙ્ગભૂતાયાઃ રાક્ષસ્યાઃ પશ્યતાં નૃણામ્ ।
 ઉત્પપાત મહત્તેજો વ્યોમ્ના નિર્ભિત્ય મસ્તકમ્ ॥

૩૦. અપૂર્વભૂતરૂપાઙ્ગી નારીકુલમતલ્લિકા ।
 પૂજ્યમાના દેવગણૈઃ સિદ્ધગન્ધર્વકિન્નરૈઃ ॥

૩૧. વિમાનવરમારુહ્ય પ્રયયૌ બ્રહ્મણઃ સભામ્ ।

અનુયાતાય મે સર્વં નિજવૃત્તાન્તમદ્ભુતમ્ ॥

૩૨. કથયિત્વા પુનઃ પ્રાયાત્ ભાનુભાસ્વરવર્ચસા ।
દેવતાભ્યો વરં પ્રાપ્ય પૂજિતાશ્ચ યથોચિતમ્ ॥

૩૩. સ્વરાજધાનીં પ્રયયૌ ભોગિરાજમુખૈર્નૃપઃ ।
તાશ્ચ કન્યાઃ સમુદ્વાહ્ય મણલૂરુપુરેશ્વરઃ ॥

૩૪. વસતે તત્ર રાજર્ષિઃ શ્રિયા કીર્ત્યા સમુજ્જ્વલન્ ।
એતત્ વૃત્તાન્તમાલોક્ય હર્ષમાણોઽહમાગતઃ ॥

૩૫. ભ્રાતૃભ્યઃ કથિતં બ્રહ્મન્ તીર્થમાહાત્મ્યમુત્તમમ્ ।
તામ્રાદર્શનમાહાત્મ્યસમ્ભિન્નાશેષપાતકે ॥

૩૬. મયિ પ્રસાદમાદાતુમાગતોઽસિ મહામુને ।
ઇતઃ પરં ન શોચામિ વયં યેનેહ કર્મણા ॥

૩૭. તદનુષ્ઠાય ભગવન્ પાહિ નઃ પાપસઞ્ચયાત્ ।
ઇતિ પક્ષિમુખાત્ પ્રાપ્તાં કથામાકર્ણ્ય રોમશઃ ॥

૩૮. વિસ્મયં પરમં પ્રાપ સહ સર્વૈર્મહર્ષિભિઃ ।
અભિનન્દ્ય મહાદેવીં સાઞ્જલિં મલયાત્મજામ્ ॥

૩૯. આનન્દસાન્દ્રહૃદયઃ તૂષ્ણીં ક્ષણમતિષ્ઠત ।
બહુમાન્ય પુનઃ શાર્ઙ્ગ સાન્ત્વયાનં કથામૃતૈઃ ॥

૪૦. તૈશ્ચ સાકં મુનિગણૈઃ પક્ષિભિશ્ચ સમન્વિતઃ ।
પ્રતસ્થે દક્ષિણામાશાં દિદૃક્ષુર્મલયાત્મજામ્ ॥

૪૧. અતીત્ય મહદધ્વાનમમ્બરેણૈવ વર્ત્મના ।
આસસાદ મહાતીર્થં તામ્રાયાઃ પરમાદ્ભુતમ્ ॥

૪૨. યત્ર મુક્તિમવાપૈષા રાક્ષસી તીર્થમજ્જનાત્ ।
તત્ર સ્નાનં ચકારાસૌ સહ સિદ્ધૈશ્ચ પક્ષિભિઃ ॥

૪૩. તેષાં તીર્થં દદૌ પ્રીત્યા શાર્ઙ્ગાણાં મન્ત્રભાવિતમ્ ।
વિધિના તેન મુનિના સ્નાપિતઃ પક્ષિણઃ તથા ॥

૪૪. અપહાય મહદ્ઘોરં તિર્યક્રૂપમશોભનમ્ ।
દિવ્યં વપુઃ સમાસાદ્ય પૂજ્યમાનાઃ સુરાસુરૈઃ ॥

૪૫. તં પ્રણમ્ય મુનિશ્રેષ્ઠં સ્તુત્વા સ્તોત્રૈરનેકશઃ ।
અનુજ્ઞાતા મુનીન્દ્રેણ વિમાનમધિગમ્ય તુ ॥

૪૬. પ્રયયુઃ બ્રહ્મસદનં પુનરાવૃત્તિવર્જિતાઃ ।
સર્વે દેવગણાઃ સિદ્ધૈઃ પુષ્પવૃષ્ટિમુચો દિવિ ॥

૪૭. સ્તુવન્તો રોમશમુનિં નમસ્કૃત્ય મહામુનીન્ ।
ઉપસ્પૃશ્ય મહાતીર્થં પ્રયયુઃ સ્વપદાન્યમી ॥

૪૮. તેષુ તેષુ પ્રયાતેષુ સિદ્ધેષુ ચ સુરેષ્વપિ ।
તત્રૈવ શ્રદ્ધયા ભક્ત્યા વિદધે વસતિં મુનિઃ ॥

૪૯. વ્યાસાશ્રમાત્ પૂર્વભાગે તામ્રાયાઃ દક્ષિણે તટે ।
મહાલિઙ્ગં પ્રતિષ્ઠાપ્ય શામ્ભવં મુક્તિસાધનમ્ ॥

૫૦. પૂજયામાસ વિવિધૈઃ સ્તોત્રૈઃ વેદાન્તગર્ભિતૈઃ ।
તત્રેઽપિ કિઞ્ચિત્ પુરતઃ સ્થાપ્ય નારાયણં વિભુમ્ ॥

૫૧. તત્રાપિ પૂજયામાસ યેન પ્રીતોઽભવત્ વિભુઃ ।
ઉભયત્રાપ્યહરહઃ ત્રિવારં મુનિરર્ચયન્ ॥

૫૨. તપઃ ચચાર પરમં શરદામયુતત્રયમ્ ।
અવાપ પરમાં સિદ્ધિં શમ્ભોર્વિશ્વમ્ભરાદપિ ॥

૫૩. તદન્તરે પ્રશસ્તાનિ તીર્થાનિ ચ મહીપતે ।
સ્નાનસંસ્પર્શનધ્યાનદર્શનાન્મુક્તિદાન્યપિ ॥

૫૪. શિવસ્યોત્તરભાગે તુ તીર્થં રોમશસંજ્ઞિતમ્ ।
યત્ર પૂર્વં મૃકણ્ડુશ્ચ જનેઽપિ નિમજ્જનાત્ ॥

૫૫. અવાપ પરમાં સિદ્ધિમશેષજનપૂજિતામ્ ।
તદગ્રે ભૃગુતીર્થં ચ તત્ પૂર્વે શાપમોચનમ્ ॥

૫૬. અનયોશ્ચાપિ માહાત્મ્યં વક્તું વાચામગોચરમ્ ।
તતોઽપિ કિઞ્ચિત્ પુરતો હરેરુત્તરતો મહત્ ॥

૫૭. તચ્ચાપિ રોમશં તીર્થમશેષૌઘાઘનાશનમ્ ।
યત્ર બ્રહ્મા ગુરોઃ તસ્માત્ બ્રહ્મજ્ઞાનમવાપ્તવાન્ ॥

૫૮. તસ્માત્ તાં મહિમાં રાજન્ વક્તું વર્ષશતૈરપિ ।
ન શક્યં શઙ્કરેણાપિ કિં પુનઃ ચેતરૈરપિ ॥

૫૯. અદ્યાપિ ભગવાન્ વિષ્ણુઃ નીલકણ્ઠશ્ચ ભૂપતે ।
વિદધાતે હિ સાન્નિધ્યં લોકાનુગ્રહકારિણૌ ॥

૬૦. નૈવ મુઞ્ચતિ તત્ક્ષેત્રં રોમશઃ સ્વાભિમાનતઃ ।
અદ્યાપિ વર્તતે પ્રીત્યા તપઃ કુર્વન્ અવિશ્રમમ્ ॥

૬૧. ઇત્થં મહારાજ કથા મયોક્તા મહામુનેર્વા મલયાત્મજાયાઃ ।
પ્રપઠ્યતે ભક્તિવિનમ્રબુધ્યા ન તત્ર તાપત્રય ઇતિબાધાઃ ॥

ઇતિ એકચત્વારિંશોઽધ્યાયઃ ।          Pro.Total = 3466 + 61 =3527.

## દ્વિચત્વારિંશોઽધ્યાયઃ

દૌર્વાસતીર્થમાહાત્મ્ય મ્ ।

૧. શ્રીશઙ્ખઃ –
અત્રૈવ રોમશતીર્થે સર્વસિદ્ધિમહોદયે ।
દેવસ્ય પૂર્વભાગે તુ તીર્થં દૈવાસસં મહત્ ॥

૨. યત્ર સ્નાતા નરા રાજન્ પ્રયાન્તિ શિવતુલ્યતામ્ ।
પુરા પુરહરાદેશાત્ અત્રિસૂનુર્મહામુનિઃ ॥

૩. કૃત્વ સ્વનામ્ના તીર્થં ચ સ્થાપ્ય લિઙ્ગં ચ શામ્ભવમ્ ।
ક્રોધાગ્નેઃ ત્રાણમકરોત્ તપસા તત્ર ભૂપતે ॥

૪. રાજા –
ભગવન્ કથમાત્રેયઃ શિવાનુજ્ઞામવાપ્તવાન્ ।
કથં વા સ્થાપયામાસ શિવલિઙ્ગં સ્વસિદ્ધયે ॥

૫. કથં વા ત્રાણં ચક્રે ક્રોધાગ્નેઃ સ્વતપોનિધેઃ ।
એતત્ વિસ્તાર્ય મે બ્રૂહિ શ્રોતું કૌતૂહલં મે ॥

૬. શઙ્ખઃ –
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ પુણ્યમાખ્યાનમુત્તમમ્ ।
યસ્માત્ તચ્છ્રવણાત્ મુચ્યતે સર્વકિલ્બિષૈઃ ॥

૭. પુરા વિરિઞ્ચભવને વસન્તં ભારતીપતિમ્ ।
ઉપાસાઞ્ચક્રિરે સર્વે દેવાશ્ચ ઋષયઃ પરે સભાયા ॥

૮. તત્ર પૌરાણિકાઃ ગાથાઃ પઠન્તિ શૌનકાદયઃ ।
ક્વચિત્ ત્રયીં મહાવિદ્યાં ક્વચિત્ આન્વીક્ષકીમપિ ॥

૯. ક્વચિત્ જજલ્પુઃ ધર્માન્ ચ મન્ત્રશાસ્ત્રં તથાપરે ।
ઉચ્ચરન્તિ ક્વચિત્ બ્રહ્મવિજ્ઞાનમપરે જનાઃ ॥

૧૦. એવં ભગવતઃ તસ્ય બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
સભા સમગ્રસન્નાદા ચકાશે ચિત્રરૂપિણી ॥

૧૧. એવં સર્વેષુ દેવેષુ મિલિતેષુ મહાત્મસુ ।
સુમન્થુનાનુજનેનૈવ કૃત્વા કલહમુત્તમમ્ ॥

૧૨. ક્રોધાન્ધઃ સામ ગાયન્ તુ દુર્વાસા બ્રહ્મસન્નિધૌ ।
અકરોત્ અપસ્વરં ઘોરં સભ્યાનાં દુસ્સહં તદા ॥

૧૩. તૂષ્ણીં સ્થિતેષુ સર્વેષુ સભાયાં શાપશઙ્કયા ।
વીજયન્તી ચામરેણ બ્રહ્માણં પાર્શ્વવર્તિની ॥

૧૪. શબ્દબ્રહ્માત્મિકા વાણી કિઞ્ચિત્ ઉલ્લોલચેતસા ।
જહાસ દન્તજ્યોત્સ્નાભિઃ વિશદીકૃત્ય તાં સભામ્ ॥

૧૫. તતઃ કોપારુણાપાઙ્ગરોચિષા તુ પિશઙ્ગ્ગયા ।
શશાપ ભારતીં દેવીં સ મુનિઃ તામસાર્ભકઃ ॥

૧૬. કુર્વન્ત્યા મેઽવમાનં દુર્વિદગ્ધે સરસ્વતિ ।
મામવિજ્ઞાય દુર્બુદ્ધે હાસં કૃતવતી યતઃ ॥

૧૭. મત્તપોઽગ્નિબલાત્ નૂનં ભવતી નાત્ર સંશયઃ ।
ઇતિ બ્રુવતિ વૈ તમિન્ મુનૌ કોપવશાકુલે ॥

૧૮. ભારતીં સાન્ત્વયામાસ વ્યાજહાર પિતામહઃ ।
મા ભારતિ વરારોહે વૈમનસ્યં પ્રાયાસ્યસિ ॥

૧૯. ક્ષમસ્વ ક્ષમયા યુક્તાઃ લોકપૂજ્યા ભવન્તિ હિ ।
ત્વયિ પ્રતિપ્રયાતાયાં મર્ત્યયોનૌ વરાનને ॥

૨૦. તત્ર ત્વામનુયાસ્યામિ લોકાનાં હિતકામ્યયા ।
તત્ર શાસ્ત્રાણિ ચોદ્દિશ્ય વેદમાર્ગપ્રવર્તને ॥

૨૧. સન્નિવેશ્ય યથાન્યાયં ભુક્ત્વા ભોગાન્ યથેપ્સિતાન્ ।
ચતુષ્ષષ્ટિસમાઃ સ્થિત્વા પુનઃ પ્રાપ્સ્યામહે પરમ્ ॥

૨૨. ઇત્યુક્ત્વા પદ્મભૂર્દેવીં પુનઃ પ્રાહ મુનિં સ્મયન્ ।
અથ સાધો મુનિશ્રેષ્ઠ કિમિષ્ટં તે વિચેષ્ટિતમ્ ॥

૨૩. તપો દાનં દમઃ શૌચ નિયમાશ્ચ યમાઃ તથા ।
અવિવેકવતાં પુંસાં વિમલા ઇતિ વૈ શ્રુતિઃ ॥

૨૪. તથાપ્યભિજ્ઞો મેધાવી ત્વં ન જહાસિ કૃતં ન ભો ।
એતાવતા પ્રકારેણ ભવતા સઞ્ચિતં તપઃ ॥

૨૫. અકાણ્ડે કોપતઃ શ્રેષ્ઠે ગુરુભૂતે વિશેષતઃ ।
સર્વં તે વિમલં યાતં નીહાર ઇવ ભાનુના ॥

૨૬. અતસ્ત્વસ્માત્ દૈવલોકાત્ ભુવમેત્ય મહામુને ।
તીર્થયાત્રાચરો ભૂત્વા ચર વર્ષત્રયં ક્રમાત્ ॥

૨૭. તતો નિર્ધૂતકલુષઃ પુનરેષ્યસિ મત્સભામ્ ।
તેનૈવમનુશિષ્ટઃ તુ મુનિઃ કમલભૂતિના ॥

૨૮. અવતીર્ય બ્રહ્મલોકાત્ ચચાર પૃથિવીમિમામ્ ।
માનસં ચાર્ચપાનીયં નરનારાયણાલયમ્ ॥

૨૯. હરિદ્વારં ગયાં ગઙ્ગાં સરયૂં ચ સરસ્વતીમ્ ।
નૈમિશં ચ કુરુક્ષેત્રં સાકેતં દ્વારકામપિ ॥

૩૦. અવિમુક્તં ચ ગોકર્ણં શ્રીશૈલં પુરુષોત્તમમ્ ।
ક્રમાત્ નિષેવ્ય તીર્થાનિ મુનિરત્રિતનૂર્ભવઃ ॥

૩૧. આસસાદ મહાશૈલં કાલહસ્તીતિ વિશ્રુતમ્ ।
યત્ર પુણ્યા પ્રવહતિ સુવર્ણમુખિની નદી ॥

૩૨. યત્ર શમ્ભુઃ સમધ્યાસ્તે લોકાનાં ક્ષેમહેતવે ।
યત્ર જ્ઞાનપ્રસૂનામ્બા મોક્ષશ્રીઃ મોક્ષકાઙ્ક્ષિણામ્ ॥

૩૩. તત્ર સ્નાત્વા યથાન્યાયં દેવમારાધ્ય શઙ્કરમ્ ।
તપશ્ચચાર ભગવાન્ દુર્વાસઃ તપસાં નિધિઃ ॥

૩૪. જિતેન્દ્રિયઃ જિતક્રોધઃ નિરાહારશ્ચ ભૂપતે ।
ઇત્થં તપસ્યતઃ તસ્ય વ્યતિચક્રામ વત્સરમ્ ॥

૩૫. વરદઃ તસ્ય ભગવાન્ આવિરાસીત્ પુરો વિભુઃ ।

શિવઃ –

પ્રીતોઽસ્મિ તપસા બ્રહ્મન્ વરં દાસ્યામિ ભૂરિશઃ ॥

૩૬. ક્રુધ્દસ્યાપિ તવાક્ષય્યં તપસ્સમ્યગ્ભવિષ્યતિ ।
ઇતો ગત્વા દક્ષિણાશાં મલયં ચન્દનાલયમ્ ॥

૩૭. યત્ર પુણ્યદ્રવા નામ નદી મુક્તામણિપ્રસૂઃ ।
પાવયન્તી જગત્કૃત્સ્નં પ્રયાતિ વરુણાલયમ્ ॥

૩૮. તસ્યાં સ્નાત્વા મહાનદ્યામર્ચયિત્વા વિધાનતઃ ।
મય્યર્પિતાનિ પુષ્પાણિ ભાવભક્તિમથાત્ર વૈ ॥

૩૯. તાનિ તામ્રજલે યત્ર દૃશ્યન્તે કૈતવં વિના ।
તત્ર માં સ્થાપયિત્વા ત્વમભ્યર્ચ્ય વિધિપૂર્વકમ્ ॥

૪૦. અનપાયમનુસ્યૂતં મનોરથમવાપ્સ્યસિ ।
ઇત્યુક્ત્વા શઙ્કરઃ તસ્મૈ દદૌ લિઙ્ગમનુત્તમમ્ ॥

૪૧. પ્રેષયામાસ ભગવાન્ અનસૂયાત્મજે શિવઃ ।
ઇત્થં પ્રસાદમાસાદ્ય મુનિઃ કાલગિરીશિતુઃ ॥

૪૨. વિનિર્ગત્ય મહાક્ષેત્રાત્ સંપ્રાપ મલયાચલમ્ ।
બધ્દાઞ્જલિઃ પ્રહ્વતનુઃ સંસ્તુવન્ મલયાત્મજામ્ ॥

૪૩. ક્રમાત્ નિષેવ્ય તીર્થાનિ તીરયોરુભયોરપિ ।
પ્રાર્થિતાભ્યુદયક્ષેત્રં રોમશસ્ય મહાત્મનઃ ॥

૪૪. તં દૃષ્ટ્વા પૂજયામાસ રોમશઃ પ્રીતમાનસઃ ।
તત્ર ત્રિરાત્રમુષિતો મુનિઃ સોમાનુજો મુદા ॥

૪૫. કાર્તિક્યાં કૃત્તિકાયોગે પ્રાતરુત્થાય વાગ્યતઃ ।
પ્રાતઃ સ્નાનાય તામ્રાયાઃ તીરમાપ મહર્ષિણા ॥

૪૬. તથૈવ પુષ્પનિકરં તામ્રાયાઃ સલિલે શુભે ।
દૃષ્ટ્વા મહામુનિઃ પ્રીત્યા પ્રણમ્ય ચ પુનઃપુનઃ ॥

૪૭. સૂક્તૈઃ મણિપ્રસૂં સ્તુત્વા તત્ર સ્નાનં ચકાર સઃ ।
તદા દેવાશ્ચ ઋષયઃ સાધુ સાધ્વિતિ વાદિનઃ ॥

૪૮. મુમુચુઃ પુષ્પવર્ષાણિ બ્રહ્મવિષ્ણુપુરોગમાઃ ।
તાવત્ વૃષભમારુહ્ય ગૌર્યા સહ મહેશ્વરઃ ॥

૪૯. વરાન્ પ્રદાત્ અભદ્રૌઘશમનૈકવિચક્ષણાન્ ।
પ્રાહ ચૈનં શિવઃ પ્રીત્યા (અત્રિસૂનુમ્)રોમશં મુનિપુઙ્ગવમ્ ॥

૫૦. મહામુને તવ ક્વાપિ ન તપઃ સંક્ષયો ભવેત્ ।
અત્ર લિઙ્ગં પ્રતિષ્ઠાપ્ય મામભ્યર્ચ્ય વિધાનતઃ ॥

૫૧. ભૂયઃ પ્રાપ્નુહિ ભદ્રાણિ કાઙ્ક્ષિતાનિ મહામુને ।
ત્વયાત્ર ભક્ત્યા જપ્તેન સૂક્તેનાદ્ભુતરૂપિણા ॥

૫૨. સુપ્રીતા દાસ્યતિ નદી ચન્દનાચલકન્યકા ।
યે પઠન્તિ સ્તુતિમિમાં તીર્થે મજ્જન્તિ તે નરાઃ ॥

૫૩. લભન્તે મત્પ્રસાદેન પુરુષાર્થચતુષ્ટયમ્ ।
ઇત્થં દત્વા વરં તસ્મૈ દેવદેવઃ પિનાકવાન્ ॥

૫૪. સહ દેવૈઃ ભૃત્યગણૈઃ પ્રાયાત્ કૈલાસભૂધરમ્ ।
તતઃ પ્રીતમનાઃ ભૂત્વા દુર્વાસાઃ તપસાં નિધિઃ ॥

૫૫. લિઙ્ગં સ્થાપ્ય તત્તીરે કાલહસ્તીશ્વરાહ્વયમ્ ।
પૂજયન્ સામ્બમવ્યગ્રમનસા શરદાં શતમ્ ॥

૫૬. અદ્યાપિ વસતે રાજન્ સહ શિષ્યૈર્મહામુનિઃ ।
રાજા –
બ્રહ્મન્ કેનૈવ સૂક્તેન સ્તુત્વા મલયનન્દિનીમ્ ॥

૫૭. સ્નાનં ચકાર દુર્વાસાઃ તં મે શંસિતુમર્હસિ ।
શઙ્ખઃ –
મહારાજ પ્રવક્ષ્યામિ રહસ્યં સર્વસિદ્ધિદમ્ ॥

૫૮. એનં દૃષ્ટ્વા તામ્રપર્ણી તસ્મૈ ભાગ્યમકલ્પયત્ ।
યદા પ્રાતઃ પ્રવાહેઽસ્મિન્ કુસુમાન્યુત્થિતાન્યસૌ ॥

૫૯. સદા સન્તુષ્ટહૃદયો બદ્ધાઞ્જલિપુટો મુનિઃ ।
જજાપ પરમં સૂક્તં નાભિદઘ્નજલે સ્થિતઃ ॥

૬૦. દુર્વાસાઃ –
મલયાચલ સમ્ભૂતે મલયાનિલસોદરિ ।
મરુદ્વૃધે મહાભાગે મઙ્ગલાનિ પ્રયચ્છ મે ॥

૬૧. નારાયણિ શિવે ગઙ્ગે ગૌરીદેહસમુદ્ભવે ।
સર્વપાપહરે માતઃ તુભ્યં નિત્યં નમો નમઃ ॥

૬૨. મહાપાપપરિપ્લુષ્ટં દેહં મમ તવામ્ભસા ।
ક્ષાલયામિ જગન્માતઃ મહ્યં નિત્યં પ્રસીદ મે ॥

૬૩. ઇતિ સૂક્તત્રયં જપ્ત્વા સ્નાત્વા તત્તીર્થવારિણા ।
ઉન્મમજ્જ જલાત્તસ્માત્ ધ્યાત્વા મનસિ દેવતામ્ ॥

૬૪. તત્પ્રભાવાત્ આવિરભૂત્ પુરતોઽસ્ય મહામુનેઃ ।
બાલાતપારુણા તન્વી તપનીયવિભૂષણા ॥

૬૫. સ્તૂયમાના દેવગણૈઃ સિદ્ધૈઃ સન્નદ્ધકન્ધરૈઃ ।
પીયૂષમિવ સિઞ્ચન્તી કરુણાપાઙ્ગવીક્ષિતૈઃ ॥

૬૬. મન્દસ્મિતારુચા મુક્તામણિજાલમિવાગ્રતઃ ।
વીણારવોક્તવર્ણેન વાચા પ્રાહ મહામુનિમ્ ॥

૬૭. શ્રીદેવી –
પ્રીતોઽસ્મિ તે મુનિશ્રેષ્ઠ સૂક્તેનાનેન ભૂયસા ।
યે માં સ્તુવન્ત્યનેનૈવ તેષાન્ કામાન્ દદામ્યહમ્ ॥

૬૮. તપોવૃદ્ધિરવિચ્છિના તવ ભૂયાત્ ન સંશયઃ ।
અત્રૈવ ભવતા નિત્યં વસ્તવ્યં પ્રીતયે મમ ॥

૬૯. શિષ્યૈરેભિસ્તપોનિત્યૈઃ શ્રેયસ્તે ભવતિ ધ્રુવમ્ ।
ત્વન્નામ્ના લક્ષિતં તીર્થં યે સેવન્તે તુ જન્તવઃ ॥

૭૦. તેષામિષ્ટાન્ પ્રદાસ્યામિ નાત્ર કાર્યા વિચારણા ।
ઇત્યુક્ત્વાન્તર્દધે દેવી તામ્રા મલયનન્દિની ॥

૭૧. સોઽપિ લબ્ધ્વા વરાન્ ઇષ્ટાન્ દુર્વાસાઃ પ્રીતમાનસઃ ।
તત્રૈવ વસતિં ચક્રે શિષ્યૈઃ સહ મહાતપાઃ ॥

૭૨. ઇત્થં તે કથિતાઃ પુણ્યાઃ કથાઃ દુર્વાસસો મુનેઃ ।
પઠતાં શૃણ્વતાં ચૈવ કામદોગ્ધ્રી ન સંશયઃ ॥

ઇતિ દ્વિચત્વારિંશોઽધ્યાયઃ ।     Pro.Total = 3527 + 72 =3599.

## ત્રિચત્વારિંશોઽધ્યાયઃ

છાયાતીર્થમાહાત્મ્ય મ્ ।

૧. શઙ્ખઃ –
તતોઽપિ પૂર્વદિગ્ભાગે નદ્યાશ્ચૈવોત્તરે તટે ।
છાયાતીર્થં પ્રશંસન્તિ સ્મરણાત્ પાપનાશનમ્ ॥

૨. યત્ર વિદ્યાધરસુતા તપસારાધ્ય પાર્વતીમ્ ।
લબ્ધવત્યાશ્રમં તત્ર દુર્જ્ઞેયમજિતાત્મભિઃ ॥

૩. મહાભાગ્યૈકનિલયં નિવસન્તી તથાશ્રમમ્ ।
પ્રપન્નં પાલયામાસ પાપેભ્યો બ્રહ્મરાક્ષસમ્ ॥

૪. રાજા –
કથં વિદ્યાધરસુતા તપસારાધ્ય પાર્વતીમ્ ।
આશ્રમં પ્રાપ પરમં અક્ષયાશેષમઙ્ગલમ્ ॥

૫. રાક્ષસં પાલયામાસ કો વા કેન ચ હેતુના ।
એતાનિ વદ વિસ્તાર્ય વિમૃશ્ય કરુણાનિધે ॥

૬. શઙ્ખઃ –
વક્ષ્યામિ પુણ્યમાખ્યાનં પૂર્વવૃત્તાન્તદર્શનમ્ ।
યસ્મિન્ શ્રુતિભિરાપૂર્યે વિલયં યાન્તિ બાધકાઃ ॥

૭. પુરા કણ્ડૂલકો નામ સાંવર્તકમુનેસ્સુતઃ ।
સત્યવાક્ સત્યસઙ્કલ્પઃ બ્રહ્મજ્ઞાનવિશારદઃ ॥

૮. તપશ્ચચાર મેધાવી વિન્ધ્યાદ્રે વા નદીતટે ।
તાવત્ દુરાલપા નામ વિધ્યાધરકુમારિકા ॥

૯. મુનિં શુશ્રૂષયામાસ કાલે કાલે યથોચિતમ્ ।
તતો વર્ષસહસ્રાન્તે પ્રીતાત્મા સ મુનીશ્વરઃ ॥

૧૦. પ્રાહ વિદ્યાધરવધૂમન્તિકસ્થાં કૃતાઞ્જલિમ્ ।
કણ્ડૂલકઃ –
કા ત્વં તરુણિ કલ્યાણિ કસ્ય વાસિ પરિગ્રહા ॥

૧૧. કા તે માતા પિતા કો વા કિમર્થં મામુપાગતા ।
તવ શુશ્રૂષયા તન્વિ પ્રીતોઽસ્મિ નિતરામહમ્ ॥

૧૨. વરાન્ વરય ભદ્રં તે દાસ્યામિ ચ મનીષિતમ્ ।
ઇત્થં તેનાનુશિષ્ટા સા સંપ્રીતા પ્રાહ તં મુનિમ્ ॥

૧૩. યક્ષી –
ભગવન્ મમ વૃત્તાન્તં વક્ષ્યમાણં મયાધુના ।
સાવધાનેન મનસા સમાકર્ણય સાદરમ્ ।
૧૪. પુરા કુમુદ્વાન્ નામાભૂત્ વિદ્યાધરજનેશ્વરઃ ।
કુલીનો ધર્મવિદ્વાગ્મી શૂરો વીરજનેડિતઃ ॥

૧૫. તસ્યાહં દયિતા ભાર્યા છાયેવ પરિવર્તિની ।
એવમાવાં ચિરં કાલં ભુઞ્જાનૌ ભાગ્યસમ્પદઃ ॥

૧૬. કદાચિત્ મલયપ્રસ્થં પ્રાપ્ય પુષ્પિતકાનનમ્ ।
ક્રીડતોરાવયોસ્તત્ર રાક્ષસઃ કોઽપિ દારુણઃ ॥

૧૭. કૃપીડો નામ શાલેયઃ પૂર્વવૈરમનુસ્મરન્ ।
નિહત્ય મમ ભર્તારં સ્વયં તેન હતોઽભવત્ ॥

૧૮. ભર્તારમનુગન્તં માં યત્તાં વાગશરીરિણી ।
નિષેધયિત્વા સાન્ત્વય્ય ત્વત્છુશ્રૂષણકર્મણિ ॥

૧૯. નિયોજયામાસ વાણી માં પ્રસાદ્ય ચ પુનઃપુનઃ ।
તદ્વિસ્રમ્ભાત્ મુક્તશોકા ત્વામેવ શરણં ગતા ॥

૨૦. મમ પ્રીતોઽસિ ભગવન્ યદિ દાતું વરં પુનઃ ।
ત્વત્તુલ્યતપસં શાન્તં તનયં દાતુમર્હસિ ॥

૨૧. ઇતિ તસ્યા વચશ્શ્રુત્વા મુનિઃ પરમહર્ષિતઃ ।
તવ કુક્ષૌ મહાતેજા પુત્રો બ્રહ્મવિદાં વરઃ ॥

૨૨. વર્તતે નાત્ર સન્દેહઃ ગચ્છ તન્વિ નિજાલયમ્ ।
ઇતિ લબ્ધ્વા વરં દેવી તં પ્રણમ્ય મુનીશ્વરમ્ ॥

૨૩. સંપ્રતસ્થે સખીયુક્તા સ્વાવાસાય મહીપતે ।
ઉવાસ સ્વગૃહે તન્વી ભૃશમાશ્વાસિતા જનૈઃ ॥

૨૪. તાવત્ વચઃ કુર્વન્ત્યામારાધયિતુમીશ્વરમ્ ।
સર્વે કૌતૂહલધિયા નિર્જગ્મુરમરાલયાઃ ॥

૨૫. ઇન્દ્રાદયો લોકપાલાઃ સર્વે ચાપ્સરસાં ગણાઃ ।
મિલિતાઃ દારાન્તિકારૈઃ સપુત્રજ્ઞાતિબાન્ધવૈઃ ॥

૨૬. સાપિ કણ્ડૂલકા ભક્ત્યા તૈઃ પ્રાપ રજતાલયમ્ ।
સ્તુત્વા નત્વા મહાદેવં (કૃષ્ણ)ચતુર્દશ્યામુપોષિતા ॥

૨૭. પ્રાપ્ય પ્રસાદં શ્રીકણ્ઠાત્ સર્વે જગ્મુર્યથાગતમ્ ।
સાપિ વિદ્યાધરવધૂઃ મુગ્ધા નારી કદમ્બકૈઃ ॥

૨૮. શિવાલયાત્ વિનિષ્ક્રમ્ય તત્પરેઽહનિ સમ્ભ્રમાત્ ।
તુષારશૈલરાજસ્ય દક્ષિણે ચિત્રકાનને ॥

૨૯. મહત્સ્થાણુત્વં નામ સ્થાનં ભૂતપતેર્વિભોઃ ।
તત્રાભ્યેત્ય ક્ષણં સ્થિત્વા વિશ્રાન્તા ગર્ભિણી શનૈઃ ॥

૩૦. મલયં પ્રાપ શૈલેન્દ્રં સખીજનસમાવૃતા ।
અસૂત તનયાં તત્ર ચન્દ્રરેખામિવ પ્રભામ્ ॥

૩૧. તતઃ કુમારિકાં દૃષ્ટ્વા વિદ્યાધરકુમારિકા ।
દુઃખિતા પ્રાહ તાં વીક્ષ્ય વયસ્થા દેવયોષિતઃ ॥

૩૨. કિમિદં પ્રાપ્તમધુના વિપરીતો મનોરથઃ ।
ઋષિવાક્ અપિ વન્ધ્યાભૂત્ દુર્ભગાયાં મયિ ધ્રુવમ્ ॥

૩૩. ઇત્યુક્ત્વા સા સખીયુક્તા નિર્વિણ્ણા નિસ્પૃહા સતી ।
નિધાય દારિકાં ભૂમૌ જાતમાત્રાં વનાન્તરે ॥

૩૪. જગામ તરસા સર્ગં યત્રાસ્તે વસતિર્નિજા ।
તતો રુદન્તીં તાં દૃષ્ટ્વા દયાવિષ્ટા વસુન્ધરા ॥

૩૫. અઙ્કેનાદાય વૈ પ્રાદાત્ સ્તન્યં સ્વમમૃતોપમમ્ ।
તત્પાનાત્ વવૃધે તાવત્ દશવર્ષમયાકૃતિઃ ।
૩૬. પુષ્પાઙ્ગીં પ્રાપ્તચૈતન્યાં બુદ્ધિજ્ઞાન ઘનોદયામ્ ।
તાં કન્યાં પ્રાહ ભૂદેવી સ્વપુત્રીમિવ સંસ્થિતામ્ ॥

૩૭. શ્રીભૂમિદેવી –
વત્સે જીવ ચિરં શ્રેયઃ પ્રાપ્નુમર્હસિ વાઞ્છિતમ્ ।
તવ સન્તુ પુરો નિત્યં કાઙ્ક્ષિતાનિ મમાજ્ઞયા ।
૩૮. તત્ર વસ્તવ્યમારાધ્ય ભવત્યા પરમેશ્વરી ।

યદા યદા માં સ્મરસિ તાવત્ તાવત્ શુભાયતે ॥

૩૯. આગમિષ્યામ્યહં પ્રીત્યા દેવી કામદુઘા યથા ।
ઇત્યુક્ત્વા તાં મહી દેવી કાઞ્ચિત્ વિદ્યાં પ્રદાય ચ ॥

૪૦. તિરોદધે ઘનચ્છન્ના રેખા ચાન્દ્રમસી યથા ।
પ્રવાલમઞ્જરીતલ્પે શયાનાં વનદેવતાઃ ॥

૪૧. તન્નામ્ના ચક્રિરે સર્વાઃ સિદ્ધાશ્ચ પરમર્ષયઃ ।
પ્રવાલમઞ્જરી નામ્ના સાપિ ચક્રે તપો મહત્ ॥

૪૨. ઇત્થમબ્દત્રયે પૂર્ણે સંપ્રીતા શૈલકન્યકા ।
પુરઃ પ્રાદુરભૂત્ તસ્મિન્ પ્રવર્ષન્તી સુધામિવ ॥

૪૩. બાલિકે તે પ્રસન્નાસ્મિ વરં દાતુમિહાગતા ।
મદંશભૂતા ત્વં વત્સે મામકી નાત્ર સંશયઃ ॥

૪૪. ઇતઃ પરં ત્વયા ગત્વા તામ્રાયા ઉત્તરે તટે ।
કુન્દાટવ્યાં નિવસતી તપઃ કુરુ વરાનને ॥

૪૫. વૈરોચનિઃ પુરા યત્ર સ્થાપ્ય લિઙ્ગમનુત્તમમ્ ।
પૂજયામાસ નિયમાત્ અપ્રમત્તઃ પુરોધસા ॥

૪૬. કાવ્યેન શરદાં ત્રીણિ સહસ્રાણિ સમન્વિતઃ ।
અવધ્યત્વં પરૈઃ પ્રાપ દેવદેવાત્ પિનાકિનઃ ॥

૪૭. તસ્માત્ ત્વયાપિ વસ્તવ્યં સહસ્રં શરદાં ક્રમાત્ ।
તત્ર વર્ષસહસ્રાન્તે પુમ્ભાવં લપ્સ્યસે શિવાત્ ॥

૪૮. એવં બ્રુવત્યામમ્બાયાં વિસ્મિતા તા તપસ્વિની ।
પ્રવાલમઞ્જરી પ્રાહ પ્રણતા પરમેશ્વરીમ્ ॥

૪૯. કથમમ્બ ભવિષ્યામિ પુરુષો મહિલા સ્વયમ્ ।
સ્ત્રિયઃ ક્વાપિ ન ગચ્છન્તિ પુમ્ભાવમિતિ મે શ્રુતમ્ ॥

૫૦. એતન્મે સંશયં છિન્ધિ લોકમાતર્દયાનિધે ।
શ્રીદેવી –
શ્રુણુ વત્સે તપઃક્લાન્તે કારણં કથયામ્યહમ્ ॥

૫૧. તવ માત્રા વરો લબ્ધઃ સન્તુષ્ટાત્ મુનિપુઙ્ગવાત્ ।
તવ કુક્ષૌ સુતો ભૂયાત્ ઇતિ તન્ન મૃષા વચઃ ॥

૫૨. તવ માતુરકૃત્યેનાપ્યનભિજ્ઞયા પુરા ।
અધ્વશ્રમાપનોદનાય પ્રવેશાત્ સ્થાણુકાનને ।
૫૩. ગર્ભસ્થોઽપ્યર્ભકસ્તાવત્ ત્યક્તપૌરુષલક્ષણઃ ।
યે વિશન્તિ વનં તાવત્ ભવન્તુ વનિતા ઇતિ ।
(અલઙ્ઘનીયા હિ દેવસ્ય મર્યાદા ભુવનત્રયે ॥)
૫૪. તસ્માત્ ત્વં પુરુષઃ પૂર્વં સ્થાણુકાનનસમ્ભવાત્ ।
નારીભૂતા ચ તદઘં વિજહીહિ કૃતોદ્યમા ॥

૫૫. ઇતિ તચ્છાસનં મૂર્ધ્ના સમાદાય મણિં યથા ।
કુન્દાટવીં સમાસાદ્ય તપસ્તેપે ચ સાદરમ્ ॥

૫૬. સર્વદ્વન્દ્વસહા શાન્તા સંયમ્ય સકલેન્દ્રિયમ્ ।
સ્નાત્વા ત્રિષવણં ભક્ત્યા તામ્રાયા નિર્મલે જલે ॥

૫૭. નિનાય શરદાં સાગ્રં સહસ્રમનપાયિની ।
તતઃ કદાચિત્ આકાશાત્ અઞ્જનાચલસન્નિભઃ ॥

૫૮. મુખેન વિકૃતાકારેણાનન્દેન કૃતાઞ્જલિઃ ।
લમ્બમાનોષ્ઠજિહ્વાગ્રઃ રાક્ષસઃ કોઽપ્યશોભનઃ ॥

૫૯. આસસાદ મહાઘોરઃ પુરતોઽસ્યાઃ જરત્વપુઃ ।
હાહેતિ ભૃશમાલભ્ય તામુવાચ તપસ્વિનીમ્ ॥

૬૦. રાક્ષસઃ –
માતઃ પ્રસીદ કલ્યાણિ વિદ્યાધરકુલાઙ્કુરે ।
પ્રાઞ્જલિં પાહિ માં દીનમનાથં પાપકર્શિતમ્ ॥

૬૧. પરિશ્રાન્તોઽસ્મિ નિતરાં દુષ્કર્મધ્વાન્તગહ્વરે ।
દૈવાત્ ત્વાં શરણં પ્રાપ્તં પાહિ માં કરુણાત્મિકે ॥

૬૨. ઇત્થં વદન્તં પતિતં પાદયોઃ ભીમદર્શનમ્ ।
દૃષ્ટ્વા કિઞ્ચિત્ ભયાવિષ્ટા વ્યવષ્ટભ્ય પુનર્દૃઢમ્ ॥

૬૩. પ્રવાલમઞ્જરી પ્રાહ સાન્ત્વપૂર્વમિદં વચઃ ।
કસ્ત્વં ભદ્ર કુતઃ કેયમવસ્થા તે સમાગતા ॥

૬૪. સર્વં કથય તથ્યેન મયિ ગોપ્યમિતિ ચેત્ ।
રાક્ષસઃ –

શ્રુણુ વક્ષ્યામ્યમ્બ સિદ્ધે મમ વૃત્તાન્તમાદિતઃ ॥

૬૫. પુરા દેવયુગે દેવિ કાશ્યપાન્વયવર્ચસઃ ।
કૌષીતક ઇતિ ખ્યાતો વિપ્રો વેદવિદાં વરઃ ॥

૬૬. આઙ્ગીરસીં સમુદ્વાહ્ય કન્યામઞ્જલિકાહ્વયામ્ ।
ગાર્હસ્થ્યં વર્તયામાસ વિધિના સ્મૃતિતત્ત્વવિત્ ॥

૬૭. એવં તપસ્વિનોઃ કાલે તયોરાસીત્ તનૂભવઃ ।
કુશકેતુરિતિખ્યાતઃ પૂર્વજન્મન્યહં કિલ ॥

૬૮. અતીત્ય વેદશાસ્ત્રાણિ પિત્રોઃ શુશ્રૂષણે રતઃ ।
કલાજાતં સમસ્તં મે વિધેયમભવત્ ક્રમાત્ ॥

૬૯. વિધિના વિહિતા તાવત્ ભૂયિષ્ઠા ભૂરિ દક્ષિણા ।
ગુરુણાનુમતઃ સ્નાનં કર્મ નિર્મિતવાનહમ્ ॥

૭૦. તતઃ પિતા મે સુપ્રીતઃ કર્તું વૈવાહિકીં ક્રિયામ્ ।
ઉદ્યોગમકરોત્ આપ્તૈઃ બન્ધુભિઃ પ્રીતિપૂર્વકમ્ ॥

૭૧. તદા રહો નિષિધ્યાહમુક્તવાન્ પિતરં મમ ।
તાત કોઽયં સમારમ્ભો દારિદ્ર્યોપહતાત્મનામ્ ॥

૭૨. અર્થસાધ્યમિદં વિપ્ર અનર્થઃ કરવામ કિમ્ ।
તસ્માત્ રાજાનમાસાદ્ય તોષયિષ્યે બહુપ્રદમ્ ॥

૭૩. આનયિષ્યામ્યસઙ્ખ્યાતમર્થં સર્વસુખપ્રદમ્ ।
ઇતિ તાતં સમાશ્વસ્ય માતરં ચ તપસ્વિનીમ્ ॥

૭૪. ગત્વા ચ શ્રીધરં નામ્ના રાજાનં મનુનન્દનમ્ ।
અર્થદં સંસદિ પ્રજ્ઞાં વિદ્યાં વિસ્તાર્ય વિસ્મિતમ્ ॥

૭૫. રાજન્ પ્રદેહિ મે વિત્તં યેન તૃપ્તિં ભજામ્યહમ્ ।
ઇતિ પૃષ્ટઃ સ ભૂપાલો મયા વિત્તાનુકાઙ્ક્ષિણા ॥

૭૬. પ્રાદાત્ સ્વદેહતુલિતં મણિકાઞ્ચનસઞ્ચયમ્ ।
પ્રતિગૃહ્ય પુનર્ગેહં નિર્યાતો ભારમુદ્વહન્ ॥

૭૭. શનૈરુત્તીર્ય ચાધ્વાનં વિન્ધ્યં પ્રાપ્તોઽહમદ્ભુતમ્ ।
સઞ્ચારવાન્ પુનઃ શ્રાન્તઃ ક્ષુત્પિપાસાર્તિતઃ પુનઃ ॥

૭૮. કસ્મિંશ્ચિત્ તરુમૂલે વાપીકૂલોપકણ્ઠતઃ ।
ન્યષીદં પરં ગન્તું તદધ્વાનમશક્નુવન્ ॥

૭૯. તત્ર તાવત્ દૈવયોગાત્ કન્યા કાચિત્ સમાગતા ।
માં સમીક્ષ્ય સસ્નેહમિદં વચનમબ્રવીત્ ॥

૮૦. કો ભવાન્ નરવૈદૂર્ય કિમર્થમટવીં ગતઃ ।
કન્દર્પો વાથવા દેવ સિદ્ધો વા માનુષોઽપિ વા ॥

૮૧. ત્વાં દૃષ્ટ્વા વિસ્મયાકારં યુવાનમતિસુન્દરમ્ ।
પરં ગન્તું ન શક્નોમિ કન્દર્પશરપીડિતા ॥

૮૨. ઉપેક્ષસે મામિહ ચેત્ પ્રાણાન્ ત્યક્ષ્યે ન સંશયઃ ।
ઇત્થં વદન્તીં તાં દૃષ્ટ્વા કામરાજકલામિવ ॥

૮૩. કૌતૂહલસમાયુક્તઃ પ્રોવાચમહમઙ્ગનામ્ ।
અદ્ય કલ્યાણિ કથય કૌતુકોત્સાહરૂપિણી ॥

૮૪. મમાપિ વર્તતે બુદ્ધિઃ તવ પ્રતિવિધિત્સયા ।
ત્વદાલોકન સૌભાગ્યાત્ ગતો મેઽથ પરિશ્રમઃ ॥

૮૫. યદાભિલષિતં કાર્યમાવયોરસ્તુ કાનને ।
ઇત્યુક્તવતિ મય્યેષા સમાગત્ય શુચિસ્મિતા ॥

૮૬. સમાશ્લિષ્ય રતિં ચક્રે સૌખ્યં સ્વર્ગેઽપિ દુર્લભમ્ ।
એવં તસ્મિન્ વને દેવિ રમમાણૌ પરસ્પરમ્ ॥

૮૭. કુલોચિતાનિ કર્માણિ વેદશાસ્ત્રોચિતાન્યપિ ।
વિસ્મૃત્ય સહકૈરાધ્યા તદ્વર્ગૈરનુમોદિતઃ ॥

૮૮. રાજ્ઞા દત્તનિ વિત્તાનિ વ્યયીભૂતાનિ કાલતઃ ।
એવં નિવસતોઽટવ્યાં સમ્મિલ્ય ચ વનેચરૈઃ ॥

૮૯. મરણં ચાપિ મે પ્રાપ્તમાશીવિષ ઇવાગ્નિના ।
નીતો વ વૈવસ્વતપુરં કિઙ્કરૈર્ઘોરદર્શનૈઃ ।
૯૦. અનુભૂય ચિરં કાલં નરકાન્ એકવિંશતિમ્ ।
આજ્ઞયા ધર્મરાજસ્ય બ્રહ્મરક્ષોઽભવં તથા ॥

૯૧. મહેન્દ્રાત્ દક્ષિણે ભાગે નિર્જને જલવર્જિતે ।
ક્ષુત્પિપાસાપરિશ્રાન્તઃ શુષ્કકણ્ઠોષ્ઠતાલુકઃ ॥

૯૨. ન પશ્યામિ જલં ક્વાપિ પાતું સ્વચ્છન્દતોઽનઘમ્ ।
પશ્યામિ શાખિનઃ સ્નિગ્ધાન્ ફલપુષ્પોપબૃંહિતાન્ ॥

૯૩. છાયાં તદાપિ મે વસ્તું ન પશ્યામિ મહીતલે ।
માદૃશાઃ બહવઃ સન્તિ ચરન્તો બ્રહ્મરાક્ષસાઃ ॥

૯૪. તે લભન્તે ક્વચિત્ ક્વાપિ અન્નપાનાદિકાન્યપિ ।
અહો પાપસ્ય બાહુલ્યં પશ્યામિ પરમાદ્ભુતમ્ ॥

૯૫. અરણ્યે સન્તિ પક્વાનિ ફલમૂલાદિકાન્યપિ ।
તોયાન્યમૃતકલ્પાનિ વાપીકૂપનદીષુ ચ ॥

૯૬. ઇત્થં મયા શ્રાન્તિજુષા દુઃખિતે નાટતા મહીમ્ ।
ચતુરશીતિ સહસ્રાણિ અષ્ટૌ પઞ્ચશતાન્યપિ ॥

૯૭,વર્ષાણિ વાતવર્ષાણાં સહમાનેન કેવલમ્ ।
વ્યતીતાનિ વિનાહારૈઃ પાનીયૈશ્ચ સમન્તતઃ ॥

૯૮. બહુના કિં પ્રલાપેન શ્રુણુ માતઃ તપસ્વિનિ ।
કેન વા કારણેનાપિ ક્રૌર્યં મે હૃદયં કથમ્ ॥

૯૯. અજ્ઞાનમતિરૌદ્રત્વમપયાતં હૃદિ સ્થિતમ્ ।
પૂર્વજન્મસ્મૃતિર્જાતા કેન વા પુણ્યયોગતઃ ॥

૧૦૦. પૂર્વેષુ ચ યથા જાતા ક્ષુદ્ઘોરા બલશાલિની ।
સુપ્તોત્થિત ઇવારણ્યં પશ્યમાનઃ સમન્તતઃ ॥

૧૦૧. ત્વામગ્રે પરિપશ્યામિ જનનીમિવ સંસ્થિતામ્ ।
શરણં ત્વાં પ્રપન્નોઽહં પાપાન્મોચય મામિહ ॥

૧૦૨. યેન કેનાપ્યુપાયેન ત્રાહિ માં દુઃખસાગરાત્ ।
ઇતિ બ્રુવાણં પતિતં પાતયોઃ ભયવિહ્વલમ્ ॥

૧૦૩. પ્રસાદપૂર્વં પ્રાહેદં વિસ્મિતા બ્રહ્મરાક્ષસમ્ ।
પશ્યન્તી કૃપયા ચૈનં વિદ્યાધરવધૂરિયમ્ ॥

૧૦૪. પ્રવાલમઞ્જરી –
ભદ્ર માસ્તુ મનઃખેદો માવિષાદમુપૈહિ ચ ।
ઇતઃ પરં વિધાસ્યામિ શ્રેયસે તવ કેવલમ્ ॥

૧૦૫. એતત્ હિ પરમં ક્ષેત્રં દયિતં તુ હિ દુહિતુર્ગિરેઃ ।

તયાદ્ર સ્થાપિતો લિઙ્ગો લોકમાત્રા પુરાતનઃ ॥

૧૦૬. અદ્યાપિ લોકરક્ષાર્થૈ જાગર્તિ ભગવાન્ શિવઃ ।
અત્ર તીર્થે મહાપુણ્યે ગૌરીસન્તોષણાય હિ ॥

૧૦૭. આવિર્ભૂતાનિ તીર્થાનિ કોટિશઃ શમ્ભુશાસનાત્ ।
એષા પીયૂષધારાખ્યા ચન્દનાચલકન્યકા ॥

૧૦૮. ગઙ્ગાદિભિર્નદીમુખ્યૈઃ પ્રત્યહં સેવ્યતે મુદા ।
અત્ર શૈલેન્દ્રદુહિતુઃ વક્ષોજઘટસઙ્ગિના ॥

૧૦૯. સંયોગાત્ કુઙ્કુમેનૈતત્ સાનુરાગમિવસ્થિતમ્ ।
પશ્ય તીર્થવરં પુણ્યં દર્શનાત્ ભુક્તિમુક્તિદમ્ ॥

૧૧૦. અત્ર છાયા જલે યસ્ય બિમ્બતા દૃશ્યતે યદા ।
તદા નિર્ધૂતકલુષો જાયતે જન્તુરઞ્જસા ॥

૧૧૧. ઇતિ મહ્યં પુરા ગુપ્તં કથિતં શૈલકન્યયા ।
છાયાસંયોગતઃ તીર્થે તવ પપો વિનાશિતઃ ॥

૧૧૨. મયા સહ મહાતીર્થે સ્નાનં કુરુ વિધાનતઃ ।
અત્રૈવારાધયન્ નૂનં પૂતાત્મા ત્વં ભવિષ્યસિ ॥

૧૧૩. ઇત્યુક્ત્વા રાક્ષસં દેવી વિદ્યાધરવધૂઃ સ્વયમ્ ।
તમેનં સ્નાપયામાસ તસ્મિન્ તીર્થે દયાવતી ॥

૧૧૪. પ્રણામમાચરત્ શમ્ભોઃ અગ્રતઃ ત્રાહિ મામિતિ ।
શિવં પ્રદક્ષિણીકૃત્ય શિવેતિ શિવસન્નિધૌ ॥

૧૧૫. પપાત ગિરિસઙ્કાશો રાક્ષસો ઘોરદર્શનઃ ।
મૂર્ધાનં ચ વિનિર્ભિદ્ય કિઞ્ચિત્ તેજસ્ સમુત્થિતમ્ ॥

૧૧૬. દેવરૂપવપોચ્ચૈઃ કોટિકન્દર્પલક્ષણમ્ ।
આજગ્મુરખિલા દેવાઃ હરિનારાયણાદયઃ ॥

૧૧૭. મુઞ્ચતઃ પુષ્પનિકરં સ્તુવન્તશ્ચ મહેશ્વરમ્ ।
સિદ્ધચારણગન્ધર્વયક્ષવિદ્યાધરોરગાઃ ॥

૧૧૮. દિદૃક્ષવો ભૂતગણાઃ મુનયો નારદાદયઃ ।
વિમાનૈર્નિબિડં વ્યોમ ભૂતૈરન્યૈર્મહીતલે ॥

૧૧૯. એતસ્મિન્નન્તરે તસ્માત્ મહાલિઙ્ગાત્ ઉમાપતિઃ ।
આવિર્બભૂવ પાર્વત્યા કોટિસૂર્યસમદ્યુતિઃ ॥

૧૨૦. ગઙ્ગાધરઃ શશિધરઃ વૃષારૂઢઃ પિનાકધૃત્ ।
સાનુકમ્પં સમભ્યેત્ય વિદ્યાધરસુતામિમામ્ ॥

૧૨૧. પસ્પર્શ પાણિભિઃ પ્રીત્યા શન્તમૈઃ ધરણીપતે ।
નારીભાવં તતો મુક્ત્વા પશ્યતાં સર્વદેહિનામ્ ॥

૧૨૨. ષોડશાબ્દવયાઃ રાજન્ પુમાનાસીત્ મણિપ્રભઃ ।
હા હેતિ તત્ર ગીર્વાણાઃ સિદ્ધાશ્ચ પરમર્ષયઃ ॥

૧૨૩. નેદુરુચ્ચૈર્સ્મયાવિષ્ટાઃ સન્તુષ્ટાશ્ચ બભૂવિરે ।
ત્યક્તસ્ત્રીભાવકાલુષ્યાત્ પ્રાપ્તપુંસ્ત્વેન શોભનઃ ॥

૧૨૪. તુષ્ટાવ પરમેશાનં બદ્ધાઞ્જલિપુટઃ સ્થિતઃ ।
દ્વૈતીભૂય જગત્ પાતિ તસ્મૈ પૂર્ણાય તે નમઃ ॥

૧૨૫. પુરાતનાય પુણ્યાય પુરુષાર્થપ્રદાયિને ।
પુરાન્તકાય ભૂતાનાં પતયે સ્થાણવે નમઃ ॥

૧૨૬. એકતઃ પુરુષાકારમેકતઃ મહિલાત્મકમ્ ।
પ્રપઞ્ચપિતરં વન્દે વન્દે વિશ્વૈકમાતરમ્ ॥

૧૨૭. ક્વચિત્ કર્બુરવર્ણાય ક્વચિત્ કુઙ્કુમમૂર્તયે ।
નીલગ્રીવાય દેવાય નિષ્કલાય નમો નમઃ ॥

૧૨૮. ત્વમાદૌ રજસાવિષ્ટઃ સત્વેનાસૌ જગત્સ્થિતિઃ ।
ત્વમેવાન્તે તુ તાવાત્મન્ ત્વામહં શરણં ગતઃ ॥

૧૨૯. ત્વામાહુઃ શ્રુતયઃ સત્યમવ્યક્તં વ્યક્તમેવ ચ ।
તસ્માત્ ત્વાં જગદાધારં પ્રણતોઽસ્મિ સદાશિવમ્ ॥

૧૩૦. તત્તત્કર્મફલપ્રાપ્ત્યૈ યદાજ્ઞારૂઢમૌલિનઃ ।
બ્રહ્માદ્યાઃ સકલાઃ દેવાઃ  તસ્મૈ પૂર્ણાત્મને નમઃ ॥

૧૩૧. નમશ્શિવાય શાન્તાય નમસ્સોમાર્ધધારિણે ।
નમસ્સકલકલ્યાણસૌભાગ્યામરશાખિને ॥

૧૩૨. શેખરીકૃતપીયૂષનિધયે નિધયે નમઃ ।
યદેકમમલં બ્રહ્મનિર્ગુણં પરમાદ્ભુતમ્ ॥

૧૩૩. નમઃ પરાય સર્વેષાં ભાસ્કરાય નમો નમઃ ।
ઇત્થં સ્તુવન્તં પ્રણતં કૃતાઞ્જલિમુપસ્થિતમ્ ॥

૧૩૪. પુનઃ પ્રાહ મહાદેવઃ પ્રણતાર્તિપ્રભઞ્જનઃ ।
વત્સ ધર્મભૃતાં શ્રેષ્ઠ શ્રેષ્ઠઃ ત્વમસિ દેહિનામ્ ॥

૧૩૫. સ્તોત્રેણ તપસા ચૈવ પ્રીતોઽસ્મિ નિતરામહમ્ ।
તવ નિત્યા તુ ગાન્ધર્વવિદ્યા કૌતૂહલાવહા ॥

૧૩૬. તવ સન્ત્વક્ષયા ભોગાઃ સર્વલોકેષુ સર્વદા ।
ત્વયા યત્ દ્રોહતઃ પાપાત્ રાક્ષસત્વાત્ વિગર્હિતઃ ॥

૧૩૭. સખા તે ભવિતા નિત્યં યાવદાભૂમિસમ્પ્લવમ્ ।
સાયુજ્યં યુવયોરન્તે દાસ્યામ્યહમસંશયમ્ ॥

૧૩૮. ત્વાં દૃષ્ટ્વા પ્રાપ્તમુમ્ભાવં બ્રહ્માદ્યા સકલાસ્સુરાઃ ।
હા હેતિ વિસ્મયાત્ પ્રોચુઃ તસ્માત્ હાહેતિ નામવાન્ ॥

૧૩૯. પૂજ્યમાનૈસ્સમસ્તૈસ્ત્વં ત્વં ગન્ધર્વો ભવિષ્યસિ ।
અવિચ્છન્નોઽનુહાર્દત્વાત્ અવિમુક્તઃ સુહૃત્તયા ॥

૧૪૦. હૂહૂ નામ સખા તેઽસ્તુ તુલ્યભોગ સ્વયંસખઃ ।
અતઃ સ્નાત્વા મહાતીર્થે માં પશ્યન્તિ સકૃન્નરાઃ ॥

૧૪૧. તે ભુક્ત્વા ચિરં ભોગાન્ અન્તે માં યાન્તુ કેવલમ્ ।
ઇત્યુક્ત્વાન્તર્દધે દેવે તૌ ચ દેવૈરભિષ્ટુતૌ ॥

૧૪૨. વિમાનવરમારૂઢૌ સમાયાતૌ સુરાલયમ્ ।
ઇત્થં કથામખિલકલ્મષમોહહન્ત્રીં
પુણ્યાં શિવાં પુરહરસ્ય ચ તીર્થમૂર્તેઃ ।
શ્ૃણ્વન્ પઠન્ અપિ દિનેષુ મહોદયેષુ
નિર્મુક્તપાપકલુષો ભવતીહ મર્ત્યઃ ॥

ઇતિ ત્રિચત્વારિંશોઽધ્યાયઃ । Pro.Total = 3599 + 142 =3741.

## ચતુશ્ચત્વારિંશોઽધ્યાયઃ

જ્યોતિર્વનમાહાત્મ્ય મ્ ।

૧. ઇત્થં નિગદ્ય ધર્માત્મા શઙ્ખયોગી મહીભુજે ।
કથાં કર્ણૈકપીયૂષાં દોષાપાયધુરન્ધરામ્ ।
૨. ભૂયો રાજાનમાભાષ્ય પુનર્વક્તુમુપચક્રમે ।
પુરા વૃત્તમાખ્યાનં પુણ્યાનામિવ કન્દલમ્ ॥

૩. શઙ્ખ ; –
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ પુરા વૃત્તાં કથામિમામ્ ।
શ‍ૃણ્વતાં પઠતાં ચાપિ પુરુષાર્થોદયાવૃતામ્ ॥

૪. પુરા દેવયુગે દેવી દેવદેવસ્ય વલ્લભા ।
ઉમા કદાચિત્ કૈલાસે કનકોજ્જ્વલમણ્ડપે ॥

૫. સંસ્થિતાઙ્ગે મહેશસ્ય ભક્તાનાં દર્શનં દદૌ ।
તદા પાણ્ડ્યમહીપસ્ય તપસા તુષ્ટમાનસા ॥

૬. દેવં વિજ્ઞાપયામાસ અવસ્થાં પાણ્ડ્યભૂપતેઃ ।
દેવેદાનીં પરિશ્રાન્તે ભક્તે પાણ્ડ્યમહીભુજિ ॥

૭. અવિલમ્બં પ્રદાતવ્યં કાઙ્ક્ષિતં પરમેશ્વર ।
ઇતિ દેવ્યા વચઃ શ્રુત્વા સ્મયમાનો મહેશ્વરઃ ॥

૮. વ્યાજહાર પુનર્દેવીં ભક્તાનાં હિતકામ્યયા ।
લોકમાતઃ શ્રુણુષ્વાત્ર ત્વમેવ જગતાં પ્રસૂઃ ॥

૯. ત્વયૈવાભિમતો દેયો ભૂપતેરસ્ય ભામિનિ ।
પુત્રીભૂતા ત્વમસ્યૈવ શ્રેયઃ કુરુ કુલોચિતમ્ ॥

૧૦. અહં ત્વામુપયાસ્યામિ તવ પ્રીતિ વિધિત્સયા ।
ઇત્યાદિષ્ટા ભગવતા મલયધ્વજભૂપતેઃ ॥

૧૧. કન્યા તટાતકા નામ્ના સઞ્જજ્ઞે સાપ્યયોનિજા ।
ત્રિસ્તની દિવ્યસૌભાગ્યશીલોદારગુણાન્વિતા ॥

૧૨. સાધ્વીં રાજપદે ચક્રે સ ભૂપાલઃ પ્રહૃષ્ટવાન્ ।
અભિષિચ્ય સુતાં બાલામનપત્યાઘસઞ્ચયાત્ ॥

૧૩. વિમુક્તોઽપ્યટવીમેત્ય તતસ્તપ્ત્વા સુદારુણમ્ ।
સમિયાય ચિરેણૈવ શિવસાયુજ્યમઞ્જસા ॥

૧૪. સૈષા બાલાપિ સર્વજ્ઞા રાજસિંહાસનસ્થિતા ।
શશાસ વસુધાં કૃત્સ્નાં પારાવારવરાં પરામ્ ॥

૧૫. વિજિત્ય લોકપાલાન્ ચ મહેન્દ્રવરુણાદિકાન્ ।
યત્પ્રતાપાગ્નિસન્તપ્તા ભૂપાલા ભીતિસમ્પ્લવે ॥

૧૬. નિમજ્જન્તઃ કરં દત્વા જીવનં યાપયામાસુઃ ।
યદાલોકનલેશેન તિરોધત્તે પયોધરઃ ।
૧૭. સ પતિર્ભવિતા તસ્યા ઇતિ વાગાહ પુષ્કરાત્ ।
ઇતિ નિશ્ચિત્ય સા કન્યા વિજિત્ય ભુવનત્રયીમ્ ॥

૧૮. કૈલાસકટકે દેવં સમાલોક્ય પિનાકિનમ્ ।
તૃતીયસ્તનહીનાભૂત્ ચકમે તાં ચ શઙ્કરઃ ॥

૧૯. તામુદ્વાહ્ય મહાદેવો મધુરાયાં મહેશ્વરઃ ।
નામ્ના સુન્દરપાણ્ડ્યોઽભૂત્ કામરાજ ઇવાપરઃ ॥

૨૦. તસ્યાં તસ્ય ચ પુત્રોઽભૂત્ સ્વયમેવ ષડાનનઃ ।
શ્રિયા બલેન ચ બુધ્યા ચ નામ્ના શ્રીબલધિર્મહાન્ ॥

૨૧. સ શાસ્ત્રાણામાગમાનાં નિગમાનાં ચ પારગઃ ।
પિત્રોઃ શુશ્રૂષણં ચક્રે વિનયાચારસમ્પદા ॥

૨૨. સોઽયં લબ્ધ્વા તપશ્શક્ત્યા શામ્ભવં લૈઙ્ગમદ્ભુતમ્ ।
જ્યોતિર્વને સ્થાપિતવાન્ સનકસ્યાનુશાસનાત્ ॥

૨૩. ચિરન્તનીં કથાં શ્રુત્વા નિર્મલાભ્યુદયોજ્જ્વલામ્ ।
અનુગ્રહાત્ આદિપિત્રોઃ અર્ચયામાસ તત્ર હિ ॥

૨૪. તદાદિ તદ્વનં લોકે પ્રશસ્તમભવત્ વિભો ।
તત્પ્રીતિં કુર્વતોરાદિપિત્રોસ્સાન્નિધ્યગૌરવાત્ ॥

૨૫. તદ્વનં શ્રવણાત્ એવ મહાપાતકનાશનમ્ ।
યે પશ્યન્તિ તત્ક્ષેત્રં તે સ્યુર્મુક્તા ન સંશયઃ ।
૨૬. તત્ર બ્રહ્મમયં જ્યોતિઃ જાગર્ત્યાભૂત સમ્પ્લવમ્ ।
યત્રેન્દ્રાય મહજ્જ્યોતિં દર્શયામાસ શઙ્કરઃ ॥

૨૭. ઉન્માદરોગાન્મુક્તોભૂત્ યત્ર નન્દો મહીપતિઃ ।
પુત્રવાત્સલ્યસમ્પન્ના ગૌરી પ્રાદુરભૂત્ જલાત્ ॥

૨૮. તદાદિ ગૌરીતીર્થં તત્ તત્ર નામ્ના પ્રશસ્યતે ।
દુર્વાસશાપાત્ નિર્મુક્તા તત્રૈવ હિ સરસ્વતી ॥

૨૯. વૃષો નામ પુરા યક્ષો સ્તેન(સ્વેન) શાપાત્ વૃષાકૃતિઃ ।
યત્ર ક્ષેત્રદર્શનાદેવ ભૂયઃ સ્વં રૂપમવાપ્તવાન્ ॥

૩૦. તસ્માત્ તત્ક્ષેત્રમાહાત્મ્યં રાજન્ વાચામગોચરમ્ ।
મયા વર્ષશતેનાપિ વક્તું નાલં હિ વિસ્તરાત્ ॥

૩૧. ઇતિ તદ્વચનં શ્રુત્વા ક્ષેત્રમાહાત્મ્યસમ્પ્લુતમ્ ।
સ વીરસેનો ભૂજાનિઃ પ્રત્યુવાચ મુનીશ્વરમ્ ॥

૩૨. રાજા –
ભગવન્ યોગિનાં શ્રેષ્ઠ સર્વજ્ઞ કરુણાનિધે ।
મયિ પ્રસીદદાત્યર્થં ત્વત્પાદાબ્જાવલમ્બિનિ ॥

૩૩. અપારમહિમાધારે ક્ષેત્રે જ્યોતિર્વનાહ્વયે ।
દૃશ્યન્તે દેવદેવસ્ય લીલાવૈશિષ્ટ્યસમ્પદઃ ॥

૩૪. ઉગ્રશ્રીવલધિઃ શ્રીમાન્ રાજા પાણ્ડ્યકુલોદ્ભવઃ ।
કથં મેઘાત્ મહાલિઙ્ગં લબ્ધવાન્ પરમાદ્ભુતમ્ ॥

૩૫. કથં વા સ્થાપયામાસ મહાયોગીન્દ્રશાસનાત્ ।
કથમિન્દ્રો મહદ્ધામ દદર્શાનુગ્રહાત્ પ્રભોઃ ॥

૩૬. શાપગ્રસ્તઃ કથં યક્ષઃ પશુરૂપાત્ વિમોચિતઃ ।
સરસ્વતી કથં મુક્તા મુનિશાપાત્ સુદારુણાત્ ॥

૩૭. પાર્વતી પુત્રવાત્સલ્યાત્ સાન્નિધ્યં વિદધે કથમ્ ।
એતાનન્યાનિ વિસ્તાર્ય કથય ત્વં મહામતે ॥

૩૮. વિચિત્રં તત્ર પશ્યામિ ચરિતં શૂલપાણિનઃ ।
ઇત્થં રાજ્ઞા ભક્તિભારપ્રણમ્રમણિમૌલિના ॥

૩૯. સમ્પૃષ્ટઃ સ મહાયોગી હર્ષરોમાઞ્ચવિગ્રહઃ ।
પ્રશસ્ય ભૂયો રાજાનં વ્યાજહાર કથામિમામ્ ॥

૪૦. શઙ્ખઃ –

અસ્તુ ભદ્રમનુસ્યૂતધર્મમાર્ગવિહારિણઃ ।
તવ પ્રીતોઽસ્મિ નિતરામનર્ગલધિયા વિભો ॥

૪૧. ત્વદન્તર્વૃત્તિકલિકામભિજ્ઞાતુમિવાધુના ।
કથા સઙ્કુચિતા ભૂરિ વિસ્તરા સાગરોપમા ॥

૪૨. ચિત્તવૃત્તિરભિવ્યક્તા તવાદર્શોપમામલા ।
ધર્માદન્યત્ર ચ્યવતે કૌમુદીવ નિશાકરે

૪૩. અતિગોપ્યમનર્હેભ્યઃ પુરા વૃત્તાન્તમીદૃશમ્ ।
સત્પાત્રે ત્વયિ વક્ષ્યામિ નાત્ર કાર્યા વિચારણા ॥

૪૪. કુલીનતા સદાચારસમ્પન્નત્વમવક્ત્તતા ।
બ્રહ્મણ્યતા વિવેકત્વં ત્વયિ ધત્તે સમાજતામ્ ॥

૪૫. સન્તુષ્ટોઽસ્મિ મહારાજ શ્રદ્ધયા તવ કેવલમ્ ।
વક્ષ્યમાણં મહારાજ ઇતિહાસકથામિમામ્ ॥

૪૬. સમ્ભાવય મહારાજ શ્રોત્રયોરથિતિં પદે ।
કથેયં કલિકાલુષ્યકલના કર્મનિર્મદા ॥

૪૭. ધર્મમાર્ગૈકસઞ્ચારસાચિવ્યમણિદીપિકા ।
અપારનરકદ્વારપિધાનકરવાલિકા ॥

૪૮. સમ્પદાગમનૈકાન્તવર્ધની ધ્વસ્તકણ્ટકા ।
શ્રુણુ રાજન્ કથામેનાં પુણ્યાં કોઽપિ વનેચરઃ ॥

૪૯. અન્ધોઽપિ ભૂયઃ સંપ્રાપ લોચને દીર્ઘદર્શને ।
એતામદ્ભુતાકારાં શ્રુણુ નાન્યેન ચેતસા ॥

૫૦. પુરા લોકહિતાર્થાય ભગવાન્ પરમેશ્વરઃ ।
ઉપયમ્ય વિધાનેન પાણ્ડ્યકુમારિકામ્ ॥

૫૧. તસ્યામુત્પાદયામાસ પઞ્ચ પઞ્ચાસ્યવિક્રમાન્ ।
સુતાન્ વિદ્યાસુ નિપુણાન્ સોમસૂર્યાગ્નિવર્ચસઃ ॥

૫૨. સર્વશ્રેષ્ઠો મહારાજ યથા રત્નેષુ કૌસ્તુભઃ ।
ઉગ્રશ્રીવલધિર્નામ પ્રાણતાશેષભૂપતિઃ ॥

૫૩. યમેનં કથયન્ત્યદ્ધા સાક્ષાત્ ક્રૌઞ્ચાન્તકારિણમ્ ।
તસ્યાનુજો વજ્રધર્મા નામ્ના લોકેષુ ગીયતે ॥

૫૪. તમેનં પરિશંસન્તિ સાક્ષાત્ નન્દીશ્વરં સુરાઃ ।
તૃતીયો તનયો રાજ્ઞો સૌદાસો નામ નામતઃ ॥

૫૫. માણિભદ્રં પ્રશંસન્તિ પ્રમથાનામધીશ્વરમ્ ।
તસ્યાનુજઃ કુમ્ભકેતુઃ પ્રશસ્તો વીરસમ્મતઃ ॥

૫૬. વીતિહોત્રાં ચ સમ્ભૂતં તમેનં મુનયો વિદુઃ ।
સોમા(શત)ધામાભવત્ તેષાં મનુજઃ તુલ્યવિક્રમઃ ॥

૫૭. યેન લોકમિદં સર્વં ક્ષેમયુક્તમભૂત્ પુરા ।
શિવયોઃ પ્રીતિમાતન્વન્ અવતીર્ણા હિ ચન્દ્રમાઃ ॥

૫૮. ઇત્થં સુહૃત્સુ વીરેષુ પ્રશસ્તેષુ પરાક્રમૈઃ ।
પ્રહર્ષમતુલં લેભે દેવદેવશ્ચ પાણ્ડ્યરાટ્ ॥

૫૯. વપુષા પુષ્પધન્વાનં વપુષા પ્રાપ્તયૌવનમ્ ।
તેજસા સૂર્યસઙ્કાશં ધિષણં પ્રાપ્તવિદ્યયા ॥

૬૦. સમાહૂય સુતં જ્યેષ્ઠં સુન્દરાખ્યો મહીપતિઃ ।
યૌવરાજ્યેઽભિષિચ્યૈનં સુમેરોઃ દક્ષિણાપથે ॥

૬૧. દ્વિતીયં પશ્ચિમે દેશે તૃતીયં ચોત્તરાપથે ।
તુરીયં પૂર્વભાગે ચ કૃત્વા સન્તુષ્ટમાનસઃ ॥

૬૨. કૈલાસાત્ દક્ષિણે ભાગે શતશ◌ૃઙ્ગાખ્યભૂતલે ।
મધ્યે જનપદઃ પુણ્યઃ સર્વભાગ્યસમૃદ્ધિમાન્ ॥

૬૩. તપ્તચામીકરમયી મહામાણિક્યશર્કરા ।
દિવ્યોદ્યાનગુણોપેતા નાનાનગરમણ્ડિતા ॥

૬૪. તન્મધ્યે કૌતુકાભિખ્યા નગરી યોજનાયતા ।
ચમ્પાવતી શતહ્રાદા ત્રિસ્રોતા ચ સરસ્વતી ॥

૬૫. એતાઃ પીયૂષસલિલાઃ પ્રવહન્તિ સમન્તતઃ ।
યત્ર જીવન્તિ મનુજા વર્ષાણામયુતં ક્રમાત્ ॥

૬૬. તદ્રાજ્યે શતધામાનં રાજાનમકરોત્ વિભુઃ ।
એવં નિધાય ભૂભારં પુત્રેષુ ગુણશાલિષુ ॥

૬૭. અવાત્સીત્ સહ ધર્મિણ્યા મધુરાયાં મહીપતિઃ ।
ઇન્દ્રાદિભિર્લોકપાલૈ ; પ્રત્યહં પરિપૂજિતઃ ॥

૬૮. બુભુજે વિષયાન્ ભૌમાન્ ઉમયા સહ શઙ્કરઃ ।
અથ શ્રીવલધિઃ પાણ્ડ્યો ધર્માત્મા પિતૃસમ્મતઃ ॥

૬૯. મણલૂરુપુરં પ્રાપ્ય મહાભોગસમૃદ્ધિમાન્ ।
વિનીતૈશ્ચ સ્વસામન્તૈઃ રાજધર્મપરાયણૈઃ ॥

૭૦. સૂક્ષ્માર્થવેદિભિઃ સ્નિગ્ધૈઃ આત્મભક્તૈર્મહાકુલૈઃ ।
વિસ્મિતઃ પાલયામાસ ત્રિલોકીં મઘવા યથા ॥

૭૧. કદાચિત્ આસ્થાનમસ્ય દેવર્ષિર્નારદો મહાન્ ।
તત્ર સમ્ભાવિતસ્તેન રાજાનમિદમબ્રવીત્ ॥

૭૨. વત્સાયુષ્મન્ મહાભાગ શૂરોઽસિ બલવાન્ અસિ ।
ત્વય્યેવ ધર્મો નીતિશ્ચ સૌમનસ્યં વદાન્યતા ॥

૭૩. આલોકાલોકમાસ્વર્ગમાપાતાલાન્તરાલકમ્ ।
ત્વત્કીર્તિસમ્પદઃ પુણ્યાઃ શ્રૂયતે પઠિતા જનૈઃ ॥

૭૪. તસ્માત્ ત્વાં વાસવો રાજા કાઙ્ક્ષન્ મૈત્રીપદં વિભુઃ ।
સ્પૃહયત્યન્વહં શ્રેયઃ તસ્માત્ નૂનં ભવિષ્યતિ ॥

૭૫. તારકાખ્યસ્ય દૈત્યસ્ય નપ્તા કુણ્ડોદરાહ્વયઃ ।
નષ્ટેષ્વશેષદૈત્યેષુ તારકાખ્યેષુ ભૂપતે ॥

૭૬. હતશેષો ભયાવિષ્ટઃ કાન્તિશીકત્વમાગતઃ ।
માનસોત્તરમાસાદ્ય ગુહાયાં વવૃધે બલી ॥

૭૭. ભાર્ગવસ્યોપદેશેન તપસારાધ્ય શઙ્કરમ્ ।
અવધ્યત્વં સુરૈઃ પ્રાપ્ય સમુદ્વેજયતે સુરાન્ ॥

૭૮. તદુપદ્રવવિદ્ધસ્ય સર્વસૌભાગ્યવિભૂતયઃ ।
નિતરાં સુખિનો નૈવ હેમન્તનલિની યથા ॥

૭૯. તસ્માત્ ત્વયા પાલનીયા બલિના ત્રિદિવૌકસઃ ।
તવ શ્રેયાંસિ ભૂયાંસિ ભવન્ત્યેવ ન સંશયઃ ॥

૮૦. ઇત્યુક્તવતિ દેવર્ષૌ પુષ્કરાત્ ઇન્દ્રચોદિતઃ ।
માતલિઃ સમધિષ્ઠાય વિમાનં કાઞ્ચનારુણમ્ ॥

૮૧. આવિર્બભૂવ સહસા પ્રત્યૂષે ભાનુમાન્ ઇવ ।

સ રાજસૂનુમાસાદ્ય જય જયેતિ કીર્ત્યન્ ॥

૮૨. પ્રાહ પ્રસન્નવદનઃ યથેન્દ્રેણાનુશાસિતમ્ ।
માતલિઃ –
પાણ્ડ્યરાજકુલોત્તંસ કુમાર જયતાં ગુરો ॥

૮૩. ત્વામિન્દ્રઃ પ્રાહ સૌહાર્દાત્ દેવઃ કુશલમબ્રવીત્ ।
ત્વયા વયં સ્વર્ગભુજઃ જીવામઃ ખલુ શત્રુહન્ ॥

૮૪. કુણ્ડોદરભયાત્ અસ્માન્(ત્) ત્રાતા મા તે વિડમ્બનમ્ ।
એતત્ વિમાનમારોહ વર્મ ચેદં ગૃહાણ ભો ॥

૮૫. અનેન ધનુષા બાણૈઃ અમોઘૈઃ વજ્રસન્નિભૈઃ ।
શક્ત્યા ચૈવાનયા ક્ષિપ્રં ત્વં હત્વા દાનવં રણે ॥

૮૬. જયલક્ષ્મ્યા ચ સમાયુક્તઃ પુનરેષ્યસ્યસંશયમ્ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય પ્રીતઃ શ્રીવલધિર્નૃપઃ ॥

૮૭. તથેતિ પ્રતિશ્રુત્ય ચોદયામાસ માતલિમ્ ।
ગૃહીતધનુરાપત્ય તૂણીરાક્ષયસાયકૌ ॥

૮૮. શક્તિપાણિઃ પ્રસન્નાત્મા સમારોહત્ પ્રતાપવાન્ ।
અથોત્પપાત વેગેન સ્યન્દનો વ્યોપવર્ત્મના ॥

૮૯. સંપ્રાપ્ય ભાનુપદવીં પ્રતસ્થે વારુણીં દિશમ્ ।
અતીત્ય ભારતં દેશં ઉલ્લઙ્ઘ્યલવણાર્ણવમ્ ॥

૯૦. પ્લક્ષાદીન્ અન્તર્દ્વીપાન્ ચ સાગરં ચ મહીપતે ।
દધિમણ્ડોદધિં તીર્ત્વા પુષ્કરં તીર્થમણ્ડલમ્ ॥

૯૧. અનેકશતસાહસ્રં યોજનાયાતમણ્ડિતમ્ ।
આસસાદ સ ભૂપાલઃ સમૃદ્ધનગરીં પુરીમ્ ॥

૯૨. વિભજન્ ઇવ મધ્યેન પુષ્કરદ્વીપમણ્ડલમ્ ।
યં પ્રશંસન્તિ સૂર્યસ્ય બહુમાન્ય ચ માતલિમ્ ॥

૯૩. નારદં પ્રણિપત્યાગ્રે સભ્યાન્ આમન્ત્ર્ય સાન્ત્વયન્ ।
રથં પ્રદક્ષિણીકૃત્ય વ્યાજહાર તદા ગિરા ॥

૯૪. મહામહીધરં નામ માનસોત્તરમદ્ભુતમ્ ।
તત્રાભ્યન્તરભાગે તુ મયમાયા વિનિર્મિતા ॥

૯૫. ગુહા પરમવિસ્તીર્ણા દુષ્પ્રવેશા સુરાસુરૈઃ ।
તચ્છરાનલસન્તપ્તા દાનવાસ્તે બિલોદરાત્ ॥

૯૬. નિર્જગ્મુઃ કોટિસઙ્ખ્યાકાઃ સાયુધાઃ સપરિચ્છદાઃ ।
અસઙ્ખ્યાતૈર્હયૈર્મત્તૈઃ માતઙ્ગૈઃ સ્યન્દનૈરપિ ॥

૯૭. પાદાતૈઃ સર્વથાક્રાન્તૈઃ છાદયન્તો મહીતલમ્ ।
અષ્ટાષ્ટપૂર્વમત્યુગ્રં જન્યમાસીત્ જનક્ષયમ્ ॥

૯૮. વવર્ષ શરવર્ષાણિ દૈત્યાઃ પાણ્ડ્યેન્દ્રનન્દને ।
શક્તિગદામરભુશુણ્ડિં ચ ભિણ્ડિભાલપરશ્વધાન્ ॥

૯૯. શતઘ્નીશૂલકુન્દેષૂન્યુગપત્ ચિક્ષિપુર્મૃધે ।
સ રાજસૂનુર્બલવાન્ સ્મયમાન ઇવ ક્ષણાત્ ॥

૧૦૦. નાશયિત્વા સ્વશસ્ત્રૈઃ ચ બાણૈરાશીવિષોપમૈઃ ।
મહાનારાયણાસ્ત્રેણ દૈત્યસૈન્યં ક્ષણાદિવ ॥

૧૦૧. ભસ્મસાત્ અકરોત્ રક્ષઃ માતલિં સંપ્રહર્ષયન્ ।
સ્વબલે સંક્ષયં પ્રાપ્તે સ દૈત્યો રાજસૂનુના ॥

૧૦૨. નિર્બિભેદ શરૈસ્તીક્ષ્ણૈઃ સૂર્યવૈશ્વાનરોપમૈઃ ।
યુયુધે ચાસ્ત્રશસ્ત્રૌઘૈઃ અમોઘૈર્મર્મભેદિભિઃ ॥

૧૦૩. તત્સર્વં શમયામાસ રૌદ્રાસ્ત્રેણ સ્મયન્ ઇવ ।
આગ્નેયેન તદાસ્ત્રેણ યન્તારં સ જઘાન હ ॥

૧૦૪. ધનુઃ છિત્વા હયાન્ હત્વા વિરથીકૃત્ય દાનવમ્ ।
શક્તિમાદાય ચિક્ષેપ તસ્મૈ દૈત્યાય પાણ્ડ્યરાટ્ ॥

૧૦૫. સા શક્તિઃ તત્કરાન્મુક્તા દ્યોતયન્તી નભઃસ્થલમ્ ।
સઞ્જહારાસ્ય મૂર્ધાનં શૈલાત્ ઇવ ઘનં મરુત્ ॥

૧૦૬. એવં નિપતિતે દૈત્યે સભૃત્યબલવાહને ।
સર્વે મુમુદિરે દેવાઃ સેન્દ્રાઃ સર્પનગોરગાઃ ॥

૧૦૭. મુઞ્ચન્તઃ પુષ્પવર્ષાણિ સ્તુવન્તો રાજનન્દનમ્ ।
અભિજગ્મુર્વિનિહતે સર્વદેવવિરોધિનિ ॥

૧૦૮. ઇન્દ્રઃ તં પ્રાપ્ય સાનન્દં સમાશ્લિષ્ય મુહુર્મુહુઃ ।

વ્યાજહાર વચઃ પ્રેમ્ણા ઉગ્રશ્રીવલધિં તદા ॥

૧૦૯. મહાવીર ત્વયા સર્વે પાલિતા સુમહત્ ભયાત્ ।
ત્વયા મિત્રેણ નિત્યેન સૌખ્યં વિન્દામહે વયમ્ ॥

૧૧૦. ત્વયૈવ તારકાદ્યાઃ ચ વિનષ્ટાઃ પૂર્વજન્મનિ ।
ઇદાનીમપિ તચ્છેષં વિહિતં દૈત્યનાશનમ્ ॥

૧૧૧. તસ્માત્ ત્વાં સુહૃદં પ્રાપ્ય સ્વર્ગિણઃ સુખભોગિનઃ ।
તસ્માત્ વયમિહાભીષ્ટં કર્તું કાઙ્ક્ષામહે તવ ॥

૧૧૨. યત્તે મનોરથં મત્તઃપ્રીત્યા પ્રાપ્નુહિ ભૂપતે ।
પૂર્ણકામસ્ય તે નૂનં કર્તું કાઙ્ક્ષન્ત્યમી સુરાઃ ॥

૧૧૩. બહ્વપ્યણ્ડતરં વાપિ પ્રીત્યા દત્તં હિ સાધવઃ ।
પ્રતીચ્છન્તિ મહાભાગ નદીતોયમિવાર્ણવઃ ॥

૧૧૪. શ્રીવલધિઃ –
દેવરાજ દયાસિન્ધો તવૈતત્ ઉચિતં ખલુ ।
ત્વત્પ્રસાદેન જીવન્તિ ત્રયો લોકાઃ સનાતનાઃ ॥

૧૧૫. યોગક્ષેમેણ યુષ્માકં પ્રહૃષ્યામિ ન સંશયઃ ।
તથાપિ તવ હર્ષાય ત્વદ્દત્તં વરમઞ્જસા ॥

૧૧૬. પ્રીતિપૂર્વં પ્રગૃહ્ણામિ સુહૃત્ ત્વમનુપાલય ।
યેન તુષ્યન્તિ ગીર્વાણાઃ યદન્તે તત્ર માનવાઃ ॥

૧૧૭. દેવેષુ તેષુ તુષ્ટેષુ સ્વયમાયાન્તિ સમ્પદઃ ।
તસ્માત્ પ્રિયતરં કર્મ ભૂયસ્તે કર્તુમુત્સહે ॥

૧૧૮. ભૂતેષુ ચ દયા નિત્યા શિવે ભક્તિશ્ચ શાશ્વતી ।
બ્રહ્મણ્યતા વદાન્યત્વં પ્રાર્થનીયાનિ અમૂનિ મે ॥

૧૧૯. એતત્ એવ મહારાજ યુષ્માભિઃ કરુણા યદિ ।
ક્રિયતે સતતં તસ્માત્ શ્રિયં કાઙ્ક્ષે ન મે ક્વચિત્ ॥

૧૨૦. ઇતિ બ્રુવતિ રાજેન્દ્રે નન્દને લોકનન્દને ।
તથાસ્ત્વિતિ સમાભાષ્ય સહ દેવૈઃ શચીપતિઃ ॥

૧૨૧. સહ માતલિના ભૂયઃ પ્રસ્થાપ્ય પ્રીતિપૂર્વકમ્ ।
ઐરાવતં સમારૂઢઃ સમીયાય શતક્રતુઃ ।

પુરીં પુલોમજાયુક્તઃ સહ દેવૈઃ મરુદ્ગણૈઃ ॥

૧૨૨. તતઃ પ્રહૃષ્ટઃ સ નૃપાત્મજો બલી સમાસ્થિતો માતલિના રથોત્તમમ્ ।
ગતક્લમઃ પુષ્કરવર્ત્મના સુતો નભશ્ચરૈઃ સિદ્ધગણૈશ્ચ કિન્નરૈઃ ॥

૧૨૩. અતીત્ય પન્થાનમહઃપતેરતઃ પ્રભૃત્યમેતાવલિમેત્ય ભૂતલે ।
પ્રવિશ્ય હાલાસ્યમથાવિવાદ્ય આસાદ્ય પિત્રોઃ ચરણામ્બુજદ્વયમ્ ॥

ઇતિ ચતુશ્ચત્વારિંશોઽધ્યાયઃ । Pro.Total = 3741 + 123 = 3864.

## પઞ્ચચત્વારિંશોઽધ્યાયઃ

જ્યોતિર્વનમાગત્ય સ્નાત્વા શિવારાધનં કુર્વતઃ
ભગસ્ય નષ્ટનયનયુગલઃ પ્રાપ્તિઃ ।

૧. અથ સુનરપાણ્ડ્યોઽપિ દણ્ડિતારિ(અરાતિ)મણ્ડલઃ ।
મુમુદે તનયં દૃષ્ટ્વા નિશાકરમિવાર્ણવઃ ॥

૨. સમુત્થાપ્ય સુતં દોર્ભ્યામઙ્કુમારોપ્ય સમ્ભ્રમાત્ ।
સમાઘ્રાય ચ મૂર્ધાનં ષટ્પદઃ કુસુમં યથા ॥

૩. અઘ્રાયાઘ્રાય સૌહાર્દાત્ ન તૃપ્તિમુપજગ્મિવાન્ ।
ઉભયોરઙ્ગસંસર્ગાત્ સૌખ્યસ્યૈવાન્તરં યથા(તથા) ॥

૪. સમૂહે સન્તતોદઞ્ચત્રોમાઞ્ચઃ પુષ્પિતૈરિવ ।
સર્વસામ્રાજ્યસૌભાગ્યપદે ભાવિનિ ભૂપતિઃ ॥

૫. અભ્યષેચયત્ આનન્દબાષ્પપૂરૈરિવાત્મજમ્ ।
સર્વે સભાસ્થઃ તત્ર પ્રેમવૈક્લવ્યમિશિતુઃ ॥

૬. સર્વે મુમુદિરે હૃષ્ટાઃ નીપા ઇવ ઘનાગમે ।
અથ ભૂપતિરાહૂય માતલિં ચેન્દ્રસારથિમ્ ॥

૭. બહુમાન્ય સમાયુક્તં વાક્યમેતત્ ઉવાચ હ ।
સુન્દરપાણ્ડ્યઃ –
માતલે ભવતા સાધુ કાર્યમેતત્ અનુષ્ઠિતમ્ ॥

૮. અપિ કુણ્ડોદરં દૈત્યં દાનવં જિતવાનસિ ।
ઇન્દ્રાય કુશલં બ્રૂહિ દેવેભ્યોઽપિ વિશેષતઃ ॥

૯. પ્રણામં બ્રૂહિ ગુરવે જીવાય યદનુષ્ઠિતમ્ ।
આવયોરસ્તુ સૌહાર્દમાકલ્પમનપાયવત્ ॥

૧૦. ઇત્થં પ્રશસ્ય તં સૂતં સુન્દરે  શમહીપતિઃ ।
સ્વર્ગં પ્રસ્થાપયામાસ સમ્ભાવ્ય મણિકાઞ્ચનૈઃ ॥

૧૧. વિસર્જયિત્વા સભ્યાન્ ચ મન્ત્રિણઃ યથોચિતમ્ ।
અન્તઃપુરં કુમારેણ સ્વયમાપ સમૃદ્ધિમત્ ॥

૧૨. તતઃ શ્રીવલધિઃ પ્રીત્યા માતરં લોકમાતરમ્ ।
વિનયેનોપસંપ્રાપ્ય પાદયોરભ્યવાદયત્ ॥

૧૩. સા તમાગતમાલોક્ય ચિરાત્ ઇવ નિજાત્મજમ્ ।
અભ્યનન્દત્ સમાશ્લિષ્ય સ્નેહસ્નુતપયોધરા ॥

૧૪. અસુરાસ્ત્રસમાલીઢમઙ્ગમપ્યઙ્ગજન્મનઃ ।
પશ્યન્તી પરિતાપાર્તા સૌહાર્દાત્ ઇદમબ્રવીત્ ॥

૧૫. તતઃ કિન્તે વપુઃ ક્લાન્તં સુકુમારં સુમાદપિ ।
કથં સોઢાસિ શસ્ત્રાણામસુરાણાં મહૌજસામ્ ॥

૧૬. એતાનિ વ્રણજાલાનિ ત્વદઙ્ગસ્થાનાનિ પુત્રક ।
તુદન્ત્યન્તર્મનો મહ્યં બડવાગ્નિરિવાર્ણવમ્ ॥

૧૭. કથમાસીત્ તવ રણં બાલકસ્ય મહાબલૈઃ ।
જિતવાનસિ તાન્ દૈત્યાન્ કેનોપાયેન વાર્ભક ॥

૧૮. ઇત્થં મુહુર્મુહુઃ પૃષ્ટ્વાતિવેલં વિલોક્ય સા ।
શુશોચ રાજમહિષી ગૌરિવાલોક્ય તર્ણકમ્ ॥

૧૯. ઇત્થં વ્યાકુલચિત્તાયા જનન્યાં રાજનન્દનઃ ।
પ્રત્યુવાચાઞ્જલિં મૂર્ધ્ના પદ્મકોશમિવોદ્વહન્ ॥

૨૦. અનુગ્રહાત્ પિતુર્માતુરપિ પ્રાપ્ય મહારણમ્ ।
નૈવોદ્વિજન્તિ મર્માણિ તેષામસ્ત્રાણિ પુષ્પવત્ ॥

૨૧. પાતિતાશ્ચ મહાદૈત્યાઃ નિશ્શેષાઃ સપરિચ્છદાઃ ।
કિન્તુર્મર્માણિ માતર્મે ત્વદ્વિયોગાનલાવલી ॥

૨૨. વ્યથયત્યશનિપ્રખ્યાઃ દુર્બલં બલવાન્ ઇવ ।
ઇતિ પુત્રવચઃ શ્રુત્વા સ રાજા સુન્દરેશ્વરઃ ॥

૨૩. પરિરભ્ય પુનઃ પુત્રં મન્દમામર્ચયત્ ગુરુઃ ।
વિતીર્ય કવચં તસ્મૈ પુત્રાયાભ્યેત્ય મન્ત્રિભિઃ ॥

૨૪. તાત મા શોકમોહાભ્યાં વિયોગો ભવિતા ન તે ।
ત્વદન્તિકે વસિષ્યામિ સન્તતં જનની ચ તે ॥

૨૫. એનાં પશ્યસિ સુસ્નિગ્ધાં માતરં પિતરં સુત ।
તથા કરિષ્યે ગન્તવ્યં સ્વપુરં બન્ધુભિસ્સહ ॥

૨૬. ઇત્થં સન્તોષ્ય તનયં દિવ્યામ્બરવિભૂષણૈઃ ।
પ્રેષયામાસ માલેયીતીરભૂમિં સુશોભનામ્ ॥

૨૭. માત્રા પિત્રા ચ સૌહાર્દાત્ સમ્પરિષ્વજય નન્દિતઃ ।
કૃતાઞ્જલિઃ સંપ્રતસ્થે પિતરૌ પ્રણિપત્ય સઃ ॥

૨૮. દેવસૂતે દિવં પ્રાપ્તે સવાહનપરિચ્છદઃ ।
મણલૂરુપુરં પ્રાપ્ય નિવાસમકરોત્ વિભુઃ ॥

૨૯. કદાચિત્ આસ્થાનગતમાસને પરમાદ્ભુતે ।
ઉપતસ્થુર્મહાત્માનં મન્ત્રિણો મુનયસ્તદા ॥

૩૦. શ્રેણીમુખ્યાઃ ચ સામન્તાઃ પૌરજાનપદા અપિ ।
શ્વેતચ્છત્રસમાયુક્તં ચામરાભ્યાં ચ શોભિતમ્ ॥

૩૧. તુષ્ટુવુસ્સંસ્તવૈઃ પુણ્યૈઃ સૂતમાગધવન્દિનઃ ।
ધર્મેણ પાલયન્ આસ્તે સુકુમારો મહીમિમામ્ ॥

૩૨. એતમિન્ અન્તરે વ્યોમ્ના દિશઃ પ્રાવૃત્ય સર્વશઃ ।
દદર્શ સતડિન્માલઃ સ્તનયન્ મેઘમણ્ડલમ્ ॥

૩૩. વિમુઞ્ચન્ સન્તતાં તારાં નાદૈર્ભિન્દન્ ઇવામ્બરમ્ ।
મહાયુદ્ધપરિશ્રાન્તિમપવાહયિતું કિલ ॥

૩૪. હિમશીતૈરમ્બુકણૈઃમૃણાલધવલૈર્મુહુઃ ।
અપિ સર્વેષુ પશ્યત્સુ ધારાધરગૃહોદરાત્ ॥

૩૫. અચિરાંશુમહાદીપો મેઘવારણવાહનાત્ ।
શિવલિઙ્ગત્રયં તાવત્ મહામરકતોપમમ્ ॥

૩૬. નિપપાત મહીપૃષ્ઠે સહ વૈદૂર્યવૃષ્ટિભિઃ ।

એધતેવ ધનં રાજન્ એતત્ અભ્યુદયન્ ઇવ ॥

૩૭. અનેન ભૂયઃ શ્રેયાંસિ ભવિષ્યન્તિ ન સંશયઃ ।
ચિરાર્જિતાનાં ધર્માણાં તપસામપિ ભૂપતે ॥

૩૮. પરિપક્વફલમિદં સમાધત્સ્વ મુદાન્વિતઃ ।
યત્ર જ્યોતિરનુસ્યૂતમનપાયં પ્રકાશતે ॥

૩૯. તત્ર સંસ્થાપ્ય વિધિવત્ સમારાધય શમ્ભવમ્ ।
ઇતિ શ્રુત્વામ્બરાત્ વાણીમધીનામશરીરિણીમ્ ॥

૪૦. સમુત્થાયાસનાત્ પ્રીત્યા સમુદાય નૃપાત્મજઃ ।
રાજાસને સમાવેશ્ય વિસ્મયં પરમં યયૌ ॥

૪૧. મહામુક્તામણિમયીવૃષ્ટિઃ કાઞ્ચનપુઞ્જિતા ।
પૂરયિત્વા પુરં તસ્ય વિરામમગમત્ ક્ષણાત્ ॥

૪૨. આસન્ પ્રસન્ના કકુભઃ વિબભુઃ વ્યોમ્નિ તારકાઃ ।
મદયન્તીવ રાકાત્ ઊર્ધ્વં વલતે ભૃશમ્ ॥

૪૩. મુનીનામગ્ન્યાગારેષુ પ્રસન્નાર્ચિર્હુતાશનઃ ।
આદધે હવિરામોદં મન્ત્રપૂતં પ્રદક્ષિણમ્ ॥

૪૪. ભૂરભૂત્ સસ્યસમ્પન્ના ફલવન્તશ્ચ પાદપાઃ ।
મનાંસ્યાસન્ પ્રસન્નાનિ બ્રાહ્મણાનાં મહાત્મનામ્ ॥

૪૫. આકસ્મિકમભૂત્તત્ર રોમાઞ્ચો સભાજુષામ્ ।
દેવદુન્દુભિનિર્ઘોષૈઃ પૂર્ણમાસીત્ વિયત્તલમ્ ॥

૪૬. વ્યાભુષ્ટહર્ષસન્નાદં સભાસ્થાનં મહીપતેઃ ।
સૂતમાગધમુખ્યાનાં તથા વિદ્યોપજીવિનામ્ ॥

૪૭. સઞ્જજ્ઞે સ્તુતિસન્નાદો હંસાનામિવ માનસે ।
ઇતિ સમ્ભ્રમસન્નાદકરમ્બિતનભસ્થલે ॥

૪૮. સઞ્ચચાલેવ સમ્ભ્રાન્તા સા સભા નર્તકી યથા ।
હિરણ્યગર્ભધનયાવં પરા વર્ત્મના ગતા(તથા) ।
૪૯. સનાતનો મુનિઃ શ્રીમાન્ આજગામ સભામિમામ્ ।
સમુત્થાય મહીપાલઃ પ્રત્યુદ્ગમ્ય પ્રણમ્ય ચ ॥

૫૦. આસને ચ સમાવેશ્ય મધુપર્કાર્હણાદિભિઃ ।

કૃતાઞ્જલિઃ કૃત્યવિદામગ્રણીઃ નૃપનન્દનઃ ॥

૫૧. વિશ્રાન્તં સ્વસ્થમનસં પ્રશ્રિતો વાક્યમબ્રવીત્ ।
શ્રીવલધિઃ –
ભગવન્ સ્વાગતં તેઽદ્ય ગતો વાધ્વપરિશ્રમઃ ॥

૫૨. અદ્ય મે સફલં જન્મ જીવિતં ચ મહામતે ।
ત્વદાગમનકલ્યાણસુધાકલ્લોલિતાત્મનઃ ॥

૫૩. કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ કૃતકૃત્યોઽમિ સામ્પ્રતમ્ ।
યસ્ત્વદીક્ષણપીયૂષધારાભાજનતાં ગતઃ ॥

૫૪. અવન્ધ્યમઙ્ગલાધ્વાનવિહારિણિ ગુરૌ ત્વયિ ।
અક્ષિલક્ષ્યત્વમેતેષામુપયાતે મહાત્મનિ ॥

૫૫. સર્વે વિસ્મયસમ્ફુલ્લસ્વાન્તપઙ્ગજવૃત્તયઃ ।
સભ્યાઃ પરે ચ કાઙ્ક્ષન્તો શ્રોતું ત્વદ્વચનામૃતમ્ ॥

૫૬. નિસ્પૃહસ્યાપિ તે બ્રહ્મન્ ત્વય્યાગમનસમ્ભ્રમઃ ।
શુભાં જગતાં જાતાં સ્પૃહાં દ્યોતયતીવ મે ॥

૫૭. કાઙ્ક્ષિતેષ્વપિ કૃત્યેષુ ભૃત્યં યદિ માં યોક્ષ્યસે ।
ઇત્થં વિનયસમ્પત્યા ભક્ત્યા ચ પરમાર્થયા ॥

૫૮. સહર્ષમાણો ભગવાન્ દેવર્ષિર્વાક્યમબ્રવીત્ ।
સનાતનઃ –
રાજન્ તે સાધુવચનૈઃ હર્ષણૈર્વિનયોજ્જ્વલૈઃ ॥

૫૯. પ્રીતોઽસ્મિ નિસ્પૃહસ્યાપિ સ્પૃહા જનયતીતિ યત્ ।
શ્રુણુ વૃત્તાન્તમીશસ્ય તવ હેતોર્વિનોદજમ્ ॥

૬૦. પૂર્વેદ્યુઃ પૂર્વપક્ષસ્ય ત્રયોદશ્યા નિશામુખે ।
ધારાદ્રેઃ દિવ્યશિખરમણિકાઞ્ચનમન્દિરે ॥

૬૧. દિવ્યસિંહાસને દેવ્યા સહિતો લોકશઙ્કરઃ ।
સેવ્યમાનો ભૂતગણૈઃ દેવાનાં દર્શનં દદૌ ॥

૬૨. તત્ર નન્દીશ્વરમુખાઃ ગણેશસ્કન્દનન્દિનઃ ।
કુમ્ભજમ્ભાલભમ્ભાદ્યાઃ માણિભદ્રમણિધ્વજૌ ॥

૬૩. વજ્રકણ્ઠઃ શિખણ્ડી ચ હરિકર્ણઃ સુકેતુકઃ ।

ચણ્ડીશભૃઙ્ગિમાલૂકાઃ પ્રમથાઃ શતકોટયઃ ॥

૬૪. સિષેવિરે વીરભદ્રં ક્ષેત્રપાલસમન્વિતાઃ ।
સ્તુવન્તો દેવદેવેશં રુદ્રસૂક્તૈઃ સ્વસૂક્તિભિઃ ॥

૬૫. ઉપતસ્થુઃ ચ કુર્વન્તઃ શુશ્રૂષાં વિવિધાં વિભો ।
તત્ર દેવાઃ સમાજગ્મુર્મહેન્દ્રોપેન્દ્રસંયુતાઃ ॥

૬૬. સિદ્ધગન્ધર્વયક્ષૈશ્ચ લોકપાલાઃ તથાપરે ।
નારદપ્રમુખાદેવાઃ ઋષયઃ કાશ્યપાદયઃ ॥

૬૭. સ્વૈઃ સ્વૈઃ વિભૂતિવિભવૈઃ આનર્ચુઃ સામ્બમીશ્વરમ્ ।
કરુણાસાન્દ્રપીયૂષવર્ષિણાપાઙ્ગવર્ચસા ॥

૬૮. મનઃ પ્રહ્લાદયામાસ દેવસ્તેષાં વૃષધ્વજઃ ।
એતસ્મિન્નન્તરે બ્રહ્મા આજગામ સભાન્તરે ॥

૬૯. શનૈર્વિજ્ઞાપયામાસ ત્વદ્વીર્યવિભવં રણે ।
પરાજયં ચ દૈત્યાનાં વિજયં ચ તવાદ્ભુતમ્ ॥

૭૦. ગન્ધર્વોદ્ગીયમાનાનિ ચરિત્રાણ્યપિ ભૂરિશઃ ।
તાનિ તદ્વર્ણિતાન્યુચ્ચૈરાકર્ણયતીવ હર્ષિતઃ ॥

૭૧. વિભુર્વિસ્તારયામાસ શિવલિઙ્ગમભૂમિજમ્ ।
ત્વદર્થે પાશહસ્તસ્ય પાણૌ ત્રાણાય દેહિનામ્ ॥

૭૨. તદેતત્ આલોકયિતું તસ્માત્ કૈલાસમન્દિરાત્ ।
આગતોઽસ્મિ મહારાજ તવ શ્રેયો વિધિત્સયા ॥

૭૩. સ રાજા વરુણસ્તુભ્યં કુર્વન્ અભ્યુદયં મહત્ ।
મણિવૃષ્ટ્યા સહેદાનીં મેઘૈરર્પિતવાન્ નનુ ॥

૭૪. તદેતત્ અધુના લિઙ્ગં પ્રથમાનં મહીતલે ।
ક્રિયાભૂતં ત્રયીસારં સઞ્ચયત્વૈકસૂચકમ્ ॥

૭૫. લિઙ્ગસ્યાસ્ય પરં મત્વા સાભ્યન્તરનિર્મલે ।
તથૈવાહામ્બરાત્ વાણી તત્પ્રમાણં કુરુ પ્રભો ॥

૭૬. ઇતિ તસ્યાદિસિદ્ધસ્ય સનાતનમુનેર્વચઃ ।
શ્રુત્વા શ્રીવલધિર્ભૂયો વિસ્મિતઃ પ્રત્યભાષત ॥

૭૭. રાજા –
કિં વાત્ર તૈજસં સ્થાનં કુત્ર વા કથ્યતાં મુને ।
કથં મયા સ્થાપિતવ્યં શામ્ભવં લિઙ્ગમદ્ભુતમ્ ॥

૭૮. જ્યોતિસ્થાનં મહીપૃષ્ઠે કૂપિકાયાં તિમિઙ્ગિવત્ ।
અસ્નિગ્ધમશેષેણ બ્રહ્મન્ મે વક્તુમર્હસિ ॥

૭૯. શઙ્ખઃ –
ઇતિ ભૂપુરુહૂતેન તેન પૃષ્ટઃ સનાતનઃ ।
પ્રસન્નહૃદયો ધીમાન્ વિસ્મિતો વાક્યમબ્રવીત્ ॥

૮૦. સનાતનઃ –
શ્રુણુ રાજન્ પુરા વૃત્તમિતિહાસં પુરાતનમ્ ।
શ્રવણાત્ કીર્તનાત્ મર્ત્યો મુચ્યતે પાપબન્ધનાત્ ॥

૮૧. પુરા દક્ષે તુ કોપેન ભગવાન્ પરમેશ્વરઃ ।
વિદ્રાવ્ય દેવાન્ અખિલાન્ છિત્વા દેવં પ્રજાપતિમ્ ॥

૮૨. ઉત્પાટયામાસ દૃશૌ ભગસ્યાપ્યપરાધિનઃ ।
પુનઃ પ્રશાન્તે દેવેશે યાતે કૈલાસમન્દિરમ્ ॥

૮૩. દુઃખિતો લોચનાભાવાત્ પરિશ્રાન્તો મુહુર્મુહુઃ ।
ભગઃ શરણં સંપ્રાપ શરણં ગીષ્પતિં ગુરુમ્ ॥

૮૪. તં સાન્ત્વયિત્વા વચનૈઃ હેતુભિઃ ચાપિ સદ્ગુરુઃ ।
પ્રત્યવોચત્ સ્વયા બુધ્યા વિચાર્ય પરમાર્થયાઆ ॥

૮૫. શ્રુણુ વક્ષ્યામ્યહં સાધો મર્યાદામાદિકલ્પિતામ્ ।
યઃ કરોતિ શિવદ્રોહં દૂષયત્યપિ તદ્ગુણાન્ ॥

૮૬. તેષાં કદાપિ જન્તૂનાં પુરુષાર્થો ન હિ ધ્રુવમ્ ।
અન્ધન્તમઃ પ્રપદ્યન્તે યાવત્ આભૂતસમ્પ્લવમ્ ॥

૮૭. તથાભ્યુદયં વક્ષ્યામિ તેન સૌખ્યમુપૈષ્યસિ ।
યા વા કો વા પુમાન્ લોકે શૈવં પાશુપતાભિતમ્ ॥

૮૮. અનુવૃત્ય સ્થિતો ભક્ત્યા સ કદાપિ ન શોચતિ ।
કૃતઘ્નઃ પિશુનો લુબ્ધઃ હેતુનિષ્ઠઃ ચ દૂષકઃ ॥

૮૯. યન્નામકીર્તનાત્ એવ મુક્તિમેત્યનપાયિનીમ્ ।

ન યમો યમદૂતાશ્ચ નારયો નાધયસ્તથા ॥

૯૦. પરિક્લેશયિતું શક્તાઃ શિવપાદામ્બુજાશ્રયાત્ ।
સૈષા ષડાક્ષરી વિદ્યા શામ્ભવી પાપહારિણી ॥

૯૧. બ્રહ્મવિષ્ણુમુખૈર્દેવૈસેવ્યતે ચાત્મસિદ્ધયે ।
ત્રિપુણ્ડ્રશ્ચૈવ રુદ્રાક્ષો મહાપઞ્ચાક્ષરો મનુઃ ॥

૯૨. પ્રશસ્યન્તે ત્રયી મૂર્ધ્ના મોહાયાસોપશાન્તયે ।
એવં ત્રિધા વિભજ્યેશો લોકાન્ પાતિ સ્વલીલયા ॥

૯૩. તસ્માત્ ત્વમદ્ય દેવેશં શરણં યાહિ શઙ્કરમ્ ।
ઇત્થં પ્રબોધિતસ્તેન ભગો દેવઃ પુરોધસા ॥

૯૪. તથૈવ ગુરુમારાધ્ય શિવદીક્ષામદીક્ષયત્ ।
સનાતનઃ –
ઉપલભ્ય મહામન્ત્રં તસ્માત્ શૈવષડાક્ષરમ્ ॥

૯૫. શિવારાધનતન્ત્રાણિ યથાવત્ ઉપગમ્ય સઃ ।
પ્રણમ્ય ભૂયઃ પપ્રચ્છ ભગોઽસૌ ધિષણં ગુરુમ્ ॥

૯૬. ભગવન્ ગીષ્પતે પ્રાપ્તં મયા સર્વમભીપ્સિતમ્ ।
ત્વયોપદિષ્ટેન માર્ગેણ મન્ત્રણાનેન ભૂયસા ॥

૯૭. કસ્મિઞ્ચિત્ તોષયામાસ સિદ્ધક્ષેત્રે સદાશિવમ્ ।
યેન સદ્યઃ પ્રસન્નો મે ભવિતા ત્રિજગદ્ગુરુઃ ॥

૯૮. ઇત્યુક્તવતિ વૈ તસ્મિન્ પુનઃ પ્રાહ સ ગીષ્પતિઃ ।
યત્ર જ્યોતિરવિચ્છિન્નં ભૂમૌ જાગર્તિ શામ્ભવમ્ ॥

૯૯. અનાયાસેન તત્ર સિદ્ધિઃ સ્યાત્ સર્વશરીરિણામ્ ।
તત્ર ગત્વા મહાદેવં તામ્રાયા દક્ષિણે તટે ॥

૧૦૦. તપસારાધયન્ ભક્ત્યા પ્રાપ્તકામો ભવિષ્યસિ ।
પુરા કુમ્ભાટકો નામ રાજસૂનુઃ પ્રતાપવાન્ ॥

૧૦૧. હત્વા સ્વમાતરં સાધ્વીં પાપાન્ધઃ પરિતો ભ્રમન્ ।
દૈવાત્ અવાપ્ય તત્સ્થાનં નિર્ધૂતાશેષકલ્મષઃ ॥

૧૦૨. યતીનાં યજ્વનાં વાપિ(ચાપિ) દુર્લભ્યાં પરમાં ગતિમ્ ।
આસસાદ મહાયોગી પુનરાવૃત્તિવર્જિતામ્ ॥

૧૦૩. ઇત્યુક્ત્વા પ્રેષયામાસ કાશ્યપિં તં ગિરાં પતિઃ ।
ઇત્થં ભગઃ પરમકારુણિકાત્ અવાપ્ય
જીવાત્ ગુરોઃ પરમપાશુપતં વ્રતં તત્ ।
તેનાધ્વના વિષમલોચનમીશમિષ્ટ્વા
જ્યોતિર્વનાત્ નયનયોર્યુગમાપ શમ્ભોઃ ॥

ઇતિ પઞ્ચચત્વારિંશોऽધ્યાયઃ । Pro.Total = 3864 + 103 =4067.

## ષટ્ચત્વારિંશોऽધ્યાયઃ

જ્યોતિર્વને કુમ્ભાટકનામ્નઃ કસ્યચિત્ રાજ્ઞઃ માતૃહત્તિમોચન મ્ ।

૧. સનાતને મુને યોગિન્ સર્વતત્ત્વાર્થસારવિત્ ।
એતદેવ પુનઃ શ્રોતું કાઙ્ક્ષે વિસ્તરતો મુને ॥

૨. કથં બૃહસ્પતિઃ તસ્મૈ કથામકથયત્ પુરા ।
કુમ્ભાટકસ્ય વિષયાઃ અશેષાપન્નિવારણીમ્ ॥

૩. સનાતનઃ –
અહો ચિત્રતરં પુણ્યં પુરા ગીષ્પતિનેરિતમ્ ।
આખ્યાનં સંપ્રવક્ષ્યામિ યથાવત્ અવધાર્યતામ્ ॥

૪. ભગઃ –
નમસ્તુભ્યં મહાભાગ સર્વદેવનમસ્કૃત ।
ત્વયા જીવન્તિ યદ્દેવાઃ જીવોऽસિ જગતાં ગુરો ॥

૫. કો વા કુમ્ભાટકો નામ કસ્ય પુત્રસ્તુ કીદૃશઃ ।
કિમર્થમવધીત્ મોહાત્ જનનીં ક્રૂરલોચનામ્ ॥

૬. પાપોऽપ્યગાત્ પુણ્યવનં કેન વા કર્મણા પુનઃ ।
કથં ચકાર તપો ઘોરં કથં વા મુક્તિમાપ સઃ ॥

૭. એતાનિ વિસ્તરાત્ બ્રહ્મન્ વક્તુમર્હસ્યસંશયમ્ ।
બૃહસ્પતિઃ –
હન્ત તે કથયિષ્યામિ કથાં કલુષનાશિનીમ્ ॥

૮. તથાકર્ણનતો જન્તુઃ નૈવ પશ્યતિ દુર્ગતિમ્ ।

પુરાસીત્ વસુષેણાખ્યઃ રાજા વૈશાલિકો મહાન્ ॥

૯. યસ્ય કોદણ્ડવૈશિષ્ટ્યં ગાયન્ત્યદ્યાપિ દેવતાઃ ।
યમાહુઃ સૂરયો નિત્યં દ્વિતીયં વા શતક્રતુમ્ ॥

૧૦. જીમૂતવાહાત્ અધિકં દાતારં કવયો વિદુઃ ।
સ રાજા કાશિરાજસ્ય તનયાં વસુમાલિનીમ્ ॥

૧૧. સ્વયંવરે જહારૈકો નારીકુલમતલ્લિકામ્ ।
તામુદ્વાહ્ય વરારોહાં ચક્રે ધર્માણ્યનેકશઃ ॥

૧૨. વાજપેયાશ્વમેધાદીન્ રાજસૂયમુખાન્ મખાન્ ।
મખાન્તે તસ્ય ભગવાન્ દેવદેવો રમાપતિઃ ॥

૧૩. સન્તુષ્ટઃ પ્રદદૌ તસ્મૈ વ્યોમયાનં સભાસ્વરમ્ ।
તદ્વિમાનં સમારુહ્ય જિત્વાભૂત્ મણ્ડલં બલી ॥

૧૪. ધનાન્યાહૃત્ય ભૂરીણિ ભૂમૌ ધર્માણ્યકારયત્ ।
એવં પાલયતસ્તસ્ય ભૂમણ્ડલમખણ્ડકમ્ ॥

૧૫. સમ્પદઃ પ્રશશંસુસ્તે દેવદાનવમાનવાઃ ।
અનપત્યતયા કિઞ્ચિત્ અપૂર્વત્વેન સર્વતઃ ॥

૧૬. તચ્છ્રુત્વોદ્વિગ્નહૃદયો વિચાર્ય સહ મન્ત્રિભિઃ ।
રાજ્યભારં સમાદાય મન્ત્રિમુખ્યે સુધાર્મિકે ॥

૧૭. ધર્મપત્ન્યા સમં રાજા તપસા વનમેયિવાન્ ।
ચકરોગ્રતપઃ પત્ન્યા નિયમૈઃ દુષ્કરૈઃ પરૈઃ ॥

૧૮. કુલોચિતં મે તનયં શૂરમત્યધિધાર્મિકમ્ ।
દાતુમર્હસિ મે શમ્ભો ત્વામહં શરણં ગતઃ ॥

૧૯. ઇતિ સંપ્રાર્થ્ય મનસા તોષયામાસ શઙ્કરમ્ ।
કુલધર્મકરીં કન્યાં (શીલો)શીલૌદાર્યગુણાન્વિતમ્ ॥

૨૦. માતર્મે દેહિ કલ્યાણિ ત્વામહં શરણં ગતા ।
ઇતિ સંપ્રાર્થ્ય સઞ્ચક્રે સપત્નીકઃ ચિરં તપઃ ॥

૨૧. એવં વર્ષશતે પૂર્ણે સંપ્રીતાવાદિદમ્પતી ।
સાન્નિધ્યં પુરતઃ કૃત્વા યુગપત્ વાચમૂચતુઃ ॥

૨૨. યુવયોરીપ્સિતં વસ્તુ રૂપસૌભાગ્યસમ્ભૃતમ્ ।
લોકૈકવિસ્મયકરં ભવિષ્યતિ ન સંશયઃ ॥

૨૩. એવમમન્તરધાત્ દાતા દત્વાપિ લક્ષિતં વરમ્ ।
સ્વપુરં પ્રત્યપદ્યેતાં યથાભિલક્ષિતોદયૌ ॥

૨૪. કાલેન સૈષા મહિષી પ્રાપ દૌર્હૃદલક્ષણમ્ ।
સોઽપિરાજવરઃ શ્રીમાન્ કૃત્વા પુંસ્સવનાદિકમ્ ॥

૨૫. ચિન્તયાનઃ સુતોત્પત્તિં તદ્રક્ષાં વિધિવત્ વ્યધાત્ ।
સાપ્યસૂત શુભે લગ્ને માસે વૈજનને સતિ ॥

૨૬. સ્ત્રીપુંસલક્ષણોપેતાં પ્રજામાલોક્ય તે જનાઃ ।
હા કષ્ટમિતિ જલ્પન્તઃ શોકાક્રાન્તા સદાભવન્ ॥

૨૭. સ રાજા પરમોદ્વિગ્નો જ્ઞાતિસમ્બન્ધબાન્ધવૈઃ ।
અભૂતપૂર્વચિહ્નાનિ નિશામ્યાતીવ દુઃખિતઃ ॥

૨૮. ક્વેયં દુર્લક્ષણાવાપ્તિઃ ક્વ વા મે તપસઃ ફલમ્ ।
કિં કુર્મઃ કસ્ય વા બ્રૂમઃ દૈવે વિષયવર્તિનિ ॥

૨૯. એવમુદ્વિગ્નચિહ્નેષુ જનેષ્વન્યેષુ ભૂપતૌ ।
યદૃચ્છયા મહાયોગી વામદેવઃ સમાગતઃ ॥

૩૦. તં દૃષ્ટ્વોત્થાય ભૂપાલઃ પ્રત્યુદ્ગમ્ય પ્રણમ્ય ચ ।
આસનાદ્યુપચારૈઃ ચ પૂજયિત્વા યથાવિધિ ॥

૩૧. ઉપવિષ્ટં સુવિશ્રાન્તં નૃપઃ પ્રાહ કૃતાઞ્જલિઃ ।
રાજા –
ભગવન્ યોગિનાં શ્રેષ્ઠ ત્વદાગમનગૌરવાત્ ॥

૩૨. પ્રીતોઽસ્મિ કૃતકૃત્યોઽસ્મિ કૃતાર્થોઽસ્મિ ન સંશયઃ ।
ઇદમુત્પાતરૂપં મે કિં પ્રજાવપુષાભવત્ ॥

૩૩. આલોચિતઃ તે ભવિતા પુત્ર ઇત્યાહ સદ્ગુરઃ ।
મિથ્યા તત્ કથમભૂત્ દેવદેવસ્ય ભાષિતમ્ ॥

૩૪. ઇત્થં શોકવિકલ્પેન જલ્પન્તમવનીપતિમ્ ।
ચિન્તયિત્વાહ ભગવાન્ વામદેવઃ ત્રિકાલવિત્ ॥

૩૫. વામદેવઃ –

રાજન્ ક્વાપિ શિવયોર્ન મિથ્યા જાયતે ગિરઃ ।
ત્વયા સંપ્રાર્થિતઃ પુત્રઃ બલૌદાર્યગુણાન્વિતઃ ॥

૩૬. તથૈવ વસુમાલિન્યા પુત્રી સંપ્રાર્થિતા કિલ ।
આવયોઃ કાઙ્ક્ષિતં દાત્રોઃ શિવયોર્કથિતં વચઃ ॥

૩૭. કદાપિ ન મૃષા ભૂયાત્ તત્ર કો વિસ્મયઃ પ્રભો ।
તસ્માત્ તવ સંશયમપહર્તુમિહાગતઃ ॥

૩૮. આશાનુરૂપં જન્તૂનાં કર્મણઃ ફલમિષ્યતે ।
યથાયં પ્રાર્થિતો દેવઃ પૂજિતુઃ તાદૃશો ભવઃ ॥

૩૯. ચિન્તા માસ્ત્વત્ર રાજેન્દ્ર કરિષ્યામ્યદ્ય તે પ્રિયમ્ ।
પુત્રોઽસૌ ભવિતા નૂનં હાયનત્રિતયં પુનઃ ॥

૪૦. પુનઃ ત્રિવત્સરં નારી ભવિષ્યતિ પુનઃ પુમાન્ ।
પર્યાયેણૈવ રાજન્ પુત્રી પુત્રો ભવિષ્યતિ ॥

૪૧. અનેન પુત્રરૂપેણ શ્રેયસ્તે સમ્ભવિષ્યતિ ।
દુહિતેયં પુનર્ભૂત્વા યુવામાહ્લાદયિષ્યતિ ॥

૪૨. ઇત્યુક્ત્વા કારયામાસ જાતકર્માદિકં મુનિઃ ।
આશીર્ભિઃ યોજયિત્વૈતૌ પુનઃ પ્રાયાત્ યથાગતમ્ ॥

૪૩. અપયાતે વામદેવે સ્મયમાનો મહીપતિઃ ।
કૃતસંસ્કારસમ્પન્નો પુત્રમેનવર્ધયત્ ॥

૪૪. કાલેનાભ્યસ્તશાસ્ત્રોઽયં શસ્ત્રાસ્ત્રેષુ કૃતશ્રમઃ ।
બ્રહ્મવિદ્યામવાપ્યાસૌ બ્રહ્મચર્યમુપાચરન્ ॥

૪૫. તથૈવ કેકયેન્દ્રસ્ય પુત્રીમુદ્વાહ્ય માધવીમ્ ।
તયા રેમે કુમારોઽથ રમયા માધવો યથા ॥

૪૬. સ્ત્રીત્વેઽપિ બ્રહ્મદત્તસ્ય પત્ની પાઞ્ચાલવિદ્યયા ।
ભૂત્વા ચચાર ધર્માણિ પાતિવ્રત્યોચિતાન્યપિ ॥

૪૭. દ્વિવર્ત્માનમિમં નામ્ના પ્રશશંસુઃ સમન્તતઃ ।
દ્વિવર્ત્મકામિમાં સ્તોકં પ્રશશંસુર્હિઃ નામતઃ ॥

૪૮. વસુષેણો મહાબુદ્ધિઃ પુત્રં રાજ્યેભિષિચ્ય ચ ।
સ્વ પત્ન્યા વનં પ્રાપ્ય તપસારાધ્ય શઙ્કરમ્ ॥

૪૯. કર્મબન્ધવિનિર્મુક્તઃ સંપ્રાપ પરમાં ગતિમ્ ।
સોઽપિ દ્વિવર્ત્મા માધવ્યાં પુત્રં લેભે સુવર્ચસમ્(સુમેધસમ્) ॥

૫૦. દ્વિવર્ત્મનોઽપિ પાઞ્ચાલં ભૂપતેઃ મહિષીસુતમ્ ।
અસૂત સમયે પુત્રં કુમ્ભાટક ઇતિ શ્રુતમ્ ॥

૫૧. અપયાતે શતં તસ્મિન્ શરદાં કાલયોગતઃ ।
સ પાઞ્ચાલમહીપાલો રોગાત્ પઞ્ચત્વમેયિવાન્ ॥

૫૨. પિતર્યુપરતે તસ્મિન્ સ્વયં રાજ્યમાકારયત્ ।
ઉભૌ તૌ બાલકૌ સ્નેહાત્ યથાકાલં યથોચિતમ્ ॥

૫૩. પોષયિત્વા કલાસ્વેતાવશિક્ષયત્ અનુક્ષણમ્ ।
તાવુભૌ તુ મહાવીરૌ સર્વશાસ્ત્રેષુ શિક્ષિતૌ ॥

૫૪. ગજસ્કન્ધેઽશ્વપૃષ્ઠે ચ રથચર્યાસુ કોવિદૌ ।
રાજકૃત્યેષુ નિષ્ણાતૌ પ્રકૃતીનાં ચ સમ્મતૌ ॥

૫૫. બભૂવતુર્વીરવરૌ યુવાનૌ પિતૃસમ્મતૌ ।
એતસ્મિન્ એવ સમયે સ કુમ્ભાટકનામકઃ ॥

૫૬. બોધિતઃ પિશુનૈઃ દુષ્ટૈઃ પાપમચિન્તયત્ ।
જ્યેષ્ઠ એવ સુતો રાજ્યે પિત્રા સમભિષિચ્યતે ॥

૫૭. કનિષ્ઠઃ તત્પરો રાજા શાસ્ત્રેષુ વિહિતઃ કિલ ।
જ્યેષ્ઠં કરોતિ રાજાનં ન કનિષ્ઠં કરોતિ મામ્ ॥

૫૮. વિશાલા નગરી જ્યેષ્ઠા પાઞ્ચાલનગરી તથા ।
અસ્માકં વિમુખી જાતા મજ્જાઢ્યત્વેન કેવલમ્ ॥

૫૯. ઇમામમ્બાં જ્યેષ્ઠપુત્રકૃતસ્નેહાં મમાહિતામ્ ।
હનિષ્યામિ ન સન્દેહો તત્ર દોષો ન વિદ્યતે ।
૬૦. જ્યેષ્ઠો વૈશાલિકો ભૂયાત્ પાઞ્ચાલસ્યેન્દ્રો ભવામ્યહમ્ ।
ઇતિ નિશ્ચિત્ય મનસા કુમ્ભાટઃ કુલપાંસનઃ ॥

૬૧. અસદ્ભિર્બોધિતો મૂર્ખૈઃ અર્ધરાત્રે સ્વમાતરમ્ ।
શિરઃ ચિછેદ ખડ્ગેન પશું (શૌ)સૌનિકવત્ બલી ॥

૬૨. અનભિજ્ઞાતમન્ત્રૈસ્તુ કૃત્વા કર્માતિપાતકમ્ ।

સમ્ભ્રાન્તઃ સ્વગૃહં પ્રાપ વલ્મીકમિવ પન્નગઃ ॥

૬૩. તતઃ પ્રભાતે વિમલે સર્વે રાજાનુચારિણઃ ।
હતાં દૃષ્ટ્વા ભયાવિષ્ટાઃ હા કષ્ટમિતિ ચુક્રુશુઃ ॥

૬૪. જનાઃ સમ્ભૂય સામન્તાઃ મન્ત્રિણો મિત્રબાન્ધવાઃ ।
દુઃખેન મહતા દીનાઃ ચક્રુઃ તસ્યૌર્ધ્વદૈહિકમ્ ॥

૬૫. સુમેધસં જ્યેષ્ઠપુત્રં બલિનં સર્વસમ્મતમ્ ।
પુરોધસા મન્ત્રિવૃદ્ધાઃ વિધિના ચાભ્યષેચયન્ ॥

૬૬. માતૃહત્યા સમાવિષ્ટઃ પરિભ્રાન્તો જડોઽનુજઃ ।
હા હતોઽસ્મીતિ વિક્રોશન્ ચચાર પૃથિવીં ભયાત્ ॥

૬૭. પૃષ્ઠતઃતસ્ય ભીમાક્ષી દણ્ડહસ્તા પિશાચિકા ।
કાપિ હત્તિર્મહાઘોરા તર્જયામાસ ભર્ત્સનૈઃ ॥

૬૮. તયા વિદ્રાવ્યમાણોઽસૌ શ્રાન્તઃ ખેદમપારયન્ ।
નિરાહારો વિનિદ્રશ્ચ શુષ્કકણ્ઠોષ્ઠતાલુકઃ ॥

૬૯. અન્વિષ્ય શરણં કિઞ્ચિત્ ન લેભે સૌખ્યમાત્મનઃ ।
પરિભ્રામ્ય મહીં કૃત્સ્નાં કાશીકૌસલમાલવાન્ ॥

૭૦. કાશ્મીરાન્ માગધાન્ વઙ્ગાન્ સાલ્વાનારટ્ટકાનપિ ।
ચોલકેરલકમ્ભોજાન્ અતીત્ય વિપિનાન્યપિ ॥

૭૧. પુણ્યક્ષેત્રાન્યનાસાદ્ય પુણ્યતીર્થાનિ હત્યયા ।
વિદ્રાવ્યમાણઃ સર્વત્ર પ્રાપ્ય પાણ્ડ્યમહીમિમામ્ ॥

૭૨. યત્ર ચન્દનસૌરભ્યમલયેન્દ્રનભસ્વતા ।
તામ્રાતરઙ્ગશીતેન મહાપાપાપહારિણા ॥

૭૩. પવિત્રામ્બરં રાજ્યં યદાપ પરિતો ભ્રમન્ ।
તથૈવ પૃષ્ઠતો યાન્તીં સ્ત્રીહત્યાં ઘોરરૂપિણીમ્ ॥

૭૪. ન દદર્શ ક્ષણાદેવ તમસ્સૂર્યોદયે યથા ।
સમન્તાત્ બ્રહ્મભુયિષ્ઠાં બ્રહ્મઘોષનિનાદિતમ્ ॥

૭૫. ઋષિવૃન્દૈઃ સ્તૂયમાનૈઃ અગ્નિભિર્મન્ત્રમન્ત્રિતૈઃ ।
વર્ણાશ્રમસદાચરૈઃ જનૈરાનન્દનિર્ભરૈઃ ॥

૭૬. પૂર્યમાણા પુરી પુણ્યૈર્દક્ષિણાશા સુશીતલા ।
મહામણિગણાકીર્ણા કુમ્ભયોનિપવિત્રિતા ॥

૭૭. સૈષા દર્શનમાત્રેણ કુમ્ભાટં શરણાગતમ્ ।
અપાલયત્ ઇવાભ્યાશે સ્વપુત્રં જનની યથા ॥

૭૮. ઇત્થમાશ્વાસિતઃ તાવત્ દેવેન નૃપનન્દનઃ ।
સ્મયમાનઃ પરિભ્રામ્ય તામ્રાયા ઉત્તરે તટે ॥

૭૯. નિષાદ્ય મૂલે વૃક્ષસ્ય પિપ્પલસ્ય મહીયસઃ ।
તામ્રામાલોકયન્નગ્રે મહાપીયૂષવાહિનીમ્ ॥

૮૦. ચિન્તયામાસ બહુધા વ્યાઘ્રમુક્ત ઇવોરગઃ ।
હા ઘોરરૂપિણી હત્યા ક્વ યાતા કેન વારિતા ॥

૮૧. અત્યાહારવિહીનસ્ય તીર્ણાધ્વાનસ્ય મે કુતઃ ।
પરિશ્રમઃ પરામૃષ્ટઃ ભયં ચાપિ પલાયિતમ્ ॥

૮૨. અન્ધકારોપડયશેષશ્ચ શાન્તઃ સ્વસ્થં ચ મે મનઃ ।
આકસ્મિકમહાસૌખ્યં સઞ્જાતં કેન હેતુના ॥

૮૩. માતરં પિતરં ભાર્યાં બ્રાહ્મણં શરણં ગતમ્ ।
યે ચ નિઘ્નન્તિ પાપિષ્ઠા તેષાં કાશ્યપિ કાલિકા ॥

૮૪. મહાપાતકયુક્તાનાં માતૃહત્યાલસાત્માનામ્ ।
ગઙ્ગાપ્યઙ્ગારપૂરેતિ કથયન્તિ પુરાવિદઃ ॥

૭૫. ઇતઃ પરં કિં કરિષ્યે શરણં કં વ્રજામ્યહમ્ ।
અત્રાવધિં ન પશ્યામિ મિત્રં સંરક્ષણક્ષમમ્ ॥

૮૬. ઇતિ ચિન્તયસ્તસ્ય રાજપુત્રસ્ય ધીમતઃ ।
કાપિ કલ્યાણજનની બુદ્ધિરાસીત્ પુરાકૃતૈઃ ॥

૮૭. પુણ્યૈઃ તત્તીરસંયોગાત્ અરણેર્હવ્યવાટ્ ઇવ ।
ઇયં પુણ્યનદી સાક્ષાત્ સર્વપાપપ્રણાશિની ॥

૮૮. યદાલોકનમાત્રેણ સ્ત્રીહત્યા યદ્વિનાશિતા ।
તસ્માત્ સ્નાતવ્યમસ્માકં તીર્થમેતત્ ન સંશયઃ ॥

૮૯. અતઃ પરં ગમિષ્યામિ શરણં કમપિ દ્વિજમ્ ।
ઇતિ નિશ્ચિત્ય મનસા તત્ર સ્નાત્વા યથાવિધિ ॥

૯૦. દક્ષિણં તીરમાશ્રિત્ય દદર્શ મહદાશ્રમમ્ ।
સર્વતઃ શોભનાકારાં તપન્તીમિવ દુષ્કરમ્ ॥

૯૧. તત્ર કાઞ્ચનતન્વઙ્ગીં તપનીયનિભપ્રભામ્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગીં ભાસ્વદ્રુદ્રાક્ષમાલિકામ્ ॥

૯૨. ચીરકૃષ્ણાજિનધરાં તપસ્યન્તીં સુનિશ્ચલામ્ ।
ચઞ્ચત્ અઙ્ગુષ્ઠકોટીરવ્યાવૃદ્ધાક્ષિસ્રગુજ્જ્વલામ્ ॥

૯૩. મહામન્ત્રાક્ષરાટોપસ્ફુરમાણૌષ્ઠપલ્લવામ્ ।
અચઞ્ચલતટિત્પ્રખ્યાં અર્ધોન્મીલિતલોચનામ્ ॥

૯૪. અનાસાદ્યામન્યજનૈઃ દીપ્તામગ્નિશિખામિવ ।
તાં દૃષ્ટ્વા વિસ્મયાવિષ્ટઃ શનૈરાસાદ્યશાન્તિગમ્ ॥

૯૫. પ્રણિપત્યાઞ્જલિં મૂર્ધ્ના લાલયન્ નૃપનન્દનઃ ।
ઉપતસ્થે તથા દેવીં ગાયત્રીં બ્રાહ્મણો યથા ॥

૯૬. ઉપહૃત્ય સમાધિં સા શનૈરુન્મીલ્ય લોચને ।
દદર્શ પુરતો દાન્તમુપચારમુવાચ હ ॥

૯૭. કસ્ત્વં કુતસ્સમાયાતઃ કિં વાગમનકારણમ્ ।
સર્વમાખ્યાહિ તત્ત્વેન યદ્યગોપ્યં મયાધુના ॥

૯૮. અનુશિષ્ટઃ તયા તન્વ્યા સ્વવૃત્તાન્તમશેષતઃ ।
સ્વગોત્રકર્મનામાનિ વ્યાચચક્ષે વિશામ્પતે ॥

૯૯. મયા પાપાત્મના માતૃહત્યા પાપાન્ધચેતસા ।
પ્રાયશ્ચિત્તં પાતકસ્ય કૃતસ્યાદેષ્ટુમર્હસિ ॥

૧૦૦. કા ત્વમેકાકિની બાલા તપો ઘોરં વિતન્વતી ।
પરિશ્રામ્યસિ માતસ્ત્વં શ્રોતવ્યં મે કૃપાસ્તિ મે ॥

૧૦૧. પાપાન્ધસિન્ધૌ પતિતં ગભીરે પારાનવાપ્ત્યા પરિશોચમાનમ્ ।
ત્રાહિ પ્રસન્ને જનનીવ પુત્રાન્ સત્યં પુરસ્તાત્ શરણાગતં મામ્ ॥

૧૦૨. ઇત્થં દુઃખાર્તિકમ્પમાનહૃદયં કારુણ્યકલ્લોલિની
સૈષા સ્વાઙ્ઘ્રિસરોરુહૈકચરણં પાઞ્ચાલભૂપાત્મજમ્ ।
પાપાત્ એનં અમોચયત્ પરશિવાનન્દૈકદીક્ષા-

ક્રમાત્ દાવાગ્નેરિવ કાલિકાજલકણૈર્ધર્મેવ નાન્યાં ગતિમ્ ॥

ઇતિ ષટ્ચત્વારિંશોઽધ્યાયઃ । Pro.Total = 4067 + 102 =4169

## સપ્તચત્વારિંશોઽધ્યાયઃ

જ્યોતિર્વને કચાવત્યાઃ તામ્રાસ્નાનમહિમ્ના ભર્તૃત્વપ્રાપ્તિઃ ।

૧. ભગવન્ કરુણામૂર્તે જ્ઞાનવિજ્ઞાનવારિધે ।
સ્વર્ગાપાયતમસ્સૂર્યે કાર્યાકાર્યવિચારવિત્ ॥

૨. ત્વદઙ્ઘ્રિપઙ્કજાલમ્બાત્ અનપાયમિદં જગત્ ।
તસ્માત્ ત્વં શરણં પ્રાપ્ય ન પશ્યે શોકમુલ્બણમ્ ॥

૩. એતત્વૃત્તાન્તમાશ્ચર્યં ભૂયો વિસ્તરતો ગુરો ।
શ્રોતુમિચ્છામ્યશેષેણ પ્રસાદઃ ક્રિયતાં મયિ ॥

૪. કેયમેકાકિની બાલા કિમર્થં તપ આસ્થિતા ।
કથં કુમ્ભાટવીં પાપાત્ દુરન્તાત્ તામચોદયત્ ॥

૫. ઇતિ તેનાર્થિતઃ તાવત્ ગુરુર્ગિરમથાદધે ।
બૃહસ્પતિઃ –
શ્રુણુ નાન્યમના પુણ્યાં કથાં કાશ્યપનન્દન ॥

૬. પુરા વાત્સ્યાયનઃ કશ્ચિત્ અજમીડ ઇતિ શ્રુતઃ ।
તસ્ય ધર્મચરી પદ્મા નામ્ના ગાર્ગ્યસ્ય નન્દિની ॥

૭. અસૂત કન્યામાશ્ચર્યાં રૂપૌદાર્યગુણાન્વિતામ્ ।
કચાવતીતિ વિખ્યાતા ચતુષ્ષષ્ટિકલાવતી ॥

૮. પિત્રોઃ શુશ્રૂષણપરા વર્ધમાનેવ ચન્દ્રિકા ।
બાલ્યયૌવનમધ્યસ્થા વયસા ચારુહાસિનીમ્ ॥

૯. અનુરૂપતપઃકર્મવિદ્યાવિનયશાલિને ।
હારીતાખ્યવરાયૈનામદાત્ આત્મૈકવેદિને ॥

૧૦. હારીતસ્તાં સમુદ્વાહ્ય લક્ષ્મીમિવ જનાર્દનઃ ।
સભાર્યઃ સ્વાશ્રમં પ્રાપ બાન્ધવૈરનુમોદિતઃ ॥

૧૧. સાપિ બાલા પતિગૃહે ગૃહકર્મરતા સતી ।

શુશ્રૂષમાણા ભર્તારં શ્વશ્રૂઃ પ્રીતિમર્ધયત્ ॥

૧૨. એતસ્મિન્નન્તરે ચારુ મિથુનં કૃકલાસયોઃ ।
રમમાણૌ રતિપરૌ સંસપ્રાક્ષીત્ કચાવતી ॥

૧૩. વિનોદનાય તદા કાષ્ઠમઙ્ગુષ્ઠપ્રમાણકમ્ ।
તસ્યોપરિ ચિક્ષેપ પતત્પ્રહારૈકદેશતઃ ॥

૧૪. મિથુનમૂર્ચ્છિતમભૂત્ પતિતં વ્યાજહાર તામ્ ।
દુર્ભગે રતિવેલાયાં વિઘ્નં કૃતવતી યત ॥

૧૫. તવ ભર્તૃવિયોગોઽભૂત્ પાપેનેનાનેન ભૂયસા ।
ઇત્યુક્ત્વા કૃકલાસસ્ત્યક્ત્વા તં મિથુનં વપુઃ ॥

૧૬. સ્પૃહણીયતરાકારાવાસ્તામમરદમ્પતી ।
વિમાનવરમારુહ્ય પ્રયાણાભિમુખૌ તદા ॥

૧૭. કચાવતીં શોચમાનાં તરુણીં સાસ્રલોચનામ્ ।
સાન્ત્વયિત્વા દયાયુક્તઃ વાચમેનામભાષત ॥

૧૮. પ્રિયે કલ્યાણિ મા ભૈષીઃ શોકં નાર્હસ્યપિ શ્રુણુ ।
ભવિતવ્યે ન શોચન્તિ મણ્ડિતાઃ સૂક્ષ્મદર્શિનઃ ॥

૧૯. અનભિજ્ઞાતયાવાભ્યાં લબ્ધઃ શાપોઽયમુલ્બણઃ ।
દ્વાદશાબ્દાવધિર્ભૂયાત્ તાવત્ શ્રેયઃ સમેષ્યસિ ॥

૨૦. ઇત્યુક્તવન્તૌ તૌ નત્વા વિમાનવરમાસ્થિતૌ ।
વ્યાજહાર નયભિજ્ઞા દિવ્યાકારૌ કચાવતી ॥

૨૧. કૌ યુવાં કમનીયાઙ્ગૌ મહાભોગૈકભાગિનૌ ।
અદૃષ્ટપૂર્વસૌભાગ્યૌ સુરસમ્પૂર્ણવિગ્રહૌ ॥

૨૨. ભાસ્કરાવિવ નિષ્ક્રાન્તૌ રોહિણીચન્દ્રવર્ચસૌ ।
કેન કર્મ વિપાકેન સંપ્રાપ્તૌ કૃકલાસતામ્ ॥

૨૩. કેન વા સાપરાધાયાં મયિ વાત્સલ્યભગિનૌ ।
એતાનિ શ્રોતુમિચ્છામિ વક્તવ્યં યદિ વિસ્તરાત્ ॥

૨૪. ગન્ધર્વઃ –
વત્સે ત્વામભિધાસ્યેઽહં જન્મકર્મ ચ પૂર્વિકમ્ ।
પુરા ગન્ધર્વરાજસ્ય વસુનાભસ્ય ધીમતઃ ॥

૨૫. પુત્રોઽહં સુરુચિર્નામ મદ્ભૃત્યાનાં મદૌદયઃ ।
રૂપેણાસગુણેનાપિ કાન્તિસૌભાગ્યવત્તયા ॥

૨૬. ગણ્યમાનેષુ ગન્ધર્વેષ્વગ્રેસરમિમં જનઃ ।
પ્રશંસન્તિ જનાસ્સર્વે દેવદાનવમાનવાઃ ॥

૨૭. સઙ્ગીતવિદ્યાસર્વસ્વસારસ્વતે ચોમાપતિઃ ।
તપસારાધિતાઃ ચક્રુઃ ઋષી નારદપર્વતૌ ॥

૨૮. એષા પુષ્કરકેશસ્ય ગન્ધર્વાણમધિશિતુ ; ।
તનયા સૌરગત્યેન વિદ્યાવિનયસમ્પદા ॥

૨૯. તુલિતા સા વરાટેયં મયા ચોઢા સ્વયમ્વરે ।
દેવદત્તવિમાનેન કામગેનાર્કવર્ચસા ॥

૩૦. પરીત્ય સકલાન્ લોકાન્ અનયા ભાર્યયા સમમ્ ।
ગન્ધમાદનશૈલસ્ય મણિકન્ધરમન્દિરે ॥

૩૧. મયાનીતામરકક્ષ્યાઃ કીડતાક્ષૈરહર્નિશમ્ ।
એતસ્મિન્નન્તરે તન્વિ તનયૌ યજ્ઞકેતુનઃ ॥

૩૨. પ્રિયમિત્રઃ સુમિત્રશ્ચ સઙ્ગીતાગમપારગૌ ।
અન્યોન્યવિદ્યાપ્રાગલ્ભ્યાત્ મદન્તિકમુપાગતૌ ॥

૩૩. તાવનાદૃત્ય ક્રીડન્તાવાવામન્યોન્યવિભ્રમાત્ ।
તાવદાવિષ્ટરોષાભ્યાં શાપુત્સૃષ્ટતયેદૃશઃ ॥

૩૪. અન્યચ્ચ શ્રૂયતાં ભદ્રે શોકમત્યુલ્બણં મમ ।
ષડ્જપાલ ઇતિ ખ્યાતઃ ગન્ધર્વઃ મત્સુહૃત્તમઃ ॥

૩૫. કલાકલાપદુગ્ધાબ્ધિઃ મમ પ્રાણો બહિશ્ચરઃ ।
દેવરાજસ્ય શાપેન હેતુના કેનચિત્ પુરા ॥

૩૬. સ્ત્રીત્વમાસાદ્ય ગોકર્ણે શુચાવાસીત્ શતં સમાઃ ।
તાવત્ તત્પરિતોઽર્થી તુ સ્ત્રીહેતોઃ કોઽપિ દાનવઃ ॥

૩૭. જઘાન ગદયા તત્ર તદ્ભાર્યાં ચ વિચકર્ષ સઃ ।
પાતિવ્રત્યાગ્નિના તસ્યા સોઽપિ ભસ્મીકૃતોઽભવત્ ॥

૩૮. સ દૈત્યોઽભૂત્ દ્વિવર્ત્માખ્યઃ નામ્ના કુમ્ભાટકઃ સ્વયમ્ ।

નિહત્ય માતરં તત્ર હત્યા સમ્ભ્રાન્તચેતનઃ ॥

૩૯. યાવત્ ત્વદન્તિકં યાતિ તાવત્તસ્મૈ સસાન્ત્વકમ્ ।
ઇમાં શૈવીં મહાવિદ્યામુપદેષ્ટું ત્વમર્હસિ ॥

૪૦. તાવદ્ભર્ત્રા સમાયુક્તા શ્રેયઃ પ્રાપ્સ્યસિ બાલિકે ।
ઇત્યુક્ત્વા તાં સ ગન્ધર્વઃ શૈવીમેનાં ષડક્ષરીમ્ ॥

૪૧. ઉપદિશ્ય યથાન્યાયં તામામન્ત્ર્ય પ્રિયાન્વિતઃ ।
વિમાનેનાતિવેગેન પ્રયયૌ વ્યોમવર્ત્મના ॥

૪૨. સાપિ વિસ્મયસમ્ફુલ્લનયના ચારુહાસિની ।
સ્વભર્ત્રે કથયામાસ રહસ્યેષા કચાવતી ॥

૪૩. પ્રિયાવિયોગઃ પ્રાપ્તવ્યં મન્વાનો મુનિપુઙ્ગવઃ ।
પ્રિયાસખઃ પ્રીતિકરં પિત્રોર્નિયમકારયત્ ॥

૪૪. કેષુચિત્ શાપયા તેષુ દિનેષુ પિતરૌ મુનેઃ ।
દૈવાત્ પઞ્ચત્વમાપન્નૌ શિવસાયુજ્યમીયતુઃ ॥

૪૫. તાવત્પિત્રોર્યથાન્યાયં સવિધાયૌર્ધ્વદૈહિકમ્ ।
નિવાપાઞ્જલિમાદાતું સ્વપત્ન્યા બન્ધુભિસ્સહ ॥

૪૭. સ્નાતું મલયનન્દિન્યાઃ તીર્થમાવિશ્ય મન્ત્રવિત્ ।
મમજ્જ શીતલે તીર્થે શિવ પાહીત્યુદીરયન્ ॥

૪૮. તાવત્ કશ્ચિત્ બલેર્ભૃત્યો દૈત્યઃ તત્તીર્થસંશ્રયઃ ।
વિનોદાય તમાનીય નિનાય બલિમન્દિરમ્ ॥

૪૮. તં દૃષ્ટ્વા મુનિમાનીતં સ્વભૃત્યેનાવજાનતા ।
સ્વાગતાસનપાદ્યાર્ઘ્યમધુપર્કાર્હણાદિભિઃ ॥

૪૯. તોષયિત્વા સ્વભવને મુનિમેનમવાસયત્ ।
અથ તીરગતાઃ સ્નિગ્ધાઃ મુનયોऽપિ બાન્ધવાઃ ॥

૫૦. હારીતં તમશ્યન્તઃ ચુક્રુશુઃ શોકકર્શિતા ।
કથમમ્ભસિ નિર્મગ્નઃ પુનર્નાગન્તુમક્ષમઃ ॥

૫૧. ગૃહીતો વા ગ્રાહમુખ્યૈઃ નીતો વા સ્રોતસા પુનઃ ।
મૃત્યુઃ પ્રાણૈકહર્તા સ્યાત્ ન દેહસ્ય કદાચન ॥

૫૨. અહો પિતા ચ માતા ચ દ્વાદશાહાત્ પરં ગતૌ ।
એષા કચાવતી બાલા તનીયસ્યામલાશયા ॥

૫૩. કથં સોઢું સમર્થા સ્યાત્ સંપ્રાપ્તં વિરહજ્વરમ્ ।
વિલપ્ય બહુધા ચૈવ સુહૃદો દિવસત્રયમ્ ॥

૫૪. સાન્ત્વયિત્વા ચ તત્પત્નીં સ્વાનિ સ્વાનિ ગૃહાન્યગુઃ ।
સાપિ ભાવ્યમિદં દુઃખમવસ્થાપ્ય હૃદયઙ્ગણે ॥

૫૫. તસ્યાશ્રમસ્થા તપસા તોષયામાસ શઙ્કરમ્ ।
નિરાહારા યદાહારા સ્થિતા સ્થણ્ડિલશાયિની ॥

૫૬. તામ્રાયાસ્તુ મહાતીર્થે દર્શનાત્ પાપહારિણિ ।
ત્રિકાલં કુર્વતી સ્નાનં મહાનિયમમાસ્થિતા ॥

૫૭. દ્વાદશાબ્દં ક્રમેણૈવ સા નિનાય શનૈઃ શનૈઃ ।
તાવત્ કુમ્ભાટકં દૃષ્ટ્વા તદ્વૃત્તાન્તં નિશમ્ય ચ ॥

૫૮. સ્નેહાત્ સ્વકર્મનામાનિ કથયિત્વા યથોચિતમ્ ।
દીક્ષાં અસ્મૈ સમાવેશ્ય પ્રાદાચ્ચૈવ ષડાક્ષરમ્ ॥

૫૯. પ્રાપ્ય પાશુપત્તાભિખ્યં વ્રતં તત્ર નૃપાત્મજઃ ।
પશુવૃત્તિં સમાધાય તસ્યાં અહરહઃ કૃતી ॥

૬૦. સામ્બમારાધયામાસ મહાનિયમમાસ્થિતા ।
દિનેષ્વેવં નીયમાનેષ્વબલા દુર્બલાશયા ॥

૬૧. કચાવતી નિશામધ્યે ચિન્તામાપ દુરત્યયામ્ ।
અહો મે દુરિતસ્યાન્તો નાભ્યેતિ ચિરકાલતઃ ॥

૬૨. ગન્ધર્વરાજવચનં યથાર્થં ફલતે ન મે ।
દ્વાદશાબ્દમપાક્રાન્તં સમયો હ્યત્યવર્તત ॥

૬૩. મન્ત્રૌષધીતપસ્તીર્થદેવપૂજાદિકાન્યપિ ।
સદ્યઃ સુકૃતિનં પાતિ નૈવ પાતાકિનં ખલુ ॥

૬૪. પાપાસ્તુ ત્રિવિધા પ્રોક્તા હ્યાગમ્યારબ્ધસંશયાઃ ।
આદ્યન્તકૌ સુકૃતિનાં વિલીયેતે તપોબલાત્ ॥

૬૫. મધ્યમસ્તુ ગરિષ્ઠોઽયં યમનુભોગાત્ વિનશ્યતિ ।
અવશ્યમનુભોક્તવ્યં કૃતં કર્મશુભાશુભમ્ ॥

૬૬. નાભુક્તં ક્ષીયતે કર્મકલ્પકોટિશતૈરપિ ।
કદાપિ ધર્મશીલાનાં વિદ્યન્તે નાપદઃ ક્વચિત્ ॥

૬૭. અભાગ્યપાપિનં પાપં નિકૃન્દન્તિ પદે પદે ।
જન્માન્તરાર્જિતૈઃ પાપૈઃ પતિવિશ્લેષણં સ્ત્રિયઃ ॥

૬૮. તદિદાનીં પ્રમુઞ્ચન્તિ કિં દુષ્કૃતકારિણમ્ ।
મૃતે ભર્તરિ નારીણાં ધર્મો હ્યનુમૃતિઃ ધ્રુવમ્ ॥

૬૯. તમેનમપહાયાત્ર વર્તન્તીં માં દુરાશયામ્ ।
હસન્તિ સન્તઃ સીદન્તીં વ્યર્થકર્મૈકપાલિનીમ્ ॥

૭૦. તસ્માદિતઃ પરં કાર્યમસ્માકં સૌખ્યહેતવે ।
વિમલાપહાર્યૈનાં નનુ ધર્માર્જનક્ષમામ્ ।
૭૧. ત્યક્ત્વા મલયનન્દિન્યાઃ તીર્થે પાપાપહારિણિ ।
ભર્તારમનુગચ્છામિ નાત્ર કાર્યા વિચારણા ॥

૭૨. તપઃકર્તુમશક્તાનાં સમાધિમુપગચ્છતામ્ ।
અસામર્થ્યવતાં લોકે ફલાઃ સન્દર્શિતાઃ ચ તૈઃ ॥

૭૩. ભૃગુપાતોઽગ્નિપતનં સઙ્ગ્રામે નિધને તથા ।
મહાપ્રસ્થાનકરણં તીર્થે દેહવિસર્જનમ્ ॥

૭૪. અનાયાસેન કુર્વન્તિ મોક્ષલક્ષ્મીમિતિ શ્રુતિઃ ।
અનુયાન્તિ સ્વભર્તારં કૂટસ્થાઃ પૂર્વપૂર્વિકાઃ ॥

૭૫. અદ્યાપિ સદ્ભિઃ ગીયન્તે સ્ત્રિયો ધર્મપરાયણાઃ ।
પારમ્પર્યકથામેનાં પદવીં ભાગ્યદાયિનીમ્ ॥

૭૬. અપહાય મહામોહાત્ કાલો મે પર્યવર્તિતઃ ।
દૈવાત્ ઇદાનીમસ્માકં સઞ્જાતા બુદ્ધિરીદૃશી ॥

૭૭. સર્વતીર્થમયી દેવી દેવતા મન્ત્રરૂપિણી ।
મહામઙ્ગલદા નૃણાં માલા મલયનન્દિની ॥

૭૮. પાલયિષ્યતિ માં વ્યક્તં નાત્ર કાર્યા વિચારણા ।
ઇતિ નિશ્ચિત્ય મનસા વૈશાખે બહુલાગમે ॥

૭૯. ઉપોષ્ય નવમીં શુદ્ધામારાધ્ય ગિરિજાસખમ્ ।

અપરેદ્યુરસમ્ભ્રાન્તા કિઞ્ચિત્ અભ્યુદિતે રવૌ ॥

૮૦. નિર્ગત્ય સ્વાશ્રમાત્ તન્વી કીર્તયન્તી શિવં શિવામ્ ।
સ્મરન્તી ગુરુપાદાબ્જં સ્મરન્તી પારલૌકિકમ્ ॥

૮૧. છિન્દન્તી કર્મપાશાન્ ચ પ્રવિશન્તી પરાત્પરમ્ ।
તીરમાસાદ્ય તામ્રાયાઃ નિગૃહીતાખિલેન્દ્રિયા ॥

૮૨. આશાન્તા સ્વાન્તસમ્ફુલ્લપરતત્ત્વાર્થદીપિકા ।
અનુયાતે શનૈરેનામારૂઢેવ મનોરથમ્ ॥

૮૩. શિરસ્યનુસ્યૂતગુરુપાદુકાતપવારણા ।
પરમાનન્દપીયૂષપાથેયોલ્લાસિતાશયા ॥

૮૪. પરલોકપ્રયાણાર્થં પરિચ્છેદવતી ચ યા ।
નમસ્કૃત્ય મુહુર્ભક્ત્યા ગુરુહેરમ્બભૈરવાન્ ॥

૮૫. કણ્ઠલગ્નજલે સ્થિત્વા ધ્યાયન્તી પરમેશ્વરમ્ ।
જજાપ પરમં મન્ત્રં કર્મનિર્મૂલનક્ષમમ્ ॥

૮૬. કલ્યાણિ કલિપઙ્કઘ્ને કન્દલત્કરુણાશયે ।
સદાશિવહૃદાવાસે સાયુજ્યં સંપ્રયચ્છ મે ॥

૮૭. ગઙ્ગાદ્યશેષાલિલાલિતામૃતવાહિનિ ।
સદાશિવહૃદાવાસે સાયુજ્યં સંપ્રયચ્છ મે ॥

૮૮. બ્રહ્મવિષ્ણુમહેશેશસદાશિવમનોરથે ।
મલયાદ્રિસમુદ્ભૂતે માર્ગં દેહિ મહેશ્વરિ ॥ ।

૮૯. ઇતિ મન્ત્રં સમુચ્ચાર્ય મમજ્જામ્ભસિ નિર્મલે ।
કચાવતી નિરાશા સા નિર્મલં પદમેયુષી ॥

૯૦. તાવત્કલાકલારાવઃ સઞ્જજ્ઞે તીરવર્તિનામ્ ।
નિષેધતીવ નિર્યાણં તરઙ્ગનિકરૈઃ કરૈઃ ॥

૯૧. ચકાશે તટિનીહંસસારસારવમેદુરા ।
તસ્માદાવિરભૂદગ્રે તડિત્વાન્ તત્ક્ષણાદિવ ॥

૯૨. તરુણાદિત્યસઙ્કાશા તરઙ્ગિતકૃપાશયા ।
ચતુર્ભુજાભુદોઞ્ચત્પાશાઙ્કુશવરાભયા ॥

૯૩. મણિકોટીરઘટિતા શર્વરીવિટરૂપિકા ।
કિરીટહારકેયૂરકનત્કનકકુણ્ડલા ॥

૯૪. કર્પૂરવૃષ્ટિવિભ્રાન્તિકારિણી સ્મિતરોચિષા ।
કૃપાતરઙ્ગિતાપાઙ્ગપરિપૂતા શુભાવલિઃ ॥

૯૫. નિત્યકલ્યાણદા ગૌરી માયાપાશવિમર્દિની ।
સ્તૂયમાના મુનિગણૈઃ પૂજ્યમાના સુરાસુરૈઃ ॥

૯૬. લોકાપાયોપશમનૈઃ સ્વકૈઃ કરસમોન્મુખૈઃ ।
દૃશા વ્યોમામ્બુપૂરાત્ અભિમૃશ્ય કચાવતીમ્ ॥

૯૭. મા ભૈષ્ટ મા વિચારોઽસ્તુ ત્વયા ચ સવિજૃભણમ્ ।
જહિ શોકમિમં વત્સે ધૈર્યમાલમ્બ્યતાં હૃદિ ॥

૯૮. વિદ્યયા તપસા સૌખ્યસૌભાગ્યાભ્યુદયશ્રિયમ્ ।
પશ્ય પશ્ય ભજસ્વેમાં પરમાનન્દસમ્પદમ્ ॥

૯૯. મુહૂર્તાત્ એવ ભર્તારં તીર્થાત્ અસ્માત્ ઉદિત્વરમ્ ।
દ્રષ્ટુમર્હસિ સાનન્દં પૂર્ણકામા ભવિષ્યસિ ॥

૧૦૦. અસ્મિન્ મત્સંશ્રયે તીર્થે સ્મરણાત્ અશુભાપહે ।
ત્વદીરિતામિમાં જપ્વા સ્તુતિં મુક્તામણિપ્રસોઃ ॥

૧૦૧. યે મજ્જન્તિ માં સ્તુત્વા નૂનં સાયુજ્યભાગિનઃ ।
મધ્યાહ્ને વાથવાદિત્યે સમુન્મિષતિ માનવઃ ॥

૧૦૨. સ્નાત્વા સ્વપિતૄન્ વિપ્રાન્ તર્પયિત્વા યથોચિતમ્ ।
જ્યોતિઃસ્થાનં સમાલોક્ય કર્મબન્ધાત્ વિમુચ્યતે ॥

૧૦૩. ત્વયા યુક્ત્યા ભક્ત્યા વસ્તવ્યં પૂર્ણભાગ્યયા ।
સ્વભર્ત્રા સુખદાન્ ભુક્ત્વા વિષયાન્ ધર્મસમ્મિતાન્ ॥

૧૦૪. અન્તે નિરામયં તેજો યુવાભ્યાં પ્રાપ્યમઞ્જસા ।
ઇતિ તામનુશાસ્યામ્બા પ્રીણયિત્વાપરોત્તમૈઃ ॥

૧૦૫. પશ્યતાં સર્વદેવાનાં તત્રૈવાન્તરધાત્ જલે ।
તતઃ પ્રસન્નહૃદયા સમેતા તત્ર બાન્ધવૈઃ ॥

૧૦૬. પ્રવાહલક્ષ્મીમક્ષીણાં પ્રસન્નકમલાનનામ્ ।
ફેનાવલિદુકૂલાઢ્યામુચ્ચલન્મીનલોચનામ્ ॥

૧૦૭. આવર્તનાભિશોભાઢ્યાં નીલશૈવાલકૈશિકામ્ ।
ચક્રવાકસ્તનવતીં હંસસારસનાદિતામ્ ॥

૧૦૮. અસ્પન્દનિમિષોલ્લાસસાનન્દૈઃ લોચનોત્પલૈઃ ।
આભિમુખ્યપ્રવાહૈસ્તૈઃ અભાવનિબિડૈર્જનૈઃ ॥

૧૦૯. એવં પ્રતીક્ષમાણેષુ મુનેરભ્યાગમાર્થિષુ ।
તત્તીરપૂરાદાશ્ચર્યપ્રભા પ્રાદુરભૂદગ્રતઃ ॥

૧૧૦. ઐન્દ્રીમિવ પરિક્ષિપ્તાં આશામરુણરશ્મિભિઃ ।
ચકાશે સા નદી પુણ્યા કુઙ્કુમોદકવાહિની ॥

૧૧૧. ઉપર્યુપરિ પૂરસ્ય જૃમ્ભમાણૈઃ ચ બુદ્બુદૈઃ ।
ઉદયારુણિતે વ્યોમ્નિ સમભાવીવ તારકૈઃ ॥

૧૧૨. ઇતસ્તતઃ પ્રસર્પિદ્ભિઃ શફરૈઃ પ્રાંશુભિર્જલે ।
ઉન્મમજ્જ મુનિર્મીનકેતુશઙ્કાં વિકલ્પયન્ ॥

૧૧૩. સદૈત્યરાજદત્તૈઃ ચ મણિકાઞ્ચનભૂષણૈઃ ।
કિરીટેનાર્કવર્ણેન દ્યોતયન્ ઇવ રોદસી ॥

૧૧૪. પ્રાદુરાસીત્ મુનિઃ તીર્થાત્ પશ્યતાં તીરવર્તિનામ્ ।
ઊહ્યમાનો બહુગણૈઃ હેતુભિઃ તત્ત્વદર્શિભિઃ ॥

૧૧૫. પ્રિયામાનન્દયન્ સ્નિગ્ધાં બન્ધૂન્ ચૈવાનુવર્તિનઃ ।
તીરમાસાદ્ય સાનન્દં ભીતાન્ નિર્વાપયન્ તદા ॥

૧૧૭. પ્રિયાં સંપ્રીણયામાસ જ્ઞાતીન્ ચાન્યાન્યથોચિતમ્ ।
તાવત્ ગીર્વાણનિર્મુક્તૈઃ કલ્પતરુકુસુમૈસ્સમમ્ ॥

૧૧૮. દેવદુન્દુભયો નેદુઃ સિદ્ધાશ્ચૈવાસ્તુવન્ મુનિમ્ ।
હંસારૂઢઃ તદા બ્રહ્મા સેવ્યમાનઃ સુરાસુરૈઃ ॥

૧૧૯. તમેનં પ્રીણયન્ વાચા વ્યાજહાર પિતામહઃ ।
હારીતક મહાપ્રાજ્ઞ ત્વયા તપ્તં મહત્તપઃ ॥

૧૨૦. સૈષા કચાવતી ભાર્યા હ્યનુરૂપા તવ પ્રિયા ।
અરુન્ધતીવ કલ્યાણી લોપામુદ્રેવ સત્પ્રિયા ॥

૧૨૧. યુવાભ્યાં તપસા યસ્માત્ તોષિતં ભુવનત્રયમ્ ।

ચિરમત્રાશ્રમે પુણ્યે વિવિધૈરાપ્તદક્ષિણૈઃ ॥

૧૨૨. યજ્ઞૈઃ સન્તોષ્ય દેવાન્ ચ પ્રજયા સ્વપિતૄનપિ ।
નિત્યમારાધયસ્વૈવં મહદેવમુમાપતિમ્ ॥

૧૨૩. તદન્તે પરમં સ્થાનં યુવામેષ્યત નિર્વૃતૌ ।
એતત્તીર્થપરં પુણ્યં ત્વદ્ભૂષણમરીચિભિઃ ॥

૧૨૪. પરિક્ષિપ્તં ક્ષણં યસ્માત્ પ્રભાતીર્થમિતીર્યતે ।
યે ચાત્ર જન્તવઃ તીર્થે પ્રભા નામ્નિ પ્રસાદિતમ્ ॥

૧૨૫. સ્નાત્વા જ્યોતિર્મયં દૃષ્ટ્વા ન પુનર્દુઃખભાગિનઃ ।
એષા મહાનદી પુણ્યા તામ્રા ભુવનપાવની ॥

૧૨૬. સેવિતવ્યા ત્વયા નિત્યં શ્રેયસ્તે ઋદ્ધિમેષ્યસિ ।
ઇત્યુક્ત્વા સહ ગીર્વાણૈઃ સિદ્ધૈશ્ચ પરમર્ષિભિઃ ॥

૧૨૭. પિતામહઃ સ્વભવનં પ્રતસ્થે વ્યોમવર્ત્મના ।
સોઽપિ હારીતકઃ પ્રીત્યા વરાન્ લબ્ધ્વા પિતામહાત્ ॥

૧૨૮. પ્રસાદ્ય ચ યથાન્યાયં સહ પત્ન્યા સ્વમાશ્રમમ્ ।
પ્રવિશ્ય બન્ધુભિસ્સાર્ધં સુખમાસ તથા મુને ॥

૧૨૯. સર્વે ચ બાન્ધવાઃ સ્નિગ્ધાઃ સ્વાગતેનાભિનન્દ્ય તમ્ ।
પારિપપ્રચ્છુઃ આદૃત્ય તત્રત્યાઃ ચ મુનીશ્વરાઃ ॥

૧૩૦. તેષાં સ કથયામાસ નિજવૃત્તાન્તમદ્ભુતમ્ ।
યદાકર્ણતો ભૂયઃ સર્વે વિસ્મયમાનસાઃ ॥

૧૩૧. નાનાવિધૈઃ નગરગોપુરહર્મ્યજાલૈઃ
આરામવિભ્રમરસાતલરાજલક્ષ્મી ।
દૃષ્ટં યથાવત્ અભિવર્ણયિતું મહાત્મા
બુદ્ધિં ચકાર યદપત્રશામૈકદીક્ષામ્ ॥

૧૩૨. ઇત્થં સુહૃદ્ભિરમરૈર્નિજબન્ધુવર્ગૈઃ
હર્ષોન્મિષત્પુલકકોમલિતાઙ્ગવલ્લિઃ ।
અભ્યર્ચ્યમાનનિજવૃત્તિવિલાસમેષાં
હારીતકો મુનિરશેષમસાવદ્વાદીત્ ॥

૧૩૩. સુવિસ્મિતૈઃ સ્પષ્ટમુદીતકણ્ઠકૈઃ વપુર્પરાનન્દસમૃદ્ધિસૂચકૈઃ ।

ઉદશ્રુભિર્લોચનપઙ્કજૈર્નિજૈઃ અભૂયતાસારઘનૈર્ઘનૈરિવ ॥

૧૩૪. સમાજમાશ્ચર્યકથારસાયનૈઃ ઉદઞ્ચયન્ હર્ષમપાં નિધિં યથા ।

હિમાંશુરંશુપ્રકરૈઃ સુધાસરૈઃ બભૌ મુનિસ્તત્ર કચાવતીપતિઃ ॥

ઇતિ સપ્તચત્વારિંશઃ અધ્યાયઃ । Pro.Total = 4169 + 134 = 4303.

## અષ્ટાચત્વારિંશઃ અધ્યાયઃ

હારીતસ્ય કચાલિકાયાશ્ચ તપશ્ચરણ મ્ ।

૧. શ્રીવલધિઃ -

(ભગવાન્)બ્રહ્મન્ બ્રહ્માત્મસમ્ભૂતબ્રહ્માનન્દસુધાનિધે ।

ભવતા કથિતા ચેયં કથા કર્ણસુધાધુની ॥

૨. અતિકણ્ઠમનુસ્યૂતમાવૃણ્વત્યપિ મે ગુરો ।

તૃપ્તિં ન કુરુતે ભૂયઃ તૃષ્ણાં જનયતીવ મે ॥

૩. કથં બૃહસ્પતિસ્તસ્મૈ સ્પષ્ટમાચષ્ટ વિસ્તરાત્ ।

તામિદાનીં વિસ્તરતઃ કથયસ્વ કથાં પુનઃ ॥

૪. રસાતલાત્ સમાગત્ય સ હારીતો મુનીશ્વરઃ ।

બન્ધુભ્યઃ કથયામાસ કથાં વા લિઙ્ગમદ્ભુતમ્ ॥

૫. સ્થાપયિત્વાર્ચયામાસ કથં વા મુક્તિમાપ્તવાન્ ।

કુમ્ભાટકો રાજપુત્રઃ કિં ચકાર તતઃ પરમ્ ॥

૬. કથં આભાષિણી દેવઃ ભગઃ કાશ્યપનનદનઃ ।

એતાનિ વિસ્તરાત્ બ્રહ્મન્ કથયસ્વાદ્ય મે ગુરો ॥

૭. ઇતિ રાજાધિરાજસ્ય મલયધ્વજભૂપતેઃ ।

કુમારેણાનુસમ્પૃષ્ટઃ સિદ્ધનાથ સનાતનઃ ॥

૮. તમેનમભિનન્દ્યાદૌ ભૂયો વિસ્તાર્ય તાં કથામ્ ।

રાજનન્દન વક્ષ્યામિ તામિદાનીં પુરાતનીમ્ ॥

૯. શ ૃણ્વનન્યધિયા પુણ્યાં હારીતકગુણોજ્જ્વલામ્ ।

ઇત્થં કાશ્યપિના પૃષ્ટઃ જીવો દેવપુરોહિતઃ ॥

૧૦. કથાં કન્દલયામાસ તસ્મૈ વિસ્મયકારિણીમ્ ।

શ્રુણુ દેવ પ્રવક્ષ્યામિ વૃત્તાન્તં તસ્ય ધીમતઃ ॥

૧૧. વયસ્યૈઃ બન્ધુભિસ્સ્નિગ્ધૈઃ મુનિભિશ્ચ તપોધનૈઃ ।
સમ્પૃષ્ટઃ સ હારીતો વિસ્મિતો વાક્યમબ્રવીત્ ॥

૧૨. શ઼ૃણ્વન્તુ બાન્ધવાસ્સર્વે સાવધાનેન ચેતસા ।
મયિ મજ્જતિ તીર્થેઽસ્મિન્ કોઽપિ દૈત્યેશ્વરાનુગઃ ॥

૧૩. ગૃહીત્વા તત્ક્ષણાદેવ નિનાય બલિમન્દિરમ્ ।
તત્ર રત્નપ્રભાજાલૈઃ બાલાતપસમપ્રભૈઃ ॥

૧૪. ન જાનન્તિ તત્રત્યાઃ જનાસ્સર્વે તમઃ ગતામ્ ।
નાનાવિધૈર્મણિમયૈઃ ઉદ્યાનૈઃ કલ્પકોપમૈઃ ॥

૧૫. નદીનાં ચ શતૈઃ પુણ્યૈઃ ઇક્ષુકાણ્ડરસોદકૈઃ ।
તપ્તહાટકસઙ્કાશૈઃ મહી તત્ર પ્રકાશતે ॥

૧૬. નવમાણિક્યખચિતપ્રાકારદ્વારમણ્ડિતા ।
કાપિ કલ્યાણનિલયા નગરી નલિનાવતી ॥

૧૭. તત્ર રાજગૃહે કોઽપિ મણિસિંહાસને વિભુઃ ।
અનઙ્ગાનેકસૌન્દર્યસમ્પૂર્ણનિજવિગ્રહઃ ॥

૧૮. દૈત્યદાનવરક્ષોભિઃ સેવ્યમાનસ્સમન્તતઃ ।
મહાબલિરિતિ ખ્યાતઃ સ્તૂયમાનશ્ચ બન્દિભિઃ ॥

૧૯. માં દૃષ્ટ્વા સદયાવિષ્ટો સમાવેશ્ય નિજાસને ।
પૂજયિત્વાર્ઘ્યપાદ્યાદ્યૈઃ યથાલોકે તથૈવ મામ્ ॥

૨૦. સ્નાનહારાનુલેપાદ્યૈઃ ભૂષણૈર્વસનોત્તમૈઃ ।
સ્વાગતૈઃ પ્રીતિવચનૈઃ સૌહાર્દાતિશયોજ્જ્વલૈઃ ॥

૨૧. કૃત્વા દ્વાદશરાત્રં તુ પૂજાં પૂજ્યતમોઽપિ સઃ ।
તાવન્મદઙ્ગમામૃજ્ય પાણિના પઙ્કજશ્રિયા ॥

૨૨. એકાસનં સમાસીનો મામિદં પ્રાહ દૈત્યરાટ્ ।
બ્રહ્મન્ કુતસ્સમાયાતઃ કેનેનાનીતોઽસિ મદ્ગૃહમ્ ॥

૨૩. કિન્તે મત્તઃ પ્રીતિકરં કાઙ્ક્ષિતં વક્તુમર્હસિ ।
ત્વયા ચિરતરં ભક્ત્યા પૂજિતઃ પરમેશ્વરઃ ॥

૨૪. સ એવ પુરુષાર્થાનાં દાતા તાવન્ન સંશયઃ ।
તથાપિ તવ તુષ્ટ્યર્થં દાતુમીહે સુહૃત્તયા ॥

૨૫. કાઙ્ક્ષિતાનિ પ્રદાસ્યામિ દુર્લભાનિ મહીતલે ।
કિન્તે વ્યવસિતં બ્રહ્મન્ વક્તવ્યં યદિ મે ગૃહે ॥

૨૬. કન્યારત્નં પ્રદાસ્યામિ ભવનં સ્વર્ગસન્નિભમ્ ।
વક્તુમર્હસ્યસઙ્કોચં વદાન્યં મામવેહિ ભો ॥

૨૭. ઇતિ તસ્ય વચઃ શ્રુત્વા બલેર્વિનયગૌરવમ્ ।
સન્તુષ્ટોઽહં પુનર્દૈત્યં અનુરાગાદવાદિષમ્ ॥

૨૮. દૈત્યરાજ મહાભાગ સર્વજ્ઞ કરુણાનિધે ।
પૌનઃપુન્યેન કર્ણૈકરસાયનસુધાનિધિમ્ ॥

૨૯. શ્રુત્વા શ્રુત્વા વદાન્યેષુ કીર્ત્યમાનેષુ સૂરિભિઃ ।
નિરન્તરસહાવાસં મન્યે રાજન્ સુહૃત્તમમ્ ॥

૩૦. પુરા કૃતાનાં પુણ્યાનાં મહતાં પરિણામતઃ ।
મમ લબ્ધમિદં ભાગ્યં ત્વદાલોકનકૌતુકમ્ ॥

૩૧. મદાશ્રમમનુપ્રાપ્ય તપસ્વિન્યા ચ ભાર્યયા ।
આરાધયિતુમિચ્છામિ પ્રસાદાત્ તે મહેશ્વરમ્ ॥

૩૨. ઇતિ મદ્વચનં શ્રુત્વા સ રાજા વિનયોજ્જ્વલમ્ ।
દિવ્યામ્બરમણિપ્રાન્તમુકુટાઙ્ગદકઙ્કણૈઃ ॥

૩૩. અમ્લાનકમલામૃષ્ટૈઃ હારૈર્મૃગમદૈરિવ ।
શાલીકૃત્ય મદગ્રે તુ પુનઃ પ્રાહ સ દૈત્યરાટ્ ॥

૩૪. દયાદત્તમિદં લિઙ્ગં પૂજયિસ્વેતિ સાદરમ્ ।
દત્તવાન્ ચ મહાભૂતૈઃ ચતુર્ભિઃ મેઘસન્નિભૈઃ ॥

૩૫. વર્ષયિત્વા ચ વસૂન્ મામાહ વચસાદરમ્ ।
પ્રસ્થાપયિત્વા સ્વલોકાત્ ભૂલોકં સ દયાનિધિઃ ॥

(ઇત્થમાકર્ણ્ય મુનયઃ સ્નિગ્ધાઃ ચ સુહૃદઃ પરે ।
આનન્દબાષ્પપૂર્ણાભ્યાં લોચનાભ્યાં ક્ષણાન્તરમ્ ॥

રોમાઞ્ચમઞ્જુલૈર્ગાત્રૈઃ અભૂવન્ અગ્રતો મુનેઃ ।
સ્નાનાભરણૈર્દિવ્યૈઃ ગન્ધસ્રગનુલેપનૈઃ ॥)

૩૬. રે રે સુહૃત્તમાઃ સ્નિગ્ધાઃ મુનયો બ્રહ્મવાદિનઃ ।
ભવતામાશિષા નૂનમાગતોઽસ્મિ ન સંશયઃ ॥

૩૭. તોષયિત્વા સુહૃદ્વર્ગં પ્રેષયામાસ વૈ ગૃહમ્ ।
રહઃ કચાવતીં ભાર્યાં કૃશાઙ્ગીં તપસા પુનઃ ॥

૩૮. પ્રીણયિત્વા યથાન્યાયં નયા ધર્માન્ ચચાર સઃ ।
જ્યોતિઃસ્થાનાત્ વાયુભાગે તામ્રાયાઃ દક્ષિણે તટે ॥

૩૯. કચાલિકાયાઃ પ્રાગ્ભાગે લિઙ્ગં સંસ્થાપ્ય શામ્ભવમ્ ।
પૂજયામાસ વિધિવત્ પ્રત્યહં પ્રીતિપૂર્વકમ્ ॥

૪૦. યજ્ઞૈઃ વિવિધૈરિષ્ટ્વા દક્ષિણાપૂરિતૈર્મુનિઃ ।
પ્રજયા ચ પિતૄન્ સર્વાન્ તર્પયિત્વા ચ ધર્મવિત્ ॥

૪૧. તતો વર્ષસહસ્રાન્તે સ્નાત્વા તામ્રામહોદકે ।
દમ્પતી નિયતાત્માનૌ યતવાક્કાયમાનસૌ ॥

૪૨. પ્રદક્ષિણીકૃત્ય દેવં જ્યોતિશ્ચક્રે વિલિલ્યતુઃ ।
તાવત્ કુસુમવર્ષેણ પૂરયિત્વા સ્થલં મહત્ ॥

૪૩. અસ્તુવન્ દેવતાઃ સર્વાઃ સિદ્ધવિદ્યાધરોરગાઃ ।
હારીતકં પ્રપશ્યન્તઃ સ્તુવન્તઃ પ્રીતમાનસાઃ ॥

૪૪. જગ્મુર્યથાગતં દેશાન્ તદદ્ભુતમિવાભવત્ ।
કુમ્ભાટકોઽપિ સંપ્રાપ્ત શિવદીક્ષાં યથાવિધિ ॥

૪૫. કચાવત્યા તપસ્વિન્યાઃ તપઃકર્તું પ્રચક્રમે ।
હારીતકાશ્રમાત્ તસ્માત્ ક્રોશાર્ધાત્ એવ પૂર્વતઃ ॥

૪૬. જ્યોતિશ્ચક્રસ્ય ચૈશાન્યાં કૃત્વાશ્રમપદં નિજમ્ ।
પૂજયામાસ વિધિના સામ્બં ચન્દ્રાર્કશેખરમ્ ॥

૪૭. નિગૃહ્ય ચારિષડ્વર્ગં નિયમ્યેન્દ્રિયમણ્ડલમ્ ।
સર્વદ્વન્દ્વસહઃ શ્રાન્તઃ સમાધિમુપસંશ્રિતઃ ॥

૪૮. સર્વં શિવમયં પશ્યન્ સમન્તાત્ વ્યોમરૂપિણમ્ ।
ધ્યાનયોગબલેનૈવ નિર્મલાત્મા બભૂવ હ ॥

૪૯. એવં વર્ષશતે પૂર્ણે તપસારાધિતો વિભુઃ ।
પ્રાદુર્બભૂવ તસ્યાગ્રે ભગવાન્ વૃષરૂપધૃત્ ॥

૫૦. સ્વલોચનવિનિષ્ક્રાન્તૈઃ કરુણાસાન્દ્રશીતલૈઃ ।
પીયૂષતોયૈર્વિમલૈઃ અભ્યષેચયત્ આદરાત્ ॥

૫૧. તત્સુધાવૃષ્ટિધારાભિઃ સિચ્યમાનો કુશાત્મજઃ ।
શનૈરુન્મીલયામાસ સમાધિસ્થઃ સ્વલોચને ॥

૫૨. દદર્શ પુરતો દેવં ચન્દ્રમણ્ડલપાણ્ડુરમ્ ।
સ્તૂયમાનં સિદ્ધગણૈઃ મહાવૃષભરૂપિણમ્ ॥

૫૩. સમુન્નતાભ્યાં શ્રુઙ્ગાભ્યાં દ્વિકૂટમિવ દર્પિતમ્ ।
તપ્તહાટકસમ્ભિન્નૈઃ મહામણિવિભૂષણૈઃ ॥

૫૪. દેદીપ્યમાનં દેવેશં કામદં કલ્પકોપમમ્ ।
દૃષ્ટ્વા તત્પુરતો નત્વા કૃતાઞ્જલિપુટોઽનઘઃ ॥

૫૫. તુષ્ટાવ પરમેશાનં ધર્મં ધર્મભૃતાં વરઃ ।
કુમ્ભાટકઃ –
નમો નમસ્તે લોકાનામાદિકર્ત્રે મહાત્મને ॥

૫૬. ધર્માકારાય સારાય શ્રુતીનામાત્મને નમઃ ।
ત્વાં ભજન્તઃ તથા ભક્ત્યા સ્તુવન્તિ ત્વાં સુરાસુરાઃ ॥

૫૭. ધ્યાયન્તિ યોગિનઃ સ્વાન્તે ત્વામેવ ચ પરાત્પરમ્ ।
ત્વત્કૃપાલોકકણિકાલાભમાત્રેણ જન્તવઃ ॥

૫૮. જગત્ ક્ષોભયિતું કર્તું ત્રાતું પટુતરાભવન્ ।
ત્વન્મુખાન્નિર્ગતા વેદા મર્યાદાં વ્યક્તયન્તિ તે ॥

૫૯. તેષુ તેષુ ચ વર્તન્તે ત્વદાજ્ઞાગૌરવાય તે ।
યેષાં ત્વં વિમુખો દેવો તે વૈ સીદન્તિ સર્વદા ॥

૬૦. ત્વદાલમ્બનયોગેન સિદ્ધયોઽષ્ટૌ ન સંશયઃ ।
ઐહિકામુષ્મિકૌ માર્ગૌ ત્વત્સૃષ્ટૌ લોકહેતવે ॥

૬૧. નમઃ પૂર્વાય પૂર્વાણાં પુરુષાય મહાત્મને ।
વૃષાય વૃષરૂપાય વેદરૂપાય તે નમઃ ॥

૬૨. ત્વચ્છક્ત્યા ધાર્યતે સર્વં ત્વલ્લીલાકલનાત્મકમ્ ।
ત્વં વિષ્ણુસ્ત્વં શિવો બ્રહ્મા ત્વં મિત્રો વરુણો યમઃ ॥

૬૩. ત્વં ગુણૈઃ ત્રિગુણાભિખ્યાં બિભર્ષિ કલયા સ્વયા ।
પ્રસીદ દેવદેવેશ પ્રસીદ પરમેશ્વર ॥

૬૪. પાહિ પાપાર્ણવાદ્ભીતં ભક્તં માં શરણાગતમ્ ।
નમો નમઃકારણકારણાય તે કલાવિશેષૈઃ કલિતાખિલાત્મને ।
૬૫. પ્રસીદ વિશ્વેશ્વર વિશ્વમૂર્તે પ્રસીદ દેવેશ દયાસુધાનિધે ॥

૬૬. ઇતિ સ્તુત્વા સ કુમ્ભાટો ભક્ત્યા પરવશો મુહુઃ ।
પ્રણામમમકરોત્તસ્મૈ દણ્ડવત્ પુરતો વિભોઃ ॥

૬૭. તતઃ પ્રસન્નો ભગવાન્ સ્તોત્રેણાનેન તોષિતઃ ।
તમુત્થાપ્ય વરાભીતિરતાઙ્ગજલજોજ્જ્વલૈઃ ॥

૬૮. ભુજૈઃ પીયૂષસંસિક્તૈરભિમૃજ્યાઙ્ગમાદરાત્ ।
પ્રાહૈનં પ્રહસન્ વાચા ભગવાન્ રાજનન્દનમ્ ॥

૬૯. ભગવાન્ –
સંહૃષ્ટોઽસ્મિ મહારાજ સ્તોત્રેણ તપસા પુનઃ ।
પાપાશ્ચ સંક્ષયં નીતાઃ વિમુક્તો માતૃહત્યયા ॥

૭૦. ષડ્જપાલાભિધસ્ત્વં હિ ગન્ધર્વાણામધીશ્વરઃ ।
પ્રારબ્ધદોષાત્ મર્ત્યત્વં પ્રાપ્તવાનસિ કેવલમ્ ॥

૭૧. દેવો ન ભવિતા ભૂયઃ સર્વભોગસમૃદ્ધિમાન્ ।
સમ્પૂજિતઃ ત્વયા શમ્ભુઃ પૂજિતા પરમેશ્વરી ॥

૭૨. અત્ર જ્યોતિર્મહદ્દૃષ્ટ્વા ભૂયો નાર્હસિ શોચિતુમ્ ।
ઇત્થં સન્દર્શયામાસ તસ્મૈ સંવિત્ મહાપગા ॥

૭૩. અનન્તમક્ષયં નિત્યમનપાયમકલ્મષમ્ ।
તેજસામપિ તેજિષ્ઠમવિષહ્યમનાતુરમ્ ॥

૭૪. કાઙ્ક્ષિતાનિ પ્રદાસ્યામિ દુર્લભાનિ મહીતલે ।
ગજહસ્તપ્રમાણેન ભૂમિભાગાત્ સમુત્થિતમ્ ॥

૭૫. ઉપાસ્યમાનં શ્રુતિભિઃ સ્તૂયમાનં મહર્ષિભિઃ ।
દૃષ્ટ્વા તદદ્ભુતં તેજો કુમ્ભાટો હર્ષનિર્ભરઃ ॥

૭૬. સંપ્રાપ પરમાનન્દં તત્તેજઃપુઞ્જદર્શનાત્ ।
તતો દેવો રાજપુત્રીં પાણિમાલમ્બ્ય પાણિના ॥

૭૭. પ્રદક્ષિણં પરીત્યૈનં ધર્મો વૃષરૂપધૃત્ ।
તમેનં રાજતનયં તીર્થે તસ્મિન્ ન્યમજ્જયત્ ॥

૭૮. તથૈવ ભગવાન્ તત્ર સંવિવેશ મહામ્બુનિ ।
તાવત્ સર્વેષુ પશ્યત્સુ દિવિ દેવેષુ સર્વતઃ ॥

૭૯. તત્તીરપૂરાત્તામ્રાયાઃ મુહૂર્તાત્ ઉન્મમજ્જ સઃ ।
કન્દર્પસ્પૃહણીયેન વપુષા ભાનુવર્ચસા ॥

૮૦. રાજપુત્રો મણિવ્રાતૈઃ તપ્તકાઞ્ચનભૂષણૈઃ ।
પૂજિતઃ તરુણાકારો દીર્ઘબાહુઃ સુલોચનઃ ॥

૮૧. ત્યક્ત્વા તુ માનુષં ભાવં દેવભાવેન ભાષિતઃ ।
સ્મયમાનમુખઃ શ્રીમાન્ ચકાશે ભાનુમાન્ ઇવ ॥

૮૨. આવવ્રુઃ તથા સ્નિગ્ધાઃ જ્ઞાતયો મિત્રબાન્ધવાઃ ।
ગન્ધર્વાઃ સ્વૈઃ વિમનૈઃતં મિથુનીભૂય કૌતુકાત્ ॥

૮૩. નિસ્તીર્ણશાપં કુમ્ભાટં નિર્મુક્તં પાપપઞ્જરાત્ ।
પ્રીણયન્તઃ સ્તુવન્તશ્ચ જલ્પન્તો વિવિધાઃ કથાઃ ॥

૮૪. કેચિત્ ચ ચન્દ્રસઙ્કાશાઃ કેચિત્ વૈશ્વાનરોપમાઃ ।
પ્રકાશયન્તો ગગનં સ્વભૂષણમરીચિભિઃ ॥

૮૫. તમૂચુઃ સ્વાગતૈર્વાક્યૈઃ સ્વાગતસ્તોત્રસઞ્ચિતૈઃ ।
અયે સુહૃત્તમાભ્યેહિ કુશલં કિન્તુ સામ્પ્રતમ્ ॥

૮૬. ત્વદ્વિયોગાઃ વયં સર્વે વિપ્રાણા ઇવ જીવિતાઃ ।
ઇત્થં સઞ્જલ્પમાણેષુ ગન્ધર્વેષ્વખિલેષ્વપિ ॥

૮૭. પરિભ્રાન્ત ઇવાલોક્ય તૂષ્ણીમાસીત્ સ કેવલમ્ ।
તાવદેનં સમાસાદ્ય નારદો વાક્યમબ્રવીત્ ॥

૮૮. અજાનન્ ઇવ કિં સાધો બન્ધૂન્ અભ્યાગતાન્ ઇમાન્ ।
ન મેલયસિ નાભ્યેષિ ન બ્રૂષે પ્રિયભાષણમ્ ॥

૮૯. ત્વન્નાથકેતોર્માલિન્યાં જાતો ગન્ધર્વભૂપતેઃ ।
નામતઃ ષડ્જપાલં ત્વાં પ્રશંસન્તિ સુરાસુરાઃ ॥

૯૦. કિન્તે વ્યવસિતં સાધો કિં વા કર્તવ્યમદ્ય તે ।
અક્ષય્યાસ્તે મહાભોગાઃ એવં પૂર્વતનાઃ ખલુ ॥

૯૧. મહાતીર્થેન પૂતાત્મા તપસા ધૂતકલ્મષઃ ।
આરાધિતો મહાદેવો દેવાસ્તે પરિતોષિતાઃ ॥

૯૨. ઇદાનીં વૃષરૂપેણ સમાગમ્ય મહેશ્વરઃ ।
અત્ર તીર્થવરં કૃત્વા ત્રીન્ લોકાન્ સ પુનાતિ હિ ॥

૯૩. અપિ પાપશતાવિષ્ટો મર્ત્યો મલયજામિમામ્ ।
સ્પૃષ્ટ્વા સઞ્છિન્નકર્મપાશઃ સ્યાત્ એતિ એવ પરાં ગતિમ્ ॥

૯૪. જ્યોતિર્વનમિદં નામ્ના ખ્યાપિતં પરમાત્મના ।
તપોભિર્દુષ્કરૈર્વાપિ નિયમૈર્વા યમૈસ્સદા ॥

૯૫. દદર્શ હિ મહત્તેજઃ તત્રૈતત્ દૃષ્ટવાનસિ ।
મન્યે ત્વામુત્તમં લોકે ગન્ધર્વાણાં મહત્કુલે ॥

૯૬. ત્વયા તપો વિશેષેણ લબ્ધમેવ હિ નાન્યથા ।
ક્ષણમાત્રમુષિત્વાપિ જન્તુર્જ્યોતિર્વને પુનઃ ॥

૯૭. ન યાતિ જનનીગર્ભદુઃખજાલસમાવૃતઃ ।
ત્વાદૃશા શતશો મર્ત્યાઃ તપસ્તપ્ત્વા સુદુસ્તરમ્ ॥

૯૮. પ્રયાતા પરમં સ્થાનં અત્ર જ્યોતિર્વને ઘને ।
ક્ષેત્રમેતત્ હિ જન્તૂનાં દુષ્કર્મપરિકૃન્દનમ્ ॥

૯૯. જ્ઞાત્વૈવ મુનયોઽત્રૈવં તપઃકુર્વન્તિ નિર્મલાઃ ।
અત્રાન્તરાયશાન્ત્યર્થં ભગવાન્ આદિપૂરુષઃ ॥

૧૦૦. સ્વભૃત્યૌ કલ્પયામાસ શ્રીપુષ્કલસપુષ્કલૌ ।
અદ્યાપિ ક્ષેત્રવર્યસ્ય શાસ્તારૌ બાલકાવિમૌ ॥

૧૦૧. તસ્માત્ તવ મહાબહો પ્રાક્તનૈઃ તપસાં ફલૈઃ ।
લબ્ધં ક્ષેત્રમિદં ન્યૂનમનાયાસેન સિદ્ધિદમ્ ॥

૧૦૨. કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ કૃતકૃત્યોઽસ્મિ કર્મણા ।
મા વિલમ્બોઽત્ર સર્વેષાં જન્તૂનાં પ્રીતિમાવહન્ ॥

૧૦૩. ઇદં વિમાનમારુહ્ય પ્રયાહિ પદવીં નિજામ્ ।
ઇત્યુદીરિતમાકર્ણ્ય દેવર્ષેઃ પ્રીતિપૂર્વકમ્ ॥

૧૦૪. ષડ્જપાલઃ પ્રણમ્યૈનં પ્રત્યુવાચ કૃતાઞ્જલિઃ ।

ષડ્જપાલઃ –
નમસ્તુભ્યં ભગવતે યોગિવર્યાય ધીમતે ॥

૧૦૫. ગુરવે સર્વવિજ્ઞાન નિધયે વેધસે નમઃ ।
તત્તથૈવ કરિષ્યામિ ભવાતાત્રાનુશાસિતમ્ ॥

૧૦૬. લોકપાલાદિભિર્મૂર્ધ્ના ત્વદાજ્ઞા ધાર્યતેતરામ્ ।
સૈષાનુવર્તિની યા મે શ્રુતિવાક્ ઇવ તે ગુરો ॥

૧૦૭. કચ્ચિત્ કાલમિહૈવાહં ભૂયોઽભ્યર્ચ્ય સદાશિવમ્ ।
તતઃ પરં કરિષ્યામિ યદિ તે મય્યનુગ્રહઃ ॥

૧૦૮. ઇત્યુક્તવતિ વૈ તસ્મિન્ ભક્ત્યા વિનયપૂર્વકમ્ ।
નારદોઽતીવ સંહૃષ્ટઃ તથાસ્ત્વિત્યુદીરયન્ ॥

૧૦૯. સહ ગન્ધર્વનિવહૈઃ વ્યોમયાનં પ્રતસ્થિવાન્ ।
અથ તસ્મિન્ મુનિવરે યતે સહ નભશ્ચરૈઃ ॥

૧૧૦. ષડ્જપાલઃ સ ગન્ધર્વઃ કિઞ્ચિદેવં વ્યચિન્તયત્ ।
તપોભિઃ મત્કૃતૈશ્શમ્ભુઃ સન્તુષ્ટો નાત્ર સંશયઃ ॥

૧૧૧. સ્તુવન્તિ માં સવયસો ગન્ધર્વાઃ સ્તુતિગૌરવાત્ ।
માં વદન્તિ સમાનેષુ દેવાઃ શ્રેષ્ઠતમં પુનઃ ॥

૧૧૨. પૂજિતાઃ વિબુધાસ્સર્વે તારિતોઽસ્મ્યસંશયાત્ ।
ઇતઃ પરં ચરિષ્યામિ મર્ત્યાનાં હિતકામ્યયા ॥

૧૧૩. અત્રાગમનમાત્રેણ સર્વે નિર્ધૂતપાતકાઃ ।
પ્રપશ્યન્તિ મહત્તેજઃ યદ્દૃષ્ટ્વા મુચ્યતે જનઃ ॥

૧૧૪. કૃતઘ્નઃ પિશુનો મૂર્ખઃ બ્રહ્મહા ગુરુતલ્પગઃ ।
પરિવિત્તાપહર્તા ચ પરનારીરતોઽપિ વા ॥

૧૧૫. પરાપવાદી પાષણ્ડઃ પરહિંસાપરાયણઃ ।
દૂષકો વેદમાર્ગસ્યાપ્યવમન્તા મહાત્મનામ્ ॥

૧૧૬. વિષ્ણુભક્તઃ શિવદ્રોહી વિષ્ણુદ્રોહી શિવપ્રિયઃ ।
એતે ચાન્યે ચ પાપિષ્ઠાઃ પશ્ચાત્તાપાનુતાપિતાઃ ॥

૧૧૭. પ્રાયશ્ચિત્તાનુસઙ્ગમ્ય તીર્થેઽસ્મિન્ કૃતમજ્જનાઃ ।
પ્રવેશમાત્રાત્ ક્ષેત્રસ્ય મહતોઽપ્યાહતૈનસઃ ॥

૧૧૮. પશ્યન્તિ નિર્મલાત્માનઃ પરઞ્જ્યોતિસ્સનાતનમ્ ।
એતદર્થં કરિષ્યામિ તપઃ પરમદુષ્કરમ્ ॥

૧૧૯. મમૈવ કાઙ્ક્ષિતં ભાગ્યં સર્વેષામુપકારકમ્ ।
દાતુમર્હસિ વિશ્વાત્મન્ તપસારાધિતો મયા ॥

૧૨૦. ઇતિ નિશ્ચિત્ય સઙ્કલ્પ્ય ષડ્જપાલો દૃઢવ્રતઃ ।
પ્રદક્ષિણં પરિક્રમ્ય જ્યોતિશ્ચક્રમનામયમ્ ॥

૧૨૧. મહતોઽસ્યૈવ નૈરૃત્યાં વિષ્ણુચક્રાશ્રમસ્થલે ।
સ્વવાસાયોટજં કૃત્વા ષડ્જપાલો યથોચિતમ્ ॥

૧૨૨. દર્ભાન્ આસ્તીર્ય તત્રૈવ દૃઢધીરુપવિશ્ય સઃ ।
પ્રાણાન્ આરોપયન્ નાડ્યાં સુષુમ્નાયાં વિકાસયન્ ॥

૧૨૩. સ્વાન્તે પઙ્કેરુહં ધ્યાયન્ નિશ્ચલાઙ્ગઃ તુ તત્ત્વવિત્ ।
નિરુધ્ય સર્વતો વાયું નિરાહારોઽભ્યવર્તત ॥

૧૨૪. એવં વર્ષશતે પૂર્ણે સમગ્રે તસ્ય ધીમતઃ ।
નિષ્પેતૂ રોમકૂપેભ્યો જ્વાલાઃ બાલાર્કસન્નિભાઃ ॥

૧૨૫. ધૂમરાશિરભૂદઙ્ગાત્ અમ્બુદાલિસમપ્રભા ।
એવં તપોઽગ્નિના ક્લૃપ્તં સકલં ભુવનત્રયમ્ ॥

૧૨૬. ભયાવિષ્ટા જનાસ્સર્વે તમેવં શરણં યયુઃ ।
અનિશ્ચિતાર્થો મઘવા લોકપાલૈઃ સહેતરૈઃ ॥

૧૨૭. સમેત્ય લોકકર્તારં તસ્મૈ સર્વં વ્યજિજ્ઞપત્ ।
ભગવન્ ષડ્જપાલેન તપસાક્રમ્યતે જગત્ ॥

૧૨૮. તત્તપોઽગ્નેઃ ક્ષણાદેવ જગદેકાહુતિર્ભવેત્ ।
યાવત્ તાવત્ પ્રદાતવ્યમભીષ્ટં ભવતાસ્ય હિ ॥

૧૨૯. અપિ સૂર્યત્વમિન્દ્રત્વં ચન્દ્રત્વં વાપ્યભીપ્સિતમ્ ।
તસ્મૈ દત્વાખિલાન્ લોકાન્ ત્રાતુમર્હસિ મા ચિરમ્ ॥

૧૩૦. તદતઃ કરુણાજ્ઞાનકલાસ્વકુશલાઃ વયમ્ ।
નાનોપાયધૃતોપાયકલના દૈવતૈઃ કૃતા ॥

૧૩૧. તપસોઽસ્ય વિઘાતાય કૃતં સૈકતસેતુવત્ ।

ઇત્થં વૈક્લબ્યમેતેષાં દૃષ્ટ્વા દૃષ્ટ્વા દયાર્દ્રધીઃ ॥

૧૩૨. સાન્ત્વપૂર્વમિદં વાક્યં વ્યાજહારામરેશ્વરમ્ ।
ચિન્તાં કુર્વન્તુ મા દેવાઃ હ્યપનેષ્યામિ સાધ્વસમ્ ॥

૧૩૩. શ્રુણ્વન્તુ સર્વે ગીર્વાણાઃ મદ્વશઃ કાર્યસાધને ।
ઋતુધામા મહીપાલઃ પુરાસીત્ પાણ્ડ્યમણ્ડલે ॥

૧૩૪. તસ્યૈવ યજમાનસ્ય રાજદૂયે મહાક્રતૌ ।
યૂપાવટે ખન્યમાને કચાલિઃ સમદૃશ્યત ॥

૧૩૫. તસ્માત્ આશ્ચર્યસમ્ભ્રાન્તૈઃ તસ્માત્ મૃદમપોહ્ય તુ ।
ઋત્વિગ્ભિઃ અપરૈઃ સભ્યૈઃ તત્રાપશ્યત દારિકામ્ ॥

૧૩૬. તામાદાય સ ભૂપાલઃ પુત્રીકૃત્ય સ્વભાર્યયા ।
પુપોષ નામતઃ કૃત્વા બ્રાહ્મણૈઃ ચ કચાલિકામ્ ॥

૧૩૭. લાલિતા પોષિતા બાલા માત્રા પિત્રા ચ સાદરમ્ ।
વ્યવર્ધેન્દુરેખેવ સમયે સંસ્કૃતા તદા ॥

૧૩૮. સા પ્રાપ યૌવનાવસ્થાં કાલેનૈષા કચાલિકા ।
રૂપયૌવનસમ્પન્નાં બાલામાલોક્ય ભૂપતિઃ ॥

૧૩૯. વરાય રૂપસૌભાગ્ય વરાય કુલશાલિને ।
પ્રદાતુકામો ભૂપાલાન્ આજહાર સ્વયંવરે ॥

૧૪૦. સર્વેષુ રાજપુત્રેષુ મિલિતેષુ એકતો વધૂઃ ।
સખીભિસ્સહ સંયુક્તા સાક્ષાત્ શ્રીરિવ રૂપિણી ॥

૧૪૧. વરણસ્રજમાદાય સ્વયંવરસભામગાત્ ।
આલોક્ય મઞ્ચાદિગતાન્ મહીપાલસુતાનિયમ્ ॥

૧૪૨. તુચ્છીકૃત્યધિયા તન્વી તામિમાં વરણસ્રજામ્ ।
વ્યોમ્નિ વેગાત્ પ્રચિક્ષેપ સુપર્ણો ભુજગીમિવ ॥

૧૪૩. તત્ર કોઽપિ યુવા કોટિકન્દર્પોદ્દામમૂર્તિમાન્ ।
સ્કન્ધેનાદાય તાં માલાં ક્ષણાત્ અન્તરધીયત ॥

૧૪૪. તાવત્કલાકલારાવો મિલિતાનાં મહીભુજામ્ ।
કન્યાત્ આદાતુકામાનાં બલાત્ બલવતાં તથા ॥

૧૪૫. સન્નાહસમ્ભ્રમં વ્યોમ્ના રુન્ધતી વાક્ અજાયત ।
દેવભોગ્યેયં અનઘા તન્વી સાક્ષાત્ ઉમાંશજા ॥

૧૪૬. યસ્ત્વેનાં સ્પૃહતે કન્યાં બલાત્કારેણ દુર્મતિઃ ।
તસ્ય મૂર્ધા ભવેત્ નૂનં શતધા નાત્ર સંશયઃ ॥

૧૪૭. ઇતિ શ્રુત્વા વચો ભીત્યા રાજપુત્રાસ્તુ નિસ્પૃહાઃ ।
યયુર્યથાગતં સર્વે વિસ્મયમાના મહામતે ॥

૧૪૮. ઉમાંશજાં પ્રિયાં પુત્રીં નિશ્ચિત્ય સહ મન્ત્રિભિઃ ।
બ્રહ્માર્પણધિયા તત્ર દત્તવાન્ કૃતકૃત્યધીઃ ॥

૧૪૯. સાપિ નિર્વિણ્ણહૃદયા તપસા દેવમીશ્વરમ્ ।
આરાધયામાસ તથા નન્દાટવ્યાં કૃતોટજા ॥

૧૫૦. વાયુભક્ષા નિરાહારા સ્વાત્મન્યારોપ્ય ચેતસમ્ ।
નિશ્ચલાઙ્ગી નિરાતઙ્કા નિગૃહીતેન્દ્રિયાવલિઃ ॥

૧૫૧. ઇત્થં તત્ર તપસ્યન્ત્યાઃ નિરપાયં તપોવને ।
ભૂર્યુગાનાં ત્રિતયં ક્ષણપ્રાયમિવાભવત્ ॥

૧૫૨. સૈષા તપસ્વિની યુષ્મત્પરિતાપોપશાન્તયે ।
ભવિષ્યતિ ન સન્દેહો ભૂમેર્વૃષ્ટિં યથોચિતા ॥

૧૫૩. ઇત્યુક્ત્વા તાં સમાહૂય બ્રહ્મા લોકપિતામહઃ ।
વચોભિસ્સાન્ત્વયિત્વાહ લોકાનાં હિતકામ્યયા ॥

૧૫૪. બ્રહ્મા –
તપસ્વિનિ મહાભાગે રાજપુત્રિ કચાલિકે ।
જિતાસ્તે સકલાઃ લોકાઃ દેવાશ્ચ પરિતોષિતાઃ ।
૧૫૫. મનોરથઃ સમીપસ્તો માસ્તુ ચિન્તાપરિશ્રમઃ ।
જ્યોતિર્વને સમાસીનં તપસ્યન્તં સુદુસ્સહમ્ ॥

૧૫૬. ષડ્જપાલં સમાધાય લોકાનુગ્રહકારિણિ ।
તામ્રાયાઃ ઉત્તરે તીરે ક્ષેમુમર્હસ્યપાં ચયૈઃ ॥

૧૫૭. લોકાશ્ચ સુખિનઃ સન્તુ દેવો નિર્વૃતિમૃચ્છતુ ।
સખીભૂત્વા ત્વમમ્બાયા માલેય્યા લોકસમ્મતા ॥

૧૫૮. સાયુજ્યમુપગચ્છધ્વમખણ્ડબ્રહ્મમણ્ડલે ।

લોકે વિસ્તાર્ય વિમલાં કીર્તિં પાપપ્રણાશિનીમ્ ॥

૧૫૯. ઇત્યાદિષ્ટા ભગવતા બ્રહ્મણા સા કચાલિકા ।
દેવૈસ્સહ મહીં પ્રાપ્ય તત્તથાભિદધે મુખમ્ ॥

૧૬૦. નન્દાટવીમુપગતા તરુણી ચિરાય
સંપ્રાપ્ય કાઙ્ક્ષિતમશેષજગદ્ધિતાય ।
તીર્થપ્રવાહપુષિતા મિષતાં સુરાણાં
તં ષડ્જપાલમુદવાસયત્ આત્મશક્ત્યા ॥

ઇતિ અષ્ટચત્વારિંશઃ અધ્યાયઃ ।   Pro.Total = 4303 + 160 =4463.

## એકોનપઞ્ચાશોઽધ્યાયઃ

ગન્ધર્વતીર્થમહિમવર્ણન મ્ ।

૧. બૃહસ્પતિઃ –
તપોધન મહાભાગ કશ્યપપ્રિયનન્દન ।
શ્રુણુ વક્ષ્યામિ તે પુણ્યાં કથાં પાપપ્રણાશિનીમ્ ॥

૨. યસ્યાઃ શ્રવણતો જન્તુઃ ન ભૂયો જન્મ ગચ્છતિ ।
સર્વેષામેવ જન્તૂનામાકૈવલ્યફલપ્રસૂઃ ॥

૩. ઇત્થં કચાલિકા દેવી સમાદિષ્ટા સ્વયમ્ભુવા ।
પુલિન્દશૈલપર્યન્તાં નિષ્ક્રાન્તાં નન્દકાનનાત્ ॥

૪. મહાતીર્થપ્રવાહેન પ્લાવયિત્વા વસુન્ધરામ્ ।
મહાવેગસમુત્કૃષ્ટનાનાતરુલતાવૃતા ॥

૫. સમાધિનિષ્ઠં ગન્ધર્વં ષડ્જપાલં ક્ષણાદિવ ।
આદાય દૂરે ચિક્ષેપ કૂલે નદ્યાસ્તથોત્તરે ॥

૬. આશ્લિષ્યમાણો સસ્નેહં તામ્રપર્ણ્યા મુહુર્મુહુઃ ।
અભિવૃષ્ટઃ પુષ્પચયૈઃ સ્તૂયમાનઃ મુનીશ્વરૈઃ ॥

૭. પશ્યતાં સર્વલોકાનાં જ્યોતિશ્ચક્રમુપાવિશત્ ।
ઇત્થં તયા સ ગન્ધર્વઃ સંક્ષિપ્તોઽન્યત્ર ચાશ્રમાત્ ॥

૮. તામ્રાયા ઉત્તરે તીરે યોગાત્ મુક્તોન્મિમીલ સઃ ।
અદૃષ્ટપૂર્વં વિપિનં નાનાદ્રુમલતાયુતમ્ ॥

૯. દૃષ્ટ્વા ચિરેણ સઞ્જજ્ઞે કિમેતત્ ઇતિ વિસ્મિતઃ ।
કુતોઽહં પ્રાપ્તવાન્ એતત્ વિપિનં ચિત્રવૃક્ષકમ્ ॥

૧૦. મમાશ્રમં ન પશ્યામિ તસ્માત્ મત્પુરતો વનમ્ ।
કથં જ્યોતિર્વનાદ્ભ્રષ્ટઃ કેનાનીતોઽસ્મિ દૂરતઃ ॥

૧૧. કસ્સમર્થોઽસ્તિ વૈ સ્થાનાત્ માં વિચાલયિતું ભુવિ ।
દેવભાવેન હીનત્વાત્ પ્રક્ષીણ ઇવ દૃશ્યતે ॥

૧૨. તત્ર સન્ધુક્ષિતં ગાત્રં વિસ્મૃતિશ્ચાપિ ચેતસિ ।
હા કથં કરણીયં મે કર્મ કાઙ્ક્ષિતસિદ્ધયે ॥

૧૩. કિમત્ર કૃત્યં યુક્તં મે કં સહાયં વૃણોમ્યહમ્ ।
આશા કા વા વિગ્રહસ્યા શ્રેયઃ પ્રાપ્સ્યે પુનઃપુનઃ ॥

૧૪. ઇત્થં વિભ્રષ્ટયોગોઽયમપાસ્થાસનબન્ધનઃ ।
અધૈર્યદૂષિતસ્વાન્તઃ પરમાર્થવિચારણઃ ॥

૧૫. સ ગન્ધર્વો વિસૃષ્ટાર્થઃ ગન્ધહસ્તીવ નિઃશ્વસન્ ।
સમુત્તસ્થૌ શનૈઃપશ્યન્ સમન્તાત્ તટિનીતટમ્ ॥

૧૬. વિલુલોકે ન પશ્યામિ તમાલતરુકાનનમ્ ।
જમ્બુજમ્ભીરનારઙ્ગકેરવાનીરનીપકૈઃ ।
૧૭. માલૂરમાલતીચિઞ્ચાપ્રવાલબકુલેન્દ્રિકૈઃ ।
માકન્દકુન્દમાધ્વીકનમેરુપનસાદિભિઃ ॥

૧૮. અન્યૈરનોકહૈઃ શ્રેષ્ઠૈઃ સપુષ્પફલપલ્લવૈઃ ।
નિવારિતાતપોદ્વારં નિરન્તરમધુસ્રવમ્ ॥

૧૯. મન્દમારુતસમ્પાતં કૂજત્કોકિલસારસમ્ ।
સુખાનામિવ સંવાસં સુપુણ્યાદાનામિવોદયમ્ ॥

૨૦. સિદ્ધૈર્મુનિગણૈર્દિવ્યૈઃ બ્રહ્મધ્યાનપરાયણૈઃ ।
અસ્ખલદ્દ્રુતમર્યાદૈઃ મુનિદારૈશ્ચ શોભિતમ્ ॥

૨૧. સુકુમારૈઃ કુમારૈશ્ચ વ્રતસ્વાધ્યાયલમ્પટૈઃ ।
અલઙ્કૃતમિવાત્યર્થં વનમાસાદ્ય નિઃશ્વસન્ ॥

૨૨. ઇતસ્તતઃ પરિક્રમ્ય વિશ્રામ્ય ચ મુહુર્મુહુઃ ।

દૈવાત્ આલોકયાઞ્ચક્રે વસતિં પર્ણનિર્મિતામ્ ॥

૨૩. તસ્યાં તપસ્વિનીં દૃષ્ટ્વા વૃદ્ધાં વિગતકલ્મષામ્ ।
તાં પ્રણમ્ય સ ગન્ધર્વઃ પ્રશ્રયાવનતોઽબ્રવીત્ ॥

૨૪. કા ત્વમમ્બ મહાભાગે તીર્થે લક્ષ્મીર્વિભાસિ મે ।
જ્ઞાતુમિચ્છામિ તત્ત્વેન કસ્યાશ્રમપદન્ત્વિદમ્ ॥

૨૫. અહં ગન્ધર્વરાજસ્ય તનયઃ સ્વેન કર્મણા ।
શાપાત્ અવાપ્ય માનુષ્યં મદાન્ધઃ કૃતકિલ્બિષઃ ॥

૨૬. દૈવાત્ જ્યોતિર્વનં પ્રાપ્ય કચાવત્યાઃ પ્રસાદતઃ ।
મુક્તશાપોઽપિ મોહેન ભૂયઃ શ્રેયો વિધિત્સયા ॥

૨૭. સમારબ્ધતપસ્તત્ર કેનાપ્યસ્મદ્વિરોધિના ।
નીતોઽસ્મ્યમ્બ તવોપાન્તે જનન્યા ઇવ બાલકઃ ॥

૨૮. ન જાનામ્યપરં કૃત્યં મિત્રમાપત્સહાયિનમ્ ।
ત્વાં પ્રપન્નોઽસ્મિ તત્ત્વેન ત્રાતુમર્હસિ કિલ્બિષાત્ ॥

૨૯. ઇત્થં સંપ્રાર્થિતા તેન પ્રણતેનાનુશોચતા ।
ધ્યાયન્તી ક્ષણમાત્રં તુ નિશ્ચિતાર્થા તપસ્વિની ॥

૩૦. અભિનન્દ્યાર્હણૈર્વાચા વ્યાજહાર તમાગતમ્ ।
તપસ્વિની –
ગન્ધર્વજ્યેષ્ઠ જાનામિ ત્વદ્વૃત્તાન્તમશેષતઃ ॥

૩૧. અલં શોકવિકલ્પેન ધૈર્યમાલમ્બ્ય ચેતસા ।
ભૂયાંસિ તે ભવિષ્યન્તિ શ્રેયાંસ્યાયાન્તિ સમ્પદઃ ॥

૩૨. અસ્યાશ્રમસ્ય માહાત્મ્યં શ‍ૃણ્વતાં પુણ્યવર્ધનમ્ ।
વક્ષ્યમાણં મયા કર્ણવિષયીક્રિયતાં ત્વયા ॥

૩૩. પુરા હિમવતઃ પૃષ્ઠે ધારાટવ્યામુમાશ્રમે ।
તપશ્ચક્રે મહાતેજાઃ વલ્કલાખ્યો મહામુનિઃ ॥

૩૪. સર્વદ્વન્દ્વઃ શાન્તઃ જિતક્રોધો જિતેન્દ્રિયઃ ।
દુષ્કરૈર્નિયમૈર્દેવં તોષયામાસ શઙ્કરમ્ ॥

૩૫. તદન્તરાયજનની કાપિ રતિઞ્ચરાઙ્ગના ।
ઉલૂકાક્ષીતિ વિખ્યાતા તમેનં પુત્રગર્દિની ॥

૩૬. પ્રણમ્ય તરુણીભૂય પ્રાહ રૂપગુણાન્વિતા ।
રાક્ષસી –
પ્રસીદ ભગવન્ બ્રહ્મન્ પ્રસીદ કરુણાનિધે ॥

૩૭. હતબન્ધું જ્ઞાતિહીનામનન્યજનસંશ્રયામ્ ।
અઙ્ગીકુરુ મહાભાગ યાવત્ આપ્રસવં પ્રિયામ્ ॥

૩૮. પુત્રમેકં પ્રતીક્ષન્તી તપોબલસમન્વિતમ્ ।
ઉલૂકાક્ષીતિ વિખ્યાતા જાનીહિ તપસાં વર ॥

૩૯. ઇતિ તદ્વદિતાં વાણીમાકર્ણ્ય મુનિપુઙ્ગવઃ ।
સમાપ્ય કાલ્યં નિયમં પરાધીનોઽઘજન્મના ॥

૪૦. વ્યાજહારાનુરાગેણ તામિમાં રજનીચરીમ્ ।
અયિ પ્રીતોઽસ્મિ ભદ્રં તે ત્વયાસ્ત્વભિમતો રતિઃ ॥

૪૧. ઇત્થં પ્રસાદ્ય ચ તયા રેમે રાત્રિઞ્ચરસ્ત્રિયા ।
અજનિષ્ટ તથા તસ્યામાત્મજો ભીમવિક્રમઃ ॥

૪૨. જાયમાનોઽતિરૌદ્રસ્તુ ક્રન્દન્ મણ્ડૂકવત્ યતઃ ।
તસ્માત્ મણ્ડૂક નામાનં તમેનં મુનયો વિદુઃ ॥

૪૩. સ પિતુઃ પ્રાપ્ય પરમાં વિદ્યાં ક્ષિપ્રપ્રસાદિનીમ્ ।
તયા સંપ્રીણયન્ શમ્ભું તતાપ પરમં તપઃ ॥

૪૪. તતો વર્ષશતે પૂર્ણે પ્રીતઃ પ્રાદુરભૂત્ શિવઃ ।
તમાહ વત્સ પ્રીતોઽસ્મિ વરાન્ દાસ્યે મનોરથાન્ ॥

૪૫. ઇતિ તદ્વચનં શ્રુત્વા સુપ્રીતઃ પ્રણતોઽબ્રવીત્ ।
દેવદેવ દયાસિન્ધો યદિ દેયો વરો મમ ॥

૪૬. અવધ્યત્વમજય્યત્વમશેષૈરમરૈરપિ ।
કામગત્વં ચ મે દેહિ ત્વામહં શરણં ગતઃ ॥

૪૭. એવમસ્ત્વિતિ સમ્ભાષ્ય ગૌર્યા મૌલિભૂષણઃ ।
કઞ્ચિન્મણિવરં તસ્મૈ દત્વા ભૂયોઽભ્યભાષત ॥

૪૮. યાવદેવ મણિર્મૌલૌ જ્વલતે ભાસ્કરોપમઃ ।
તાવત્ ત્વમખિલૈર્દેવૈઃ અવધ્યો ભવિતા ધ્રુવમ્ ॥

૪૯. ઇત્યુક્ત્વાન્તર્દધે દેવ ; સોઽપિ તુષ્ટો નિશાચરઃ ।
સ્વમાત્રે કથયામાસ સ્વવૃત્તાન્તમશેષતઃ ॥

૫૦. સંહૃષ્ટા ચોદયામાસ સ્વવિપક્ષવિનાશને ।
સોઽપરેદ્યુઃ સમાહૂય સ્વમિત્રાન્ રજનીચરાન્ ॥

૫૧. સ્ જિગાય જગચ્ચક્રં સબ્રહ્મેન્દ્રાગ્નિમારુતમ્ ।
સપ્તદ્વીપાદિપાન્ ખણ્ડાન્ ઇલાવૃતમુખાનપિ ॥

૫૨. વિશેષાત્ ભારતં વર્ષં સંપ્રાપ્ય સહ રાક્ષસૈઃ ।
સમન્તાત્ ભક્ષયામાસ પ્રજાઃ કાલાન્તકોપમઃ ॥

૫૩. કાશિકૌસલકાશ્મીરાકામરૂપકુવિન્દકાન્ ।
અઙ્ગવઙ્ગકલિઙ્ગાન્ ચ મદ્રમાગધમૌસલાન્ ॥

૫૪. પારસીકાન્ ચ સૌરાષ્ટ્રાન્ પાઞ્ચાલાન્ અથ કૌરવાન્ ।
આન્ધ્રકર્ણાતકારટ્ટચોલકેરલદૌલવાન્ ॥

૫૫. એતાનન્યાન્ જનપદાન્ ક્ષપયિત્વા શનૈઃશનૈઃ ।
આસસાદ મહીં પુણ્યાં માન્યાં પાણ્ડ્યેન પાલિતામ્ ॥

૫૬. ક્ષોભયામાસ સકલાન્ તિમિઙ્ગ ઇવ સાગરમ્ ।
ક્રમાત્ ઇમં સમાસાદ્ય મુનેરાશ્રમમદ્ભુતમ્ ॥

૫૭. આશ્ચર્યગુણસર્વસ્વં તામ્રાતટવિભૂષણમ્ ।
અત્રૈવ વસતિં કૃત્વા ક્રવ્યાદૈઃ સ્વાનુયાયિભિઃ ॥

૫૮. મુનીન્ વિદ્રાવયામાસ તપોનિષ્ઠાન્ યતવ્રતાન્ ।
કાલેનાલ્પીયસા તેન નિર્માનુષ્યમભૂત્ જગત્ ॥

૫૯. બ્રાહ્મણાઃ ચ તપોનિષ્ઠાઃ ઋષયઃ ચ વનેચરાઃ ।
અગસ્ત્યં શરણં પ્રાપુઃ પ્રજાપતિમિવપ્રજાઃ ॥

૬૦. સર્વં વિજ્ઞાપયામાસુઃ રાક્ષસસ્ય વિચેષ્ટિતમ્ ।
સ તાન્ મુનીન્ સમાશ્વાસ્ય વિચાર્ય મનસા ચિરમ્ ॥

૬૧. હરિમારાધયામાસ સમાધિં સમુપાગતઃ ।
તેનૈવાભ્યર્ચ્યમાનસ્તુ ભગવાન્ પુરુષોત્તમઃ ॥

૬૨. દત્વાભયં તદા તસ્મૈ પ્રીતઃ કલશજન્મને ।
માયામાસ્થાય તરુણીરૂપેણાદ્ભુતદર્શિના ॥

૬૩. વીણાવિલાસિનાપાણિયુગલેનાબ્જચારુણા ।
નીલોત્પલદલશ્રેણીચમત્કારાક્ષિવર્ચસા ॥

૬૪. વપુષા કુઙ્કુમશ્રેણીવર્ષિણા વારુણશ્રિયા ।
મન્દં વૃતશ્રિયાસ્યન્દિકુન્દપુષ્પવિડમ્બયા ॥

૬૫. રૂપસૌન્દર્યકાન્તિશ્રીસારપીયૂષપૂરયા ।
તરઙ્ગિણ્યેવ મૂર્ત્યાત્ર ભગવાન્ અભ્યવર્તત ॥

૬૬. અવાપ્તયૌવનાકારાં નારીમસ્પષ્ટયૌવનામ્ ।
આપાદમૌલિવિલસત્મણિકાઞ્ચનભૂષણામ્ ॥

૬૭. ક્વણન્ નૂપુરમઞ્જીરમેખલાદામકઙ્કણૈઃ ।
પરસ્પરં ભાષમાણૈઃ અઙ્ગૈરિવ મનોહરામ્ ॥

૬૮. તામિમાં મોહિનીરૂપાં તરુણીમૌલિમાલિકામ્ ।
વિલોક્ય મોહિતાઃ તૈસ્તૈઃ સમાચખ્યુઃ નિશાચરાઃ ॥

૬૯. એતદાશ્ચર્યગુણશ્રેણીસુધાસન્ધુક્ષિતશ્રુતિઃ ।
સ રાક્ષસેશો તુષ્ટેશોઽપ્યનઙ્ગેનૈવ વઞ્ચિતઃ ॥

૭૦. તાં મોહિનીં સમાલોક્ય પરિશ્રાન્ત ઇવ આતુરઃ ।
યયાચે પ્રીણયન્ વાચા પત્ન્યર્થે ચારુહાસિનીમ્ ॥

૭૧. પ્રણતં યાચમાનં તં લુઠન્તમિવ ચેતસા ।
મદગદ્ગદયા વાચા માયા નારાયણી જગૌ ॥

૭૨. ભગવાન્ –
રાક્ષસેન્દ્ર મહાસત્વ શ્રેષ્ઠઃ ત્વં બુદ્ધિશાલિનામ્ ।
ગુણેન સમ્પદા સર્વં જયલક્ષ્મ્યા બલેન ચ ॥

૭૩. રૂપેણ યૌવનેનાપિ પ્રભાવત્વાત્ પ્રતાપતઃ ।
શ્રુત્વા શ્રુત્વાનુરાગેણ ત્વાં દ્રષ્ટુમહમાગતા ॥

૭૪. ત્વામુદ્દિશ્યેહ સંપ્રાપ્તાં માં રાક્ષસકુલેશ્વર ।
માં વૃણીષ્વેહ ભદ્રં તે પૂરયિત્વા મનોરથમ્ ॥

૭૫. ઇતિ તસ્યાઃ સુધાતુલ્યપીયૂષાક્ષરચારુણા ।
વચસા મોહિતસ્સોઽયં રાક્ષસઃ પ્રાહ સાન્ત્વયન્ ॥

૭૬. રાક્ષસઃ –
અશેષતરુણીસારસમ્પદાસિ વિનિર્મિતા ।
લોકૈકમાન્યાસ્થમૂલ્યં નાલં લોકત્રયં નનુ ॥

૭૭. અપિ પ્રાણાન્ પ્રદાસ્યામિ કિમન્યત્ કાઙ્ક્ષિતાર્પણે ।
યદ્યન્મનોરથં ત્વેદં વસ્તુ તત્તત્ પ્રકલ્પ્યતે ॥

૭૮. તવાદેશં કરિષ્યામિ નાત્ર કાર્યા વિચારણા ।
ત્વયા યે પરિરબ્ધાશ્ચ ન હિ કાઙ્ક્ષા ત્રિવિષ્ટપે ॥

૭૯. પ્રસાદઃ કરણીયોઽયં અસ્મિન્ ભૃત્યે સુહૃત્તમે ।
ઇતિ તદ્વચનં શ્રુત્વા નિશ્ચિતાર્થા પ્રદર્શનમ્ ॥

૮૦. વ્યાજહાર તદા દેવી માયા નારાયણી વચઃ ।
માયા –
અનુરૂપમહં મન્યે શ્રુતસ્ય તવ સર્વદા ॥

૮૧. ઔદાર્યબન્ધો સદ્બન્ધો તવ ચૂડાપથેસ્થિતામ્ ।
મણિશ્રેષ્ઠમિમાં મહ્યં દત્વા શ્રેયોઽધિગચ્છસિ ॥

૮૨. ઇતિ માયાવિલાસિન્યા વાણીમદિરયા તયા ।
પ્રદદૌ મૌલેર્મણિવર્યં વિકૃષ્ય સઃ ॥

૮૩. તસ્યૈવ મોચયામાસ પરિવ્રાટ્ ઈષણામિવ ।
તત્કરાત્ ઉજ્જહારૈનાં સચૈતન્યબલશ્રિયા ॥

૮૪. પ્રાણેનૈવાયુષા સાર્ધં મણિમાલાં મહાવિભુઃ ।
તદા ગતાયુર્નિષ્પ્રાણો નિસ્સત્વો રજનીચરઃ ॥

૮૫. પપાત સહસા ભૂમૌ વજ્રરુગ્ણ ઇવાચલઃ ।
તં દૃષ્ટ્વા પતિતં ભૂમૌ સર્વે દેવાઃ સુરર્ષયઃ ॥

૮૬. પ્રહૃષ્ટાઃ પુષ્પવર્ષેણ કિરન્તો હરિમસ્તુવન્ ।
બ્રાહ્મણાશ્ચ તદા સર્વે સહિતાઃ કુમ્ભજન્મના ॥

૮૭. સમજગ્મુરિદં ક્ષેત્રમારાધયિતુમીશ્વરમ્ ।
હતેષ્વશેષરક્ષસ્સુ વિદ્રુતે દિક્ષુ સર્વશઃ ॥

૮૮. સુદર્શનેન ચક્રેણ નીષ્કણ્ટકમભૂદ્વનમ્ ।
ભરદ્વાજઃ સુમન્થુઃ ચ ગૌતમોઽત્રિર્મહાતપાઃ ॥

૮૯. વિશ્વામિત્રઃ શતાનન્દઃ શતજિત્ ચ સહસ્રજિત્ ।
પુરુચિઃ પુલહોચથ્યઃ કલવિઙ્ગપ્રસાદનઃ ॥

૯૦. વસિષ્ઠો વામ્દેવશ્ચ જાબાલિઃ કપિલો જપઃ ।
આહ્લાદો મુદ્ગલઃ શઙ્કુઃ આપસ્તમ્ભઃ કુશધ્વજઃ ॥

૯૧. યજ્ઞકેતુઃ સુકેતુશ્ચ યાજ્ઞવલ્ક્યોઽગ્નિમાન્ ક્રતુઃ ।
શઙ્ખઃ પરાશરો વ્યાસઃ દુર્વાસા શ્રુતવિશ્રુતૌ ॥

૯૨. માર્કણ્ડેયોઽણિમાણ્ડવ્યો યાજકઃ ચોપયાજકઃ ।
પુરુધામા બૃહદ્ધામા શરભઙ્ગઃ સુતીક્ષ્ણકઃ ॥

૯૩. મોદકઃ શરરોમા ચ શતરોમા ચ રોમશઃ ।
એતે ચાન્યે ચ મુનયઃ સહશિષ્યાઃ સમાહિતાઃ ॥

૯૪. અભ્યાયૌઃ પ્રીતિમન્તઃ પ્રસાદયિતુમીશ્વરમ્ ।
આગતૈરમરશ્રેષ્ઠૈઃ મહેન્દ્રવરુણાદિભિઃ ॥

૯૫. સમન્તાનિબિડં વ્યોમ વિમાનૈઃ કાઞ્ચનોજ્જ્વલૈઃ ।
બ્રહ્મણા પ્રયયૌ દેવો નીલકણ્ઠઃ શિવાન્વિતઃ ॥

૯૬. તે સર્વે સમભિષ્ટૂય મિલિતા ગરુડધ્વજમ્ ।
અપૂર્વતરુણીરૂપામાવવ્રુઃ પ્રીતિપૂર્વકમ્ ॥

૯૭. તાવદેષા ભગવતી મણિમાદાય રાક્ષસાત્ ।
પ્રદદૌ પ્રણતાયાગ્રે પ્રકૃષ્ટં વિશ્વકર્મણે ॥

૯૮. તાવત્પરવશો બાણૈઃ અનઙ્ગસ્ય વૃષધ્વજઃ ।
પત્ન્યર્થે વરયામાસ તામિમામાદિમોહિનીમ્ ॥

૯૯. સૈષા ભગવતી માયા શઙ્કરપ્રિયકામ્યયા ।
પતિં વવ્રે હરં માલામવસજ્યાસ્ય કન્ધરે ॥

૧૦૦. તતો દેવાઃ સહેન્દ્રેણ સિદ્ધાશ્ચ પરમર્ષયઃ ।
તુષ્ટુવુઃ વિવિધૈઃ સ્તોત્રૈઃ કિરન્તઃ કુસુમોચ્ચયમ્ ॥

૧૦૧. તાવુભાવાદિપુરુષૌ નરનરીવપુર્ધરૌ ।
ગૃહસ્થાશ્રમમાસાદ્ય રમમાણૌ પરસ્પરમ્ ॥

૧૦૨. ઊષતુસ્સહ સિદ્ધૈઃ ચ શુશ્રૂષદ્ભિરિહાશ્રમે ।
અગ્નિહોત્રી ચ હોતા ચ લીલયા હરશઙ્કરૌ ॥

૧૦૩. શતાન્તં શરદામાસ્તાં લોકાનુગ્રહહેતવે ।
તાવત્તયોરાવિરભૂત્ કુમારઃ કોઽપિ સુન્દરઃ ॥

૧૦૪. તમેનં ક્ષેત્રરક્ષાર્થં સમાદિશ્ય વિભુઃ સ્વયમ્ ।
રહસ્યોપનિષત્ તત્ત્વમુપદિશ્ય દ્વિજન્મનામ્ ॥

૧૦૫. મુનીનામાદિસિદ્ધાનાં મુમુક્ષૂણાં મહાત્મનામ્ ।
પ્રતસ્થાતે ચ વૈકુણ્ઠકૈલાસાભ્યાં પ્રહૃષ્ટવત્ ॥

૧૦૬. તદસ્તુ ભક્તિસાન્દ્રાનન્દકરણાઃ બ્રહ્મવાદિનઃ ।
વસન્ત્યદ્યાપિ દેવાશ્ચ ઋષયશ્ચ તપોધનાઃ ॥

૧૦૭. કેચિત્ અભ્યાગમનસિદ્ધિં કેચિત્ મુક્તિમુપાગમન્ ।
તસ્માત્ હરિહરાખ્યં વ ક્ષેત્રમેતત્ચ્ચ પાવનમ્ ॥

૧૦૮. અધિષ્ઠાય મહાદેવં મદ્ભક્તાઃ ભૃગુનન્દનમ્ ।
સહસ્રં શરદાં દેવાવારાધ્ય હરિશઙ્કરૌ ॥

૧૦૯. પરાં સિદ્ધિમુપાગમ્ય તદ્વિષ્ણોઃપરમં પદમ્ ।
સશરીરઃ સંપ્રતસ્થે મયા ચારાધિતઃ પતિઃ ॥

૧૧૦. આત્માનમનુયાન્તીં મામનુરક્તાં પતિવ્રતામ્ ।
નિષેધયિત્વા સાન્ત્વોક્ત્યા દત્વા ચ સ્વકમણ્ડલુમ્ ॥

૧૧૧. એવમુક્ત્વાપરેણૈવ જગામ પરમં પદમ્ ।
યત્ર યદા નિશાનાથે સાકલ્યેન સ્વતેજસા ॥

૧૧૨. પૂર્ણતામેયુષિ તદા તીર્થેઽસ્મિન્ પાપહારિણિ ।
સ્નાત્વા હરિહરાખ્યે તુ વિધિના વરવર્ણિનિ ॥

૧૧૩. ધ્યાત્વા હરિહરૌ દેવૌ સ્મૃત્વા મામપિ સાદરમ્ ।
કિઞ્ચિદભ્યુદિતે સૂર્યે માષમાત્રં શિલાકણમ્ ॥

૧૧૪. કલશેઽસ્મિન્ વિનિક્ષિપ્ય પૂજયિત્વા દિને દિને ।
એવં ત્વયાદ્ય કર્તવ્યં પ્રતિપૂર્વમુખં પ્રતિ ॥

૧૧૫. યદાપૂર્ણા ભવેદેષાં કલશીં મે શિલાકણૈઃ ।
તદા ત્વાં કોઽપિ ગન્ધર્વઃ શરણં સમુપૈષ્યતિ ॥

૧૧૬. તાવત્તસ્મૈ સમર્પ્યેમાં કથયિત્વા કથામિમામ્ ।

મામુપૈષ્યસિ ભદ્રં તે શોકં જહિ સુદારુણમ્ ॥

૧૧૭. ઇતિ ભર્તૃવચશ્શ્રુત્વા ત્વદાગમનકાઙ્ક્ષિણી ।
બૃહસ્પતિઃ –
અત્ર સ્થિતવતી કાલમિયન્તં તપ આસ્થિતા ॥

૧૧૮. ઇત્થમગ્નિશિખા નામ ઋષિપત્ની મુદાન્વિતા ।
દત્વેમાં કલશીં તસ્મૈ ગન્ધર્વાય મહાત્મને ॥

૧૧૯. સ્નાત્વા ચ તીર્થે ચ નિયતા સશરીરા દિવં યયૌ ।
સ્વભાસા ભાસયન્તી સા સ્મન્તાત્ ગગનાઙ્ગણમ્ ॥

૧૨૦. જ્યોતિશ્ચક્રં પરિક્રમ્ય ભર્તૃલોકમુપાગમત્ ।
સોઽયમાકર્ણ્ય ગન્ધર્વઃ સુપ્રીતેનાન્તરાત્મના ॥

૧૨૧. તયેરિતામિમાં વાણીં પ્રતિગૃહ્ય ચ કુણ્ડિકામ્ ।
મેને કૃતાર્થમાત્માનં પ્રાપ્તઃ ચાસૌ મનોરથઃ ॥

૧૨૨. આદિત્યૈર્મુનિવર્યૈશ્ચ શંસદ્ભિઃ શામ્ભવીં કથામ્ ।
પૂજ્યમાનઃ સ ગન્ધર્વઃ સ્વપાણિસ્થાં કમણ્ડલુમ્ ॥

૧૨૩. લિઙ્ગશર્કરપ્રભાપૂર્ણાં પશ્યતાં કૌતુકાવહામ્ ।
શિવલિઙ્ગે સમાલોક્ય હ્યહો ચિત્રમિતિ બ્રુવન્ ॥

૧૨૪. મુહૂર્તમભવત્ સ્તબ્ધઃ પરમાનન્દગૌરવાત્ ।
તદા સમસ્તવિજ્ઞાનજ્ઞાનેન વિમલાશયમ્ ॥

૧૨૫. ભરદ્વાજઃ સમાગત્ય ગન્ધર્વં વાક્યમબ્રવીત્ ।
સ્વસ્ત્યસ્તુ તે મહાભાગ ગન્ધર્વાન્વયવર્ધન ॥

૧૨૬. ભૂપતે વિધિનાત્રૈવ લિઙ્ગમર્ચય મા ચિરમ્ ।
શ્રેયાંસિ તવ ભૂયાંસિ દદાતિ હિ મહેશ્વરઃ ॥

૧૨૭. ઇતિ તદ્રીતિમાકર્ણ્ય તં પુરોધાય દેશિકમ્ ।
તદાદિષ્ટેન માર્ગેણ સ્થાપ્ય લિઙ્ગમનુત્તમમ્ ॥

૧૨૮. શતરુદ્રીયમન્ત્રેણ સ્નાપયિત્વા મહામ્બુભિઃ ।
ધૂપૈઃ દીપૈઃ ચ નૈવેદ્યૈઃ સુગન્ધૈઃ કુસુમૈરપિ ॥

૧૨૯. પૂજાન્તે પરમેશાનમસ્તાવીત્ સંયતાઞ્જલિઃ ।
ગન્ધર્વરાજઃ –

નમો નમસ્સમાજાનાં પતયે પાપહારિણે ॥

૧૩૦. પશૂનાં પતયે તુભ્યં મન્ત્રાણાં પતયે નમઃ ।
મહતે મહ્તાં નિત્યં અણૂનામપ્યણીયસે ॥

૧૩૧. તેજીયસે તેજસાં હિ પરસ્મૈ બ્રહ્મણે નમઃ ।
આર્તાનામાર્તિશમનમશેષાભીષ્ટદાયકમ્ ॥

૧૩૨. ઉમાસખમહં વન્દે વન્દ્યમાનં સુરાસુરૈઃ ।
દેવદેવ દયાસિન્ધો ગઙ્ગાધર પુરાન્તક ॥

૧૩૩. શરણં ત્વાં પ્રપન્નોઽસ્મિ ત્રાહિ માં દુઃખસાગરાત્ ।
નમસ્સોમાય સોમાર્ધજટાચૂડાય તે નમઃ ॥

૧૩૪. પાપઘ્નાય મખઘ્નાય દુઃખઘ્નાય નમો નમઃ ।
ત્રિશૂલિને મહેશાય મહામોહાપહાય ચ ॥

૧૩૫. નમો રુદ્રાય ગૌરાય ગૌરીનાથાય તે નમઃ ।
નમો બ્રહ્મસ્વરૂપાય નમસ્તે વિષ્ણુરૂપિણે ॥

૧૩૬. નમો રુદ્રસ્વરૂપાય ત્રિમૂર્તિપ્રેષિતાત્મને ।
અન્તરાય તમસ્તોમભેદિને ભાનવે નમઃ ॥

૧૩૭. ભક્તભાગ્યમહામ્ભોધિસુધાદીધિતિમૂર્તયે ।
મૃત્યુઞ્જયાય રુદ્રાય નીલણ્ઠાયશમ્ભવે ॥

૧૩૮. અમૃતેશાય શર્વાય મહાદેવાય તે નમઃ ।
અપરાધશતોદ્ભૂતનાનાસુકૃતવર્ત્મનિ ॥

૧૩૯. ક્ષમાકર દયાસિન્ધો દેવદેવ જગત્પતે ।
ઇત્થં સ્તવૈરભિમતૈઃ પરિતોષ્ય શમ્ભું
અસ્રૈરજસ્રગલિતૈઃ નયનામ્બુજાભ્યામ્ ॥

૧૪૦. આર્દ્રીકૃતસ્વતનુરગ્રજ એવ શમ્ભોઃ
સાષ્ટાઙ્ગવત્ પ્રણતિમાચરયાં બભૂવ ।
તત્રૈવં સંસ્તુતઃ તેન ભગવાન્ પરમેશ્વરઃ ॥

૧૪૧. ઉદિયાય ચ તલ્લિઙ્ગાત્ અરણેર્હવ્યવાટ્ ઇવ ।
અર્ધમિન્દીવરશ્યામર્ધં કર્પૂરપાણ્ડુરમ્ ॥

૧૪૨. નરનારીવપુર્બિભ્રન્ નવલાવણ્યસુન્દરમ્ ।

કિરીટહારકેયૂરકનકાઙ્ગદભૂષણૈઃ ॥

૧૪૩. ગઙ્ગાધરઃ શશિધરઃ ભસ્મરુદ્રાક્ષભૂષણઃ ।
વૃષમારુહ્ય ધવલં દેવૈશ્ચ સમભિષ્ટુતઃ ॥

૧૪૪. નન્દીભૃઙ્ગીમુખૈરન્યૈઃ પ્રમથૈરભિસંવૃતઃ ।
વરાભયકરો દેવઃ સ્મયમાનમુખામ્બુજઃ ॥

૧૪૫. મા ભૈરિતિ બ્રુવન્ વાક્યં વ્યાજહારામૃતોપમમ્ ।
શ્રીભગવાન્–
ઉત્તિષ્ઠ વત્સ ભદ્રં તે મા તે શોકવિકલ્પના ॥

૧૪૬. ઇતઃ પરં ન તે ભૂયાત્ મનોરથનિરોધનમ્ ।
વૃથા વ્યવસિતં હ્યેતત્ ત્યજ દૂરે પરિશ્રમમ્ ॥

૧૪૭. શ્રૂયતામભિધાસ્યામિ ગન્ધર્વપ્રવરાધુના ।
યા ચેષ્ટા જગદાધારા વસુદા વિષ્ણુવલ્લભા ॥

૧૪૮. સર્વપ્રસૂરિતિ વ્યક્તં પુરાણૈઃ પરિપઠ્યતે ।
ભારત્યાઃ ચ વિશેષેણ તસ્યાઃ કર્મપ્રસોર્નૃણામ્ ॥

૧૪૯. મુખસ્થાનમિદં ક્ષેત્રં જ્યોતિસ્થાનં તુ યત્ સ્મૃતમ્ ।
તૃતીયં નયનં પ્રાહુઃ શ્રુતયઃ ચ સનાતનમ્ ॥

૧૫૦. તદદૃષ્ટમનિર્દેશ્યમદૃશ્યમનપાયવત્ ।
અપિ બ્રહ્મમુખૈર્દેવૈરનાદિમુનિમુઙ્ગવૈઃ ॥

૧૫૧. દુર્દર્શં તદિદં તેજઃ ગતં સર્વત્ર ગોચરમ્ ।
અપિ નારાયણો દેવઃ સર્વપિતામહઃ ॥

૧૫૨. અદ્યાપ્યારાધયન્ આસ્તે શિવં તેજોપલબ્ધયે ।
તદ્ગતં સર્વજન્તૂનામક્ષિલક્ષ્યં ચિકીર્ષતિ ॥

૧૫૩. પુરા કુણ્ડલાખ્યસ્ય મહર્ષેર્ભાવિતાત્મનઃ ।
પ્રિયાં ઋતુમતીં સાધ્વીં હઠાત્કૃત્ય શતક્રતુઃ ॥

૧૫૪. તત્કોપાત્ નષ્ટદૃક્ ભૂત્વા નારદસ્યોપદેશતઃ ।
કુશસ્તમ્ભાગ્રસંસ્પૃષ્ટસ્વાઙ્ગુષ્ઠાગ્રેણ સંસ્થિતઃ ॥

૧૫૫. ચિરં તત્ર તપઃકૃત્વા તત્પ્રસાદાત્ પુનર્વૃષા ।
જ્યોતિર્વનમનુપ્રાપ્ય લબ્ધદૃષ્ટિસ્સનાતનઃ ॥

૧૫૬. મહજ્જ્યોતિસ્સમાલોક્ય કૃતાર્થઃ સ્વર્ગમેયિવાન્ ।
તસ્માત્ ગન્ધર્વરાજસ્ત્વમપહાય મનીષિતમ્ ॥

૧૫૭. પુનઃ પશ્યસિ તત્તેજઃ મત્પ્રસાદાત્ ન સંશયઃ ।
અસ્મિન્ હરિહરક્ષેત્રે તીર્થે કલુષાપહારિણિ ॥

સ્નાત્વા મામર્ચયન્ નિત્યં ન ભૂયઃ તનુમાન્ ભવેત્ ॥

૧૫૮. એતાવત્ ઉક્ત્વા વચનં ગિરીશો ગન્ધર્વરાજસ્ય કરં ગૃહીત્વા ।
સન્દર્શયામાસ મહાન્તમુચ્ચૈઃ યદક્ષરં પરમં વેદિતવ્યમ્ ॥

૧૫૯. પુનશ્ચ તસ્મિન્ અભિજાતરૂપે શ્રીકણ્ઠલિઙ્ગે સ તિરોબભૂવ ।
સમ્પૂર્ણકામોઽર્ણવપૂરસામ્યમાનન્દસૌખ્યં પરમં જગામ ॥

૧૫૦. તત્રામ્બરાત્ અમ્બરચારિમુક્તાં પ્રસૂનવૃષ્ટિં મણિચારુવર્ણાં
પપાત તત્ક્ષેત્રભુવં સમન્તાત્ આનન્દયન્તીવ સતાં જનાનામ્ ॥

ઇતિ એકોનપઞ્ચાશઃ અધ્યાયઃ ।  Pro.Total = 4463 + 150 =4613.

## પઞ્ચાશત્તમઃ અધ્યાયઃ

ગન્ધર્વરાજસિદ્ધિઃ ।

૧. સનાતનઃ –
રાજન્ અભિનવાં પુણ્યાં કથાં ગન્ધર્વભૂપતેઃ ।
આકર્ણ્ય મયેદાનીં વર્ણિતામત્ર વિસ્તરાત્ ॥

૨. દેવદેવસ્ય ભૂયોઽપિ પ્રસાદાત્ શૂલપાણિનઃ ।
દૃષ્ટ્વાન્તરાયરહિતમખણ્ડાનન્દમણ્ડલમ્ ॥

૩. તેજઃપુઞ્જમવિચ્છિન્નમક્ષયં પરમં શિવમ્ ।
અવાપ પરમાનન્દં ચન્દ્રં દૃષ્ટ્વેવ વારિધિઃ ॥

૪. અન્તે સ્વાન્તોચિતાનન્દસુધાવારિધિપૂરિતાઃ ।
ઉન્નિદ્રરોમનિકરૈઃ અઙ્ગૈઃ સંસૂચયન્ ઇવ ॥

૫. દિશો વિલોકયન્ અક્ષ્ણા ફુલ્લપઙ્કજચારુણા ।
દેવં પ્રદક્ષિણીકૃત્ય પ્રસાદ્ય ચ પુનઃપુનઃ ॥

૬. તત્રત્યાન્ ચ મુનીન્ સર્વાન્ સમાપૃચ્છ્ય સુહૃત્તમાન્ ।
જ્યોતિર્વનાત્ અથ ક્ષેત્રાત્ પ્રસ્થાતુમુપચક્રમે ॥

૭. તાવત્ વવર્ષુઃ દેવૈશ્ચ પૂર્યમાણૈઃ નભસ્થલાત્ ।
દ્યોતમાનાઃ તદા સર્વાઃ પ્રભયા કાઞ્ચનશ્રિયા ॥

૮. ભેરીમૃદઙ્ગસમ્પુષ્ટૈઃ જયશબ્દૈઃ દિવૈકસામ્ ।
રોદસી પૂર્યમાણેવ મેઘાનામિવ નિસ્સ્વનૈઃ ॥

૯. પ્રત્યદૃશ્યન્ત દિવ્યાનિ વિમાનાનિ નભઃસ્થલે ।
પ્રશંસન્તઃ સ્તુવન્તશ્ચ હૃષ્યમાણાઃ પરસ્પરમ્ ॥

૧૦. તમાસેદુર્મહાત્માનં ગન્ધર્વાઃ સહ ચારણૈઃ ।
વિશ્વાવસુર્વીતિહોત્રો વીરસેનો વિભાવસુઃ ॥

૧૧. વસુઃ ચિત્રરથોદ્દાલઃ કીર્તિકેતુઃ પ્રિયંવદઃ ।
હાહાહૂહૂઃ મહાહિશ્ચ ઋતધામા મણિધ્વજઃ ॥

૧૨. એતે ચાન્યે ચ બહવો ગન્ધર્વાણાં મહારથાઃ ।
શતક્રતું પુરસ્કૃત્ય તમેનં પર્યવારયન્ ॥

૧૩. તાનિમાનાગતાન્ દૃષ્ટ્વા બાન્ધવાન્ ચ સુહૃત્તમાન્ ।
પિપ્રિયે પ્રેમસંરમ્ભસમ્ભાવિતવિલોકનૈઃ ॥

૧૪. સમાશ્લિષ્ટઃ તદા સર્વૈઃ પ્રશંસદ્ભિર્મુહુર્મુહુઃ ।
તં ષડ્જપાલમાહૂય સુહૃત્તમજનાયુતમ્ ॥

૧૫. મહેન્દ્રઃ પ્રાપ્ય પાણિભ્યાં પાણિમાલબ્ય સમ્ભ્રમમ્ ।
ઇન્દ્રઃ –
સાધુ સાધુ મહાભાગ ભવતા ધર્મચારિણા ॥

૧૬. દુષ્કરૈર્નિયમૈર્ઘોરૈઃ તપોભિઃ સમુપાર્જિતમ્ ।
શ્રેયો લોકત્રયોત્કૃષ્ટં અલમન્યૈર્જનૈર્ન તુ ॥

૧૭. ઇતઃપરં ત્વયા સાકં પ્રાપ્ય જ્યોતિર્વનં મહત્ ।
દેવમારાધ્ય ગૌરીશં કાઙ્ક્ષે યાતું સુરાલયમ્ ॥

૧૮. ઇત્યુક્ત્વેન્દ્રઃ ષડ્જપાલં ગૃહીત્વા પાણિના કરમ્ ।
ગન્ધર્વેશં સંપ્રણમ્ય કૃત્વા ચાપિ પ્રદક્ષિણમ્ ॥

૧૯. સહ દેવૈસ્સંપ્રતસ્થે જ્યોતિર્વનમનુત્તમમ્ ।

અવગાહ્ય મહાતીર્થં તામ્રામુત્તીર્ય પાવનીમ્ ॥

૨૦. દક્ષિણં તીરમાસાદ્ય ગૌરીતીર્થકાન્ચપિ ।
ક્રમાત્ નિષેવ્ય વિધિના સ્તુત્વૈનાં તીર્થદેવતામ્ ॥

૨૧. તર્પયિત્વા પિતૃન્ દેવાન્ બ્રાહ્મણાન્ ચ વિશેષતઃ ।
સક્ષિનાથં ગણેશાનં ચક્ષુષ્મન્તં ચ ભાસ્કરમ્ ॥

૨૨. ઉમાદેવીં ચ ભદ્રાખ્યાં તથા હારીતકાશ્રમે ।
દૈત્યેશ્વરાભિતં લિઙ્ગં પૂજયિત્વા સહોમયા ॥

૨૩. ધર્માશ્રમે વૃષેશાનમભિવાદ્ય યથાવિધિ ।
શતરુદ્રાભિધં તત્ર શાસ્તારં સંપ્રણમ્ય ચ ॥

૨૪. પુલિન્દશૈલલપુણ્યેશં તત્રૈવ પ્રમથેશ્વરમ્ ।
વિષ્ણુચક્રાશ્રમે વિષ્ણું બ્રહ્મતીર્થં ગુહેશ્વરમ્ ॥

૨૫. કચાવત્યાઃ પૂર્વભાગે નત્વા હરિહરાત્મજમ્ ।
ઉત્તરે તુ મહાકાલીં તત્પૂર્વે સકલેશ્વરમ્ ॥

૨૬. ભૂતનાથં પૂજયિત્વા દેવ્યાઃ પ્રાક્ ઉત્તરે સ્થિતમ્ ।
દદર્શેન્દ્રધનુઃપ્રખ્યં બાલાતપસમપ્રભમ્ ॥

૨૭. જ્વલત્પાવકસઙ્કાશં ચન્દ્રપાણ્ડુરવર્ચસમ્ ।
અનાદ્યન્તમનાકારમકાલકલનાત્મકમ્ ॥

૨૮. અપૂર્વરૂપમક્ષીણમનાદિમમૃતોપમમ્ ।
તસ્મૈ સન્દર્શયામાસ મહેન્દ્રઃ પાકશાસનઃ ॥

૨૯. તેન તદ્દર્શિતં જ્યોતિઃ મહાગન્ધર્વરૂપિણમ્ ।
પ્રણમ્ય દણ્ડવત્ ભૂમૌ તિષ્ઠન્ અગ્રે કૃતાઞ્જલિઃ ॥

૩૦. તુષ્ટાવ પ્રણાવાકારં જ્યોતિશ્ચક્રં શિવાકૃતિમ્ ।
ગન્ધર્વઃ –
ૐ તત્પ્રપદ્યે યદશેષપૂર્ણં તેજસ્તમસ્તોમહરં પરસ્તાત્ ॥

૩૧. અપારમાનન્દઘનાર્ણવૌપમમહેતુવીતાશ્રયમપ્રતર્ક્યમ્ ।
અતીન્દ્રિયે રાગવિશેષકલ્પનાવિશુદ્ધચિત્તાં પુરુહોતરાલયમ્ ॥

૩૨. યદાગમૈર્વા નિયમૈરુપાસ્યતે તદસ્તુ નો વસ્તુ પુરઃપુરાતનમ્ ।
પુરાતનૈરાગમગર્ભનિર્ણયપ્રગલ્ભવિજ્ઞાનવિશુદ્ધબુદ્ધિભિઃ ॥

૩૩. સનન્દનન્દાદિભિરાદિયોગિભિઃ વિભાવ્યમસ્માકમિદં પુરો ભવેત્ ।
યદક્ષરં ચૈવમચિન્ત્યવૈભવં ભવાર્ણવોદ્ધારણકલ્પિતપ્લવમ્ ॥

૩૪. શુભાય ભૂયાત્ પુરતઃ પુરાતનૈઃ અધિષ્ઠિતં યોગિવરપ્રમાદ્યતઃ ।
અલં પરિભ્રામ્ય ભવાર્ણવોદરે મમૈષણાગ્રાહવતી દુરુત્તરે ॥

૩૫. ત્વદઙ્ઘ્રિપઙ્કેરુહસાવલમ્બનં પુનીહિ ભૂમ્ના સદયાક્ષિવર્ચસા ।
શિવોઽદ્વિતીયોઽપિ ભવાન્ અરૂપકઃ ગુણક્રિયારૂપવિભાગવર્જિતઃ ॥

૩૬. સ્વભક્તલોકૈકહિતાય કેવલં વિનોદતો ભાતિ વિશેષરૂપકૈઃ ।
ન નાકપૃષ્ઠં ન રસાદિનાથતા ન પાર્મેષ્ઠ્યં ન ચ પૌરુષં પદમ્ ॥

૩૭. સ્પૃશામિ ચિત્તાણુતવાઙ્ઘ્રિસત્પતે ભવેત્ પદાલમ્બનભાગ્યમન્તરા ।
ઉપેત્ય વાગીશ્વરદોચિતઃ પ્રાક્કરોષિ કૃત્યં રજસા ગુણેન તુ ॥

૩૮. નિદાઘપુષ્ટો નિરયત્વિષા ચ વા પુનઃ સ્વયં  તાટસ્થ્યમસાવપીડનાત્ ।
બાલશશાઙ્કમૌલિવાન્ ભવાર્ણવાત્ પાતુમિદં જનં ક્ષમમ્ ॥

૩૯. વાઞ્છામિ નાહં વિષયેન્દ્રિયાર્થાન્ મરન્દ્બિન્દુસદૃશાન્ અલભ્યાન્ ।
શમ્ભો ભવત્પાદસરોજસેવા સુખાન્તરાયાન્ દુરિતૈકહેતૂન્ ॥

૪૦. પરિતઃ પૂરવતામિયાન્ વિષયાસક્તિવિકૃષ્ટચેતસા ।
શરણં કરુણાત્મના હિતં ભવતા લબ્ધમિદં પદં વિભોઃ ॥

૪૧. શિવશઙ્કરશાશ્વતાદિદેવ ન પરૈર્નામપરૈરપીશતે ।
અમૃતત્ત્વં અયં નિજં તપઃ કિમુતાક્ષણા વિષયીકૃતે મયિ ॥

૪૨. તપત્યસૌ મામિયં મુહુર્વિષયાશા ભુજગીવ ભૂયસી ।
ભવભેષજપણ્ડિતૈરમું  જનમઙ્ગીકુરુ નાપ્યલક્ષિતૈઃ ॥

૪૩. ક્ષણમપ્યસહામિ કલ્પકલ્પં કરુણાદુગ્ધપયોનિધે વિભોઃ ।
અનવાપ્ય ભવત્પદામ્બુજં નહિ કાલેન વિલમ્બનં કુરુ ॥

૪૪. ચિરમિતિ કલુષાકૂપારપાગતિમતિસુખદાત્રીમપ્યદૃષ્ટ્વા સમન્તાત્ ।
પરમિહ વિનિયોગં નયનૌઘં ત્રાહિ દીનાનુકમ્પિન્ ॥

૪૫. અભયમહહ મહ્યં દેહિ દીનાય શમ્ભો
જનમિમમનુપશ્યન્ આર્દ્રયાત્મીયબુદ્ધ્યા ।
સકરુણમવિલમ્બાદક્ષિકાન્ત્યા દયાલો

ભુવનજનનતાપં મોક્તુકામોઽસ્મિ દેવ ॥

૪૬. ઇતિ સ્મયન્ સ ગન્ધર્વઃ ખિદ્યમાનેન ચેતસા ।
આવિવક્ષુરિવેશાનં પપાત ભુવિ દણ્ડવત્ ॥

૪૭. શઙ્ખઃ –
ઇત્થં તસ્મિન્ મહાભાગે પતિતે ભક્તવત્સલઃ ।
અરૂપૈર્વ્યાજહારોચ્ચૈઃ પ્રીણયન્ ગગનાત્મકઃ ॥

૪૮. શ્રી ભગવાન્ –
ગન્ધર્વરાજ પ્રીતોઽસ્મિ સ્તોત્રેણ તપસામુના ।
વરાન્ લોકૈરમૂલ્યાન્ તે મનોરથપરિષ્કૃતાન્ ॥

૪૯. દાસ્યામ્યુત્તિષ્ઠ ભદ્રં તે શ્રુણુ મે વચનં હિતમ્ ।
ઇમં વિમાનમારુહ્ય તપ્તકાઞ્ચનસન્નિભમ્ ॥

૫૦. શાતકુમ્ભમણિવ્રાતનાનામણિભૂષિતાઃ ।
તુરગાઃ કોટિસઙ્ખ્યાતાઃ સારોહાઃ ચારુદર્શનાઃ ॥

૫૧. ઇમાન્ વૃણીષ્વ માતઙ્ગાન્ ઉત્તુઙ્ગાન્ ચન્દ્રપાણ્ડુરાન્ ।
ચતુર્દન્તાન્ ચ સારોહાન્ ઐરાવતસમૌજસઃ ॥

૫૨. ભૂતાઃ તવાનુચરાઃ શૂરાઃ ચારુવિલોચનાઃ ।
કન્દર્પસુન્દરાકારાઃ સ્વામિભક્તાઃ પ્રિયંવદાઃ ॥

૫૩. તવાનુયાયિનઃ સન્તુ નિત્યાઃ ચિત્તાનુવર્તિનઃ ।
ઇમાઃ ચામીકરાઃ ચારુપ્રમદાઃ પ્રિયદર્શનાઃ ॥

૫૪. અનેકગુણસમ્પન્નાઃ વિદ્યુજ્જ્વલિતવર્ચસઃ ।
સ્ત્રિયામઙ્ગસ્પૃશો યત્ર વાન્તિ વાતાઃ સુગન્ધિનઃ ॥

૫૫. મરુતાઃ ચ તત્ર જીવન્તિ સુધાસૃષ્ટેઽત્ર જન્તવઃ ।
ઇત્થમત્યદ્ભુતૈર્ભોગૈરુપેતસ્ત્વં મહીપતે ॥

૫૬. અનેન સુહૃદા સખ્યં દેવરાજેન ધીમતા ।
સંપ્રાપ્ય નાકપૃષ્ઠાખ્યં સુખીભવ મદાજ્ઞયા ॥

૫૭. અથ રાથન્તરે કલ્પે ક્રમાદાગામિનિ સ્વયમ્ ।
ભવિતવ્યમદિત્યાં ત્વં અંશુમાન્ નામ નામતઃ ॥

૫૮. વિધાય જગતો રક્ષાં હત્વા દૈત્યાન્ બહૂનિહ ।

અત્રૈવ મામનાદ્યન્તમખણ્ડબ્રહ્મમણ્ડમ્ ॥

૫૯. અપારમકુતોમોહમાનન્દામૃતમેષ્યસિ ।
ઇત્યુક્ત્વા વિરતે તસ્મિન્ અમ્બરાત્ અમ્બરાત્મનિ ॥

૬૦. આસીત્ કલાકલારાવઃ સ્તુવતાં વૈ દિવૈકસામ્ ।
વવર્ષુઃ પુષ્પવર્ષાણિ પરમામોદવાયુના ॥

૬૧. જહર્ષુઃ ચ તદા સિદ્ધાઃ ઋષયો નારદાદયઃ ।
આસન્ પ્રસન્નસલિલા હ્રદા જલરુહશ્રિયઃ ॥

૬૨. સતામાસીત્ અકલુષં અન્તસ્વાન્તસરોરુહમ્ ।
ઇત્થં જગદિ સાનન્દે સ ગન્ધર્વઃ પ્રસન્નધીઃ ॥

૬૩. અનુશિષ્ટો મહેન્દ્રેણ સુહૃદ્ભિશ્ચ સમાવૃતઃ ।
વિમાનવરમારુહ્ય દેવદત્તૈઃ મહાધનૈઃ ॥

૬૪. અનુયાયિગણૈરાપ્તૈઃ સ્ત્રીરત્નૈરપિ સેવિતઃ ।
ઉદ્ગીયમાનસૌભાગ્યઃ છત્રચામરસેવિતઃ ॥

૬૫. રરાજ દેવરાજેન સહિતઃ ચન્દ્રમા ઇવ ।
તાવદાવિરભૂત્ શ્રીમાન્ વૈનતેયરથો હરિઃ ॥

૬૬. સેવ્યમાનઃ સુરગણૈઃ તસ્યૈવ પ્રિયકામ્યયા ।
સંસ્તુતઃ પૂજિતસ્તેન તમેનં પ્રાહ માધવઃ ॥

૬૭. શ્રી ભગવાન્ –
ગન્ધર્વરાજ પ્રીતોઽસ્મિ તપસા વ્રતચર્યયા ।
સર્વાણિ અસ્તુ ભદ્રં તે જીવેશ્ચ શરદાં શતમ્ ॥

૬૮. અત્રૈવ શમ્ભુર્ભગબાન્ આત્મજ્યોતિઃ પ્રકાશયન્ ।
ભક્તાનાં શ્રેયો વિધાયન્ આસ્તે સત્વગુણાન્વિતઃ ॥

૬૯. અત્ર સર્ગસમારમ્ભસ્થિત્યાં રમ્યોઽપિ માયયા ।
ઉપસંહરણ કાર્યં ચ કુર્વન્ સદા શુભઙ્કરઃ ॥

૭૦. અત્ર એવાત્મતત્ત્વજ્ઞૈઃ આવાસં અદ્ય ક્ષેત્ર એવ હિ ।
ઉપાસના ચ કર્તવ્યા સર્વદા મમ વાસરે ॥

૭૧. ભાગ્યમેતાદૃશં પ્રાપ્તં અક્ષય્યં મોક્ષલક્ષણમ્ ।
પ્રત્યબ્દમત્ર સ્નાતવ્યં મીનમેયુષિ ભાસ્કરે ॥

૭૨. ભરણ્યામર્ચનીયોઽયં શઙ્કરો લોકશઙ્કરઃ ।
એષુ તીર્થેષુ ચ સ્નાત્વા પુણ્યં ઈયુઃ સદા જનાઃ ॥

૭૩. બ્રાહ્મણાઃ પૂજનીયા હિ વિધિજ્ઞ વિધિના ત્વયા ।
અત્રૈવ દેવાશ્ચ સર્વે હિતકામ્યયા પૂજનીયાઃ ॥

૭૪. યત્તે જાગરણં નિત્યં પ્રજાનાં પિતરો યથા ।
તસ્માત્ અત્રૈવ કુર્વન્તુ પૂજાં હરિહરાત્મકમ્ ॥

૭૫. યઃ ચાત્ર પુણ્યતીર્થેષુ સ્નાત્વા મલયજોદકે ।
તેજઃ પ્રદક્ષિણીકૃત્ય જપ્ત્વા ત્રિપદિકામપિ ॥

૭૬. મુક્તપાપો ભવેત્ ક્ષિપ્રં નાત્રકાર્યા વિચારણા ।
સ્નાત્વા પ્રભામયે તીર્થે કણ્ઠદઘ્નોદકસ્થિતઃ ॥

૭૭. મહાવિદ્યામનું જપ્ત્વા બ્રહ્મહા મુચ્યતે પરમ્ ।
સૂર્યતીર્થે નર ; સ્નાત્વા સૌરમષ્ટાક્ષરં સ્મરન્ ॥

૭૮. નિર્મુક્તપાપો મર્ત્યઃ સદ્યઃ સાયુજ્યમેષ્યતિ ।
ત્રયમ્બકં સપ્રણવં તથા પઞ્ચાક્ષરં જપેત્ ॥

૭૯. અવગાહ્ય મહાતોયં જપન્ હરિહરે તતઃ ।
ધ્રુવં મુક્તિમવાપ્નોતિ વિદ્યાં શૈવીં ષડાક્ષરમ્ ॥

૮૦. સ્નાત્વા તીર્થે જપન્ ચાપિ ધ્યાત્વા મામપિ સાદરમ્ ।
નારાયણાત્મકં મુક્તિમષ્ટાક્ષરં સ્મરન્ ॥

૮૧. શ્રીસૂક્તં પાવનં ત્રિસુપર્ણમથાપિ વા ।
તથૈવ પૌરુષં સૂક્તં વિષ્ણુસૂક્તમથાપિ વા ॥

૮૨. મહાન્યાસેન સહિતં શિવસઙ્કલ્પમેવ ચ ।
શતરુદ્રીયં યે જપન્તિ તેષાં મુક્તિઃ કરે સ્થિતા ॥

૮૩. યે વજ્રકીટરચિતસાલગ્રામં દ્વિજન્મને ।
દત્વા પ્રયાન્તિ નિર્મુક્તાઃ તદ્વિષ્ણોઃપરમં પદમ્ ॥

૮૪. સ્ફાટિકં મણિસઙ્કાશં સ્વર્ણતારાદિકલ્પિતમ્ ।
શિવલિઙ્ગં પ્રદાયૈવ બ્રાહ્મણાય મહાત્મને ॥

૮૫. અભયં તૈજસં લોકં પ્રયાતિ નિરપાયવત્ ।

ગોદાતાન્નપ્રદાતા વા વસ્ત્રરત્નપ્રદોઽપિ વા ॥

૮૬. આજ્યદાતામ્ભસાં દાતા શય્યાવાહનદાયિનઃ ।
ક્ષેત્રારામપ્રદાતા વૈ રથવાજિપ્રદાયિનઃ ॥

૮૭. વસન્તિ સુખિનો નિત્યં રુદ્રલોકે નિરામયે ।
યે ચાત્ર સ્થાપયન્ત્યદ્ધા શિવલિઙ્ગં વિધાનતઃ ॥

૮૮. આકલ્પં ભોગિનો મર્ત્યાઃ તે યાન્તિ શિવતુલ્યતામ્ ।
મમૈવ મૂર્તિં પરમાં સ્થાપયન્તિ મહામતે ॥

૮૯. ન તે ભૂયઃ પ્રપદ્યન્તે જનનીગર્ભગહ્વરમ્ ।
ભોગસ્થાનમિદં નૃણાં મુમુક્ષૂણાં ચ મુક્તિદમ્ ॥

૯૦. તપસ્સિદ્ધિકરં ભોગસાધનોપાયદર્શનમ્ ।
તસ્માત્ એતત્ પરં ક્ષેત્રં સેવિતવ્યં પ્રયત્નતઃ ॥

૯૧. કાઙ્ક્ષદ્ભિઃ પરમં શ્રેયઃ નાત્ર કાર્યા વિચારણા ।
તસ્માત્ અવશ્યં ભવતા પ્રત્યબ્દં સહ બન્ધુભિઃ ॥

૯૨. આમુક્તકલનાપ્રાપ્તિઃ આશ્રિતવ્યમિદં સ્થલમ્ ।
કર્મપાશાનુબન્ધાનાં યાતાયાતશ્રમાવતામ્ ॥

૯૩. જન્તૂનામુપકારાર્થમેતાવત્ કથિતં મયા ।
ઇત્થં વિભુઃ સમાદિશ્ય ગન્ધર્વં ગરુડધ્વજઃ ॥

૯૪. સર્વાન્ સમ્ભાવયન્ વાચા દેવરાજપુરોગમાન્ ।
પશ્યતાં સર્વજન્તૂનાં તેજસ્યન્તરધીયત ॥

૯૫. ઇત્થમન્તર્હિતે દેવે દેવદેવે જનાર્દને ।
ગન્ધર્વરાજો હૃષ્ટાત્મા સર્વદા બલસંયુતઃ ॥

૯૬. દેવદત્તં મહાભોગવિભૂતિવિભવાર્ચિતમ્ ।
દેવસ્થાનં સંપ્રણમ્ય વિમાનેનામ્બરાત્મના ।
યોગિલભ્યં પરં સ્થાનમવાપ પરમાદ્ભુતમ્ ॥

ઇતિ પઞ્ચાશત્તમોઽધ્યાયઃ ।  Pro.Total = 4613 + 96 =4709.

# એકપઞ્ચાશત્તમોऽધ્યાયઃ

જ્યોતિર્વને શ્રીબલધિર્નામ્નઃ રાજ્ઞા લિઙ્ગત્રયપ્રતિષ્ઠા શ્યામાનદીસઙ્ગમે ।

૧. શ્રી શઙ્ખઃ –
ઇત્થમાકર્ણ્યૈકપીયૂષામ્ભોધિસમ્પ્લવામ્ ।
કથાં કલિમલાપાયાં કાઙ્ક્ષિતોદયનૈષ્ઠિકીમ્ ॥

૨. દુષ્કર્મવ્રાતશમનીં રાજા પાણ્ડ્યેન્દ્રનન્દનઃ ।
પ્રસાદ્ય મૂર્ધ્ના ભૂયોऽપિ સનાતનમિદં જગૌ ॥

૩. રાજોવાચ –
ભગવન્ યોગિનાં શ્રેષ્ઠ દૃષ્ટલોકપરાવર ।
ભવતા જગતીચક્રે પરિત્રાણપરાત્મના ॥

૪. જન્તવો જન્મસંસારઘોરાર્ણવપરિભ્રમાત્ ।
પરિપશ્યન્તિ સિદ્ધાર્થા નૈવ પશ્યન્તિ દુર્ગતિમ્ ॥

૫. તરન્ત્યન્ધન્તમઃ સૂર્યાત્ પરિતાપં નિશાકરાત્ ।
પરિતાપં તમસ્તોમં તરન્તિ ભવતો જનાઃ ॥

૬. તસ્માત્ ત્વાં કરુણામૂર્તિં ગુરુમાસાદ્ય નિર્મલમ્ ।
ન ભવાબ્ધેર્ન સંસારાત્ પરિપશ્યામ્યહં ક્વચિત્ ॥

૭. દૂરીકૃતાનિ દુઃખાનિ ચિન્તાસન્તાપવન્ત્યપિ ।
ઊરીકૃતમહો શ્રેયઃ પ્રાપ્તસર્વમનોરથમ્ ॥

૮. અનયા કથયા બ્રહ્મન્ બ્રહ્મજ્યોતિપ્રકાશયા ।
કૃતકૃત્યોऽસ્મ્યહં બ્રહ્મન્ કૃતાર્થોऽસ્મિ હિ કેવલમ્ ॥

૯. ભૂમિઃ પરિમિતા વ્યોમ્નિ મિતં તારકદમ્બકમ્ ।
મિતા હિમાની કાલેન મિતા ચૈવ કુલાચલાઃ ॥

૧૦. મન્યામહે વયં બ્રહ્મન્ કથયા ભૂરિસમ્પદઃ ।
મહામહાર્થકલિકા હ્યમિતા વ્યોમચક્રવત્ ॥

૧૧. ઇતઃપરમહં બ્રહ્મન્ તેજઃપુઞ્જમકલ્મષમ્ ।
દ્રષ્ટુમિચ્છામિ ભવતાં માસ્તુ કાલવિલમ્બનમ્ ॥

૧૨. સ્નાતવ્યાનિ ચ તીર્થાનિ દ્રષ્ટવ્યાનિ સ્થલાન્યપિ ।

પૂજિતવ્યાશ્ચ તત્રત્યાઃ દેવતાશ્ચ યથાક્રમમ્ ॥

૧૩. ગુરૂપદિષ્ટમાર્ગેણ સ્થાપ્ય લિઙ્ગમનુત્તમમ્ ।
પૂજયિષ્યામિ વિશ્વેશં સોમં સોમવિભૂષણમ્ ॥

૧૪. સા તેન મહાભાગ મન્ત્રિણઃ સપુરોહિતાઃ ।
સેનાધ્યક્ષાઃ ચ નિર્યાન્તુ સવાજિરથકુઞ્જરાઃ ॥

૧૫. ધનાધ્યક્ષાઃ સમાદાય પુષ્કલાનિ ધનાન્યપિ ।
ઇતિ ભૂપવચશ્શ્રુત્વા સર્વે સંહૃષ્ટમાનસાઃ ॥

૧૬. નગરાત્ નિર્યયુઃ તૂર્ણં વિચિત્રં દ્રષ્ટુમુત્સુકાઃ ।
સુધાનીતં તથા દિવ્યં સ્યન્દનં કામચારિણમ્ ॥

૧૭. વિનીતાશ્વસમાયુક્તં ગન્ધર્વનગરોપમમ્ ।
સનાતનં પુરસ્કૃત્ય સમારોહન્નૃપાત્મજઃ ॥

૧૮. કાશ્યપો જમદગ્નિશ્ચ પર્ણાદો રૈભ્યરૈવતૌ ।
લોપામુદ્રાપતિઃ શ્રીમાન્ અગસ્ત્યઃ સાગ્નિહોત્રકઃ ॥

૧૯. નારદઃ પર્વતશ્ચૈવ કૌશિકશ્ચ પરાશરઃ ।
વસિષ્ઠાદ્યાઃ તથા તસ્મિન્ સમવાયમકલ્પયન્ ॥

૨૦. શઙ્ખભેરીનિનાદૈશ્ચ પણવાનકગોમુખૈઃ ।
વીણાવેણુનિનાદૈશ્ચ જયશબ્દૈશ્ચ વન્દિનામ્ ॥

૨૧. પૂર્યમાણમિવ વ્યોમ ભૂઃ ચચલેવ સર્વશઃ ।
એવં પ્રહૃષ્ટૈઃ મુનિભિઃ જનમન્ત્રિપુરોહિતૈઃ ॥

૨૨. પ્રપૂજ્યમાનો યોગીન્દ્રો રાજાપાણ્ડ્યેન્દ્રસૂનુના ।
પ્રવિવેશ મહાક્ષેત્રં ભાસ્કરાકારદર્શનમ્ ॥

૨૩. સમન્તાત્ યોજનાયામં સર્વસિદ્ધનિષેવિતમ્ ।
નીલજીમૂતસઙ્કાશૈઃ મહાપાદપસઞ્ચયૈઃ ॥

૨૪. વ્યાપ્તં દિગ્વ્યોમભાગૈશ્ચ સપુષ્પફલપલ્લવૈઃ ।
ચૂતકેતકતાલામ્રતક્કોલામલકેતકૈઃ ॥

૨૫. માકન્દકુન્દમન્દારચન્દનાતક્કુતિન્દુકૈઃ ।
કેરનારઙ્ગકક્કેલિકલિમાલૂરમાગધૈઃ ॥

૨૬. નમેરુપૂગનાગાદ્યૈઃ શાખારુદ્ધાતપચ્છદૈઃ ।
અનભિજ્ઞાતપાપૌઘભૂભાગપરમોદયઃ ॥

૨૭. કાસારશતસમ્પાતકલ્હારકુમુદોજ્જ્વલમ્ ।
જ્વલત્પાવકસઙ્કાશૈઃ સૂર્યતારાધિપપ્રભૈઃ ॥

૨૮. તપસ્યદ્ભિઃ મહાસિદ્ધૈઃ યતિભિઃ બ્રહ્મચારિભિઃ ।
વનાશ્રમિજનૈરન્યૈઃ બ્રાહ્મણૈઃ ગૃહમેધિભિઃ ॥

૨૯. ક્વચિત્ સમાધિમાપન્નૈઃ અર્ધોન્મીલિતલોચનૈઃ ।
ક્વચિત્ આરાધયદ્ભિઃ ચ દેવદેવમુમાપતિમ્ ॥

૩૦. પઞ્ચયજ્ઞપરૈર્દાન્તૈઃ ક્વચિત્ સ્મૃતિવિશારદૈઃ ।
ક્વચિત્ સામાનિ ગાયદ્ભિઃ ક્વચિત્ ચાપિ ઋચાં ગણૈઃ ॥

૩૧. યજૂંષિ વાચા વિસ્તાર્ય તદર્થાન્વેષણાતુરૈઃ ।
બ્રાહ્મણૈરધ્વરોદ્યુક્તૈઃ આથર્વણપરૈઃ પરૈઃ ॥

૩૨. જુહ્વદ્ભિરગ્નિમન્યત્ર ક્વચિત્ યોગપરાયણૈઃ ।
સર્વતશ્શોભનાકારં સાલઙ્કારમિવ સ્થિતમ્ ॥

૩૩. ક્ષેત્રમક્ષિપથે લબ્ધ્વા આદિસિદ્ધનૃપાદયઃ ।
અવતીર્ય સ્વયાનેભ્યઃ કૃતાઞ્જલિપુટોજ્જ્વલાઃ ॥

૩૪. પ્રણેમુઃ શિરસા ક્ષેત્રં પ્રજાપતિમિવ પ્રજાઃ ।
સહ રાજેન્દ્રપુત્રેણ પ્રીતો વિપ્રૈઃ સનાતનઃ ॥

૩૫. પ્રવિવેશ મહાક્ષેત્રં ભક્ત્યા પ્રણતકન્ધરઃ ।
ઇત્થમાયાન્તમધુના રાજ્ઞા રાજેન્દ્રસૂનુના ॥

૩૬. તત્રત્યાઃ સહસા સિદ્ધાઃ જ્ઞાત્વા પ્રીતિપુરસ્સરમ્ ।
પ્રત્યુજ્જગ્મુર્યથાન્યાયં મધુપર્કાર્હણાદિભિઃ ॥

૩૭. પરસ્પરં સમભ્યર્ચ્ય ત એતે સ્વાગતાદિભિઃ ।
તૈઃ પૂજિતો યથાન્યાયં હૃષ્ટા ક્ષેત્રમુપાગમન્ ॥

૩૮. પ્રવિશ્ય સુમહત્ક્ષેત્રં વિનીતો રાજનન્દનઃ ।
આદિસિદ્ધોપદિષ્ટેન વિધિના ભૈરવં વિભુઃ ॥

૩૯. પ્રથમં પૂજયિત્વા તુ ગણેશવટુકૌ તથા ।
તીર્થદેવીં સમભ્યર્ચ્ય તામ્રાં મલયનન્દિનીમ્ ॥

૪૦. સ્નાત્વા ક્રમેણ તીર્થેષુ વાપીકૂપહ્રદાદિષુ ।
દેવાન્ પિતૄન્ ઋષીન્ ચૈવ તર્પયિત્વા દ્વિજાન્ અપિ ॥

૪૧. ક્ષેત્રોપવાસં વિધિવત્ રાત્રૌ જાગરણં તથા ।
કૃત્વા ધર્મકથાં શ્રુત્વા નિનાય રજનીં નૃપઃ ॥

૪૨. અપરેદ્યુસ્સમુત્થાય કૃત્વા સ્નાનાદિકાઃ ક્રિયાઃ ।
બ્રાહ્મણાન્ ભોજયિત્વા તુ પારણામભ્યવર્તયત્ ॥

૪૩. તતઃ કતિપયાહેષુ ગતેષુ નૃપનન્દનઃ ।
દીનેશે મકરારૂઢે પૂર્યમાણે નિશાકરે ॥

૪૪. સપ્તમ્યાં ગુરુવારે ચ શુભયોગસમન્વિતે ।
ગાર્હસ્થ્યમિન્દ્રાવશ્વિન્યાં કર્મ કુર્વતિ નિમલે ॥

૪૫. ગુરુણાધિષ્ઠિતે લગ્ને કવિના ચ નિરીક્ષિતે ।
એકાદશગતે મન્દે મુહૂર્તે મૈત્રસંજ્ઞિતે ॥

૪૬. રાજા શ્રીમાન્ આગમોક્તેનવર્ત્મના ।
મહામન્ત્રેણ શૈવેન નવકૂટાણુના સહ ॥

૪૭. સ્થાપયામાસ તલ્લિઙ્ગં યત્ર જ્યોતિઃ પ્રવર્તતે ।
ઉચ્ચાવચેષુ મન્ત્રેષુ ઈરિતેષુ મહર્ષિભિઃ ॥

૪૮. ભેરીમૃદઙ્ગશઙ્ખેષુ નિનદત્સુ સમન્તતઃ ।
વિમાનસ્થાઃ તતો દેવાઃ બ્રહ્મનારાયણાદયઃ ॥

૪૯. આસન્ પ્રસન્ના કકુભઃ સામોદઃ મરુત્ વવૌ ।
દેવદુન્દુભયો વ્યોમ્નિ સસ્વનુર્દેવચોદિતાઃ ॥

૫૦. જપન્તો મન્ત્રવૈશિષ્યં શતરુદ્રીયસંજ્ઞિતમ્ ।
તુષ્ટુવુઃ પરમેશાનં સિદ્ધૈશ્ચ પરમર્ષિભિઃ ॥

૫૧. દેવદુન્દુભયો વ્યોમ્નિ સસ્વનુર્દેવચોદિતાઃ ।
વવર્ષુઃ પુષ્પવર્ષાણિ સિદ્ધૈશ્ચ પરમર્ષિભિઃ ॥

૫૨. વવર્ષુઃ પુષ્પવર્ષાણિ પરિતઃ કલ્પશાખિનઃ ।
એવં પ્રતિષ્ઠાપ્ય શિવં પૂજયામાસ ભૂપતિઃ ॥

૫૩. ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈઃ ગન્ધપુષ્પાક્ષતાદિભિઃ ।

એતસ્મિન્ અન્તરે વ્યોમ્ના સમાદિષ્ટઃ સુરોત્તમૈઃ ॥

૫૪. મહાચૂડામણિકૃતામાદાય પ્રથિમાં શુભામ્ ।
ગૌરીં નીલોત્પલપ્રખ્યાં નાનામણિવિભૂષિતામ્ ॥

૫૫. વિશ્વકર્મા સમાસાદ્ય દદૌ રાજ્ઞે ચ સંસદિ ।
હૃષ્ટાત્મા સ મહીપાલઃ તાં પ્રગૃહ્ય મણિપ્રભામ્ ॥

૫૬. દેવીં સંસ્થાપયામાસ મન્ત્રેણ ગુરુચોદિતઃ ।
એવં દેવં ચ દેવીં ચ પ્રતિષ્ઠાપ્યાગમાત્મના ॥

૫૭. નમસ્કૃત્ય મહાદેવં ત્રિઃપરિક્રમ્ય સાઞ્જલિઃ ।
પૂજાન્તે પુરતઃ સ્થિત્વા સામ્બં સ્તોતું પ્રચક્રમે ॥

૫૮. રાજા –
ૐ તદ્વાચ્યં દ્યોતમાનં મહાન્તં જ્યોતિર્નિત્યં સત્સમાધેયરૂપમ્ ।
માન્યં મોહાપાયહેતું પ્રપદ્યે પ્રાયઃ શ્રેયઃ પ્રાપ્તુમૈશં મહિમ્ના ॥

૫૯. યાતાયાતશ્રાન્તિસન્તારહેતોઃ હાતું માયાજાલિકાબન્ધનાનિ ।
સન્ધાતું વૈ જીવલેખાં મહિમ્ના સાક્ષાત્ ઈશં સંશ્રયે તત્ત્વરૂપમ્ ॥

૬૦. કર્માકારં તત્ફલાકારરૂપં કર્તૃત્વે ચ વ્યક્તિમભ્યેષિ વાસમ્ ।
ઇજ્યાકારં દેવતાકારમન્તઃ શૈવં ભાવં યાતુમીહે મહાન્તમ્ ॥

૬૧. તીર્થાકારો યઃ પરિત્રાતુમેતત્ મન્ત્રાર્ણાત્મા નૈગમાન્તર્વિલાસી ।
સાક્ષી દાતા કર્મણાસૌ ફલાનાં દેવો ભૂયાત્ અગ્રતો નઃ પુરાણઃ ॥

૬૨. યન્નામાર્ણાન્ વાચિ કુર્વન્ પ્રમાદાત્ અભ્યર્થાત્વા પાપતો મુક્તિમેતિ ॥

તં ત્વામન્તઃ ચન્દ્રચૂડં પ્રપદ્યે નીલગ્રીવ ત્રાહિ નઃ કર્મબન્ધાત્ ॥

૬૩. અન્તઃકરણા નેડમૂકાકનાથાઃ યત્તે કિઞ્ચિત્ વૃત્તમુલ્લાસ્ય શમ્ભુમ્ ।
પાપાત્ મુક્ત્વા યાન્તિ તજ્જ્યોતિરૈશં પાશાપાયં નૌમિ નાથં પશૂનામ્ ॥

૬૪. હેતુસ્સાક્ષી તન્નિયન્તાપહન્તા જન્તોરન્તર્જીવરૂપો ચ ભૂયઃ ।
યેઽસ્પૃશ્યાત્મા કથ્યતે બ્રહ્મવિદ્ભિઃ સોઽયં શમ્ભુઃ પાતુ નઃ કર્મબન્ધાત્ ॥

૬૫. વિશ્વાત્મા યો વિશ્વરૂપો નિયન્તા કાલે કાલે યોજયિત્વા સ્વવૃત્યા ।
કાલક્ષેપં કલ્પયત્યેષ નિત્યં તસ્મૈ ધામ્ને કલ્પયે ચિત્તમદ્ધા ॥

૬૬. યુક્ત્યા મન્ત્રૈર્વેદતત્ત્વાર્થદૃષ્ટૈઃ બુદ્ધ્યા શુદ્ધ્યા વાગ્વિલાસાદ્ગુરૂણામ્ ।

અન્વેષન્તે યોગિનો યત્પદાબ્જં તસ્મિન્ આશા ભૂયસી મેઽસ્તુ નિત્યમ્ ॥

૬૭. નિત્યં શુદ્ધં નિર્વિકલ્પં પુરાણં સત્યં સૂક્ષ્મં સર્વસઙ્કલ્પહીનમ્ ।
શ્રદ્ધામાત્રં શમ્ભુમાદ્યં વિનોદાત્ સાલઙ્કારં કારયેન્નીલકણ્ઠમ્ ॥

૬૮. દેવ પ્રસીદ પરમેશ્વર ચન્દ્રમૌલે લીલાવિશેષપરિકલ્પિતપઞ્ચકૃત્ય ।
પશ્યન્ ત્રિકાલભવભૂતપતે દયાલો માં પાહિ મોહકુહરાત્ ગહનાત્ પ્રપન્નમ્ ॥

૬૯. ઇતિ તસ્યાગ્રતઃ સ્થિત્વા સ્તુવતઃ સ્તુતિસમ્પદા ।
લાલિતાઞ્જલિનાલસ્ય ભક્તિનમ્રાત્મમૂર્તિનઃ ॥

૭૦. તલ્લિઙ્ગાત્ અક્ષિપદવીમભૂત્ તસ્માત્ શુભોદયા ।
અપારા પૂરિતાશેષભુવના ભાસ્કરોપમા ॥

૭૧. દૈવ તેજસઃ કોઽપિ પુમાન્ આગત્ય સત્વરમ્ ।
એહિ વત્સેતિ સમ્ભાષ્ય કરેણાલમ્બ્ય ભૂપતિમ્ ॥

૭૨. અન્તર્નિનાય વૈ તસ્મિન્ તેજઃપુઞ્જે મહત્તરે ।
દદર્શ મહતીં ભૂમિં તદન્તઃ કાઞ્ચનારુણામ્ ॥

૭૩. તન્મધ્યે નગરીં પુણ્યાં મધુરાં રાજનન્દનઃ ।
મહાપ્રાકારસંયુક્તાં મહાપરિઘવેષ્ટિતામ્ ॥

૭૪. મહાજનસમાકીર્ણાં નરનારીસમાકુલામ્ ।
વિભક્તરથ્યાં વિતતાં ગજવાજિરથાકુલામ્ ॥

૭૫. મહારાજગૃહોપેતાં પ્રાસાદશતસઙ્કુલામ્ ।
પુરીં વિચિત્રામાલોક્ય સ્મયમાનો મહીપતિઃ ॥

૭૬. તત્રત્યૈર્બન્ધુભિસ્સ્નિગ્ધૈઃ મન્ત્રિસામન્તબન્ધુરૈઃ ।
પ્રત્યુદ્યતઃ પૂજ્યમાનઃ સ્તૂયમાનશ્ચ બન્ધુભિઃ ॥

૭૭. કૈલાસશિખરાકારાં દદર્શ ભવનં પિતુઃ ।
અતીત્ય કક્ષ્યાઃ વિવિધાઃ મણિકાઞ્ચનકુટ્ટિમાઃ ॥

૭૮. અધિષ્ઠિતદ્વારપાલાઃ રક્ષ્યમાણાશ્ચ રક્ષિભિઃ ।
અક્ષિપ્રાઘુણિકીજાતાં સભામાસાદ્ય વૈ શનૈઃ ॥

૭૯. દદર્શ પિતરં તત્ર મણિસિંહાસને સ્થિતમ્ ।
દીપ્યમાનં સ્વયા કાન્ત્યા મહેન્દ્રવરુણોપમમ્ ॥

૮૦. ચામરાભ્યાં વીજ્યમાનં શ્વેતચ્છત્રસમન્વિતમ્ ।
સ્તૂયમાનં પુરોભાગે સૂતમાગધવન્દિભિઃ ॥

૮૧. પાર્શ્વે મરકતશ્યામાં માતરં ચારુદર્શનામ્ ।
તત્ર સ્થિતાઃમન્ત્રિવૃદ્ધાઃ ઋષયો બ્રહ્મવાદિનઃ ॥

૮૨. સભ્યાઃ પરમોદારાઃ સૂક્ષ્મજ્ઞાઃ દીર્ઘદર્શિનઃ ।
ઉપતરસ્થુર્મહાત્માનં દેવરાજમિવામરાઃ ॥

૮૩. તં દૃષ્ટ્વા પિતરં પ્રીતો માતરં ચ યશસ્વિનીમ્ ।
પ્રણમ્ય પાદયોર્ભક્ત્યા વ્યુપતસ્થે તદન્તિકે ॥

૮૪. તમેનમાગતં પુત્રં કૌતુકાત્ પરમેશ્વરઃ ।
સ્નેહાત્ અમું સમાશ્લિષ્ય મૂર્ધ્ન્યુપાઘ્રાય વૈ મુહુઃ ॥

૮૫. અઙ્કે પુત્રં સમારોપ્ય સ્નેહાત્ત્ વચનમબ્રવીત્ ।
પિતા –
જય જીવ ચિરં વત્સ તાતાયુષ્મન્ મહામતે ॥

૮૬. પ્રીતોઽસ્મિ તવ કૃત્યેન સ્તોત્રેણાનેન પૂજયા ।
એષા તે જનની પ્રીતા તવ શુશ્રૂષયાઽનઘ ॥

૮૭. ધર્મેણ પાલય મહીમધર્મં પરિવર્જય ।
મા તવાહઙ્ક્રિયાં ક્વાપિ ગુરૂન્ આરાધયાનિશમ્ ॥

૮૮. સર્વમીશ્વરભાવેન કર્માણિ પરિવર્તય ।
અલઙ્ઘનીયા ગુર્વાજ્ઞા મન્ત્રયન્ મન્ત્રિભિસ્સહ ॥

૮૯. બ્રાહ્મણેષુ ચ દેવેષુ સદા તુલ્યમતિર્ભવ ।
પાષણ્ડાનામનાર્યાણાં વિમુખો ભવ સર્વદા ॥

૯૦. નિત્યમાવાં ચ પિતરૌ ભક્ત્યા શુશ્રૂષયા સદા ।
ધર્મં સંસ્થાપયન્ ભૂમૌ શત્રૂન્ જહિ મહામતે ॥

૯૧. યજ્ઞેન દેવાનભ્યર્ચ્ય પિતૄન્ ચૈવ યથોચિતમ્ ।
સ્વદારનિરતો ભૂત્વા ચિરં જીવિતુમર્હસિ ॥

૯૨. કાઠિન્યં નાનુવર્તસ્વ સ્વશત્રુષુ જયોત્સુકઃ ।
માર્દવાત્ ગુરુવર્ગેષુ ભૃત્યેષુ સમવર્તિના ॥

૯૩. અહમત્રૈવ વત્સ્યામિ તવ માત્રાનયા સહ ।

સર્વેષામેવ જન્તૂનાં હિતાય ચ મહામતે ॥

૯૪. ઇત્થં સુન્દરપાણ્ડ્યોઽયં સાક્ષાત્ ગૌરીસખશ્શિવઃ ।
પુત્રં સમનુશાસ્યૈવ તત્રૈવાન્તરધીયત ॥

૯૫. તાવત્ શ્રીબલધિશ્શ્રીમાન્ પ્રસન્નાત્માતિવિસ્મિતઃ ।
લિઙ્ગં પુરસ્તાત્ આલોક્ય બ્રાહ્મણાનાં ચ સમન્તતઃ ॥

૯૬. પૃષ્ટઃ સનાતનેનાસૌ કિં ચક્રમિતિ ભૂપતે ।
કથયામાસ વૃત્તાન્તં યથાવત્ દિવ્યદર્શનમ્ ॥

૯૭. શ્રુત્વા સર્વે મુનિગણાઃ રાજાનોઽન્યે ચ મન્ત્રિણઃ ।
જહર્ષુઃ પરમાનન્દાત્ પૂર્યમાણા ઇવાપગાઃ ॥

૯૮. તતો રાજસુતો દેવમભ્યર્ચ્ય ચ સનાતનમ્ ।
તેનાનુશાસિતઃ ચક્રે નગરીં તત્ર વિસ્તૃતામ્ ॥

૯૯. મધુરાયાઃ તુલ્યરૂપાં દેવાગારશતોજ્જ્વલામ્ ।
ચણ્ડાખ્યઃ પૂર્વભાગે તુ વીરભદ્રં મહાબલમ્ ॥

૧૦૦. પુરસ્ય રક્ષણાર્થં સ્થાપયામાસ ભૂપતિઃ ।
આગ્નેય્યાં વીરશાસ્તારં દક્ષિણે ચ મદોત્કટમ્ ॥

૧૦૧. નૈરૃત્યાં દેવદેવેશં સુન્દરાખ્યં જનાર્દનમ્ ।
પશ્ચિમે મુચુકુન્દાખ્યં ભગવન્તં ગણેશ્વરમ્ ॥

૧૦૨. વાયવ્યાં વૈનતેયં ચ ગન્ધર્વં ચ તથોત્તરે ।
ઐશાન્યાં ચ ગણેશાનં સિદ્ધ્યાખ્યં સિદ્ધિદાયકમ્ ।
૧૦૩. એવં કૃત્વા પુરીં પુણ્યાં તુલ્યરૂપાં મહીપતિઃ ।
ચકાર વાસં તત્રૈવ દેવમારાધયન્ સદા ॥

૧૦૪. સ્નાત્વા સ્નાત્વા ચ તીર્થેષુ દૃષ્ટ્વા દૃષ્ટ્વા ચ દેવતાઃ ।
ઈજે બહુવિધૈર્યજ્ઞૈઃ વિપુલૈઃ આપ્તદક્ષિણૈઃ ॥

૧૦૫. પુત્રાભ્યાં સ્થાપયામાસ શિવલિઙ્ગદ્વયં નૃપઃ ।
ધર્મસેનાભિધસ્તસ્ય પુત્રે જ્યેષ્ઠોઽતિધાર્મિકઃ ॥

૧૦૬. તત્ર દત્તં ચ તલ્લિઙ્ગંસ્થાપયામાસ શાસ્ત્રતઃ ।
વામનાશ્રમતોઽપ્યગ્રે પૂર્વભાગે વૃષાશ્રમે ॥

૧૦૭. સ્થાપિતં તુ મહાલિઙ્ગં નામ્ના શ્રીબલધીશ્વરમ્ ।

યે ચ પશ્યન્તિ તેષાં તુ મોક્ષલક્ષ્મીઃ કરસ્થિતા ॥

૧૦૮. તદ્ભ્રાત્રા બ્રહ્મદત્તેન સ્થાપિતોઽભૂત્ મહેશ્વરઃ ।
માયાલાસ્યાત્ પૂર્વભાગે તામ્રાયા ઉત્તરે તટે ॥

૧૦૯. સ્થાપિતઃ સુમહાલિઙ્ગો દર્શનાત્ ભુક્તિમુક્તિદમ્ ।
ઇત્થં સ રાજા સંસ્થાપ્ય લિઙ્ગત્રયમનુત્તમમ્ ॥

૧૧૦. બ્રાહ્મણાન્ ભોજયિત્વા ચ ધનૈઃ સન્તર્પ્ય ભૂપતિઃ ।
વિવેશ નગરીં પુણ્યાં મુહૂર્તે શુભસંયુતિ ॥

૧૧૧. વર્ધિતસ્તુ મુનીન્દ્રેણ તથાશીર્ભિર્દ્વિજોત્તમૈઃ ।
પૂર્ણકામો મહાતેજાઃ પરમાનન્દમેયિવાન્ ॥

૧૧૨. પૂજિતાઃ પુષ્કલૈઃ વિપ્રાઃ ધનૈઃ આપૃચ્છત તં નૃપમ્ ।
પ્રશંસન્તો મહાતેજાઃ જગ્મુરેવ યથાગતમ્ ॥

૧૧૩. અસ્મૈ વરાન્ વિતીર્યૈવ દેવા ઇવ પુરોગમાઃ ।
સ્વર્ગાદપિ પરાં દૃષ્ટ્વા પુરીં ભુવનભૂષણામ્ ॥

૧૧૪. સમાપૃચ્છ્ય યયુઃ સર્વે હૃષ્ટાત્માનો દિવૈકસઃ ।
ઇત્થં ગતેષુ સર્વેષુ દેવેષુ મુનિભિસ્સહ ॥

૧૧૫. રાજા પરમસંહૃષ્ટઃ તત્રૈવ વસતિં વ્યધાત્ ।
ઇત્થં જ્યોતિર્વનસ્યાસ્ય માહાત્મ્યં વિસ્મયાવહમ્ ॥

૧૧૬. કથયિત્વા મહાયોગી વિચિત્રં પરમાદ્ભુતમ્ ।
ભૂયઃ કીર્તિસુધામસ્મૈ તામ્રાયાઃ પાપનાશિનીમ્ ।
વક્તું પ્રચક્રમે શ્યામાસઙ્ગમેઽભ્યુદયોજ્જ્વલામ્ ॥

૧૧૭. ઇતિ કલિકલુષાપાહામપારામભિનવકાલકથારસાભિરામામ્ ।
શ્રુતિપદમુપલભ્ય ધૂતપાપા પરમુપયાન્તિ પરં પદં હિ લોકાઃ ॥

ઇતિ એકપઞ્ચાશોઽધ્યાયઃ ।    Pro.Total = 4709 + 117 =4826.

## દ્વિપઞ્ચાશોઽધ્યાયઃ

મન્ત્રતીર્થમહિમા ।

૧. શઙ્ખઃ –

શ્રુણુ રાજન્ પ્રવક્ષ્યામિ મન્ત્રતીર્થસ્ય વૈભવમ્ ।
શ્રવણાત્ અસ્ય વૈ મર્ત્યાઃ ન શોચન્તિ પુનર્ભવમ્ ॥

૨. યત્ર ભૈરવતી પુણ્યા ભૈરવાચલનન્દિની ।
આર્દ્રાપગેતિ વિખ્યાતા સઙ્ગતા તામ્રયા સહ ॥

૩. યત્ર ભક્તજનાપાયવ્યપોહનવિચક્ષણા ।
શિવસ્તારકવર્ણાત્મા લિઙ્ગમૂર્તિરભૂત્ યતઃ ॥

૪. તસ્ય તીર્થસ્ય માહાત્મ્યં મહાન્તં સાગરોપમમ્ ।
શ્રવણાત્ કીર્તનાત્ અસ્ય નરો મુચ્યેત બન્ધનાત્ ॥

૫. ઇતિ ગાથાં સમાકર્ણ્ય મુનિના કથિતાં શુભામ્ ।
કૌતૂહલસમાવિષ્ટો વીરસેનો મહીપતિઃ ॥

૬. પ્રણમ્ય ભૂયો યોગીન્દ્રં પપ્રચ્છ વિનયોજ્જ્વલઃ ।
ભગવન્ કા નદી પુણ્યા કથં ભૈરવીતીરિતા ॥

૭. આર્દ્રાપગાખ્યા કેનાસીત્ કેન વા ભૈરવાદ્રિજા ।
સર્વં વિસ્તાર્ય મે બ્રૂહિ સર્વજ્ઞોઽસિ મહામતે ॥

૮. ઇતિ પૃષ્ટો મહીપેન ભક્તેન પ્રણતેન સઃ ।
સ્નેહાત્ વિસ્તાર્ય તાં પુણ્યાં કથામકથયત્ મુનિઃ ॥

૯. શઙ્ખઃ –
રાજન્કથયતો મે ત્વં કામમાકર્ણયાધુના ।
કન્દર્પશિખરો નામ મહાન્ આસીત્ મહીધરઃ ॥

૧૦. યત્ર તપ્ત્વા તપસ્તીવ્રં વસિષ્ઠો ભગવાન્ મુનિઃ ।
પુત્રશોકાત્ વિમુક્તોઽભૂત્ અતો લોકે પ્રતીયતે ॥

૧૧. આયામાત્ ક્રોશમાત્રેણ દિશમૈન્દ્રીં ચ વારુણીમ્ ।
અવષ્ટભ્યોચ્છ્રિતૈઃ શૃઙ્ગૈઃ વ્યાવૃણ્વાનમિવામ્બરમ્ ॥

૧૨. નાનાતરુલતાકીર્ણં નાનાપ્રસ્રવણોજ્જ્વલમ્ ।
સમન્તાત્ યોજનાયામં વનં ચૈત્રરથોપમમ્ ॥

૧૩. તત્ર સૌમનસા નામ ઋષયઃ ચોર્ધ્વમન્થિનઃ ।
વસિષ્ઠગોત્રસમ્ભૂતા નિત્યં વ્રતપરાયણાઃ ॥

૧૪. પુત્રૈઃ પૌત્રૈઃ ચ શિષ્યૈઃ ચ સાગ્નિહોત્રાક્રિયાન્વિતાઃ ।

પરિતઃ શૈલમુખ્યસ્ય કૃત્વાશ્રમપદં મહત્ ॥

૧૫. ઊષુસ્સ્વાધ્યાયનિરતાઃ શિવધ્યાનપરાયણાઃ ।
તેષાં મધ્યે મહાતેજાઃ હિરણ્વાન્ ઇતિ વિશ્રુતઃ ॥

૧૬. તપસા વિદ્યયા બ્રહ્મજ્ઞાનેનાપ્યધિકોઽભવત્ ।
માયાવત્યા સમં ચક્રે ગાર્હસ્થ્યં ધર્મભાર્યયા ॥

૧૭. અસ્યાં પુત્રશતં પ્રાપ્ય પુત્રીમપ્ચિચ્છતામુના ।
તપસારાધ્ય દેવેશં પ્રાપ્તં પુત્રીચતુષ્ટયમ્ ॥

૧૮. કુમુદા રોહિણી ભદ્રા તુરીયાર્દ્રા સમીરિતા ।
એતા દેવાંશસમ્ભૂતા કુમાર્યા દેવવર્ચસઃ ॥

૧૯. ક્રમાત્ શૈશવભાવેન વિયુક્તા પ્રાપ્તયૌવનાઃ ।
દૃષ્ટ્વા ગુણોત્તરાઃ કન્યાઃ પિતા દૃષ્ટ્વાતિ હૃષ્ટવત્ ॥

૨૦. વરેભ્યઃ ચાનુરૂપેભ્યઃ દાતુમૈચ્છત્ મહામતિઃ ।
કુમુદામેકતાયાદાત્ દ્વિતીયાહૂય રોહિણીમ્ ॥

૨૧. તૃતીયભદ્રાં પ્રાયચ્છત્ બ્રાહ્મેણ વિધિના મુનિઃ ।
તાસામુદ્વાહસમયે સમાજે બ્રહ્મવાદિનામ્ ॥

૨૨. અભ્યાયૌ મહાતેજાઃ ભૈરવાદ્રિઃ સુહૃજ્જનૈઃ ।
તમેનમાગતં દૃષ્ટ્વા હિરણ્વાન્ પ્રીતિપૂર્વકમ્ ॥

૨૩. પ્રત્યુદ્ગમ્ય પ્રસાદ્યૈનં સમાશ્લિષ્ય મુહુર્મુહુઃ ।
સમાનીય ગૃહં પત્ન્યા સત્કારેણાર્ચિતેન તુ ॥

૨૪. આથિત્યેનાર્હયામાસ સર્વાનભ્યાગતાન્ મુનીન્ ।
અભયર્ચિતઃ તદા તેન મુનિના સુહૃદાદ્રિરાટ્ ॥

૨૫. તં પ્રસાદ્ય મુનિશ્રેષ્ઠં પ્રીત્યા વચનમબ્રવીત્ ।
અદ્રિરાજઃ –
સખે સમ્ભાવિતોઽસ્મ્યત્ર ત્વયા સ્નેહાર્દ્રચેતસા ॥

૨૬. ઇદાનીં હૃદ્ગતં તાપં તુભ્યમત્ર નિવેદિતુમ્ ।
આગતોઽહં ત્વયા બ્રહ્મન્ પૂર્યતાં મે મનોરથઃ ॥

૨૭. ભદ્રાવતીયં મે ભાર્યા ચિત્રસેનસ્યકન્યકા ।
પ્રાણૈઃ પ્રિયતરા નૂનં છાયેવ સહચારિણી ॥

૨૮. અનપત્યોઽહમસ્યાં તુ ન લબ્ધ્વા પુત્રિકામપિ ।
તસ્માત્ કુરુ કૃપાં બ્રહ્મન્ દાતુમર્હસિ પુત્રિકામ્ ॥

૨૯. એનામાર્દ્રાભિધાં કન્યાં ત્વદ્દત્તાં પ્રાપ્ય પુત્રિકામ્ ।
લબ્ધ્વા નિધિમિવાકલ્પં હૃષ્યામિ સહ ભાર્યયા ॥

૩૦. તથા પ્રસીદ મે બ્રહ્મન્ સ્મૃત્વા સૌહૃદમાવયોઃ ।
ઇતિ તદ્વચનં શ્રુત્વા હિરણ્વાન્ અભિનન્દિતઃ ।
૩૧. પ્રદાયાસ્મૈ સપત્નીકો કન્યામાર્દ્રાભિધામિમામ્ ।
ઇત્થં તાં પુત્રિકાં લબ્ધ્વા પ્રહૃષ્ટેનાન્તરાત્મના ॥

૩૨. તમાપૃચ્છ્ય મુનિઃ પ્રાયાત્ અદ્રીશઃ સ્વગૃહં પુનઃ ।
લાલયન્ પોષયન્ કન્યાં સ્નેહાત્ અઙ્કે નિધાય તામ્ ॥

૩૩. નિનાય કતિચિત્ કાલં સન્તોષાત્ નિમિષોપમમ્ ।
એવં સા વર્ધિતા પિત્રા માત્રા ચાપ્યુપલાલિતા ॥

૩૪. સખીભિસ્સહ સંયુક્તા વિજહારાદ્રિસાનુષુ ।
લીલોપકરણૈર્દિવ્યૈઃ મણિપુત્તલિકાદિભિઃ ॥

૩૫. કન્દુકૈઃ ચિત્રઝષકૈઃ શારીશુકમયૂરકૈઃ ।
રત્નકન્દકરણ્ડૈશ્ચ સ્નેહકુડ્મલમણ્ડિતૈઃ ॥

૩૬. ફલૈઃ પુષ્પૈઃ પલ્લવૈશ્ચ પરૈઃ ક્રીડાપરિચ્છદૈઃ ।
એવં સખીભિઃ સમ્ભૂય સ્વપાણિગ્રહણોત્સવમ્ ॥

૩૭. શિવેન કલ્પિતં નિત્યં માનસં કન્યકાકરોત્ ।
કલ્પયન્ત્યા શિવં ધ્યાત્વા સ્વપાણિગ્રહણક્રિયામ્ ॥

૩૮. હાયનત્રિતયં પૂર્ણમેકદિનેન તુ ।
એકદા સા તુ પૂજાન્તે માલામાદાય પાણિના ॥

૩૯. શિવં પુરસ્તાત્ ધ્યાયન્તી તત્કણ્ઠે તામકલ્પયત્ ।
એવં તયા કૃતાં પૂજામૂરીકૃત્યાનુરાગતમ્ ॥

૪૦. એવં સખીભિઃ સમ્ભૂય ક્રીડન્તી ચ પદે પદે ।
કુસુમાનિ વિચિન્વન્તી બધ્વા માલાં મહાત્મને ॥

૪૧. તાભિરારાધયામાસ દેવદેવં પિનાકિનમ્ ।

પ્રસાદ્ય દેવદેવેશં કૃત્વા ચાપિ પ્રદક્ષિણમ્ ॥

૪૨. લબ્ધ્વા વાગગ્જલારૂપૈઃ સ્તોત્રૈઃ સ્તુત્વા દિને દિને ।
કણ્ઠે વ્યાસજ્યયામાસ ધ્યાત્વા દેવસ્ય તાં સ્રજમ્ ॥

૪૩. શિવઃ પ્રત્યક્ષતાં કૃત્વા કણ્ઠે તામાદદે સ્રજમ્ ।
એવં ચ લોકાસ્સુખિનઃ માતાપિત્રોશ્ચ સમ્ભ્રમાત્ ॥

૪૪. અમ્બરાત્ અમલાકારા વાગભૂત્ અશરીરિણી ।
પુષ્પાણિ વવર્ષુઃ દેવાઃ તુષ્ટુવુર્નારદાદયઃ ॥

૪૫. કરે ગૃહીત્વા તાં કન્યાં તાવત્ અન્તર્દધે શિવઃ ।
તિરોહિતામિમાં સર્વે વિદ્યુલ્લ્આમિવામ્બરે ॥

૪૬. અપશ્યન્ત્યઃ શુચા સખ્યઃ હાહેતિ પરિચુક્રુશુઃ ।
સખ્યો વયસ્યો દુઃખાર્તાઃતદ્વિયોગાન્ધતાતુરાઃ ॥

૪૭. બભ્રમુઃ સ્રવતાસ્રાક્ષાઃ ક્વ યાતા હા સખીતિ ચ ।
તદા શૈલરાજઃ તુ દૃષ્ટ્વા વૃત્તાન્તમીદૃશમ્ ॥

૪૮. સપત્નીકઃ શુચા રાજા રુરોદોચ્ચૈર્લુઠન્ ભુવિ ।
હા વત્સે ક્વાસિ ચન્દ્રાસ્યે કેન નીતાસિ માયયા ॥

૪૯. પુત્રિ પ્રાણાધિકે બાલે કિં માં ત્યક્ત્વા તુ માતરમ્ ।
ઇતિ શોકપરિદ્યૂનં ક્રોશન્તમચલેશ્વરમ્ ॥

૫૦. દૃષ્ટ્વા દયાલુર્ભગવાન્ વામદેવો મહામુનિઃ ।
આગત્ય હેતુભિર્વાક્યૈઃ સાન્ત્વયિત્વા તુ દમ્પતી ॥

૫૧. ઉવાચ વચનં ધીમાન્ તયોઃ પ્રિયચિકીર્ષયા ।
માસ્તુ શોકેન શૈલેન્દ્ર મોહેનાલમિહેદૃશા ॥

૫૨. કુરુ ધૈર્યં મનસ્યાગ્ર્યં બુદ્ધિં વેશય સત્પતે ।
વક્ષ્યામ્યુપાયં તે પુત્ર્યા પુનર્દર્શનદાયકમ્ ॥

૫૩. સા સાક્ષાત્ જગન્માતા ગૌરી શૈલેન્દ્રકન્યકા ।
હિરણ્વતા મુનીન્દ્રેણ પ્રાર્થિતા પૂજિતા ભૃશમ્ ॥

૫૪. ભક્તાનુકમ્પિની તસ્ય પુત્રી જાતા મહાત્મનઃ ।
ત્વયા ચિરતરં કાલં તપસા તોષિતા પુનઃ ॥

૫૫. કૃપાવિધાયિની તુભ્યં પુત્રીભૂતા દયાવતી ।
દેવદેવસ્ય વામાઙ્ગે સંપ્રાપ્તૈષા ત્રિશૂલિનઃ ॥

૫૬. યદિ ભૂયો મનીષા તે તદ્દર્શનસમુત્સુકા ।
યત્નં કુરુ યથાન્યાયં મયાદિષ્ટેન વર્ત્મના ॥ ૫૭

૫૭. ગત્વા મલયજાં પુણ્યાં તત્તીર્થેઽવાપ્તમજ્જનાત્ ।
સમારાધય દેવેશં ભવનીસહિતં શિવમ્ ॥

૫૮. ઇતિ તસ્મૈ મહામન્ત્રમુપદિશ્ય યથાવિધિ ।
તેન સાર્ધમનુપ્રાપ્ય માલેયીં તીર્થદેવતામ્ ॥

૫૯. વિધિના સ્નાપયામાસ શૈલરાજં ચ તત્પ્રિયામ્ ।
માલેયિ માતઃ પાપઘ્નિ ભક્તાભીષ્ટપ્રદાયિનિ ॥

૬૦. પ્રસીદ તીર્થે સ્નાસ્યેઽહં પૂરયાસ્મન્મનોરથમ્ ।
ઇતિ તાં તીર્થજનનીં પ્રાર્થયિત્વા પ્રસાદ્ય સઃ ॥

૬૧. નદ્યાઃ તૂદક્તરે કૂલે જ્યોતિશ્ચક્રસ્ય પૂર્વતઃ ।
કન્દર્પશિખરાત્ શૈલાત્ ઉદીચ્યાં ક્રોશમાત્રતઃ ॥

૬૨. કૃત્વાશ્રમપદં રાજા ભૂધરાણાં યતેન્દ્રિયઃ ।
મુનિનાદિષ્ટમાર્ગેણ સામ્બમીશં સમર્હયન્ ॥

૬૩. તુષ્ટાવ નિત્યં પૂજાન્તે સ્તોત્રૈઃ શ્રુત્યન્તચોદિતૈઃ ।
ઇત્થમર્ચયતઃ તસ્ય વિધિના નિયતાત્મનઃ ॥

૬૪. અપૂર્ણેઽબ્દા હાયનોઽભૂત્ એકેન પૃથિવીપતે ।
અપરેદ્યુઃ કૃતસ્નાનો વામદેવેન ચોદિતઃ ॥

૬૫. મનસા પૂજયામાસ ષોડશૈઃ ઉપચારકૈઃ ।
ભાવનાસાધિતૈઃ દ્રવ્યૈઃ મન્ત્રેણ પ્રણવાત્મના ॥

૬૬. તેન પૂજાવિધાનેન તોષિતઃ પરમેશ્વરઃ ।
પ્રાદુરાસીત્ લિઙ્ગરૂપી સાક્ષાત્ જ્યોતિર્મયઃ પ્રભુઃ ॥

૬૭. તં દૃષ્ટ્વા વિસ્મયાવિષ્ટો હૃષ્ટરોમા ધરાધરઃ ।
સમુત્થાયાસનાત્ તૂર્ણં બદ્ધાઞ્જલિપુટોજ્જ્વલઃ ॥

૬૮. અસ્તૌષીત્ અગ્રતો દેવં સામ્બમભ્યુદયાત્મકમ્ ।
નમશ્શિવાય દેવાય સર્વાતીતાય વેધસે ॥

૬૯. ગુણત્વાકૃતિ માનાય ગુણાકારાય હેતવે ।
મન્ત્રતન્ત્રસ્વરૂપાય પઞ્ચતન્માત્રસાક્ષિણે ॥

૭૦. અપઞ્ચીકૃતભૂતાય પઞ્ચભૂતાત્મને નમઃ ।
તીર્થમૂર્ત્યા જગત્સર્વં પાપાત્ ત્રાતાત્મસેવિનામ્ ॥

૭૧. યોઽસૌ સીદન્તમશુચૌ માં પાલયતુ ભૂતભૃત્ ।
ગઙ્ગાધરઃ શશિધરો ભવો ભીમો ભવાન્તકઃ ॥

૭૨. અન્તકસ્યાન્તસ્સોઽયં અવતાત્ અંહસો વિભુઃ ।
યમેનમકૃતાકારમેકદ્વિત્રિભેદતઃ ॥

૭૩. એકમેવ પરં પ્રાહુઃ તસ્મૈ સોમાય તે નમઃ ।
સર્વેષામેવ જન્તૂનામન્તર્જીવકલાત્મકમ્ ॥

૭૪. પ્રવૃત્તિશ્ચોપલબ્ધિશ્ચ કથિતઃ તમુપાસ્મહે ।
નાદબિન્દુકલાભેદૈઃ ક્ષરાક્ષરવિકલ્પનૈઃ ॥

૭૫. સ્તૂયતે નિગમૈર્યોઽસૌ સદા ભવતુ મે ગતિઃ ।
યદેકદેશાત્ અર્કાદ્યાઃ દ્યોતન્તે હિ નભસ્થલે ॥

૭૬. યદાજ્ઞયા બ્રહ્મમુખાઃ તસ્મૈ બ્રહ્માત્મને નમઃ ।
કેચિત્ તરન્તિ વૈ મૃત્યું કેચિત્ અંહો દુરત્યયમ્ ॥

૭૭. કેચિત્ તરન્તિ દારિદ્ર્યં નમસ્તસ્મૈ દયાત્મને ।
અષ્ટમૂર્તિરનેકાત્મા નિગમાન્તઃ પ્રદર્શિતઃ ॥

૭૮. સર્વાત્મા શઙ્કરઃ સાક્ષી ક્ષેમાય પુરતોઽસ્તુ મે ।
ત્વાં દેવદેવં પુરુષં સદ્યોજાતમનામયમ્ ॥

૭૯. ક્ષેમઙ્કરં વામદેવમઘોરં પ્રણતોઽસ્મ્યહમ્ ।
ઈશાનઃ શાશ્વતઃ સાક્ષી સોઽયં તત્પુરુષો વિભુઃ ॥

૮૦. સ મેઽસૌ ભાગ્યદાતાસ્તુ પુરતઃ પૂર્વપૂજિતઃ ।
નમો નમશ્શાશ્વતશાન્તિકરિન્ શમાંવતાં ભૂરિકરપ્રિયાકરઃ ॥

૮૧. સ નઃ સમસ્તાભ્યુદયૈકહેતુકો ભવેદ્ભયાનામુપશાન્તિકૃત્ વિભુઃ ।
ઋષિઃ –
ઇતિ સ્તવેન પુણ્યેન ભક્ત્યા ચાભિષ્ટુતાઽમુના ॥

૮૨. દયાનિધિઃ પ્રાદુરભૂત્ ગૌરીનાથઃ ત્રિલોચનઃ ।

કોટિકન્દર્પલાવણ્યસંસૃષ્ટો યૌવનશ્રિયા ॥

૮૩. કર્પૂરપાણ્ડુરશ્રીમાન્ નીલકણ્ઠો જડાધરઃ ।
વામાનુષક્તયા ગૌર્યા સમાશ્લિષ્ટોત્પલશ્રિયા ॥

૮૪. આરુહ્ય વૃષભશ્રેષ્ઠમાદિસિદ્ધૈર્નિષેવિતઃ ।
આહૂય શૈલરાજાનં વ્યાજહાર મહેશ્વરઃ ॥

૮૫. શિવઃ –
પ્રીતોઽસ્મિ તવ શૈલેન્દ્ર સ્તોત્રૈરેભિસ્સપર્યયા ।
વરાન્ વૃણીષ્વ ભદ્રં તે દાસ્યામિ ચ મનોરથાન્ ॥

૮૬. શિવવામાઙ્ગગાં બાલાં સ્વપુત્રીં ચારુદર્શનામ્ ।
આનન્દાશ્રુપરીતાભ્યાં લોચનાભ્યાં વિલોકયન્ ॥

૮૭. મન્દં મન્દમુવાચેદં સ્નેહસાધ્વસવિહ્વલઃ ।
શૈલરાજઃ –
યદ્યહં વરયોગ્યોઽસ્મિ વરદૌ મે યુવાં યદિ ॥

૮૮. વધૂવરૌ ભવન્તૌ મે ગૃહે નિત્યનિવાસિનૌ ।
આકલ્પમસ્મદ્રક્ષાર્થં ભવતાં ભદ્રદાયિનૌ ॥

૮૯. એષ એવ વરઃ શ્લાઘ્યઃ નાન્યત્ કાઙ્ક્ષે કદાચન ।
એવં જામાતરં ત્વાં ભો પુત્રીમેનાં ચ દારિકામ્ ॥

૯૦. નિત્યમસ્મત્સ્નેહસ્નિગ્ધૌ પશ્યામ્યાકલ્પમઞ્જસા ।
પ્રસીદ દેવદેવેશ પ્રસાદં કર્તુમર્હસિ ॥

૯૧. ઇત્થં સંપ્રાર્થિતાં શ્રુત્વા ધરાધીશસ્ય શઙ્કરઃ ।
ભૂયસ્તમાહ સુપ્રીતઃ સાનુરાગોઽક્ષિરોચિષા ॥

૯૨. અહં ત્વદ્ભવને નિત્યમનયા સહ સંવસન્ ।
તવ શ્રેયો વિધાસ્યામિ ભૂમ્યાં જીમૂતતાટ્ ઇવ ॥

૯૩. તવેયં પુત્રિકા તન્વી ગઙ્ગેવાઘૌઘનાશિની ।
મહાપ્રવાહરૂપેણ સઙ્ગમીયાત્ તુ તામ્રયા ॥

૯૪. ભૈરવાચલપુત્રીયં લોકે વિખ્યાતિમેષ્યતિ ।
શ્યામવર્ણતયા શ્યામાનદીતિ ખ્યાતિમૃચ્છતુ ॥

૯૫. હિરણ્વતઃ કુમારીયં નામ્ના હૈરણ્વતીતિ ચ ।

આર્દ્રાયામેવ સઞ્જાતા તસ્માત્ આર્દ્રાપગેતિ ચ ॥

૯૬. રુદ્રાણીતિ ચ સિદ્ધેયં રુદ્રપત્ની યતોઽભવત્ ।
એવમેભિઃ પુણ્યગન્ધૈઃ નામભિઃ લોકપૂજિતૈઃ ॥

૯૭. સ્તુતેયં પ્રાણિભિર્નિત્યં ભૂયાત્ પાપપ્રણાશિની ।
યત્ ત્વદર્થે મહાલિઙ્ગરૂપી વિશ્વાક્ષિગોચરઃ ॥

૯૮. તસ્મિન્ કરિષ્યે સતતં સાન્નિધ્યમનયા સમમ્ ।
તત્ર સ્થિતાનાં જન્તૂનામન્તે તારકદેશિકઃ ॥

૯૯. સર્વાન્ કામાન્ પ્રદાસ્યામિ સાન્નિધ્યં તવ મે ચિરમ્ ।
યે મજ્જન્તિ મહાતીર્થે તામ્રાશ્યામાનદીયુગે ॥

૧૦૦. નિર્મુક્તપાપાઃ તે સદ્યઃ ભવન્તુ સુખિનો જનાઃ ।
ઇત્યુક્ત્વાન્તર્હિતે દેવે શૈલરાજઃ સહાનુગઃ ॥

૧૦૧. સાન્તઃપુરઃ ક્ષણં તસ્થૌ વિસ્મયેનાન્તરાત્મના ।
તાવદ્ભૈરવશૈલેન્દ્રમહાનિર્ઝરરૂપિણી ॥

૧૦૨. તટારામાદ્વિનિષ્ક્રમ્ય તામ્રામાપ મહાનદીમ્ ।
તરઙ્ગિણી શૈવલિની મહાપૂરપ્રવાહિની ॥

૧૦૩. મત્સ્યકચ્છપસમ્પાતા ફેનાવર્તશતોજ્જ્વલા ।
પાપઘ્ની તાપશમની મજ્જતાં ભાગ્યદાયિની ॥

૧૦૪. આયોજનં પૂર્વમુખી તતોઽપ્યુત્તરવાહિની ।
તામ્રામાપૂરયામાસ ગઙ્ગામિવ કલિન્દજા ॥

૧૦૫. તતો દેવા બ્રહ્મમુખા નારદાદ્યાઃ સુરર્ષયઃ ।
વિસ્મિતાઃ તે સમાગત્ય સિદ્ધૈશ્ચ પરમર્ષયઃ ॥

૧૦૬. સ્નાત્વા વિધિવત્ અભ્યર્ચ્ય તામ્રાશ્યામાસમાગમે ।
મન્ત્રતીર્થમિતિ સ્તુત્વા પ્રયાગસદૃશં વિદુઃ ॥

૧૦૭. પ્રણવેશં તતો દૃષ્ટ્વા પ્રસાદ્ય ગિરિજાસખમ્ ।
તત્પ્રસાદં સમાસાદ્ય કૃતકૃત્યાઃ સુરાસુરાઃ ॥

૧૦૮. પ્રશંસન્તઃ સ્તુવન્તશ્ચ સ્વાનિ સ્વાનિ પદાન્યગુઃ ।
શઙ્ખઃ –
રાજન્ અદ્યાપિ ગૌરીશો ભૈરવાચલપત્તને ॥

૧૦૯. શ્વશુરસ્ય ગૃહે પ્રીત્યા ભૈરવત્યા સમન્વિતઃ ।
પૂજિતઃ તેન સાન્નિધ્યં કુરુતે ભક્તવત્સલઃ ॥

૧૧૦. આપાતાલં રૂઢમૂલઃ તેજોરૂપી સદાશિવઃ ।
નિત્યં કરોતિ સાન્નિધ્યં પ્રણવેશ ઇતીરિતઃ ॥

૧૧૧. તસ્માદસ્મિન્ મન્ત્રતીર્થે સ્નાત્વા યે વિધિપૂર્વકમ્ ।
પશ્યન્તિ પ્રણવેશાનં તે યાન્તિ પરાં ગતિમ્ ॥

૧૧૨. ઇત્થં તે કથિતં રાજન્ શ્યામાનદ્યાઃ સમુદ્ભવમ્ ।
તીર્થમાહાત્મ્યમપ્યુક્તં મહિમા પરમેશિતુઃ ॥

૧૧૩. અતઃ પરં મહારાજ વહ્નિતીર્થચતુષ્ટયમ્ ।
સૈષા દર્શનમાત્રેણ ભવતાપપ્રભઞ્જની ॥

૧૧૪. હત્વા પાણ્ડ્યઃ પુરા વિપ્રં પૂજારક્ષણહેતવે ।
અવાપ્તહત્યાસન્તાપઃ કુમ્ભયોનેરનુગ્રહાત્ ॥

૧૧૫. નિર્મુક્તપાપઃ સ્નાનેન સુખમાપ મહીપતિઃ ।
ઇત્થં મુનેરભિનવાં કલિકલ્મષઘ્નીં
કીર્તિચ્છટામિવગતાં મલયસ્ય પુત્ર્યાઃ ।
આકર્ણ્ય ભૂતલશતક્રતુરાપ હર્ષં
ચાન્દ્રીં સુધામિવ ચકોર પતઙ્ગરાજઃ ॥

ઇતિ દ્વિપઞ્ચાશઃ અધ્યાયઃ । Pro.Total = 4826 + 115 =4941.

## ત્રિપઞ્ચાશઃ અધ્યાયઃ

વહ્નિ(અગ્નિ)તીર્થપ્રસ્તાવઃ ।

૧. અથાકર્ણ્ય સુધાધારાં કથામેનૌઘઘાતિનીમ્ ।
હૃષ્ટઃ શ્રુતિમુખાત્ રાજા પીતોઽતીવ પ્રસન્નધીઃ ॥

૨. ભૂયઃ શુશ્રૂષયા ચિત્તમુલ્લાસ્યાનન્દમન્દિરે ।
પપ્રચ્છ મુનિશાર્દૂલં પયઃપાતુમિવ પ્રસૂમ્ ॥

૩. રાજા –
ભગવન્ કો મહીપાલઃ પાણ્ડ્યો હત્યામવાપ્તવાન્ ।

કથં તીર્થાવગાહેન શુદ્ધિમાપ ગુરોર્ગિરા ॥

૪. ઇતિ સંપ્રાર્થિતો યોગી પ્રસન્નાત્મા મહીભુજે ।
કથામાવેદયામાસ પુણ્યામિવ તરઙ્ગિણીમ્ ॥

૫. રાજન્ મુનિવરાદિષ્ટમિતિહાસં પુરાતનમ્ ।
શ્રવણાત્ યસ્ય મુચ્યન્તે જન્તવઃ પાપબન્ધનાત્ ॥

૬. પુરા પુરઞ્જયો નામ રાજા પાણ્ડ્યકુલોદ્ભવઃ ।
ધર્મજ્ઞઃ સત્યસન્ધશ્ચ વદાન્યઃ શૂરસમ્મતઃ ॥

૭. ધર્મેણ પાલયામાસ મહીં નિષ્કણ્ટકામિમામ્ ।
તસ્ય પુત્રો મહાતેજાઃ ધર્મકેતુરિતિશ્રુતઃ ॥

૮. જાતઃ તસ્માત્ કલાવત્યાં સોઽયં પિતૃસમોઽભવત્ ।
યાજ્ઞવલ્ક્યઃ પુરોધાભૂત્ તપસ્વી તસ્ય ભૂપતેઃ ॥

૯. એવં સંવર્ધિતાશેષસભાગ્યોદયસાધનઃ ।
સભાયામાસ્થિતો રાજા મન્ત્રિસામન્તસેવિતઃ ॥

૧૦. નિનાય સમયં સદ્ભિઃ ધર્મજ્ઞૈઃ ચ સુહૃત્તમૈઃ ।
એતસ્મિન્નન્તરે તત્ર જના નાગરિકા નૃપમ્ ॥

૧૧. એત્ય વિજ્ઞાપયામાસુઃ સર્વેષાં હિતકામ્યયા ।
પ્રજા ઊચુઃ –
જય જીવ મહારાજ પ્રસીદ કરુણાનિધે ॥

૧૨. ત્રાતારં ત્વાં સમાસાદ્ય જીવામઃ સુખિનો વયમ્ ।
અદ્ય વો મૃગયાભાવાત્ મૃગાઃ સિંહાદયો વને ॥

૧૩. નાશયિષ્યન્તિ સસ્યાનિ યક્ષ્મેવ તનુસૌષ્ઠવમ્ ।
તાસ્માત્ આખેટકરણૈઃ હત્વા દુષ્ટમૃગાન્ વને ॥

૧૪. ત્રાતુમર્હસિ ધર્મજ્ઞ ન કાર્યં ભો વિલમ્બનમ્ ।
ઇત્થં સંપ્રાર્થિતો રાજા જનૈઃ તદ્દીનમાનસૈઃ ॥

૧૫. હયરત્નં સમારુહ્ય ભટૈઃ તદ્ધીર્મવેદિભિઃ ।
સહિતો નગરાત્ તૂર્ણં નિર્યયૌ ચિત્રકાર્મુખઃ ॥

૧૬. તદ્રક્ષણાર્થં સ્નેહેન યાજ્ઞવલ્ક્યઃ પુરોહિતઃ ।
જગામ વિપિનં ઘોરં નાનાદ્વિજગણાયુતમ્ ॥

૧૭. હત્વા દુષ્ટમૃગાન્ ભૂરિ વનં નિષ્કણ્ટકમવર્તયત્ ।
મધ્યં પ્રાપ્તે દિનકરે પરિશ્રાન્તા ક્ષુધાતુરાઃ ॥

૧૮. કસ્મિંશ્ચિત્ વિપુલે પુણ્યે કાસારે સાગરોપમે ।
સ્નાત્વા પીતોદકાઃ તીરે નિવિષ્ટા શ્રમશાન્તયે ॥

૧૯. પુરોધસા સમં રાજા સ્નાત્વા માધ્યાહ્નિકાં ક્રિયામ્ ।
કૃત્વા તં રુચિરસ્નિગ્ધમૂષતુઃ પરવેશ્મનિ ॥

૨૦. તાવતાદદૃશતુઃ દૂરે વિચરન્ત્યૌ મનોહરે ।
યુવત્યૌ તુલ્યસૌભાગ્યે વિદ્યુચ્ચલિતવર્ચસૌ ॥

૨૧. ક્ષાણાત્ અન્તિકમાગત્ય તાવત્ રાજપુરોધસોઃ ।
તયોઃ ચિક્ષિપતુઃ સ્કન્ધે ચામ્લાને પુષ્કરસ્રજૌ ॥

૨૨. તે ચ દૃષ્ટ્વા વરારોહે રાજા પરપુરઞ્જયઃ ।
તદ્દત્તમુદ્વહન્ માલાં કન્યકે વ્યાજહાર સઃ ॥

૨૩. રાજા –
કે યુવાં કસ્ય પુત્ર્યૌ કિં વનં પ્રાપ્તે સુદુર્ગમે ।
અનપેક્ષાવિહ નરાવાવાં કાન્તારસમન્વિતૌ ॥

૨૪. વક્તુમર્હસ્યતોઽભીષ્ટં સર્વં વક્તવ્યમિત્યશાત્ ।
તયોરેકતરા કન્યા સ્મયમાનં મહીપતિમ્ ॥

૨૫. આશાં જનયતી કામં વ્યાજહાર મનોહરમ્ ।
આવાં વિશ્રવસઃ પુત્ર્યૌ પિત્રાદિષ્ટેન વર્ત્મના ॥

૨૬. અર્ચયન્તૌ મહેશાનં મહેશાનીસમન્વિતમ્ ।
નયાવઃ કાલમેતાવત્ કાઙ્ક્ષન્ત્યાવુચિતં પતિમ્ ॥

૨૭. આવયોર્જનની નાસ્તિ(શાસ્તિ) વિશાલા ધર્મચારિણી ।
જ્યેષ્ઠાહમનુજા મહ્યં નામ્ના વિશારદા ॥

૨૮. ઇમાં બિન્દુમતીં પ્રાહુઃ સર્વલક્ષણશાલિનીમ્ ।
દૈવાત્ ઇહાગતૌ યોગ્યૌભર્તારાવાવયોર્યુવામ્ ॥

૨૯. ઉપેક્ષ્યેતે ભવન્તૌ યત્પ્રાણાન્ ત્યક્ષ્યાવહે ધ્રુવમ્ ।
ઇતિ તાભ્યાં વૃતાવેતૌ યુક્તૌ રાજપુરોહિતૌ ॥

૩૦. વિચાર્ય ધર્મસૂક્ષ્મં તુ તથાસ્ત્વિત્યૂચતુર્મુદા ।
ઉવાહ વિધિના રાજા કન્યકાં તાં વિશારદામ્ ॥

૩૧. યાજ્ઞવલ્ક્યો બિન્દુમતીં પાણિં જગ્રાહ પાણિના ।
કૃતોદ્વાહૌ તાવેતૌ પ્રીતૌ રાજપુરોહિતૌ ॥

૩૨. સસ્ત્રીકૌ રથમારુહ્ય જગ્મતુઃ સ્વાં પુરીં શુભામ્ ।
નૃપઃ સ્વગૃહમાસાદ્ય દ્વિતીયાં તાં વિશારદામ્ ॥

૩૩. મહિષ્યા સ્તબકાવત્યા ચકાર સદૃશોદયામ્ ।
સોઽપિ બિન્દુમતીં પ્રાપ્ય યાજ્ઞવલ્ક્યઃ પ્રસન્નધીઃ ॥

૩૪. ચક્રે ગાર્હસ્થ્યધર્મસ્ય દ્વિતીયાં ધર્મચારિણીમ્ ।
એવં બહુતિથે કાલે રાજપત્ની વિશારદા ॥

૩૫. સમયે સુષુવે વીરં પુરુધામાનમાત્મજમ્ ।
બિન્દુમત્યામભૂત્ પુત્રઃ શ્રુતકીર્તિરિતિ વિશ્રુતઃ ॥

૩૬. તાવેતૌ પોષિતૌ કાલે વર્ધિતૌ ગતશૈશવૌ ।
અધીતવેદવેદાઙ્ગૌ શસ્ત્રાસ્ત્રેષ્વભિશિક્ષિતૌ ॥

૩૭. પિત્રોઃ પ્રીતિં કુર્વાણૌ સમ્મતૌ ચ બભૂવતુઃ ।
નિત્યમેતૌ નિશાકાલે ગૃહાત્ નિષ્ક્રમ્ય માયયા ॥

૩૮. પરીત્ય નગરીં સર્વાં તથા જનપદાનપિ ।
અપરૈરપરિજ્ઞાતં હત્વા બાલાન્ તતસ્તતઃ ॥

૩૯. તન્માંસૈર્વિહિતારૌ દત્વા માત્રે ચ તાવુભૌ ।
નિન્યતુઃ સમયં મૂર્ખૌ વિચરન્તૌ હિ ચોરવત્ ॥

૪૦. ક્રમાત્ વૃત્તાન્તમખિલં પ્રથિતં હિ શનૈઃ શનૈઃ ।
કર્ણાકર્ણિજનાસ્સર્વે જજલ્પુઃ સર્વતો મિથઃ ॥

૪૧. હતઃ કુમારો બાલો મે સ્વસ્રીયો નિહતો મમ ।
પૌત્રો હતઃ કુતઃ કન્યા જામાતા નિહતો મમ ॥

૪૨. ઇત્થમન્વેષમાણાઃ તે શોચન્તઃ પ્રાણિનો ભૃશમ્ ।
ન પશ્યન્તો ગતિં ભૂયઃ ચુક્રુશુઃ સર્વતો મિથઃ ॥

૪૩. મણલૂરુપુરે શ્રુત્વા રાજા ચારમુખાત્ સુધીઃ ।
પુરોહિતં સમાહૂય મન્ત્રયામાસ મન્ત્રિભિઃ ॥

૪૪. તત્ર વૈતાનિકો નામ ત્રિકાલજ્ઞો મહામુનિઃ ।
રાજ્ઞે વિજ્ઞાપયામાસ પ્રજાનાં વિપ્લવં મહત્ ॥

૪૫. રાજન્ દ્વિતીયા મહિષી માયાચ્છન્ના તુ રાક્ષસી ।
યાજ્ઞવલ્ક્યસ્ય ભાર્યાપિ તથૈવેહ ન સંશયઃ ॥

૪૬. કણ્ઠાસક્તામિમાં ભાર્યાં વ્યાલીમિવ વિષોલ્બણામ્ ।
ઉત્સાર્ય પુરાત્ શીઘ્રં યદિ જીવિતુમિચ્છસિ ॥

૪૭. હતાનામિહ બાલાનાં પુરે જનપદે વિભો ।
સહસ્રાત્ અધિકં મન્યે નાત્ર કાર્યા વિચારણા ॥

૪૮. ઇતિ તસ્ય મુનેર્વાક્યં શ્રુત્વા પાણ્ડ્યમહીપતિઃ ।
વિશારદાં સ્વમહિષીં સહ પુત્રાં સહાનુજામ્ ॥

૪૯. રથમારોપ્ય વૈ તૂર્ણં નિનાય વિપિનાન્તરમ્ ।
તાવત્ વિશારદા પુત્રઃ પુરુધામા વને સ્થિતઃ ॥

૫૦. ભ્રાત્રા સઞ્ચિન્તયામાસ સહિતઃ શ્રુતકીર્તિના ।
રાજ્યાદ્ભ્રષ્ટઃ સુખાદ્ભ્રષ્ટઃ કથં જીવિતુમુત્સહે ॥

૫૧. યેન કેનાપ્યુપાયેન પ્રાપ્યં રાજ્યાર્ધમોજસા ।
પરં યત્નં કરિષ્યામિ માભૂત્ કાલવિલમ્બનમ્ ॥

૫૨. ઇતિ નિશ્ચિત્ય મનસા પુરુધામા નૃપાત્મજઃ ।
યાજ્ઞવલ્ક્યસુતશ્ચાપિ વિનિદ્રૌ ધ્યાનતત્પરૌ ॥

૫૩. યાજ્ઞવલ્ક્યોપદેશેન તાવારાધયતાં વિધિમ્ ।
ઇત્થમબ્દત્રયે પૂર્ણે સુપ્રીતો ભગવાન્ વિધિઃ ॥

૫૪. વરેણ છન્દયમાસ તાવેતૌ તપસિ સ્થિતૌ ।
વવ્રાતે વિધિમાલોક્ય પ્રયતૌ કાઙ્ક્ષિતં વરમ્ ॥

૫૫. યદિ પ્રીતોઽસિ ભગવન્ યદિ દેયો વરો મમ ।
અર્ધં મે પાણ્ડ્યરાજ્યસ્ય દેહિ રાજસુતોઽસ્મિ યત્ ॥

૫૬. બ્રહ્મા –
અબ્રહ્મણ્યૈઃ અજય્યસ્ત્વં રાજ્યાર્ધં પ્રાપ્ય દુર્લભમ્ ।
પુરોધસા મન્ત્રવિદા સહિતઃ શ્રુતકીર્તિના ॥

૫૭. ઇતિ માયાશતં તસ્મૈ દત્વા કમલભૂર્વિભુઃ ।
શ્રુતકીર્તિમતઃ પ્રાહ બ્રાહ્મણં બહુમાન્ય તમ્ ॥

૫૮. તપસા તે પ્રસન્નોઽસ્મિ યાજ્ઞવલ્ક્યસુતો યતઃ ।
પુરોધા ભવિતા તસ્ય પુરુધામ્નઃ તુ ભૂપતેઃ ॥

૫૯. વરમેનં વિતીર્યાસ્મૈ દત્વા માયાશતં પુરઃ ।
તત્રૈવાન્તરધાત્ વેધા તૌ ચ પ્રીતૌ બભૂવતુઃ ॥

૬૦. મયેન નિર્મિતાયાં વૈ પુર્યાં મલયભૂધરે ।
ઉવાસ તસ્યાં સુપ્રીતઃ તેન સાકં પુરોધસા ॥

૬૧. તમેનં બાન્ધવાઃ ભૂપમુપતસ્થુઃ નિશાચરાઃ ।
તૈરેતૈઃ ઘોરસઙ્કાશૈઃ નાનાપ્રહરણાન્વિતૈઃ ॥

૬૨. ગજવાજિરથોપેતૈઃ માયાગીતવિશારદૈઃ ।
સેવિતો મન્ત્રિભિર્વિજ્ઞૈઃ કાર્યાકાર્યવિચારણૈઃ ॥

૬૩. એવં બલી બલોપેતો બાધયામાસ વૈ પ્રજાઃ ।
ભક્ષિતાઃ ચ હતાઃ ચાન્યે જનાઃ ભયનિપીડિતાઃ ॥

૬૪. રાજાનં ચ પ્રજા પ્રાપ્ય ત્રાહિ ત્રાહીતિ ચુક્રુશુઃ ।
રાજા પુરઞ્જયઃ શ્રીમાન્  સાન્ત્વયિત્વા તદા જનમ્ ॥

૬૫. રથમારુહ્ય વેગેન સવિનીતહયં મહત્ ।
ચાપબાણધરઃ ખડ્ગી મહાકવચસંવૃતઃ ॥

૬૬. સૈન્યેન મહતા સાર્ધં સઙ્ગ્રામાય સમાહ્વયત્ ।
તદા તે રાક્ષસાઃ દૃષ્ટ્વા સમાયાન્તીમનાકિનીમ્ ॥

૬૭. પિતુઃ પુત્રસ્ય વૈ જન્યમદ્ભુતં સમજાયત ।
પુરઞ્જયો દયાવિષ્ટો મૃદુયુદ્ધો નિશાચરે ॥

૬૮. તમેનં વિરથં કૃત્વા ત્યક્તચાપશરં શરૈઃ ।
તત્સૈન્યં નાશયામાસ શતશોઽથ સહસ્રશઃ ॥

૬૯. ભગ્નાયુધં ભગ્નરથં ભગ્નકુઞ્જરવાજિમત્ ।
પલાયિતે હતે સૈન્યે ક્રોશમાનેઽપ્યનાથિવત્ ॥

૭૦. પુરુધામા સહ ભ્રાત્રા માયામાસ્થાય દુસ્સહામ્ ।
રાજાનં મોહયામાસ મહાપ્રલયકર્મકૃત્ ॥

૭૧. આયોધનમભૂત્ ઘોરં વિષ્વગગ્જનસન્નિભમ્ ।
અજાનન્તો નિજાસ્સર્વા બભ્રમુશ્ચ પદાતયઃ ॥

૭૨. મોહમાપ તદા રાજા નિદ્રાપરવશો યથા ।
અદૃશ્યમનૌ તૌ તત્ર હત્વા રાજાનમોજસા ॥

૭૩. નિહત્ય યાજ્ઞવલ્ક્યં ચ ક્ષણાત્ અન્તરધીયત ।
હતે તસ્મિન્ મહારાજે હતે તસ્મિન્ પુરોહિતે ॥

૭૪. રાક્ષસે સ્વપુરં યાતે હતશેષાઃ તુ સૈનિકાઃ ।
પુરં પ્રવિવિશુઃ સર્વે ભગ્નવર્માયુધધ્વજાઃ ॥

૭૫. સમેત્ય મન્ત્રિણઃ તસ્ય સેનાધ્યક્ષાઃ ચ ભૂપતેઃ ।
ઇતઃ પરં નઃ કિં કૃત્યં ક્ષેમયુક્તમતઃ પરમ્ ॥

૭૬. પ્રજાઃ સમસ્તાઃ યેનેહ કર્મણા સુખમાપ્નુયુઃ ।
એવં ચિન્તયમાનેષુ ભયાવિષ્ટેષુ મન્ત્રિષુ ॥

૭૭. ચમસો નામ મેધાવી યાજ્ઞવલ્ક્યમુનેઃ સુતઃ ।
તાનુવાચ મહાયોગી સમાગત્ય ગભીરવત્ ॥

૭૮. રોષાત્પિતૃવધામર્ષી કર્તુમિચ્છુરરાક્ષસમ્ ।
ચમસઃ –
ભો ભો બલાધિકાઃ શૂરાઃ મન્ત્રિણો બુદ્ધિસત્તમાઃ ॥

૭૯. પરાક્રમસ્ય સમયે પ્રાપ્તે શૂરજનેપ્સિતે ।
કિમિયં જન્તુતા ભીરુ જનાલમ્બાતિકુત્સિતા ॥

૮૦. અહમેતૌ હનિષ્યામિ નિશાચરકુલાધમૌ ।
રાજાનમભિષેચ્યામિ હરિકેતુમિમં ધ્રુવમ્ ॥

૮૧. માસ્તુ વો ભયમત્રેતિ તાનાહાસૌ સભાસદઃ ।
રાક્ષસા નિહતં સઙ્ખ્યે પિતરં ચ નરાધિપમ્ ॥

૮૨. આનયિત્વા ભૃત્યજનૈસ્તૈલદ્રોણ્યાં નિધાય તુ ।
આપ્તૈઃસંરક્ષયામાસ યથા ન સ્યાત્વિશીરિતમ્ ॥

૮૩. પુરસ્યસ્યાપિ રક્ષાર્થં ભટાનાદિશ્ય સર્વતઃ ।
હરિકેતુમમું સ્નેહાત્ કરેણાલમ્બ્ય સાન્ત્વયન્ ॥

૮૪. એકાન્તે રાજભવને સ્થિત્વા જનવિવર્જિતે ।
ચમસો રાજપુત્રશ્ચ પૂજયામાસતુર્મુદા ॥

૮૫. એકીકૃત્ય મનોબુદ્ધિં તસ્મિન્કારુણિકે શિવે ।
નિરાહારૌ યતાત્માનૌ વિનિદ્રૌ કૢપ્તનિશ્ચયૌ ॥

૮૬. જપતુઃ પરમં મન્ત્રં શિવપ્રીતિકરં ક્ષણાત્ ।
એવં ત્રિરાત્રે નિર્યાતે શિવઃ કારુણિકો વિભુઃ ॥

૮૭. પ્રાદુરાસીત્ તયોરગ્રે વરદાનાય કેવલમ્ ।
યુગપત્સાન્ત્વયન્ વાચા વ્યાજહાર મહેશ્વરઃ ॥

૮૮. શ્રી શિવઃ –
પૂજિતોઽહમિહેદાનીં ભક્તિપ્રવણયા ધિયા ।
વરાન્ દાતુમિહેચ્છામિ વૃણુતં હિ મનીષિતમ્ ॥

૮૯. ઇત્થં પ્રસન્નં વરદમાગતં પરમેશ્વરમ્ ।
સ્તુત્વા પ્રણમ્ય ચમસો વરમેનમયાચત ॥

૯૦. ચમસઃ –
તવ પ્રસાદાત્ અદ્યૈવ પિતા મે મુનિસત્તમઃ ।
રાજા પુરઞ્જયઃ ચાપિ યુજ્યેતાં જીવિતેક્ષણાત્ ॥

૯૧. એષ વરોઽસ્માકં કાઙ્ક્ષિતઃ કાર્યસાધનઃ ।
ઇતિ તં ચમસં ભક્તં પૂર્ણકામં વિધાય સઃ ॥

૯૨. હરિકેતું સમાહૂય દેવો વચનમબ્રવીત્ ।
રાજપુત્ર મહાભાગ તુષ્ટોઽસ્મિ તપસા તવ ॥

૯૩. વરં વૃણીષ્વ ભદ્રં તે સર્વાન્ કામાન્ દદામિ તે ।
હરિકેતુઃ -અનુગ્રહાદહં શત્રૂન્ હન્તુમિચ્છામિ રાક્ષસાન્ ॥

૯૪. એષ વૈ પરમઃ કામઃ પ્રસાદીક્રિયતાં મયિ ।
ઈશ્વરઃ –
યાજ્ઞવલ્ક્યો મુનિશ્રેષ્ઠઃ રાજા પરપુરઞ્જયઃ ॥

૯૫. ક્ષણાત્ સંસક્તસર્વાઙ્ગૌ તેજોવીર્યબલાન્વિતૌ ।
નિર્વ્રણૌ નીરુજૌ સદ્યઃ પ્રીતાવુત્તિષ્ઠતાં નૃપ ॥

૯૭. સ્વભાલલોચનાત્ વહ્નેઃ આદાય સ્યન્દનોત્તમમ્ ।

નાનાપ્રહરણોપેતં સાશ્વરત્નચતુષ્ટયમ્ ॥

૯૮. અક્ષયં ચાપિ તૂણીરં ચાપં ચામીકરપ્રભમ્ ।
રથચર્યાગમામ્ભોધિભારણં સૂતમુત્તમમ્ ॥

૯૯. અભેદ્યં કવચં તસ્મૈ શસ્ત્રાસ્ત્રૈરમરૈરપિ ।
પાપશત્રૂન્ જયેત્યુક્ત્વા શિવોઽપ્યન્તરધાત્ વિભુઃ ॥

૧૦૦. એવં દેવેશદત્તાનિ સંપ્રાપ્ય નૃપનન્દનઃ ।
સહૈવ ગુરુપુત્રેણ પરં હર્ષમવાપ્તવાન્ ॥

૧૦૧. એતસ્મિન્નન્તરે રાજા યાજ્ઞવલ્ક્યઃ ચ ધર્મવિત્ ।
અક્ષતાઙ્ગૌ બલોપેતવાસ્તાં સુપ્તોત્થિતાવિવ ॥

૧૦૨. તાવુપેત્ય સુતૌ પ્રીત્યા પરિષ્વજ્ય મુહુર્મુહુઃ ।
આનન્દાશ્રુપરીતાભ્યાં પિબન્તાવિવ પુત્રકૌ ॥

૧૦૩. લોચનાભ્યાં સમાલોક્ય ભૂયો હર્ષમવાપતુઃ ।
હરિકેતુઃ ધીરમનાઃ પ્રણમ્ય સ્વગુરું નિજમ્ ॥

૧૦૪. પિતરં ચ યથાન્યાયં તાભ્યાં સંવર્ધિતૌ મુદા ।
આશીર્ભિઃ સંપ્રયુક્તાભિઃ અનુશિષ્ટઃ ચ સમ્ભ્રમાત્ ॥

૧૦૫. ચમસેનાભ્યનુજ્ઞાતઃ સઙ્ગ્રામાય પ્રતસ્થિવાન્ ।
દેવદત્તં રથવરં સૂતેનાપ્તેન સંયુતમ્ ॥

૧૦૬. આરુહ્ય કવચી ધન્વી બાણં બાણાસનોજ્જ્વલઃ ।
સૈન્યેન મહતા સાર્ધં ગત્વા રક્ષોગણોષિતામ્ ।
૧૦૭. પુરી મયેન વિહિતાં માયાજાલૈઃ દુરાસદામ્ ।
બિભેદ બાણૈર્વિવિધૈઃ રુદ્રદત્તૈઃ સુદુસ્સહૈઃ ॥

૧૦૮. અસ્ત્રેણ બધ્વા રક્ષાંસિ રૌદ્રાસ્ત્રેણાદહદ્રુષા ।
ભસ્મસાત્ અભવત્ ક્ષિપ્રં પુરં સહ નિશાચરૈઃ ॥

૧૦૯. અતો વૈ પુરુધામાપિ સહ માત્રાસ્ત્રવહ્નિના ।
સાકં સવિત્ર્યા દુષ્ટાત્મા શ્રુતકીર્તિઃ તયા હતઃ ॥

૧૧૦. એવં નિહત્ય હરિકેતુરસૌ મહાત્મા રુદ્રૌજસા ગણમશેષ નિશાચરાણામ્ ।
વીરો જયશ્રિયમવાપ વિશાલકીર્તિઃ ભૂયઃ પુરીમપિ નિજાં સરથો જગામ ॥

૧૧૧. તં તુષ્ટુવુઃ બ્વિયદિ સિદ્ધગણાસ્સમન્તાત્

દેવાશ્ચ પુષ્પનિચયૈરભિષિચ્ય હર્ષાત્ ।
સમ્ભાવિતો નિજજનૈઃ ગુરુભિઃ સ્વપિત્રા
સંવર્ધિતઃ પરમવાપ મુદં તદાનીમ્ ॥

ઇતિ ત્રિપઞ્ચાશઃ અધ્યાયઃ ।            Pro.Total = 4941 + 111 = 5052.

## ચતુઃપઞ્ચાશઃ અધ્યાયઃ

વહ્નિતીર્થમાહાત્મ્યમ્ ।

૧. ઇત્થં રાજસુતો ધીરઃ જિત્વા શત્રુગણં મહત્ ।
પૂજિતો નાગરૈસ્સર્વૈઃ પ્રવિશ્ય નિજમન્દિરમ્ ॥

૨. અભિવાદ્ય સ્વપિતરં ગુરું માતરમેવ ચ ।
આશીર્ભિઃ વર્ધિતઃ શ્રીમાન્ ગુરુપુત્રેણ સંયુતઃ ॥

૩. નિજં સંપ્રાપ ભવનં હૃષ્ટચિત્તોઽભવત્ તદા ।
યાજ્ઞવલ્ક્યસુતો યસ્માત્ બ્રાહ્મણો નિહતો રણે ॥

૪. માતા ચ ગુરુપત્ની ચ નિહતે નૃપસૂનુના ।
તેન હત્યા મહાઘોરા દુસ્સહા જ્વરરૂપિણી ।
૫. જગ્રાહ રાજતનયં કક્ષમગ્નિશિખા યથા ।
તેન તાપેન દગ્ધાઙ્ગો ભ્રાન્તચિત્ત ઇવ સ્ફુરન્ ॥

૬. ન નિદ્રાતિ ન ચાશ્નાતિ ન વક્તિ વચનાન્યપિ ।
એવં સઙ્ક્લિશ્યમાનાઙ્ગં દૃષ્ટ્વા રાજાત્મસમ્ભવમ્ ॥

૭. શોકેન મહતાવિષ્ટો ગુરુમાહ કૃતાઞ્જલિઃ ।
રાજા –
ભગવન્ પશ્ય મે પુત્રં ગરીયાંસમસોરપિ ॥

૮. દહ્યમાનં જ્વરેણૈવ ત્રાયસે ન કિમગ્રતઃ ।
આશ્વાસ્ય ગુરો શીઘ્રં ત્રાતુમર્હસિ કિલ્બિષાત્ ॥

૯. એવં દુઃખિતમાસાદ્ય યાજ્ઞવલ્ક્યો મહીપતિમ્ ।
મુહૂર્તં ચિન્તયિત્વા તુ પ્રાજ્ઞો વચનમબ્રવીત્ ॥

૧૦. યાજ્ઞવલ્ક્યઃ -મા ભૈષીસ્ત્વં મહારાજ હત્યા માતૃવધાદમુમ્ ।
બાધતે જ્વરરૂપેણ પ્રાયશ્ચિત્તેન શામ્યતિ ॥

૧૧. પાણ્ડ્યાનામિહ ભૂપાનાં ત્રાતા દુઃખામ્બુધેર્ગુરુઃ ।
લોપામુદ્રાપતિઃ શ્રીમાન્ નાન્યા ગતિરિહાસ્તિ વઃ ॥

૧૨. સ એવ પરમો દેવઃ શરણં યાહિ તં ગુરુમ્ ।
ઇતિ તેનોક્તમાર્ગેણ વ્રતેન પૃથીવીપતિઃ ॥

૧૩. ઉપતસ્થે મુનિશ્રેષ્ઠં પ્રીતઃ પ્રાદુરભૂત્ મુનિઃ ।
તં દૃષ્ટ્વા મુનિશાર્દૂલં સૂર્યવૈશ્વાનરપ્રભમ્ ॥

૧૪. સમુત્થાયાસનાત્ રાજા પ્રણિપત્ય કૃતાઞ્જલિઃ ।
સર્વં વિજ્ઞાપયામાસ તદેતત્ વિપ્લવં નિજમ્ ॥

૧૫. ઇત્થાં સંપ્રાર્થિતઃ તેન રાજ્ઞા પાણ્ડ્યેન કુમ્ભભૂઃ ।
બભાષે વચનં ધીમાન્ સર્વાન્ આહ્લાદયન્ મુનિઃ ॥

૧૬. અગસ્ત્યઃ –
વ્યસનં ત્વપકર્ષામિ શ્રુણુ રાજન્ મહામતે ।
સ્ત્રીહત્યા બ્રહ્મહત્યા ચ યુગપત્ સમુપાગતા ॥

૧૭. તસ્માત્ તવ સુતસ્યાસ્ય પ્રાપ્તઃ પરિભવો મહાન્ ।
તથાપિ લોકરક્ષાર્થં વિહિતોઽયં વધો મહાન્ ॥

૧૮. અપિ પાપસહસ્રં વા પ્રજારક્ષણહેતવે ।
કર્તવ્યં રાજપુત્રેણ એષ ધર્મઃ સનાતનઃ ॥

૧૯. તદેવ હિ રાજસુતઃ ચ કરોતિ સ્મ ભૂપતે ।
પશ્ચાત્ તાપસ્ય શાન્ત્યર્થં પ્રાયશ્ચિત્તં સમાચરેત્ ॥

૨૦. ઇતિ મન્વાદિભિઃ પ્રોક્તં તત્તથા કાર્યમેવ વઃ ।
ઇતિ રાજાનામાભાષ્ય સર્વાન્ સંપ્રીણયન્ ગિરા ॥

૨૧. રાજપુત્રાન્તિકં ગત્વા તૈરેભિસ્સહ બન્ધુભિઃ ।
દદર્શ હરિકેતું તં લુઠન્તમવનીતલે ॥

૨૨. ત્વગસ્થિશેષં નિર્માંસં દહ્યમાનં જ્વરાગ્નિના ।
શોકો માસ્ત્વિતિ ચાભાષ્ય તમામૃજ્ય સ્વપાણિના ॥

૨૩. તત્તાપાગ્નિં સમાધાય રાજસૂનોઃ કલેવરાત્ ।
ક્ષણાત્ આવાહયામાસ સ્વકમણ્ડલુવારિણ ॥

૨૪. તાવન્નિર્મુક્તસન્તાપઃ સમુત્તસ્થૌ નૃપાત્મજઃ ।

સર્વે મુમુદિરે તત્ર તં દૃષ્ટ્વા વિગતજ્વરમ્ ॥

૨૫. પુરઞ્જયો યાજ્ઞવલ્ક્યઃ મન્ત્રિણઃ ચ તથાપરે ।
તુષ્ટુવુઃ સ્તુતિભિઃ પ્રીતાઃ મુનિં ચુલુકિતામ્બુધિમ્ ॥

૨૬. તાપાન્મુક્તં કુમારં તં કરેણામૃજ્ય કુમ્ભભૂઃ ।
ઇદમાહ વચઃ પ્રીતઃ રાજાનં તં પુરઞ્જયમ્ ॥

૨૭. અગસ્ત્યઃ –
રાજન્ તવ કુમારેણ પાપસ્યાસ્યોપશાન્તયે ।
સ્નાતવ્યમમલે તીર્થે તામ્રાયાઃ પાપહારિણિ ॥

૨૮. તીરે પુણ્યતમે દેવં પ્રતિષ્ઠાપ્ય મહેશ્વરમ્ ।
પૂજયિત્વા યથાન્યાયં ધ્યાનહોમજપાદિભિઃ ॥

૨૯. નિશ્શેષં શોષિતં યાવત્ ભવેત્ તાવત્ ઘટોદકમ્ ।
આરાધનીયો વિધિનાપ્યુદ્યોગં ક્રિયતાં ત્વયા ॥

૩૦. તદર્થં ભવતા રાજન્ સહ પુત્રેણ મન્ત્રિભિઃ ।
પુરોધસા બ્રાહ્મણૈશ્ચ ગન્તવ્યં હિ મયા સહ ॥

૩૧. ઇત્થમુક્ત્વા મુનિવરઃ તૈરેભિસ્સહ સઙ્ગતૈઃ ।
હૈરણ્વત્યાઃ સઙ્ગમતઃ પ્રાચ્યાં ક્રોશાત્ મહીપતિમ્ ॥

૩૨. સ્નાપયિત્વા નૃપસુતં મન્ત્રેણ વિધિપૂર્વકમ્ ।
તામ્રાયાઃ દક્ષિણે તીરે મઙ્ગુણસ્યાશ્રમાન્તિકે ॥

૩૩. લિઙ્ગં સંસ્થાપયામાસ વિધિના હરિકેતુના ।
પૂજયામાસ દેવેશં ષોડશૈરુપચારકૈઃ ॥

૩૪. પ્રાદાત્ ધનં દ્વિજાદિભ્યઃ ગોસહસ્રસમન્વિતમ્ ।
બ્રાહ્મણાન્ ભોજયિત્વા તુ દક્ષિણાભિરતોષયત્ ॥

૩૫. એવં કૃતાયાં પૂજાયાં દેવસ્ય રાજસૂનુના ।
સન્તપ્તતૈલસઙ્કાશં તદેતત્ કલશોદકમ્ ॥

૩૬. ક્ષીણમાપ તુરીયાંશં બ્રહ્મહત્યાત્મકં તદા ।
પુનઃ ક્રોશાત્ પરં ગત્વા તામ્રાયાઃ પૂર્વરોધસિ ॥

૩૭. હરિકેતોરાશ્રમાગ્રે દર્શનાત્ અઘનાશને ।
સ્નાપયિત્વા નૃપસુતં માલેયીતીર્થવારિણિ ॥

૩૮. તત્રાપિ શામ્ભવં લિઙ્ગં સ્થાપ્ય પૂજામકલ્પયત્ ।
ગવાં સહસ્રં વિપ્રાણાં દદૌ હેમામ્બરાન્વિતમ્ ॥

૩૯. ક્ષીણમાસીત્ તૃતીયાંશં તાવત્ તત્કલશોદકમ્ ।
તતો મુનિવરઃ પ્રીતઃ તૈરેભિસ્સહ વિસ્મિતૈઃ ॥

૪૦. કિઞ્ચિત્ ઉત્તરતો ગત્વા પુણ્યે વૈખાનસાશ્રમે ।
વિધિના સ્નાપયિત્વા તં તામ્રાયાં નૃપનન્દનમ્ ॥

૪૧. તતઃ શૈવં મહાલિઙ્ગં પ્રતિષ્ઠાપ્ય વિધાનતઃ ।
પૂજયામાસ તન્ત્રેણ મહાપઞ્ચક્ષરાત્મના ॥

૪૨. પ્રદક્ષિણ નમસ્કારૈઃ સ્તોત્રૈઃ સન્તોષ્ય શઙ્કરમ્ ।
ગવાં સહસ્રં તત્રાપિ પ્રદદૌ સ નૃપાત્મજઃ ॥

૪૩. તાવત્ દ્વિતીયકુમ્ભસ્યમંશં ક્ષીણમભૂત્ જલમ્ ।
તતઃ સન્તુષ્ટહૃદયાઃ સર્વે રાજમુખા જનાઃ ॥

૪૪. સ્તુવન્તો મુનિશાર્દૂલં પ્રણેમુઃ શિરસા મુદા ।
તદ્દોષશેષસાન્ત્યર્થં તાનાહૂય મુનીશ્વરઃ ॥

૪૫. બભાષે વચનં શ્રીમાન્ લોપામુદ્રાપતિર્મુનિઃ ।
અગસ્ત્યઃ –
રાજન્ તવ કુમારસ્ય શેષદોષસ્ય શાન્તયે ॥

૪૬. પ્રાયશ્ચિત્તં મયા દૃષ્ટં વક્ષ્યામિ શ્રુણુ સાદરમ્ ।
પુરાસીત્ ચમસો નામ મુનિરાઙ્ગિરસાહ્વયઃ ॥

૪૭. સોઽધીત્ય વેદાનખિલાન્ સાઙ્ગાનન્યાન્ ગુરોર્મુખાત્ ।
અર્થમાલોચ્ય શાસ્ત્રાણાં પૂર્વં સિદ્ધાન્તમેવ ચ ॥

૪૮. નિશ્ચિતાર્થો મોક્ષધર્મે તપસ્તપ્તું મનો દધે ।
અર્ણવાત્ પશ્ચિમે ભાગે તામ્રાયા ઉત્તરે તટે ॥

૪૯. દક્ષિણે કુન્દાટવ્યાસ્તુ માયાલાસ્યાત્તુ પૂર્વતઃ ।
મનોજ્ઞે ભવને દેશે વિધાય નિજમાશ્રમમ્ ॥

૫૦. તપઃ ચકાર મેધાવી પ્રાણાયામપરાયણઃ ।
તતો વર્ષશતે પૂર્ણે તપસ્યન્તં મહામુનિમ્ ॥

૫૧. ઉપતસ્થુઃ ક્રતુશતમૂચુઃ વિનયોજ્જ્વલમ્ ।
ક્રતવઃ –
વયં સર્વે પુરા બ્રહ્મન્ બ્રહ્મણા લોકહેતવે ॥

૫૨. સૃષ્ટાઃ સકલજન્તૂનાં ચતુર્વર્ગફલોદયે ।
તદાદિ દેવતા વિપ્રાઃ જ્ઞાત્વા જ્ઞાત્વા શ્રુતીરિતાઃ ॥

૫૩. યાગૈરેભિર્યથાન્યાયં યજન્તિ સકલાન્ સુરાન્ ।
ત્વમેવ સર્વધર્મજ્ઞઃ ગુરુભૂતઃ તપોઽધિકઃ ॥

૫૪. અસ્માન્ વિહાય ભૂયિષ્ઠાન્ ક્રતૂન્ કૃત્યવિદાં વર ।
તપોભિરેભિર્મોક્ષાર્થં પ્રયત્નં કરોષિ કિમ્ ॥

૫૫. ત્વયા નાદૃતાન્ અસ્માન્ જ્ઞાત્વા સર્વેઽપિ ભૂસુરાઃ ।
ત્વયૈવાચરિતેનાર્યે માર્ગેણાસ્માન્ વિહાય ભો ॥

૫૬. શ્રેયાંસિ સાધયિષ્યન્તિ નાત્ર કાર્યા વિચારણા ।
તસ્માત્ ત્વયાપિ કર્તવ્યં અસ્મત્ સઙ્ગ્રહહેતવે ॥

૫૭. કૃતકૃત્યોઽપિ તપસા મુનેહ્યસ્માન્ યથાવિધિ ।
અઙ્ગીકુરુષ્વ વિપ્રર્ષે વયં ત્વાં શરણં ગતાઃ ॥

૫૮. ઇતિ તેષાં વચઃ શ્રુત્વા સ મુનિઃ પ્રીતમાનસઃ ।
ચકાર માનસં ધીમાન્ ક્રમાત્ ક્રતુશતં પરઃ ॥

૫૯. અગ્નિષ્ટોમાદિક્રતૂન્ રાજન્ અશ્વમેધાવસાનકાન્ ।
માનસૈરેવ સમ્ભારૈઃ ચકારાત્મવિદાં વરઃ ॥

૬૦. અન્તે જ્ઞાનાગ્નિકુણ્ડે તુ જ્વાલામાલાશતાકુલે ।
અવભૃત્યવિધિં કૃત્વા કૃતકૃત્યોઽભવત્ મુનિઃ ॥

૬૧. ભૂયોઽપિ પ્રાર્થિતો યાગૈઃ એવમેવ સમાપયન્ ।
તત્રાવભૃત્યં દત્વા મહાસંવિદ્ધુતાશને ॥

૬૨. તૃતીયવારમેવં તુ વિધાયાગ્નૌ તુ મજ્જનમ્ ।
સશરીરો દિવં યાતઃ પુનરાવૃત્તિવર્જિતમ્ ॥

૬૩. તસ્મિન્ ગતે મુનિવરે તેનાગ્નેર્વિહિતાગ્નયઃ ।
જ્વલન્તઃ તાપયન્તશ્ચ બાધન્તે પૃથિવીમિમામ્ ॥

૬૪. તેષુ ધ્યેયં શિવં સ્થાપ્ય શુદ્ધાત્મા સ નૃપાત્મજઃ ।

ભવિષ્યતિ ન સન્દેહઃ દીર્ઘાયુઃ કીર્તિમાન્ ઇતિ ॥

૬૫. ઇતિ તેષાં કથાં પુણ્યાં કીર્તયન્ કુમ્ભસમ્ભવઃ ।
તૈરેભિસ્સાર્ધમાસાદ્ય મુનેઃ પુણ્યતપોવનમ્ ॥

૬૬. દદૃશુઃ ચ તથાપ્યગ્નીન્ દુર્દર્શાં મુનિતેજસા ।
તત્ર સ્નાત્વા તુ તામ્રાયાં તર્પયિત્વા પિતૄન્ સુરાન્ ॥

૬૭. વિધિના સ્થાપયામાસ શિવલિઙ્ગં પૃથક્ પૃથક્ ।
તદગ્નિ ગર્ભે પ્રથમં સ્થાપિતં રાજસૂનુના ॥

૬૮. તદુત્તરેઽગ્નિકુણ્ડે તુ રાજ્ઞા સંસ્થાપિતઃ શિવઃ ।
તૃતીયેઽપિ તથા કુણ્ડે સ્વયં કલશજન્મના ॥

૬૯. એવં લિઙ્ગેષુ દેવેશં વિધિનાવાહ્ય મન્ત્રવિત્ ।
પૂજયામાસ ગન્ધાદ્યૈઃ નૈવેદ્યૈઃ ધૂપદીપકૈઃ ॥

૭૦. સ્તોત્રૈઃ પ્રદક્ષિણૈર્ગીતૈઃ નમસ્કારજપાર્ચનૈઃ ।
ગોસહસ્રં દ્વિજાતિભ્યઃ સાલઙ્કારં સદક્ષિણમ્ ॥

૭૧. પ્રદદૌ નૃપશાર્દૂલઃ શિવો નઃ પ્રીયતામિતિ ।
બ્રાહ્મણાન્ ભોજયામાસ ભક્ષ્યૈરન્નૈર્વિશેષતઃ ॥

૭૨. ઇત્થં તેનાર્ચિતાઃ વિપ્રાઃ પ્રીણયન્તઃ પુનઃપુનઃ ।
રાજાનં વર્ધયામાસુઃ પ્રયુઞ્જાનઃ સદાશિષઃ ॥

૭૩. તાવદામોદભૂયિષ્ઠાઃ પુષ્પવૃષ્ટિરભૂદ્દિવ ; ।
દેવદુન્દુભયો નેદુઃ ગન્ધર્વાશ્ચ જગુર્મુદા ॥

૭૪. પ્રાદુરાસીત્ મહાદેવો ગૌરીનાથઃ ત્રિલોચનઃ ।
સેવ્યમાનઃ સિદ્ધગણૈઃ ભૂતપ્રમથગુહ્યકૈઃ ॥

૭૫. ગૌરીસહાયો ભગવાન્ વ્યાજહાર ઘટોદ્ભવમ્ ।
શિવઃ –
સાધુ સાધુ મુનિશ્રેષ્ઠ તુષ્ટોઽસ્મિ તવ કર્મણા ॥

૭૬. અયં રાજસુતઃ શ્રીમાન્ ક્ષીણપાપો ન સંશયઃ ।
એતં રાજસુતં નિત્યં પાત્રં સકલસમ્પદામ્ ॥

૭૭. વર્ષાણામયુતં રાજન્ પાલયન્ પૃથિવીમિમામ્ ।
પુત્રે રાજ્યં સમાધાય મમ સાયુજ્યમેષ્યતિ ॥

૭૮. એષુ તીર્થેષુ યે સ્નાનં વિધિના તત્ર તત્ર હિ ।
તત્ તલ્લિઙ્ગેષુ માં દૃષ્ટ્વા પૂજયન્તિ વિધાનતઃ ॥

૭૯. તેષાં પુનર્ભવો નાસ્તિ સત્યં મદ્વ્યાહૃતં મુને ।
ઇત્યુક્ત્વા મુનિશાર્દૂલમાભાષ્ય ચ પુરઞ્જયમ્ ॥

૮૦. હરિકેતોર્વરાન્ દત્વા પુનરન્યાન્ ચ શઙ્કરઃ ।
સર્વેષુ હૃષ્યમાણેષુ તત્રૈવાન્તરધાત્ વિભુઃ ॥

૮૧. ઇત્થં રાજસુતં પાપાત્ મોચયિત્વા ઘટોદ્ભવઃ ।
આશિષા વર્ધયિત્વા તં રાજાનં ચ પુરઞ્જયમ્ ॥

૮૨. પ્રેષયિત્વા સહ સુતં મણલૂરુપુરં પ્રતિ ।
પ્રેમ્ણા વ્યાપૃચ્છય તાન્ સર્વાન્ સ મુનિઃ કુમ્ભસમ્ભવઃ ॥

૮૩. જગામ મલયં શૈલં યત્રાશ્રમપદં નિજમ્ ।
ગતે તસ્મિન્મુનિવરે હૃષ્ટચેતાઃ પુરઞ્જયઃ ॥

૮૪. રાજધાનીં નિજં પ્રાપ્ય સમ્મન્ત્ર્ય ચ પુરોધસા ।
અથ રાજ્યે સુતં પ્રીત્યા બન્ધુભિઃ ચાપ્યભિષેચયત્ ॥

૮૫. તતઃ ચિરતરં કાલં ઐહિકાન્ વિષયાન્ સુખી ।
અન્તે શિવપદં પાપ યોગિનામપિ દુર્લભમ્ ॥

૮૬. ઇત્થં મુનિઃ કલશભૂરનુગૃહ્ય હત્યાતાપોપશાન્તિમુપદાય નૃપાત્મજસ્ય ।
શમ્ભોરવાપ્ય ચ વરાન્ જગતાં હિતાય પ્રાપ્યાશ્રમં પરમવાપ મુદં મહાત્મા ॥

ઇતિ ચતુઃપઞ્ચાશોઽધ્યાયઃ ।  Pro.Total = 5052 + 86 =5138

## પઞ્ચપઞ્ચાશઃ અધ્યાયઃ

રામતીર્થ–

જટાયુતીર્થમાહાત્મ્ય મ્ ।

૧. શઙ્ખઃ –

અથાપરં મહારાજ રામતીર્થસ્યવૈભવમ્ ।
આકર્ણય કલિક્લેશવિનાશનવિચક્ષણમ્ ॥

૨. યત્તીર્થસ્મરણાત્ એવ મુચ્યન્તે જન્તવો ભયાત્ ।

યત્ર ભક્ત્યા પુરા રાજા કેકયો ભીમકાર્મુકઃ ॥

૩. ગુરુણાદિષ્ટમાર્ગેણ સ્નાત્વા માલેયવારિણિ ।
નિર્મુક્તદોષસ્સન્તાનં લેભે ત્રૈલોક્યવિશ્રુતમ્ ॥

૪. રાજા –
કોઽસૌ કેકયભૂપાલઃ ભીમધન્વા બહુશ્રુતઃ ।
અધર્મમકરોત્ કેન કુલસન્તાનરોધનમ્ ॥

૫. જ્ઞાત્વાત્ર તીર્થે ગુરુણા તદ્દોષવિનિવૃત્તયે ।
કથં વા લબ્ધસન્તાનઃ કૃતકૃત્યોઽભવત્ નૃપઃ ॥

૬. એતત્ વિજ્ઞાતુમિચ્છામિ મુને કથય વિસ્તરાત્ ।
ઇતિ પૃષ્ટઃ તદા તેન શઙ્ખયોગી મહીભુજા ॥

૭. તસ્મૈ સ કથયામાસ કથામેનાં પુરાતનીમ્ ।
શઙ્ખઃ –
આકર્ણય કથાં રાજન્ કેકયસ્ય મહાત્મનઃ ॥

૮. યસ્ય શ્રવણમાત્રેણ નાનપત્યો ભવેત્ નૃપ ।
વન્ધ્યાપિ લભતે પુત્રમાયુષ્મન્તં યશસ્વિનમ્ ॥

૯. પુરા કેકયદેશેષુ નામ્ના ભીમશરાસનઃ ।
આસીદશેષધર્મજ્ઞઃ સત્યવાદી મહીપતિઃ ॥

૧૦. ધર્મજ્ઞઃ વદાન્યશ્ચ યજ્વા વ્રતપરાયણઃ ।
ગુરુસેવી ગુણાવાસો જેતા નિખિલભૂભુજામ્ ॥

૧૧. માલવી મધુગન્ધાખ્યા તસ્યાસીત્ પ્રાણવલ્લભા ।
તયા સહ ચિરં રાજા કૃત્વા ધર્માન્ અનેકશઃ ॥

૧૨. ન સન્તાનમસૌ લેભે રાજસૂયાદિભિર્મખૈઃ ।
કદાચિત્ અશ્વમેધાન્તે કૃત્વાવભૃથમજ્જનમ્ ॥

૧૩. ચિન્તયાનઃ સભાં રાજા પ્રવિશ્ય સહ મન્ત્રિભિઃ ।
પુરોહિતૈશ્ચ સામન્તૈઃ વિદ્વદ્ભિઃ બ્રાહ્મણૈસ્સહ ॥

૧૪. નિષસાદાસને મુખ્યે મહરત્નપરિચ્છદે ।
તમેનં ધર્મનિપુણં રાજાનં રાજસત્તમાઃ ॥

૧૫. ઉપતસ્થુર્મહારાજં વસવો વાસવં યથા ।

તાવત્ અત્રિર્ભૃગુઃ કણ્વઃ કપિલઃ શતજિત્ વસુઃ ॥

૧૬. શાતાતપઃ શતાનન્દઃ સુમન્થુઃ કુમ્ભસમ્ભવઃ ।
એતે ચાન્યે ચ મુનયો રાજાનં દ્રષ્ટુમાયયુઃ ॥

૧૭. એતાન્ સમાગતાન્ દૃષ્ટ્વા પ્રત્યુવાચ કૃતાઞ્જલિઃ ।
વિધિના પૂજયામાસ પાદ્યાર્ઘ્યાદ્યાભિવન્દનૈઃ ॥

૧૮. ઉપવિષ્ટેષુ સર્વેષુ પૂજિતેષુ યથાસુખમ્ ।
કૃતાઞ્જલિરભિષ્ટૂય વચનં ચેદમબ્રવીત્ ॥

૧૯. ભવન્તો હિ મહાભાગાઃ મુનયઃ સંશ્રિતવ્રતાઃ ।
ભવતાં પાદરજસા ગઙ્ગાદ્યાઃ તીર્થતાં યયુઃ ॥

૨૦. યુષ્મજ્જિહ્વાગ્રનટનાવિભ્રમાશ્રુતયોઽપ્યમી ।
પવિત્રયન્તિ ભુવનં પુરાણાનિ મુહુર્મુહુઃ ॥

૨૧. યદાલોકનપુણ્યેન શ્રદ્ધયા પરયા કૃતમ્ ।
બ્રહ્મહત્યાદિ પાપાનાં પ્રાયશ્ચિત્તં ભવિષ્યતિ ॥

૨૨. અપિ પાપસ્ય મે નૂનં ભવન્તો દૃષ્ટિગોચરાઃ ।
અનપત્યમહાપાપપ્રાયશ્ચિત્તાય નોદ્યતાઃ ॥

૨૩. ભવતઃ શરણં પ્રાપ્તં દીનં માં ભૃત્યમાસ્થિતમ્ ।
ત્રાતુમર્હત સર્વજ્ઞાઃ ગુરવો દીનવત્સલાઃ ॥

૨૪. ઇતિ બ્રુવતિ રાજેન્દ્રે દીને ચાશ્રુપરિપ્લુતે ।
વ્યાજહાર મહાયોગી મુનિઃ કલશસમ્ભવઃ ॥

૨૫. રાજન્ જહીહિ સન્તાપમનપત્યાઘસમ્ભૃતમ્ ।
અચિરેણૈવ કાલેન ભવિતા તે તનૂદ્ભવઃ ॥

૨૬. ચક્રવર્તી મહાતેજાઃ સર્વજ્ઞો લોકસમ્મતઃ ।
અસ્યાન્તરાયો મધ્યે તુ વર્તતે વજ્રકર્કશઃ ॥

૨૭. પુરા ચોલસ્ય વિષયે કાચિત્ સામન્ત ભૂપતિઃ ।
ધનકેતુરિતિખ્યાતઃ સર્વશાસ્ત્રાર્થતત્ત્વવિત્ ॥

૨૮. તસ્ય પુત્રાવુભાવાસ્તાં ધીમાન્ જ્યેષ્ઠોઽનુજઃ ક્રતુઃ ।
તૌ વીરૌ ધર્મિણાં શ્રેષ્ઠૌ પિતા દૃષ્ટ્વા મહોત્સવૌ ॥

૨૯. આધિપત્યે સુતં જ્યેષ્ઠં નિધાયાન્યં તથોચિતે ।
સન્ત્યક્તરાગો નિતરાં વસન્ અત્ર ગૃહે નિજે ॥

૩૦. શિવમારાધયન્ નિત્યમવાપ પરમાં ગતિમ્ ।
તતો ધીમાન્ મહાતેજાઃ ભ્રાત્રા સહ કનીયસઃ ॥

૩૧. પિતુશ્ચકાર વિધિના ગુરુણા ચોર્ધ્વદૈહિકમ્ ।
તતસ્તૌ ભ્રાતરૌ સર્વધર્મજ્ઞગુરુચોદિતૌ ॥

૩૨. કાલે કાલે ચ કાર્યાણિ પૈતૃકાનિ પ્રચક્રતુઃ ।
પિતૃશ્રાદ્ધાદિકં સર્વં પ્રત્યેકં ભ્રાતૃભિસ્સદા ॥

૩૩. એવં ધર્મસમાચારે શ્રુતિસ્મૃત્યનુવર્તિભિઃ ।
ઇત્થં ગુરુજનૈર્વિપ્રૈઃ સબહુજ્ઞૈરપિ ભૂપતિઃ ॥

૩૪. અનુશિષ્ટોઽપ્યસૌ લોભાત્ સહૈવ ચ કનીયસા ।
એવં વિજ્ઞાતશાસ્ત્રાભ્યાં દ્રવ્યલોભેન ભૂપતે ॥

૩૫. ન ચકાર પિતુઃ શ્રાદ્ધં ક્રતુર્જ્યેષ્ઠવશં ગતઃ ।
એવં બહુતિથે કાલે તાવેતૌ શૂરસમ્મતૌ ॥

૩૬. યુદ્ધે શત્રુવશં પ્રાપ્તૌ યુગપત્ મૃતિમાપતુઃ ।
વીરસ્વર્ગાય નિષ્ક્રાન્તૌ વિમાનવરમાસ્થિતૌ ॥

૩૭. ઉદ્ભિદ્યમણ્ડલં ભાનોઃ તેજોરાશિરકલ્મષઃ ।
જગામ પરમાન્ લોકાન્ ધીમાન્ કર્માનુરૂપકાન્ ॥

૩૮. ક્રતુરર્વાક્ સૂર્યબિમ્બાત્ નિરુદ્ધોઽભૂત્ સુરોત્તમૈઃ ।
ક્રતુઃ તાવત્ સ્મયમાનઃ ચિન્તામાપ દુરત્યયામ્ ॥

૩૯. આવામેકત્ર સઞ્જાતૌ એકધર્મપરાયણૌ ।
ધર્માનુરક્ષાં કુર્વન્તૌ માર્ગે નિયમવર્તિનૌ ॥

૪૦. અત્રૈવં સ્વર્ગયોગ્યોઽભૂત્ અહં નાભૂવમત્ર કિમ્ ।
ઇતિ સંશયમાપન્ને તસ્મિન્ ધર્મપરાયણે ॥

૪૧. યદૃચ્છયાગતો યોગી નારદો વ્યોમવર્ત્મના ।
ક્રતુમાહ સમાહૂય મા તે ચિન્તા મહીપતે ॥

૪૨. નારદઃ –
ત્વયા પિતૃદિને શ્રાદ્ધં ન કૃતં ધર્મવર્ત્મના ।

તસ્માત્ તવ ગતિઃ સ્વર્ગે નાસ્તિ પુણ્યશતૈરપિ ॥

૪૩. ઇતિ શ્રુત્વા પરિશ્રાન્તો ભીતઃ ક્રતુઃ મહીપતિઃ ।
પુનઃ પ્રણમ્ય દેવર્ષિં પપ્રચ્છ વિનયાન્વિતઃ ॥

૪૪. કથં કર્મગતિર્બ્રહ્મન્ પવિત્રી પુરતો મમ ।
કથં નિર્વૃત્તો દુઃખાત્ માં કૃપયા વક્તુમર્હત ॥

૪૫. નારદઃ –
રાજન્ તવ ગતિઃ પુણ્યા પુણ્યશીલસ્ય ભૂયસી ।
વક્ષ્યમાણાન્ મયેદાનીં શ્રુણુ વત્સ યથાતથમ્ ॥

૪૬. દાનૈર્યજ્ઞૈઃ તપોભિઃ ચ ભક્ત્યા ચ ગુરુસેવયા ।
દેહત્યાગેન સઙ્ગ્રામે ભવતા સુકૃતં કૃતમ્ ॥

૪૭. નાન્તં પશ્યામિ ભોગસ્ય કર્મભિઃ સ્વાર્જિતૈશ્શુભૈઃ ।
લોભાત્ પિતૃદિને શ્રાદ્ધમકર્તુઃ તે ન નિષ્કૃતિઃ ॥

૪૮. વિનિરુદ્ધોર્ધ્વગતિઃ ભૂયઃ કુરુતે જન્મ માનુષે ।
કેકયસ્ય કુલે જન્મ ભાવ્યં ધર્મભૃતઃ તવ ॥

૪૯. ભીમધન્વેતિ વિખ્યાતો યજ્વા દાતા બહુશ્રુતઃ ।
સમસ્તરાજસામન્તવન્દ્યમાનપદામ્બુજઃ ॥

૫૦. દારૈઃ તથાનુરૂપૈઃ તુ ભૃત્યૈર્મિત્રૈશ્ચ સેવિતઃ ।
મહેન્દ્રતુલ્યભાગ્યોઽપિ પાપાત્ સન્તાનવર્જિતઃ ॥

૫૧. શોચમાનો દિવારાત્રં દૈવાત્ સત્સઙ્ગમેષ્યસિ ।
ઉપદેશેન સદસિ કુમ્ભયોનેર્મહાત્મનઃ ॥

૫૨. પ્રાયશ્ચિત્તં વિધાયૈવ તતઃ સન્તાનમેષ્યસિ ।
ઇત્યુક્ત્વા નારદો યોગી કૈલાસાય પ્રતસ્થિવાન્ ॥

૫૩. ક્રતુ નામા ભવાન્ રાજા પૂર્વજન્મનિ પુણ્યતઃ ।
જાતોઽસિ કેકયકુલે પ્રશસ્તઃ સર્વસમ્મતઃ ॥

૫૪. એતત્ તે કથિતં રાજન્ વૃત્તાન્તં પૂર્વજન્મજમ્ ।
જાનન્ત્યેતે ચ મુનયઃ ત્વં ન જાનાસિ માયયા ॥

૫૫. ઇતઃ પરં પ્રવક્ષ્યામિ પ્રાયશ્ચિત્તં તવાધુના ।
યત્કૃત્વા  મુક્તપાપઃ ત્વં પ્રાપ્ય પુત્રાન્ મહૌજસઃ ॥

૫૬. અનુભૂયશ્ચિરં ભાગ્યમમાનુષ્યમતર્કિતમ્ ।
પઞ્ચવર્ષસહસ્રાન્તે સનાતનાત્ પ્રાપ્યોપદેશતઃ ॥

૫૭. સનાતનમુનેર્ભૂમ્ના કલ્પાન્તે દ્રષ્ટુમર્હસિ ।
ઇત્થમાકર્ણ્ય સિદ્ધસ્ય વિન્ધ્યમાનપ્રમાથિનઃ ॥

૫૮. સર્વે મુમુદિરે સભ્યાઃ હર્ષરોમાઞ્ચમઞ્જુલાઃ ।
તુષ્ટુવુઃ કુમ્ભજન્માનં સ્તોત્રૈઃ તત્કીર્તિભૂષિતૈઃ ॥

૫૯. સમુત્થાયાસનાત્ રાજા હર્ષનિર્ભરમાનસઃ ।
મુઞ્ચન્ આનન્દજં વારિ લોચનાભ્યાં સુશીતલમ્ ॥

૬૦. હર્ષગદ્ગદયા વાચા વ્યાજહાર મહામુનિમ્ ।
કૃતાઞ્જલિપુટો ભૂત્વા સંસ્પૃશન્ તત્પદામ્બુજમ્ ॥

૬૧. નમસ્તે મુનિશાર્દૂલ નમસ્તે કરુણાનિધે ।
ધન્યોઽસ્મિ કૃતકૃત્યોઽસ્મિ તવ પાદાબ્જસેવયા ॥

૬૨. ઇતઃ પરં ન શોચામિ કર્મણા કેન વા મુને ।
તન્મે કથય વિસ્તીર્ય ત્વામહં શરણં ગતઃ ॥

૬૩. અગસ્ત્યઃ –
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ તવ સૌભાગ્યહેતુકમ્ ।
પ્રાયશ્ચિત્તમશેષાણામઘાનામુપશાન્તયે ॥

૬૪. પુરા નારાયણઃ સાક્ષાત્ ભગવાન્ કરુણાનિધિઃ ।
હિતાય જગતાં ધાત્રા પ્રાર્થિતો દેવતૈરપિ ॥

૬૫. ભૂત્વા દાશરથિઃ શ્રીમાન્ ભ્રાત્રા સૌમિત્રિણા સહ ।
મૈથિલીસહિતઃ પ્રાપ્ય દણ્ડકાં મુનિસેવિતામ્ ॥

૬૬. ચકાર વસતિં તત્ર પઞ્ચવટ્યાં જટાયુષા ।
અનુયાતે ચિત્રમૃગં રામે સૌમિત્રિનન્દને ॥

૬૭. જહાર રાવણઃ સીતાં કુહના યતિવેષભૃત્ ।
તદા નિરુધ્ય તં પક્ષી જટાયુર્વીરવત્તરઃ ॥

૬૮. બભઞ્જ રાવણરથં તં ચ સમ્મોહયન્ બલાત્ ।
તતો હત્વા દશગ્રીવો ગૃધ્રરાજં જટાયુષમ્ ॥

૬૯. પ્રાપ્ય લઙ્કાં સમાદાય મૈથિલીં જનકાત્મજામ્ ।
તતો રામસ્સમાગત્ય હૃતાં શ્રુત્વા ચ મૈથિલીમ્ ॥

૭૦. પિતુઃસખં પક્ષિરાજં પ્રાપયિત્વા નિજં પદમ્ ।
તદ્દેહં પિતૃમેધેન સંસ્કૃત્ય વિધિપૂર્વકમ્ ॥

૭૧. નિવાપાઞ્જલિમમ્ભોભિઃ તામ્રાયા ઉત્તરે તટે ।
તાવદ્બ્રહ્મમુખૈર્દેવૈઃ સનકાદ્યૈશ્ચ યોગિભિઃ ॥

૭૨. આવિરાસીત્ મહાદેવો ભવાન્યાઃ સહિતઃ તદા ।
પ્રશસ્ય રામમાત્માનં વ્યાજહાર વચઃ શુભમ્ ॥

૭૩. ભગવાન્ –
રામ રામ મહાભાગ ભવતા તારિતો મહાન્ ।
પ્રાપ્તવાન્ અક્ષયં સ્થાનં તોષિતેયં જગત્ ત્વયા ॥

૭૪. ત્વયાત્ર કલ્પિતં તીર્થં મહાપાતકનાશનમ્ ।
યે સેવન્તે ભક્તિયુક્તાઃ તેષાં મુક્તિઃ કરે સ્થિતા ॥

૭૫. જટાયુસંજ્ઞિતે તીર્થે રામાખ્યે ચ ભવત્પ્રિયે ।
શિવતીર્થે મદીયે ચ યે મજ્જન્ત્યપિ વા સકૃત્ ॥

૭૬. તેષાં પાપાનિ નશ્યન્તિ શતજન્માર્જિતાન્યપિ ।
ભવન્તુ સમ્પદઃ તેષાં ભવન્તુ ચ મનોરથાઃ ॥

૭૭. સન્તતિઃ ધર્મસંવૃદ્ધા નિષ્પાપા ચિરભોગિની ।
પ્રાયશ્ચિત્તમિદં રામતીર્થેઽસ્મિન્ મજ્જનં નૃણામ્ ॥

૭૮. ઇતઃ પરં મહાબાહો હત્વા રાવણમાહવે ।
સીતાસમેતં સન્તુષ્ટં ત્વાં પશ્યામિ સલક્ષ્મણમ્ ॥

૭૯. ઇત્યુક્ત્વામન્ત્ર્ય તં દેવો રામભદ્રં વૃષધ્વજઃ ।
જગામ સહસા દેવૈઃ કૈલાસમુમયા સહ ॥

૮૦. તદાદિમુનયઃ સિદ્ધાઃ ઋષયશ્ચ તપોધનાઃ ।
અદ્યાપિ કિલ સેવન્તે રામતીર્થમનુત્તમમ્ ॥

૮૧. તસ્માત્ ત્વયા મહારાજ ગન્તવ્યં સહ ભાર્યયા ।
અત્ર સ્નાત્વા મહાતીર્થે તર્પયિત્વા પિતૄન્ સુરાન્ ॥

૮૨. સન્તર્પ્ય ચ ઋષીન્ વિપ્રાન્ ધનધાન્યભૂતિલૈઃ ।

પ્રાપ્સ્યસિ ત્વં સુતાન્ નૂનં મર્મજ્ઞાન્ ભૂરિવર્ચસઃ ॥

૮૩. ઇત્યુક્ત્વોપરતે તસ્મિન્ મુનૌ વાતાપિવૈરિણિ ।
સા સભા વિસ્મયાવિષ્ટા સરાજમુનિસઙ્કુલા ॥

૮૪. ઉચ્ચૈઃ કલાકલારાવા મુહૂર્તં સમપદ્યત ।
તતો રાજા ભીમધન્વા તાન્ ઋષીન્ અભિવાદ્ય ચ ॥

૮૫. ગુર્વર્થે પ્રાર્થયિત્વા તં લોપામુદ્રાપતિં મુનિમ્ ।
સાન્તઃપુરે પુરાત્તસ્માત્ નિર્યયૌ સદનોચ્ચયઃ ॥

૮૬. અતીત્ય દૂરમધ્વાનં સવાહનપરિચ્છદઃ ।
દિનૈઃકતિપયૈઃ પ્રાપ્તઃ તાં નદીં મલયાત્મજામ્ ॥

૮૭. રામતીર્થં સમાસાદ્ય સદારઃ કૃતમજ્જનઃ ।
ઋષ્યાદિષ્ટેન વિધિના તોષયિત્વા ધનૈર્દ્વિજાન્ ॥

૮૮. ઋષીન્ દેવાન્ પિતૄન્ ચાપિ ક્ષેત્રપિણ્ડવિધાનતઃ ।
ઉપોષ્ય તીર્થસિદ્ધ્યર્થં તીર્થશ્રાદ્ધં પરેઽહનિ ॥

૮૯. સ્નાત્વાગ્રે રામતીર્થં ચ શિવતીર્થમનન્તરમ્ ।
જટાયુતીર્થે તથા સ્નાત્વા રાજા યથાવિધિ ॥

૯૦. તીરમાસાદ્ય ધર્માત્મા ધૃતઃ શુદ્ધામ્બરદ્વયઃ ।
ન્યષીદત્ ઋષિભિઃ તીરે કૃતકૃત્યઃ કૃતાત્મવાન્ ॥

૯૧. એવં સ્થિતેષુ સર્વેષુ મુનિવૃન્દેષુ ભૂપતે ।
અમ્બરાત્ ઉદભૂત્ તાવત્ વાર્તા કાપ્યશરીરિણી ॥

૯૨. નિર્મુક્તપાપઃ ત્વં રાજન્ શુદ્ધાત્મા સૂર્યબિમ્બવત્ ।
ત્વં લપ્સ્યસે સુતાન્ વીરાન્ પઞ્ચ પઞ્ચાનનોપમાન્ ॥

૯૩. આયુષ્મદ્ભિઃ કીર્તિમદ્ભિઃ પુત્રૈઃ ધર્મપરાયણૈઃ ।
અનુભૂય સુખં બ્રહ્મન્ જીવન્મુક્તો ભવિષ્યસિ ॥

૯૪. ઇત્યાકર્ણ્ય ગિરં રાજા સંપ્રહૃષ્ટતનૂરુહઃ ।
આશીર્ભિર્વર્ધિતો વિપ્રૈઃ મુનિના કુમ્ભજન્મના ॥

૯૫. પ્રેષિતઃ સ્વપુરં પ્રાપ સાન્તઃપુરપરિચ્છદઃ ।
રાજધાનીં નિજાં પ્રાપ્ય હૃષ્ટપુષ્ટજનાકુલામ્ ॥

૯૬. ધર્મેણ પાલયન્ આસ્તે પ્રતીક્ષન્ આત્મજોદયમ્ ।
એતસ્મિન્નન્તરે તસ્ય મહિષી મૃદુગન્ધિની ॥

૯૭. ક્રમેણ સુષુવે પુત્રાન્ પ્રત્યબ્દં ભૂરિવર્ચસઃ ।
હિરણ્યબાહુઃ શાલીકઃ સિંહકેતુઃ બૃહદ્રથઃ ॥

૯૮. ચન્દ્રધામેતિ વિખ્યાતાઃ પુત્રાઃ પઞ્ચમહૈજસઃ ।
સર્વજ્ઞાઃ કીર્તિમન્તશ્ચ પિતુરાનન્દવર્ધકાઃ ॥

૯૯. તૈર્વીરસમ્મતૈઃ પુત્રૈઃ ધર્મજ્ઞૈઃ શ્રુતિપારગૈઃ ।
અવાપુઃ પરમાં તુષ્ટિં ચન્દ્રાંશુભિરિવાર્ણવઃ ॥

૧૦૦. પઞ્ચવર્ષસહસ્રાણિ રાજ્યં કૃત્વા મહીપતિઃ ।
અભિષિચ્ય સુતં જ્યેષ્ઠં આદિરાજ્યે ગુણોત્તરમ્ ॥

૧૦૧. આદિસિદ્ધાત્ અનુપ્રાપ્ય સિદ્ધિમાયુષ્કરીં પરામ્ ।
અદ્યાપિ વર્તતે રાજા કૃતકૃત્યો હિમાચલે ॥

૧૦૨. ઇત્થં મલયજા પુણ્યા સર્વપાપપ્રણાશિની ।
અનપત્યત્વસન્તાપાત્ મોચયામાસ ભૂપતિમ્ ।
ભૂયોઽપિ સિદ્ધિમતુલાં પ્રાદાત્ ભક્તાનુકમ્પિની ॥

૧૦૩. યસ્ત્વેનામઘશમનીમશેષજન્તોઃ
આશ્ચર્યાત્ અમૃતમયીં કથાં પુરાણીમ્ ।
યે શૃણ્વન્ત્યપિ ચ પઠન્તિ ભક્તિયુક્તાઃ
સઙ્કલ્પોદયકરણી તથૈવ તેષામ્ ॥

૧૦૪. શ્રીમદ્રાઘવતીર્થકલિકામાયુષ્કરીમન્વહં
યે શૃણ્વન્તિ કથામિમાં કલિમલધ્વંસનૈકોક્તામ્ ।
તેષાં દોષવિવર્જિતા ભવતિ સત્સન્તાનસમ્પત્ફલા
ભોગાન્તે પરમાગતિશ્ચ નિયતા નિર્વાણસૌખ્યાવહા ॥

ઇતિ પઞ્ચપઞ્ચાશઃ અધ્યાયઃ । Pro.Total = 5138 + 104 = 5242.

## ષટ્પઞ્ચાશઃ અધ્યાયઃ

વિષ્ણુવનમહિમવર્ણન મ્ ।

૧. શ્રી શઙ્ખઃ –

અથાન્યદપિ વક્ષ્યામિ તામ્રાયાઃ તીર્થવૈભવમ્ ।
યસ્યૈકદેશશ્રવણાદપિ મર્ત્યો ન શોચતિ ॥

૨. યદેતત્ શ‍ૃણ્વતાં પુણ્યમાખ્યાનમમમૃતોદયમ્ ।
ન મનો યાતિ માલિન્યમાશાપાશે ન રજ્યતે ॥

૩. તામિમાં કલિદોષઘ્નીં કથામાદિગુરોર્હરેઃ ।
ઉચ્યમાનં મયા ભક્ત્યા સમાકર્ણય ભૂપતે ॥

૪. તસ્માત્ કિઞ્ચિત્ પુરોભાગે ક્રોશમાત્રમતીત્ય તુ ।
ક્ષેત્રમભ્યુદયાકારં જન્તૂનાં શ્રાન્તિનાશનમ્ ॥

૫. સમન્તાત્ યોજનાયાતં તેજિષ્ઠમિતિ કીર્તિતમ્ ।
યત્ર ચિત્રા નદી પુણ્યા તામ્રામભ્યેતિ પાવનીમ્ ॥

૬. યત્ર પાશાવતી નામ પુત્રી સાન્તપનસ્ય સા ।
તપસ્તપ્ત્વા ચિરં કાલં નદીભૂતા શિવાજ્ઞયા ॥

૭. સઙ્ગતા મણિમાત્રાસીત્ લોકાનાં હિતકામ્યયા ।
યત્ર વિષ્ણુઃ તપસ્તપ્ત્વા ત્રિવિક્રમકૃતોદ્યમઃ ॥

૮. બ્રહ્માણ્ડકુહરીપૂર્તિં સ્વયા મૂર્ત્યાવ્યવર્ત સઃ ।
તદાદિ મુનયઃ ક્ષેત્રં જગુર્વિષ્ણુવનમિતિ ॥

૯. તસ્યાસ્ય ક્ષેત્રમુખ્યસ્ય માહાત્મ્યં સાગરોપમમ્ ।
વાચામગોચરં મન્યે બહુત્વાત્ પૃથિવીપતે ॥

૧૦. ઇતિ વ્યાહરતઃ તસ્ય મહતઃ શઙ્ખયોગિનઃ ।
વીરસેનઃ સમાકર્ણ્ય વિસ્મિતો વાક્યમબ્રવીત્ ॥

૧૧. અત્ર કશ્ચિત્ મહાયોગિન્ ચિત્રં ચિત્રાદિવેદિતમ્ ।
બ્રાહ્મણસ્ય સુતા કેયં નામ્ના પાશાવતીરિતા ॥

૧૨. કથં તપસ્સમાધત્તે નદીભૂતા શિવાજ્ઞયા ।
એતત્સર્વમશેષેણ વિસ્તરાત્ વક્તુમર્હસિ ॥

૧૩. શઙ્ખઃ –

શ્રુણુ ભૂમિપતે ચિત્રમાખ્યાનમઘનાશનમ્ ।
ઇદં વિષ્ણુવનં નામ ખ્યાતં ક્ષેત્રમનુત્તમમ્ ॥

૧૪. અત્ર વિષ્ણુઃ તપસ્તપ્ત્વા વર્ષાણામયુતં ત્રયમ્ ।

દેહવૃદ્ધિકરીં શક્તિં સંપ્રાપાભીપ્સિતોદયામ્ ॥

૧૫. તદા બ્રહ્મમુખાઃ દેવાઃ ઋષયશ્ચ સનાતનાઃ ।
પ્રશશંસુર્વિષ્ણુવનં તેજિષ્ઠમિતિ વિસ્મિતાઃ ॥

૧૬. ઉપાખ્યાનમિદં નદ્યાઃ પાશાવત્યાઃ શ્રુણુ પ્રભો ।
પુરા વસિષ્ઠો ભગવાન્ કદાચિત્ કાર્યગૌરવાત્ ॥

૧૭. વરુણસ્યાન્તિકં ગત્વા પિતરં તં પ્રણમ્ય સઃ ।
ઉવાસ કતિચિત્ કાલં વરુણેનાનુમોદિતઃ ॥

૧૮. સ તં દૃષ્ટ્વા કોશગૃહં વરુણસ્ય મહાત્મનઃ ।
અસઙ્ખ્યેયધનાવિષ્ટમપારમણિસઞ્ચયમ્ ॥

૧૯. યસ્યૈકસ્યસ્પર્શનેન ભવેત્ મર્ત્યો નિરામયઃ ।
યચ્છાયાસઙ્ગમાત્ એવ નરો ભૂરિબલો ભવેત્ ॥

૨૦. યત્ર સ્થિતેન મણિના કર્ણાસક્તેન માનવઃ ।
આકલ્પજીવી ભવતિ રૂપયૌવનસમ્પદા ॥

૨૧. એવં ભૂતૈર્મહારત્નૈઃ પુઞ્જીકૃતમિતસ્તતઃ ।
દૃષ્ટ્વા રાગાભિવિષ્ટેન મનસા મુનિપુઙ્ગવઃ ॥

૨૨. રત્નાનિ કતિચિત્ દિવ્યાન્યાદાય સ્વકમણ્ડલૌ ।
વિનિષ્ક્રાન્તઃ કોશ્ગૃહાત્ સ્વાશ્રમાય પ્રતસ્થિવાન્ ॥

૨૩. પાશશક્તિઃ પાશપાણેઃ દૃષ્ટ્વા ચૌર્યેણ તદ્ધનમ્ ।
ગૃહીત્વા પ્રતિયાન્તં તં બબન્ધ મુનિપુઙ્ગવમ્ ॥

૨૪. બદ્ધો વરુણપાશેન નિશ્ચેષ્ટઃ સમપદ્યત ।
એવં વ્યાવેષ્ટમાનં તં ક્લિશ્યમાનં તતસ્તતઃ ॥

૨૫. યદૃચ્છયાગતો દેવો વરુણો યાદસાં પતિઃ ।
અદૃશ્યત તતો ભૂમૌ લુઠન્તં સ્વસુતં મુનિમ્ ॥

૨૬. તસ્મૈ ઋચમિમં દત્વા પુણ્યાં પાપવિમોચનીમ્ ।
ઋગ્વેદસમુદ્ભૂતશાખાસ્થાનવિહારિણીમ્ ॥

૨૭. કૃપયા મોચયામાસ તદ્બન્ધાત્ ભૂરિકર્શનાત્ ।
ઇદમાહ વચો ધર્મ્યં શ્રુત્યન્તોલ્લાસિતં હિતમ્ ॥

૨૮. તાત વત્સ કૃતં દોષં ચૌર્યં પરધનસ્ય હિ ।
લધિષ્ઠં કુરુતે મર્ત્યં નિરયાવાસકારકમ્ ॥

૨૯. ઈદૃશં નૈવ કર્તવ્યં ગચ્છ તાત યથાસુખમ્ ।
ઇત્થં સમનુશાસ્યૈનં દત્વા રત્નાનિ ભૂરિશઃ ॥

૩૦. પ્રેષયામાસ સસ્નેહં પરિષ્વજ્ય સ્વમાશ્રમમ્ ।
તતો દીનમના ભૂત્વા હ્રિયા કિઞ્ચત્ અવાઙ્મુખઃ ॥

૩૧. તસ્માત્ લોકાત્ વિનિષ્ક્રમ્ય સંપ્રાપ નિજમાશ્રમમ્ ।
દિવાનિશં ચિન્તયાનો વિનિદ્રઃ સૌખ્યવર્જિતઃ ॥

૩૨. ચકાર ચિન્તાં ભૂયોઽપિ સ્વાશ્રમાન્તઃ સ્વયં વસન્ ।
પિતુર્ધનં હિ પુત્રાણાં સાધારણમિતિ સ્મૃતમ્ ॥

૩૩. પિતુર્ધનાપહરણદોષો નાસ્તિ સુતસ્ય હિ ।
ઇતિ શંસન્તિ મુનયઃ સર્વત્ર બ્રહ્મવાદિનઃ ॥

૩૪. તસ્માત્ નિરાગસમહો માં દણ્ડયતિ તામસી ।
પાશશક્તિઃ ઇયં દુષ્ટા તત્ફલં પ્રાપ્નુયાત્ ઇતિ ॥

૩૫. નિશ્ચિત્ય મનસા ચૈવં વસિષ્ઠઃ તાં શશાપ સઃ ।
અયિ પાપે મૂઢચિત્તે સ્વધનાહરણેન મામ્ ॥

૩૬. પાપં મત્વા તુ દુર્ધર્ષે નિબન્ધયસિ નિર્દયા ।
તેન પાપેન ઘોરેણ મર્ત્યા ભવ મૂઢધીઃ ॥

૩૭. ઇત્થં વસિષ્ઠશાપેન કર્શિતા પાશદેવતા ।
નિર્ગત્ય વરુણાલ્લોકાત્ ભૂમિમાપાત્ર ભારતીમ્ ॥

૩૮. ભારદ્વાજાત્મજો ભૂતઃ મુનિઃ સાન્તપનાભિધઃ ।
દદર્શ દુઃખિતામેનામસ્રવારામ્બુનિર્ઝરામ્ ॥

૩૯. સાન્તપનઃ -કા ત્વં કુતસ્સમાયાતા કા ચિકીર્ષા તવાપરમ્ ।
ઇતિ પૃષ્ટા પાશશક્તિઃશોકં તં વિનિગૃહ્ય સા ॥

૪૦. તસ્મૈ વૈ કથયામાસ શાપાત્ અભ્યાગતં ભયમ્ ।
તદશેષં સમાકર્ણ્ય પ્રીણયિત્વા પુનઃપુનઃ ॥

૪૧. ઉવાચ વચનં ધીમાન્ તસ્યાઃ પ્રિયચિકીર્ષયા ।
મુનિઃ –

માસ્તુ શોકરયો ભદ્રે પ્રીતા ભવ શુચિસ્મિતે ॥

૪૨. મત્પુત્રી ભવ માધવ્યાં શોકમોક્ષં કરોમ્યહમ્ ।
ઇત્યુક્ત્વા મુક્તશોકા સા તત્પુત્રી સમજાયત ॥

૪૩. વવૃધે સા પિતુર્ગેહે માત્રા પિત્રાનુલાલિતા ।
કૃપયા ગુરુણા દત્તા વિદ્યેવ પરિવર્ધિતા ॥

૪૪. અવાપ શૈશવાત્ કિઞ્ચિત્ આમૃષ્ટનવયૌવના ।
વિજહારાશ્રમારામે સખીભિશ્ચ સમન્વિતા ॥

૪૫. અદ્રાક્ષીત્ કોટરાત્ કોઽપિ વ્યાલઃ વિષબલોલ્બણઃ ।
અભ્યેત્ય બાલામદશત્ તેન તસ્યાઃ કલેવરમ્ ॥

૪૬. દુર્વર્ણં કર્કશં કુબ્જં શવપીઠમભૂત્ નૃપ ।
તં દૃષ્ટ્વા સ મુનિર્દુઃખાત્ ક્ષણં સન્તપ્ય ચાત્મનિ ॥

૪૭. ગૃહમાનીય તાં બાલાં સાન્ત્વયામાસ પુત્રિકામ્ ।
ચિન્તયામાસ મતિમાન્ કિં કર્તવ્યમતઃ પરમ્ ॥

૪૮. એનાં કુરૂપિણીં કન્યાં નેચ્છન્તિ મુકિપુત્રકાઃ ।
ભવિતવ્યમિદં કર્મ ફલમસ્યા નિરૂપિતમ્ ॥

૪૯. તસ્માદિમામુપાયેન તારયામ્યાપદસ્સુતામ્ ।
ઇતિ નિશ્ચિત્યચિત્તોઽસૌ મુનિઃ સાન્તપનઃ સુધીઃ ॥

૫૦. તસ્યૈ સ દીક્ષાવિધિના શૈવીં પઞ્ચાક્ષરાં શુભામ્ ।
વિધિનોપાદિશત્ સાઙ્ગાં ધ્યાનસઙ્કલ્પપૂર્વિકામ્ ॥

૫૧. સાપિ પિત્રેરિતાં વિદ્યાં પ્રાપ્ય શોકપરાઙ્મુખી ।
ઉપાસતાશ્રમે તસ્મિન્ નિદ્રાહારવિવર્જિતા ॥

૫૨. તપસ્યન્ત્યાઃ શિવધ્યાનાત્ નિર્ધૂતાશેષકલ્મષે ।
સ્વાત્માનં દર્શયામાસ તસ્યાઃ સ્વાન્તે સદાશિવઃ ॥

૫૩. એવં વર્ષશતે પૂર્ણે શરીરાત્ રોમકૂપતઃ ।
મજ્જન્તઃ રશનાદીર્ઘાઃ કૃષ્ણવર્ણાઃ તતસ્તતઃ ॥

૫૪. તામેવં મુનયો દૃષ્ટ્વા વિસ્મિતાઃ દીર્ઘદર્શિનઃ ।
પાશશક્તિમિતિ પ્રોચુઃ સ્તુવન્તઃ તાં તપોબલાત્ ॥

૫૫. વરં દાતુમભૂત્ અગ્રે તત્તપસ્સદૃશં ફલમ્ ।
અયિ પાશવતિ મહાતપોનિર્ધૂતકલ્મષે ॥

(ઈશ્વરઃ સમારૂઢઃ દેવગણૈઃ પ્રમથૈશ્ચસમન્વિતઃ ।)
૫૬. પ્રીતોઽસ્મિ તપસેદાનીં તવ સન્તુ મનોરથાઃ ।
ત્વં પુરા પાણિપદ્મસ્થારશના પાશપાણિનઃ ॥

૫૭. વસિષ્ઠશાપાત્ સંપ્રાપ્તમર્ત્યત્વમવિદુસ્સહા ।
મદ્દર્શનમિદં ભદ્રે શાપાન્તં વિદ્ધિ નિશ્ચયમ્ ॥

૫૮. ઇતઃ પરં ત્વયા કાર્યં અસ્મત્પ્રીતિવર્ધનમ્ ।
દ્રોણાખ્યસ્ય મુનેઃ પત્ની દેવલેતિ પતિવ્રતા ॥

૫૯. કુબેરભવનં યાતે યજ્ઞાર્થં ચ નિમન્ત્રિતે ।
સ્વભર્તરિ વ્રતપરે તિષ્ઠન્તી સા નિજાશ્રમે ॥

૬૦. શાપાત્ બૃહસ્પતેઃ કોઽપિ ગન્ધર્વઃ ચિત્રકાર્મુખઃ ।
રક્ષોભૂત્વા ચચારેમાં પૃથિવીં કામમોહિતઃ ॥

૬૧. કદાચિત્ સ્વાઙ્ગણે સુપ્તા બન્ધુભિઃ સહ લાલસા ।
યદૃચ્છયૈનામાલોક્ય સદ્યઃ કામવશં ગતઃ ॥

૬૨. આદાય તામઙ્કેન રાવણો જાનકીમિવ ।
અશ્વારૂઢઃ પથા રાત્રૌ તરસા નિર્જગામ સઃ ॥

૬૩. શિલાકર્કશતદ્ગાત્રં સ્પૃશન્ વેદનયા ભૃશમ્ ।
નિર્મુક્તનિદ્રા સા તન્વી વેપમાના ભૃશાતુરા ॥

૬૪. કોપાગ્નિદીપ્તજ્વાલાભ્યાં લોચનાભ્યાં વિલોકયન્ ।
તદ્દૃષ્ટિપાતમાત્રેણ તદ્રક્ષો ભસ્મસાદભૂત્ ॥

૬૫. સા નિર્જને ઘનારણ્યે તમસ્તોમાનુરઞ્જિતે ।
વિચાર્ય બુધ્યા ધર્મજ્ઞા તપોમૂર્તિમભીપ્સતી ॥

૬૬. અયોગ્યમશુચિપ્રાયમેતદસ્થિકલેવરમ્ ।
રક્ષસા પાપરૂપેણ દૃષ્ટઃ કામાતુરેણ હિ ॥

૬૭. તસ્માદ્ભર્તુર્ધર્મમૂર્તેઃ અયોગ્યા નાત્ર સંશયઃ ।
શુનાલીઢં હિ પર્યુષ્ટં નૈવ યોગ્યં યથા ભવેત્ ॥

૬૮. ઇતિ નિશ્ચિત્ય સા તન્વી યોગજ્ઞા યોગવિદ્યયા ।

વિસૃજ્ય દેહં કલુષં વાતસ્કન્ધાત્ર વર્તતે ॥

૬૯. મત્પ્રિયાર્થં ત્વયા ભદ્રે તસ્યાઃ પ્રીતિવિધિત્સયા ।
તવ ધર્માભિવૃદ્ધ્યર્થં કુરુ મે વચનં શુભમ્ ॥

૭૦. પ્રવાહબહુલા ભૂત્વા નદી પાપપ્રણાશિની ।
પતિવ્રતાયાઃ તસ્યૈતત્ આદાય ચ કલેવરમ્ ॥

૭૧. પુણ્યે મલયજાતોયે ક્ષણાત્ પાપાપહારિણિ ।
વ્યુક્ષિપ ત્વં વેગવતી ભૂત્વા તોયપ્રવાહિની ॥

૭૨. તત્તીર્થસઙ્ગાત્ ભૂયોઽપિ દેહં પ્રાપ્ય મનોહરમ્ ।
અનુગચ્છતુ ભર્તારં શુચિભૂતા મુનેઃ સતી ॥

૭૩. ત્વં ચાપિ પૂતા તીર્થેન તામ્રાયાઃ દિવ્યરૂપિણા ।
વરુણસ્ય કરં પ્રાપ્તા સન્તોષમધિગચ્છસિ ॥

૭૪. શઙ્ખઃ –
ઇતિ દેવગિરા રાજન્ સૈષા પાશવતી વધૂઃ ।
તોયરૂપાભવત્ સદ્યો નાનાયાદોગણાવૃતા ॥

૭૫. તરઙ્ગિણી શૈવલિની સફેનાવર્તમણ્ડલા ।
મુનિપત્ન્યાઃ સમાધાય વપુઃ શુષ્કતરં તદા ॥

૭૬. સ્રોતસાકૃષ્ય દેહેન તામ્રાયાં સા વ્યચિક્ષપત્ ।
સદ્યઃ તત્તીર્થસઙ્ગેન પવિત્રિતમિદં વપુઃ ॥

૭૭. અઙ્ગીચકાર સા પત્ની દ્રોણાખ્યસ્ય મહાત્મનઃ ।
રૂપયૌવનસંયુક્તા સમુત્તસ્થૌ મહાજલાત્ ॥

૭૮. તાવદાવિરભૂત્ વ્યોમ્ના સુગન્ધા પુષ્પરૂપિણી ।
વૃષ્ટિર્નાનાગુણચ્છાયા નાનામોદૈકમેદુરા ॥

૭૯. બ્રહ્મરુદ્રમુખાઃ તાવદ્દેવાઃ ચ સહ ગુહ્યકૈઃ ।
ગન્ધર્વયક્ષપ્રમુખાઃ સિદ્ધવિદ્યાધરાદયઃ ॥

૮૦. દેવર્ષયો નારદાદ્યાઃ સનકાદ્યાઃ ચ યોગિનઃ ।
વિસ્મિતાઃ તે સમાજગ્મુઃ પ્રશંસન્તઃ પરસ્પરમ્ ॥

૮૧. ત્રિણદીસઙ્ગમં દૃષ્ટ્વા મહાપૂરપ્રવર્તિતમ્ ।
નિર્મમજ્જુઃ તથા તીર્થે પાવને પરમાદ્ભુતે ॥

૮૨. સમવાયોઽપિ મર્ત્યાનાં સ્વનતામુદપદ્યત ।
દ્રોણોઽપિ મુનિશાર્દૂલઃ પ્રાપ્ય પત્નીં પતિવ્રતામ્ ॥

૮૩. હરેરાદિગુરોઃ તાવત્ આવિર્ભૂતાત્ વરાન્ બહૂન્ ।
આદેશાત્ દેવદેવસ્ય સપત્નીકો યયૌ ગૃહમ્ ॥

૮૪. વરુણસ્ય કરં પ્રાપ શુદ્ધાઙ્ગી પાશદેવતા ।
ઇત્થમત્યદ્ભુતં દૃષ્ટ્વા માહાત્મ્યં વિસ્મયાવહમ્ ॥

૮૫. મૂર્ધ્નાવગાહ્ય તત્તીર્થં પૂતાત્માનઃ સુરાસુરાઃ ।
કૃતાર્થયન્તઃ ચાત્માનં જગ્મુરેવ યથાગતમ્ ॥

૮૬. બ્રહ્મરુદ્રૌ હરિં તત્ર સમ્પૂજ્ય સહ દેવતૈઃ ।
યયતુઃ સ્વં પદં હૃષ્ટૌ સહ દેવૈઃ સહાગતૈઃ ॥

૮૭. તેષાં સમીપ્સિતાન્ કામાન્ દત્વા તત્રાન્તરાવિશત્ ।
એવં પાશવતી નદ્યાઃ ચરિત્રં કથિતં વિભો ॥

૮૮. ભૂયોઽપ્યભિનવા પુણ્યા કથા તત્તીર્થશંસિની ।
ઉચ્યમાના મયેદાનીં શ્રોતવ્યા શ્રુતિચોદિતા ॥

૮૯. ઇત્થં નિગત્ય મહતા ત્રિણદીસમાજ-
સૌભાગ્યકીર્તિકલિકામિવ કલ્પવલ્લી ।
યોગીશ્વરઃ પુનરપારકૃપાબ્ધિરુચ્ચૈઃ
ગાથામિમામકથયત્ કલુષૈકહન્ત્રીમ્ ॥

૯૦. અસ્ય ક્ષેત્રસ્ય માહાત્મ્યં રાજન્ વાચામગોચરમ્ ।
યતો નારાયણઃ સાક્ષાત્ ક્ષેત્રરૂપેણ વર્તતે ॥

૯૧. તામ્રાપિ સર્વપાપઘ્ની નારાયણપરાયણા ।
આમોદવર્ણવૈશિષ્યં માર્દવં ચ રસોચ્ચયમ્ ॥

૯૨. એકસ્મિન્ કુસુમે ભાતિ યથા પુણ્યસ્ય વૈભવાત્ ।
તથૈવ હરિણાવિષ્ટં તામ્રાતોયવિભૂષિતમ્ ॥

૯૩. સિદ્ધાનાં નિલયં સાક્ષાત્ મહામુનિજનાસ્પદમ્ ।
ગુણોત્કૃષ્ટમિદં મન્યે ક્ષેત્રં પાપપ્રણાશનમ્ ॥

૯૪. યત્ર વિષ્ણુકરામ્ભોજભૂષણોઽપિ સુદર્શનમ્ ।

સ્ત્રિયં હત્વા તદા હત્યાક્લેશિતો ગુરુચોદિતઃ ॥

૯૫. અશ્વમેધાવભૃથ્યેન સ્નાનેનાપાસ્તકલ્મષઃ ।
ભૂયો નારાયણકરં સંપ્રાપ પરમાદ્ભુતમ્ ॥

ઇતિ ષટ્પઞ્ચાશઃ અધ્યાયઃ । Pro.Total = 5242 + 95 =5337.

## સપ્તપઞ્ચાશઃ અધ્યાયઃ

વિષ્ણુવને દોષનિલયપ્રસ્તાવઃ ।

૧. રાજા –
ભગવન્ યોગિનાં વર્ય સર્વજ્ઞ કરુણાનિધે ।
કદા સુદર્શનઃ સાક્ષાત્ નારાયણકલાત્મકઃ ॥

૨. કિમર્થમવધીત્ નારીં સા હત્યા વિશ્વધારિણમ્ ।
કથમક્લેશયત્ વહ્નિં પાલિકેવ પિપીલિકા ॥

૩. એતદ્વિસ્તાર્ય વૃત્તાન્તં બ્રહ્મન્ આખ્યાતુમર્હસિ ।
ઇત્થમાદૃત્ય તેનૈવ પ્રણતેન મહીભુજા ॥

૪. પૃચ્છ્યમાનો મુનિઃ પ્રીતો રાજાનમિદમબ્રવીત્ ।
મુનિઃ –
રાજન્ તવ મતિઃ શુદ્ધા કથાપીયૂષતર્પિતા ॥

૫. ન તૃપ્તિમુપયાત્યેષા બાલિકેવ રસાયને ।
નૈતત્ ચિત્રમિદં મન્યે શુદ્ધચિત્તસ્ય તે વિભો ॥

૬. પુનર્ધર્મેઽપિ શુશ્રૂષા હૂયમાનહુતાશવત્ ।
શુદ્ધો વિશુદ્ધચિત્તોઽસિ ધર્માસક્તોઽપિ ધર્મજઃ ॥

૭. તસ્માત્ મનો હિ રાજેન્દ્ર ધર્મેષુ પરિવર્તતે ।
બહુભિઃ જન્મભિઃ પ્રાપ્તૈઃ સુકૃતૈઃ શ્રદ્ધયા કૃતૈઃ ॥

૮. લભતે જન્મ મર્ત્યાનાં સત્કુલે લોકવિશ્રુતે ।
તમેનમનુયાત્યેવ શ્રદ્ધા પત્નીવ ધર્મતઃ ॥

૯. સન્તુષ્ટોઽસ્મ્યનુરક્તોઽસ્મિ તવ શુશ્રૂષયાનયા ।
વક્ષ્યામિ રાજન્ કલ્યાણીં કથામેનાં પુરાતનીમ્ ॥

૧૦. યસ્યાં શ્રુતિગતાયાં તુ ન પાપો મર્ત્યમાવિશેત્ ।
પુરા દેવાસુરયુદ્ધે નિહતા દૈત્યદાનવાઃ ॥

૧૧. નિઃશેષાઃ સાગરં જગ્મુઃ હતશેષાઃ ચ કેચન ।
દિતિર્માતા દુઃખિતાર્તા શુક્રં શરણમાવિશત્ ॥

૧૨. દિતિઃ –
ભગવન્ કરુણામૂર્તે ભૃગુવંશશિખામણે ।
ત્વં ગુરુઃ સર્વદૈત્યાનાં ત્વમેવ પરમાગતિઃ ॥

૧૩. ત્વદનુગ્રહપીયૂષરક્ષિતા દાનવાઃ પુરા ।
અકારણમિદં જાતં નૈરાશ્યં તેષુ તે ગુરો ॥

૧૪. પતિત્વા ઘોરદુષ્પારે ગમ્ભીરે શોકસાગરે ।
ત્રાતુમર્હસિ માં દીનામનાથામિવ કર્શિતામ્ ॥

૧૫. ઇતિ શોકાતુરાં દેવીં દૃષ્ટ્વા સકરુણં મુનિઃ ।
હેતુભિઃ સાન્ત્વયામાસ મહીમિવ વલાહકઃ ॥

૧૬. તાવદન્તર્ગૃહગતા કાવ્યમાતા યશસ્વિની ।
શરદ્વતીતિ વિખ્યાતા વૃદ્ધાતીવ તપસ્વિની ॥

૧૭. આકર્ણ્ય કર્ણવિષમાં નારાચાદપિ દુઃસહામ્ ।
મર્મૈકકૃન્દની તસ્યાઃ પ્રલાપરચનાં ગિરમ્ ॥

૧૮. કોપાવિષ્ટા કાવ્યમાતા કમ્પમાના ઘનોપમા ।
ઉન્નિદ્રૈઃ ધવલૈઃ દીર્ઘૈઃ કેશજાલૈઃ ઇતસ્તતઃ ॥

૧૯. ઉદ્યન્ નિશાકરકરૈઃ ઉદયાદ્રિતટી યદા ।
કુચાભ્યામતિપીનાભ્યાં કમ્પિતાભ્યાં મુહુર્મુહુઃ ॥

૨૦. તટીવ મન્થરાદ્રેઃ તુ ભ્રામ્યમાણા સુરાસુરૈઃ ।
કોપારુણાભ્યાં મુઞ્ચન્તી બાષ્પનિર્ઝરમ્ ॥

૨૧. દિતિમાહૂય સન્તોષ્ય વ્યામૃજ્યાસ્યાસ્તુ લોચને ।
કરાભ્યાં પરિમૃજ્યાઙ્ગં પ્રીણયન્તી જગાદ તામ્ ॥

૨૨. અલં વત્સે શુચા મોહં જહિ કાર્યાર્થદર્શનમ્ ।
નિહતા યેન તે પુત્રાઃ ચક્રેણાતિબલીયસા ॥

૨૩. તમહં નાશયિષ્યામિ સહ સૈન્યૈર્મરુદ્ગણૈઃ ।

નાલં ત્રિલોકી મે દગ્ધું કબલાય ભવિષ્યતિ ॥

૨૪. ચરાચરગણં જીર્ણં બ્રહ્માણ્ડં સચતુર્મુખમ્ ।
ઉત્સહે કબલીકર્તું પશ્ય મે તપસો બલમ્ ॥

૨૫. કરોત્યનિદ્રં ભુવનં મા સન્તુ મરુદ્ગણાઃ ।
દૈતેયાન્ દાનવાન્ શિષ્ટાન્ ભીતાનગ્રે પલાયિતાન્ ॥

૨૬. પુનેવાનયિષ્યામિ તેષાં દાસ્યામિ વૈ જગત્ ।
ભવન્તુ દૈત્યાઃ સ્વર્ગસ્થાઃ દિગીશાઃ ચાધિકારિણઃ ॥

૨૭. ઇન્દ્રત્વમપિ ચન્દ્રત્વં પ્રાપ્નુવન્તુ સુતાઃ તવ ।
ત્વાં ત્રૈલોક્યાધિપત્યશ્રીરુપતિષ્ઠત્વનામયા ॥

૨૮. ઇત્યુક્ત્વા યોગિની વૃદ્ધા કાવ્યમાતા તપોબલાત્ ।
વવૃધે દિવ્યસઙ્કાશા પૂરયન્તી દિશો દશ ॥

૨૯. આચ્છાદ્ય ગગને વ્યાપ યોજનાનાં સહસ્રશઃ ।
વ્યાપ્ય લોકમિદં કૃત્સ્નમુપવિષ્ટા સમન્તતઃ ॥

૩૦. ચન્દ્રાદિત્યૌ સનક્ષત્રૌ કાલચક્રાનુવર્તિનૌ ।
અભૂતામપિ સંવૃત્તાવતસ્થાત્ કુચયોર્વિભો ॥

૩૧. અનેકયોજનાયામમાસ્યં વિસ્તાર્ય રોધસી ।
ઇન્દ્રાદીનાં દમં ચક્રે ભક્ષિતં બડવાગ્નિવત્ ॥

૩૨. એતદ્દૃષ્ટ્વા તદા ભીતાઃ દેવા ઇન્દ્રપુરોગમાઃ ।
ચતુર્મુખં પુરસ્કૃત્ય વૈકુણ્ઠાય પ્રતસ્થિરે ॥

૩૩. તત્ર ગત્વા જગન્નાથં પુરુષં પૂર્વપૂર્વિકમ્ ।
શયાનં શેષપર્યઙ્કે સનકાદ્યૈઃ મહાત્મભિઃ ॥

૩૪. શ્રિયા ભૂમ્યા ચ ગાયત્ર્યા વાક્યૈરુપનિષદ્ગણૈઃ ।
ઇતસ્તતઃ સ્તૂયમાનં યોગિનામઙ્ઘ્રિપઙ્કજમ્ ॥

૩૫. દૃષ્ટ્વા પ્રણમ્ય તે સર્વે સ્તુત્વા સ્તોત્રૈઃ શ્રુતીરિતૈઃ ।
ઉપસ્થિતમિદં ઘોરં ભયં તસ્મૈ વ્યજિજ્ઞપન્ ॥

૩૬. તચ્છ્રુત્વા ભગવાન્ વિષ્ણુઃ અનુકમ્પામૃતાર્ણવઃ ।
વ્યાજહાર ગિરા રાજન્ મેઘનાદગભીરયા ॥

૩૭. શ્રી ભગવાન્ –
નાથે મયિ કથં દેવાઃ યતો વૈ ભયમાગતમ્ ।
ક્ષણં નાશમિયં યાતુ કાવ્યમાતાતિકર્કશા ॥

૩૮. યુષ્માકમચિરાદેવ ભવિષ્યન્તુ મનોરથાઃ ।
ઇત્યુક્ત્વા સ્વકરાગ્રસ્થં ચક્રરાજં સુદર્શનમ્ ॥

૩૯. પ્રેષયામાસ તરસા તસ્યાઃ શમનહેતવે ।
અનન્તકાલાનલસૂર્યતેજઃ પ્રકાશિતાશેષદિગન્તરાલઃ ॥

૪૦. જગામ વેગાદિવ યત્ર સૈષા વિન્ધ્યાયમાના વવૃધે સમન્તાત્ ।
છિત્વા શિરોઽસ્યાસ્સહસાતિશીઘ્રં કૈલાસવિન્ધ્યાચલકૂટતુલ્યમ્ ॥

૪૧. વ્યોમ્નોજ્જહારાર્કનિભો મહાત્મા સ ચક્રરાજોઽશનિતુલ્યવેગઃ ।
હા હેતિ જલ્પો પરિતોજ્જજૃમ્ભે ભયાતુરાણાં જગતાં સમન્તાત્ ॥

૪૨. ક્રોશત્સુ ભૂતેષુ ભયાકુલેષુ નદત્સુ દેવેષુ મુનીશ્વરેષુ ।
નીત્વા હિ ચરમાદ્રિસાનૌ નિક્ષિપ્ય મૂર્ધાનમતીવ ભિન્નામ્ ॥

૪૩. ભૂયોઽપિ વકુણ્ઠમગાત્ ક્ષણેન સ ચક્રરાજો દનુજાન્તકારી ।
ઇત્થં હતાયાં તસ્યાં તુ લોકાશ્ચ સુખિનોઽભવન્ ॥

૪૪. પ્રસાદ્ય તમભિષ્ટૂય પુરુષં શેષશાયિનમ્ ।
અનુજ્ઞાતા બ્રહ્મમુખાઃ સ્વાનિ સ્વાનિ પદાન્યગુઃ ॥

૪૫. ઇન્દ્રોઽપિ સહ દેવૈશ્ચ ત્રિલોકીમન્વશાત્ વિભુઃ ।
કૃતકૃત્યો મહાતેજાઃ ચક્રરાજઃ સુદર્શનઃ ॥

૪૬. પુનઃપ્રતસ્થે હૃષ્ટાત્મા વૈકુણ્ઠાયાં પરાધ્વના ।
ઉલ્લઙ્ઘ્ય સૂર્યપદવીં સોમાદીનાં તથા પદમ્ ॥

૪૭. અતીત્ય ચ ધ્રુવં વર્ત્મ તથા સપ્તર્ષિમણ્ડલમ્ ।
ન શશાક પરં ગન્તુમાસ્કન્ધઃ પક્ષિરાટ્ ઇવ ॥

૪૮. સ્તબ્ધોઽભૂત્ ચક્રરાજોઽપિ વૃથાભૂતમનોરથઃ ।
ચિન્તાં ચકાર દુઃખેન માર્ગભ્રષ્ટ ઇવાધ્વગઃ ॥

૪૯. ગતિર્મે કિમિયં રુદ્ધા કેન વા હન્તુ દુર્બલઃ ।
કૃતં મયા સ્વકૃત્યં કિમાદ્યઃ કૃતમદ્ય વા ॥

૫૦. કર્મણા સ્વેન ભગવાન્ સન્તોષમધિગચ્છતિ ।

ઇતિ ચિન્તયતઃ તસ્ય પર્વતો ભગવાન્ ઋષિઃ ॥

૫૧. કપિલાખ્યો વાસુદેવઃ દૈવાત્ આવિરભૂત્ મહાન્ ।
તં દૃષ્ટ્વા પરમં ક્લાન્તં સાક્ષાત્ નારાયણાત્મકમ્ ॥

૫૨. પ્રણમ્ય પાદયોર્ભક્ત્યા જગામ વિનયોજ્જ્વલઃ ।
ચક્રરાજઃ -ભગવન્ સ્વાગતં તેઽસ્તુ ત્વામહં શરણં ગતઃ ॥

૫૩. ઉપરિષ્ટાત્ ગતિઃ કેન નિરુદ્ધા હેતુના મુને ।
એતત્સર્વમશેષેણ વક્તુમર્હસિ સામ્પ્રતમ્ ॥

૫૪. ઇતિ પૃષ્ટઃ તદા તેન ત્રિકાલજ્ઞો મહામુનિઃ ।
વ્યાજહાર પુનર્વાક્યં ચક્રરાજાય ધીમતે ॥

૫૫. કપિલઃ –
સાધુ સર્વજગત્કર્ત્રા નિયુક્તઃ કાર્યગૌરવે ।
ત્વયા તત્સાધિતં સર્વં લોકાનામુપકારકમ્ ॥

૫૬. તથાપિ ગર્હિતં કર્મ ભવતા સ્ત્રીવધં પ્રભો ।
કૃતં યત્તેન હત્યા ત્વામુપવિષ્ટા ભયાવહા ॥

૫૭. તસ્માત્ તત્પાપશાન્ત્યર્થં પ્રાયશ્ચિત્તં યથોચિતમ્ ।
કૃત્વા વિધાનતઃ તસ્માત્ શુદ્ધિમાપ્નો મહામતે ॥

૫૮. અનુગ્રહાત્ મુનેઃ સ્થાનં વૈકુણ્ઠં ગન્તુમર્હસિ ।
ઇતિ તેનેરિતાં વાણીં સમાકર્ણ્ય સ ચક્રરાટ્ ॥

૫૯. ભૂયઃ પ્રણમ્ય પપ્રચ્છ કપિલં યોગિનાં વરમ્ ।
સુદર્શનઃ –
કથં બ્રહ્મન્ વિધાતવ્યં પાપસ્યાસ્યોપશાન્તયે ॥

૬૦. કેન વા વિધિના તત્ર પ્રાયશ્ચિત્તં મમાધુના ।
એતત્સર્વમશેષેણ દાનહોમાગ્નિપૂજનૈઃ ॥

૬૧. જપેન વાથ ધ્યાનેન કેન વા મનુના મુને ।
ઇત્યુક્તઃ ચક્રરાજેન કપિલો યોગિનાં વરઃ ॥

૬૨. તમબ્રવીત્ મહાતેજાઃ પ્રાયશ્ચિત્તં તથોચિતમ્ ।
કપિલઃ –
શ્રુણુ ચક્રેશ્વર વિભો શ્રોતવ્યં સાવધાનતઃ ॥

૬૩. યા પરા પરમા શક્તિઃ જગત્કારણરૂપિણી ।
ઉમા ગૌરીતિ વિખ્યાતા કમલા ભારતીતિ ચ ॥

૬૪. સર્વમન્ત્રમયી શક્તિઃ સર્વતીર્થૈકરૂપિણી ।
ભક્તિભાજાં ફલાકારા સૂક્ષ્માકારા દુરત્યયા ॥

૬૫. બ્રહ્મરુદ્રમુખૈર્દેવૈઃ પૂજ્યમાના દિને દિને ।
સૈષા ભગવતી શક્તિઃ મૂલપ્રકૃતિસંજ્ઞિતા ॥

૬૬. ક્લિશ્યમાનં જનં દૃષ્ટ્વા કર્મપાશાનુપાશિતમ્ ।
યાતાયાતં પ્રકુર્વન્તં જન્મં મૃત્યુજરાતુરમ્ ॥

૬૭. પરિત્રાણાય વૈ તસ્ય કર્મવિચ્છેદહેતવે ।
પ્રાર્થિતા શઙ્કરેણાપિ હરિણા વેધસા પુનઃ ॥

૬૮. તેષામભીપ્સિતં કામં પૂરયન્તિ દયાત્મિકા ।
કૃત્વાત્માનં તીર્થરૂપં જાતા મલયનન્દિની ॥

૬૯. તદમ્બુપાનાત્ સ્નાનાત્ વા દર્શનાત્ સ્પર્શનાદપિ ।
મોચયિષ્યે જનં પાપાત્ મુક્તિં દાસ્યામ્યસ્સંશયમ્ ॥

૭૦. ઇતિ કલ્પિત દીક્ષા સા વર્તતે દક્ષિણાપથે ।
તસ્યાઃ તીરે વિષ્ણુવને વિષ્ણુસાન્નિધ્યકારકે ॥

૭૧. ઇષ્ટ્વા વિષ્ણું યથાન્યાયં સ્નાત્વા તસ્યાપિ વારિણિ ।
નિર્મુક્તપાપો ભવિતા નાત્રકાર્યા વિચારણા ॥

૭૨. યત્ર પુત્રાઃ કાશ્યપસ્ય વિશ્વેદેવ ઇતીરિતાઃ ।
પિતૃણામવમન્તારો નષ્ટવીર્યાભવન્ પુરા ॥

૭૩. સ્વર્ગાત્ ચ્યુતાઃ દુઃખેન ગુરું પ્રાપ્ય બૃહસ્પતિમ્ ।
પપ્રચ્છુઃ પાપશાન્ત્યર્થં પ્રાયશ્ચિત્તમનુત્તમમ્ ॥

૭૪. સર્વાનાહૂય દયયા સર્વજ્ઞો ગીષ્પતિર્ગુરુઃ ।
અભ્યષેચયત્ અત્રૈવ તામ્રાયાઃ તીર્થવારિણા ॥

૭૫. તતો નિર્મુક્તપાપાઃ તે સ્વર્ગં પ્રાપુઃ સુખોત્તરમ્ ।
ત્રિણદી સઙ્ગમઃ તસ્માત્ પુણ્યે વિષ્ણુવનાન્તરે ॥

૭૬. દુર્લભં ખલુ મર્ત્યાનાં પાપિનામકૃતાત્મનામ્ ।
ઇતિ બ્રુવતિ વૈ દેવેશે કપિલે યોગિસત્તમે ॥

૭૭. અતીવ વિસ્મયાવિષ્ટઃ ચક્રરાજઃ પ્રસન્નધીઃ ।
મનઃ પ્રસાદ્ય તં શાન્તં વાસુદેવમભાષત ॥

૭૮. ચક્રરાજઃ –
કથં વૈ કાશ્યપસુતાઃ વિશ્વેદેવાઃ ચ સમ્મતાઃ ।
સર્વજ્ઞાઃ ચાવિશેષેણ કથં પાપમકારયન્ ॥

૭૯. આગઃ પિતૃણાં સર્વેષાં કિં કૃતં તૈઃ કૃતાત્મભિઃ ।
કથં તત્પાપશાન્ત્યર્થં તામ્રાયાં સ્નાનમાચરન્ ॥

૮૦. શ્રોતું કાઙ્ક્ષે મહાભાગ સર્વજ્ઞ વદ વિસ્તરાત્ ।
ઇત્થં શ્રીમચ્ચક્રદેવેન પૃષ્ટો યોગી સાક્ષાત્ વિષ્ણુરધ્યાત્મદીપઃ ।
વાચા દેવં પૂજયિત્વા ચ ચક્રં પ્રીતઃ તસ્મૈ વ્યાજહારાઘશાન્તિમ્ ॥

ઇતિ સપ્તપઞ્ચાશઃ અધ્યાયઃ । Pro.Total = 5337 + 80 =5417.

## અષ્ટપઞ્ચાશઃ અધ્યાયઃ

વિષ્ણુવને વિષ્ણુપ્રસાદાત્ વિશ્વેષાં દેવાનાં પિતૃશાપવિમોચનમ્ ।

૧. કપિલઃ –
સાધુ પૃષ્ટો મહાભાગ ત્વયા નારાયણાંશ ભો ।
પ્રીતોઽસ્મિ કૃતકૃત્યોઽસ્મિ યં મામાદૃત્ય પૃચ્છસિ ॥

૨. ત્વમાત્મા જગતાં સાક્ષી મનોબીજેન્દ્રિયાત્મકઃ ।
નિયન્તા પાલકો હર્તા મર્યાદાનાં પ્રવર્તકઃ ॥

૩. ત્વન્નામસ્મરણાદેવ પાપશાન્તિર્નૃણાં ભવેત્ ।
સ એકઃ પુરુષો વિષ્ણુઃ પ્રાપ ચક્રાત્મનાત્મવાન્ ॥

૪. દૈત્યદાનવરક્ષાંસિ કાલે કાલે નિબર્હયન્ ।
પાલયિષ્યસિ દુઃખાબ્ધેઃ જગદેતચ્ચરાચરમ્ ॥

૫. લોકસઙ્ગ્રહમન્વિચ્છન્ પાપસ્યાસ્ય પ્રશાન્તયે ।
કરોષિ નિષ્કૃતિં દેવ સ્વાજ્ઞાસંરક્ષણક્ષમમ્ ॥

૬. તસ્માત્ અત્ર મહાભાગ ત્વદાજ્ઞાકારિણા મયા ।
ઉચ્યતે વિસ્તરાત્ નાથ યથોક્તં શ્રીમતા તથા ॥

૭. ભવતા તત્તથા શ્રુત્વા કર્તવ્યમઘશાન્તયે ।
 આસન્ અદિત્યાં વૈ પુત્રાઃ કાશ્યપસ્ય પ્રજાપતેઃ ॥

૮. વિશ્વેદેવાઃ ઇતિ ખ્યાતાઃ દશ ધર્મભૃતાં વરાઃ ।
 ક્રતુઃ જ્યેષ્ઠો મહાતેજા દ્વિતીયો દક્ષસંજ્ઞકઃ ॥

૯. તૃતીયો વસુ નામા સ્યાત્ સત્યાખ્યઃ તદનન્તરઃ ।
 પઞ્ચમઃ કાલ સંજ્ઞઃસ્યાત્ ષષ્ઠઃ કાલ ઇતીરિતઃ ॥

૧૦. સપ્તમો ધુરી નામાભૂત્ રુચિરષ્ટમ ઉચ્યતે ।
 પુરૂરવઃ સ્યાત્ નવમો દશમો આર્દ્રવાભિધઃ ॥

૧૧. એતે સમેતાઃ સુસ્નિગ્ધાઃ વિચિન્ત્યૈવં હૃદા તથા ।
 સર્વેષામેવ દેવાનાં પિતૃણાં ચ વિશેષતઃ ॥

૧૨. યથા વૈશિષ્ટ્યમસ્માકં ભવિષ્યતિ તપોબલાત્ ।
 કરિષ્યામઃ તથાવ્યગ્રાઃ તપોયત્નં સમાસ્થિતાઃ ॥

૧૩. ઇતિ નિશ્ચિત્ય તે સર્વેઽપ્યનુજ્ઞાં પ્રાપ્યૈવ પિતુઃ ।
 મેરોઃ તુ પૂર્વભાગે તુ ચન્દ્રકૂટસ્ય ચોત્તરે ॥

૧૪. સિદ્ધયોગિમુનીન્દ્રાણાં યોજનાયામવિસ્તૃતાઃ ।
 યત્ર સ્થિતાનાં જન્તૂનાં ધર્માન્ન ચ્યવતે મનઃ ॥

૧૫. આધયો વ્યાધયશ્ચાપિ ક્ષુત્પિપાસા દુરત્યયા ।
 ક્લેશયન્તિ ન તત્રસ્થં ધર્મે ગઙ્ગોદકં યથા ॥

૧૬. હરિદ્રવા નામ નદી વહતે યત્ર પાર્શ્વતઃ ।
 આધિવ્યાધિં ચ મુઞ્ચન્તિ યત્તોયસ્પર્શમારુતૈઃ ॥

૧૭. સિદ્ધિં લભન્તે નિર્વિઘ્નં તિર્યઞ્ચોઽપિ ન સંશયઃ ।
 એતન્માહાત્મ્યં આકર્ણ્ય પિતુરેકાગ્રચેતસઃ ॥

૧૮. તદાશ્રમપદં કૃત્વા તપસ્તેપુસ્સુદારુણમ્ ।
 વાયુભક્ષા નિરાહારા પ્રાણાયામપરાયણાઃ ॥

૧૯. ધ્યાયન્તઃ પરમં ધામ જપન્તઃ પરમં મનુમ્ ।
 સન્નિયમ્યેન્દ્રિયસઙ્ગ્રામમેકરૂપા હ્યવર્તયન્ ॥

૨૦. એવં તપસ્યતાં તેષામન્તરાયવિવર્જિતઃ ।
 અત્યગાન્ નિમિષપ્રાયં વર્ષાણામયુતં ત્રયમ્ ॥

૨૧. વસ્વાદ્યાઃ પિતરઃ તાવત્ સાનુરાગાનુકમ્પયા ।
તેષાં પુરસ્તાત્ આગત્ય વચનં ચેદમબ્રુવન્ ॥

૨૨. પિતરઃ –
વત્સાઃ ભવન્તઃ ક્લિષ્ટાશ્ચ તપસા નિયમૈર્યમૈઃ ।
કુતો હિ કરુણાવદ્ભિઃ યુષ્મત્પ્રિયચિકીર્ષુભિઃ ॥

૨૩. અત્રૈવાભ્યાગતં પ્રીત્યા પિતૃભિર્લોકપૂજિતૈઃ ।
વરાન્ વૃણીધ્વં દાસ્યામઃ શ્રમૈરેભિરલં સુતાઃ ॥

૨૪. ઇતિ તેષાં વચઃ શ્રુત્વા પિતૃણાં સ્નેહપૂર્વકમ્ ।
કુપિતાઃ તે પુનઃ પ્રાહુઃ અસૂયાકૃષ્ટમાનસાઃ ॥

૨૫. વિશ્વેદેવાઃ –
રે રે મદાન્ધાઃ નિર્લજ્જાઃ મૂઢાઃ પણ્ડિતમાનિનઃ ।
ભવન્તો વરદાતારો ન હ્યસ્માકં તપસ્યતામ્ ॥

૨૬. વરદાતા પ્રભુઃ સાક્ષાત્ દાતાસ્માકં જગદ્ગુરુઃ ।
અસ્માન્મનોરથાપૂર્તિઃ ક્રિયતે યેન કેન વા ॥

૨૭. કિં બિડાલઃ પ્રભુર્લોકે કલભાન્ નુ રક્ષણે ।
વયં દેવાઃ શ્રેષ્ઠતમાઃ પૂજ્યાઃ તપસાધિકાઃ ॥

૨૮. અપૂજ્યૈઃ તામસૈઃ મૂઢૈઃ ન હિ રક્ષ્યા વયં ત્વિહ ।
ગચ્છધ્વમાશ્રમાદસ્માત્ મા વિલમ્બોઽસ્તુ નિર્ગુણાઃ ॥

૨૯. ઋષિઃ -ઇત્થમાક્ષેપિતા દેવૈઃ તૈરેતૈઃ પિતરઃ તદા ।
ભૂયો દયાલવઃ ક્ષાન્તાઃ પ્રત્યૂચુઃ વિનયોજ્જ્વલાઃ ॥

૩૦. પિતરઃ –
ભવન્તઃ પુત્રકાસ્માકં પોષ્યા રક્ષ્યાશ્ચ કેવલમ્ ।
પિતરો ગુરવો જ્ઞેયાઃ તથાસ્તુ ગુરુપૂજ્યતા ॥

૩૧. અવમન્ય પિતૄન્ લોકે કઃ પ્રાપ્નોતિ પરં ગતિમ્ ।
બ્રહ્માદ્યાઃ શ્રાદ્ધધર્મેણ શ્રુત્યાદિષ્ટેન વર્ત્મના ॥

૩૨. તસ્માન્ પિતૄન્ સમભ્યર્ચ્ય પ્રાપ્તા માહાત્મ્યમુત્તમમ્ ।
યૂયં લઘિષ્ઠાઃ પાપિષ્ઠાઃ બાલિશાઃ પાપકારિણઃ ॥

૩૩. ભૂયોઽપિ કૃપયા યુષ્માન્ આગઃ કૃત્વાતિદુસ્સહમ્ ।
તપઃફલં પ્રદાસ્યામો માસ્તુ મન્યુરઘોદયઃ ॥

૩૪. ઋષિઃ –
ઇત્થં પિતૄણાં તદ્વાક્યમાકર્ણ્ય વિનયોત્તરમ્ ।
તામસાવિષ્ટચિત્તાઃ તે મદમાત્સર્યદૂષિતાઃ ॥

૩૫. ધિક્કૃત્ય તાન્ પુનઃ તસ્મું કૃત્યામારેભિરે ચ તે ।
નિરાશયા પ્રયાતેષુ તેષુ વસ્વાદિષુ ક્ષણાત્ ॥

૩૬. અવમાનાત્ અઘાત્તસ્માત્ ક્ષીણમાસીત્તપઃફલમ્ ।
વિશ્વેદેવેષુ તેષ્વત્ર પ્રાવિશન્ મતિવિભ્રમઃ ॥

૩૭. મતિભ્રમાત્તપો નષ્ટં નષ્ટે તસ્મિન્ કુતઃ ક્રિયા ।
ક્રિયાહીનેષુ જાગર્તિ પુરુષેષુ દુરત્યયા ॥

૩૮. નિદ્રા કલિપ્રસૂર્ઘોરા ક્ષુત્તૃટ્યોયે યથાક્રમમ્ ।
ભ્રષ્ટાચારા પરિધૂના નિયમધ્યાનવર્જિતાઃ ॥

૩૯. બભ્રમુર્વિપિને તસ્મિન્ અનાથમિવ ગોકુલમ્ ।
એતદ્વિજ્ઞાય ભગવાન્ કાશ્યપઃ કાલધર્મવિત્ ॥

૪૦. બૃહસ્પતિં સમાહૂય સમાભાષ્ય દિવો ગુરુમ્ ।
આચચક્ષે વચો ધર્મ્યં પુત્રાણાં હિતકામ્યયા ॥

૪૧. કાશ્યપઃ –
ભગવન્ ભવતા રક્ષ્યાઃ વિપદઃ ત્રિદિવૌકસામ્ ।
ગતિર્ગુરુર્વૈ શિષ્યાણાં રક્ષણીયા ગુરોશ્ચ તે ॥

૪૨. વિશ્વેદેવાઃ પિતુર્દ્રોહાત્ નષ્ટસંજ્ઞા વિચેતનાઃ ।
નૈવ જાનન્તિ વૈ ધર્મં અન્ધા ઇવ મહામણિમ્ ॥

૪૩. અવિલમ્બેન તસ્માત્ ત્વમત્ર ગત્વા મહામતે ।
ત્રાતુમર્હસિ ધર્મજ્ઞ તાન્ એતાન્ આપદોઽઞ્જસા ॥

૪૪. ઇતિ કાશ્યપસન્દિષ્ટો ભગવાન્ ગીષ્પતિર્ગુરુઃ ।
તત્ર ગત્વા ક્ષણેનૈવ તાન્ આહૂયેદમબ્રવીત્ ॥

૪૫. શ્રુણ્વન્તુ મે વચઃ પથ્યં માસૂયામધિગચ્છત ।
સર્વેષુ જન્તુષુ શ્લાઘ્યા મનુષ્યા એવ કેવલમ્ ॥

૪૬. મનુષ્યેષુ દ્વિજાઃ શ્રેષ્ઠાઃ શ્રુત્યર્થૈકાન્તવેદિનઃ ।
તદાદિષ્ટાત્વઘાચારાઃ શ્લાઘ્યાઃ તસ્માત્ ઇતીરિતાઃ ॥

૪૭. બ્રહ્માર્પણધિયઃ તેષાં તત્તુલ્યા ત્રિદિવૌકસા ; ।
તેભ્યોઽધિકા વૈ પિતરઃ તસ્માત્ નાપરમિષ્યતે ॥

૪૮. પૂજયિષ્યતિ તાન્ વેધાઃ વિષ્ણુઃ તાન્ અર્ચયિષ્યતિ ।
રુદ્રઃ પિતૄન્ અર્ચયિત્વા વર્તન્તે સકલાધિકાઃ ॥

૪૯. આદાવાદિ પુમાન્ સૃષ્ટ્વા લોકાન્ ત્રીન્ ચરાચરાન્ ।
તદ્રક્ષણાર્થમજ્ઞાનાં દ્વિધા કૃત્વાત્મવત્તદા ॥

૫૦. પ્રથમે સૃષ્ટે સુરાન્ ચક્રે તતોઽસુરાનપિ ચ ।
તદન્યેનાસુરાન્ ચક્રે યોગાનામર્થસિદ્ધયે ॥

૫૧. લોકસ્ય રક્ષણાયૈવ સર્વાન્ યજ્ઞાન્ અકલ્પયત્ ।
તૈર્યજ્ઞૈઃ સકલા લોકાઃ પૂજયન્તિ સુરાસુરાન્ ॥

૫૨. અગ્રપૂજ્યા પૂર્વદિને પિતરો હિ મહાત્મભિઃ ।
તત્પરેઽહનિ વૈ દેવાઃ તાન્ યજ્ઞાન્ ઇજ્યાત્મવેદિભિઃ ॥

૫૩. યે પિતૄન્ અવમન્યન્તે મૂઢાઃ પણ્ડિતમાનિનઃ ।
નાલમેતાન્ પરિત્રાતું બ્રહ્માણ્ડાન્તર્ગતાં ગુરુઃ ॥

૫૪. એતદ્વિજ્ઞાય વેદાનાં સ્મૃતીનામાપ શાસનમ્ ।
શ્રેયોર્થિનઃ પિતૄન્ વિન્દેત્ વસ્વાદીન્ લોકપૂજિતાન્ ॥

૫૫. ઇતિ ગુર્વીરિતાં વાણીં શ્રુતૌ કૃત્વા મણિપ્રભામ્ ।
વિશ્વેદેવાઃ સમાકર્ણ્ય કિઞ્ચિત્ ઉદ્વિગ્નમાનસાઃ ॥

૫૬. પશ્ચાત્તાપેન ભીતાઃ તે બભ્રમુઃ નિમિષાન્તરમ્ ।
પ્રણિપત્ય ગુરું તત્ર વિનીતા વાક્યમબ્રુવન્ ॥

૫૭. ધિક્કષ્ટમિદમસ્માભિઃ વિહિતં વિશ્વદૂષણમ્ ।
ઘોરાત્ પાપાર્ણવાત્ અસ્માત્ ત્રાહિ બ્રહ્મન્ દયાનિધે ॥

૫૮. અજ્ઞાનાત્ સંપ્રવૃત્તેયં અતોઽસ્માકં ભવાન્ ગુરુઃ ।
વક્તુમર્હસિ સર્વજ્ઞ પ્રાયશ્ચિત્તં યથોચિતમ્ ॥

૫૯. બૃહસ્પતિઃ –
નારકસ્ય ઘોરસ્ય પાપસ્ય મહતો બુધાઃ ।

તથાપિ પરમં ગુહ્યં પ્રાયશ્ચિત્તં વદામ્યહમ્ ॥

૬૦. યત્ર વિષ્ણુઃ સ્વયં સાક્ષાત્ ક્ષેત્રરૂપેણ વર્તતે ।
યત્ર સાક્ષાત્ પરાશક્તિઃ તામ્રા તીર્થાધિદેવતા ॥

૬૧. યત્ર ત્રિવેણીસંસર્ગં કીર્તયન્તિ મહર્ષયઃ ।
યત્ર હવ્યં ચ કવ્યં ચ સૂતે વિષ્ણુઃ સ્વલોચનાત્ ॥

૬૨. કવ્યં પિતૃભ્યો પ્રાદાત્ વૈ દેવેભ્યો હવ્યમાત્મવાન્ ।
તસ્માત્ તત્ક્ષેત્રમાસાદ્ય સ્નાત્વા મલયજામ્ભસિ ॥

૬૩. પિતૄન્ યજ્ઞેન સન્તર્પ્ય પરિશુદ્ધેન કર્મણા ।
નિર્મુક્તપાપા ભવત યૂયં પ્રાપ્તમનોરથાઃ ॥

૬૪. ઇતિ તાન્ પ્રીણયન્ વાચા યૂયં ભવત ધાર્મિકાઃ ।
સહિતઃ પ્રહિતઃ દેવૈઃ દશભિઃ કાશ્યપાત્મજૈઃ ॥

૬૫. પ્રાપ વિષ્ણુવનં પુણ્યં પ્રાયશ્ચિત્તં સમાવિશત્ ।
ત એતે ગુર્વનુજ્ઞાતા વિશ્વેદેવાઃ સમાહિતાઃ ॥

૬૬. સુદારુણં તપશ્ચક્રુઃ પિતૃણાં પ્રીતિહેતવે ।
આરાધ્ય દેવમવ્યગ્રાઃ તામ્રાં ચ નિયતાત્મભિઃ ॥

૬૭. તુષ્ટુવુઃ પ્રયતાઃ ભક્ત્યા બદ્ધાઞ્જલિપુટોપમાઃ ।
વિશ્વેદેવાઃ –
માતઃ પ્રસીદ મલયાચલપુત્રિ માન્યે
પાપૈકશાન્તિકરણૈકપટુપ્રવાહે ॥

૬૮. કામાક્ષિ શક્તિમખિલાભ્યુદયપ્રવાહાં
તાં યામિ શરણમસિ જનૈકધાત્રીમ્ ।
ધૃતદ્રવા વિવિધમન્ત્રતરઙ્ગમાલા
આવર્તમૂર્તિકલ્પિતતારકર્ણા ॥

૬૯. માયામયી મથિતપાપકુલા જનાનાં મોહાપહા ભવતુ મે મુનિવન્દ્યમાના ।
સૈષા સમસ્તદુરિતક્ષયહેતુભૂતા સાક્ષાત્ અપારકરુણા તરુણેન્દુમૌલેઃ ॥

૭૦. શ્રીકણ્ઠશૈલદુહિતા મહિષી ભવાબ્ધેઃ
શ્રાન્તિં વ્યપોહતુ પુરઃ સ્વપદાશ્રિતાનામ્ ।
યત્તોયબિન્દુપરિષેચિતમૌલિભાગા

નિર્ધૂતપાપમલિના મનુજા ક્ષણેન ॥

૭૧. મોક્ષશ્રિયં શિવમુખૈરપિ કાઙ્ક્ષણીયામન્તે
ભજન્તિ પુનરાગમનાનપેક્ષામ્ ।
ઇતિ સ્તુવત્સુ દેવેષુ ભક્તિનમ્રાત્મમૂર્તિષુ ॥

૭૨. તત્તોયાત્ નિર્મલાકારાત્ હરિરાવિરભૂત્ વિભુઃ ।
શઙ્ખચક્રગદાપદ્મૈઃ અલઙ્કૃતચતુર્ભુજઃ ॥

૭૩. વનમાલી પીતવાસાઃ કૌસ્તુભોત્ભાસિકન્ધરઃ ।
કિરીટહારકેયૂરૈઃ મણ્ડલૈઃ ઉપશોભિતઃ ॥

૭૪. સ્તૂયમાનઃ સિદ્ધગણૈઃ બ્રાહ્મણૈરમરેશ્વરૈઃ ।
તાનુવાચ મહાભાગાન્ પ્રીતોઽસ્મીતિ બ્રુવન્ મુહુઃ ॥

૭૫. શ્રેષ્ઠાઃ ભવન્તો દેવાનાં સર્વેષાં નાત્ર સંશયઃ ।
યુષ્મત્પ્રિયાઃ તે પિતરઃ યૂયં ચાપિ પિતૃપ્રિયાઃ ॥

૭૬. યુષ્માનગ્રે સમભ્યર્ચ્ય પિતૄન્ ચ તદનન્તરમ્ ।
અન્તે ચ માં સમભ્યર્ચ્ય કૃતકૃત્યમિદં જગત્ ॥

૭૭. ઇતિ પ્રાપ્ય વરં વિષ્ણોઃ વિશ્વેદેવાઃ સુરોત્તમાઃ ।
દેવં પ્રસાદ્ય તં વિષ્ણું પરિક્રમ્ય પ્રણમ્ય ચ ॥

૭૮. વસ્વાદીન્ ચ પિતૄન્ નત્વા સ્વગણૈઃ ચ પ્રતસ્થિરે ।
એવં બૃહસ્પતિઃ તેષાં પ્રાયશ્ચિત્તં વિધાય ચ ॥

૭૯. સ્વમાશ્રમં મહાદેવૈઃ ઋષિભિશ્ચ મહાત્મભિઃ ।
ઇત્થં રહસ્યમાખ્યાનં પુણ્યમેતત્ પુરાતનમ્ ॥

૮૦. પ્રકાશિતં મયા તુભ્યં માહાત્મ્યજ્ઞાનસિદ્ધયે ।
ઇતિ કથિતમનેન ચક્રરાજો ગુરુવર્યેણ માહાત્મ્યમુત્તમં
શ્રુત્વા પરં હર્ષં જગામ તાવત્ ॥

ઇતિ અષ્ટપઞ્ચાશઃ અધ્યાયઃ ।  Pro.Total = 5417 + 80 =5497.

## એકોનષષ્ટિતમઃ અધ્યાયઃ

વિષ્ણુવને ચક્રરાજસ્ય વિમોચનમ્,
જન્મનિવૃત્તિઃ ચક્રરાજકૃત - વિષ્ણુસ્તુતિઃ ।

૧. ઇત્થં સુદર્શનો દેવઃ દેવસ્ય કરભૂષણઃ ।
પ્રસન્નાત્મા તમભ્યર્ચ્ય તં ગુરું તપસાં નિધિમ્ ॥

૨. શ્લાઘયન્ મનસા વાચા ક્ષેત્રસ્ય ચ મહોત્સવમ્ ।
તેન સાકં સમાગત્ય ગુરુણા દીર્ઘદર્શિના ॥

૩. સંપ્રાપ્ય મહતીં તામ્રાં નદીં મલયનન્દિનીમ્ ।
પરિતઃ તીરયોઃ તસ્યાઃ સમ્ભાવ્ય નયનાંશુભિઃ ॥

૪. દૃષ્ટ્વા વિચિત્રામટવીં નાનાદ્રુમલતાકુલામ્ ।
આસસાદ શનૈઃ પુણ્યં વિષ્ણોરાયતનં મહત્ ॥

૫. ત્રિવેણીસઙ્ગમં ચાપિ મહાવેગજલોજ્જ્વલમ્ ।
દેવાકારૈઃ પરિક્ષિપ્તમાશ્રમૈઃ પુણ્યકર્મણામ્ ॥

૬. આરામૈરદ્ભુતાકારૈઃ સર્વર્તુકુસુમોજ્જ્વલૈઃ ।
માલતીમલ્લિકાજાતિકરવીરકદમ્બકૈઃ ॥

૭. રસાલૈઃ પનસૈઃ કોરૈઃ પૂગનાગરકેસરૈઃ ।
એલોશીરલવઙ્ગૈશ્ચ ચન્દનાગરુતિન્દુકૈઃ ॥

૮. નારઙ્ગૈઃ લિકુચૈઃ નીપૈઃ પ્રિયાલપનસોજ્જ્વલૈઃ ।
અલઙ્કૃત્ય નવોદ્યાનમનેકતરુમણ્ડિતમ્ ॥

૯. નાનામૃગસમાકીર્ણં નાનાદ્વિજનિષેવિતમ્ ।
હોમધૂમસમાક્રાન્તવહ્નિમણ્ડલમણ્ડિતમ્ ॥

૧૦. બ્રહ્મઘોષમહાઘોષં મુનીશાપ્યાસમાવૃતમ્ ।
ક્વચિત્ સ્નાનપરૈર્વિપ્રૈઃ ક્વચિત્ હોમપરાયણૈઃ ॥

૧૧. પરત્ર પૂજાં કુર્વદ્ભિઃ હરેરભ્યુદયાત્મનઃ ।
સાક્ષસૂત્રકરૈઃ દાન્તૈઃ મન્તાર્ણધ્યાનપૂર્વિકમ્ ॥

૧૨. ક્વચિત્સ્વાધ્યાયનિરતૈઃ કર્મકાણ્ડવિશારદૈઃ ।
ક્વચિત્ પૌરાણિકાન્ ધર્માન્ ક્વચિત્ સદ્ભિઃ સનાતનાન્ ॥

૧૩. વ્યાહરદ્ભિ ; યજૂંષ્યુચ્ચૈઃ અન્યત્રક્રમપાઠકૈઃ ।
ઋચઃ ક્વાપ્યુપગાયદ્ભિઃ વિધાનાગમનૈપુણૈઃ ॥

૧૪. ક્વચિત્ સામાનિ ગાયદ્ભિઃ મન્ત્રબ્રાહ્મણવેદિભિઃ ।

વ્યાકુર્વદ્ભિઃ શાસ્ત્રજાલં ધર્મવ્યાકરણાદિભિઃ ॥

૧૫. વાલખિલ્યૈઃ વાસિષ્ઠૈઃ યાજ્ઞવલ્ક્યૈશ્ચ વૈષ્ણવૈઃ ।
અન્યૈઃ પઞ્ચાગ્નિમધ્યસ્થૈઃ મહાવ્રતપરાયણૈઃ ॥

૧૬. સમન્તાત્ નિબિડાકારં ક્ષેત્રમેતત્ હરેઃ સુખમ્ ।
દદર્શ ભગવાન્ સાક્ષાત્ હરેરંશઃ સુદર્શનઃ ॥

૧૭. પૂજ્યમાનઃ ચ ધર્મજ્ઞૈઃ પાદ્યર્ઘ્યાભિવન્દનૈઃ ।
પ્રથમં ક્ષેત્રનાથાન્ તુ પૂજયિત્વાથ કિઙ્કરાન્ ॥

૧૮. દેવં ભૈરવમાસાદ્ય પ્રસાદ્ય હરિમીશ્વરમ્ ।
દેવીં સ્તુત્વા તામ્રપર્ણીં સર્વપાપપ્રણાશિનીમ્ ॥

૧૯. સ્તુત્વા સ્તુત્વા ચ સમ્પૂજ્ય કાપિલોક્તેન વર્ત્મના ।
સઙ્કલ્પપૂર્વં ધર્માત્મા ચકાર સ્નાનમાત્મવાન્ ॥

૨૦. ઋષીન્ દેવાન્ પિતૄન્ ચૈવ તર્પયિત્વા મહામ્ભસા ।
ધનૈઃ સન્તર્પયામાસ બ્રાહ્મણાન્ ચ વિશેષતઃ ॥

૨૧. સ્નાતે તસ્મિન્ યથાન્યાયં આકાશાત્ અશરીરિણી ।
વાગજૃમ્ભત ભૂયિષ્ઠા સ્પષ્ટાક્ષરપદોજ્જ્વલા ॥

૨૨. ચક્રરાજ મહાભાગ ધૂતપાપોઽસિ નિર્મલઃ ।
ન હિ તે પાપલેશોઽસ્તિ ભાનુબિમ્બે યથા તમઃ ॥

૨૩. ઇતઃ પરં ત્વયા દેવ લોકાનાં હિતકામ્યયા ।
ત્વન્નામ્નિ તીર્થે પુણ્યેઽસ્મિન્ અશ્વમેધેન દેવતાઃ ॥

૨૪. ઇષ્ટ્વા દક્ષિણયા વિપ્રાન્ સન્તોષ્ય વિધિપૂર્વકમ્ ।
તતો વૈકુણ્ઠમભ્યેહિ સ્વયા કાન્ત્યા સમુજ્જ્વલન્ ॥

૨૫. ઇત્યુક્ત્વોપરતાયાં તુ પુષ્પવૃષ્ટિરભૂદ્દિવઃ ।
મધુગન્ધૈઃ સુગન્ધૈઃ તુ મેદુરા સર્વતો દિશઃ ॥

૨૬. પૂરયન્તીવ તત્ક્ષેત્રં મુહૂર્તં વિષ્ણુકાનને ।
તતો દુન્દુભયો નેદુઃ તૂર્યારાવાઃ પ્રવર્તિતાઃ ॥

૨૭. તાવદાવિરભૂત્ શમ્ભુઃ વૃષારૂઢોમયા સહ ।
સેવિતઃ પ્રમથૈઃ ભૂતૈઃ નન્દિભૃઙ્ગિમુખૈરપિ ॥

૨૮. મહેન્દ્રો હુતભુક્ સૌરિઃ નિરૃતિઃ મકરાસનઃ ।
વાયુઃ યક્ષો વિરાટ્ ઈશો બ્રહ્માદ્યાઃ ચ સનાતનાઃ ॥

૨૯. આગમ્ય પૂજયામાસુઃ ચક્રરાજં સુદર્શનમ્ ।
સર્વે જય જયેત્યૂચુઃ પ્રશશંસુઃ તં મુદા ॥

૩૦. તત્ર દેવો મહાદેવઃ સમાગત્યાગ્રતો હરિમ્ ।
ઉવાચ વચનં શ્લક્ષ્ણં શ ૃણ્વતાં પ્રીતિવર્ધનમ્ ॥

૩૧. સાધુ સંયગિદં કાર્યં ચક્રરાજ કૃતં ત્વયા ।
તામ્રપર્ણીનદીસ્નાનલબ્ધોદયમહોત્સવમ્ ॥

૩૨. સર્વે દેવાઃ સમાગમ્ય સુદર્શનમપૂજયન્ ।
ઉત્તમદેવત્વં પ્રદદુઃ સુદર્શનાય ધીમતે ॥

૩૩. વિષ્ણુઃ પ્રશશંસુઃ તં ચક્રં સર્વદેવાદિદૈવતમ્ ।
રુદ્રઃ હોતા બ્રહ્મા ચ તસ્મૈ બ્રહ્મત્વં દદુઃ પુનઃ ॥

૩૪. દીક્ષાં પ્રવિશ્ય ધર્માત્મા હરિમેધં ચકાર હ ।
દક્ષિણાભિઃ પ્રગલ્ભાભિઃ પુષ્કલાભિઃ અવિચ્યુતૈઃ ॥

૩૫. તોષયિત્વા દ્વિજવરાન્ અન્નૈરપ્યમૃતોપમૈઃ ।
કૃત્વાવભૃથં તીર્થેઽસ્મિન્ સર્વાન્ લોકાન્ અતોષયત્ ॥

૩૬. એવં વિધાય ભૂયોઽપિ વિચાર્ય સુચિરં હૃદિ ।
નિશ્ચિતાર્થઃ કૃતાર્થઃ ચ ચક્રરાજઃ સુદર્શનઃ ॥

૩૭. સમ્મન્ત્ર્ય મુનિના તેન કપિલેન મહાત્મના ।
તામ્રાયા ઉત્તરે તીરે ત્રિવેણ્યા પૂર્વભાગતઃ ॥

૩૮. ભગવન્તં રમાનાથં સ્થાપયિત્વા તુ મન્ત્રતઃ ।
પૂજયામાસ વિધિના મહાપુરુષવિદ્યયા ॥

૩૯. ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈઃ સુગન્ધૈઃ વિવિધૈઃ ફલૈઃ ।
પૂજયિત્વા તુ દેવેશં તુષ્ટાવ પુરુષોત્તમમ્ ॥

૪૦. નમસ્તે દેવદેવેશ વાસુદેવાય વિષ્ણવે ।
નારાયણાય નાલીકનયનાય નમો નમઃ ॥

૪૧. નાથ નારાયણ વિભો નલિનાયતલોચન ।
પ્રસીદ કરુણામૂર્તે પ્રસીદ જગતાં ગુરો ॥

૪૨. યમેકમીશમાદ્યન્તમનન્તમકુતોભયમ્ ।
અક્ષરમનિર્દેશ્યં શરણં યામિ શાશ્વતમ્ ॥

૪૩. પુરાણમાદ્યં પુરુષં વૃષસેનં વૃષાકપિમ્ ।
વેદાન્તવેદ્યં વિશ્વસ્ય જનિતારમુપાસ્મહે ॥

૪૪. તારકઃ પરમો યોગી યોગિધ્યેયાઙ્ઘ્રિપઙ્કજઃ ।
સ મે ગતિરનન્તાત્મા સર્વસાક્ષી જગદ્ગુરુઃ ॥

૪૫. ગુણાતીતઃ પરઃશુદ્ધો હંસાખ્યઃ પ્રપિતામહઃ ।
શ્રુતિકર્મઃ પુમાન્ સાક્ષાત્ આવિરસ્તુ પુરો હરિઃ ॥

૪૬. અણોરણીયાન્ આત્મા ચ મહતોઽપિ મહાન્ મહાન્ ।
મમૈવ દૃશિ સમ્ભૂયાત્ મોહાન્ધધ્વાન્તભાસ્કરઃ ॥

૪૭. શ્યામો હિરણ્યપરિધિઃ વનમાલાવિભૂષિતમ્ ।
શ્રીપતિં શરણં યામિ વિશ્વસ્યાસ્યૈવહેતુકમ્ ॥

૪૮. આલોલતુલસીદામમારૂઢવિનતાસુતમ્ ।
જ્યોતિરિન્દીવરશ્યામમાવિરસ્તુ મમાગ્રતઃ ॥

૪૯. નમો નમઃ પુરાણાય પુરુષાયાદિવેધસે ।
સતાં સન્માર્ગબન્ધૂનાં પરિત્રાણાય સાધવે ॥

૫૦. સત્વમેકાક્ષરં જ્યોતિઃ આકારઃ ખગરૂપકઃ ।
યત્તમન્તસ્સ્મરામ્યેતત્ પઞ્ચમસ્વરમક્ષરઃ ॥

૫૧. ખગઃ ભોક્તા ચ કર્માત્મા પુરુષો વ્યઞ્જનાત્મકઃ ।
ઊર્ધ્વતિર્યગ્ગતઃ સ્વાન્તઃ કેશવો દયિતો મમ ॥

૫૨. શેષાઙ્કશાયિનમશેષગુરું પુરાણં
નારાયણં ત્રિજગતાં પ્રણતાપવર્ગમ્ ।
નાથં વ્રજામિ શરણં કરુણામૃતાબ્ધિં
નાસ્ત્યત્ર મે વિશતિ ચિત્તમિદં મુકુન્દાત્ ॥

૫૩. ઇત્થં સ્તુવતિ વૈ તસ્મિન્ ચક્રરાજે સુદર્શને ।
પ્રાદુર્બભૂવ ભગવાન્ પ્રસન્નાત્મા જનાર્દનઃ ॥

૫૪. ચતુર્ભુજઃ પીતવાસાઃ વનમાલ્યાતિસુન્દરઃ ।

ઇન્દ્રનીલમણિશ્યામૈઃ અઙ્ગૈરભિનવોદયૈઃ ॥

૫૫. બિભ્રત્ નાનામણિસ્તોમહેમાભરણમણ્ડલમ્ ।
કુણ્ડલૈર્વલયૈર્દીપ્તૈઃ હારનૂપુરકઙ્કણૈઃ ॥

૫૬. કટિસૂત્રબ્રહ્મસૂત્રગ્રૈવેયપદકાદિભિઃ ।
ભ્રાજમાનં મહાત્માનં સૂર્યકોટિસમપ્રભમ્ ॥

૫૭. સ્તૂયમાનં સિદ્ધગણૈઃ સેવ્યમાનં સુરાસુરૈઃ ।
શ્રિયા ચ દાત્રા સહિતં શ્રીવત્સાદિવિભૂષિતમ્ ॥

૫૮. ભ્રાજમાનં પુનસ્સાક્ષાત્ નારાયણમનામયમ્ ।
ભૂયો ભૂયો નમસ્તુભ્યં સાષ્ટાઙ્ગં પાદપદ્મયોઃ ॥

૫૯. શનૈર્વિજ્ઞાપયામાસ પ્રણતઃ સ મનોરથમ્ ।
નાથ દેવ દયાસિન્ધો પરિશ્રાન્તોઽસ્મિ કેવલમ્ ॥

૬૦. અઙ્ગીકુરુષ્વ માં ક્ષિપ્રં દીનં ચ શરણાગતમ્ ।
ઇત્થં પ્રણતમત્યર્થં યાચમાનં મુહુર્મુહુઃ ॥

૬૧. કરૈરુત્થાપ્ય તં દેવો વ્યાજહાર સુદર્શનમ્ ।
પ્રીતોઽસ્મિ વત્સ તે સ્તુત્યા પૂજયા તીર્થમજ્જનાત્ ॥

૬૨. તવ સન્તુ મહાભાગ નિરપાયા મનોરથાઃ ।
ત્વયા કૃતમિદં કાર્યં લોકાભ્યુદયહેતુકમ્ ॥

૬૩. ગાયન્તુ મર્ત્યાઃ દેવાશ્ચ મુનયશ્ચ સનાતનાઃ ।
યત્તે ચરિત્રં સૌગન્ધ્યં પ્રબન્ધસંહિતમ્ ॥

૬૪. શ્ૃણ્વન્તોઽપિ પઠન્તોઽપિ સ્મરન્તોઽપિ હિ જન્તવઃ ।
અવાપ્ય ધર્મ્યમૈશ્વર્યં કામં કલુષવર્જિતમ્ ॥

૬૫. અનુભૂય ચિરં કાલમન્તે માં યાન્તુ કેવલમ્ ।
ત્વત્પ્રિયાર્થમિદં ક્ષેત્રં ન ત્યક્ષ્યામિ કદાચન ॥

૬૬. અત્ર સ્થિતાનાં જન્તૂનાં ન હિ શાસ્તા યમો વિભુઃ ।
અત્ર કર્મક્ષયં કૃત્વા મોક્ષયિષ્યામિ બન્ધનાત્ ॥

૬૭. મત્ક્ષેત્રે યાતના બાધા જન્તૂનાં વસતાં ન હિ ।
મામુદ્દિશ્યાત્ર યે બ્રાહ્મણાઃ પ્રીણયન્તિ વૈ ॥

૬૮. અન્નં ભૂમિં જલં ગાં ચ યે દાસ્યન્તિ મદ્વિધાઃ ।
તેષાં કોટિગુણં પુણ્યં ભવિષ્યતિ ન સંશયઃ ॥

૬૯. ઇત્થં સંપ્રીણયન્ વાચા ચક્રરાજં ચ હ્યવ્યયમ્ ।
પાણિભ્યાં પરિગૃહ્યાગ્રે તત્રૈવાન્તરધીયત ॥

૭૦. શઙ્ખઃ –
ઇત્થં તસ્મિન્ ભગવતિ વાસુદેવે જનાર્દને ।
સચક્રાન્તર્હિતે તાવત્ તત્રત્યાઃ પરમર્ષયઃ ॥

૭૧. પ્રહૃષ્ટાઃ પરિતસ્સર્વે સ્તોત્રૈઃ ઉચ્ચૈઃ તમસ્તુવન્ ।
ચક્રરાજસ્ય માહાત્મ્યં તીર્થવૈભવભાવિતમ્ ॥

૭૨. પ્રાદુર્ભૂતસ્ય દેવસ્ય પ્રસદાત્ જગતાં ગુરોઃ ।
પ્રશંસન્તઃ સ્તુવન્તશ્ચ ધ્યાયન્તઃ તત્પદામ્બુજમ્ ॥

૭૩. મુહૂર્તં બભ્રમુઃ સર્વે કૌતૂહલસમાવૃતા ; ।
સ્નાત્વા સર્વેષુ તીર્થેષુ પુનર્જગ્મુર્યથાગતમ્ ॥

૭૪. શઙ્ખઃ –
ઇત્થં વનસ્યાસ્ય માહાત્મ્યં પાપનાશનમ્ ।
સંક્ષેપાત્ કાથિતં રાજન્ તવ પ્રીતિવિધિત્સયા ॥

૭૫. ભૂયોઽપિ ચિત્રમાખ્યાનં તામ્રાયાઃ કીર્તિભૂષણમ્ ।
યેષાં કર્ણપથાવિષ્ટં તેષાં મુક્તિપ્રદં ભવેત્ ॥

૭૬. પુરા કશ્ચિત્ પિઙ્ગલાખ્યઃ કૃષિકઃ શૂદ્રવંશજઃ ।
ધાન્યગોધનસમ્પન્નઃ પુત્રમિત્રકલત્રવાન્ ॥

૭૭. અનેકાં ભૂમિમાહૃત્ય ચકાર કૃષિમુત્સુકઃ ।
શાલીનારધ્વનાશ્ચ શ્યામાકારકપૈટસાઃ ॥

૭૮. મુદ્ગસર્ષપમાષાણાં રાશિં ચક્રે મહોદયમ્ ।
એતસ્મિન્નન્તરે કાલે મેઘઃ સમુદપદ્યત ॥

૭૯. હલાકર્ષણસામર્થ્યધુરીણૈઃ ગોવૃષૈઃ તથા ।
તદ્ભૃત્યાઃ ક્ષેત્રમાસાદ્ય ચકર્ષુર્મહિષૈઃ વૃષૈઃ ॥

૮૦. તસ્માદેકો વૃષો વૃદ્ધો દુર્બલો હલાકર્ષણે ।
નિર્મુક્ત પરિતોઽરણ્યં યૂથભ્રષ્ટઃ તતસ્તતઃ ॥

૮૧. અતીત્ય દૂરમધ્વાનં તામ્રાયાઃ તીરમાપ સઃ ।
તત્સ્વામી વૃષં નષ્ટમન્વિષ્ય પરિતો વનમ્ ॥

૮૨. અદૃષ્ટ્વાઽચિન્તયન્નષ્ટં વ્યાઘ્રાદ્યૈરિતિ ભક્ષિતમ્ ।
નિવૃત્ય સ્વગૃહં પ્રાયાત્ સ્વભૃત્યૈઃ કૃષીવલઃ ॥

૮૩. વૃષોઽપિ વાતવર્ષાદ્યૈઃ ક્લિશ્યમાનો વનાન્તરે ।
તામ્રાયાઃ સૈકતે ભાગે પતિતોઽભૂત્ તદાલસઃ ॥

૮૪. તાવન્મલયજા પુણ્યા પૂર્યમાણા સુવૃષ્ટિભિઃ ।
સમાકૃષ્ય વૃષં પ્રાયાત્ પૂરેણૈવ હિ ભૂરિણા ॥

૮૫. કિઞ્ચિત્ દૂરાન્તરં ગત્વા કૂલે ક્ષિપ્તોઽભવત્ ક્ષણાત્ ।
દૈવાદ્વિષ્ણુવનં પ્રાપ્ય સમાશ્વસ્ય ક્ષણાન્તરાત્ ॥

૮૬. શનૈઃ તીરં સમારુહ્ય રુરોદાતીવ દારુણમ્ ।
તત્રત્યેષુ મુનીન્દ્રેષુ વિસ્મિતેષુ સમન્તતઃ ॥

૮૭. દદર્શ તં વૃષં ધીમાન્ મુનિઃ કાત્યાયનાભિધઃ ।
વૃષોઽયં સ્રોતસા નીતઃ જરાવિષ્ટોઽતિદુર્બલઃ ॥

૮૮. રુદત્યતીવ કિં જ્ઞાતં પૂર્વં કર્મકૃતં ત્વિતિ ।
વિચાર્ય કરુણાવિષ્ટો જ્ઞાનદૃષ્ટ્યા વિલોકયન્ ॥

૮૯. જ્ઞાતં તત્કર્મ કાઠિન્યં મુનિઃ સંસ્પૃશ્ય પાણિના ।
મન્ત્રિતેનામ્ભસા ચૈનં અસિઞ્ચત્ અમૃતાત્મના ॥

૯૦. તાવત્ નિર્ભિન્નમૌલેઃ તુ વૃષભસ્યાતિદુઃખિનઃ ।
નિર્જગામ ક્ષણાત્ જ્યોતિઃ વ્યોમ્ના ભાસાનુભાસયન્ ॥

૯૧. દિવ્યરૂપી પુમાન્ આસીત્ શ્યામઃ કમલલોચનઃ ।
શનૈર્મુનિમુપાગમ્ય નત્વા વચનમબ્રવીત્ ॥

૯૨. તારિતોઽસ્મિ મહાભાગ ત્વયા શોકાર્ણવાત્ અહમ્ ।
ધન્યોઽસ્મિ કૃતકૃત્યોઽસ્મિ ભવત્પાદાબ્જસેવયા ॥

૯૩. ગન્તુમીહે પરં લોકમક્ષયં વૈષ્ણવં શુભમ્ ।
અનુજ્ઞાં દેહિ મે બ્રહ્મન્ સર્વજ્ઞ કરુણાનિધે ॥

૯૪. ઇત્યગ્રે પ્રણતં દાન્તં કૃતાઞ્જલિમુપસ્થિતમ્ ।
યાચમાનમિદં વાક્યં વ્યાજહાર મહામુનિઃ ॥

૯૫. કસ્ત્વં ભદ્ર મહાભાગ તેજોરાશિરકલ્મષઃ ।
કેન વા પ્રાપિતો દુઃખં તિર્યગ્યોનિવિભાવિતમ્ ॥

૯૬. એતન્મે કથ્યતાં સાધો તત્કર્મફલભાવિકમ્ ।
શ્રોતુમિચ્છન્ત્યમી વિપ્રાઃ તપસ્સિદ્ધાઃ કુતૂહલાત્ ॥

૯૭. ઇતિ વાદિનિ વૈ તસ્મિન્ મુનૌ કાત્યાયને તદા ।
સ્પષ્ટમાચષ્ટ સિદ્ધોઽસૌ નિજવૃત્તાન્તમદ્ભુતમ્ ॥

૯૮. સિદ્ધઃ –
અહં પૂર્વભવે બ્રહ્મન્ કારૂશો નામ વૈશ્યરાટ્ ।
ધની કુલીનો ધર્મજ્ઞઃ કાર્યાકાર્યવિવેકવિત્ ॥

૯૯. શાકલ્યાખ્યે પુરવરે વસન્ વાણિજ્યજીવિતઃ ।
તથા મે ગૃહિણી પુણ્યા ધર્મજ્ઞા રૂપશાલિની ॥

૧૦૦. પતિવ્રતા મહાભાગા નામ્ના સૌગન્ધિકા કિલ ।
તયા સહ ચિરં કાલમનુભૂતં સુખં મયા ॥

૧૦૧. તત્રાન્તરે વિટઙ્કસ્ય વૈશ્યનાથસ્ય કન્યકા ।
માલતી નામ કાપ્યાસીત્ મહાસૌન્દર્યમુદ્રિકા ॥

૧૦૨. કુમારીં કુલચૂડાલાં રૂપેણ મણિપુત્રિકામ્ ।
તાં દૃષ્ટ્વા કામબાણાર્તો દત્વા ભૂરિ ધનં પુનઃ ॥

૧૦૩. તાં દ્વિતીયાં ધર્મપત્નીં કૃત્વા સાર્ધં તયા સહ ।
રમમાણો દિવારાત્રં નાચિન્તયમનન્તરમ્ ॥

૧૦૪. અસ્યામાસક્તચિત્તસ્ય કાર્યાકાર્યવિવેકિનઃ ।
દ્વેષોઽભૂત્ અગ્રધર્મિણ્યાં મમ પાપાત્મનો ભૃશમ્ ॥

૧૦૫. અદુષ્ટામપિ તાં નિત્યં તાડનાદ્યૈરુપદ્રવૈઃ ।
નિર્બન્ધયિત્વા ભૃશં કારાગારે ન્યવેશયમ્ ॥

૧૦૬. આહારહીના ક્ષુત્ક્ષાન્તા કૃશા દીના દુરાસદા ।
કાલેન સા ધર્મપત્ની ચિરાત્ પ્રાણાન્ જહૌ શુચા ॥

૧૦૭. સર્વે તે બાન્ધવાઃ સ્નિગ્ધાઃ માં શપન્તઃ મુહુર્મુહુઃ ।
સ્ત્રીઘાતકોયમિત્યુક્ત્વા સર્વે તે સ્વગૃહાન્ યયુઃ ॥

૧૦૮. તત્પિતા શ્વશુરોઽસ્માકં વૃદ્ધો ધર્મપરાયણઃ ।
તપસ્વી કોપિતોઽભ્યેત્ય પુત્રીશોકાતુરો ભૃશમ્ ॥

૧૦૯. શશાપ માં વજ્રતુલ્યં વચનં ચેદમબ્રવીત્ ।
રે રે પાપિષ્ઠ દુષ્ટાત્મન્ પાપાસક્તમદાન્ધધીઃ ॥

૧૧૦. જઘ્નિવાન્ તેન પાપેન ઋષભો ભવિતેતિ મામ્ ।
તાવદેવ મહદ્ઘોરાત્ શાપાત્ અશનિસન્નિભાત્ ॥

૧૧૧. અભૂવં વૃષભો ભીમો પશ્યત્સુ ખલુ બન્ધુષુ ।
નષ્ટસ્મૃતિરહં તસ્માત્ નિર્ગતો નગરાત્ બહિઃ ॥

૧૧૨. અટવીં સઞ્ચરન્ કાલે ગૃહીતઃ કેનચિત્ બલાત્ ।
ચકાર માં બલીવર્દૈઃ હલાકર્ષણકર્મણિ ॥

૧૧૩. બ્રહ્મન્ એવં તસ્ય ગૃહે નિવસન્ ચિરકાલતઃ ।
વાર્ધક્યકાલમાગત્ય દૈવાત્ અત્રાગતોઽસ્મ્યહમ્ ॥

૧૧૪. યદા મહાનદીતોયસંસર્ગં પ્રાપ્ય દુર્લભમ્ ।
જાતમેતત્ સમગ્રં મે કરાગ્રામલકોપમમ્ ॥

૧૧૫. પૂર્વજન્માર્જિતં જ્ઞાનં કાલે મે સઙ્ગમે મુનેઃ ।
સત્સઙ્ગમાત્ કૃતાર્થોઽસ્મિ નિર્મુક્તોઽસ્મિ ભયાદ્ગુરો ॥

૧૧૬. ત્વયૈવ્ મન્ત્રપૂતેન વારિણા કૃતસેચનઃ ।
કષ્ટં શાપસમુદ્ભૂતં ત્યક્તમાસીત્ કલેવરમ્ ॥

૧૧૭. નમસ્તુભ્યં ભગવતે ગુરવે પરમાત્મને ।
ત્વયા દત્તાન્ ગમિષ્યામિ લોકાન્ અવ્યાહતોદયાન્ ॥

૧૧૮. ઇત્યુક્ત્વા તં પરિક્રમ્ય પ્રણમ્ય ચ મુહુર્મુહુઃ ।
વિમાનવરમાસ્થાય જગામ પરમાં ગતિમ્ ॥

૧૧૯. એવં દૃષ્ટ્વાદ્ભુતં કર્મ મુનેઃ કાત્યાયનસ્ય તે ।
મુનયઃ તં યથાન્યાયં પૂજયામાસુરાદરાત્ ॥

૧૨૦. શાપેનાશનિકલ્પેન પરિપૂતમમું વિશમ્ ।
મોચયામાસ તીર્થેન તામ્રા મલયનન્દિની ॥

૧૨૧. ગતિમાપ મહાતીર્થે પ્રાદાત્ અસ્મૈ તદદ્ભુતામ્ ।
તસ્માત્ અમુષ્ય ક્ષેત્રસ્ય તીર્થસ્યાભ્યુદયસ્ય ચ ॥

૧૨૨. યે પઠન્ત્યપિ માહાત્મ્યં શ્રુણ્વન્ત્યપિ લિખન્તિ ચ ।
તેષામક્ષય્યમૈશ્વર્યમાયુરારોગ્યમેવ ચ ।
દદાતિ ભગવાન્ વિષ્ણુઃ અન્તે મુક્તિં ચ શાશ્વતીમ્ ॥

ઇતિ એકોનષષ્ટિતમઃ અધ્યાયઃ ।   Pro.Total =5497 + 122 = 5619.

## ષષ્ટિતમઃ અધ્યાયઃ

વિશેષતો વિષ્ણુવનમહિમાનુવર્ણનમ્ ।

૧. ઇત્થં ભગવતી ગાથા પુણ્યા ગઙ્ગોદકોપમા ।
વિસ્તારિતા મુનીન્દ્રેણ કલ્પવલ્લીવ કામદા ॥

૨. રાજાનમાનન્દગિરા ચકારાશ્ચર્યનિર્ભરમ્ ।
પ્રણમ્ય રાજા ભૂયોઽપિ તમપૃચ્છન્ મહામુનિમ્ ॥

૩. વીરસેનઃ –
અહો મહામુને દિવ્યમાખ્યાનં ભવતેરિતમ્ ।
ક્ષીરાર્ણવમિવાભાતિ મનસામપ્યગોચરમ્ ॥

૪. અનન્તગુણરૂપસ્ય વિષ્ણોઃ અદ્ભુતકર્મણઃ ।
તુલ્યતામિવ સંપ્રાપ્તં પુણ્યં વિષ્ણુવનં મહત્ ॥

૫. તસ્યૈવ ભૂયઃ શ્રોતવ્યં માહાત્મ્યશ્રવણામૃતમ્ ।
કથયસ્વ પુનર્બ્રહ્મન્ મહ્યં શુશ્રૂષવે ગુરો ॥

૬. શઙ્ખઃ –
રાજન્ અતિવિશાલસ્ય વ્યોમાકારસ્ય ભૂયસઃ ।
વનસ્યાસ્ય મહાબાહો માહાત્મ્યં શ્રવણામૃતમ્ ॥

૭. વક્ષ્યમાણ મયેદાનીમાકર્ણય મહામતે ।
અતઃ પરં મહારાજ પુણ્યે વિષ્ણુવનાશ્રમે ॥

૮. પુરતોઽથાર્ધભાગં તુ સાધ્યારણ્યમુદાહૃતમ્ ।
બ્રહ્મભૂતમિદં ક્ષેત્રં યત્સાધ્યાઃ સિદ્ધિમાગતાઃ ॥

૯. શાપાપિભૂતા રુદ્રસ્ય કદાચિત્ ચન્દ્રમૌલિનઃ ।
વિસૃષ્ટદેવભોગાઃ તે વચનાત્ શ્રીપતેર્હરેઃ ॥

૧૦. તપઃકૃત્વા ચિરં કાલં દેવમાસ્થાય દુષ્કરમ્ ।
તત્પ્રસાદાત્ પુનઃ પ્રાપ્ય ત એતે પરમં મુદમ્ ॥

૧૧. સ્વર્ગં સુકૃતિભિઃ પ્રાપ્યં પ્રાપુઃ સંહૃષ્ટમાનસાઃ ।
રાજા –
કથં વિષ્ણુવને બ્રહ્મન્ સાધ્યારણ્યં ક્વચિદ્ભવેત્ ॥

૧૨. સત્વોદ્ભૂતાઃ સાધ્યગણાઃ કથમાગઃ પ્રચક્રિરે ।
શિવશાપાત્ કથં મુક્તાઃ કેનોપાયેન દુસ્સહાત્ ॥

૧૩. એતત્સર્વમશેષેણ બ્રૂહિ નિઃસંશયં ગુરો ।
શઙ્ખઃ –
શ્રુણુ રાજન્ પ્રવક્ષ્યામિ પુણ્યમાખ્યાનમુત્તમમ્ ॥

૧૪. તચ્છ્રુત્વા મુચ્યતે મર્ત્ય સદ્યઃ પાતકકોટિભિઃ ।
પુરા કદાચિત્ ત્રેતાયાં કાલે સાવર્ણિકેઽન્તરે ॥

૧૫. શ્રુતધામાભિધઃ શ્રીમાન્ મુનિરાસીત્ મહાયશાઃ ।
આઙ્ગીરસોઽન્વયોદ્ભૂતઃ વેદવેદાઙ્ગપારગઃ ॥

૧૬. વાત્સ્યાયનકુલોદ્ભૂતાં નામ્નામમલિનીં પ્રિયામ્ ।
ઉદ્વાહ્ય વિધિના રાજન્ ગૃહસ્થાશ્રમમાશ્રયન્ ॥

૧૭. ચકાર ધર્માન્ સકલાન્ ત્રિવર્ગોદયસાધનાન્ ।
તપોવિશેષસન્તુષ્ટાત્ દેવદેવાત્ મહાત્મનઃ ॥

૧૮. તનયામાપ તન્વઙ્ગીં સૌન્દર્યામૃતવાહિનીમ્ ।
સૈષા કાલેન ઋજુના કન્યા કાઞ્ચનમાલિની ॥

૧૯. યુવલોકમુખામ્ભોજસમ્ભાવિતમહોદયામ્ ।
સંપ્રાપ યૌવનાવસ્થાં વાસન્તીમિવ શ્રિયમ્ ॥

૨૦. તાં દૃષ્ટ્વા મદનાવિષ્ટઃ કશ્ચિત્ વિદ્યાધરોર્મિમાન્ ।
નિહત્ય પિતરૌ તસ્યાઃ નિશિ નિદ્રાપરાયણૌ ॥

૨૧. જહાર તરુણીરત્નં ચોરવત્ કૃતનિશ્ચયઃ ।
સા બાલા શોકસન્તપ્તા ગૃહીતા દારુણાત્મના ॥

૨૨. રુરોદ હા હેતિ ભૃશં વિલપન્તી મુહુર્મુહુઃ ।
શિવ શમ્ભો દયાસિન્ધો બન્ધો કિં નાવબુધ્યસે ॥

૨૩. કથં ત્વાં શરણં પ્રાપ્તાં નિમગ્નાં શોકસાગરે ।
પાહિ માં પાહિ માં શમ્ભો પાહિ માં પાહિ મામિતિ ॥

૨૪. ઇતિ તસ્યાઃ સમાકર્ણ્ય મહાક્રન્દનં શિવઃ ।
દયાનિધિઃ પ્રાદુરભૂત્ લિઙ્ગરૂપી તદાશ્રમે ॥

૨૫. મા ભૈષટેત્યબ્રવીત્ વાચા તામાશ્વસ્ય જગદ્ગુરુઃ ।
લલાટેનાનલેનૈવ તં દદાહાન્તકાન્તકઃ ॥

૨૬. તસ્મિન્ વિદ્યાધરે તાવત્ ભસ્મીભૂતકલેવરે ।
તામાહૂયાતિદુઃખાર્તાં પુત્રીમિવ પુરઃ સ્થિતામ્ ॥

૨૭. સ્વકરામ્ભોરુહૈઃ શ્રીમત્કલ્યાણામૃતવર્ષિભિઃ ।
પરિમૃજ્ય તદઙ્ગાનિ પ્રાહ ગમ્ભીરયા ગિરા ॥

૨૮. શ્રીશિવઃ -મા ભીઃતન્વઙ્ગિ કલ્યાણિ મુઞ્ચ શોકં સુદારુણમ્ ।
ભવિતવ્યમિદં તેઽદ્ય કારણેન ન સંશયઃ ॥

૨૯. પુરા ત્વયા પૂર્વભવે કસ્યચિત્ ગૃહિણી સતી ।
કામાર્તૌ દમ્પતી મુખ્યૌ ઔષધેન બલીયસા ॥

૩૦. વિયોજિતૌ પાપબુધ્યા સોઽયં વિદ્યાધરોઽભવત્ ।
સંયોજ્યાતીવ શોકેન કર્મેણ ફલમાપ્તવાન્ ॥

૩૧. ત્વં ચ વિદ્યાઙ્ગના કાલે ભર્તર્યુપરતે સતિ ।
અપ્રાપ્ય જારમેતં તુ વિધિના વિધવા કૃતા ॥

૩૨. તાવત્ કણ્વેન મુનિના કરુણાવિષ્ટચેતસા ।
દત્તા પાશુપતી વિદ્યા તન્મહિમ્નાપ્યજન્મનામ્ ॥

૩૩. તત્કાલે જન્મવિજ્ઞાનં ભક્તિર્મય્યનપાયિની ।
મદનુગ્રહેણ યુગપત્ પ્રાપ્તાસિ વરવર્ણિનિ ॥

૩૪. ઇતઃ બન્ધુજનૈઃ મિલિતા ધર્મવત્સલૈઃ ।
પ્રણીતા વરમુખ્યેન સૌખ્યં પ્રાપ્નુહિ મા ચિરમ્ ॥

૩૫. કાઞ્ચનમાલિની -ભગવન્ નાહમાકાઙ્ક્ષે વરમન્યં કદાપિ વા ।
ત્વામેવ શરણં પ્રાપ્તામનાથાં દીનમાનસામ્ ॥

૩૬. પાલયિષ્યસિ માતેવ પિતેવ પ્રિયબન્ધુવત્ ।
યાચે ત્વાં પુનરીશાનં ગતિર્મે ભવ ભૂયસી ॥

૩૭. શ્રીશઙ્ખઃ –
ઇત્યેવં પ્રલપન્તીં તાં કૃપણાં તરુણીમણિમ્ ।
પ્રાહ ગમ્ભીરયા વાચા શઙ્કરો લોકશઙ્કરઃ ॥

૩૮. અયિ વત્સે મદીયેસ્મિન્ લિઙ્ગે માં સાર્વકાલિકમ્ ।
આરાધય યથાન્યાયં સ્નાત્વા તામ્રાનદીજલે ॥

૩૯. કાલેન તે પ્રદાસ્યામિ મત્સાયુજ્યં મહોદયમ્ ।
અદ્ય દક્ષિણ વાહિન્યાં તામ્રાયાં કૃતમજ્જનાઃ ॥

૪૦. યે માં પશ્યન્તિ વૈ મર્ત્યાઃ તેષાં ક્વાપિ ન મર્ત્યતા ।
ઇત્યુક્ત્વોપરતઃ શમ્ભુઃ તસ્મિન્ લિઙ્ગમહામણૌ ॥

૪૧. વિવેશ સોમયા ગૌર્યા સ્તૂયમાનઃ સુરાસુરૈઃ ।
સાપિ નિત્યં વરારોહા નિયમૈઃ દુષ્કરૈઃ શિવમ્ ॥

૪૨. નિનાયારાધયન્તી તં યોગિની કાલસઞ્ચયમ્ ।
તાવત્સાધ્યો દેવમુખ્યઃ દ્યુમાન્ નામ મહાયશાઃ ॥

૪૩. પરીત્ય ભારતીં ભૂમિં કૌતુકાલોકનેચ્છયા ।
ક્રમેણ તામ્રામાસાદ્ય મલયાદ્યાસમુદ્રકમ્ ॥

૪૪. અટમાનો દદર્શાગ્રે તન્વીં વિદ્યુલ્લતામિવ ।
આવિષ્ટમદનોઽભ્યેત્ય તામેતાં તુ તપસ્વિનીમ્ ॥

૪૫. ગ્રહીતુમુત્સુકો ભૂત્વા ધર્ષણાયાન્વધાવત ।
તપઃશક્ત્યાનયા કોપાત્ દૂરે નિસ્સારિતઃ તતઃ ॥

૪૬. સ્વર્લોકં પ્રાપ કામેન સદ્યઃ પરવશોઽભવત્ ।
તદ્ભ્રાતરો મહાભાગાઃ શ્રુત્વા તં શોકવિહ્વલમ્ ॥

૪૭. કિમેતત્ ઇતિ પપ્રચ્છુઃ તતસ્સોઽયં વ્યજિજ્ઞપત્ ।
તેન સમ્ભૂય સહસા ભ્રાતરં દીનમાનસમ્ ॥

૪૮. સાન્ત્વયિત્વા તુ તેનૈવ પ્રાપુર્મલયનન્દિનીમ્ ।
તત્રૈનાં પશ્ચિમે તીરે ધ્યાયન્તીં શિવસન્નિધૌ ॥

૪૯. સ્વાહામિવાપરામાભાં ભાસ્કરીમિવ નિર્મલામ્ ।
વિલોક્ય વિસ્મિતાઃ સાધ્યાઃ તત્સૌન્દર્યપ્રભાદિભિઃ ॥

૫૦. વઞ્ચિતા ઇવ તે સર્વે જગદુઃ ચ પરસ્પરમ્ ।
કેયં જાતા કિલાશ્ચર્યં વિધાતુઃ સૃષ્ટિકૌશલમ્ ॥

૫૧. અદૃષ્ટપૂર્વરૂપં તુ જગન્મોહનહેતુકમ્ ।
ઇન્દ્રનીલમણિચ્છાયા કિમસ્યાઃ દેહ સંહતિઃ ॥

૫૨. અષ્ટમીચન્દ્રરેખેવ બાલરેખા વિભાતિ નઃ ।
કમલાવાસભવનં કિમસૌ લપનામ્બુજમ્ ॥

૫૩. મૃણાલમુકુરાકારૌ કરૌ કલ્પલતોપમૌ ।
કુચાવેતૌ શાતકુમ્ભશૈલકૂટમહોદયમ્ ॥

૫૪. પાદાદિકેશપર્યન્તમસ્યાઃ સૌન્દર્યસમ્ભૃતમ્ ।
કસ્મૈ વિસૃષ્ટા વિધિના પુણ્યરાશિઃ વિભૂતયે ॥

૫૫. એનાં ગૃહીત્વા તન્વઙ્ગીં સર્વે વયં અતન્દ્રિતાઃ ।
ભોક્ષ્યામઃ ક્રમશઃ ચાન્દ્રીં સુધામિવ દિવૈકસઃ ॥

૫૬. ઇત્થં સર્વેષુ તેષ્વેષુ કલ્પમાનેષુ સાદરમ્ ।
ચિન્તામવાપ મહતીં સાધ્વસેન તદઙ્ગના ॥

૫૭. અહો મહતિ તં ભાવ્યમસ્માકમધિકં કિલ ।
માતા મૃતા પિતા નષ્ટઃ બાન્ધવાઃ ચ ન સન્તિ હિ ॥

૫૮. રક્ષિતારો ન સન્ત્યત્ર વિના દેવાત્ મહેશ્વરાત્ ।
દુર્બલસ્ય વિષં નારી વિષં નારી યતાત્મનઃ ॥

૫૯. અનાથાનાં પુનઃ સ્ત્રીણાં સૌન્દર્યં વિષમુચ્યતે ।
યુવત્યઃ કામિના મન્દાઃ વાગુરાકારિણીમિમામ્ ॥

૬૦. તનું ત્યક્ષ્યામ્યહં વહ્નૌ વ્યાઘ્રીમિવ દુરાસદામ્ ।
ઇતિ નિશ્ચિત્ય મનસા દૃઢસઙ્કલ્પમાશ્રિતા ॥

૬૧. ધ્યાયન્તી શિવપાદાબ્જં જપન્તી નૃહરેર્મનુમ્ ।
પરિક્રમ્ય સ્વહોમાગ્નિં પ્રવિવેશાહુતિર્યથા ॥

૬૨. તાવત્ હાહાકૃતં રાજન્ દેવતૈઃ દિવિ સંસ્થિતૈઃ ।
ભૂતૈશ્ચ સકલૈઃ કિઞ્ચિત્ ચકમ્પે ચ વસુન્ધરા ॥

૬૩. આશ્રમાનોકહસ્થાનં આરાવૈરિવ પક્ષિણામ્ ।
તટદ્વયી તદા નદ્યાઃ રુરોદ કરુણામયી ॥

૬૪. ઇત્થં ભૂતેષુ સર્વેષુ પતિતાયાં હુતાશને ।
અનુકમ્પાકમ્પમાનાત્ લિઙ્ગાત્ આવિરભૂત્ શિવઃ ॥

૬૫. શૂલટઙ્કવરાભીતિપરિષ્કૃતમહાભુજઃ ।
સ્તૂયમાનો મહાસિદ્ધૈઃ સાધ્યાન્ આહાતિમન્યુના ॥

૬૬. મહાપાપતરં કર્મ યુષ્માભિર્મૂઢબુદ્ધિભિઃ ।
મદગ્રેઽપિ વિશેષેણ વિહિતૈઃ પ્રાકૃતૈરપિ ॥

૬૭. તસ્માત્ ન સ્વર્ગતિર્ન ભૂયાત્ મહતાજ્ઞાબલાત્ મમ ।
ઇત્યુક્ત્વા ભગવાન્ શમ્ભુઃ તેન સંરક્તલોચનઃ ॥

૬૮. હુઙ્કારેણૈવ તાન્ સર્વાન્ સાધ્યાન્ દેવાન્ તદાશ્રમાત્ ।
દૂરમુત્સારયામાસ તૂલરાશિમિવાનલઃ ॥

૬૯. સા દગ્ધરૂપા તન્વઙ્ગી તેજોરૂપો હુતાશનાત્ ।
વિનિષ્ક્રમ્યામ્બરેણૈવ સર્વેષાં પશ્યતાં તદા ॥

૭૦. સંપ્રાપ હૃદયં શમ્ભોઃ તદદ્ભુતમિવાભવત્ ।
એવં તામનુશાસ્યાદિગુરુઃ ગઙ્ગાધરો વિભુઃ ॥

૭૧. વિવેશ તસ્મિન્ વિમલે લિઙ્ગે દેવવરાર્ચિતે ।
તેઽપિ સાધ્યાઃ ભયાવિષ્ટાઃ સન્તપ્તાઃ તસ્ય મન્યુના ॥

૭૨. તસ્મિન્ વિષ્ણુવને વિષ્ણું શરણં જગ્મુરાતુરાઃ ।
ત્રિણદીસઙ્ગમમભ્યેત્ય આર્તિમાપુઃ દુરત્યયામ્ ॥

૭૩. કિં કર્તવ્યં ઇહાસ્માભિઃ કામમોહાલસાત્મભિઃ ।
નહ્યન્યો રક્ષિતા લોકે શરણ્યાત્ માધવાત્ ઋતે ॥

૭૪. તસ્માત્ તમાપચ્છરણં શરણાગતવત્સલમ્ ।
યાસ્યામઃ સર્વદા સોઽયં પાલયિષ્યતિ નો વિભુઃ ॥

૭૫. ઇતિ નિશ્ચિત્ય તે સર્વે તત્રૈવ હરિસન્નિધૌ ।
તપસ્તેપુર્મહારાજન્ નિયમૈર્દુષ્કરૈરપિ ॥

૭૬. એવં વર્ષશતે પૂર્ણે સન્તુષ્ટઃ કમલાપતિઃ ।
પ્રાદુરાસીત્ પુરસ્તેષાં સ્મયમાનમુખામ્બુજઃ ॥

૭૭. શ્રીભગવાન્ –

પ્રીતોऽસ્મિ સહસા ચાહં વૃણુતાભીપ્સિતં વરમ્ ।
સાધ્યાઃ –
ભગવન્ યદિ સન્તુષ્ટો વરાર્હા યદિ વા વયમ્ ॥

૭૮. શિવકોપાભૂતાન્નઃ ત્રાહિ દેવ દયાનિધે ।
શ્રીભગવાન્ –
નૈવ શ્રેયાંસિ જાયન્તે શિવચિત્તાપરાધિનામ્ ॥

૭૯. તસ્માત્ ઉપાયં વક્ષ્યામિ યેન શ્રેયો ભવિષ્યતિ ।
વ્રતં પાશુપતં નામ મહાપાતકનાશનમ્ ॥

૮૦. શિવપ્રીતિકરં પુણ્યં યો ધત્તે ભુવિ માનવઃ ।
યદનુષ્ઠાનમાત્રેણ પ્રયાન્તિ શિવતુલ્યતામ્ ॥

૮૧. ઇતિ તેષાં દદાવાદિપૂરુષો વિધિના સ્વયમ્ ।
તેऽપિ તસ્માત્ ગુરોર્વિષ્ણોઃ પ્રાપ્ય પાશુપતં વ્રતમ્ ॥

૮૨. તેન દેવં સમાનર્ચુઃ આશુતોષમુમાપતિમ્ ।
તેષાં પુરસ્તાત્ વ્રતિનાં પ્રાદુર્ભૂતો વૃષધ્વજઃ ॥

૮૩. મુખ્યત્વં સર્વદેવાનાં કામરૂપાતિસમ્પદઃ ।
બુદ્ધિં ચ સાત્વિકીં જ્ઞાનં મુચ્યન્તે તેન જન્તવઃ ॥

૮૪. સંસારસાગરાત્ ઘોરાત્ દદૌ બ્રહ્મપ્રકાશકમ્ ।
ઇત્થં દત્વા વરં તેભ્યઃ પ્રસન્નઃ સ ઉમાપતિઃ ॥

૮૫. પ્રાહ ભૂયોऽપિ તાન્ વાચા પ્રીણયિત્વા પુનઃપુનઃ ।
શ્રીશિવઃ –
ભવદ્ભિઃ યત્ર તામ્રાયાં સ્નાનં ત્રિષવણં મુદા ॥

૮૬. સાધ્યતીર્થમિતિ ખ્યાતં ભૂયાત્ તન્મદનુગ્રહાત્ ।
કન્યારૂઢે દિનકરે ક્ષીયમાણે નિશાકરે ॥

૮૭. ત્રિપઞ્ચતિથ્યપુણ્યાઃ પિતૃદેવપ્રિયઙ્કરાઃ ।
તસ્મિન્ કાલે સકૃદ્વાપિ તીર્થેऽસ્મિન્ કૃતમજ્જનાઃ ॥

૮૮. શ્રાદ્ધદેવાર્ચનં વાપિ યે કુર્વન્તિ વ્રતાદિકમ્ ।
તેષાં ભુક્તિં ચ મુક્તિં ચ પ્રદાસ્યામ્યહમેવ હિ ॥

૮૯. મામામર્ચ્ય યથાયોગં જપ્ત્વા પઞ્ચાક્ષરં મનુઃ ।

અષ્ટાક્ષરમનું વાપિ જપ્ત્વા સમ્પૂજ્ય કેશવમ્ ॥

૯૦. પ્રાપ્નોત્યપુનરાવૃત્તિં પદમાનન્દલક્ષણમ્ ।
ઇત્યુક્ત્વાન્તર્હિતે દેવે તે દેવાઃ સાધ્યસંજ્ઞિતાઃ ॥

૯૧. પૂર્ણકામાઃ સમામન્ત્ર્ય જગ્મુર્સ્વર્લોકમદ્ભુતમ્ ।
રાજન્ ભૂયઃ કથા કાચિત્ પુણ્યા પૌરાણિકી હરેઃ ॥

૯૨. તામિમામખિલાઘૌઘશમનીં શ્રોતુમર્હસિ ।
સાધ્યાનાં દેવમુખ્યાનાં ક્ષેત્રસ્મિન્ નૈમિશોપમે ॥

૯૩. આશ્રમં ચન્દ્રમાલિન્યાઃ સાક્ષાત્ નારાયણાત્મકમ્ ।
દશાવતાર તીર્થાખ્યં તુલ્યં મન્દાકિનીજલૈઃ ॥

૯૪. માઘે તુ રથસપ્તમ્યાં યે નદ્યાં કૃતમજ્જનાઃ ।
દશાવતારમૂર્તીનાં જપ્ત્વા નામાનિ ભૂપતે ॥

૯૫. નમસ્કૃત્વા દિનકરં બ્રહ્મભૂયાય કલ્પતે ।
વીરસેનઃ –
ભૂયોહં શ્રોતુમિચ્છામિ કથામેનાં તુ વિસ્તરાત્ ॥

૯૬. કા વેયં કસ્ય વા પુત્રી યોગિની ચન્દ્રમાલિની ।
દશાવતારતીર્થાખ્યં તત્તીર્થં શંસ્યતે કથમ્ ॥

૯૭. એતત્સર્વમશેષેણ વદ વિસ્તરતો ગુરો ।
શઙ્ખઃ –
હન્ત તે કથયિષ્યામિ કથાં કૌતૂહલાવહામ્ ॥

૯૮. યસ્યાઃ શ્રવણમાત્રેણ ન ભૂયો જાયતે નરઃ ।
અગ્રહારો મહાનાસીત્ નામ્ના મણિમહોદયઃ ॥

૯૯. તામ્રાયાઃ પૂર્વભાગે તુ નાનાજનસમાશ્રયઃ ।
વેદવિદ્ભિઃ મહાસિદ્ધૈઃ યાયજૂકૈઃ મનસ્વિભિઃ ॥

૧૦૦. ક્ષેત્રં ક્ષેમકરં નૃણાં ધનધાન્યસમન્વિતમ્ ।
તત્ર કશ્ચિત્ મહાતેજા યજ્વા વેદવિદાં વરઃ ॥

૧૦૧. બ્રાહ્મણો નામ તેજસ્વી સમ્મતો વાસમાતનોત્ ।
તસ્ય કાલેન સઞ્જાતઃ પુત્રો મિત્રસખાભિધઃ ॥

૧૦૨. શુશ્રૂષમાણઃ પિતરૌ નિનાય કતિચિત્ સમાઃ ।

એતસ્મિન્નન્તરે કેચિત્ શૈલૂષાનાટ્યલમ્પટાઃ ॥

૧૦૩. સ્ત્રીભિઃ કાઞ્ચનરૂપાભિઃ તરુણીભિઃ સમન્વિતાઃ ।
નનૃતુર્વિવિધૈઃ ચિત્રૈઃ તાલરાગલયાન્વિતૈઃ ॥

૧૦૪. તત્રૈકાં તરુણીં તન્વીં વિદ્યુદ્વલ્લીમિવાપરામ્ ।
દૃષ્ટ્વા તુ મદનાવિષ્ટઃ સોઽયં મિત્રસખો યુવા ॥

૧૦૫. તાં યયાચે તુ રમણીં સાપિ તં પ્રેક્ષ્ય સમ્મતા ।
વિહાય બન્ધૂન્ સુસ્નિગ્ધાં તામાદાય વરાઙ્ગનામ્ ॥

૧૦૬. દેશાત્ દેશાન્તરં પ્રાપ કુલધર્માન્ વિહાય તુ ।
તત્ર તત્ર સમભ્યસ્ય ગાનનાટ્યાદિકં તયા ॥

૧૦૭. નાનારૂપધરો વેષભૂષાભાષણચારુભિઃ ।
રઞ્જયિત્વા જનપદાન્ તેભ્યો ગૃહ્ણન્ ધનં બહુ ॥

૧૦૮. શિષ્યૈઃ પ્રશિષ્યૈઃ ભૃત્યૈઃ ચ બલીવર્દૈઃ ચ રાસભૈઃ ।
ઝલ્લિમૃદઙ્ગનિસ્સાનપણવાનકગોમુખૈઃ ॥

૧૦૯. ઘોષયન્ ગાયમાનઃ ચ પૂજ્યમાનઃ ચ ભૂમિપૈઃ ।
સમન્તાત્ ભારતીભૂમિં પરિચક્રામ હર્ષયન્ ॥

૧૧૦. એવં સઞ્ચારમાણઃ તુ શનૈઃ કાશ્મીરમાપ સઃ ।
તદ્દેશભૂપતિઃ કોઽપિ કુઙ્કુમાઙ્કુ ઇતીરિતઃ ॥

૧૧૧. તત્ મિત્રસખમાહૂય બહુમાનપુરસ્સરમ્ ।
તેન વિસ્તાર્યમાણાનિ કૌતુકાન્ યદિ કૌતુકી ॥

૧૧૨. દદર્શ મન્ત્રિસામન્તૈઃ સેનાધ્યક્ષપુરોહિતૈઃ ।
મત્સ્યાવતારવેષેણ જનલોચનહારિણા ॥

૧૧૩. પ્રથમં તોષયામાસ રાજાનં તત્ર સંસદિ ।
તથા કામઠરૂપેણ વરાહેણ તતઃ પરમ્ ॥

૧૧૪. વપુષા નૃહરેરાદિ વામનાકૃતિના તથા ।
નામ(રામ)ત્રયવતારૈઃ તુ યાદવેન્દાવતારતઃ ॥

૧૧૫. તથૈવ કલ્કિવપુષા નટિત્વા જનસંસદિ ।
સન્તુષ્ટાત્ ભૂપતેઃ પ્રાપ્ય વસુરત્નધનાદિકમ્ ॥

૧૧૬. સહાનુયાયિભિઃ ભૂયઃ સ્વં પ્રાપ શિબિરં નિજમ્ ।
એવં ગતે તુ શૈલૂષે તાઃ ચ રાજ્ઞઃ કુમારિકાઃ ॥

૧૧૭. રૂપયૌવનસમ્પન્ના સા નામ્ના ચન્દ્રમાલિની ।
તમેનં ચકમે કાન્તં શૈલૂષં વેષધારિણમ્ ॥

૧૧૮. મૂર્ચ્છામવાપ મહતીં વિષમાયુધલક્ષણામ્ ।
મુક્તલીલામનાહારાં ભૂતાવિષ્ટામિવસ્થિતામ્ ॥

૧૧૯. તામેનાં તત્સખી કાચિત્ ઉપસૃત્યાન્તિકં રહઃ ।
પપ્રચ્છ વિનયોપેતા પ્રીણયન્તી મૃદૂક્તિભિઃ ॥

૧૨૦. કાયેન મનસા વાચા વિદ્યયા વા ધનેન વા ।
તોષયિષ્યામ્યહં સર્વં યત્તે મનસિ કાઙ્ક્ષિતમ્ ॥

૧૨૧. ઇતિ તસ્યાઃ વચઃ શ્રુત્વા સૈષા પ્રાહ પ્રિયાં સખીમ્ ।
સખિ તે કથયિષ્યામિ યો મામાધિર્દહત્યલમ્ ॥

૧૨૨. વક્ષ્યામિ તદશેષેણ રહસ્તત્ અવધાર્યતામ્ ।
કોમલાકારપુમાન્ સોઽસૌ વિષ્ણોઃ ચારુસુવેષધૃત્ ॥

૧૨૩. યોઽસૌ શૈલૂષકે લોકે એકઃ પરમાશ્ચર્યમૂર્તિમાન્ ।
સોઽયં દહતિ મામન્તર્વેષભૂષણભાષણૈઃ ॥

૧૨૪. તસ્મિન્ લબ્ધ્વૈવ રમણે જીવામ્યેવ હિ નાન્યથા ।
ઇતિ તસ્યાશયં જ્ઞાત્વા સેયં માયાવિલાસિની ॥

૧૨૫. વિદ્યયા કર્ષયામાસ રાત્રૌ મિત્રખ્યાભિધમ્ ।
તયા સા યોજયામાસ રત્યાનઙ્ગમિવ ક્ષણાત્ ॥

૧૨૬. તં લબ્ધ્વા વિસ્મયાવિષ્ટા નરવર્યં નૃપાત્મજા ।
રમયામાસ લીલાભિઃ તદાનઙ્ગાકમોક્તિભિઃ ॥

૧૨૭. સ તુ પ્રીતમના સોઽપિ સમાલિઙ્ગ્યાઙ્ગનામણિમ્ ।
સુધાતરઙ્ગિણીપૂરધારામાહ ગિરં પ્રિયામ્ ॥

૧૨૮. અકાર્યમિદમાવાભ્યાં શ્રેયસે ન વરાઙ્ગને ।
ચોરવત્ નૃપતેરન્તઃ પુરે હન્ત દુરાસિકા ॥

૧૨૯. ઇયમાપત્પ્રસૂઃ પુંસામંસાસક્તેવ પન્નગી ।
મનીષિતસ્ય તન્વઙ્ગિ મહતઃ તવ સિદ્ધયે ॥

૧૩૦. બુદ્ધિં પ્રબોધાયાં યદ્ય વયસ્યામિવ સમ્મતામ્ ।
અલક્ષ્યમાણા કલ્યાણિ તથા ત્વં ત્રિદશૈરપિ ॥

૧૩૧. સમાગચ્છ સકાશં મે લક્ષ્મી સુકૃતિનાં યથા ।
ઇત્યુક્ત્વા તલ્લટાગ્રે દત્વા તિલકમદ્ભુતમ્ ॥

૧૩૨. માયાવી ચ સ્વયં પ્રાયાત્ અદૃશ્ય સ્વજનં ક્ષણાત્ ।
ઇત્થં તસ્મિન્ મિત્રસખે પ્રયાતે પ્રાણવલ્લભે ॥

૧૩૩. સાધનાનિ સમાધાય ભૂષણાન્યમ્બરાણિ ચ ।
ભક્ષ્યભોજ્યપદાર્થાનિ જનૈઃ સર્વૈરલક્ષિતા ॥

૧૩૪. યત્રાસૌ વર્તતે જારઃ તં દેશં પ્રાપ સત્વરમ્ ।
પરિરેભે ચ બાહુભ્યાં રતિં ચિત્તભવો યથા ॥

૧૩૫. તતઃ સ પરિવારાણિ સમુત્થાપ્ય તુ સાધનૈઃ ।
વિનિષ્ક્રમ્ય પુરાત્તસ્માત્ તયા સાકમદૃશ્યયા ॥

૧૩૬. શનૈઃ શનૈઃ અતિક્રમ્ય પુરગ્રામાદિકાન્ બહૂન્ ।
કાશ્મીરાન્ નૈષધાન્ સાલ્વાન્ સિન્ધુસૌવીરકેકયાન્ ॥

૧૩૭. સ પ્રાપ સર્વતોભદ્રાં ભદ્રશ્રીસર્વભૂષિતા ।
પાણ્ડ્યભૂપુરુહૂતસ્ય ભુજતેજોભિરર્ચિતા ॥

૧૩૮. યત્ર નાનામણિસ્તોમકરુણારુણવાહિની ।
તામ્રપર્ણી મલયજા જયતે પાવની નૃણામ્ ॥

૧૩૯. પાણ્ડ્યભૂમિં સમાસાદ્ય સ્વદેશં વિષ્ણુકાનને ।
ચકાર વસતિં તીરે તામ્રાયાઃ પૂર્વરોદસિ ॥

૧૪૦. રમમાણઃ તયા સાર્ધં ભુઞ્જાનઃ સ્વમનોરથાન્ ।
નિનાય કાલં વિષયં ભગવન્નામકીર્તને ॥

૧૪૧. કદાચિત્ જારમાહૈષા તરુણી ચન્દ્રમાલિની ।
ભવતા દર્શિતાન્યાદૌ હરેરદ્ભુતકર્મણઃ ॥

૧૪૨. દશાવતારરૂપાણિ દ્રષ્ટુમિચ્છામ્યહં પ્રભો ।
તેન તેન સ્વરૂપેણ સ્વાનુરૂપા સ્વલઙ્કૃતા ॥

૧૪૩. રન્તુમિચ્છામિ ચૈકાન્તે પરો મે નાદ્ય કાઙ્ક્ષિતઃ ।

ઇતિ પૃષ્ટઃ તયા તન્વ્યા પ્રીતોઽસૌ તત્તથાકરોત્ ॥

૧૪૪. અનુસ્યૂતરતિધ્વસ્તઃ સમસ્તેન્દ્રિયપાટવઃ ।
શનૈરેનં ક્ષયં પ્રાપ શોષિતાશેષશોણિતઃ ॥

૧૪૫. ઇત્થં સંક્ષીણસત્વસ્ય કામાસક્તસ્ય દુર્મતેઃ ।
શરીરાત્ અપલાયન્ત કુત્સિતા ઇવ ચાસવઃ ॥

૧૪૬. મૃતે તસ્મિન્ મહારાજ સા નારી શોકવિહ્વલા ।
રુરોદ સુસ્વરં દીના હા હતાસ્મીતિ વાદિની ॥

૧૪૭. કુતો મે રાજભવનં ક્વ ભૃત્યા ચ બાન્ધવાઃ ।
કિં કરિષ્યામિ કં યામિ કો વા મે રક્ષિતા ભવેત્ ॥

૧૪૮. ઇતિ ચિન્તાકુલાં દૃષ્ટ્વા મરણે કૃતનિશ્ચયા ।
મહાપ્રવાહવેલાયાં તામ્રાયાં પ્રાવિશત્ શુભા ॥

૧૪૯. વિકૃષ્યમાણા તસ્યૈવ ધ્યાયન્તી રૂપમદ્ભુતમ્ ।
હરેર્દશવિધં સ્નિગ્ધં મનોજ્ઞં જારકલ્પિતમ્ ॥

૧૫૦. હરિઃ કારુણિકઃ તાવત્ દૃષ્ટ્વા તાં મરણોન્મુખીમ્ ।
કૃપયાગત્ય વેગેન વૃદ્ધબ્રાહ્મણવેષવાન્ ॥

૧૫૧. ઉદ્ધારયન્ કરાભ્યાં તાં પરિમૃશ્ય વરપ્રદઃ ।
પ્રીણયન્ મધુરૈર્વાક્યૈઃ વ્યાજહાર ગિરં વધૂમ્ ॥

૧૫૨. હરિઃ –
યમુદ્દિશ્ય પરં ભીરુ પતિતા શોકસાગરે ।
તમેનં શરણં શીઘ્રં દ્રષ્ટુમર્હસિ હૃષ્ટવત્ ॥

૧૫૩. ઇત્યુક્ત્વા વાસુદેવાખ્યં મન્ત્રં તુ દ્વાદશાક્ષરમ્ ।
સાઙ્ગં સમુપદિશ્યાસ્યૈ જપેત્યન્તરધાત્ દ્વિજઃ ॥

૧૫૪. તતઃ પરમસંહૃષ્ટા વિશ્વસ્તા વિપ્રવાક્યતઃ ।
નાનારૂપધરં દેવમચ્યુતં વનમાલિનમ્ ॥

૧૫૫. દશાવતારરૂપેણ ભાવયન્તં જગત્ત્રયમ્ ।
ધ્યાયન્તી સ્વાન્તમન્તસ્થં જજાપૈગાગ્રમાનસા ॥

૧૫૬. સ્નાત્વા ત્રિષવણં તીર્થે નિયતા ચન્દ્રમાલિની ।
ન જલ્પતિ ન નિદ્રાતિ ન કરોત્યપરાં ક્રિયમ્ ॥

૧૫૭. ત્વગસ્થિગાત્રશેષાઙ્ગી પૂજયામાસ કેશવમ્ ।
ઇત્થમબ્દત્રયે જાતે પ્રાતઃ સ્નાત્વા મહાનદીમ્ ॥

૧૫૮. માઘસ્ય શુક્લદ્વાદશ્યાં ધ્યાયન્તી જપમાતનોત્ ।
તાવદાવિરભૂત્ પુષ્પવૃષ્ટિરમ્બરવર્ત્મના ॥

૧૫૯. દેવદુન્દુભિનિર્ઘોષઃ શુશ્રુવે પટહસ્વનૈઃ ।
વિલોકયન્તી ગગનમદ્રાક્ષીત્ અર્કસન્નિભમ્ ॥

૧૬૦. વિમાનમદ્ભુતાકારમનેકપ્રમદાકુલમ્ ।
તન્મધ્યે દશધા ભિન્નં રૂપાલઙ્કારભૂષિતમ્ ॥

૧૬૧. હરિં ચતુર્ભુજં કાન્તં શઙ્ખચક્રગદાધરમ્ ।
અનેકકોટિકન્દર્પલાવણ્યામૃતવારિધિમ્ ॥

૧૬૨. સ્વકામુકસમાકારં સ્વરહાસાવલોકનૈઃ ।
ઉપલક્ષિતસર્વાઙ્ગં દૃષ્ટ્વાનન્દમવાપ સા ॥

૧૬૩. તત્ર જગ્મુઃ સુરાઃ સર્વે બ્રહ્મરુદ્રપુરોગમાઃ ।
સ્તુવન્તિ સ્તુતિભિઃ વિષ્ણું હર્ષયન્તો ગિરા વધૂમ્ ॥

૧૬૪. તત્ર દેવો મહાદેવો મહાવૃષભમાસ્થિતઃ ।
એનામાહૂય તન્વઙ્ગીં વ્યાજહાર મહેશ્વરઃ ॥

૧૬૫. શિવઃ –
શ્રુણુ વત્સે મહાભાગે તપસ્વિનિ નૃપાત્મજે ।
પશ્ય ત્વામાગતં ભાગ્યં મહતઃ તપસઃ ફલમ્ ॥

૧૬૬. આરાધિતઃ ત્વયા વિષ્ણુઃ મન્ત્રેણ મહતા ચિરમ્ ।
સમૃદ્ધકામાં ત્વાં કર્તુમાગતો લોકપૂજિતઃ ॥

૧૬૭. સોયં મિત્રસખો દેવઃ દુર્વિનીતોઽપિ કેવલમ્ ।
તવૈવ તપસા નૂનં દેવભાવમુપાગતઃ ॥

૧૬૮. અનેન સહ સંયુક્તાઃ વૈકુણ્ઠપરમાદ્ભુતે ।
પ્રશંસન્તિ સુરાસ્સર્વે સનકાદ્યાઃ ચ યોગિનઃ ॥

૧૬૯. તામ્રામ્ભસિ સકૃત્ સ્નાત્વા તીર્થે સત્પુણ્યગૌરવે ।
મમાપિ વિષ્ણોર્નામાનિ જપન્તઃ કૃતમજ્જનાઃ ॥

૧૭૦. તે યાન્તિ પરમાનન્દં તદ્વિષ્ણોઃ પરમં પદમ્ ।
ચન્દ્રમાલિનિ પશ્ય ત્વં સંસ્થિતાન્ અમ્બરે સુરાન્ ॥

૧૭૧. મત્સ્યમૂર્તિરસૌ શ્રીમાન્ કૂર્મમૂર્તિરસૌ હરિઃ ।
યસ્ય વરાહરૂપોઽયં નૃહરિઃ દાનવાન્તકઃ ॥

૧૭૨. લોકમાતા વામનોઽયં ભાર્ગવઃ ક્ષત્રભઞ્જનઃ ।
પશ્ય દાશરથિં રામં યમાહુઃ તારકં બુધાઃ ॥

૧૭૩. આકૃષ્ટયમુનાપૂરં રામં માં વપુરાસ્થિતમ્ ।
યેન લોકાઃ ત્રયઃ કૃત્સ્નાઃ ભવન્તિ હિ નિરામયાઃ ॥

૧૭૪. તમેનં ગોપિકાકાન્તં કૃષ્ણં કમલલોચનમ્ ।
પશ્ય પશ્ય મહાભાગે ત્વત્પ્રિયાર્થમિહાગતમ્ ॥

૧૭૫. હયગ્રીવમમું યેન નિર્મ્લેચ્છા કલ્પિતા મહી ।
કુરુ પ્રણામમેતેષાં કુરુ સ્નાનમિહોદકે ॥

૧૭૬. સમારોહ વિમાનં ત્વં મહાદેવેન શાસિતા ।
વદ્ધાઞ્જલિપુટા તન્વી જય શમ્ભો હરે વિભો ॥

૧૭૭. પાહિ પાહીતિ જલ્પન્તી મમજ્જામ્ભસિ નિર્મલે ।
સમુત્તસ્થે તદા તસ્માત્ તીર્થાત્ આર્તિહરાત્ નૃણામ્ ॥

૧૭૮. સૂર્યવૈશ્વાનરાકારા તરુણી તનુમધ્યમા ।
અનઙ્ગરાજવનિતામધઃકૃત્ય સ્વચર્ચસા ॥

૧૭૯. પૂજ્યમાનામરગણૈઃ આરુરોહ રથોત્તમમ્ ।
મહાકન્દર્પસૌન્દર્યસિન્ધું મિત્રસખાભિધમ્ ॥

૧૮૦. ચિરાય કાઙ્ક્ષિતં કાન્તમવાપ તપસઃ ફલમ્ ।
તાવેતૌ દમ્પતીમુખ્યૌ રતિકામાવિવાપરૌ ॥

૧૮૧. દેવાન્ પ્રણમ્ય દેવર્ષીન્ વિમાનેનાતિરંહસા ।
જગ્મતુઃ પરમં લોકં પુનરાવૃત્તિવર્જિતમ્ ॥

૧૮૨. શિવો મુકુન્દો ભગવાન્ બ્રહ્મલોકપિતામહઃ ।
સમુપસ્પૃશ્ય તત્તીર્થં જગ્મુર્દેવૈર્યથાગતમ્ ॥

૧૮૩. ઇત્થં નિગત્ય મહતીં શ્રુતિમૌલિમાલાં
પુણ્યાં કથાં નૃપવરાય મહાતપસ્વી ।

બદ્ધાઞ્જલિર્મલયજાં મનસા પ્રણમ્ય
તૂષ્ણીમભૂત્ નિમિષમેષ મહાનુભાવઃ ॥

૧૮૪. યસ્ત્વેનાં સકલજનાઘપઙ્કપ્રક્ષોભપ્રકટિતજાહ્નવીપ્રવાહામ્ ।
યે મર્ત્યાઃ શ્રવણપુટેન ધારયન્તે તે મુક્તાઃ પરમકથાસુધાં મુનીન્દ્રાઃ ॥

ઇતિ ષષ્ટિતમઃ અધ્યાયઃ । Pro.Total = 5619 + 184 =5803.

## એકષષ્ટિતમઃ અધ્યાયઃ

શ્રીવૈકુણ્ઠાદિ શ્રીપુરાદિ ક્ષેત્રમાહાત્મ્યમ્ ।

૧. શઙ્ખઃ –
રાજન્ કલિમલધ્વાન્તવિધ્વંસનવિનોદિનીમ્ ।
આકર્ણય કથાં પુણ્યાં વક્ષ્યમાણાં મયાધુના ॥

૨. તસ્માદ્વિષ્ણુવનાત્ પુણ્યાત્ પુરતો મહદદ્ભુતાઃ ।
નવસ્થાનાનિ વિષ્ણોઃ ચ મુક્તિદાઃ ચ મહીપતે ॥

૩. બ્રહ્માશ્રમં નામ વનં મહામુનિનિષેવિતમ્ ।
યત્ર વૈકુણ્ઠકૈલાસૌ પ્રકાશેતે મહોદયૌ ॥

૪. રોમશેનાર્ચિતઃ શમ્ભુ ઉમયા સહ જાયતે ।
રોમશાખ્યં તીર્થમુખ્યં તામ્રાયાં સંપ્રદૃશ્યતે ॥

૫. તત્ર સ્નાત્વા મહાદેવં પ્રણમ્ય ગિરિજાસખમ્ ।
ઇહ લોકે સુખી ભૂત્વા નિર્મુક્તાશેષકિલ્બિષઃ ॥

૬. દેહાન્તે શામ્ભવં લોકં ગચ્છન્તિ મનુજા ધ્રુવમ્ ।
તત્ર નારાયણઃ સાક્ષાત્ સાન્નિધ્યં કુરુતે સદા ॥

૭. કલશીતીર્થસંજ્ઞં તુ તીર્થં જાગર્તિ પાવનમ્ ।
યદમ્બુકણિકાપાનાત્ સ્નાનાત્ સંસ્પર્શનાત્ અપિ ॥

૮. બ્રહ્મહા મુચ્યતે પાપૈઃ કિમન્યે પાપિનો નરાઃ ।
અહઙ્કારહૃતાન્ વેદાન્ જ્ઞાનવિજ્ઞાનહેતુકાન્ ॥

૯. યત્રારાધ્ય હરિં ભક્ત્યા ભૂયસ્તાન્ પ્રાપ પદ્મભૂઃ ।
યદૃચ્છયા સમાગત્ય પાપિનોઽપિ તદાશ્રમમ્ ॥

૧૦. જાયન્તે નૈવ ભૂયસ્તે નાત્ર કાર્યા વિચારણા ।
તતોऽપિ કિઞ્ચિદગ્રે ક્ષેત્રં તુ વિજયાસનમ્ ॥

૧૧. પુરા સઙ્કુચિતાનાં મ્લેચ્છાનાં શતકોટયઃ ।
જિતા તદ્દેશરાજાનં પ્રતાપાઽગદસંજ્ઞિતમ્ ॥

૧૨. રાજ્યં ચક્રુઃ સ્વયં મ્લેચ્છાઃ દુર્વિનીતાઃ સમાગતાઃ ।
મણલૂરુપુરં ગત્વા રાષ્ટ્રકોશબલૈઃ સહ ॥

૧૩. પલાયમાનો વિપિનં પ્રવિવેશ ભયઙ્કરમ્ ।
પૂર્વભાગે તુ વૈકુણ્ઠે તામ્રાયા ઉત્તરે તટે ॥

૧૪. નિવાસાય સ્થલં કૃત્વા પૂજયામાસ કેશવમ્ ।
તાવદાવિરભૂત્ વિષ્ણુઃ પુરતો પાણ્ડ્યભૂપતેઃ ॥

૧૫. શઙ્ખચક્રગદાપદ્મપરિષ્કૃતચતુર્ભુજઃ ।
કિરીટમુકુટાદ્યૈશ્ચ ભૂષિતો ભૂષણોત્તમૈઃ ॥

૧૬. શ્રિયા ભૂમ્યા સેવમાનો દેવતૈઃ સનકાદિભિઃ ।
સ્વાસનાત્ આસનં દિવ્યમાદાય મણિભાસ્વરમ્ ॥

૧૭. કૃત્વા સ્વાઙ્કે સમારોપ્ય રાજાનં કરુણાનિધિઃ ।
તામ્રાતોયં સમાનીય પાઞ્જજન્યેન પાણિના ॥

૧૮. અભિષિચ્યાપ્યનુગ્રાહ્ય તત્રૈવાન્તરધીયત ।
તાવત્ રાજ્ઞઃ પાણ્ડ્યપતેઃ વિસ્મયાવિષ્ટચેતસઃ ॥

૧૯. સિંહાસનસ્ય પાદેભ્યઃ નિસ્સૃતાઃ શતકોટયઃ ।
યોધાઃ ચ પરમાયત્તાઃ નાનાશસ્ત્રાસ્ત્રવેદિનઃ ॥

૨૦. તે ગત્વા મ્લેચ્છનિકરં હત્વા સબલવાહનમ્ ।
પ્રતાપાઙ્ગદનામાનં મણ્લૂરુપુરોત્તમે ।
૨૧. તમેવ ચક્રુઃ રાજાનં સર્વે મુમુદિરે જનાઃ ।
તાવદ્દેવાઃ સગન્ધર્વાઃ બ્રહ્મરુદ્રપુરોગમાઃ ॥

૨૨. વિકીર્ય પારિજાતસ્ય કુસુમૈરવનીતલમ્ ।
વિજયાસનનામાનં તુષ્ટુવુઃપુરુષોત્તમમ્ ॥

૨૩. તીર્થં તુ પાઞ્જજન્યાખ્યં ક્ષેત્રં તુ વિજયાસનમ્ ।
પશ્યન્તઃ ચ નિમજ્જન્તો ન પુનર્ગર્ભવાસિનઃ ॥

૨૪. તસ્યૈવ નિકટે પૂર્વે ભૂમિપાલાભિધે હરિઃ ।
અદ્યાપિ વરદઃ શેતે શેષપર્યઙ્કસંજ્ઞિતે ॥

૨૫. ભૂમિપાલમિતિ સ્તોત્રે સ્તુવન્તિ સનકાદયઃ ।
પુરા ભાર્ગવકોપેન હન્યમાને તુ સર્વતઃ ॥

૨૬. ભીતઃ તદા પાણ્ડ્યપતિઃ તત્રારાધ્ય જનાર્દનમ્ ।
અયાચત રહઃસ્થાનં નિવાસાય હિ નિર્ભયમ્ ॥

૨૭. દત્વાભયં નૃપયાસ્મૈ પાણ્ડ્યરાજાય સાદરમ્ ।
તમેનં હરિધામાખ્યં સપુત્રજ્ઞાતિબાન્ધવમ્ ॥

૨૮. સમાદાય કરામ્ભોજૈઃ સ્વમુખ્યૈઃ પ્રાક્ષિપત્ ક્ષણાત્ ।
સ તત્કુક્ષિવિવરં સંપ્રવિશ્ય મહીપતિઃ ॥

૨૯. દદર્શ સર્વતોભદ્રં રાજ્યં નયનભૂષણમ્ ।
તામ્રાં ચ મલયાદ્રિં ચ મણલૂરુપુરં તથા ॥

૩૦. તત્ર ગત્વા સ્વભવનં રાજ્યં ચક્રે મહીપતિઃ ।
હરિઃ સ્વયં પાણ્ડ્યમહીં જુગોપાપાયતઃ પ્રભુઃ ॥

૩૧. ઇત્થં સહસ્રે શરદામપયાતે શનૈશ્શનૈઃ ।
જામદગ્ન્યઃ તદા રામો વિરતઃ ક્ષત્રિયક્ષયાત્ ॥

૩૨. કાશ્યપાય મહીં દત્વા ન્યસ્તશસ્ત્રો જિતેન્દ્રિયઃ ।
પ્રાપ્ય શૈલં મહેન્દ્રાખ્યં સ ચક્રે તપ ઉત્તમમ્ ॥

૩૩. તતઃ કુક્ષિગતં ભૂપમાસ્યાત્ નિર્વાસ્ય ભૂતલે ।
મણલૂરુપુરે ચક્રે રાજાનં સહ બન્ધુભિઃ ॥

૩૪. ઇત્થમસ્ય હરેર્લીલાં દૃષ્ટ્વા દેવાઃ સવિસ્મયાઃ ।
અવકીર્યામ્બરાત્ પુષ્પાણ્યાનર્ચુઃ સનકાદિભિઃ ॥

૩૫. તત્ર હર્ષાભિધં તીર્થં મજ્જતાં પાપનાશનમ્ ।
તત્ર સ્નાત્વા હરિં દૃષ્ટ્વા સર્વાન્ કામનવાપ્નુયાત્ ॥

૩૬. તદગ્રે યુગ્મલસ્થાનં દેવદેવસ્ય શાર્ઙ્ગિણઃ ।
પુરાશ્વિનૌ અશ્વિસુતૌ યજ્ઞભાગવિવર્જિતૌ ॥

૩૭. તામ્રાયા ઉત્તરે તીરે કૃત્વાશ્રમપદં નિજમ્ ।
પૂજયામાસતુર્દેવં ગુરૂક્તેનૈવ વર્ત્મના ॥

૩૮. ઇત્થમબ્દશતં પૂર્ણં ભક્ત્યા ચાર્ચયતઃ તયોઃ ।
દ્વિધાભૂતઃ પ્રાદુરભૂત્ વરદો ગરુડધ્વજઃ ॥

૩૯. વરેણ છન્દયામાસઃ વવ્રાતે તૌ તમીશ્વરમ્ ।
પ્રસીદ ભગવન્ વિષ્ણો પ્રસીદ કરુણાનિધે ॥

૪૦. યદિ તુષ્ટોઽસિ તપસા યદ્યાવાં વરોચિતે ।
ત્રયસ્ત્રિંશત્સુરગણાઃ કોટયઃ કાશ્યપાત્મજાઃ ॥

૪૧. એતેષુ ગણ્યમાનેષુ મુખ્યાવાવાં ન સંશયઃ ।
તથાપિ શક્રઃ કોપેન યજ્ઞભાગં ન દત્તવાન્ ॥

૪૨. ભિષજાવિતિ યદ્દોષં આવયોઃ તદપાકુરુ ।
દેહ્યાવયોર્યજ્ઞભાગં યજ્ઞેષુ શ્રુતિચોદિતમ્ ॥

૪૩. તત્તથાસ્ત્વિતિ તાવુક્ત્વાપ્યરવિન્દલોચનઃ ।
દેવાનાહૂય દેવેશો ભાગં દાતું સમાદિશત્ ॥

૪૪. ઇતિ લબ્ધ્વા વરૌ દસ્રૌ દેવેશં પઙ્કજેક્ષણમ્ ।
પ્રણમ્ય ચ પરિક્રમ્ય તોષયિત્વા સ્તવૈરપિ ॥

૪૫. સમીયતુઃ પુનઃ સ્વર્ગં પ્રાપ્તકામાવિમૌ યતઃ ।
તસ્માત્ તત્ અશ્વિનીતીર્થે સ્નાત્વાશ્વિન્યાં દિનોદયે ॥

૪૬. દેવેશં પઙ્કજાક્ષં ચ દૃષ્ટ્વા મુચ્યેત કિલ્બિષાત્ ।
યુગ્મલાખ્યમિદં ક્ષેત્રમાશ્વિનં યઃ પ્રપશ્યતિ ॥

૪૭. તમેનં નૈવ બાધન્તે રાજયક્ષ્માદયો ગદાઃ ।
કુત્સિતા વા ન જાયન્તે ન દારિદ્ર્યપરિપ્લુતાઃ ॥

૪૮. યે ચાત્ર તીર્થે મજ્જન્તિ તે યાન્તિ પરમાં ગતિમ્ ।
અલઙ્કૃત્ય શ્રિયા તસ્માત્ ઐન્દ્રીમાશામદૂરતઃ ॥

૪૯. હરેરાયતનં પુણ્યં જયતે પરમાદ્ભુતમ્ ।
માયાલાસ્યમિદં ક્ષેત્રં નામ્ના માયા યત્ર પ્રવર્તિતા ।
૫૦. પુરા રાથન્તરે કલ્પે પુણ્યે સાવર્ણિકેઽન્તરે ।
આઙ્ગીરસકુલોદ્ભૂતઃ શ્રુતધામેતિ વિશ્રુતઃ ॥

૫૧. પરીત્ય સકલામુર્વીં તીર્થયાત્રાપરાયણઃ ।

ક્રમાત્ આગત્ય તત્ક્ષેત્રં તામ્રાયા ઉત્તરે તટે ॥

૫૨. દૃષ્ટ્વા તુ સર્વતોભદ્રં શ્રિયા સમ્પૂર્ણતેજસમ્ ।
સિદ્ધક્ષેત્રં પરં જ્ઞાત્વા તત્રાદિષ્ટઃ તપો મહત્ ॥

૫૩. નિરાહારો યતાહારો યતવાક્કાયમાનસઃ ।
ધ્યાત્વા હૃદિ હૃષીકેશં તોષયામાસ ભક્તિતઃ ॥

૫૪. એવં વર્ષસહસ્રાન્તે તપસારાધિતઃ પ્રભુઃ ।
પ્રાદુર્ભૂતઃ તમાહૂય વરદો વાક્યમબ્રવીત્ ॥

૫૫. સન્તુષ્ટોઽસ્મિ મહાભાગ તપસા તેન સાધુના ।
વરાન્ વરય ભદ્રં તે સર્વાન્ કામાન્ દદામિ તે ॥

૫૬. શ્રુતધામા –
ભગવન્ કરુણામૂર્તે નમસ્તુભ્યં શ્રિયઃપતે ।
યદિ મે વરદોઽસિ ત્વં વરાર્હો યદ્યહં મતઃ ॥

૫૭. દ્રષ્ટુમિચ્છામિ તે લીલાં કૃષ્ણમૂર્તેઃ યદોઃ કુલે ।
અવતારાણિ કર્માણિ સસ્વર્ગારોહણાનિ પ્રભો ॥

૫૮. ઇતિ સંપ્રાર્થિતઃ તેન બ્રાહ્મણેન સ પુમાન્ ।
દર્શયામાસ ભગવાન્ નિજલીલાં પુરા કૃતામ્ ॥

૫૯. અવતારં ચ માયયા યશોદાયાં ચ ગોકુલે ।
દેવક્યાં સમ્ભવં ચૈવ હરેર્ભોજેન્દ્રમન્દિરે ॥

૬૦. ગોકુલપ્રતિયાનં ચ માયામાહાત્મ્યદર્શનમ્ ।
પૂતનાપ્રાણહરણં શકટસુરમોક્ષણમ્ ॥

૬૧. તૃણાવર્તસ્ય નિધનં યમલાર્જુનભેદનમ્ ।
વૃન્દાવનપ્રયાણં ચ નિગ્રહં બકરૂપિણઃ ॥

૬૨. અઘાસુરવિમોક્ષં ચ બ્રહ્માહઙ્કારનાશનમ્ ।
વત્સાસુરસ્ય નિધનં પ્રલમ્બસ્ય નિબર્હણમ્ ॥

૬૩. ધેનુકસ્ય વૃષસ્યાપિ શઙ્ખચૂડસ્ય નાશનમ્ ।
હયાસુરસ્ય નિધનં અક્રૂરાગમનં તથા ॥

૬૪. મથુરાયાં પ્રવેશં ચ કંસસ્યાપિ વિનાશનમ્ ।
કારાગૃહાત્ પરિત્રાણં પિત્રોઃ પ્રીતિવર્ધનમ્ ॥

૬૫. ઉગ્રસેનાભિષેકં ચ માતુલસ્ય બલક્ષયમ્ ।
તદ્દ્વારકાયાઃ નિર્માણં મ્લેચ્છનીચવધં પુનઃ ॥

૬૬. ઉદ્વાહં રાજકન્યાનાં નરકાસુરમર્દનમ્ ।
નિધનં ચેતિરાજસ્ય ધર્મજક્રતુપાલનમ્ ॥

૬૭. કુરુક્ષેત્રે મહીપાનાં કુરૂણાં ચ સમાગમમ્ ।
દુર્યોધનાદિનિધનં ધર્મપુત્રાભિષેચનમ્ ॥

૬૮. પુનર્વૈકુણ્ઠગમનં ઉદ્ધવસ્યોપદેશનમ્ ।
એતાન્યન્યાનિ પુણ્યાનિ દૃષ્ટ્વા કર્માણિ શાર્ઙ્ગિણઃ ॥

૬૯. વિસ્મયોત્ફુલ્લનયનઃ પરમાનન્દનિર્ભરઃ ।
હર્ષગદ્ગદયા વાચા તુષ્ટાવ પુરુષોત્તમમ્ ॥

૭૦. ૐ નમસ્સત્યસઙ્કલ્પવિકલ્પોલ્લાસિતાત્મને ।
નિર્ગુણાય ગુણાવિષ્ટ કર્મણે બ્રહ્મણે નમઃ ॥

૭૧. સત્યં જ્ઞાનમનન્તં યત્ ધામ નામાદિવર્જિતમ્ ।
ઓમિત્યુપહિતાકારમહઙ્કારમુપાસ્મહે ॥

૭૨. યતો વાચો નિવર્તન્તે મનસાપ્રાપ્ય માધવમ્ ।
હૃદ્યન્તં પરં પશ્યે ભદ્રસ્યાવાપ્તયે હરિમ્ ॥

૭૩. હૃષીકં જગતાં સાક્ષાત્ શ્રુતયો યત્ પ્રશંસિરે ।
તમાદિપૌરુષં તેજઃ પ્રપદ્યે વ્યોમલક્ષણમ્ ॥

૭૪. અલક્ષ્યમક્ષણાં ગુણિનાં બ્રહ્માદીનાં યદૈશ્વરમ્ ।
મહઃપ્રપદ્યે નિર્માયં યત્ પરં પરમં હરિઃ ॥

૭૫. યમન્વિષ્ય મહસ્તત્ત્વમાગમાન્તગિરાં તતિઃ ।
તદ્ધામ કામયૈકાન્તકલિકલ્મષનાશનમ્ ॥

૭૬. અણોરણીયમાદ્યન્તમધ્યવિપ્લવવર્જિતમ્ ।
અહમારાધયે ચિત્તે માયાજાલવિમુક્તયે ॥

૭૭. દેવદેવં મહાદેવં હરિમભ્યુદયેશ્વરમ્ ।
પશ્યામિ પરતત્ત્વાર્થં નિર્મુક્તાશેષકલ્મષમ્ ॥

૭૮. ભગવન્ પરિતુષ્ટોઽસ્મિ માયાલાસ્યપ્રદર્શનાત્ ।

અહો વિભૂતિવિસ્તારો લીલાવૈશિષ્ટ્યલક્ષણઃ ॥

૭૯. પુનાતિ લોકાન્ ગઙ્ગેવ દર્શનાત્ કીર્તનાત્ અપિ ।
ઇતઃ પરં ન શોચામિ યેનાહં ત્વત્પ્રસાદતઃ ॥

૮૦. તથા કુરુ દયાં મહ્યં ત્વામહં શરણં ગતઃ ।
ઇત્થં કાઙ્ક્ષિતં જ્ઞાત્વા કરુણામૃતવારિધિઃ ॥

૮૧. ભૂય પ્રહર્ષયન્ વાચા વ્યાજહાર મુનીશ્વરમ્ ।
શ્રી ભગવાન્ –
બ્રહ્મન્ મત્પ્રાર્થનાદત્ર વસ્તવ્યં ભવતા મુદા ॥

૮૨. ગાર્હસ્થ્યં કર્મ કૃત્યૈવ પુત્રમિત્રધનાદિભિઃ ।
તતઃ કાલેન મહતા મત્સાયુજ્યમુપૈષ્યસિ ॥

૮૩. મોહાપહમિદં તીર્થં તામ્રાયાઃ પરમાદ્ભુતમ્ ।
મજ્જતામેવ જન્તૂનાં મત્સાયુજ્યપ્રદાયકમ્ ॥

૮૪. સકૃત્ અત્રૈવ મજ્જન્તો દ્રષ્ટારો મામકીં તનુમ્ ।
ન તે ભૂયઃ પ્રપદ્યન્તે માયામોહવિકલ્પનૈઃ ॥

૮૫. ઇત્યુક્ત્વાન્તર્હિતે તસ્મિન્ ભગવત્યમ્બુજેક્ષણે ।
તત્રૈવારાધયામાસ યુગાનામેકસપ્તતિમ્ ॥

૮૬. અન્તે જગામ સ મુનિઃ તદ્વિષ્ણોઃ પરમં પદમ્ ।
નદ્યાઃ તુ દક્ષિણે ભાગે શ્રીદેવ્યાઃ પરમાદ્ભુતમ્ ॥

૮૭. શ્રીપુરં ચેતિ વિખ્યાતં હરેરાનન્દવર્ધનમ્ ।
યત્રાદિસિદ્ધો ભગવાન્ હરિઃ કારુણ્યમાનુષઃ ॥

૮૮. વેદસિદ્ધાન્તસારસ્ય વક્તા ભુવનવર્તિનામ્ ।
આગામિનિ કલૌ રાજન્ અવતારં કરિષ્યતિ ॥

૮૯. તીર્થાનાં પઞ્ચકં યત્ર તામ્રપર્ણ્યાં પ્રશંસ્યતે ।
વિનિદ્રો ભુજગેન્દ્રોઽપિ ચિઞ્ચાપાદપો ગતઃ ॥

૯૦. યત્ર ક્રીડતિ સાનન્દં નિત્યં સિદ્ધવિહઙ્ગમાઃ ।
યત્ર સારૂપ્યતાં પ્રાપ તપસા વિહગેશ્વરઃ ॥

૯૧. અસ્ય ક્ષેત્રસ્ય માહાત્મ્યં મહત્વાત્ સાગરોપમમ્ ।
યદત્ર કમલાદેવી કરોતિ કરુણાં મુહુઃ ॥

૯૨. અસ્મિન્ સુકીર્ત્યમાને તુ માહાત્મ્યે મઙ્ગલાલયે ।
પુરા વૈકુણ્ઠભવને હરિર્વિશ્વમ્ભરો વિભુઃ ॥

૯૩. શયાનો ભોગિપર્યઙ્કે યોગમુદ્રાં સમુદ્વહન્ ।
વિશ્વત્રાણાય મહતીં મનીષામભ્યવર્તયત્ ॥

૯૪. શ્રિયા ભૂમ્યા હ્રિયા ચૈવ તુષ્ટ્યા પુષ્ટ્યેલોર્જયા ।
શ્રદ્ધયાશ્રદ્ધયા કાન્ત્યા સેવ્યમાનઃ સમન્તતઃ ॥

૯૫. મૌલિમઙ્ગે રમાયાઃ તુ પાદૌ કૃત્વા ભુવો વિભુઃ ।
તમેનમાદિપુરુષં સિદ્ધાશ્ચ સનકાદયઃ ॥

૯૬. વૈનતેયો ભૃગુઃ શઙ્ખઃ પાઞ્જજન્યઃ સુદર્શનઃ ।
કૌમોદકી નન્દનશ્ચ શાર્ઙ્ગાખ્યં ચ મહદ્ધનુઃ ॥

૯૭. ઉપાસાઞ્ચક્રિરે ચૈતે પાર્ષદાઃ  ચ પૃથક્ પૃથક્ ।
ઋચાં તતિઃ શુક્લવર્ણા શારિકારૂપમાસ્થિતાઃ ॥

૯૮. ઇન્દ્રનીલશિલાક્લૃપ્તપઞ્જરાન્તરવર્તિની ।
તુષ્ટાવ જગદીશાનં પુરુષં બ્રહ્મપૂર્વિકમ્ ॥

૯૯. ગણોઽયં ઇન્દ્રનીલાભો યજુષાં શુકવિગ્રહઃ ।
તપ્તકાઞ્ચનમાણિક્યપઞ્જરસ્થોઽસ્તુવત્ હરિમ્ ॥

૧૦૦. અરુણા સામપઙ્ક્તિઃ તુ કોકિલાકારદર્શના ।
પદ્મરાગશિલાજાતપઞ્જરોદરસંસ્થિતા ॥

૧૦૧. ચુકૂજ પઞ્ચમં વિષ્ણોઃ પ્રસાદાય મુહુર્મુહુઃ ।
અથર્વાણાં તતિરિયં સારમેયવપુર્ધરા ॥

૧૦૨. સાલઙ્કારા શઙ્ખવર્ણા દ્વારિ સેવમસેવત ।
અષ્ટાદશપુરાણાનિ શાસ્ત્રાણિ વિવિધાન્યપિ ॥

૧૦૩. સ્મૃતયોઽપ્યાગમાદ્યાઃ ચ નાનાવર્ણગુણોત્તરાઃ ।
પક્ષિમક્ષિકભૃઙ્ગાણામાકારેણ ગૃહાઙ્ગણે ॥

૧૦૪. અલઙ્ચક્રુઃ કલ્પવૃક્ષાન્ મકરાન્દાલિદુર્દિનાન્ ।
એવં સ્થિતેષુ સર્વેષુ ભગવદ્ધ્યાનવૃત્તિષુ ॥

૧૦૫. તત્રાલોક્ય શુકં સ્નિગ્ધં સ્વનીડપરિવર્તિનમ્ ।

કિઞ્ચિત્ ઉલ્લાસિતસ્વાન્તરાગામૃતતરઙ્ગિણી ॥

૧૦૬. વ્યાજહાર ચલચ્ચઞ્ચચ્છાયાપાટલકાન્તિકા(શારિકા) ।
નાથ કીરમણે કિઞ્ચિત્પ્રષ્ટુમિચ્છામિ શઙ્કિતમ્ ॥

૧૦૭. વક્તુમર્હસ્યસન્દિગ્ધં તદિદાનીં સખે મમ ।
વિધિના વિહિતા લોકે સમસ્તાજીવકોટયઃ ॥

૧૦૮. સ્ત્રીપુંસોર્વ્યક્તિમભ્યેત્ય ત્વદ્વશો વિહરત્યહો ।
મિથુનીભૂય કર્માણિ કુર્વતઃ તાનિ તાનિ હિ ॥

૧૦૯. ફલાનિ રૂપભાગ્યાનિ ભુઞ્જન્તે ચ પુનઃપુનઃ ।
યોનિભેદેષુ કૃષ્યન્તે સ્વકર્મફલગૌરવાત્ ॥

૧૧૦. જાયન્તે ચ મ્રિયન્તે ચ યાન્તિ સ્વર્ગં ચ યાતનામ્ ।
એવં પરિભ્રમજુષાં જન્તૂનાં કર્મવર્ત્મનિ ॥

૧૧૧. કથં સૌખ્યં ભવત્યદ્ધા કેન વા જન્મના પુનઃ ।
કેન વાશ્રમધર્મેણ પુરુષાર્થચતુષ્ટયમ્ ॥

૧૧૨. કથં કર્તારમભ્યેત્ય વક્તુમર્હસિ મે ભવાત્ ।
ઇતિ સમ્પૃષ્ટસંપ્રશ્નઃ શુકઃ શારિકયા મુદા ॥

૧૧૩. મૌલિમાન્દોલયત્કિઞ્ચિત્ વ્યાહર્તુમુપચક્રમે ।
શુકઃ –
અયિ તન્વઙ્ગિ મે ગાથામન્તર્નિગમદર્શિતામ્ ॥

૧૧૪. અશેષસંશયધ્વાન્તનિરાકરણકૌમુદીમ્ ।
યેન લોકમિદં વિશ્વં કર્મારબ્ધં પ્રશસ્યતે ॥

૧૧૫. કર્મણોદયમભ્યેતિ કર્મણૈવ પ્રમીયતે ।
કર્મબીજમિદં જન્તોઃ શરીરં નાત્ર સંશયઃ ॥

૧૧૬. તરુગુલ્માદયઃ પ્રોક્તાઃ નિગમાઃ ચોદ્ભિજ્જાદયઃ ।
સ્વેદજાઃ કૃમિકીટાદ્યાઃ પતઙ્ગાદ્યાઃ તથાણ્ડજાઃ ॥

૧૧૭. જરાયુસમ્ભવાઃ પ્રોક્તાઃ નૃગવાદ્યાઃ વરાનને ।
તત્રૈવ મર્ત્યા જ્યેષ્ઠાઃ સ્યુઃ તેષુ જ્યેષ્ઠાઃ દ્વિજાદયઃ ॥

૧૧૮. તથાપિ તેષાં વિપ્રાણાં શાન્તાનાં બ્રહ્મવાદિનામ્ ।
ચતુર્ધા પદવી દૃષ્ટા ચતુરાશ્રમસંજ્ઞિતા ॥

૧૧૯. તેષ્વેષ્વેકતમેનૈવ સાધયન્તિ સુખં દ્વિજાઃ ।
ચત્વાર્યેતાન્યાશ્રમાણિ ધ્નન્યનિન્દ્રિયનિગ્રહાત્ ॥

૧૨૦. નિગૃહીતેન્દ્રિયગ્રામં પાલયન્તિ સુખં યથા ।
બ્રહ્મચર્યં ચ ગાર્હસ્થ્યં વાનપ્રસ્થં ચ ભિક્ષુતા ॥

૧૨૧. ક્રમાત્ એતાનિ વર્તવ્યાન્યાત્મવદ્ભિઃ દ્વિજોત્તમૈઃ ।
શરીરશ્રમસાધ્યાનિ વિના ગાર્હસ્થ્યમુત્તમમ્ ॥

૧૨૨. આત્મત્રાણાય કલ્પન્તે નેતરેષાં કદાચન ।
ગાર્હસ્થ્યમેતત્ આશ્ચર્યં ચરાચરસુખપ્રદમ્ ॥

૧૨૩. વિના પરિશ્રમં તન્વિ વર્તનીયં મનીષિભિઃ ।
ભુક્તિં મુક્તિં ચ યુગપત્ મહાવિભવસંયુતામ્ ॥

૧૨૪. કરોતિ સદ્યો વિપ્રાણાં ચિન્તામણિરિવાપરઃ ।
યદ્યાશ્રમં દ્વિતીયં તુ ગાર્હસ્થ્યમનુવર્તતે ॥

૧૨૫. ત્રયાણામાપિ લોકાનાં ભવેત્ પાલયિતા ગૃહી ।
અનુકૂલેન દમ્પત્યોઃ નિરન્તરસુખોદયઃ ॥

૧૨૬. વિપરીતં કલત્રં ચેત્ નરકાદ્યાતનાવહમ્ ।
સ નિત્યબ્રહ્મચારી સ્યાત્ ઋતુકાલે હિ વર્તનાત્ ॥

૧૨૭. ઇષ્ટ્વા ક્રમાત્ પઞ્ચયજ્ઞૈઃ બલિદાનૈઃ ચરાચરમ્ ।
વૈશ્વદેવાહુતીર્હુત્વા બ્રહ્મભૂયાય કલ્પતે ॥

૧૨૮. સાયં પ્રાતર્દ્વિજાતીનામશનં શ્રુતિચોદિતમ્ ।
આદૌ પ્રાણાહુતીઃ કૃત્વા યતિભિક્ષાવશેષિતૈઃ ॥

૧૨૯. યદિ મૃષ્ટન્નભોક્તાપિ વિપ્રો નિત્યોપવાસકૃત્ ।
બ્રહ્માનન્દો ગૃહસ્થસ્ય કલત્રાત્ ઉપજાયતે ॥

૧૩૦. તત્સૌખ્યમાનુકૂલ્યેન દમ્પત્યોર્જાયતે ધ્રુવમ્ ।
બ્રહ્માનન્દાનુભૂત્યા યદભ્યુપૈતિ સુખં નૃણામ્ ॥

૧૩૧. બ્રહ્મણોઽપિ હરેર્વાપિ મહાદેવાત્ ચ કેવલમ્ ।
મન્યે સુખિનમેવાહં ગૃહસ્થં નાત્ર સંશયઃ ॥

૧૩૨. ઇત્થં તયોઃ પ્રવચનમધિગમ્યાબ્ધિકન્યકા ।

પરં હર્ષવાપૈષા સુધાસૂક્તેવ વલ્લરી ॥

૧૩૩. એવમેવ મયા ભર્ત્રા વર્તનીયં સુખાપ્તયે ।
ઇતિ સઞ્ચિન્ત્ય સઞ્ચિત્ય તુતોષ કમલાલયા ॥

૧૩૪. અઙ્ગૈરુન્નિદ્રરોમાઞ્ચૈઃ અલઙ્કારવતી યથા ।
તદન્તઃકરણારણ્યવિહરત્યરણીં હરિઃ ॥

૧૩૫. મનીષામેષ વિજ્ઞાય વ્યાજહાર સ્વવલ્લભામ્ ।
અયિ કલ્યાણિ ભદ્રં તે યત્રાશાવિષયાઙ્ગણે ॥

૧૩૬. વિહરિષ્યતિ સામોદં સા મામામોદયિષ્યતિ ।
પૂર્ણકામામહં ભદ્રે ત્વાં કરિષ્યે ન સંશયઃ ॥

૧૩૭. ગચ્છ ત્વં ભારતે વર્ષે પુણ્યે પુષ્પિતકાનને ।
તીરે મલનન્દિન્યાઃ દક્ષિણે મોક્ષદાયિનિ ॥

૧૩૮. મમાસ્તિ ક્ષેત્રમતુલં મહાબકુલમણ્ડિતમ્ ।
યત્ર શેષો મમાંશોઽયં ચિઞ્ચાપાદપરૂપધૃત્ ।
૧૩૯. તત્પ્રસાદાય સતતં કરોતિ તપ ઉત્તમમ્ ।
તત્ર ત્વં નિયતાહારા મામર્ચય શુચિસ્મિતે ॥

૧૪૦. કુર્વન્ મનોરથાન્ સર્વાન્ આગમિષ્યામ્યહં કિલ ।
આવયોઃ સઙ્ગમં તત્ર હિતાય જગતાં ભવેત્ ॥

૧૪૧. ઇત્યાદિશ્ય રમાં દેવીં તચ્છુશ્રૂષાવિધિત્સયા ।
વૈનતેયં તયા સાર્ધં પ્રેષયામાસ માધવઃ ॥

૧૪૨. સૈષા ભગવતી લક્ષ્મી સમુત્થાય કૃતાઞ્જલિઃ ।
સ્વસીમન્તમણિશ્રેણ્યા તદાજ્ઞામનુકુર્વતી ॥

૧૪૩. પરિક્રમ્ય પ્રણમ્યાગ્રે સંપ્રતસ્થે સખીજનૈઃ ।
સ્તૂયમાના મુનિગણૈઃ બ્રહ્મરુદ્રાદિદેવતૈઃ ॥

૧૪૪. અતીત્ય વિયદધ્વાનં તારકાલિવિભૂષિતમ્ ।
સંપ્રાપમહતીં ભૂમિં પુણ્યાં ભારતસંજ્ઞિતામ્ ॥

૧૪૫. અલઞ્ચકાર કરુણાપીયૂષાપાઙ્ગવીક્ષણૈઃ ।
તામ્રાં મહાનદીં દૃષ્ટ્વા મલયં ચન્દનાચલમ્ ॥

૧૪૬. કુસુમૈઃ કાઞ્ચનમયૈઃ મહામાણિક્યમણ્ડિતૈઃ ।

મુક્તાજાલસમાકીર્ણૈઃ વિકિરન્તી મહીતલમ્ ॥

૧૪૭. નયનાદિત્યમકરોત્ મરત્ચિગ્ચામહીરુહમ્ ।
અનેકબકુલાક્રાન્તં ચમ્પકાશોકમણ્ડિતમ્ ॥

૧૪૮. મુનિવૃન્દૈઃ સેવ્યમાનં વેદઘોષનિનાદિતમ્ ।
હરિનામાક્ષરશ્રેણીભણિતાસ્વાતનોત્ સુખૈઃ ॥

૧૪૯. ભક્તૈર્નિબિડિતં વિષ્વગ્જનૈર્નિર્મુક્તકિલ્બિષૈઃ ।
દૃષ્ટ્વા પ્રસન્નહૃદયા જનની હરિવલ્લભા ॥

૧૫૦. અવતીર્ય મહીભાગે તિન્ત્રિણીપાદપાત્મિકે ।
કૃત્વાશ્રમપદં દેવી વૈનતેયેન કલ્પિતમ્ ॥

૧૫૧. પ્રવિશ્ય પર્ણશાલાં તુ તપસ્તેપે હરિપ્રિયા ।
સ્નાત્વા મહાનદીતીર્થે મન્ત્રારાધનતર્પણૈઃ ॥

૧૫૨. પૂજયામાસ દેવેશં લોકનાથં જગદ્ગુરુમ્ ।
બ્રહ્મચારીવટુર્ભૂત્વા વૈનતેયો હરિપ્રિયઃ ॥

૧૫૩. પરિચર્યાં ચકારાસ્યૈ સમિત્પુષ્પકુશોદકૈઃ ।
પૂજોપકરણૈરન્યૈઃ ફલમૂલવિશેષકૈઃ ॥

૧૫૪. ઇત્થમબ્દસહસ્રં તુ ગતમાસીત્ તતોત્તરમ્ ।
ફાલ્ગુને માસિ સંપ્રાપ્તે વૃદ્ધિભાજિ નિશાકરે ॥

૧૫૫. ઉપોષ્યૈકાદશીં પુણ્યાં કમલા કમલેક્ષણમ્ ।
પૂજયિત્વા વિનિદ્રાક્ષી પ્રાતરુત્થાય વાગ્યતા ॥

૧૫૬. અભિષિચ્યામૃતજલૈઃ આત્માનમભિમન્ત્રિતૈઃ ।
પ્રસાદ્ય મલયોદ્ભૂતાં કાલ્યં કૃત્વા ક્રિયાગણમ્ ॥

૧૫૭. દ્વાદશ્યાં પૂજયામાસ દ્વાદશાક્ષરવિદ્યયા ।
પુષ્પૈઃ સુગન્ધૈઃ ધૂપૈઃ ચ દીપૈઃ નીરાઞ્જનાદિભિઃ ॥

૧૫૮. પૂજાન્તે તોષયામાસ સ્તોત્રૈઃ સ્તુતિસમીરિતૈઃ ।
આદ્યં નમઃ કારુણિકં પવિત્રં
નતાર્તિશમનાધરબદ્ધદીક્ષમ્ ॥

૧૫૯. સાક્ષિં પુનઃસકલજીવનપરિશ્રમાણાં વિશ્રાન્તિમણ્ડપપદામ્બુરુહં નતાનામ્ ।
આદ્યોઽયમસ્ય જનકઃ સ્વપિતા પિતા ચ નેતા ગતિં નિજપદામ્બુરુહાનનાનામ્ ॥

૧૬૦. નાથઃ સમસ્તભુવનસ્ય મમાપિ જીવલેખામયો ભવતુ નઃ પુરતઃ પુરાણઃ ।
વાણી પુરાણપદવી નિખિલશ્રુતીનાં સાર્થં પરિશ્રમમુપેત્ય મનો વિકારૈઃ ॥

૧૬૧. જાનાતિ વા ન હિ વિમૃશ્ય નિવર્તિતા વા તં કેવલં પરમકારુણિકં નતાસ્મિ ।
યં પ્રાહુરાદ્યમનપાયમશેષવેદ્યા મોહાન્ધકારપટલાથ પરં પ્રકાશમ્ ॥

૧૬૨. બ્રહ્માદયોઽપિ તમિમં હૃદયં પ્રપદ્યે
પ્રાપ્તં પ્રકામમભિલાષમહોદયાનામ્ ।
યજ્ઞૈર્જપૈરપિ મનુપ્રવરસ્ય દાનૈઃ
પૂજાવિશેષપુષિતાભ્યુદયપ્રણામૈઃ ॥

૧૬૩. પ્રાણેન્દ્રિયોપશમનૈઃ પ્રવિશન્તિ સિદ્ધાઃ
યન્તં પુમાંસમુરુકાયમુપૈમિ નિત્યમ્ ।
યત્પાદપદ્મમકરન્દજુષાં મુનીનાં
બ્રહ્મેન્દ્રરુદ્રપદવીવિભવો હિ હેયઃ ॥

૧૬૪. નાથો મમાસ્તુ નલિનાયતલોચનોઽયં
અગ્રે જગત્ત્રયસુરક્ષણજાગરૂકઃ ।
એકોઽપ્યનેકવિધમૂર્તિવિકલ્પનાભિઃ
કર્તા યમાવિતિ પિપીલિકજીવિકાનામ્ ॥

૧૬૫. ભક્ત્યા પુનઃ પ્રલયતઃ પ્રણયૈકધામા
કામાય મે ભવતુ કારણકારણાત્મા ।
આદ્યોઽયમસ્ય જગતઃ પ્રભુરપ્રકાશઃ
પાપાત્મનામસુકૃતિનાં વિહિતપ્રકાશઃ ॥

૧૬૬. ઈશે પદે ભવતુ મે ભગવાન્ પુરાણઃ
ભક્તાવલમ્બિતપદામ્બુરુહઃ શ્રુતીનામ્ ।
શ્રાન્તાસ્મિ નાથ નિખિલશ્રમશાન્તિહેતો-
સ્વાન્તાત્ પ્રમૃજ્ય પરિતાપતતિં મદીયામ્ ॥

૧૬૭. આયાહિ પાહિ પુરતો ન સહે વિયોગ-
મુર્વીવ ઘર્મતપનાંશુમસહ્યમાનામ્ ।
નારાયણં નરસખં નલિનાયતાક્ષં
સાક્ષાત્કરોમિ હૃદયે સદયં દયાલુમ્ ॥

૧૬૮. ત્વામાદિનાથમખિલશ્રુતિસારમેકં
મા તે વિલમ્બનદશા પરિવર્તનીયા ।
મા હર્તુમર્હસિ ભવચ્છરણાબ્જભૃઙ્ગી-
મઙ્ગીકુરુષ્વ સહસા કરુણામૃતાબ્ધે ॥

૧૬૯. કાઙ્ક્ષે મુહુર્કમલલોચનપાદમૂલે
કર્તું શિરસ્સકરુણં પરિપશ્ય દીનામ્ ।
ઇત્થં સ્તુત્વા રમાનાથં માતા ક્ષીરાબ્ધિકન્યકા ॥

૧૭૦. નેત્રાભ્યામશ્રુપૂર્ણાભ્યામાસીદાનન્દનિર્ભરા ।
તાવદાવિરભૂદ્વ્યોમ્ના મહાન્ દુન્દુભિનિસ્સ્વનઃ ॥

૧૭૧. કલ્પપાદપસમ્ભૂતા પુષ્પવૃષ્ટિરભૂદ્દિવિ ।
હાહાહૂહૂમુખાઃ દેવાઃ ગાયકાઃ નારદાદિભિઃ ॥

૧૭૨. ઉચ્ચૈશ્ચેદમગાયન્ ચ વીણાવેણુવિનોદનૈઃ ।
ક્ષણાદાવિરભૂદ્વ્યોમ્નિ વિમાનં સૂર્યસન્નિભમ્ ॥

૧૭૩. તસ્મિન્ મધ્યે સમાસીનં દેવદેવં જગદ્ગુરુમ્ ।
નીલમેઘઘનશ્યામં પીતકૌશેયવાસસમ્ ॥

૧૭૪. જામ્બૂનદમયૈઃ છત્રૈઃ ભૂષિતં ભૂષણોત્તમૈઃ ।
સેવ્યમાનં સિદ્ધગણૈઃ દેવૈર્મુનિગણૈરપિ ॥

૧૭૫. શઙ્ખચક્રગદાપદ્મૈઃ પરિષ્કૃતચતુર્ભુજમ્ ।
શ્રીવત્સકૌસ્તુભધરં વનમાલાવિરાજિતમ્ ॥

૧૭૬. અતિતેજોમયં દૃષ્ટ્વા પુરુષં પુષ્કરેક્ષણમ્ ।
હર્ષાનુરાગસૌહાર્દભક્તિવિસ્મયવિભ્રમૈઃ ॥

૧૭૭. દેવી પરવશસ્વાન્તલજ્જોન્મીલિતલોચના ।
પાહિ પાહિ દયાસિન્ધો નાથ નારાયણપ્રભો ॥

૧૭૮. હર્ષગદ્ગદયા વાચા મન્દમાન્દોલિતેક્ષણા ।
ભયાવિષ્ટેવ હૃષ્ટેવ તૂષ્ણીમાસીત્ જગત્પ્રસૂઃ ॥

૧૭૯. દૃષ્ટ્વાતિપ્રણતાં દેવીં કૃશાઙ્ગીમાત્મવલ્લભામ્ ।
પાણિભ્યાં સહસારોપ્ય વિમાનં ગરુડધ્વજઃ ॥

૧૮૦. વરેણ છન્દયામાસ પારાવારવરાત્મજામ્ ।

શ્રી ભગવાન્ –
પ્રીતોઽસ્મિ તપસા ભદ્રે સ્તોત્રમુખ્યૈઃ તદર્હણૈઃ ॥

૧૮૧. દાસ્યામિ કામાનખિલાન્ આત્માનમપિ કેવલમ્ ।
શ્રીદેવી –
યદિ પ્રીતોઽસિ ભગવન્ વરાર્હા યદ્યહં મતા ॥

૧૮૨. કદાપિ ત્વત્પદામ્ભોજાત્ વિયોગો માસ્તુ મે વિભો ।
કર્તુમિચ્છામ્યહં દાસ્યં નિત્યં ત્વત્પાદપદ્મયોઃ ॥

૧૮૩. અસ્માદ્વરાદભિમતા નાધિકો મે વરોત્તમઃ ।
ઇધ્ધાનતાઙ્ગીં જગતાં માતરં કમલેક્ષણામ્ ॥

૧૮૪. ભૂયઃપ્રહર્ષયન્ વાચા વ્યાજહારામ્બુજેક્ષણઃ ।
અત્રૈવાહં ત્વયા સાર્ધમાકલ્પમખિલપ્રભો ॥

૧૮૫. વસામિ વરદો ભૂત્વા તવ પ્રીતિવિધિત્સયા ।
યે ચાત્ર તીર્થે તામ્રાયાઃ નિમજ્જ્ય કમલાભિધે ॥

૧૮૬. ત્વાં ચ માં ચ સમભ્યર્ચ્ય જપ્ત્વા સ્તોત્રમિદં શુભમ્ ।
પરિક્રમન્તિ મત્ક્ષેત્રં તેષાં કામાન્ દદામ્યહમ્ ॥

૧૮૭. શ્રદ્ધયાશ્રદ્ધયા વાપિ કાર્યાર્થે વાપિ કૌતુકાત્ ।
સકૃદ્વાલોક્ય નિર્મુક્તાઃ પાપેભ્યો નાત્ર સંશયઃ ॥

૧૮૮. યે ત્યજન્ત્યત્ર મત્ક્ષેત્રે કર્માન્તે તુ કલેવરમ્ ।
તેષાં મુક્તિં પ્રદાસ્યામિ દુર્લભાં મત્કૃતાત્મભિઃ ॥

૧૮૯. ઇત્યાલિઙ્ગ્ય મહાલક્ષ્મીં અભિન્નાત્માત્મવલ્લભામ્ ।
વૈનતેયાય સન્તુષ્ટઃ પ્રાદાત્ સારૂપ્યમાત્મનઃ ॥

૧૯૦. તત્રૈવ વાસં વિદધે લોકાનાં હિતકામ્યયા ।
શ્રીભૂમિસહિતઃ તત્ર ક્ષેમાય જગતાં વિભુઃ ॥

૧૯૧. ગાર્હસ્થ્યધર્માન્ અકરોત્ બ્રહ્માદ્યૈરપિપૂજિતઃ ।
તસ્માત્ લક્ષ્મીપુરમિતિ ખ્યાતં પ્રથિતં ભુવનત્રયે ॥

૧૯૨. રાજન્ તત્ક્ષેત્રમાહાત્મ્યં શ‍ૃણ્વતાં ભુક્તિમુક્તિદમ્ ।
ન દરિદ્રો ભવેન્મર્ત્યો રમાસામીપ્યગૌરવાત્ ॥

૧૯૩. અલક્ષ્મી કલહાધારા કદાપ્યત્ર ન ગચ્છતિ ।

ન રોગા પિશાચાદ્યાઃ ન પાતકવિકલ્પના ॥

૧૯૪. આયુષ્મન્તો ભાગ્યવન્તો ભુક્ત્વા ભોગાન્ યથેપ્સિતાન્ ।
અન્તે કૈવલ્યમાસાદ્ય તે યાન્તિ પરમં પદમ્ ॥

ઇતિ એકષષ્ટિતમઃ અધ્યાયઃ । Pro.Total = 5803 + 194 = 5997.

## દ્વિષષ્ટિતમઃ અધ્યાયઃ

શ્રીપુરમ્ - ચિઞ્ચાતરુમૂલમ્ - ક્ષેત્રતીર્થયોઃ તત્તરોશ્ચ માહાત્મ્યમ્ ।

૧. વીરસેનઃ –
કથં બ્રહ્મન્ મહાક્ષેત્રે શેષઃ સાક્ષાથરિઃ સ્વયમ્ ।
તિન્ત્રિણીતરુતાં પ્રાપ્ય વર્તતે યત્તદદ્ભુતમ્ ॥

૨. યન્નામવર્ણનિબિડરસના યસ્ય સન્તતિમ્ ।
તદ્દર્શનાન્તમાર્તાનાં મહાપાતકકોટયઃ ॥

૩. તમઃ કિં તુદતે ભાનું કિં ગઙ્ગાં વિપિનાનલઃ ।
અનન્તમક્ષયં દેવમંહઃ કથમુપાગતમ્ ॥

૪. એતન્મે સંશયં બ્રહ્મન્ વિલોભયિતુમર્હસિ ।
શ્રી શઙ્ખઃ –
હન્ત તે કથયિષ્યામિ કથાં પાપપ્રણાશિનીમ્ ॥

૫. પુરા વિરિઞ્ચિપ્રમુખૈઃ અમરૈઃ અસુરાર્તિતૈઃ ।
દશગ્રીવવધાર્થાય પ્રાર્થિતોઽભૂત્ જનાર્દનઃ ॥

૬. ભૂત્વા દાશરથી રામો દેવકાર્યમસાધયત્ ।
ભૂત્વા તદનુજઃ શેષઃ સૌમિત્રિરિતિ વિશ્રુતઃ ॥

૭. રામમારાધયામાસ ભક્ત્યા પ્રયત માનસઃ ।
કૃતકૃત્યો રામભદ્રઃ સીતયા સહ ધર્મવિત્ ॥

૮. ભ્રાતૃભિઃ સહિતઃ દારૈઃ અનુરક્તૈઃ મહાત્મભિઃ ।
દશવર્ષસહસ્રાણિ કૃત્વા રાજ્યમખણ્ડકમ્ ॥

૯. ધર્મં સંસ્થાપયામાસ ચતુર્ભિઃ ચરણૈઃ વિભુઃ ।
એવં ચિરગતે કાલે સમાદિષ્ટઃ સ્વયમ્ભુવા ॥

૧૦. યમ ; તુ યતિરૂપેણ તત્રાયોધ્યાં સમાયયૌ ।
આગતં તં સમભ્યર્ચ્ય રામો વિજ્ઞાય વિશ્વકૃત્ ॥

૧૧. એકાન્તે શમનં નીત્વા યતિના એન વિસ્મયાત્ ।
મન્ત્રયામાસ કાર્યાણિ યાનિ લોકહિતાય વૈ ॥

૧૨. તદા લક્ષ્મણમાહૂય દ્વારરક્ષાર્થમન્વિશત્ ।
યાવત્ સંપ્રેષયામ્યેનં યતિનં કાર્યવાદિનમ્ ॥

૧૩. તસ્માત્ મામનનુજ્ઞાય કોઽપિ મા ગચ્છતુ ધ્રુવમ્ ।
યદ્યાગમિષ્યત્યન્યોઽત્ર પુરુષઃ કાર્યવિઘ્નકૃત્ ॥

૧૪. ત્વચ્છિરઃછેદનં મન્યે મદાજ્ઞાલઙ્ઘનાદહમ્ ।
પ્રાયશ્ચિત્તં ન સન્દેહો યુજ્યતાં દ્વારલક્ષણમ્ ॥

૧૫. ઇતિ લક્ષ્મણમાદિશ્ય યતિના તેન રાઘવઃ ।
સહ સમ્મન્ત્રયામાસ વિજને સ્વચિકીર્ષિતમ્ ॥

૧૬. તદન્તરાયયૌ યોગી દુર્વાસા હ્યતિમન્યુમાન્ ।
તં દૃષ્ટ્વા લક્ષ્મણઃ કિઞ્ચિત્ સમુદ્વિગ્નમના ઇવ ॥

૧૭. પ્રણમ્યપાદયોઃ તસ્મૈ બૃસીમાસ્વેત્યકલ્પયત્ ।
ઇત્થમઞ્જલિસંસક્તમૌલિના પ્રાર્થિતોઽમુના ॥

૧૮. ચણ્ડકોપકલાક્રાન્તદન્તચ્છદવિલમ્બિના ।
વ્યાજહાર મુખેનાસૌ વાચં હાલાહલાક્ષરમ્ ॥

૧૯. દુર્વાસાઃ –
દ્રષ્ટુમિચ્છામિ સૌમિત્રે મુહૂર્તેસ્મિન્ રઘૂત્તમમ્ ।
યદિ વિઘ્નો ભવેદત્ર સકુલં ત્વાં શપામ્યહમ્ ॥

૨૦. ઇતિ વાદિનિ વૈ તસ્મિન્નિર્દયે બડવાગ્નિવત્ ।
માસ્તુ મદંશભૂતાનાં બ્રહ્મશાપોઽતિદારુણઃ ॥

૨૧. અહમેકો ભવિષ્યામિ સાપરાધો મહીપતેઃ ।
ઇતિ નિશ્ચિત્ય સૌમિત્રિઃ ચિન્તયાન્તરદહ્યત ॥

૨૨. અન્તર્ગન્તવ્યમધુના ભવતા કરુણાત્મના ।
ઇત્યુક્ત્વા સં પ્રણમ્યાસૌ માર્ગમસ્મૈ સમાદિશત્ ॥

૨૩. રામોઽપિ સહ સમ્મન્ત્ર્ય પ્રેષયિત્વા યતિં પુનઃ ।

તં મુનિં પૂજયામાસ પાદ્યાર્ઘ્યાસનવન્દનૈઃ ॥

૨૪. તદાત્રેયોઽપિ તં નત્વા લબ્ધકામઃ પ્રસાદયન્ ।
સંપ્રતસ્થે પ્રહૃષ્ટાત્મા વનં મુનિ નિષેવિતમ્ ॥

૨૫. રામો લક્ષ્મણમાહૂય કુપિતો વાક્યમબ્રવીત્ ।
શ્રી રામઃ –
વધાર્હઃ ત્વં હિ સૌમિત્રે મમાજ્ઞામાર્ગલઙ્ઘનાત્ ॥

૨૬. પૂર્વોપકારકર્માણિ કૃતાનિ ભવતા મયિ ।
રુન્ધન્તિ માં યદદ્યૈવ તસ્માત્ ત્યાગો વધાધિકઃ ॥

૨૭. ત્વાં દ્રષ્ટું નૈવ શક્નોમિ ગચ્છ શીઘ્રં યથેપ્સિતમ્ ।
ઇત્યુક્તવતિ વૈ તસ્મિન્ રામે રમયતાં વરે ॥

૨૮. લક્ષ્મણઃ શોકસન્તપ્તઃ પરિક્રમ્ય પ્રણમ્ય તમ્ ।
નિરયાત્ રાજભવનાત્ એકાકી વિનતાનનઃ ॥

૨૯. નિયમ્ય વાચમાત્માનં અન્તરાર્થિઃ ચ કેવલમ્ ।
ઉત્તરેણ વિનિષ્ક્રમ્ય દ્વારેણ મહતા પુનઃ ॥

૩૦. સંપ્રાપ ચ મહારણ્યં નાનામૃગનિષેતમ્ ।
ઉદીચ્યાં દિશ્યયોધ્યાઃ તાર(તીર)કૂટ ઇતિ શ્રુતઃ ॥

૩૧. પર્વતઃ તસ્ય પર્યન્તે વનં સાન્તપનાભિધમ્ ।
નાનાતરુલતાકીર્ણં નાનામુનિનિષેવિતમ્ ॥

૩૨. તસ્મિન્ મહાતરુચ્છાયા શીતલે ભૂતલે શુભે ।
આસ્તીર્ય દર્ભાન્ પ્રાગગ્રાન્ અસીનોઽયમુદઙ્મુખઃ ॥

૩૩. નિવર્ત્ય વિષયેભ્યઃ સ્વમિન્દ્રિયાણાં કુલં બલાત્ ।
અન્તરાનીય ચાત્માનં નિર્મલે સ્વાન્તપઙ્કજે ॥

૩૪. પ્રાણાદિવાતસ્તબકં સુષુમ્નાયાં સમુન્નયન્ ।
યોગાધારણસામર્થ્યનિશ્ચલાઙ્ગોઽસ્તસમ્ભ્રમઃ ॥

૩૫. દધ્યાવધ્યાત્મભાવેન રામપાદાબ્જમાદરાત્ ।
ઇત્થમેયુષિ વૈ તસ્મિન્ પ્રાયઃ પ્રમુદિતાશયે ॥

૩૬. આવિરાસીત્ પુરઃ તસ્ય દુર્વાસાઃ તાવત્ આત્મવાન્ ।
પ્રાહ લક્ષ્મણમાહૂય વાણીં તાપાપહારિણીમ્ ॥

૩૭. દુર્વાસાઃ –
પ્રસાદયે ત્વાં સૌમિત્રે શ્રુણુ મે વચનં હિતમ્ ।
ત્વમેવ સર્વલોકાનામાધારો હેતુરીશ્વરઃ ॥

૩૮. ત્વમેવ સાક્ષાત્ વિશ્વાત્મા શેષો નારાયણઃ સ્વયમ્ ।
અવતીર્ણસ્ય પૂજાર્થં રાઘવાનાં કુલે વિભો ॥

૩૯. અનુજ્ઞાતોऽસિ સૌમિત્રે વધાયાસુરરક્ષસામ્ ।
અનુકુર્વન્ પ્રિયં નિત્યં મનોવાક્કાયકર્મભિઃ ॥

૪૦. અમુક્તપાર્શ્વસંસેવી તુલ્યહર્ષપ્રિયે રતઃ ।
કૃતવાનસિ પાપ્માનં પ્રિયબુધ્યા પ્રસાદતઃ ॥

૪૧. અભિષેકવિઘાતે તુ કેકેય્યા વિહિતે સતિ ।
ઉક્તવાન્ નિગ્રહં રાજ્ઞો યત્તત્ પાપં સુદારુણમ્ ॥

૪૨. તદહો રઘુવીરસ્ય ચિત્તક્ષોભમકલ્પયત્ ।
ધર્માત્માનો દયામૂર્તેઃ અપ્રિયં કૃતવાન્ અતઃ ॥

૪૩. અન્યત્ ચ શ્રૂયતાં સાધો ભવતા યદનુષ્ઠિતમ્ ।
માયાસીતે વિનાશે તુ ભવતા ધર્મદૂષણમ્ ॥

૪૪. તદ્દારુણમઘં મન્યે ભવતા સમુપાર્જિતમ્ ।
અનયો પાપયોસ્તાત પ્રાયશ્ચિત્તં મહામતે ॥

૪૫. વર્તનીયં ત્વયા તત્ર સ્થાવરત્વં ન સંશયઃ ।
લોકસઙ્ગ્રહમન્વિચ્છન્ અન્યથા કર્તુમીશિતુઃ ॥

૪૬. યે ધર્મખણ્ડનં કુર્યુઃ યે ગુરૂન્ ભર્ત્સયન્તિ હિ ।
નિર્દિષ્ટા ધર્મશાસ્ત્રેષુ તેષાં તુ તરુતા ધ્રુવમ્ ॥

(અન્તઃસંજ્ઞાઃ ભવન્ત્યેતે સુખદુખસમન્વિતાઃ સ્થાવરાઃ – મનુસ્મૃતિઃ)
૪૭. ઇત્થં મુનીન્દ્રેણ વચો ધર્મ્યં સ લક્ષ્મણઃ ।
શ્રવણાભ્યાં સમારોપ્ય તુતોષ હૃદયે સ્મરન્ ॥

૪૮. આત્મનઃ પાપશાન્ત્યર્થં તરુતામનુભાવયન્ ।
કિઞ્ચિત્ ઉન્મીલ્ય નયને સમદ્રાક્ષીત્ કૃતાઞ્જલૌ ॥

૪૯. અઙ્ગુલીયકસંસક્તમહામાણિક્યદર્પણે ।

પ્રતિબિમ્બં નિજં તત્ર કલામાવેશયત્ સ્વકમ્ ॥

૫૦. તત્ર દૈવાત્ ઇવાગત્ય દમ્પતી તાપસોત્તમૌ ।
પ્રણમ્ય લક્ષ્મણં મૂર્ધ્ના વચનં ચેદમૂચતુઃ ॥

૫૧. નમસ્તુભ્યં ભગવતે વિશ્વાધારાય વિષ્ણવે ।
આદિભૂતાય ભૂતાનાં શેષાયાનન્તમૂર્તયે ॥

૫૨. વિજ્ઞાપ્ય શ્રૂતયાં દેવ સુતીર્થે તપ આસ્થિતે ।
વિપ્રવંશસમુદ્ભૂતૌ સન્તાનાર્થમુમાપતિઃ ॥

૫૩. પ્રાદુર્ભૂતઃ પ્રસાદ્યૈવં પ્રેષયામાસ તેઽન્તિકમ્ ।
પ્રાયોપવેશં કૃત્વાન્ય દેવં રામાનુજં વિભુમ્ ॥

૫૪. પ્રણમ્ય ગૃહ્ણતાં તસ્માત્ તત્કરાઙ્ગુલિભૂષણમ્ ।
તસ્મિન્ બ્રહ્મણિ સંલીને તચ્છરીરમકલ્મષમ્ ॥

૫૫. ગઙ્ગામ્ભસિ વિક્ષિપ્ય ગન્તવ્યં સ્વગૃહં પ્રતિ ।
યદા તસ્મિન્ મહારત્ને સઞ્જાતે તૈજસાઙ્કુરે ॥

૫૬. યુવયોઃ ઉદિતઃ પુત્રો લોકત્રયમહોદયઃ ।
ઇત્યુક્ત્વાન્તર્હિતે તસ્મિન્ આવાં સઞ્જાતકૌતુકૌ ॥

૫૭. ત્વામેવ શરણં પ્રાપ્તૌ જાનીહિ પુરુષોત્તમ ।
એતદાકર્ણ્ય વચનં લક્ષ્મણો રાઘવાનુજઃ ॥

૫૮. પ્રસન્નાત્મા દદૌ તાભ્યામૂર્મિકાં રત્નભૂષિતામ્ ।
તસ્મિન્ વૈ મિથુને હૃષ્ટે દુર્વાસસિ મુનૌ સ્થિતે ॥

૫૯. યોગમાર્ગેણ ભગવાન્ પરિત્યજ્ય સ્વકાં તનુમ્ ।
વ્યોમયાનઃ સંપ્રતસ્થે સૂર્યવૈશ્વાનરપ્રભઃ ॥

૬૦. પપાત કુસુમાકારા વૃષ્ટિઃ અમ્બરમણ્ડલાત્ ।
તુષ્ટુવુઃ ચ તદા દેવાઃ પ્રહૃષ્ટાઃ નારદાદયઃ ॥

૬૧. બ્રહ્મલોકાય ભગવાન્ આત્રેયોઽપિ પ્રતસ્થિવાન્ ।
તૌ દમ્પતી ચ સંહૃષ્ટૌ સમાદાય મહદ્વપુઃ ॥

૬૨. પ્રક્ષિપ્ય જાહ્નવી તોયે તસ્મિન્ તુ દ્રવતે પુનઃ ।
સ્નાત્વા સન્તર્પ્ય ગઙ્ગાયાં વિધિનૈવ પિતૄન્ સુરાન્ ॥

૬૩. કૃતકૃત્યૌ દક્ષિણાશાં પ્રાપ્ય સ્વભવનં મુદા ।
તામ્રાયા દક્ષિણે તીરે મહાબકુલકાનને ॥

૬૪. નિજધર્મરતોઽધ્યાસ્તે સ વિપ્રો ભાર્યયા સમમ્ ।
નિજાઙ્ગકે પ્રતિષ્ઠાપ્ય તામિમામણિમુદ્રિકામ્ ॥

૬૫. તત્રૈવારાધયામાસ સન્તાનાર્થં દ્વિજો વિભુમ્ ।
તાવદારભ્ય તત્પત્ની સાન્તર્વર્ત્ની વ્યજાયત ॥

૬૬. મણિરત્નમિવોદ્ભૂતમાશ્ચર્યં કિઞ્ચિદઙ્કુરમ્ ।
દૃષ્ટ્વા હર્ષમવાપ્યોચ્ચૈઃ ભાર્યયા સહ ભૂસુરઃ ॥

૬૭. અસૂત તાવત્તનયં સૈષા વિપ્રેન્દ્રગેહિની ।
મહદ્દુન્દુભિનાદેન પૂર્યમાણનભસ્થલાત્ ॥

૬૮. વિકીર્યમાણજાલાનિ બ્રહ્માદ્યાઃ તુષ્ટુવુઃ સુરાઃ ।
મહાનામાનિ પુણ્યાનિ પ્રોચ્ચરન્તો મુદાન્વિતાઃ ॥

૬૯. અનન્તો ભૂધરોઽસ્વપ્નો મણિબીજો મણિદ્રુમઃ ।
અમૃતાત્મવાન્ યોગી ભૂમણ્ડલશિખામણિઃ ॥

૭૦. વરદો મુદ્રિકાઙ્કુરો વનસ્પતિકુલેશ્વરઃ ।
દ્વાદશૈતાનિ નામાનિ પ્રજલ્પન્તો પુનઃપુનઃ ॥

૭૧. દેવદેવમનન્તાખ્યં પૂજયામાસુરાદરાત્ ।
તમેવમર્ભકં દૃષ્ટ્વા તેજોરાશિમકલ્મષમ્ ॥

૭૨. તસ્ય ચિઞ્ચાતરોર્મુલે ભાસયન્તં દિશો દશ ।
આનર્ચુઃ અક્ષતૈઃ પુષ્પૈઃ બ્રહ્માદ્યાઃ પ્રેમનિસ્સ્વનાઃ ॥

૭૩. દિગીશાઃ સેશ્વરાઃ સર્વે સેનાભિઃ વિષ્વગર્ભકમ્ ।
આશીર્ભિઃ વર્ધયામાસુઃ હવિર્ભિરિવ પાવકમ્ ॥

૭૪. તતો વાગાહ વ્યોમ્ન્યેષા ધારેવામ્બરમણ્ડલાત્ ।
અસાવંશેન સઞ્જાતઃ વાસુદેવસ્ય વીર્યવાન્ ॥

૭૫. વિષ્વક્સેન ઇતિ ખ્યાતઃ વિષ્વક્સેનાવૃતો યતઃ ।
લોકવન્દ્યો લોકપૂજ્યો જેતા દૈતેયરક્ષસામ્ ॥

૭૬. સત્વરં હિ સમુદ્ભૂતાં વાણીમાકર્ણ્ય તે સુરાઃ ।
વિષ્વક્સેનમમું પ્રોચુઃ વિસ્મયોત્ફુલ્લલોચનાઃ ॥

૭૭. સોઽપિ વૃક્ષો મહાનાસીત્ મહાસ્કન્ધપ્રવાલવાન્ ।
વૈનતેયરથો વિષ્ણુઃ તાવદાગત્ય ગૌરવાત્(કૌતુકાત્) ॥

૭૮. તમેનમઙ્કમારોપ્ય દત્વા તસ્મૈ વરાન્ બહૂન્ ।
સારૂપ્યં ચ સમસ્તાનાં પાર્ષદાનાં મહાત્મનામ્ ॥

૭૯. આધિપત્યમદાત્ તસ્મૈ વૃક્ષરાજસ્ય સન્નિધૌ ।
અગ્નિધૃત્ તનયો યસ્માત્ આગ્નીધ્રમિતિ તં વિદુઃ ॥

૮૦. તમન્વશાત્ ગિરા રાજન્ અર્ભકં ગરુડધ્વજઃ ।
તત્ર વર્ષસહસ્રં તુ વિષ્વક્સેનો મહામતે ॥

૮૧. આરાધ્ય પિતરાવેતૌ દત્વાન્તે મોક્ષમુદ્રિકામ્ ।
મામુપેહિ તતો વત્સ સ્વસ્ત્યસ્તુ જગતામિતિ ॥

૮૨. તમુક્ત્વા વૃક્ષમાશિષ્ય તત્રૈવાન્તરધીયત ।
ઇત્થં ભગવતા ભૂપતે  કૢપ્તાં લીલામાલોક્ય વિસ્મિતાઃ ॥

૮૩. દેવાઃ ચ સહ સિદ્ધૌઘૈઃ જગ્મુર્વૈ ત્રિદશાલયમ્ ।
સોગ્નિધૃત્ સહ પત્નીકો બન્ધુભિશ્ચ સમન્વિતઃ ॥

૮૪. પુત્રમેનં સમાશ્લિષ્ય સંપ્રાપ પરમાં મુદમ્ ।
પુણ્યૈર્દ્વાદશભિઃ નામ્નાભિઃ સ્તુવન્તઃ તત્ર યોગિનઃ ॥

૮૫. તમાનર્ચ્ય મહાવૃક્ષં વિષ્વક્સેનં ચ ભૂપતે ।
તત્રૈવ વાસં વિદધુઃ સ્વર્ગસ્થા ઇવ દેવતાઃ ॥

૮૬. યે તત્ર માનવાઃ પ્રાપ્ય તીર્થેષુ કૃતમજ્જનાઃ ।
પૂજયિત્વા મહાવૃક્ષં જીવન્મુક્તા ન સંશયઃ ॥

૮૭. એવં શેષાખ્યવૃક્ષસ્ય માહાત્મ્યં પાપનાશનમ્ ।
વિજ્ઞાય દેવતાઃ સર્વાઃ વિતેનુઃ કૃત્તિમુત્તમામ્ ॥

૮૮. વિનિદ્રસ્યાદિવૃક્ષસ્ય રમદેવ્યાઃ મહાત્મનઃ ।
વૈનતેયસ્ય વિષ્ણોઃ ચ સમવાયો યતઃ પ્રભોઃ ॥

૮૯. તસ્માત્ તત્સદૃશં નાસ્તિ બ્રહ્માણ્ડગહ્વરે ।
ચિઞ્ચાશાખી રમાભિખ્યા શ્રીપુરી બકુલાટવી ॥

૯૦. પ્રણવસ્થાનનગરી પ્રાક્તના પાપહારિણી ।

ઇત્યમર્ત્યા પ્રજલ્પન્તો મુક્તિભાજો ન સંશયઃ ॥

૯૧. અતઃ પરં પ્રવક્ષ્યામિ શ્રુણુ ભૂપ મહામતે ।
તતોઽપિ કિઞ્ચિત્ આગ્નેય્યાં હરિઃ ત્રૈલોક્યપુજિતઃ ॥

૯૨. શેષપર્યઙ્કશયને યોગનિદ્રામુપાસતે ।
તમેનમીશિતારં તં કુર્વાણં વિધિસઙ્ગ્રહમ્ ॥

૯૩. વિતરન્તં ધનં ભૂરિ ભક્તેભ્યો ભક્તવત્સલઃ ।
દયાતરઙ્ગિતાપાઙ્ગકુબેરો નિધિલબ્ધયે ॥

૯૪. વિધિના ચિરમારાધ્ય શઙ્ખપદ્માદિકાન્ નિધીન્ ।
તામ્રાયા વસુધારાખ્યે તીર્થે સ્નાત્વા યથાવિધિ ॥

૯૫. તત્પુણ્યગૌરવાત્ રાજન્ પ્રસાદાત્ શાર્ઙ્ગધન્વનઃ ।
પ્રાર્થિતાન્ ચ વરાન્ પ્રાપ્ય નિધીનામીશ્વરોઽભવત્ ॥

૯૬. તદાદિ વસુધારાખ્યં તીર્થં ત્રૈલોક્યપૂજિતમ્ ।
તત્તીર્થે વસુધારાખ્યે સ્નાત્વા નિક્ષેપનાયકમ્ ॥

૯૭. યે ભજન્તિ નરાઃ તેષાં કરસ્થાઃ સર્વસમ્પદઃ ।
તસ્માત્ પ્રાચ્યાં મહીપાલ ક્ષેત્રં ક્રોશદ્વયાત્તતઃ ॥

૯૮. વિષ્ણોઃ પ્રિયકરં દિવ્યં વરુણાશ્રમસંજ્ઞિતમ્ ।
તત્ર માકરિકે તીર્થે સ્નાત્વા વૈ વરુણો વિભુઃ ॥

૯૯. ભજતે સ્મ વાસુદેવં તં વૈનતેયરથં પુરઃ ।
દૃષ્ટ્વા પરમસન્તુષ્ટઃ તુષ્ટાવ પુરુષોત્તમમ્ ॥

૧૦૦. વરુણઃ અત્ ઠેન્તિરુપ્પેરૈ –
જયદેવ જગન્નાથ રમાનાથ દયાનિધે ।
પ્રસીદ દેવદેવેશ શરણં ત્વામુપૈમ્યહમ્ ॥

૧૦૧. શઙ્ખચક્રધરાશેષદોષશોષણભાસ્કર ।
પ્રસીદ દેવદેવેશ શરણં ત્વામુપૈમ્યહમ્ ॥

૧૦૨. સમસ્તદૈત્યાહઙ્કારનિર્વાપણવિચક્ષણ ।
પ્રસીદ દેવદેવેશ શરણં ત્વામુપૈમ્યહમ્ ॥

૧૦૩. લક્ષ્મીરમણ રાજીવનવામ્ભોરુહલોચન ।
પ્રસીદ દેવદેવેશ શરણં ત્વામુપૈમ્યહમ્ ॥

૧૦૪. સમસ્તબન્ધો વિસ્તારકૃપાપીયૂષવારિધે ।
પ્રસીદ દેવદેવેશ શરણં ત્વામુપૈમ્યહમ્ ॥

૧૦૫. લસન્માણિક્યખચિતકિરીટાઙ્ગદભૂષણ ।
પ્રસીદ દેવદેવેશ શરણં ત્વામુપૈમ્યહમ્ ॥

૧૦૬. દેવાસુરમુનીન્દ્રાદ્યૈઃ વન્દ્યમાનપદદ્વય ।
પ્રસીદ દેવદેવેશ શરણં ત્વામુપૈમ્યહમ્ ॥

૧૦૭. રમાનાથ જગન્નાથ મન્નાથ જગતામ્પતે ।
પ્રસીદ દેવદેવેશ શરણં ત્વામુપૈમ્યહમ્ ॥

૧૦૮. ઇત્થં સંસ્તુવતા તેન વરુણેન મહાત્મના ।
વાસુદેવઃ પ્રસન્નાત્મા દદૌ તસ્મૈ વરાન્ બહૂન્ ॥

૧૦૯. જેતુકામાય દૈત્યાદીન્ દદૌ પાશમનુત્તમમ્ ।
સ્વકુણ્ડલમણિસ્તોમકિરણારુણિતામ્બુનિ ॥

૧૧૦. તીર્થે મલયનન્દિન્યાઃ પ્રભામાદાય પાણિના ।
મકરં દત્તવાન્ વિષ્ણુઃ વાહનં વિજયાવહમ્ ॥

૧૧૧. તાવદમ્બરમાર્ગસ્થાઃ સિદ્ધાશ્ચ સનકાદયઃ ।
ઉચ્ચૈર્જજલ્પુઃ સન્તુષ્ટાઃ પાશપાણિમમું મુદા ॥

૧૧૨. મકરાયોધનરથં દૈત્યારિમિતિ સમ્ભ્રમાત્ ।
ઇત્થં દૈવાત્ વરં પ્રાપ્ય વરુણો યાદસાં પતિઃ ॥

૧૧૩. નિર્જિત્ય દાનવાન્ સર્વાન્ રાજસૂયં ચકાર હ ।
તસ્માત્ માકરિકં નામ તીર્થં ત્રૈલોક્યપાવનમ્ ॥

૧૧૪. તત્ર સ્નાત્વા મહાતીર્થે દેવં દૃષ્ટ્વા જનાર્દનમ્ ।
પૂજયન્તિ જનાઃ તેષાં મોક્ષલક્ષ્મી કરસ્થિતા ॥

૧૧૫. ઇત્થં તસ્મૈ વરાન્ દત્વા સન્તુષ્ટો મધુસૂદનઃ ।
પૂજ્યમાનઃ સિદ્ધગણૈઃ તત્રૈવાન્તરધીયત ॥

૧૧૬. તદાદિ વારુણં ક્ષેત્રં પ્રશસ્તં ભુવનત્રયે ।
તત્ર નિત્યં હરિસ્સાક્ષાત્ રમતે રમયા સહ ॥

૧૧૭. તસ્માત્ હરિપદં નામ ક્ષેત્રમાહુઃ મનીષિણઃ ।

અત્ર શ્રીભૂમિસહિતં દેવં પશ્યન્તિ માનવાઃ ॥

૧૧૮. સ્નાત્વા તુ માકરે તીર્થે તર્પયિત્વા પિતૃન્ સુરાન્ ।
તત્ર શ્રીભૂમિસહિતં દેવં પશ્યન્તિ માનવાઃ ॥

૧૧૯. ન પિબન્તિ પુનઃ સ્તન્યં માતુઃ તે નાત્ર સંશયઃ ।
ઇત્થં હરેઃ પ્રિયતમાનિ નવાનિ પુણ્યા-
ન્યાલોકનાત્ અખિલકલ્મષનાશનાનિ ॥

૧૨૦. સ્થાનાનિ યન્નયનવર્ત્મગતાનિ તેષાં
જાગર્તિ મુક્તિકમલા કરપઙ્કજેષુ ।
યત્કીર્તનાત્ શ્રવણતો મનનં નરાણાં
વ્યક્તં ભવેત્ ફલમનેકમખાવભૃથ્યમ્ ।
તસ્માદિમામહરહઃ શ્રુણુયાત્ પઠેત્ વા
નાસૌ પ્રયાતિ વિપદં હરિવાક્પ્રમાણમ્ ॥

ઇતિ દ્વિષષ્ટિતમઃ અધ્યાયઃ ।  Pro.Total = 5997 + 120 = 6117.

## ત્રિષષ્ટિતમઃ અધ્યાયઃ

સોમારણ્યમહિમાનુવર્ણનમ્ ।

૧. વીરસેનઃ –
નમસ્તુભ્યં ભગવતે હરયે પરમાત્મને ।
પુરુષાય પુરાણાય મોહાપનયભાસ્વતે ॥

૨. અમન્થધરાપેક્ષમવાસુકિભૂષણમ્ ।
કથામૃતમિદં મન્યે ત્વન્મુખામ્ભોજનિસ્સૃતમ્ ॥

૩. શ્રવણાભ્યાં પિબન્ મર્ત્યઃ કથામૃતરસાયનમ્ ।
ન તૃપ્તિમુપગચ્છામિ હવિષા વીતિહોત્રવત્ ॥

૪. ભૂયોઽહં શ્રોતુમિચ્છામિ કથાં પાપપ્રણાશિનીમ્ ।
સોમારણ્યે મહારણ્યે શઙ્ખરાજપુરીરિતા ॥

૫. કાદમ્બરીં સમુદ્વાહ્ય શઙ્ખરાજઃ પ્રતાપવાન્ ।
રાજ્યં ચકાર ધર્મેણ યથા સ્વાયમ્ભુવો મનુઃ ॥

૬. યત્ર શમ્ભુરુમાનાથો રમાનાથોઽપિ માધવઃ ।

નિત્યં દધાતે સાન્નિધ્યં ઇતિ પૂર્વં શ્રુતં મયા ॥

૭. તત્ર ક્ષેત્રસ્ય માહાત્મ્યં ભૂયોઽપિ મુનિપુઙ્ગવ ।
વદ વિસ્તાર્ય ભગવન્ યોગીન્દ્ર કરુણાનિધે ॥

૮. ઇતિ પૃષ્ટઃ તદા યોગી સાદરં ભૂબલારિણા ।
કિઞ્ચિત્ સમાધિના ચિત્તે વિચાર્ય સકલં મુનિઃ ॥

૯. સ્મયમાનઃ તમાહૂય રાજાનં વચનામૃતૈઃ ।
વર્ધયન્ આશિષા પ્રાહ પર્જન્ય ઇવ વૃષ્ટિભિ ;॥

૧૦. શઙ્ખઃ –
હન્ત તે કથયિષ્યામિ કથાં પાપપ્રણાશિનીમ્ ।
કથૈકદેશશ્રવણાત્ સ્મરણાત્ અપિ જલ્પનાત્ ॥

૧૧. નિર્મુક્તપાતકાઃ યાન્તિ પરમાનન્દમક્ષયમ્ ।
પાતકાનાં ચ સર્વેષાં કૃતાનાં જન્તુભિર્ભુવિ ॥

૧૨. પ્રાયશ્ચિત્તાય જયતે કથેયં બ્રહ્મચોદિતા ।
પુરા કશ્ચિત્ મહીપાલો માનસાઙ્ગ ઇતિ શ્રુતઃ ॥

૧૩. પાઞ્ચાલાનામધિપતિઃ શૂરઃ શૂરજનેડિતઃ ।
સર્વવિત્ સર્વધર્મજ્ઞઃ સર્વશાસ્ત્રવિશારદઃ ॥

૧૪. પ્રતાપેન સમોઽર્કેણ પ્રતાપેન ઇન્દુના સમઃ ।
તેજસા વહ્નિસઙ્કાશો બુધ્યા ગુરુરિવાપરઃ ॥

૧૫. કન્દર્પસદૃશો રૂપે બલેન હરિણા સમઃ ।
એવમાશ્ચર્યસૌભાગ્યસાગરો ભૂપુરન્દરઃ ॥

૧૬. પરીત્ય સકલામુર્વીં જિત્વા શત્રૂન્ સ્વવિક્રમૈઃ ।
આશાપાલાન્ વશે કૃત્વા રથેનાકાશગામિના ॥

૧૭. અવતીર્ય શનૈરુર્વીં પાર્શ્વે હિમવતો ગિરેઃ ।
કસ્યચિત્ સાલવૃક્ષસ્ય મૂલે સ્થાપ્ય રથં નિજમ્ ॥

૧૮. અશ્વાન્ વિમુચ્ય મેધાવી પાયયિત્વોદકં તતઃ ।
સહ સૂતેન વૃક્ષસ્ય નિષસાદ સમીપતઃ ॥

૧૯. તાવત્કલાકલારાવૈઃ બૃહત્સેનો મહીપતિઃ ।
તસ્ય રાજ્ઞઃ તુ નિગમં પ્રાપ ભૃત્યજનૈઃ સહ ॥

૨૦. તાવત્તમાગતં સ્નિગ્ધં મિત્રં પ્રિયસખં નૃપમ્ ।
બૃહત્સેનં સમાયાન્તં ચિરાદૃષ્ટં સુહૃત્તમમ્ ॥

૨૧. પ્રેમ્ણા ચૈનં સમાલિઙ્ગ્ય સ્વાસને સન્નિવેશ્ય ચ ।
અન્તઃપુરે પુરે ચૈવ કોશે રાષ્ટ્રે ચ બન્ધુષુ ॥

૨૨. પપ્રચ્છ કુશલં પ્રેમ્ણા માનસાઙ્ગો મહીપતિઃ ।
પૃચ્છ્યમાનઃ તદા તેન શોકોપહતચેતનઃ ॥

૨૩. તૂષ્ણીં બભૂવ પુરતઃ તદા કિઞ્ચિત્ અવાઙ્મુખઃ ।
ઇતિ શોકપરિપ્લુષ્ટે તસ્મિન્ અસ્ય પુરોહિતઃ ॥

૨૪. પાઞ્ચાલેન્દ્રમુવાચેદં સમદુઃખઃ તદિઙ્ગિતૈઃ ।
પુરોહિતઃ –
મહારાજ તવ શ્રીમાન્ વિદુષાં સમ્મતઃ સુહૃત્ ॥

૨૫. વિહાય રાજ્યં નગરં દારાનભિમતાનપિ ।
ત્વામેવ શરણં પ્રાપ શત્રુણા નિર્જિતઃ કિલ ॥

૨૬. શઙ્ખગો નામ બલવાન્ ઇદાનીં મ્લેચ્છભૂપતિ ; ।
પરાજિત્ય બલૈરેનં જગ્રાહ નગરાદિકમ્ ॥

૨૭. પલાયિતોઽયં સઙ્ગ્રામાત્ ગિરિગહ્વરમાશ્રિતઃ ।
ચિન્તાવિષાગ્નિસન્તપ્તઃ કાલં પાલયતિ ધ્રુવમ્ ॥

૨૮. ઇતિ શ્રુત્વાસ્ય વૃત્તાન્તમાખ્યાનં વિસ્તરેણ સઃ ।
બૃહત્સેનં વિષણ્ણાઙ્ગં પાઞ્ચાલોઽભ્યભાષત ॥

૨૯. સખે સંહર સન્તાપં મોહાત્ ઉદ્ધરમાનસમ્ ।
નાશયિષ્યામિ તે શત્રું સમિત્રજ્ઞાતિબાન્ધવમ્ ॥

૩૦. ઇત્યુક્ત્વા ઘોરસઙ્કાશં મહાકાલનલપ્રભમ્ ।
યામ્યમસ્ત્રં સમાધાય મ્લેચ્છમુદ્દિશ્ય ભૂપતિઃ ॥

૩૧. ચિક્ષેપ તરસા કોપાત્ વજ્રં વજ્રધરો યથા ।
સોઽસ્ત્રરાજો મહાતેજાઃ મુક્તસ્તેન મહીભુજા ॥

૩૨. પ્રદ્યોતમાનો ગગનં તાપયન્ સર્વતો દિશઃ ।
દદાહ સકલં સૈન્યં સમન્તાત્ મ્લેચ્છભૂપતેઃ ॥

૩૩. ઉલૂકાખ્યં ચ દુર્ધર્ષં હત્વા મ્લેચ્છમહીપતિમ્ ।
તત્પત્નીમણ્ડલં સર્વં સખીજનસમાવૃતમ્ ॥

૩૪. નિઃશેષં ભસ્મસાત્ કૃત્વા કૃતકૃત્યોઽસ્ત્ર શેખરઃ ।
આસસાદ પુનઃ શીઘ્રં પાઞ્ચાલેન્દ્રકરામ્બુજમ્ ॥

૩૫. ઇત્થં હતે તસ્મિન્ સબલે મ્લેચ્છરાજનિ દુર્મતૌ ।
સ રાજો માનસાઙ્ગઃ તુ બૃહત્સેનં સુહૃત્તમમ્ ॥

૩૬. તત્પુરે સ્થાપયામાસ મન્ત્રિસામન્તબાન્ધવૈઃ ।
સ્વાં પુરીં પ્રયયૌ ધન્વી રથેનાકાશગામિના ॥

૩૭. પૂજ્યમાનઃ પૌરજનૈઃ પ્રવિવેશ નિજાં પુરીમ્ ।
નાનાપતાકસન્નદ્ધમણિપ્રાસાદસઙ્કુલામ્ ॥

૩૮. આસસાદ મહાતેજા નિજમન્તઃપુરં મહત્ ।
તસ્મિન્ પ્રવિષ્ટે સ્વગૃહં ગતે દ્વિત્રિદિને મુદા ॥

૩૯. સંપ્રાપ ચ શનૈરેનં ભૂમિરોગઃ સુદારુણઃ ।
પ્રત્યહં વર્ધમાનઃતુ મૌલિકમ્પવહઃ તદા ॥

૪૦. મુહુર્વિવશતાં પ્રાપ બહુમોહં મુહુર્વ્યથામ્ ।
એવમામયભૂયિષ્ઠે મોહમેયુષિ ભૂપતૌ ॥

૪૧. કૃપયાભ્યાયયૌ યોગીશ્વરઃ કાત્યાયનો મુનિઃ ।
નિશ્ચિતાર્થઃ પુનઃ પ્રાહ સર્વેષામેવ શૃણ્વતામ્ ॥

૪૨. કાત્યાયનઃ -મા ભૈષ્ટ યૂયમદ્યૈવ સત્યાઃ શૃણ્વન્તુ મે વચઃ ।
એનમુદ્ધારયિષ્યામિ રાજાનં વૃજિનાર્ણવાત્ ॥

૪૩. પશ્યન્તુ મન્ત્રિણઃ સર્વે તપોબલમિદં મમ ।
ઇત્યુક્ત્વા વચનં તત્ર જગત્ વિસ્માપયન્ મુનિઃ ॥

૪૪. સંસ્પૃશ્ય ભસ્મનાત્વેનમામૌલિચરણં વિભોઃ ।
યજ્ઞશેષેણ મન્ત્રેણ વાયવ્યાઙ્કુશમુદ્રયા ॥

૪૫. અક્ષીભ્યાન્ત ઇત્યુપાક્રમ્ય મહાપાતકજાલિકામ્ ।
વ્યાધિં સંવેશયામાસ ઘટાત્ ઇવ ઘટે જલમ્ ॥

૪૬. સ્વસ્થદેહઃ તદા રાજા સમુત્તસ્થૌ સુવિસ્મિતઃ ।
સર્વે મુમુદિરે સ્નિગ્ધાઃ તત્રત્યાઃ સહ મન્ત્રિભિઃ ॥

૪૭. માનસાઙ્ગોઽપિ તં પ્રાપ્તં કાત્યાયનં મુનિમ્ ।
સમુત્થાય નમસ્કૃત્વા દત્વા પાદ્યં સમર્હણમ્ ॥

૪૮. કૃતાઞ્જલિપુટો રાજા કાત્યાયનમભાષત ।
માનસાઙ્ગઃ –
ભગવન્ કરુણામૂર્તે પ્રસીદ મયિ સામ્પ્રતમ્ ॥

૪૯. ભવાદૃશાઃ ત્રિજગતીં પૂર્ણકામાઃ ચરન્તિ હિ ।
ભૂતાનુકમ્પાપીયૂષપોષિતસ્વાન્તવૃત્તયઃ ॥

૫૦. માદૃશાનાં તુ રક્ષાર્થં નત્વન્યા ગતિરસ્તિ હિ ।
તસ્માત્ ત્વાં શરણં પ્રાપ્તં દીનં મામગતિં પુનઃ ॥

૫૧. ત્રાતુમર્હસિ કારુણ્યાત્ માતેવ તનયં શિશુમ્ ।
કુતો મે દુર્દશા ચૈષા પિશાચાતિભયઙ્કરી ॥

૫૨. સંપ્રાપ્તો કેન પાપેન બ્રહ્મન્ આખ્યાતુમર્હસિ ।
યેનાહં ભવતા મુક્તઃ સમસ્તાત્ દુરિતાત્ ગુરો ॥

૫૩. ઇતિ પૃચ્છતિ રાજેન્દ્રે નિર્વ્યાજં મુનિપુઙ્ગવઃ ।
આશીર્ભિઃ વર્ધયન્ વાચા વ્યાજહાર કૃતાઞ્જલિમ્ ॥

૫૪. કાત્યાયનઃ-શ્રુણુ રાજન્ પ્રવક્ષ્યામિ યત્તે શોકસ્ય કારણમ્ ।
પુરા પિઙ્ગલકો નામ ગન્ધર્વઃ કામરૂપધૃત્ ॥

૫૫. સ્ત્રિયા સહ સ ગન્ધર્વો વિમાનેનાર્કવર્ચસા ।
પર્યટન્ સર્વતઃ કામી પશ્યન્ ભૂમણ્ડલં મુહુઃ ॥

૫૭. વર્ષમાશ્ચર્યનિલયં કિમ્પુરુષાખ્યમુપાગમત્ ।
તત્ર કશ્ચિત્ ગિરિવરઃ શુચિષ્માન્ ઇતિ વિશ્રુતઃ ॥

૫૮. તસ્ય પાર્શ્વે મહાપુણ્યા દધિસારાભિધા નદી ।
તત્તીરે ભવનં કૃત્વા તપસા મુનિપુઙ્ગવઃ ॥

૫૮. ઉદ્દાલકસુતઃ કશ્ચિત્ નામ્ના કુસુમબિન્દુકઃ ।
તપસ્તેપે હરિં ભક્ત્યા સર્વદેવનમસ્કૃતમ્ ॥

૫૯. સપત્નીકો વસન્ સાક્ષાત્ નારાયણ ઇવાપરઃ ।
તૈઃ સંવર્ધિતા તત્ર પુષ્પવાટી સુગન્ધિની ॥

૬૦. આમોદં પુષ્કરે દૂરાત્ આઘ્રાયાઘ્રાય હર્ષિતઃ ।
નાનાવિધાનિ પુષ્પાણિ તસ્માત્ આહૃત્ય સમ્ભ્રમાત્ ॥

૬૧. તસ્યાઃ કચભરે બધ્વા પ્રિયામામોદયન્ પુનઃ ।
ચચાર વિપિનં પુણ્યં પશ્યન્ અભ્યુદયં તતઃ ॥

૬૨. એતસ્મિન્નન્તરે યોગી કાલ્યં કુસુમબિન્દુકઃ ।
કૃત્વા પુષ્પોપહારાર્થં પુષ્પાહરણકૌતુકી ॥

૬૩. પ્રવિવેશ નિજારામં ન દૃષ્ટ્વા કુસુમાન્વયમ્ ।
ગન્ધર્વેણાહૃતં જ્ઞાત્વા શશાપ કુપિતો મુનિઃ ॥

૬૪. વિષ્ણોરભ્યર્હણાર્થાય કલ્પિતાનીહ મોહતઃ ।
કુસુમાન્યપનીતાનિ યેન કેનચિત્ અત્ર તુ ॥

૬૫. સ પાપી ભાર્યયા સાર્ધં મ્લેચ્છો ભવિતુમર્હતિ ।
ઇતિ તેનેરિતાં વાણીં હાલાહલબલોપમામ્ ॥

૬૬. શ્રુત્વા ભીતઃ સ ગન્ધર્વઃ પ્રણનામ મુનેઃ પુરા ।
યાચમાનં ભયાવિષ્ટં પતન્તં પાદપદ્મયોઃ ॥

૬૭. કૃપાવિષ્ટઃ પુનઃ પ્રાહ શાપાન્તં મુનિપુઙ્ગવઃ ।
યમરાજકરામ્ભોજભૂષણાયિતમૂર્તિમાન્ ॥

૬૮. યોઽસ્ત્રાગ્નિઃ તેન સંસ્પૃષ્ટો ભૂયઃ પ્રાપ્સ્યસિ શોભનમ્ ।
ઇત્યાદિષ્ટો મ્લેચ્છકુલે જાતો જાનીહિ તે રિપુઃ ॥

૬૯. વિપ્રશાપપરાભૂતે ચેતાય નૃપનન્દનઃ ।
બૃહત્સેનસ્ય નગરે દગ્ધો યામ્યાસ્ત્રવહ્નિના ॥

૭૦. પ્રાપ્તવાનસિ યામ્યાસ્ત્રં પ્રીતાત્ પ્રેતપતેઃ પુરા ।
અપ્રત્યક્ષે ત્વયા તાત વિસૃષ્ટોઽસ્ત્રઃ સુદારુણઃ ॥

૭૧. સ તુ રાત્રૌ શયાનઃ તુ મ્લેચ્છરાજઃ સુદુર્જયઃ ।
સુન્દરીણાં સહસ્રેણ હત્યા પાપેન હિંસિતઃ ॥

૭૨. સ્ત્રીહત્યા દારુણા તસ્માત્ ત્વાં ક્લેશયતિ દુર્જયા ।
સેયં હત્યા મહારાજ મયા નિષ્ક્રમિતાધુના ॥

૭૩. દણ્ડે સંસ્થાપિતા મન્ત્રં શક્ત્યા નાન્યેન કેનચિત્ ।
તસ્માત્ સ્ત્રીવધદોષસ્ય પ્રાયશ્ચિત્તં વિધાનતઃ ॥

૭૪. કર્તવ્યં ભવતા રાજન્ નાન્યથા નાશમેષ્યતિ ।
મુક્તશાપઃ સ ગન્ધર્વઃ સંપ્રાપ્ય નિજસમ્પદમ્ ॥

૭૫. તવ પ્રત્યુપકારાય કાઙ્ક્ષત્યેવ યથોચિતમ્ ।
એવમાકર્ણ્ય વૈ રાજા કાત્યાયનસમીરિતઃ ॥

૭૬. પુનઃ પ્રણમ્ય પપ્રચ્છ મુનીન્દ્રં હૃષ્ટમાનસઃ ।
માનસાઙ્ગઃ –
પ્રાયશ્ચિત્તં કથં બ્રહ્મન્ કર્તવ્યં પાપશાન્તયે ॥

૭૭. તદસ્માકં વિશેષેણ કર્તવ્યં વરુણાજ્ઞયા ।
ઇત્યુક્ત્વા પાદયોર્મૂલે પતન્તં રાજનન્દનમ્ ॥

૭૮. સમાશ્વસ્ય મુનિશ્રેષ્ઠો રાજાનં વાક્યમબ્રવીત્ ।
કાત્યાયનઃ –
રાજન્ શ્રુણુ કથાં પુણ્યાં શ્રુતિદૃષ્ટાં વિશેષતઃ ॥

૭૯. પુરાદિસર્ગે ભગવાન્ સુસૃક્ષુઃ સકલાઃ પ્રજાઃ ।
તામસી તનુમાસ્થાય દધ્યૌ કિઞ્ચિત્ સ્વસિદ્ધયે ॥

૮૦. અસત્ પ્રાદુરભૂત્ તાવત્ અનાકારં તમોમયમ્ ।
તદ્ગર્ભાત્ પાપપુરુષાઃ ઘોરાઘોરાશ્ચ જજ્ઞિરે ॥

૮૧. અસૌમ્યરૂપાન્ ઘોરાભાન્ કર્કશાન્ ચ ચતુર્મુખઃ ।
સમુદ્વીક્ષ્ય કિમેતેન પાપેનેતિ વિહસ્ય સઃ ॥

૮૨. વિહાય તાં તનું ભૂયઃ સાત્વિકીં તનુમાસ્થિતઃ ।
ભૂયોઽપિ કિઞ્ચિત્ ચિત્તાબ્જે દધ્યૌ કાર્યં સુદુષ્કરમ્ ॥

૮૩. તત્તેજસાકારં સઞ્જજ્ઞે સર્વતઃ શુભમ્ ।
તદ્ગર્ભાત્ કોમલાકારા સઞ્જાતાઃ ધર્મમૂર્તયઃ ॥

૮૪. ચન્દ્રપાણ્ડરસઙ્કાશાઃ શુક્લામ્બરવિભૂષણાઃ ।
એવં સર્ગં સમાલોક્ય પ્રીતિમાપામ્બુજાસનઃ ॥

૮૫. પાપબીજેન દૈત્યાઃ તુ રાક્ષસાઃ ચ સહસ્રશઃ ।
ધર્મતઃ સમપદ્યન્ત દેવાઃ ઇન્દ્રપુરોગમાઃ ॥

૮૬. આસુર્યેણૈવ શૂદ્રાઃ ચ શ્રુત્યેતરવિધાનતઃ ।

દેવાંશભૂતાઃ વિપ્રાદ્યાઃ વૈદિકાચારશાલિનઃ ॥

૮૭. દેવાનાં ચૈવ વિપ્રાણાં હસ્તે ધર્મં દદૌ વિધિઃ ।
ઇતરેષામદાત્ પાપમેભિર્લોકમવર્તયત્ ॥

૮૮. વર્તમાને જગચ્ચક્રે મર્યાદાપદવીક્રમાત્ ।
અન્યોન્યં વૈરિણઃ તાવત્ પાપાઃ ધર્માઃ ચ ભૂપતે ॥

૮૯. બ્રહ્મહત્યાત્મકે પાપે સર્વતો વ્યાપૃતે ભુવિ ।
સત્બાત્મકે ધર્મપથૌ શેષાઃતત્સૈનિકા અભવન્ ॥

૯૦. એવં તયોરભૂત્ ઘોરં સઙ્ગ્રામઃ શસ્ત્રયોધિનોઃ ।
કાલેન રાજન્ ધર્મોઽયં ક્ષીણસત્વોઽતિદુર્બલઃ ॥

૯૧. સ્વબલૈઃ તુ મૃતપ્રાયૈઃ અપાલયત ભીતવત્ ।
પાપો વિજિત્ય ધર્માન્ તુ બલાત્ આક્રમ્ય દુર્મતિઃ ॥

૯૨. ક્રમેણ નાશયામાસ બ્રાહ્મણાન્ ચ સુરોત્તમાન્ ।
ઇત્થં વિધ્વંસિતે ધર્મે શ્રુતયઃ તુ વિનિન્દિતાઃ ॥

૯૩. દેવાઃ ચ ઋષયઃ ચૈવ ભયોદ્વિગ્ના ક્ષુધાતુરાઃ ।
નત્વા વિજ્ઞાપયામાસુઃ બ્રહ્મણે પાપચેષ્ટિતમ્ ॥

૯૪. શ્રુત્વા તેષાં વચો વેધાઃ કિઞ્ચિત્ સાધ્વસકમ્પિતઃ ।
તૈઃ સહૈવ સમાસાદ્ય શ્વેતદ્વીપં હરેઃ પદમ્ ॥

૯૫. પ્રણમ્ય કથયામાસ તમેતત્ પદ્મસમ્ભવઃ ।
લોકાત્મા શેષપર્યઙ્કાત્ સમુત્થાય વિચિન્તયન્ ॥

૯૬. વૈનતેયં સમારુહ્ય મેરુમાપ મહીધરમ્ ।
સર્વે બ્રહ્મમુખાઃ દેવાઃ ઋષયઃ ચ તપોધનાઃ ॥

૯૭. તમેનમનુજગ્મુઃ તે રાજાનમિવ સૈનિકાઃ ।
તાવત્ કૈલાસભવનાત્ સર્વજ્ઞો વૃષભધ્વજઃ ॥

૯૮. સંસ્મૃતો ગરુડારૂઢઃ પ્રાયાત્ તત્ર હરિઃ સ્વયમ્ ।
એવમેકત્ર મિલિતા બ્રહ્મરુદ્રજનાર્દનાઃ ॥

૯૯. આત્માનં ચિન્તયામાસુઃ યોગક્ષેમાય કેવલમ્ ।
તત્ર વાગાહ કલ્યાણી ગમ્ભીરામ્ભોધિસન્નિભા ॥

૧૦૦. મુઞ્ચન્તુ દેવાઃ સન્તાપં ત્યજન્તુ ભયમુલ્બણમ્ ।
અહમાવિર્ભવિષ્યામિ પાપાનામુપશાન્તયે ॥

૧૦૧. લોકે સંસ્થાપયિષ્યામિ ધર્મમભ્યુદયાત્મકમ્ ।
પાપાન્ વિદ્રાવયિષ્યામિ ભવન્તુ સુખિનઃ સુરાઃ ॥

૧૦૨. ઇત્યુક્ત્વા વરદે વાક્યે માલા કાઞ્ચનપુષ્કરાત્ ।
કોટિસૂર્યપ્રતીકાશા મહાકાઞ્ચનપુષ્કરા ॥

૧૦૩. સમન્તાત્ કુસુમામોદૈઃ પૂરયન્તી જગત્ત્રયમ્ ।
યત્સુમસ્પન્દસઞ્જાતમન્દમારુતવિદ્રુતાઃ ॥

૧૦૪. સમજાયન્ત વૈ પાપા નિર્વીર્યા વિબલૌજસઃ ।
અક્ષયાઃ બલવન્તશ્ચ ધર્મોઽપિ નિરતા ભવન્ ॥

૧૦૫. બ્રાહ્મણાઃ ચૈવ ગાવઃ ચ વેધાઃ ચ સહ યોગિભિઃ ।
સંપ્રાપુઃ પરમાનન્દે ષટ્પદા ઇવ માધવે ॥

૧૦૬. યા લોકમાતા મહતી માયા માયાપહારિણી ।
અષ્ટલક્ષ્મીતિ વિખ્યાતા સર્વદેવનિવાસભૂઃ ॥

૧૦૭. તસ્યાઃ કણ્ઠે મહારાજ પપાત સ્રગિયં શુભા ।
તાં તુષ્ટુવુઃ બ્રહ્મમુખ્યાઃ દેવાશ્ચ પરમર્ષયઃ ॥

૧૦૮. નિપેતુઃ કલ્પકોત્થાનિ કુસુમાનિ સમન્તતઃ ।
સ્વસ્ત્યસ્તુ જગતાં નિત્યમિત્યુક્ત્વા સામ્બુજાસના ॥

૧૦૯. તાવદન્તરાદાભિઃ સ્તૂયમાના ચરાચરૈઃ ।
વ્યાપ્તમેતત્ જગચ્ચક્રં સૌમાઙ્ગલ્યમહોદયૈઃ ॥

૧૧૦. દૃષ્ટ્વા દેવાશ્ચ સંહૃષ્ટાઃ સ્વાનિ સ્વાનિ પદાન્યગુઃ ।
સૈષા માલા મહારાજ ગૌરીકન્ધરમેત્ય ચ ॥

૧૧૧. અલઙ્કૃત્ય પુનસ્કન્ધમાદિશમ્ભોરનુગ્રહાત્ ।
કુમ્ભજાય પુનર્દત્તા સૈષા મલયનન્દિની ॥

૧૧૨. સર્વમન્ત્રમયી સર્વદેવતા શક્તિરૂપિણી ।
તીર્થાત્મિકા દેવરૂપા સર્વદેવમયી પુનઃ ॥

૧૧૩. સર્વક્રતુમયી કર્મરૂપા તત્ફલરૂપિણી ।
તામ્રેતિ તામ્રપર્ણીતિ માલા મલયજેતિ ચ ॥

૧૧૪. જપતામપિ જન્તૂનાં મહાપાતકનાશિની ।
અસ્યાં તુ વર્તમાનાયાં જીવાનાં દક્ષિણાપથે ॥

૧૧૫. કઃ પાપઃ કાપિ વા માયા કો મોહઃ કા ચતુર્ગતિઃ ।
મુઞ્ચ રાજન્ ભયં શોકં ધૈર્યમાલમ્બ્ય ચેતસા ॥

૧૧૬. અદ્યૈવ વિજયાભિખ્યે મુહૂર્તે કાર્યસિદ્ધિદે ।
પ્રયાણાયાદ્ય રથં શીઘ્રં અરોહાન્તઃપુરાન્વિતઃ ॥

૧૧૭. ઇત્યુક્તો ગુરુણા રાજા સંપ્રહૃષ્ટતનૂરુહઃ ।
આરુરોહ રથં શીઘ્રં બ્રાહ્મણૈશ્ચ સહ મહાત્મભિઃ ॥

૧૧૮. સ્તૂયમાનઃ પૌરજનૈઃ સૂતમાગધબન્દિભિઃ ।
આશીર્ભિઃ વર્ધિતો હૃષ્ટો બ્રાહ્મણૈઃ આપ્તવાદિભિઃ ॥

૧૧૯. મહારાજઃ સ્ત્રિયા યુક્તઃ પ્રતસ્થે મલયાત્મજામ્ ।
ભ્રામ્યમાણેષુ ચક્રેષુ ચલમાનેષુ વાજિષુ ॥

૧૨૦. રાજા પરમસંહૃષ્ટઃ તં પ્રણમ્ય મહામુનિમ્ ।
મેઘગમ્ભીરયા વાચા વ્યાજહાર કૃતાઞ્જલિઃ ॥

૧૨૧. ભગવન્ સા કથં પુણ્યા નદી પરમપાવની ।
સ્નાતવ્યા કથમસ્માભિઃ વર્તનીયા કથં પુનઃ ॥

૧૨૨. બ્રૂહિ મે સ્નાનજં પુણ્યં તદ્વિધિં ચ મહામતે ।
શ્રી શઙ્ખઃ–
ઇતિ પૃષ્ટો નરેન્દ્રેણ મુનિઃ કાત્યાયનોઽબ્રવીત્ ॥

૧૨૩. સર્વેષુ દત્તકર્ણેષુ જનેષુ પરિતો નૃપમ્ ।
વિચાર્ય સર્વશાસ્ત્રાણિ નિશ્ચિતાર્થઃ પ્રસન્નધીઃ ॥

૧૨૪. ઉવાચ વચનં ધીમાન્ અશેષશ્રુતિમઙ્ગલમ્ ।
કાત્યાયનઃ–
રાજન્ મહાનદીમેનાં પ્રાપ્ય વાચા સ્તુવન્ નમન્ ॥

૧૨૫. નારાયણ હરે શમ્ભો માતઃ પાહિ તરઙ્ગિણી ।
ઇત્યુચ્ચૈર્વ્યાહરન્ મર્ત્યાઃ સ્નાત્વા તદમલામ્ભસિ ॥

૧૨૬. સદ્યો દ્વાદશકૃચ્છ્રસ્ય ફલં પ્રાપ્નોત્યસંશયમ્ ।

તીર્થે તુ પાપનાશાખ્યે મેષમેયુષિ પૂષણિ ॥

૧૨૭. અષ્ટાક્ષરં મહામન્ત્રં પઞ્ચાક્ષરમથાપિ વા ।
જપ્ત્વા સોમનાથસ્ય દર્શનં ચ કરોતિ યઃ ॥

The verses from 128 to 132 have connection with the verse no.177।

૧૨૮. બ્રહ્મતીર્થં બૃહત્તીર્થં સોમારણ્યં નદીપુરમ્ ।
સોમેશમાદિપુરુષં શયાનં વિશ્વધારિણમ્ ॥

૧૨૯. ઇત્યેકમુચ્ચાર્ય પ્રમાદાદપિ માનવઃ ।
મહાપાતકયુક્તો વા મુચ્યતે પાપકોટિભિઃ ॥

૧૩૦. ઇત્થં કથામૃતસારં સંપ્રાપ નયનાથિત્યમ્ ।
શૃણ્વન્ સ તુ મહીપતિઃ તેષાં ચન્દનભૂધરઃ ॥

૧૩૧. દદૃશુઃ સર્વતોભદ્રાં મહીં મઙ્ગલમણ્ડિતામ્ ।
અશેષલોકજનનીમાનન્દામૃતવાહિનીમ્ ॥

૧૩૨. તામ્રામાલોકયામાસુઃ સુધામિવતૃષાતુરાઃ ।
સહ સર્વૈર્મુનિગણૈઃ તાં પ્રણમ્ય મહાનદીમ્ ॥

૧૩૩. જપન્ સ્નાત્વા નરો ભૂપ રાજસૂયફલં ભવેત્ ।
વૈશાખે પુર્ણિમાયાં તુ દ્વાદશાક્ષરમુચ્ચરન્ ॥

૧૩૪. ગજેન્દ્રવરદે સ્નાત્વા ઇન્દુવ્રતસહસ્રકમ્ ।
જ્યેષ્ઠસ્ય શુક્લદ્વાદશ્યાં વિષ્ણુસૂક્તં જપન્ નરઃ ॥

૧૩૫. સોમતીર્થે તામ્રપર્ણ્યાં ક્ષયરોગવિનાશને ।
સ્નાતિ યદ્યપિ રાજેન્દ્ર તસ્ય પૂર્ણફલં શ્રુણુ ॥

૧૩૬. ફલં પરાગકૃચ્છ્રાણાં બહૂનાં લભતે દ્વિજઃ ।
દુર્ગાતીર્થાત્ પૂર્વભાગે સોમતીર્થાત્ તુ પશ્ચિમે ॥

૧૩૭. વિષ્ણુતીર્થં મહાપુણ્યં સર્વપાપવિનાશનમ્ ।
સર્વદારિદ્ર્યશમનં સર્વદુઃખનિવારણમ્ ॥

૧૩૮. તત્ર સ્નાત્વા નરો રાજન્ તદ્વિષ્ણુરિતિ વૈ જપન્ ।
અગ્નિષ્ટોમફલં પ્રાપ્ય વિષ્ણુલોકે મહીયતે ॥

૧૩૯. આષાઢદર્શયોર્મર્ત્યો બાણતીર્થે નિમજ્જનાત્ ।
ગાયત્રીં મનસા સ્મૃત્વા સોમપાનફલં ભવેત્ ॥

૧૪૦. શ્રાવણે પૌર્ણમાસ્યાં તુ ક્ષિપ્તપુષ્પવતી જલે ।
રુદ્રસૂક્તં જપન્ સ્નાત્વા સર્વક્રતુફલં ભવેત્ ॥

૧૪૧. તથા ભાદ્રપદે શુક્લચતુર્દશ્યાં હરિં સ્મરેત્ ।
વૈકુણ્ઠકલશાખ્યે તુ વાજપેયફલં સ્મૃતમ્ ॥

૧૪૨. તથૈવાશ્વયુજે માસિ શુક્લપક્ષે દિવામુખે ।
દેવીસૂક્તં પઞ્ચદુર્ગાં શુક્રવારે જપન્ નરઃ ॥

૧૪૩. દુર્ગાતીર્થે શુચિઃ સ્નાત્વા સર્વક્રતુફલં ભવેત્ ।
વન્ધ્યાપિ લભતે પુત્રં ધનકામો ધનં લભેત્ ॥

૧૪૪. મનસા પ્રેપ્સિતં કાર્યં લભતે નાત્ર સંશયઃ ।
વિજયાયાં દશમ્યાં તુ ગૌરીતીર્થે નિમજ્જનાત્ ॥

૧૪૫. જ્યોતિર્વને સર્વભૂમ્યાદાનસ્ય ફલમાપ્નુયાત્ ।
કાર્તિક્યાં કૃત્તિકા યોગે તામ્રા સાગરસઙ્ગમે ॥

૧૪૬. ષડક્ષરેણ સંયુક્તં સ્કન્દસૂક્તં મહામનુમ્ ।
જપન્ સ્નાત્વા ચ યો મર્ત્યો ગોસહસ્રફલં ભવેત્ ॥

૧૪૭. માર્ગશીર્ષે મહાપુણ્યે દ્વાદશ્યામરુણોદયે ।
પુરુષસૂક્તેન મન્ત્રેણ તામ્રપર્ણ્યાં મહામતે ॥

૧૪૮. વ્યાસતીર્થે નરઃ સ્નાત્વા વેદપારાયણં ફલમ્ ।
દ્વાદશ્યામેવ તસ્યાં તુ શ્રીપુરે હરિસન્નિધૌ ॥

૧૪૯. લક્ષ્મીસૂક્તં નારાયણં જપન્ ઉપનિષત્તથા ।
મજ્જનાત્ એવ લભતે કપિલાકોટિદાનજમ્ ।
૧૫૦. પુષ્યે માસિ ચ પૌર્ણમ્યાં પુટાર્જુનપુરે શુભે ।
રુદ્રાનુવાકં જપ્ત્વા ચ રુદ્રમન્ત્રેણ પ્રોક્ષ્ય ચ ॥

૧૫૧. સ્નાત્વા વૃષભલગ્ને તુ બ્રહ્મભૂયાય કલ્પતે ।
તન્માસે શુક્લપક્ષે યઃ ત્રિરાત્રં વ્રતમાચરન્ ॥

૧૫૨. એકાક્ષરં સોમમનું જપન્ મુક્ત્યૈકસાધનમ્ ।
મકરાખ્યે મહાતીર્થે કન્યાદાનશતાદિકમ્ ॥

૧૫૩. શિવરાત્ર્યામુષઃકાલે સોમારણ્યે નદીજલે ।

શૈવં ષડક્ષરં મન્ત્રં જપન્ સ્નાત્વા મહામનુમ્ ॥

૧૫૪. નત્વા દેવં સોમનાથં તપ્તકૃચ્છ્રફલં બહુ ।
શુક્લપક્ષે ચ તન્માસિ પુણ્યે ચ હરિ(બુધ)વાસરે ॥

૧૫૫. સુદર્શનં મહામન્ત્રં જપ્ત્વા નદ્યાં મહાજલે ।
સ્નાત્વા ચિત્રાનદીસઙ્ગે મહાવ્રતફલં ભવેત્ ॥

૧૫૬. તથૈવ ફાલ્ગુને દર્શે શ્યામાતામ્રાસમાગમે ।
પઞ્ચાક્ષરમહામન્ત્રં જપન્ મુક્ત્યૈકસાધનમ્ ॥

૧૫૭. મન્ત્રતીર્થે નરસ્સ્નાત્વા કોટિબ્રાહ્મણભોજનમ્ ।
રામતીર્થે તુ રોહિણ્યાં ક્ષેત્રસ્યવાદિને ॥ (પુનર્વસુ ઇત્યર્થઃ)
૧૫૮. તાં ભદ્રો ભદ્રેત્યુચ્ચૈઃ ગાયન્ સ્નાત્વા મહાજલે ।
બ્રહ્મહત્યાસહસ્રેભ્યઃ મુચ્યતે નાત્ર સંશયઃ ॥

૧૫૯. કૃષ્ણાષ્ટમ્યાં તુ રોહિણ્યાં હંસાખ્યં યાજુષં જપન્ ।
ત્રિણદીસઙ્ગમે સ્નાત્વા મુચ્યતે સર્વપાતકૈઃ ॥

૧૬૦. શ્રવણદ્વાદશી અર્કે મહાપુષ્કરસંજ્ઞિતા ।
ઉપોષિતાઃ પૂર્વદિને ધ્યાત્વા વિષ્ણું જપન્ નરઃ ॥

૧૬૧. બ્રહ્મવિદાપ્નોતિ મન્ત્રેણ સ્મરન્ પાદામ્બુજં હરેઃ ।
ગજેન્દ્રવરદે સ્નાત્વા બ્રહ્મભૂયાય કલ્પતે ॥

૧૬૨. તીર્થે તુ દક્ષિણાવર્તે શિવાગ્રે સ્નાનમાચરેત્ ।
સુપર્ણકર્માનુવાકાન્ તુ જપન્ મુચ્યેત્ ગુરુદ્રુહાત્ ॥

૧૬૩. ચન્દ્રાર્કયોગે વિષુવે રૌદ્રં વા અર્ધે મહોદયે ।
ઘટનાસઙ્ગમે સ્નાત્વા મુચ્યતે ગોવધાત્ નૃપ ॥

૧૬૪. ગજચ્છાયે મહાયોગે છાયાતીર્થે નિમજ્જનાત્ ।
અઘમર્ષણવારુણ્યૌ જપન્ મુચ્યેત મિત્રહા ॥

૧૬૫. મહાજયન્ત્યે રોહિણ્યાં રોમશે સ્નાનમાચરન્ ।
કલ્મષઘ્નીં મનું જપ્ત્વા ભ્રૂણહા મુચ્યતે ધ્રુવમ્ ॥

૧૬૬. વિષ્ણુશૃઙ્ખલકાભિખ્યૌ યથા યોગઃ પ્રવર્તતે ।
વિષ્ણોર્વને નરઃ સ્નાત્વા મુચ્યતે સર્વપાતકૈઃ ॥

૧૬૭. સોમારણ્યે બ્રહ્મતીર્થે સ્નાત્વા રુદ્રેત્યૃચં જપન્ ।

ત્રિરાવૃત્તિઃ પ્રાણરોધાત્ મુચ્યતે સ્ત્રીવધાત્ અપિ ॥

૧૬૮. માસમેકં પ્રતિવર્ષે જપન્ પ્રણવસંયુતમ્ ।
સ્નાત્વા સ્ત્રીવધાત્ પાપાત્ મુચ્યતેऽભિમતં વિધેઃ ॥

૧૬૯. જ્યોતિર્વનાત્ ઉત્તરતઃ તીર્થે ગાન્ધર્વસંજ્ઞિતે ।
અવતે હેલ ઇત્યેનાં જપન્ સ્નાત્વા વિમુચ્યતે ॥

૧૭૦. યદ્દેવા દેવહેલનમનુવાકં સમુચ્ચરન્ ।
ઋષિતીર્થે નરઃ સ્નાત્વા નરઃ પપૈઃ પ્રમુચ્યતે ॥

૧૭૧. પુરોચનસુતાં હત્વા સ્ત્રીહત્યામાપ વૃત્રહા ।
રાજ્યહીનો ગુરોર્વાક્યાત્ સોऽપિ રાજયમવાપ ચ ॥

૧૭૨. બ્રહ્મતીર્થે સ ચ સ્નાત્વા મુક્તઃ સ્ત્રીવધપાતકાત્ ।
અન્યેऽપિ પાપિનો હ્યત્ર સ્નાત્વા મુખ્યપદાન્યગુઃ ॥

૧૭૩. બહુના કિં પ્રલાપેન બ્રહ્મતીર્થં મહત્તરમ્ ।
ઇત્થં તીર્થસ્ય માહાત્મ્યં રાજા શ્રુત્વા પ્રહૃષ્ટધીઃ ॥

૧૭૪. બ્રહ્મતીર્થં સમાગત્ય કાત્યાયનપુરસ્કૃતઃ ।
પઞ્ચાઙ્ગવિધિના સ્નાત્વા ગોદાનાદિ બહૂન્ અદાત્ ॥

૧૭૫. અવરુહ્ય વિમાનાગ્રાત્ સંહૃષ્ટો રાજનન્દનઃ ।
સોમારણ્યં મહારણ્યં સંપ્રાપ શનકૈર્મુદા ॥

૧૭૬. ઊચુર્જયજયેત્યુચ્ચૈઃ માતઃ પાહીતિ હર્ષિતાઃ ।
તમેનં રાજતનયં માન્સાઙ્ગં મહામુનિઃ ॥

૧૭૭. પૂજયિત્વા યથાન્યાયં વિધિજ્ઞઃ તીર્થદેવતાઃ ।
આશાન્તઃ પ્રથમં સમ્યક્ કૃતં સઙ્કલ્પમેવ ચ ॥

૧૭૮. તથાઘમર્ષણં સ્નાનં તર્પણં ચ વિધાનતઃ ।
કારયામાસ ભૂપાય મુનિઃ કાત્યાયનો ગુરુઃ ॥

૧૭૯. ચક્રવત્ભ્રમમાણોऽયં પાપવેગેન ગૌરવાત્ ।
દણ્ડઃ તુ પશ્યતાં તેષાં નિશ્ચલઃ સમપદ્યત ॥

૧૮૦. તતો હર્ષસમાયુક્તો રાજાન્તઃપુર સંયુતઃ ।
દત્વા ભૂરિધનં તત્ર બ્રાહ્મણેભ્યો વિશેષતઃ ॥

૧૮૧. ગવાં શતસહસ્રં તુ બ્રાહ્મણેભ્યો દદૌ પુનઃ ।
સર્વે તમેવ રાજાનમાશીર્ભિઃ અભિવર્ધયન્ ॥

૧૮૨. શ્રીશઙ્ખઃ –
ઇત્થં સર્વેષુ તુષ્ટેષુ વિસ્મિતેષુ પુનઃપુનઃ ।
પુષ્પવૃષ્ટિરભૂત્ પુણ્યા વ્યોમ્નિ દેવપ્રચોદિતા ॥

૧૮૩. દેવાશ્ચ ઋષયસ્સર્વે વિસ્મિતાઃ તં સમસ્તુવન્ ।
તાવત્ પિઙ્ગલકો વ્યોમ્ના વિમાનેનાર્કવર્ચસા ॥

૧૮૪. અનેકસિદ્ધગન્ધર્વૈઃ ગન્ધર્વજ્ઞો મહાત્મભિઃ ।
સમાગત્ય મહીપાલં માનસાઙ્ગં સુહૃત્તમમ્ ॥

૧૮૫. પ્રીણયન્ વચસા પ્રેમ્ણા બભાષે હર્ષગદ્ગદમ્ ।
પિઙ્ગલકઃ –
સખે રાજેન્દ્ર તુષ્ટોઽસ્મિ કર્મણાનુષ્ઠિતેન તે ॥

૧૮૬. મામવેહિ મહારાજ નામ્ના પિઙ્ગલકં પ્રિયમ્ ।
સુહૃત્તમં પૂજયિતું ત્વામિદાનીમુપાગતમ્ ॥

૧૮૭. પૂતાત્માસિ મહાનદ્યાં સ્નાનેનાનેન દાનતઃ ।
ધન્યોઽનુગૃહીતોઽસ્મિ ગુરુણાનેન યોગિના ॥

૧૮૮. અસ્ય તીર્થસ્ય માહાત્મ્યં બ્રહ્મરુદ્રાદિભિઃ સુરૈઃ ।
ઉપગીયમાનં સર્વત્ર લબ્ધં તે પુણ્યગૌરવાત્ ॥

૧૮૯. દદામિ તવ ગાન્ધર્વમસ્ત્રમાશ્ચર્યકારકમ્ ।
અઙ્ગારકમિદં દિવ્યં નિત્યયૌવનકારણમ્ ॥

૧૯૦. મત્તો વૃણીષ્વ ભદ્રં તે સર્વત્ર વિષયાવહમ્ ।
ત્વય્યનુગ્રહકર્તારં પ્રેષયન્ માં દિવૈકસઃ ॥

૧૯૧. યદા યદા માં સ્મરસિ તદાગત્ય સ્વબન્ધુભિઃ ।
કર્તુમિચ્છામિ સાહાય્યં જાનીહિ સુહૃદં હિ મામ્ ॥

૧૯૨. ઇત્થં તેનાર્પિતં પ્રાપ્ય મહાધનમનુત્તમમ્ ।
તમાલિઙ્ગ્ય પુનઃ પ્રેમ્ણા તથાસ્ત્વિત્યબ્રવીત્ દ્વિજઃ ॥

૧૯૩. ગતે ગન્ધર્વભૂપાલે મુનિના તેન ભૂપતિઃ ।
તીર્થદેવીં નમસ્કૃત્ય સોમેશં સંપ્રણમ્ય ચ ॥

૧૯૪. શયાનં પુરુષં નત્વા સંપ્રાપ્ય ચ વરાન્ બહૂન્ ।
પરિક્રમ્ય પુરશ્રેષ્ઠં તામ્રાં ચ મલયાત્મજામ્ ॥

૧૯૫. આશૈલમાવારિનિધિં સ્નાત્વા દત્વા પદે પદે ।
તીર્થાનિ દેવતાગારાણિ નત્વાગસ્ત્યં પ્રણમ્ય ચ ॥

૧૯૬. કાત્યાયને ગુરૌ તસ્મિન્ અનુજ્ઞાપ્ય દયાન્વિતે ।
પ્રસ્થિતે મુનિલોકાય સહ શિષ્યૈર્મુનીશ્વરે ॥

૧૯૭. સાન્તઃપુરો મહીપાલઃ પરિપૂર્ણમનોરથઃ ।
પ્રાયાત્ રથેન મહીપાલઃ પાઞ્ચાલનગરીં શુભામ્ ॥

૧૯૮. ત્રિંશદ્વર્ષસહસ્રાણિ રાજા ભુક્ત્વાપ્યખણ્ડકમ્ ।
સ્થાપ્ય સિંહાસને પુત્રં બ્રહ્મલોકમવાપ્તવાન્ ॥

૧૯૯. ઇત્થં તે કથિતં રાજન્ સોમારણ્યસ્ય વૈભવમ્ ।
પવિત્રં પાપશમનમાયુરારોગ્યસૌખ્યદમ્ ॥

૨૦૦. યે પઠન્તિ નરાઃ ભક્ત્યા યે શૃણ્વન્તિ સાદરમ્ ।
તેષાં પ્રસન્નો ભગવાન્ નીલકણ્ઠો વૃષધ્વજઃ ।
ઐહિકામુષ્મિકાન્ કામાન્ દદાતિ જગતીગુરુઃ ॥

ઇતિ ત્રિષષ્ટિતમઃ અધ્યાયઃ । Pro.Total = 6117 + 200 = 6317.

## ચતુષ્ષષ્ટિતમઃ અધ્યાયઃ

તામ્રાસાગરસઙ્ગમમહિમાનુવર્ણનમ્ ।

૧. અતઃ પરં નૃપશ્રેષ્ઠ તામ્રાસાગરસઙ્ગમઃ ।
તીર્થરાજો મહાઘૌઘસંક્ષોભણવિચક્ષણઃ ॥

૨. યત્ર તામ્રા ત્રિધાભૂતપ્રવાહા સાગરઙ્ગમા ।
મહાપાતકસઙ્ઘાતભસ્મીકરણગૌરવાત્ ॥

૩. અગ્નિત્રયં પ્રશંસન્તિ મુનયો વેદવાદિનઃ ।
આનન્દવિદ્યાસમ્પત્તિવિશ્રાણનવિનોદતઃ ॥

૪. જ્યોતિષાં ત્રિતયં કેચિત્ વેદાનાં ત્રિતયં પરે ।
ત્રિપદી કેવલા સેયં ત્રિમુખા યેન સા નદી ॥

૫. અત્રેતિહાસઃ શ્રોતવ્યઃ પુરા દૃષ્ટો મહીપતે ।
યસ્ય શ્રવણતો મર્ત્યો મુચ્યતે સર્વકિલ્બિષૈઃ ॥

૬. પુરા સહ્યાદ્રિપર્યન્તે કાવેર્યાઃ દક્ષિણે તટે ।
ચન્દ્રશાલેતિ વિખ્યાતા પુરી ભુવનભૂષણા ॥

૭. ચાતુર્વર્ણ્યસ્ય સમાકીર્ણા ધનધાન્યસમાયુતા ।
તસ્યાં કશ્ચિત્ અભૂત્ વિપ્રો નન્દકો નામ નામતઃ ॥

૮. તસ્ય કન્યા વરારોહા વિદ્યુચ્ચલનવિભ્રમા ।
પર્ણાવતીતિ વિખ્યાતા યૌવનાવિષ્ટશૈશવા ॥

૯. યાતે પિતરિ ચાન્યત્ર માત્રા સહ શુભાશ્રયે ।
તાવત્ સદ્યુમ્નકો નામ યોગિનામગ્રણીશ્વરઃ ॥

૧૦. પરિભ્રામ્ય મહીં કૃત્સ્નાં ક્ષુત્ક્ષાન્તોઽધ્વશ્રમાલસઃ ।
નન્દકસ્ય ગૃહં પ્રાપ મૃષ્ટાન્નાપેક્ષયા મુનિઃ ॥

૧૧. સૈષા કન્યા સમાલોક્ય સમાગતમમું મુનિમ્ ।
આસનાદ્યુપચારૈઃ ચ પૂજયિત્વા યથાવિધિ ॥

૧૨. વ્યજનેન પરિશ્રાન્તં વીજયન્તં સવિસ્મયા ।
બભાષે સંપ્રણમ્યૈષા વાચામૃતસદૃક્ષયા ॥

૧૩. પર્ણાવતી-ભગવન્ સ્વાગતં તેઽસ્તુ કુતઃ શ્રાન્તઃ સમાગતઃ ।
પિતરૌ મે ગતૌ કાર્યહેતોઃ ગ્રામાન્તરં પ્રતિ ॥

૧૪. કિં મયા કરણીયં તે સાધયિષ્યામિ તે પ્રિયમ્ ।
તયોક્તસ્સ મુનિઃ પ્રાહ ક્ષુધાર્તોઽસ્મિ વરાનને ॥

૧૫. સ્વાદ્વન્નં દેહિ મે તેન શ્રેયઃ તવ ભવિષ્યતિ ।
ઇત્યુક્તા સા મુનિં વાચા ક્ષણમાસ્વેતિ કન્યકા ॥

૧૬. પ્રસાદ્યન્તર્ગૃહં ગત્વા મૃષ્ટાન્નમદાત્ તદા ।
અન્નમભ્યવહૃત્યાસૌ સૂપસસ્યસમન્વિતમ્ ॥

૧૭. સ સન્તુષ્ટમના યોગી કન્યામાહૂય તામિમામ્ ।
વિદ્યાદ્વયમદાત્ સર્વસત્વાકર્ષણસાધનમ્ ॥

૧૮. કાન્તં કઞ્ચિદ્વરં યોગ્યં કાઙ્ક્ષન્તી જપ્તુમર્હસિ ।
સ કામદો ભવેત્ સ્નિગ્ધો ઇત્યુક્ત્વાન્તર્હિતોઽભવત્ ॥

૧૯. તસ્મિન્ ગતે મુનિવરે પિત્રોઃ સ્વગૃહમેયુષોઃ ।
કદાચિત સ્વગૃહાત્ સૈષા નિર્ગત્ય સ્નાનહેતવે ॥

૨૦. વિલોકયન્તી સર્વત્ર નદ્યાઃ તસ્યાઃ તટદ્વયમ્ ।
દદર્શ દૂરે કમપિ યુવાનં સુન્દરં મુનિમ્ ॥

૨૧. કાઙ્ક્ષન્ત્યથાઙ્ગના રાજન્ સમાહૃષ્ટહૃદમ્બુજા ।
કૌતૂહલસમાવિષ્ટા તાં વિદ્યાં મનસા સ્મરન્ ॥

૨૨. સદ્યઃ પરવશો યોગી તેન મન્ત્રબલેન સઃ ।
તદન્તિકમુપાગમ્ય તામાહૂય નદીતટે ॥

૨૩. વિહૃત્ય ચ લતાગેહે રતાન્તે તામુવાચ હ ।
અહો દુષ્ટે તપસ્યન્તં માં સમાધિમુપાગતમ્ ॥

૨૪. વિદ્યયા વિવશીકૃત્ય તપોનાશઃ ત્વયા કૃતઃ ।
તસ્માત્ ભવ ચિરં કાલં પિશાચી કાનનાન્તરે ॥

૨૫. ઇતિ શપ્ત્વા ગતે તસ્મિન્ સૂત્વા સુતશતં ક્ષણાત્ ।
તૈઃ સુતૈઃ તદ્વને ઘોરે સૈષા જાતા પિશાચિકા ॥

૨૬. સહ પુત્રૈઃ મહાઘોરૈઃ વિકૃતાકારદર્શનૈઃ ।
હિંસન્તી પ્રાણિનઃ તાવત્ પરિચક્રામ કાનનમ્ ॥

૨૭. વનાદ્વનં પરિક્રમ્ય દૂરાદ્દૂરં શનૈઃશનૈઃ ।
રુદન્તી ચ હસન્તી ચ મૂર્ચ્છિતા ચ પુનઃપુનઃ ॥

૨૮. પ્રાપ્ય નાગાટવીં ઘોરાં ભૂતવેતાલસંવૃતામ્ ।
તાવત્ સદ્યુમ્નકો યોગી સહ શિષ્યૈઃ મહાતપાઃ ॥

૨૯. યદૃચ્છયા સમાગત્ય તાં દદર્શ પિશાચિકામ્ ।
પિશાચૈઃ સહ સઙ્કીર્ણાં ધાવન્તીં ચ પદે પદે ॥

૩૦. પર્ણાવતીં તુ વિજ્ઞાય નન્દકસ્ય કુમારિકામ્ ।
મૃષ્ટાન્નદાત્રીં સમયે દયાઞ્ચક્રે દયાનિધિઃ ॥

૩૧. સન્તુષ્ટેન મયા દત્તા સૈષા વિદ્યા સુખપ્રસૂઃ ।
ગતામેનાં મહાઘોરે શોકામ્ભોધાવપાતયત્ ॥

૩૨. અપાત્રે પતિતા વિદ્યા ક્ષીરધારા ઇવોરગે ।

સઞ્જાતા વિષમાયૈવ અવિવેકેન મે ધ્રુવમ્ ॥

૩૩. અસ્તુ કાલવશેનૈવ ભવિતવ્યં ભવત્યહો ।
એનામુદ્ધારયિષ્યામિ પાપાત્ અન્નપ્રદાયિનીમ્ ॥

૩૪. ઇતિ નિશ્ચિત્ય મનસા મન્ત્રપાતૈઃ સહાત્મજામ્ ।
બધ્વા વિકૃષ્ય સંપ્રાપ તામ્રાસાગરસઙ્ગમમ્ ॥

૩૫. તપોબલેન તાં તીર્થે મજ્જયામાસ મન્ત્રવિત્ ।
તત્ક્ષણાદેવ રાજેન્દ્ર મુક્તા પૈશાચબન્ધનાત્ ॥

૩૬. સા તં વિજ્ઞાય યોગીન્દ્રં રુદન્તી સહ પુત્રકૈઃ ।
પપાત પાદયોઃ તસ્ય પાહિ માં પાહિ મામિતિ ॥

૩૭. તામિમાં તરુણીં પ્રેમ્ણા પરિમૃજ્ય સ્વપાણિના ।
યથાવિધાનં તત્પુત્રૈઃ સ્નાનં સઙ્કલ્પપૂર્વકમ્ ॥

૩૮. શાન્તિસૂક્તં મહામન્ત્રં અસ્ય વામ્યં મહામનુમ્ ।
પુરતઃ સ્નાપયામાસ તત્તીર્થે તાં સપુત્રકામ્ ॥

૩૯. તાવદાવિરભૂદ્દેવી તામ્રા કમલમાલિકા ।
બ્રહ્મવિષ્ણુમુખૈર્દેવૈઃ સ્તૂયમાનેદમબ્રવીત્ ॥

૪૦. દેવી –
ત્વયા કૃતમિદં ભદ્રે મુનેઃ કારુણ્યશાલિના ।
ત્વયા નિર્મુક્તપાપેયં કૃતા પર્ણાવતી કિલ ॥

૪૧. મમૈવાનુગ્રહાત્ એષા નિત્યકન્યા ભવેદિયમ્ ।
અસ્યૈવ કમિતા યોગી ભવિતા બ્રાહ્મણાત્મજઃ ॥

૪૨. વત્સકઃ સર્વધર્મજ્ઞઃ ચૈતેષાં જનકઃ ખલુ ।
એતે ચ બાલકાઃ પુત્રાઃ મહાયોગૈકવાદિનઃ ॥

૪૩. અનામયાઃ યોગીન્દ્રાઃ ભવન્ત્યાકલ્પજીવિનઃ ।
બ્રહ્મજ્ઞાઃ ચ ભવિષ્યન્તુ વેદવેદાઙ્ગપારગાઃ ॥

૪૪. ભર્ત્રા સમેતા તેનૈવ ભુક્ત્વા ભોગાન્ યથેપ્સિતાન્ ।
અન્તે તેનૈવ કાન્તેન બ્રહ્મલોકં ગમિષ્યતિ ॥

૪૫. ઇત્યુક્તવત્યામમ્બાયાં અમ્બરાત્ દૈવચોદિતા ।
પપાત મહતી વૃષ્ટિઃ કલ્પકપ્રવાત્મિકા ॥

૪૬. ઇન્દ્રાદ્યાઃ સકલાઃ દેવા ઋષયો નારદાદયઃ ।
વત્સકોઽપિ સમાગત્ય વસિષ્ઠાદ્યૈઃ મહાત્મભિઃ ॥

૪૭. દેવાનાં વચનં શ્રુત્વા તામુદ્વાહ્ય વિધાનતઃ ।
દેવતાભ્યો વરં પ્રાપ્ય સ્વગૃહં પ્રયયૌ મુનિઃ ॥

૪૮. તે ચાસ્યાઃ તનયાઃ સિદ્ધાઃ યોગિનઃ સમ્બભૂવિરે ।
સાપિ દેવી મહાપુણ્યા તામ્રા પાપપ્રણાશિની ॥

દાનાનિ યાનિ પ્રોક્તાનિ વેદાગમશિખાન્તરે ।
તાનિ ત્વયૈવ દત્તાનિ તામ્રામન્તરુપાસના ॥

(refer 64th verse of this chapter)

૪૯. તેષામભીપ્સિતાન્ કામાન્ પ્રણમ્ય મલયાત્મજામ્ ।
તસ્માત્ અસ્યેહ તીર્થસ્ય માહાત્મ્યં પાપનાશનમ્ ॥

૫૦. વાચામગોચરં પુણ્યં શિવો જાનાતિ નાન્યથા ।
સાક્ષાત્ ઉમાસુતઃ સ્કન્દઃ જયન્તીમાસ્થિતઃ પુરીમ્ ॥

૫૧. દેવસેનાં ચ વલ્લીં ચ સમુદ્વાહ્ય જગદ્ગુરુઃ ।
અદ્યાપિ જગતાં પ્રીત્યૈ તીર્થં પાલયતે ગુહઃ ॥

૫૨. શ્રેયાત્મનો મહારાજ તામ્રાસાગરસઙ્ગમે ।
સ્નાત્વા સન્તર્પ્ય દેવર્ષીન્ પિતૄન્ વિપ્રાન્ ધનાદિભિઃ ॥

૫૩. જયન્તી પઠનાચ્ચૈવ પૂર્ણકામા ભવન્તિ તે ।
આસાગરમિમાં દૃષ્ટ્વા પ્રાપ્ય ચન્દનશિલોચ્ચયમ્ ॥

૫૪. ઉભયોઃ તીરયોઃ સ્નાત્વા દૃષ્ટ્વા દેવાન્ ચ યથાવિધિ ।
તર્પયિત્વા પિતૄન્ વિપ્રાન્ બ્રહ્મભૂયાય કલ્પતે ॥

૫૫. શઙ્ખઃ –
યથાજ્ઞાતં યથાગીતં શ્રુતં ગુરુમુખાદ્યથા ।
તાવદ્વિસ્તરતો રાજન્ મયા તે કથિતા કથા ॥

૫૬. ઇતઃ પરં તે જ્ઞાતવ્યં ન પશ્યામિ મહીપતે ।
કૃતકૃત્યોઽસિ ધન્યોઽસિ પૂર્ણકામોઽસિ કેવલમ્ ॥

૫૭. ત્વયા કૃત્વા શતં રાજન્ ક્રતુસર્ગં સદક્ષિણમ્ ।

યાનિ તીર્થાન્યસઙ્ખ્યાનિ પુણ્યાનિ જગતીતલે ॥

૫૮. સ્નાતાનિ તાનિ ભવતા તામ્રામન્તરુપાસતા ।
સપ્તકોટિમહામન્ત્રાઃ વેદાન્તેષુ પ્રકાશિતાઃ ॥

૫૯. તાનિ ત્વયૈવ જપ્તાનિ તામ્રામન્તરુપાસતા ।
ઇત્યુક્ત્વા હર્ષસન્તુષ્ટઃ તુષ્ટાવ જગતીગુરુઃ ॥

૬૦. નમઃ પરમકલ્યાણનિધયે વીતરાગિણે ।
લોપામુદ્રાસમેતાય કુમ્ભોદ્ભૂતાય યોગિને ॥

૬૧. પુણ્યાયૈ પુણ્યભૂતાયૈ પુત્ર્યૈ મલયભૂભૃતઃ ।
સર્વતીર્થસ્વરૂપાયૈ તામ્રપર્ણ્યૈ નમો નમઃ ॥

૬૨. યા પઞ્ચકૃત્યનાદેવ કુજ્જાપાઞ્ચિતદુર્દશા ।
તામાદિલક્ષ્મીં ક્ષેમાય સાક્ષાન્મોક્ષપ્રદાં નમઃ ॥

૬૩. એકત્ર શ્યામલાકારા એકતઃ ચન્દ્રપણ્ડુરમ્ ।
ઉમારમાપતિં દેવં વન્દે હરિહરાકૃતિમ્ ॥

૬૪. તામ્રાં મલયશૈલેન્દ્રમાદિલક્ષ્મીં હરિપ્રિયામ્ ।
લોપામુદ્રામગસ્ત્યં ચ નિત્યમન્તઃસ્મરામ્યહમ્ ॥

૬૫. વ્યાસઃ –
કથાં પુરાતનીં પુણ્યાં વીરસેનો મહીપતિઃ ।
શ્રુત્વા સંહૃષ્ટહૃદયઃ પ્રણનામ મહામુનિમ્ ॥

૬૬. રત્નૈઃ દિગન્તરાનીતૈઃ અનર્ઘ્યૈઃ સૂર્યસન્નિભૈઃ ।
તપ્તકાઞ્ચનપુષ્પૈશ્ચ મુક્તાજાલસમાવૃતૈઃ ॥

૬૭. અભિષિચ્ય ગુરું ભક્ત્યા શઙ્ખાખ્યં યોગિનાં વરમ્ ।
ભક્ત્યા સન્તોષયામાસ સ્તોત્રૈશ્ચ વિવિધૈરપિ ॥

૬૮. પ્રદક્ષિણક્રમેણૈવ તીર્થેષુ સકલેષ્વપિ ।
આસાગરં તુ યયા સ્નાત્વા તીરયોરચલાગ્રતઃ ॥

૬૯. દેવતાઃ પ્રીણયિત્વૈવ પુષ્પપર્ણાર્હણાદિભિઃ ।
પ્રાપ્ય પ્રસાદં શ્રીદેવ્યાઃ દુર્લભં હ્યકૃતાત્મનામ્ ॥

૭૦. અભિવાદ્ય સપત્નીકં મુનીન્દ્રં કુમ્ભસમ્ભવમ્ ।
ગુરુમાપૃચ્છ્ય યોગીન્દ્રં પૂર્ણકામો મહીપતિઃ ॥

૭૧. વિમાનવરમારુહ્ય કામગં કાઞ્ચનોજ્જ્વલમ્ ।
 કૃતાઞ્જલિપુટો રાજા તાં પ્રણમ્ય મહાનદીમ્ ॥

૭૨. વ્યોમયાનઃ સંપ્રતસ્થે દ્વિતીય ઇવ ભાસ્કરઃ ।
 પ્રિયાં પ્રણયિનીં સ્નિગ્ધાં નાદેયીં ધર્મચારિણીમ્ ॥

૭૩. અઙ્કેનાદાય હર્ષેણ પ્રસ્થિતો ભારતીં મહીમ્ ।
 પ્રિયાયૈ દર્શયન્ પુણ્યક્ષેત્રાણિ વિવિધાનિ ચ ॥

૭૪. પાણ્ડ્યરાજમતિક્રમ્ય કાવેરીં સહ્યસમ્ભવામ્ ।
 તુઙ્ગભદ્રાં કૃષ્ણવેણીં શ્રીશૈલં વેઙ્કટાચલમ્ ॥

૭૫. સમતીત્ય ચ ગોકર્ણં સપ્તગોદાવરીતટમ્ ।
 વિન્ધ્યાદ્રિસમ્ભવાં રેવાં ગઙ્ગાં દુરિતભઞ્જનીમ્ ॥

૭૬. સરયૂં પુષ્કલાં ભદ્રાં તથૈવ ચ શરાવતીમ્ ।
 પ્રિયાયૈ દર્શયન્ એવ નગરાણિ વનાન્યપિ ॥

૭૭. ગૌરીગુરુમભિષ્ટૂય હિમવન્તં શિલોચ્ચયમ્ ।
 ગૌરીં ચ શઙ્કરં નત્વા સમુલ્લઙ્ઘ્યામ્બરાધ્વના ॥

૭૮. કિમ્પુરુષવર્ષાલઙ્કારાન્ નાનાજનસમાવૃતાન્ ।
 પ્રવિવેશ પુરીં રમ્યાં પૂજ્યમાનઃ સ્વમન્ત્રિભિઃ ॥

૭૯. ત્રિંશદ્વર્ષસહસ્રાણિ રાજ્યં કૃત્વાપ્યખણ્ડકમ્ ।
 સ્મૃત્વા સ્મૃત્વા ચ તામ્રાયાઃ માહાત્મ્યં પરમાદ્ભુતમ્ ॥

૮૦. અભિષિચ્યાત્મજં શ્રેષ્ઠં સ્નિગ્ધં રાજાસને વિભુઃ ।
 પ્રાર્થ્યમાનં સિદ્ધજનૈઃ બ્રહ્માદ્યૈઃ યોગિસત્તમૈઃ ॥

૮૧. યત્પદં પરમાનન્દનિલયં લયવર્જિતમ્ ।
 સર્વગં સર્વગં શુદ્ધમવાપાસૌ નૃપોત્તમઃ ॥

૮૨. શ્રી સૂતઃ –
 ઇત્થં વ્યાસેન કથિતં શુકાય બ્રહ્મવાદિને ।
 સૈષા તુ પરમાનન્દદર્શિની કલુષાપહા ॥

૮૩. યથાશ્રુતં યથાદૃષ્ટં મયાદ્ય કથિતં દ્વિજાઃ ।
 સૈષા ભગવતી તામ્રા સેવતાં સર્વદેહિનામ્ ॥

૮૪. પ્રયચ્છતિ ન સન્દેહો મોક્ષલક્ષ્મીં સનાતનામ્ ।
 ય ઇમાં પ્રાતરુત્થાય સ્મરન્ મુક્તામણિપ્રસૂમ્ ॥

૮૫. તેષાં ન જાયતે દુઃખં ન દારિદ્ર્યં ન ચામયમ્ ।
 સ્મરન્ સ કીર્તયન્ નિત્યં સર્વાન્ કામાનવાપ્નુયાત્ ॥

૮૬. યે ચેમાં સંહિતાં પુણ્યાં મહાપાતકનાશિનીમ્ ।
 શ‍ૃણ્વન્તઃ ચ પઠન્તશ્ચ કીર્ત્યન્તશ્ચ માનવાઃ ॥

૮૭. તે યાન્તિ શિવસાયુજ્યં નાત્ર કાર્યા વિચારણા ।
 ઇતિહાસમિદં પુણ્યં સર્વપાપપ્રણાશનમ્ ॥

૮૮. લિખિત્વા પૂજયન્ મર્ત્યો ન પાપૈઃ અભિભૂયતે ।
 યે ચેમાં નિયમેનૈવ નિત્યં ગુરુમુખાત્ નરઃ ॥

૮૯. શ‍ૃણ્વન્તો ભક્તિસહિતાઃ તેષાં નાસ્તિ દરિદ્રતા ।
 પુત્રકામો લભેત્ પુત્રં ધનકામો લભેત્ ધનમ્ ॥

૯૦. આયુષ્માન્ પુત્રવાન્ ચૈવ વિદ્યાવાન્ ધનવાન્ નરઃ ।
 જાયતે કીર્તનાત્ અસ્યાઃ કથાયાઃ કલિવર્જિતાઃ ॥

૯૧. ન દુસ્સ્વપાત્ ભયં તેષાં ન પાપેભ્યો ન રોગતઃ ।
 ન શત્રુતો ભયં ક્વાપિ ન ચ વ્યાલભયં તથા ॥

૯૨. ન ચૈનં પીઠયન્ચ્દ્ધા ભૂતવેતાલરાક્ષસાઃ ।
 યથા ગયાયાં સન્તૃપ્તાઃ પિણ્ડદાનાદિભિઃ સુતૈઃ ॥

૯૩. પિતરઃ શ‍ૃણ્વતાં તેષાં તૃપ્તિં યાન્તિ ન સંશયઃ ।
 આયુષ્કરં પુષ્ટિકરં પવિત્રં પાપનાશનમ્ ॥

૯૪. શ્રૂણ્વન્તુ મુનયઃ પુણ્યમિતિહાસં દિને દિને ।
 યે ચ ભક્ત્યા પઠન્ત્યેદં માહાત્મ્યં પુણ્યવર્ધનમ્ ॥

૯૫. તેષાં કરોતિ સૌભાગ્યં હરિઃ શમ્ભુઃ ચતુર્મુખઃ ।
 નાગ્નિપાતો ભવેત્તસ્ય ન તોયાત્ ન ચ મારુતાત્ ॥

૯૬. ન જાયતે ભયં ક્વાપિ માહાત્મ્યસ્યાસ્ય કીર્તનાત્ ।
 યઃ શ‍ૃણોતિ સદા ભક્ત્યા તમેનં સર્વસમ્પદઃ ॥

૯૭. સ્વયં યાન્તિ વિપ્રેન્દ્રાઃ નાત્ર કાર્યા વિચારણા ।
 યસ્તુસાક્ષાત્બ્ સ્વયં શમ્ભુઃ યસ્તુ સાક્ષાત્ સ્વયં હરિઃ ॥

૯૮. લોપામુદ્રાપતિઃ શ્રીમાન્ નિત્યં પ્રીતિસમન્વિતઃ ।
સાન્નિધ્યં કુરુતે નૂનં પઠેત્ યત્ર કથામિમામ્ ॥

૯૯. તસ્માત્ સર્વગુરોરસ્ય પ્રસાદાય દિને દિને ।
શ્રોતવ્યં પઠિતવ્યં હિ બ્રાહ્મણેન વિજાનતા ॥

૧૦૦. યસ્યૈતત્ ભગવત ઈશ્વરસ્ય વિષ્ણોઃ
વીર્યાઢ્યં વૃજિનહરં સુમઙ્ગલં ચ ।
આખ્યાનં પઠતિ શૃણોત્યનુસ્મરેદ્વા
દુષ્કીર્તિં દુરિતમપોહ્ય યાતિ શાન્તિમ્ ॥

ઇતિ ચતુષ્ષષ્ટિતમઃ અધ્યાયઃ । Pro.Total = 6317 + 100 =6417.

ઇતિ તામ્રપર્ણીમાહાત્મ્યં સમ્પૂર્ણમ્ ।

પાટીરશૈલતનયાં તીર્થરાજ્ઞીં સુમઙ્ગલામ્ ।
અનાદિ શક્તિસમ્ભૂતાં શ્રીતામ્રાં પ્રણમામ્યહમ્ ॥

A Note by the Late K. Bhutanatha who transcribed the Devanagari and Tamil text.

CONCLUSION After writing manuscripts as fair copies in Tamil and Devanagari script by me, my guru vidyAratnam has accorded the following AshIrvAdAs for me રામાયણમણયે તામ્રપર્ણીમણયે કૈલાસનાથભૂતનાથાય સર્વાણિ શ્રેયાંસિ સન્તુ ॥ – તામ્રપર્ણીરામયણિયાર્ । I have finished શ્રીતામ્રપર્ણીમાહાત્મ્યપારાયણ first on 6-10-73, Saturday, વિજયદશમી at my house, second pArAyaNa on 26-1-1974 at my guru's house at શુદ્ધમલ્લી and the third પારાયણ on 15-1-1975 at my house–6, Varatharaajapuram, Tuticorin-628002. My bio-data can be studied in my dissertation papers regarding my M.Phil.(Sanskrit). ભદ્રાશ્રીતામ્રપર્ણી જયતિ ભુવિ સદા મઙ્ગલાનાં વિધાત્રી શોભાં પુષ્ટિં ચ દાત્રી લસતિ મણિનિધિ : દક્ષિણાશાપ્રવૃત્તા । સ્થૈર્યં ચ લક્ષ્મીં ચ વિદ્યાં વિતરતિ સતતં સજ્જનાનાં બુધાનાં

લોપામુદ્રાપ્રિયેણ સ્થિરતમમુનિના પાલિતા લોકમાતા ॥ ઇત્થં

કૈ। ભૂતનાથ : 13-3-2015.
G-3, Gitanjali Corner–I, Gitanjali Layout,
H.A.L.–III Stage, New Thippasandra,
Bangalore-560075, Karnataka

*Shri Tamraparni Mahatmyam*
pdf was typeset on November 21, 2023

Please send corrections to *sanskrit@cheerful.com*